अथश्रीमन्महाभारतआनुशासनिकपर्वप्रारंभः

श्रीगणेशायनमः यज्ज्योतिस्तमसःपरंमहदृद्धोनिर्मायरूपाणितन्नामानिप्रविभज्य चव्यवहरत्यैतैर्गुहायांगतम् आनंदैकरसंतदद्वयमथोतन्मायया
देवकीसूनुजीसत्यव्रतीकृतजन्मधृतवत्कृष्णात्रयंपातुनः १ गोपालनारायणलक्ष्मणार्यान् धीरेशगंगाधरनीलकंठान् चिंतामणिंसांबशिवंचनत्वाव्याकुर्म
हेभारतदानधर्मान् २ धर्मस्त्रिषुद्रविणेमशर्मकामंमोक्षांवैकत्रपर्वणिनिरूपितंदात्मुनींद्रः तत्साधनानिस्फबहूनिसहप्रमाणान्यत्रानुशासनिकपर्वणि
वर्णितानि ३ तत्रपूर्वस्मिन्पर्वणिशोकतरणोपायः सम्यक्निरूपितः तथाऽपिदृष्टदुःखंनिदिध्यासनमंतरेणननिवर्ततइतितत्प्रधानंप्रकरणमार-
भमाणःपूर्वंतावत्कृतात्कर्मसंतापभिमित्तंकर्तृत्वाभिमानंत्याजयितुंप्रथमसमध्यायमारभते तत्रापियुक्तिशतेनापिकर्तृत्वाभिमानस्यदुस्त्यजत्वंयुधिष्ठि
रप्रश्नमुखेनादर्शयति । युधिष्ठिरउवाच शमोबहुविधाकारइत्यादिना शमःशोकतरणोपायःबहुविधः कालादृष्टेश्वराद्यधीनोऽयंलोकोनकिं

श्रीगोपालकृष्णायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १ युधिष्ठिरउवाच
शमोबहुविधाकारःसूक्ष्मउक्तःपितामह नचमेहृदयेशांतिरस्तिश्रुत्वेदमीदृशम् १ अस्मिन्नर्थेबहुविधाशांतिरुक्तापितामह स्वकृ
तेकान्नुशांतिःस्याच्छमाद्बहुविधादपि २ शराचितशरीरंहितीव्रव्रणमुदीक्ष्यच शमंनोपलभेवीरदुष्कृतान्येवचिंतयन् ३ रुधिरेणाव
सिक्तांगंप्रस्रवंतंयथाचलम् त्वांदृष्ट्वापुरुषव्याघ्रसीदेवर्षास्विवांबुजम् ४ अतःकष्टतरंकिंनुमत्कृतेयत्पितामहः इमामवस्थांगमितःप्रत्य
मित्रैरणाजिरे ५ तथाचान्येनृपतयःसहपुत्राःसबांधवाः मत्कृतेनिधनंप्राप्ताःकिंनुकष्टतरंततः ६ वयंहिधार्तराष्ट्राश्चकालमन्युवशंगताः
कृत्वेदंनिंदितंकर्मप्राप्स्यामःकांगतिंनृप ७ इदंतुधार्तराष्ट्रस्यश्रेयोमन्येजनाधिप इमामवस्थांसंप्राप्तंयदसौत्वांनपश्यति ८ सोऽहंतव-
घातेकरःसुहृद्वधकरस्तथा नशांतिमधिगच्छामिपश्यंस्त्वांदुःखितंक्षितौ ९ दुर्योधनोहिसमरेसहसैन्यःसहानुजः निहतःक्षत्रधर्मे
ऽस्मिन्दुरात्माकुलपांसनः १०

चित्कर्तुमीष्टइत्यादिविवेकप्रकारः बह्वाकारः सर्वसंकल्पसंन्यासादिस्वरूपः सूक्ष्मोनिर्विकल्पकउक्तः तथाऽपितत्साक्षा
त्काराभावान्नकृतंगोत्रवधाख्यंपापंमांतपत्येवतस्मात्कर्तृत्वादिदोषमपनेतुंनिदिध्यासनाधिकारसिद्ध्यर्थंचेतःशुद्धिकरान्धर्मान्ब्रूहि यैर्विनापूर्वोक्तंसर्वंहृदयेना
वतिष्ठतइत्यभिप्रायः १ अस्मिन्निति यद्धिअचिंतितमेवजायतेतत्कालादिकृतमितिमत्वानधीमतांशोकायभवति यत्तुबुद्धिपूर्वंपापंकृतंतत्कथंमादृशान्आ
स्तिकान्शाब्दिकविवेकमात्रेणनतपेत् अपरोक्षस्यकर्तृत्वादिप्रत्ययस्यपरोक्षेणाकर्तृत्वादिज्ञानेननिवर्तयितुमशक्यत्वादितिभावः २ एतदेवशोककारणं
विवृणोतिशरेतित्वामितिशेषः ३ सीदेसीदामि ४ मत्कृतेमन्निमित्तं प्रत्यमित्रैःअमित्राणांप्रतिकूलैरस्मदीयैरर्जुनशिखंडिप्रभृतिभिः ५.६ वयंहीतिहिश्चा
र्थे कालईश्वरःमन्युःक्रोधःगतिम् ऊर्ध्वलोकंप्राप्स्यामोवाकामपीत्यर्थः ७ अयशोग्रस्तानामस्माकंत्वयमपिलोकोनष्टोनतुपरेवामित्याह इदंत्वित्यादिना ८ ९ १०

११ अभविष्यंईश्वरश्चेत्यर्थः १३ अस्मिन्नितिजन्मांतरे पिप्येनकिल्बिषात् रागादिदोषान्मुच्येमतादृशंधर्मंब्रूहि शोकनाशकस्यतत्त्वज्ञानस्यानेकजन्मसाध्यत्वादि तिभावः १४ यदुक्तंस्वकृतेनेकालुशांतिरिजितत्राह परेति परतंत्रंकालादृष्टेश्वराधीनंनात्मानंत्वंकथंकर्मणांहेतुंपुण्यपापयोः कारणंअनुपश्यसि नकथंचिदात्मनः कर्तृत्वंसंभवतीतिभावः कुतस्तर्हिअहंकरोमीत्यनुभवइत्याशंक्याह सूक्ष्मंहीति आत्मनः कर्तृत्ववदकर्तृत्वंनमानसप्रत्यक्षंकिंत्वतींद्रियं मनस्तुचक्षुरादिवदुष्टंसदन्यथासंतंमात्मानमन्यथाप्रतिपद्यतइतिभावः १५ कर्मप्रयोजकंदेहेंद्रियादिसंघातः प्रयोज्यः तयोश्चबीजांकुरवदन्योन्यजन्यजनकत्वंपरिशेषात्तुआत्मनो

नसंपश्यतिदुष्टात्मात्वामद्यपतितंक्षितौ अतःश्रेयोमृतंमन्येनेहजीवितमात्मनः ११ अहंहिसमरेवीरगमितःशत्रुभिःक्षयम् अभविष्यंयदिपुरासहभ्रातृभिरच्युत १२ नत्वामेवंसुदुःखार्तमद्रक्ष्यंसायकार्दितम् नूनंहिपापकर्माणोधात्रासृष्टाःस्म हेनृप १३ अन्यस्मिन्नपिलोकेवैयथामुच्येमकिल्बिषात् तथाप्रशाधिमांराजन्ममचेदिच्छसिप्रियम् १४ भीष्मउवाच परतंत्रंकथंहेतुमात्मानमनुपश्यसि कर्मणांहिमहाभागसूक्ष्मंह्येतदतींद्रियम् १५ अत्राप्युदाहरंतीममितिहासंपुरातनम् संवादंमृत्युगौतम्योःकाललुब्धकपन्नगैः १६ गौतमीनामकौंतेयस्थविराशमसंयुता सर्पेणदष्टंस्वंपुत्रमपश्यद्गतचेतनम् १७ अथतंस्नायुपाशेनबध्वासर्पममर्षितः लुब्धकोर्जुनकोनामगौतम्याःसमुपानयत् १८ सचाब्रवीदयंतेसपुत्रहापन्नगाधमः ब्रूहिक्षिप्रंमहाभागेवध्यतांकेनहेतुना १९ अग्नौप्रक्षिप्यतामेषछिद्यतांखंडशोपिवा नह्ययंबालहापापश्चिरंजीवितुमर्हति २० गौतम्युवाच विसृजैनमबुद्धिस्त्वमवध्योर्जुनकत्वया कोह्यात्मानंगुरुंकुर्यात्प्राप्तव्यमविचिंतयन् २१ प्लवंतेधर्मलघवोलोकेंभसियथाप्लवाः मज्जंतिपापगुरवःशस्त्रंस्कन्नमिवोदके २२ हत्वाचैनंनामृतःस्याद्यंमेजीवत्वस्मिन्कोत्ययःस्यादयंते अस्योत्सर्गेप्राणयुक्तस्यजंतोर्मृत्योर्लोकंकोनुगच्छेदनंतम् २३ लुब्धकउवाच जानाम्यहंदेविगुणागुणज्ञेसर्वार्तियुक्तागुरवोभवंति स्वस्थस्यैतेतूपदेशाभवंतितस्मात्क्षुद्रंसर्पमेनंहनिष्ये २४ शमार्थिनःकालगतिंवदंतिसद्यःशुचंत्वर्थविदस्त्यजंति श्रेयःक्षयंशोचतिनित्यमोहात्तस्माच्छुचंमुंचहतेभुजंगे २५

कर्तृत्वंसिद्धमित्यस्मिन्नर्थे आख्यायिकामाहअत्रापीति १६ १७ १८ १९ हेतुमेवाह अग्नाविति २० गुरुंपापभारेणनरके मज्जनयोग्यम् प्राप्तव्यंलोकं २१ प्लवंतेदुस्तरार्णवंतरंति मज्जंतिचतत्रैव २२ हत्वेतिकरणत्वंकार्थः भुक्त्वैवहितृप्तोनतुपीत्वेतिवत् एनंहत्वाएतस्यहननेनायंमेपुत्रोऽमृतःस्यात्किंतुमृतःसमृतएव अस्मिन्जीवतितेनवाकोयंअत्ययोनाशःस्यान्नकोपीत्यर्थः उत्सर्गेप्राणोत्सर्गे मृत्योर्लोकंनरकम् २३ सर्वार्तियुक्ताःसर्वेषांपीडयापीडिताः स्वस्थस्यैवनतुदुःखितस्य २४ शमेतिशमयुक्ताः कालेनैवायंनाशितइतिमत्वाशोकंत्यजंति अर्थविदः प्रतीकारज्ञाः शत्रुंहत्वैवसद्यःशोकंत्यजंतीत्यर्थः अन्यस्तुश्रेयःक्षयंसुखनाशंनित्यंमोहाच्छोचति २५

आर्तिः पुत्रशोकजापीडा नित्यायस्तो नित्यमृतः नईशेनसमर्थोस्मि २६ यातनांपीडांपरस्यनेकुर्यः कुर्युर्नकुतश्चिदित्यर्थः मार्दवात् मार्दवमवलंब्य २७ श्रेयः परलोकहितंतदेवअव्ययोलाभः सचशत्रून्हत्वैवलभ्यइत्यध्याहृत्ययोज्यम् यथायजमानःपशुंनिघ्नन्पशुमात्मानंचस्वर्गंनयत्येवंशूरः परंस्वंचेत्यर्थः ततश्च लभ्योलाभार्हः प्रमोऽश्वबलिभ्यः सर्वेभ्यः प्रशस्तः श्रेष्ठश्चस्यात् शत्रुवधाल्लोकद्वयेपिमान्योभवतीत्यर्थः यस्तुअस्मिन्सर्पेकुत्सितेबह्वपकारिणिहंतव्ये कालाल्लाभःस्वमरणादिदृष्टसिद्धिः सएवसत्यः शाश्वतः श्रेयोलाभः सन्नंतत्रएनंहंतुमनिच्छत्याःनस्यात् तस्माद्धंतव्यएवायमित्यर्थः २८ गृह्यनिगृह्यकामा

गौतम्युवाच आर्तिर्नैवंविद्यतेऽस्मद्विधानांधर्मात्मानःसर्वदासज्जनाहि नित्यायस्तोबालकोऽप्यस्यतस्मादीशेनाहंपन्नगस्यप्रमाथे २६ नब्राह्मणानांकोपोऽस्तिकुतःकोपाच्चयातना मार्दवात्क्षम्यतांसाधोमुच्यतामेषपन्नगः २७ लुब्धकउवाच हत्वालाभःश्रेयएवाव्ययस्याल्लभ्योलाभ्यःस्याद्बलिभ्यःप्रशस्तः कालाल्लाभोयस्तुसत्योभवेतश्रेयोलाभःकुत्सितेऽस्मिन्नतेस्यात् २८ गौतम्युवाच कानुप्राप्तिर्गृह्यशत्रुंनिहत्यकाकामाप्तिःप्राप्यशत्रुंनमुक्त्वा कस्मात्सौम्याहंनक्षमेनोभुजंगेमोक्षार्थंवाकस्यहेतोर्नकुर्याम् २९ लुब्धकउवाच अस्मादेकाद्बहवोरक्षितव्यानैकोबहुभ्योगौतमिरक्षितव्यः कृतागसंधर्मविदस्त्यजंतिसरीसृपंपापमिदंजहित्वम् ३० गौतम्युवाच नास्मिन्हतेपन्नगेपुत्रकोमेसंप्राप्स्यतेलुब्धकजीवितंवै गुणंचान्यंनास्यवधेप्रपश्येतस्मात्सर्पंलुब्धकमुंचजीवम् ३१ लुब्धकउवाच वृत्रंहत्वादेवराट्श्रेष्ठभाग्वैयज्ञंहत्वाभागमवापचैव शूलीदेवोदेववृत्तंचरत्वंक्षिप्रंसर्पंजहिमाभूत्तेविशंका ३२ भीष्मउवाच असकृत्प्रोच्यमानापिगौतमीभुजगंप्रति लुब्धकेनमहाभागापापेनैवाकरोन्मतिम् ३३ ईषदुच्छ्वसमानस्तुकृच्छ्रात्संस्तभ्यपन्नगः उत्ससर्जगिरंमंदांमानुषींपाशपीडितः ३४ सर्पउवाच कोन्वर्जुनकदोषोऽत्रविद्यतेममबालिश अस्वतंत्रंहिमांमृत्युर्विवशंयदचूचुदत् ३५ तस्यायंवचनाद्दष्टोनकोपेननकाम्यया तस्यतत्किल्बिषंलुब्धविद्यतेयदिकिल्बिषम् ३६ लुब्धकउवाच यद्यन्यवशगेनेदंकृतंतेपन्नगाशुभम् कारणंवैत्वमप्यत्रतस्मात्त्वमपिकिल्बिषी ३७

प्तिः इष्टलाभःनमुक्त्वाहृदंबध्वा नोऽस्माकमशत्रौभुजंगेकस्मादहंनक्षमे-अपितुक्षमेएव मोक्षेणार्थंश्रेयःकुर्यामेवेत्यर्थः २९ त्यजंतिनाशयंति ३० मेपुत्रकोजीवितंनसंप्राप्स्यते गुणंपुण्यंजीवंजीवंतम् ३१ शूलीयज्ञंहत्वेतिसंबंधः ३२ ३३ संस्तभ्यधैर्यमालंब्य ३४ अचूचुदत् प्रेरितवान् ३५ किल्बिषंचेदस्तितर्हिप्रयोक्तुरेवनप्रयोज्यस्यममशरस्येवेत्यर्थः ३६ यदीतिप्रयोजकवत्प्रयोज्योपिवधकारणत्वाद्वध्यएवेत्यर्थः ३७

मृदितियद्यपिदंडादिवत्त्वंअन्यवशस्तथापिचेतनत्वात्किल्बिषीत्वंवध्यश्चेत्यर्थः ३८ ३९ सर्वइतिचेतनत्वेपिगजादिवत् प्रेर्यत्वेनावशत्वाद्दंडा
दितुल्यत्वमेवममेत्यर्थः ४० अथवेतितेपिआयुधादयोपिअयमर्थः आयुधंहिअयस्कांतवत्प्रहर्तारंप्रयोजयति तेनायुधकर्तापिप्रयोजकस्तस्यचायंकारयिता
प्रहर्तुकामप्रयोजकइत्यन्योऽन्यप्रयोज्यत्वात्कस्यचिद्धंतृत्वमित्यर्थः ४१ फलितमाहएवमिति चेतनत्वाद्वध्यत्वंममचेन्मन्यसेतर्ह्येकस्मिन्वधकार्येसाक्षात्प
रंपरयाप्रहर्तॄणांप्रयोजकत्वमस्तीतिसर्वेषुयथाविभागंकिल्बिषंमन्यस्वेत्यर्थःसमवायेसमुदाये ४२ कर्ताप्रसक्तःक्रियायांत्वमेववध्योसीत्यर्थः ४३ असतीति
यतःकृतेऽपिअसतिदुष्टेकार्येदोषहेतुः कर्तानलिप्यतेतन्नयमनेनतस्मात् चोरादिरप्येवंराज्ञांवध्यःप्रायश्चित्तीच स्यात् तथाचशास्त्रानर्थक्यंप्रेत्यरवादंतिमेचतत्
निस्वादेरप्रामाण्यंचस्यादितिभावः ४४ कार्येति कारणेकर्तरिसतिकुठारोद्यमनादिकार्येणछिदिक्रियाजायते असत्यपिकर्तरि तरुशाखावातनिघर्षेणकार्ये

मृत्पात्रस्यक्रियायांहिदंडचक्रादयोयथा कारणत्वेप्रकल्प्यंतेतथात्वमपिपन्नग ३८ किल्बिषीचापिमेवध्यःकिल्बिषीचासि
पन्नग आत्मानंकारणंह्यत्रत्वमाख्यासिभुजंगम ३९ सर्पउवाच सर्वएतेह्यस्ववशादंडचक्रादयोयथा तथाहमपितस्मा
न्मेनैषदोषोमतस्तव ४० अथवामतमेतत्तेतेप्यन्योऽन्यप्रयोजकाः कार्यकारणसंदेहोभवत्यन्योन्यचोदनात् ४१ एवंसतिनदोषो
मेनास्मिवध्योनकिल्बिषी किल्बिषंसमवायेस्यान्मन्यसेयदिकिल्बिषम् ४२ लुब्धकउवाच कारणंयदिनस्याद्धिनकर्ता
स्यास्त्वमप्युत विनाशकारणंत्वंचतस्माद्वध्योऽसिमेमतः ४३ असत्यपिकृतेकार्येनेहपन्नगलिप्यते तस्मान्नात्रैवहेतुःस्याद्व
ध्यःकिंबहुमन्यसे ४४ सर्पउवाच कार्याभावेक्रियानस्यात्सत्यसत्यपिकारणे तस्मात्समेऽस्मिन्हेतौमेवाच्योहेतुर्विशेषतः
४५ यद्यहंकारणत्वेनमतोलुब्धकतत्त्वतः अन्यःप्रयोगेस्यादन्यःकिल्बिषीजंतुनाशने ४६ लुब्धकउवाच वध्यस्त्वंममदु
र्बुद्धेबालघातीनृशंसकृत् भाषसेकिंबहुपुनर्वध्यःसन्पन्नगाधम ४७ सर्पउवाच यथाहवींषिजुह्वानामखेवैलुब्ध
कर्त्विजः नफलंप्राप्नुवंत्यत्रफलयोगेतथाह्यहम् ४८

णतज्जेनाग्निनावनदाहक्रियाजायते तस्माच्छाखावातइवममापिकर्तृत्वंअप्रयोजकत्वा
त् नदोषहेतुःविशेषाभावादित्यर्थः ४५ यदीति कारणत्वेनप्रयोज्यकर्तृत्वेनत्वमतोहंतर्हिशाखावातवायुरिवममापिप्रयोगेप्रवर्तनेऽन्योऽस्तिकर्तासएवज
न्तुनाशनेकिल्बिषीभवेत् वस्तुतस्तुवायोरिवतस्यापिनकिल्बिषित्वमितिभावः ४६ वध्यइति धीपूर्वकारीहिंस्रस्वभावस्त्वंकृतनैर्घृण्यसाधर्म्यमात्मनोब्रुवा
णोदुर्बुद्धित्वाद्वध्योसीत्यर्थः ४७ एवमृत्विगादिवदन्यप्रेर्यत्वान्नाहंकिल्बिषी किंतुममप्रयोजकएव शास्त्रफलप्रयोक्तृरीतिन्यायादितिसर्पउवाचयथेति ४८
श्रीमद्वेदव्यासायनमः ७ ७ ७ ७ ७ ७ ७ ७ ७

यथाक्षेपंगजोहंति गजंचमहामात्रः प्रेरयति महामात्रंचप्रभुः प्रयुंक्तेप्रभुंचस्तेनापराधइतिस्तेनःस्वापराधेनैवहन्यतेनतत्रराजमहामात्रगजानांदोषगंधोऽ प
एवंभीष्मादीन्नि मतोपिनचगजस्येवनदोषोऽस्तीतिशेषग्रंथतात्पर्यम् मृत्युःप्राणानामपहर्त्रीदेवता ४१ कालेनईश्वरेण ५० ५१ कालात्मकाःकालस्येव १
आत्मास्वभावोयेषांते कालानुसारिणइत्यर्थः ५२ ५३ ५४ ५५ भावाभावौऐश्वर्यानैश्वर्ये ५६ ५७ ५८ ५९ ६० ६१ ६२ आर्त्विज्यमित्यो
डुलोमिरितिन्यायेन आत्मनेचयजमानायच यंकामंकामयतेतमागायतीतिश्रुतेश्चा त्विगृत्विजोपिफलांशभाक्त्वमतोमृत्युसर्पौवधस्यकारणंमंतीनअका
रणंभवतइत्याह मृत्युरिति ६३ ६४ आवांदोषेणद्वेषादिनायुक्तौत्वयानमंतव्यौकिंतुविवशौ अतः घ्नतोरप्यावयोर्गजमहामात्रयोरिवनकिल्बिषमस्तीत्याद्गतुः

भीष्मउवाच ॥ तथाब्रुवतितस्मिंस्तुपन्नगमृत्युचोदित आजगामततोमृत्युःपन्नगंचाब्रवीदिदम् ४९ मृत्युरुवाच प्रचोदि
तोहंकालेनपन्नगत्वाममब्रुवम् विनाशहेतुर्नास्यत्वमहं नप्राणिनःशिशोः ५० यथावायुर्जलधरान्विकर्षतिततस्ततः तद्वज्जलदवत्सर्पका
लस्याहंवशानुगः ५१ सात्त्विकाराजसाश्चैवतामसायेचकेचन भावाःकालात्मकाःसर्वेप्रवर्ततेहजंतुषु ५२ जंगमास्थावराश्चैवदिविवाय-
दिवाभुवि सर्वेकालात्मकाःसर्पकालात्मकमिदंजगत् ५३ प्रवृत्तयश्चलोकेस्मिंस्तथैवचनिवृत्तयः तासांविकृतयोयाश्चसर्वंकालात्मकंस्मृ
तम् ५४ आदित्यश्चंद्रमाविष्णुरापोवायुःशतक्रतुः अग्निःखंपृथिवीमित्रःपर्जन्योवसवोदितिः ५५ सरितःसागराश्चैवभावाभावौचपन्नग स
र्वेकालेनसृज्यंतेह्रियंतेचपुनःपुनः ५६ एवंज्ञात्वाकथंमांत्वंसदोषंसर्पमन्यसे अथचैवंगतेदोषेमयित्वमपिदोषवान् ५७ सर्पउवाच
निर्दोषंदोषवंतंवानत्वांमृत्योब्रवीम्यहम् त्वयाहंचोदितइतिब्रवीम्येतावदेवतु ५८ यदिकालेतुदोषोस्तियदितत्रापिनेष्यते दोषोनैवपरीक्ष्यो
मेनत्वत्राधिकृतावयम् ५९ निर्मोक्षस्त्वस्यदोषस्यमयाकार्योयथातथा मृत्योरपिनदोषःस्यादितिमेत्रप्रयोजनम् ६० भीष्मउवाच
सर्पोथार्जुनकंप्राहश्रुतंतेमृत्युभाषितम् नानागसंमांपाशेनसंतापयितुमर्हसि ६१ लुब्धकउवाच मृत्योःश्रुतंमेवचनंतवचैवभु
जंगम नैवतावद्दोषत्वंभवतित्वयिपन्नग ६२ मृत्युस्त्वंचैवहेतुर्हिबालस्यास्यविनाशने उभयंकारणंमन्येनकारणमकारणम् ६३ धिग्
मृत्युंचदुरात्मानंक्रूरंदुःखकरंसताम् त्वांचैवाहंवधिष्यामिपापंपापस्यकारणम् ६४ मृत्युरुवाच विवशौकालवशगावावांनिर्दि
ष्टकारिणौ नावांदोषेणगंतव्यौयदिसम्यक्प्रपश्यसि ६५ लुब्धकउ० युवामुभौकालवशौयदिमेमृत्युपन्नगौ हर्षक्रोधौयथास्यातामेतदि
च्छामिवेदितुम् ६६

विनशावितिऋत्विजोऽपिफलरागिणएवफलमश्नंति नविरक्तस्येतिभावः ६५ युवामिति भोमृत्युपन्नगौयदियुवांकालवशौतर्हि ३
मेममतटस्थस्यपरोपकर्तरिहर्षःअपकर्तरिक्रोधश्चयुवयोरुपरिद्वेषोवायथास्यातांतथाब्रूतंएतत् अहंवेदितुमिच्छामीत्यध्याहारपूर्वकंयोज्यं एवंसर्वस्य एवंपरवशत्वेउ
पकर्त्रपकर्त्रोःस्तुतिनिंदेनस्यातामितिभावः ६६

परस्माथतः परिहारमाह यंति ईश्वराधीनोजनः सदसद्वाकुर्वाणोनरक्तत्योनवानिंद्यइतिभावः ६७ व्यवहारतस्तुमृत्युः पूर्वोक्तमेवपरिहारमाह तस्मादिति दोषण
युक्तावितिशेषः गंतव्योज्ञातव्यो योहिरागादिमान्हंतिसपापेनलिप्यतेतंप्रतिशास्त्रंप्रवर्तते यस्तुनतथानासौदोषभाग्भवति यथोक्तंभगवता यस्यनाहंकृतोभावो
बुद्धिर्यस्यनलिप्यते हत्वापिसइमाँल्लोकान्नहंतिननिबध्यतइति ६८ प्राणिकर्मानुरोधात्सदसद्वाफलंददत् ईश्वरस्तत्प्रयुक्तान्येवानवैषम्यादिभाजोभवंतीत्या

मृत्युरुवाच यांकाचिद्वचश्चास्यात्सर्वाकालप्रचोदिता पूर्वमेवैतदुक्तंहिमयालुब्धककालतः ६७ तस्माद्उभौकालवशावावांनिर्दि
ष्टकारिणौ नावांदोषेणगंतव्यौत्वयालुब्धककर्हिचित् ६८ भीष्मउवाच अथोपगम्यकालस्तुतस्मिन्धर्मार्थसंशये अब्रवीत्पन्नगं
मृत्युंलुब्धंचार्जुनकंतथा ६९ कालउवाच नह्यहंनाप्ययंमृत्युर्नायंलुब्धकपन्नगः किल्बिषीजंतुमरणेनवयंहिप्रयोजकाः ७० अ
कंरोद्यदयंकर्मतन्नोर्जुनकचोदकम् विनाशहेतुर्नान्योस्यवध्यतेयंस्वकर्मणा ७१ यदनेनकृतंकर्मतेनायंनिधनंगतः विनाशहेतुःकर्मास्य
सर्वेकर्मवशावयम् ७२ कर्मदायादवाँल्लोकःकर्मसंबंधलक्षणः कर्माणिचोदयंतीहयथान्योन्यंतथावयम् ७३ यथामृत्पिंडतःकर्ताकु
रुतेयद्यदिच्छति एवमात्मकृतंकर्ममानवःप्रतिपद्यते ७४ यथाच्छायातपौनित्यंसुसंबद्धौनिरंतरम् तथाकर्मचकर्ताचसंबद्धावा
त्मकर्मभिः ७५ एवंनाहंनवैमृत्युर्नसर्पोनतथाभवान् नचेयंब्राह्मणीवृद्धाशिशुरेवात्रकारणम् ७६ तस्मिंस्तथाब्रुवाणेतुब्राह्म
णीगौतमीनृप स्वकर्मप्रत्ययाल्लोकान्मत्वार्जुनकमब्रवीत् ७७ गौतम्युवाच नैवकालोनभुजगोनमृत्युरिहकारणम् स्व
कर्मभिरयंबालःकालेननिधनंगतः ७८ मयाचतत्कृतंकर्मयेनायंमेमृतःसुतः यातुकालस्तथामृत्युर्मुंचार्जुनकपन्नगम् ७९
भीष्मउवाच ततोयथागतंजग्मुर्मृत्युःकालोथपन्नगः अभूद्विशोकोर्जुनकोविशोकाचैवगौतमी ८० एतच्छ्रुत्वाशमंग-
च्छमाभूःशोकपरोनृप स्वकर्मप्रत्ययाल्लोकान्सर्वेगच्छंतिवैनृप ८१ नैवत्वयाकृतंकर्मनापिदुर्योधनेनवै कालेनैतत्कृतंविद्धि
निहतायेनपार्थिवाः ८२ वैशंपायनउवाच इत्येतद्वचनंश्रुत्वाबभूवविगतज्वरः युधिष्ठिरोमहातेजाःपप्रच्छेदंचधर्मवित् ८३
इतिश्रीम० आनुशासनिकेपर्वणिदानधर्मेगौतमीलुब्धकव्यालमृत्युकालसंवादेप्रथमोऽध्यायः १

ह अथेत्यादिना धर्मस्यार्थःफलं तत्रविषयेसर्व
स्यकर्तुःपरवशत्वाद्धर्मवत् धर्मोपिकिंफलंददातिनवेति संशयेच्छेत्तव्ये अब्रवीत्कालः ६९ संगिनामेवधर्माधर्मफलंभवतिनत्वसंगानामस्माकमित्याशयवा
नाह नहीति ७० ७१ ७२ कर्मैवदायादःपुत्रवत्तारकंतद्वान् कर्मसंबंधः कर्मफलयोगः तदेवलक्षणंपुण्यपापवत्ताज्ञापकंयस्यतथा ७३ ७४ ७५ ७६ कर्मैवप्रत्ययः
कारणंयेषांतान्लोकान्स्वर्गनरकादीन् ७७ ७८ तत्कर्मपुत्रशोकप्रदम् ७९ ८० आख्यायिकायाःफलमाहद्वाभ्यांएतदिति ८१ ८२ ८३ इत्यानु० टी० प्रथमोऽध्यायः

अनिवार्यस्यापि मृत्योर्जयं ऊर्ध्वरेताः करोति गृहस्थस्त्वतिथिभक्त्यैव तं जयतीत्याख्यायिकया प्रशंसार्थोऽयमध्यायः पितामहेत्यादि १ धर्मेणैव अर्थप्रयोजनं यत्र तादृशा यार्कार्थितं सहितं किंचिदाख्यानं श्रोतुमिच्छामीत्यर्थः २ तत्त्वेन याथातथ्येन न तु आत्मवपोत्खननादिवदभूतार्थत्वेन ३ ४ ५ ६ ७ ८ ९ १० ११

युधिष्ठिर उवाच पितामह महाप्राज्ञ सर्वशास्त्रविशारद श्रुतं मे महदाख्यानमिदं मतिमतां वर १ भूयस्तु श्रोतुमिच्छामि धर्मार्थसहितं नृप कथ्यमानं त्वया किंचित्तन्मे व्याख्यातुमर्हसि २ केन मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः इत्येतत्सर्वमाचक्ष्व तत्त्वेनापि च पार्थिव ३ भीष्म उवाच अत्राप्युदाहरन्तीममितिहासं पुरातनम् यथा मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ४ मनोः प्रजापते राजन्निक्ष्वाकुरभवत्सुतः तस्य पुत्रशतं जज्ञे नृपतेः सूर्यवर्चसः ५ दशमस्तस्य पुत्रस्तु दशाश्वो नाम भारत माहिष्मत्यामभूद्राजा धर्मात्मा सत्यविक्रमः ६ दशाश्वस्य सुतस्त्वासीद्राजा परमधार्मिकः सत्ये तपसि दाने च यस्य नित्यं रतं मनः ७ मदिराश्व इति ख्यातः पृथिव्यां पृथिवीपतिः धनुर्वेदे च वेदे च निरतो योऽभवत्सदा ८ मदिराश्वस्य पुत्रस्तु द्युतिमान्नाम पार्थिवः महाभागो महातेजा महासत्त्वो महाबलः ९ पुत्रो द्युतिमतस्त्वासीद्राजा परमधार्मिकः सर्वलोकेषु विख्यातः सुवीरो नाम नामतः १० धर्मात्मा को।११।श्चापि देवराज इवापरः सुवीरस्य तु पुत्रोऽभूत्सर्वसंग्रामदुर्जयः ११ सुदुर्जय इति ख्यातः सर्वशस्त्रभृतां वरः दुर्जयस्येन्द्रवपुषः पुत्रोऽग्निसदृशद्युतिः १२ दुर्योधनो नाम महान्राजा राजर्षिसत्तमः तस्येन्द्रसमवीर्यस्य संग्रामेष्वनिवर्तिनः १३ विषये वासवस्तस्य सम्यगेव प्रवर्षति रत्नैर्धनैश्च पशुभिः सस्यैश्चापि पृथग्विधैः १४ नगरं विषयश्चास्य प्रतिपूर्णं तदाभवत् न तस्य विषये चाभूत्कृपणो नापि दुर्गतः १५ व्याधितो वा कृशो वापि तस्मिन्नाभून्नरः क्वचित् सुदक्षिणो मधुरवागनसूयुर्जितेन्द्रियः धर्मात्मा चानृशंसश्च विक्रान्तोऽथाविकत्थनः १६ यज्वा च दान्तो मेधावी ब्रह्मण्यः सत्यसंगरः न चावमन्ता दाता च वेदवेदाङ्गपारगः १७ तं नर्मदा देवनदी पुण्या शीतजला शिवा चकमे पुरुषव्याघ्रं स्वेन भावेन भारत १८ तस्यां जज्ञे तदा नद्यां कन्या राजीवलोचना नाम्ना सुदर्शना राजन्रूपेण च सुदर्शना १९ तादृग्रूपा न नारीषु भूतपूर्वा युधिष्ठिर दुर्योधनसुता यादृगभवद्वरवर्णिनी २० तामग्निश्चकमे साक्षाद्राजकन्यां सुदर्शनाम् भूत्वा च ब्राह्मणो राजन्वरयामास तं नृपम् २१ दरिद्रश्चासवर्णश्च ममायमिति पार्थिवः न दित्सति सुतां तस्मै तां विप्राय सुदर्शनाम् २२ ततोऽस्य वितते यज्ञे नष्टोऽभूद्धव्यवाहनः ततः सुदुःखितो राजा वाक्यमाह द्विजांस्तदा २३ दुष्कृतं मम किं नु स्याद्भवतां वा द्विजर्षभाः येन नाशं जगामाग्निः कृतं कुपुरुषेष्विव २४

१२ १३ १४ दुर्गतः दरिद्रः १५ १६ १७ १८ १९ चकमे कामयामास २१ असवर्णः अक्षत्रियः नदित्सति न दातुमिच्छति २२ वितते त्रेताग्निसाध्ये नष्टः अदर्शनं गतः २३

२५ २६ २७ २८ कल्पंप्रातः २९ दिशंदक्षिणांविजयताविजेतुमि-दो ... च्छता ३२ अहतंनवंवासोयस्यास्ताम् ३३ वसोर्धारांसंततांघृतधारां

नह्यल्पंदुष्कृतंनोस्तियेनाग्निर्नशमागतः भवता ... येनत्वेनैतद्विमृश्यताम् २५ तत्राराज्ञोवचःश्रुत्वाविप्रास्तेभरतर्षभ
नियतावाग्यताश्चैवंपावकंशरणंययुः २६ तान्दर्शयामासतदाभगवान्हव्यवाहनः स्वरूपंदीप्तिमत्कृत्वाशारदर्कसमद्युतिः २७
ततोमहात्मातानाहदहनोब्राह्मणर्षभान्. वरयाम्यात्मनोर्थायदुर्योधनसुतामिति २८ ततस्तेकल्पमुत्थायतस्मैराज्ञेन्यवेदयन्
ब्राह्मणाविस्मिताःसर्वेयदुक्तंचित्रभानुना २९ ततःसराजातच्छ्रुत्वावचनंब्रह्मवादिनाम् अवाप्यपरमंहर्षंतथेतिप्राहबुद्धिमान् ३०प्रा
याचतचंनंशुल्कंभगवंतंविभावसुम् नित्यंसान्निध्यमिहतेचित्रभानोभवेदिति ३१ तमाहभगवानग्निरेवमस्त्वितिपार्थिवम् ततःसा
न्निध्यमद्यापिमाहिष्मत्यांविभावसोः ३२ दृष्टंहिसहदेवेनदिशोविजयतातदा ३२ ततस्तांसमलंकृत्यकन्यामाहतवाससम् ददौदुर्योध
नोराजापावकायमहात्मने ३३ प्रतिजग्राहचाग्निस्तुराजकन्यांसुदर्शनाम् विधिनावेददृष्टेनवसोर्धारामिवाध्वरे ३४ तस्यारूपेण
शीलेनकुलेनवपुषाश्रिया अभवत्प्रीतिमानग्निर्गर्भंचास्यामनोदधे ३५ तस्यासमभवत्पुत्रोनाम्नाग्नेयःसुदर्शनः सुदर्शनस्तुरू
पेणपूर्णेंदुसदृशोपमः ३६ शिशुरेवाध्यगात्सर्वंपरंब्रह्मसनातनम् अथौघवान्नामनृपोनृगस्यासीत्पितामहः ३७ तस्याथौघ
वतीकन्यापुत्रश्चौघरथोभवत् तामोघवान्ददौतस्मैस्वयमोघवतींसुताम् ३८ सुदर्शनायविदुषेभार्यार्थेदेवरूपिणीम् सगृ
हस्थाश्रमरतस्तयासहसुदर्शनः ३९ कुरुक्षेत्रेवसद्राजन्नोघवत्यासमन्वितः गृहस्थश्चावजेष्यामिमृत्युमित्येवसप्रभो ४० तामिति
ज्ञामकरोद्धीमान्दीप्ततेजाविशांपते तामथौघवतींराजन्सपावकसुतोब्रवीत् ४१ अतिथेःप्रतिकूलंतेनकर्तव्यंकथंचन ये
नयेनचतुष्येतनित्यमेवत्वयातिथिः ४२ अप्यात्मनःप्रदानेननतेकार्याविचारणा एतद्व्रतंममसदाहृदिसंपरिवर्तते ४३ गृह
स्थानांचसुश्रोणिनातिथेर्विद्यतेपरम् प्रमाणंयदिवामोरुवचस्तेमसशोभने ४४ इदंवचनमव्यग्राहृदित्वंधारयेःसदा नि
ष्क्रान्तेमयिकल्याणितथासंनिहितेनघे ४५ नातिथिस्तेवमंतव्यःप्रमाणंयद्यहंतव तमब्रवीदोघवतीतथामूर्ध्निकृतांजलिः
नमेत्वद्वचनात्किंचिन्नकर्तव्यंकथंचन ४६ जिगीषमाणस्तुगृहेतदामृत्युःसुदर्शनम् पृष्ठतोन्वगमद्राजन्रंध्रान्वेषीतदासदा
४७

२५ गर्भेपुत्रप्रदाने ३५ दृगभ्यांसहितंसदृशंवक्त्रं पूर्णेंदोरिववक्त्रेउपमासादृश्यंयस्यपूर्णेंदुसदृशोपमः ३६ ३७ ३८ ३९ गृहस्थश्चगृहस्थएव ४० ४१ प्रतिज्ञामेवा
... आत्मनःशरीरस्य ४३ ४४ ४५ प्रमाणंहितत्वापकं किंचिन्नकर्तव्यमितिनअपितुकर्तव्यमेव ४६ पृष्ठतःतस्यांमन्यक्षंगृहेन्वगमत् सदागार्ह
स्थ्यकाले तदाइध्माहरणकाले ४७

१२ बुभूषताभूतिमिच्छता १३ १४ इत्यानुशासनिके पर्वणिटी॰ द्वितीयोऽध्यायः २ ब्राह्मण्यम् १ २ ३ ४ ५. ऋचीकस्यात्मजइत्यत्रअजी
गर्तात्मजइतिबोध्यम् सोजीगर्तसोयवसिमृषिमशनयापरीतंतस्यह्यत्रयःपुत्रा आसन् शुनःपुच्छः शुनःशेपः शुनोलांगूलइतिशुनः शुनःशेपस्यपिताऽजी
गर्तइत्यवगमात् कल्पांतराभिप्रायेणवाइदंज्ञेयम् ६ देवांस्तोषयित्वातैर्मोक्षितः ससुव्रतांविश्वामित्रस्यानुसंप्राप्तइतिसंबंधः ७ नाभिवादयतेनंनमस्कु
र्वंति.अनुस्वारलोपआर्षः देवरातंदेवैर्विश्वामित्रायदत्तंतेनचज्येष्ठकत्वंसंतंशामायेनेतिशेषः ८ बंधुभिर्मुक्तः वसिष्ठशापेनचांडालतांगतत्वात् दिवंयेन

एवत्तेकथितंपुत्रमयाख्यानमनुत्तमम् यथाहिविजितोमृत्युर्गृहस्थेनपुराभवत् १२ धन्यंयशस्यमायुष्यमिदमाख्यानमुत्तमम् बुभू
षताभिमन्तव्यंसर्वदुश्चरिताधहम् १३ इदंचकथयेद्विद्वानहन्यहनिभारत सुदर्शनस्यचरितंपुण्याल्लोकानवाप्नुयात् १४ इतिश्री
महाभारते आनुशासनिकेपर्वणिदानधर्मेसुदर्शनोपाख्यानंनामद्वितीयोऽध्यायः २ युधिष्ठिरउवाच ब्राह्मण्यंयदिदुष्प्राप्यं
त्रिभिर्वर्णैर्नराधिप कथंप्राप्तंमहाराजक्षत्रियेणमहात्मना १ विश्वामित्रेणधर्मात्मन्ब्राह्मणत्वंनरर्षभ श्रोतुमिच्छामितत्वेनतन्मे
ब्रूहिपितामह २ तेनह्यमितवीर्येणवसिष्ठस्यमहात्मनः हतंपुत्रशतंसद्यस्तपसापिपितामह ३ यातुधानाश्चबहवोराक्षसास्तिग्मते
जसः मन्युनाविष्टदेहेनसृष्टाःकालानलोपमाः ४ महान्कुशिकवंशश्चब्रह्मर्षिशतसंकुलः स्थापितोनरलोकेस्मिन्विद्वद्ब्राह्मणसंस्तुतः
५ ऋचीकस्यात्मजश्चैवशुनःशेपोमहातपाः विमोक्षितोमहासत्रात्पशुतामप्युपागतः ६ हरिश्चंद्रक्रतौदेवांस्तोषयित्वात्मतेजसा
पुत्रतामनुसंप्राप्तोविश्वामित्रस्यधीमतः ७ नाभिवादयतेज्येष्ठंदेवरातंनराधिप पुत्राःपंचाशदेवापिशप्ताःश्वपचतांगताः ८ त्रिशं
कुर्बंधुभिर्मुक्तऐक्ष्वाकुःप्रीतिपूर्वकम् अवाक्शिरादिवंनीतोदक्षिणामाश्रितोदिशम् ९ विश्वामित्रस्यविपुलानदीदेवर्षिसेविता कौ
शिकीचशिवापुण्याब्रह्मर्षिसुरसेविता १० तपोविघ्नकरीचैवपंचचूडासुसंमता रंभानामाप्सराःशापाद्यस्यशैलत्वमागता ११
तथैवास्यभयाद्बध्वावसिष्ठःसलिलेपुरा आत्मानंमज्जयन्श्रीमान्विपाशःपुनरुत्थितः १२ तदाप्रभृतिपुण्याहिविपाशाभून्महान-
दी विख्याताकर्मणातेनवसिष्ठस्यमहात्मनः १३ वाग्भिश्चभगवान्येनदेवसेनाग्रगःप्रभुः स्तुतःप्रीतमनाश्चासीच्छापाच्चैनममुंचत १४

नीतः ९ १० पंचचूडाः वलयभेदाअस्याःसा चूडावलयभेदेस्यादितिमेदिनी ११ १२ १३ वाग्भिरिति त्रिशंकुंयाजयन् विश्वामित्रोवसिष्ठपुत्रैःशप्तः श्वप
चस्ययाजकस्त्वंश्वपचोभविष्यसीतितंशापमृतंकर्तुंविश्वामित्रः कस्यांचिदापदिश्वजाघनींचौर्येणार्जयित्वापक्तुमारेभेतामिंद्रःश्येनरूपेणाहृतवान् तावे
तैवायंशापान्मुक्तोववर्षचईजइति देवसेनानामग्रगः श्रेष्ठः इंद्रः १४ ५ ५ ५ ५ ५

ज्वलतितारारूपेणं १५ १६ १७ मतंगस्यब्राह्मण्यांशूद्रज्जातस्यचंडालस्ययथामहतापितपसाब्राह्मण्यमप्राप्यंजातं तथैवैतन्ममभाति त्वंतुयथा
जातंतथावदस्व १८ स्थानेयुक्तं कथंब्राह्मण्यंप्राप्तवान्विश्वामित्र इतिशेषः १९ इतिश्रीमहाभारते आनुशासनिकेपर्वणिटीकायांतृतीयोऽध्यायः ३
श्रूयतां ब्राह्मणेषुपितृऋषित्वंमंत्रद्रष्टृत्वंगोत्रप्रवर्तकत्वंवा १ २ ३ ४ वल्लभोनाम ५ प्रसवेनसोमाभिषवनिमित्तेनअर्थीपुत्रार्थी ६ सुतान्तसो

ध्रुवस्योत्तानपादस्यब्रह्मर्षीणांतथैवच मध्येज्वलतियोनित्यमुदीचीमाश्रितोदिशम् १५ तस्यैतानिचकर्माणितथान्यानिचकौरव
क्षत्रियस्येत्यतोजातमिदंकौतूहलंमम १६ किमेतदितितत्त्वेनप्रब्रूहिभरतर्षभ देहांतरमनासाद्यकथंसब्राह्मणोभवत् १७ एत
त्तत्त्वेनमेतात सर्वमाख्यातुमर्हसि मतंगस्ययथातत्त्वंतथैवैतद्वदस्वमे १८ स्थानेमतंगोब्राह्मण्यंनालभद्भरतर्षभ चंडालयोनौ
जातोहिकथंब्राह्मण्यमाप्तवान् १९ इतिश्रीमहाभारते आनुशासनिकेपर्वणिविश्वामित्रोपाख्यानेतृतीयोऽध्यायः ३ भीष्म
उवाच श्रूयतांपार्थतत्त्वेनविश्वामित्रोयथापुरा ब्राह्मणत्वंगतस्तातब्रह्मर्षित्वंतथैवच १ भरतस्यान्वयेचैवाजमीढोनामपार्थि
वः बभूवभरतश्रेष्ठयज्वाधर्मभृतांवरः २ तस्यपुत्रोमहानासीज्जह्नुर्नामनरेश्वरः दुहितृत्वमनुप्राप्तागंगायस्यमहात्मनः ३ तस्या
त्मजस्तुल्यगुणःसिंधुद्वीपोमहायशाः सिंधुद्वीपाच्चराजर्षिर्बलाकाश्वोमहाबलः ४ वल्लभस्तस्यतनयःसाक्षाद्धर्मइवापरः कुशि
कस्तस्यतनयःसहस्राक्षसमद्युतिः ५ कुशिकस्यात्मजःश्रीमान्गाधिर्नामजनेश्वरः अपुत्रःप्रसवेनार्थीवनवासमुपावसत् ६ क
न्याजज्ञेसुतातस्यवनेनिवसतःसतः नाम्नासत्यवतीनामरूपेणाप्रतिमाभुवि ७ तांववेभार्गवःश्रीमांश्च्यवनस्यात्मसंभवः ऋ-
चीकइतिविख्यातोविपुलेतपसिस्थितः ८ सतांनप्रददौतस्मैऋचीकायमहात्मने दरिद्रइतिमत्वावैगाधिःशत्रुनिबर्हणः ९ प्र
त्याख्यायपुनर्यांतमब्रवीद्राजसत्तमः शुल्कंप्रदीयतांमह्यंततोवत्स्यसिमेसुताम् १० ऋचीकउवाच किंप्रयच्छामिराजें
द्रतुभ्यंशुल्कंमहंनृप दुहितुर्ब्रूह्यसंसक्तोमाभूत्तत्रविचारणा ११ गाधिरुवाच चंद्ररश्मिप्रकाशानांहयानांवातरंहसाम् ए
कतःश्यामकर्णानांसहस्रंदेहिभार्गव १२ भीष्मउवाच ततःसभृगुशार्दूलश्च्यवनस्यात्मजःप्रभुः अब्रवीद्वरुणंदेवमादि-
त्यपुत्रमपांपतिम् १३ एकतःश्यामकर्णानांहयानांचंद्रवर्चसाम् सहस्रंवाजिनांमह्यंभिक्षेत्वांदेवसत्तम १४ तथेतिवरुणोदेवआ-
दित्योभृगुसत्तमम् उवाचयत्रतेच्छंदस्तत्रोत्थास्यंतिवाजिनः १५

मामिषवोपलक्षितायज्ञातवन्यद्रव्यविहितात्ताद्दशीवनवासयोग्येवकन्याजज्ञे
७ भार्गवोभृगुगोत्रोत्पन्नः ८ ९ वत्स्यसि उद्वाहेनप्राप्स्यसि १० असंसक्तोनिःसंशयः ११ एकतःएकं १२ आदित्यं अदितेःपुत्रं १३ १४ छंदइच्छा

वरेणपुत्रंतेदास्यामीत्यनुग्रहेण २१ २२ २३ २४ २५ २६ २७ २८ २९ पूर्वोपपन्नायाः

ध्यानमात्रंऋचीकेनहयानांचंद्रवर्चसाम् गंगाजलात्समुत्तस्थौसहस्रंविपुलौजसाम् १६ अदूरेकान्यकुब्जस्यगंगायास्तीरमुत्तमं
अश्वतीर्थंतदद्यापिमानवैःपरिचक्ष्यते १७ ततोवैगाधयेतातसहस्रंवाजिनांशुभम् ऋचीकःप्रददौप्रीतःशुल्कार्थंतपतांवरः
१८ ततःसविस्मितोराजागाधिःशापभयेनच ददौतांसमलंकृत्यकन्यांभृगुसुतायवै १९ जग्राहविधिवत्पाणिंतस्याब्रह्मर्षिस-
त्तमः साचतंपतिमासाद्यपरंहर्षमवापह २० सतुतोषचब्रह्मर्षिस्तस्यावृत्तेनभारत छंदयामासचैवैनांवरेणवरवर्णिनीम् २१ मा
त्रेतत्सर्वमाचख्यौसाकन्याराजसत्तम अथतामब्रवीन्मातासुतांकिंचिदवाङ्मुखीम् २२ ममापिपुत्रिभर्तातेप्रसादंकर्तुमर्हति अ
पत्यस्यप्रदानेनसमर्थश्चमहातपाः २३ ततःसात्वरितंगत्वातत्सर्वंप्रत्यवेदयत् मातुश्चिकीर्षितंराजनृचीकस्तामथाब्रवीत् २४
गुणवंतमपत्यंसाअचिराज्जनयिष्यति ममप्रसादात्कल्याणिमाभूत्तेप्रणयोन्यथा २५ तवचैवगुणश्लाघीपुत्रउत्पत्स्यतेमहान्
अस्मद्वंशकरःश्रीमान्सत्यमेतद्ब्रवीमिते २६ ऋतुस्नाताचसाश्वत्थंत्वंचवृक्षमुदुंबरम् परिष्वजेथाःकल्याणिततएवमवाप्स्य
थः २७ चरुद्वयमिदंचैवमंत्रपूतंशुचिस्मिते त्वंचसाचोपभुंजीतंततःपुत्राववाप्स्यथः २८ ततःसत्यवतीहृष्टामातरंप्रत्यभाषत
यदृचीकेनकथितंतच्चाचख्यौचरुद्वयम् २९ तामुवाचततोमातासुतांसत्यवतींतदा पुत्रिपूर्वोपपन्नायाःकुरुष्ववचनंमम ३० भ
र्त्रायएषदत्तस्तेचरुर्मंत्रपुरस्कृतः एतंप्रयच्छमह्यंत्वंमदीयंसंगृहाणच ३१ व्यत्यासंवृक्षयोश्चापिकरवामशुचिस्मिते यदि
प्रमाणंवचनंममामातुरनिंदिते ३२ स्वमपत्यंविशिष्टंहिसर्वइच्छत्यनाविलम् व्यक्तंभगवताचात्रकृतमेवंभविष्यति ३३ त
तोमेत्वच्चरौभावःपादपेचसुमध्यमे कथंविशिष्टोभ्राताभेभवेदित्येवचिंतय ३४ तथाचकृतवत्यौतेमातासत्यवतीचसा अथ
गर्भावनुप्राप्तेउभेतेवैयुधिष्ठिर ३५ दृष्ट्वागर्भमनुप्राप्तांभार्यांसचमहानृषिः उवाचतांसत्यवतींदुर्मनाभृगुसत्तमः ३६ व्यत्यासे
नोपयुक्तस्तेचरुर्व्यक्तंभविष्यति व्यत्यासःपादपेचापिसुव्यक्तंतेकृतःशुभे ३७ मयाहिविश्वंयद्ब्रह्मत्वच्चरौसन्निवेशितम् क्षत्रवी
र्यंचसकलंचरौतस्यानिवेशितम् ३८ त्रैलोक्यविख्यातगुणंत्वंविप्रंजनयिष्यसि साचक्षत्रंविशिष्टंवैततएतत्कृतंमया ३९ व्य
त्यासस्तुकृतोयस्मात्त्वयामात्राचतेशुभे तस्मात्साब्राह्मणश्रेष्ठंमातातेजनयिष्यति ४०

भर्तुःसंबंधात्पूर्वंउपपन्नायाःगुरुत्वेनप्राप्तायाः त-
वभर्त्रपेक्षयाहंगरीयसीत्यर्थः ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० छ छ छ छ छ

४१ ४२ ४३ क्षत्रियःक्षत्रियवदुग्रकर्मा ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७
५८ ५९ ६० विश्वामित्रात्मजाइति क्षत्रियात्ब्रह्मवादिनःकथमुत्पन्नाइत्याशंक्याह ऋचीकेनेति चरोःपूर्वंब्रह्मैवाहितम् अतःक्षत्रबीजोद्भवस्या

क्षत्रियंतूग्रकर्माणंत्वंभद्रेजनयिष्यसि नहितेतत्कृतंसाधुमातृस्नेहेनभाविनी ४१ साश्रुत्वाशोकसंतप्तापपातवरवर्णिनी भूमौस
त्यवतीराजन्छिन्नेवरुचिरालता ४२ प्रतिलभ्यचसासंज्ञांशिरसाप्रणिपत्यच उवाचभार्याभर्त्तारंगाधेयीभार्गवर्षभम् ४३ प्र
सादंकुरुत्वंभार्यायांमय्यब्रह्मविदांवर प्रसादंकुरुविप्रर्षेनमेस्यात्क्षत्रियःसुतः ४४ काममममोग्रकर्मावैपौत्रोभवितुमर्हति नतुमे
स्यात्सुतोब्रह्मन्नेषमेदीयतांवरः ४५ एवमस्त्वितिहोवाचस्वांभार्यांसुमहातपाः ततःसाजनयामासजमदग्निंसुतंशुभम् ४६ वि
श्वामित्रंचाजनयद्गाधिभार्यायशस्विनी ऋषेःप्रसादाद्राजेंद्रब्रह्मर्षिंब्रह्मवादिनम् ४७ ततोब्राह्मणतांयातोविश्वामित्रोमहातपाः
क्षत्रियःसोप्यथतथाब्रह्मवंशस्यकारकः ४८ तस्यपुत्रामहात्मानोब्रह्मवंशविवर्द्धनाः तपस्विनोब्रह्मविदोगोत्रकर्त्तारएवच ४९
मधुच्छंदश्चभगवान्देवरातश्चवीर्यवान् अक्षीणश्चशकुनश्चबभ्रुःकालपथस्तथा ५० याज्ञवल्क्यश्चविख्यातस्तथास्थूणोमहा
व्रतः उलूकोयमदूतश्चतथर्षिःसैंधवायनः ५१ वल्गुजंघश्चभगवान्गालवश्चमहानृषिः ऋषिर्वज्रस्तथाख्यातःसालंकायनएव
च ५२ लीलाढ्योनारदश्चैवतथाकूर्चामुखःस्मृतः वादुलिर्मुसलश्चैववक्षोग्रीवस्तथैवच ५३ आंघ्रिकोनैकदृक्चैवशिलायूपःशि
तःशुचिः चक्रकोमारुतंतव्योवातघ्नोथाश्वलायनः ५४ श्यामायनोथगार्ग्यश्चजाबालिःसुश्रुतस्तथा कारीषिरथसंश्रुत्यःपरपौ
रवतंतवः ५५ महानृषिश्चकपिलस्तथर्षिस्ताडकायनः तथैवचोपगहनस्तथर्षिश्चासुरायनः ५६ मार्दमर्षिर्हिरण्याक्षोजंघा-
रिर्बाभ्रवायणिः भूतिर्विभूतिःसूतश्चसुरकृत्तुतथैवच ५७ अरालिर्नाचिकश्चैवचांपेयोज्जयनोतथा नवतंतुर्बकनखःसयनोय
तिरेवच ५८ अंभोरुहश्चारुमत्स्यःशिरीषीचाथगार्द्दभिः ऊर्जयोनिरुदापेक्षीनारदीचमहानृषिः ५९ विश्वामित्रात्मजाःसर्वे-
मुनयोब्रह्मवादिनः तथैवक्षत्रियोराजन्विश्वामित्रोमहातपाः ६० ऋचीकेनाहितंब्रह्मपरमेतद्युधिष्ठिर एतत्तेसर्वमाख्यातं-
तत्त्वेनभरतर्षभ ६१ विश्वामित्रस्यवैजन्मसोमसूर्याग्नितेजसः यत्रयत्रचसंदेहोभूयस्तेराजसत्तम तत्रतत्रचमांब्रूहिच्छेत्तास्मि
तवसंशयान् ६२

पिब्राह्मण्यलाभोजातः बीजापेक्षयासंस्कारस्यबलवत्त्वात् तथाहि दावाग्निदग्धेभ्योवेत्रबीजेभ्यःकदलीकांडोत्पत्तिस्तु
दाहसंस्कृतिः नब्राह्मण्यंक्षत्रियादेस्तपःकोट्यापिलभ्यते विश्वामित्रस्य[illegible]मातुर्ब्रह्मौदनाशनात् ६१ ६२

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांचतुर्थोऽध्यायः ४ ७ एवंदुष्प्रापमपिब्राह्मण्यंआनृशंस्यंविनाव्यर्थमित्याशयवान् आनृशंस्याध्यायमा
रभते आनृशंस्येति १ २ विषयेदेशे काण्डंबाणं ३ तत्रमृगयायां ४ दुर्वारितास्त्रेणदुर्वार्यशस्त्रेण निमित्तात्लक्ष्यात् चपलस्खलितइषुर्यस्य-

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेविश्वामित्रोपाख्यानेचतुर्थोऽध्यायः ४ युधिष्ठिरउवाच आनृशंस्यस्यधर्मज्ञगु
णान्भक्तजनस्यच श्रोतुमिच्छामिधर्मज्ञतन्मेब्रूहिपितामह १ भीष्मउवाच अत्राप्युदाहरन्तीममितिहासंपुरातनम् वास
वस्यचसंवादंशुकस्यचमहात्मनः २ विषयेकाशिराजस्यग्रामान्निष्क्रम्यलुब्धकः सविषंकाण्डमादायमृगयामासवैमृगम् ३ तत्र
चामिषलुब्धेनलुब्धकेनमहावने अविदूरेमृगान्दृष्ट्वाबाणःप्रतिसमाहितः ४ तेनदुर्वारितास्त्रेणनिमित्तचपलेषुणा महान्वनत
रुस्तत्रविद्धोमृगजिघांसया ५ सतीक्ष्णविषदिग्धेनशरेणातिबलात्क्षतः उत्सृज्यफलपत्राणिपादपःशोषमागतः ६ तस्मिन्वृ
क्षेतथाभूतेकोटरेषुचिरोषितः नजहातिशुकोवासंतस्यभक्त्यावनस्पतेः ७ निष्प्रचारोनिराहारोग्लानःशिथिलवागपि कृतज्ञः
सहवृक्षेणधर्मात्मासोऽप्यशुष्यत ८ तमुदारंमहासत्त्वमतिमानुषचेष्टितम् समदुःखसुखंदृष्ट्वाविस्मितःपाकशासनः ९ त-
तश्चिन्तामुपगतःशक्रःकथमयंद्विजः तिर्यग्योनावसंभाव्यमानृशंस्यंसमास्थितः १० अथवानात्रचित्रंहिअभवद्वासवस्यतु प्राणिना-
मपिसर्वेषांसर्वंसर्वत्रदृश्यते ११ ततोब्राह्मणवेषेणमानुषंरूपमास्थितः अवतीर्यमहींशक्रस्तंपक्षिणमुवाचह १२ शुकभो-
पक्षिणांश्रेष्ठदाक्षेयीसुप्रजास्त्वया पृच्छेत्वाशुककस्मात्त्वंनत्यजसिद्रुमम् १३ अथपृष्टःशुकःप्राहमूर्ध्नासमभिवाद्यतम्
स्वागतंदेवराजत्वंविज्ञातस्तपसामया १४ ततोदशशताक्षेणसाधुसाध्वितिभाषितम् अहोविज्ञानमित्येवंमनसापूजितस्त-
तः १५ तमेवंशुभकर्माणंशुकंपरमधार्मिकम् विजानन्नपितांप्रीतिंपप्रच्छबलसूदनः १६ निष्पत्रमफलंशुष्कमशरण्यंपतत्रि
णाम् किमर्थंसेवसेवृक्षंयदामहदिदंवनम् १७ अन्येपिबहवोवृक्षाःपत्रसंछन्नकोटराः शुभाःपर्याप्तसंचाराविद्यन्तेस्मिन्महा
वने १८ गतायुषमसामर्थ्यंक्षीणसारंहतश्रियम् विमृश्यप्रज्ञयाधीरजहीमंस्थविरंद्रुमम् १९ भीष्मउवाच तदुपश्रुत्य
धर्मात्माशुकःशक्रेणभाषितम् सुदीर्घमतिनिःश्वस्यदीनोवाक्यमुवाचह २० अनतिक्रमणीयानिदैवतानिशचीपते यत्राभवं
वप्रश्नस्तन्निबोधसुराधिप २१

तेन ५ दिग्धेनलिप्तेन ६ ७ ८ ९ द्विजःपक्षी आनृशंस्यंपरदुःखेनदुःखित्वं १० चित्रंआश्चर्यं सर्वेषां
तिर्यगादीनांसर्वत्रजातौसर्वंकृपानैष्ठुर्यादिकं ११ १२ दाक्षेयी दक्षदौहित्रीशुकीनाम १३ तपसाज्ञानदृष्ट्या १४ १५ तांप्रीतिंवृक्षेनतसौहार्दं १६ १७
१८ १९ २० २१

२२ अनुक्रोश्य कृपां यित्वा वैफल्यं जन्मनदृतिशेषः २३ २४ संशयात् संशयं प्राप्य अतः संशयच्छेत्तृत्वात् २५ अद्य असामर्थ्यकाले २६ २७ संभव-
सम्यगैश्वर्यं वरं वव्रे २८ २९ ३० आनृशंस्यफलमाह शक्रश्चेति ३१ आख्यायिकातात्पर्यमाह एवमिति ३२ इति श्रीमहाभारते आनुशास-
निके पर्वणि टीकायां पंचमोऽध्यायः ५ ॥ ७ पितामहेत्यादिरध्यायः दैवमूलमपीदं सर्वं पुरुषकाराद्दतेन सिध्यतीति अवश्यं पुरुषकारे भोगमोक्षार्थिना-

अस्मिन्नहं द्रुमे जातः साधुभिश्च गुणैर्युतः बालभावेन संगुप्तः शत्रुभिश्च न धर्षितः २२ किमनुक्रोश्य वैफल्यमुत्पादयसि मेऽनघ आ-
नृशंस्याभियुक्तस्य भक्तस्यानन्यगस्य च २३ अनुक्रोशो हि साधूनां महद्धर्मस्य लक्षणम् अनुक्रोशश्च साधूनां सदा प्रीतिं प्रयच्छ-
ति २४ त्वमेव दैवतैः सर्वैः पृच्छ्यसे धर्मसंशयात् अतस्त्वं देवदेवानामाधिपत्ये प्रतिष्ठितः २५ नार्हसे मां सहस्राक्ष द्रुमं त्याजयितुं चि-
रात् समर्थमुपजीव्येमं त्यजेयं कथमद्य वै २६ तस्य वाक्येन सौम्येन हर्षितः पाकशासनः शुकं प्रोवाच धर्मात्मा आनृशंस्येन तोषितः
२७ वरं वृणीष्वेति तदा स च वव्रे वरं शुकः आनृशंस्यपरो नित्यं तस्य वृक्षस्य संभवम् २८ विदित्वा च दृढां भक्तिं तां शुके शीलसंपदम्
प्रीतः क्षिप्रमथो वृक्षममृतेनावसिक्तवान् २९ ततः फलानि पत्राणि शाखाश्चापि मनोहराः शुकस्य दृढभक्तित्वाच्छ्रीमत्ता प्राप स द्रु-
मः ३० शुकश्च कर्मणा तेन आनृशंस्येन तेन वै आयुषोऽन्ते महाराज प्राप शक्रसलोकताम् ३१ एवमेव मनुष्येन्द्र भक्तिमन्तं समाश्रि-
तः सर्वार्थसिद्धिं लभते शुकं प्राप्य यथा द्रुमः ३२ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे शक्रवासवसंवादे पंचमोऽध्या-
यः ५ युधिष्ठिर उवाच पितामह महाप्राज्ञ सर्वशास्त्रविशारद दैवे पुरुषकारे च किंस्विच्छ्रेष्ठतरं भवेत् १ भीष्म उवाच अ-
त्राप्युदाहरन्तीममितिहासं पुरातनम् वसिष्ठस्य च संवादं ब्रह्मणश्च युधिष्ठिर २ दैवमानुषयोः किंस्वित्कर्मणोः श्रेष्ठमित्युत पुरा
वसिष्ठो भगवान्पितामहमपृच्छत ३ ततः पद्मोद्भवो राजन्देवदेवः पितामहः उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम् ४
ब्रह्मोवाच नाबीजं जायते किंचिन्न बीजेन विना फलम् बीजाद्बीजं प्रभवति बीजादेव फलं स्मृतम् ५ यादृशं वपते बीजं क्षेत्र-
मासाद्य कर्षकः सुकृते दुष्कृते वापि तादृशं लभते फलम् ६ यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम् तथा पुरुषकारेण विना
दैवं न सिध्यति ७ क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम् क्षेत्रबीजसमायोगात्ततः सस्यं समृध्यते ८

यतितव्यमित्येवंपरः द्वयोः श्रेष्ठयोर्मध्ये किमतिश्रेष्ठमित्यर्थः १ २ दैवं प्राक्कर्म मानुषं साम्प्रतिकं कर्म ३ ४ दैवश्रैष्ठ्यमाह नाबीजमिति ५
सुकृते बीजभूते सति ६ पुरुषकारश्रैष्ठ्यमाह यथेति ७ उद्यमापेक्षामाह क्षेत्रमिति ८ ७ ७ ७ ७ ७ ७

सिद्धान्तः कर्म[illegible] १० [illegible] ११ [illegible]दौर्बल्ये उपसंहरति प्राप्यत इति १२ १३ मानुष्यात् मानुष्यमुल्लंघ्य
१४ १५ लभते श्रियमिति सर्वत्र संबन्धः १६ १७ शिष्टाचारेणापि कर्मणां प्राबल्ये मानमित्याह येनेति १८ ननु निश्चिते १९ अकृत्वेति के
वलं दैवं निष्फलमित्यर्थः २० न तथेति देवलोके स्वल्पेऽपि हि कीहानिः सुसहा पुरुषकारदोषे त्वेतु परलोकहानिर्दुरन्तेत्यर्थः अन्येन पापेन २१ अ

कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः। प्रत्यक्षं दृश्यते लोके कृतस्यापकृतस्य च ९ शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा
कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित् १० कृती सर्वत्र लभते प्रतिष्ठां भाग्यसंयुताम्। अकृती लभते भ्रष्टः क्षते क्षारावसेचनम्
११ तपसा रूपसौभाग्यं रत्नानि विविधानि च। प्राप्यते कर्मणा सर्वं न दैवादकृतात्मना १२ तथा स्वर्गश्च भोगश्च निष्ठा या च मनीषिता
सर्वं पुरुषकारेण कृतेनेहोपलभ्यते १३ ज्योतींषि त्रिदशा नागा यक्षाश्चन्द्रार्कमारुताः। सर्वे पुरुषकारेण मानुष्याद्देवतां गताः १४ अर्थो
वा मित्रवर्गो वा ऐश्वर्यं वा कुलान्वितम्। श्रीश्चापि दुर्लभा भोक्तुं तथैवाकृतकर्मभिः १५ शौचेन लभते विप्रः क्षत्रियो विक्रमेण तु वैश्यः
पुरुषकारेण शूद्रः शुश्रूषया श्रियम् १६ नादातारं भजन्त्यर्था न क्लीबं नापि निष्क्रियम्। नाकर्मशीलं नाशूरं तथा नैवातपस्विनम् १७
येन लोकास्त्रयः सृष्टा दैत्याः सर्वाश्च देवताः। स एष भगवान्विष्णुः समुद्रे तप्यते तपः १८ स्वं चेत्कर्मफलं न स्यात्सर्वमेवाफलं भवेत्
लोको दैवं समालम्ब्य उदासीनो भवेन्न तु १९ अकृत्वा मानुषं कर्म यो दैवमनुवर्तते। वृथा श्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना २० न त
था मानुषे लोके भयमस्ति शुभाशुभे। यथा त्रिदशलोके हि भयमल्पेन जायते २१ कृतः पुरुषकारस्तु दैवमेवानुवर्तते। न दैवमकृते
किंचित्कस्यचिद्दातुमर्हति २२ यथा स्थानान्यनित्यानि दृश्यन्ते दैवतेष्वपि। कथं कर्म विना दैवं स्थास्यति स्थापयिष्यति २३ न दैवता
नि लोकेऽस्मिन्व्यापारं यान्ति कस्यचित्। व्यासङ्गं जनयन्त्युग्रमात्माभिभवशङ्कया २४ ऋषीणां देवतानां च सदा भवति विग्रहः। कस्य
वाचा ह्यदैवं स्याद्यतो दैवं प्रवर्तते २५

कृते कर्माभावे सति आकस्मिकनिधिलाभादावपि किंचित्कर्मास्त्येवेति भावः २२ यथे
ति स्थानानि इन्द्रादिलोका अप्यनित्याः दृश्यन्ते तारारूपिणां देवानामधःपातदर्शनादित्यर्थः कर्म विना पुण्येन कर्मणा विना दैवं देवसमूहः कथं-
स्थास्यति दैवमपि कर्ममूलमेवेत्यर्थः २३ व्यापारं पुण्यरूपं यान्ति अनुमोदन्ते उग्रं धर्मविघ्नकरम् २४ विग्रहो वैरं तथाहि ऋषीणां तप
सि देवा विघ्नमाचरन्ति ऋषयश्च च्यवनादय इन्द्रादीनामभिभवं कुर्वन्तीति लोके प्रसिद्धम् यद्यप्येवं कर्मपरत्वं देवर्षीणामस्ति तथापि अदैव-
देवाभावो न वक्तुं शक्य इत्यर्थः १० ६ ६ ६ ६ ६ ६ ६ ६ ६ ६ ६

अत्रमानमाह कथमिति . यतोयस्माद्दैवं प्रवर्त्तते कस्य कर्मणोपि दैवं विना कथमुत्पत्तिः स्यान्न कथमपि पुण्यवत एव धर्मे प्रवर्त्तते धर्माच्च पुण्यं वर्द्धते अ
न्यथा सर्वेपि धर्मे प्रवर्त्तेरन्नित्यर्थः एवं लोकवद्देवस्वर्गेपि गुणाः भोगाः यथा धनी धनी भूयसा वाणिज्येन भूयांसं लाभं लभते नेतर इति वदेतदिति भावः
२६ आत्मेति . एवं प्रवृत्ते रपि दैवाधीनत्वेपि कर्मैव कर्त्तव्यमित्यर्थः कृतस्य पुण्यपापादेः २७ कृतमिति पुण्यमपि पापेन प्रतिहन्यते पापमपि पुण्येने
ति तयोः फलं यथोक्तं स्वर्गनरकं वा न प्राप्नोतीत्यर्थः २८ शरणं गृहं यथान्यस्मिन्नोऽपराधः श्वसनेन सत्कारेणापनीयते एवं दैवमपि पुण्यातिशयान्नेति ह

कथं तस्य समुत्पत्तिर्यतो दैवं प्रवर्त्तते एवं त्रिदशलोकेपि प्राप्यते बहवो गुणाः २६ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः आत्मैव ह्या
त्मनः साक्षी कृतस्याप्यकृतस्य च २७ कृतं चाप्यकृतं किंचित्कृते कर्मणि सिध्यति सुकृतं दुःकृतं कर्म न यथार्थं प्रपद्यते २८ देवानां शर
णं पुण्यं सर्वं पुण्यैरवाप्यते पुण्यशीलं नरं प्राप्य किं दैवं प्रकरिष्यति २९ पुरा ययातिर्विभ्रष्टश्च्यावितः पतितः क्षितौ पुनरारोपितः स्व
र्गं दौहित्रैः पुण्यकर्मभिः ३० पुरूरवाश्च राजर्षिर्द्विजैरभिहितः पुरा. ऐल इत्यभिविख्यातः स्वर्गं प्राप्तो महीपतिः ३१ अश्वमेधादि
भिर्यज्ञैः सत्कृतः कोशलाधिपः महर्षिशापात्सौदासः पुरुषादत्वमागतः ३२ अश्वत्थामा च रामश्च मुनिपुत्रौ धनुर्द्धरौ नगच्छतः
स्वर्गलोकं सुकृतेनेह कर्मणा ३३ वसुर्यज्ञशतैरिष्ट्वा द्वितीय इव वासवः मिथ्याभिधानेनैकेन रसातलतलं गतः ३४ बलिर्वैरोच
निर्बद्धो धर्मपाशेन दैवतैः विष्णोः पुरुषकारेण पातालसदनः कृतः ३५ शक्रस्योदस्य चरणं प्रस्थितो जनमेजयः द्विजस्त्रीणां वधं
कृत्वा किं दैवेन न वारितः ३६ अज्ञानाद्ब्राह्मणं हत्वा स्पृष्टो बालवधेन च वैशंपायनविप्रर्षिः किं दैवेन न वारितः ३७ गोप्रदानेन
मिथ्या च ब्राह्मणेभ्यो महामखे पुरा नृगश्च राजर्षिः कृकलासत्वमागतः ३८ धुंधुमारश्च राजर्षिः सत्रेष्वेव जरां गतः प्रीतिदायप
रित्यज्य सुष्वाप स गिरिव्रजे ३९ पांडवानां हृतं राज्यं धार्त्तराष्ट्रैर्महाबलैः पुनः प्रत्याहृतं चैव न दैवाद्भुजसंश्रयात् ४० तपोनिय
मसंयुक्ता मुनयः संशितव्रताः किं ते दैवबलाच्छापमुत्सृजंते न कर्मणा ४१ .

न्यते इत्यर्थः २९ अत्रैवार्थे दृष्टांतानाह पुरेत्यादिना ३० ३१
विपर्ययेति दृष्टांतमाह अश्वेति ३२ ३३ मिथ्याभिधानेन व्रीहीन्प्रत्यतिरयमाणामित्यवं रूपेण रसातलस्य भूमेस्तलमधोभागं ३४ ३५ पापमपि
तेजीयसां न दोषायेत्याह शक्रस्येति शक्रस्याचरणं द्विजस्त्रीदूषणरूपं कर्म कृत्वा प्रस्थितं इति संबंधः ३६ ३७ पुण्यमपि केषांचिन्न त्राणायेत्याह गो
प्रदानेनेति कृकलासत्वं सरटत्वम् ३८ प्रीतिदायं दैवेदत्तं राज्यं सुष्वाप स्वप्नफलत्ना प्रवृत्तमित्यर्थः ३९ न दैवात्प्रत्याहृतमपितु भुजसंश्रयाद्देवेत्य-
र्थः ४० किं दैवबलाच्छापमुत्सृजंते कर्मणा न अपितु कर्मणैवोत्सृजंते न तु दैवबलादित्यर्थः ४१

पापंपापिनं प्रतिसृजते ऐश्वर्यादिकं गुणजातं लोके प्राप्य उपेत्यापितं उत्सृजते इतियोजना तथाचाप्राणकः दैवेन दत्तं कर्मणानाशितमिति एतदेवस्पष्टयति
लोभेति, ४२ दैवस्य कर्माधीनत्वमाह द्वाभ्यां यथेति ४३ ४४ कर्महीनः पाकत्यागवत्प्रवृत्तेः सुनिहितं गतालस्थंनिधिं नित्ययुक्त अंजनादिसाधनोद्यु
क्तः ४५ व्ययएवगुणः स्वभावोयस्य तंरिक्तं व्ययगतमिति पाठेपि सएवार्थः निर्द्धनत्वान्नरैस्त्यक्तमपिसाधुकर्मणासदाचारेणनिमित्तेन श्रद्धेकप्रियादे
वाः संश्रयंते स्वस्वभागार्थमुपजीवंतीत्यर्थः ततश्च श्रेष्ठैः फलैरेतं योजयंतीत्याह भवतीति विशिष्टत्वमेवाह बहिति समृद्ध्याउपेतंगृहाणि गृहंबहुत्वमा
र्षं पितृवनभवनाभं श्मशानगृहतुल्यं अमरणाअमरैः ४६ विकर्माकर्महीनः नचफलति फलत्स्यादिकंनप्राप्नोति नापिकेवलंदैवं विमार्गगामिनं नरंव्य
पनयति विमार्गात् अध्यंतनयति अतएवंदैवे प्रभुत्वंनास्ति किंतुदैवंकृतंकर्मसंयाति पुरुषकारमनुसरति गुरुं शिष्यइवेत्यर्थः अतएव पुरुषकारः यत्रयत्र

पापमुत्सृजते लोके सर्वं प्राप्य सुदुर्लभम् लोभमोहसमापन्नं न दैवं त्रायते नरम् ४२ यथाग्निः पवनोद्धूतः सुसूक्ष्मोपि महान्भवे
त् तथा कर्मसमायुक्तं दैवं साधु विवर्द्धते ४३ यथा तैलक्षयाद्दीपः प्रन्हासमुपगच्छति तथा कर्मक्षयाद्दैवं प्रन्हासमुपगच्छति ४४
विपुलमपि धनौघं प्राप्य भोगान्स्त्रियो वा पुरुष इह न शक्तः कर्महीनो हि भोक्तुम् सुनिहितमपि चार्थं दैवतै रक्ष्यमाणं पुरुष इह म-
हात्मा प्राप्नुते नित्ययुक्तः ४५ व्ययगुणमपि साधुं कर्मणा संश्रयंते भवति मनुजलोकाद्देवलोको विशिष्टः बहुतरसुसमृद्ध्या मा
नुषाणां गृहाणि पितृवनभवनाभं दृश्यते चामराणाम् ४६ न च फलति विकर्मा जीवलोके न दैवं व्यपनयति विमार्गं नास्ति दैवे प्र
भुत्वम् गुरुमिव कृतमग्र्यं कर्म संयाति दैवं नयति पुरुषकारः संचितस्तत्रतत्र ४७ एतत्ते सर्वमाख्यातं मया वै मुनिसत्तम फ-
लं पुरुषकारस्य सदा संदृश्य तत्त्वतः ४८ अभ्युत्थानेन दैवस्य समारब्धेन कर्मणा विधिना कर्मणा चैव स्वर्गमार्गमवाप्नुयात्
४९ इतिश्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे दैवपुरुषकारनिर्देशो नाम षष्ठोऽध्यायः ६

विषये संचितः सम्यगनुष्ठितः तत्र
तत्र दैवं नयति आविर्भावयति पुरुषकारेण सिद्धेऽर्थे लोको दैवानुकूल्यादेनं सिद्धमिति वदतीत्यर्थः गुरुमित्यत्र अनुपहतमदीनं कामकारेण दैवमिति पा-
ठे कामकारेण इच्छया यत्र पुरुषकारः संचितस्तत्रैव दैवं अदीनमनुपहतं चेतिनयति ज्ञापयतीत्यर्थः ४७ संदृश्य सम्यक्योगजदृष्ट्याऽनुभूय ४८ ननुकृ-
षिपर्जन्यन्यायेन दैवापेक्षा कर्मसिद्धिर्न कर्मापेक्षं दैवमिति प्रत्यक्षं तत्कथं विपरीतमुच्यत इत्याशंक्याह अभीति दैवस्य प्राक्कर्मणः अभ्युत्थानं व्यापारो द्वि
विधः संचितरूपेणावस्थानं एकः भोगार्थंसमारंभरूपो द्वितीयः तत्र समारब्धेन उत्थानेन तदनुकूलेन कर्मणा च ऐहिकफलमाप्नुयात् विधिना शास्त्रेण कर्म
णा च तदनुसारिणा स्वर्गमार्गमवाप्नुयात् दैवाधीनो भोगः कर्माधीनः संचय इति निष्कर्षः कृष्यादावपि दैवमतीक्षणं कापुरुषकर्म सेचनादिनापि फलस्योत्पाद
यितुं शक्यत्वादिति भावः ४९ इतिश्रीम० आनुशासनिके० टीकायां षष्ठोऽध्यायः ६

अद्विषन्गौतमीवारीन् ज्ञात्वादुःखस्वदोषजम् ज्ञात्वापिदारानतिथौत्सुदर्शनइवार्चयन् १ ब्राह्मण्यंदुर्लभंजानन् विश्वामित्रनिदर्शनात् आनृशंस्यंपरोधर्म
इतियःशक्रवस्थितः २ दैवेनरक्षितेदेहइतिधर्मेनियत्नवान् धर्माधिकारीषट्सूक्तोधर्मेस्थिमुनिनोच्यते ३ धर्मात्सुखंप्रभवतीत्युक्तं तत्रकोधर्मःकिंफलइति
जिज्ञासुर्युधिष्ठिरउवाचकर्मणामिति १ गतिःफलंयेनकर्मणा प्रेत्यभावे मरणोत्तरंदेहान्तरप्राप्तौ २ येनेतिमनसाकृतस्यकर्मणःफलंमनसैवस्वप्ना
दौभुंक्ते कायेनकृतस्यफलंकायेनैवभुंक्तेजाग्रदादावित्यर्थः ३ अवस्थायांबाल्ययौवनादिरूपायां आपद्यनापदिवा ४ नेति नाशोनैष्फल्यं अस्यकर्तुः
साक्षिणामभावेहिकृतंवृथैवस्यान्नतुतत्सत्वे इतिभावः ५ दत्वादद्यागंतायेतिशेषः ६ महत् अपरिमितं ७ वानप्रस्थधर्माणांफलान्याहस्थंडिलेष्वि

युधिष्ठिरउवाच कर्मणांचसमस्तानांशुभानांभरतर्षभ फलानिमहतांश्रेष्ठप्रब्रूहिपरिपृच्छतः १ भीष्मउवाच हन्ततेकथ
यिष्यामियन्मांपृच्छसिभारत रहस्यंयदृषीणांतुतच्छृणुष्वयुधिष्ठिर यागतिःप्राप्यतेयेनप्रेत्यभावेचिरेप्सिता २ येनयेनशरी
रेणयद्यत्कर्मकरोतियः तेनतेनशरीरेणतत्तत्फलमुपाश्नुते ३ यस्यांयस्यामवस्थायांयत्करोतिशुभाशुभम् तस्यांतस्यामवस्था
यांभुंक्तेजन्मनिजन्मनि ४ ननश्यतिकृतंकर्मसदापंचेन्द्रियैरिह तेह्यस्यसाक्षिणोनित्यंषष्ठआत्मातथैवच ५ चक्षुर्दद्यान्मनो
दद्याद्वाचंदद्याच्चसूनृताम् अनुव्रजेदुपासीतसयज्ञःपंचदक्षिणः ६ योदद्यादपरिक्लिष्टमन्नमध्वनिवर्तते श्रान्तायादृष्टपूर्वाय
तस्यपुण्यफलंमहत् ७ स्थंडिलेषुशयानानांगृहाणिशयनानिच चीरवल्कलसंवीतेवासांस्याभरणानिच ८ वाहनानिचया
नानियोगात्मनितपोधने अग्नीनुपशयानस्यराज्ञःपौरुषमेवच ९ रसानांप्रतिसंहारेसौभाग्यमनुगच्छति आमिषप्रतिसंहा
रेपशून्पुत्रांश्चविंदति १० अवाक्शिरास्तुयोलंबेदुदवासंचयोवसेत् सततंचैकशायीयःसलभेतेप्सितांगतिम् ११ पाद्यमास
नमेवाथदीपमन्नंप्रतिश्रयम् दद्यादतिथिपूजार्थंसयज्ञःपंचदक्षिणः १२ वीरासनंवीरशय्यांवीरस्थानमुपागतः अक्षयास्तस्य
वैलोकाःसर्वकामगमास्तथा १३ धनंलभतेदानेनमौनेनाज्ञांविशांपते उपभोगांश्चतपसाब्रह्मचर्येणजीवितम् १४ रूपमै-
श्वर्यमारोग्यमहिंसाफलमश्नुते फलमूलाशिनोराज्यंस्वर्गःपर्णाशिनाभवेत् १५ प्रायोपवेशिनोराजन्सर्वत्रसुखमुच्यते गवा
द्यःशाकदीक्षायांस्वर्गगामीतृणाशनः १६

त्यादिना ८ योगात्मनियोगयुक्तचित्ते ९ १० एकशायीब्रह्मचर्यवान् ११ १२ वीराआ
सनेस्मिन्नितिवीरासनंरणदेशे उपेत्यवीरशय्यांतत्रदीर्घनिद्रांचप्राप्य वीरस्थानंस्वर्गलोकं यउपागतोभवति तस्याक्षयालोकाइत्यर्थः १३ आ-
ज्ञांअविच्छिन्नामितिशेषः तपसाकृच्छ्रादिना जीवितंआयुः १४ १५ शाकदीक्षायांशाकमात्राशननियमे १६

त्रियः त्रिस्त्रियं त्र्यन्तक्रियर्थः क्रतुं संकल्पं सत्यसंकल्पमितियावत् दीक्षया यज्ञेन १७ सदाग्निः अविच्छिन्नाग्निहोत्रः मनुं गायत्र्यादिमंत्रं पाठांतरे मेरुसाधनं तत्
पोविशेषः अनाशके हितमेति मेध्याशनेऽनशने वा १८ द्वादशवार्षिक्यां दीक्षायां उपवासव्रतार्थं क्षीराद्याहारं व्रतं च पयोब्राह्मणस्य व्रतं यवागू राजन्यस्या
मिक्षा वैश्यस्येति श्रुतिप्रसिद्धं अभिषेकं द्वादशवार्षिकं तीर्थाटनं वा वीरस्थानात् स्वर्गादपि विशिष्यते ब्रह्मलोकप्रदमेतत् इयमित्यर्थः १९ कायिकं धर्मसु
क्त्वा वाचिकमाह अधीत्येति २० मानसं धर्मं विवृणोति २१ २२ २३ २४ २५ २६ २७ मंत्रोच्चारणं जिगीषाद्यर्थं वृथा सोमाभि

त्रिय त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत् स्वर्गं सत्येन लभते दीक्षया कुलमुत्तमम् १७ सलिलाशी भवेद्यस्तु सदाग्निः संस्कृतो द्वि
जः मनुं साधयतो राज्यं नाकपृष्ठमनाशके १८ उपवासं च दीक्षायां अभिषेकं च पार्थिव कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते
१९ अधीत्य सर्ववेदान्वै सद्यो दुःखाद्विमुच्यते मानसं हि चरन्धर्मं स्वर्गलोकमुपाश्नुते २० या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जी
र्यतः योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् २१ यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् एवं पूर्वकृतं कर्म कर्तारमनुगच्छ
ति २२ अच्चोद्यमानानि यथा पुष्पाणि च फलानि च स्वकालं नातिवर्तन्ते तथा कर्म पुराकृतम् २३ जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्य
तः चक्षुःश्रोत्रे च जीर्येते तृष्णैका न तु जीर्यते २४ येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः प्रीणाति मातरं येन पृथिवी तेन पूजिता येन
प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितम् २५ सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रि
याः २६ वैशंपायन उवाच भीष्मस्यैतद्वचः श्रुत्वा विस्मिताः कुरुपुंगवाः आसन्प्रहृष्टमनसः प्रीतिमन्तोऽभवंस्तदा २७ यन्मं
त्रे भवति वृथा प्रयुज्यमाने यत्सोमे भवति वृथाभिषूयमाणे यच्चाग्नौ भवति वृथाभिहूयमाने तत्सर्वं भवति वृथाभिधीयमाने २८
इत्येतदृषिणा प्रोक्तमुक्तवानस्मि यद्विभो शुभाशुभफलप्राप्तौ किमतः श्रोतुमिच्छसि २९ इति श्रीमहाभारते आनुशासनिके
पर्वणि दानधर्मे कर्मफलिकोपाख्याने सप्तमोऽध्यायः ७ युधिष्ठिर उवाच के पूज्याः के नमस्कार्याः कान्नमस्यसि भारत एतन्मे स
र्वमाचक्ष्व येभ्यः स्पृहयसे नृप १ उत्तमापद्गतस्यापि यत्र ते वर्तते मनः मनुष्यलोके सर्वस्मिन्यदमुत्रेह चाच्युत २

षवो दक्षिणां विना वृथा होमो मंत्रं विना वृथा एतैस्त्रिभिर्यत्पापं तत्सर्वं मिथ्यावादिनो भवतीत्यर्थः २८ प्राप्तौ प्राप्त्यर्थं २९ इति श्रीमन्महा
भारते आनुशासनिके पर्वणि टीकायां सप्तमोऽध्यायः ७ ७ ७ के पूज्या इत्यादिना पूर्वोक्तधर्मान् विवृणोति तत्रापि वसुर्दद्यादित्यादिना
आतिथ्यं कर्तव्यमुक्तं तद्विवृणोत्यध्यायेन १ यदमुत्रेह चाहितं न हृदे न्तिशेषः २ ७ ७ ७ ७ ७ ७ ७ ७

ब्रह्मआनंदात्मा स्वर्गः सत्यसंकल्पत्वादितिसिद्धिः तपः स्वाध्यायौसाधनंयस्यस्वर्गस्य यस्तमात्मानमनुविद्यविजानातिसर्वांश्चलोकानाप्नोतिसर्वांश्चकामा
नितिश्रुतेः सत्यप्रत्ययः ३ ४. अक्षरंब्रह्मतद्विदाम् ५. हंसःसदसद्वाक्षीरनीरयोरिवात्मा नात्मनोर्विवेचनात् ६ नृपतीनृपतेःसमीपेउच्चरिताः ७ ८
९ अनुसूयितं असूयाकर्मणि अयास्यांतया १० ११ ब्राह्मणकःकुत्सितब्राह्मणोपियद्गृहेस्यात्सहिधन्यः किंपुनःकुलेजातः १२ १३ १४ १५

भीष्मउवाच . स्पृहयामिद्विजातिभ्योयेषांब्रह्मपरंधनम् येषांस्वप्रत्ययःस्वर्गस्तपःस्वाध्यायसाधनम् ३ येषांबालाश्चवृद्धाश्चपि
तृपैतामहीधुरम् उद्वहंतिनसीदंतितेभ्योवैस्पृहयाम्यहम् ४ विद्यास्वभिविनीतानांदांतानांमृदुभाषिणाम् श्रुतवृत्तोपपन्नानांसदा
क्षरविदांसताम् ५ संसत्सुवदतांतातहंसानामिवसंघशः मंगल्यरूपारुचिरादिव्यजीमूतनिःस्वनाः ६ सम्यगुच्चरितावाचःश्रूय
तेहियुधिष्ठिर शुश्रूषमाणेनृपतौप्रेत्यचेहसुखावहाः ७ येचापितेषांश्रोतारःसदासदसिसंमताः विज्ञानगुणसंपन्नास्तेभ्यश्चस्पृ
हयाम्यहम् ८ सुसंस्कृतानिप्रयताःशुचीनिगुणवंतिच ददत्यन्नानितृप्त्यर्थंब्राह्मणेभ्यो युधिष्ठिर ९ येचापिसततंराजंस्तेभ्यश्च
स्पृहयाम्यहम् . शक्यंह्येवाहवेयोद्धुंनदातुमनसूयितम् ११ शूरावीराश्चशतशःसंतिलोकेयुधिष्ठिर येषांसंख्यायमानानांदान-
शूरोविशिष्यते १२ धन्यःस्यांयद्यहंभूयःसौम्यब्राह्मणकोपिवा कुलेजातोधर्मगतिस्तपोविद्यापरायणः १२ नमेत्वत्तःप्रियतरोलो
केस्मिन्पांडुनंदन त्वत्तश्चापिप्रियतराब्राह्मणाभरतर्षभ १३ यथाममप्रियतमास्त्वत्तोविप्राःकुरूत्तम तेनसत्येनगच्छेयंलोका
न्यत्रसशांतनुः १४ नमेपिताप्रियतरोब्राह्मणेभ्यस्तथाभवत् नमेपितुःपितावापियेचान्येपिसुहृज्जनाः १५ नहिमेवृजिनंकिंचि
द्विद्यतेब्राह्मणेष्विह अणुवायदिवास्थूलंविद्यतेसाधुकर्मसु १६ कर्मणामनसावापिवाचावापिपरंतप यन्मेकृतंब्राह्मणेभ्यस्ते
नाद्यनतपाम्यहम् १७ ब्रह्मण्यइतिमामाहुस्तयावाचास्मितोषितः एतदेवपवित्रेभ्यःसर्वेभ्यःपरमंस्मृतम् १८ पश्यामिलोका
नमलाञ्छुचीन्ब्राह्मणयायिनः तेषुमेतातगंतव्यमह्नायचचिरायच १९ यथापत्याश्रयोधर्मःस्त्रीणांलोकेयुधिष्ठिर सदेवः
सागतिर्नान्यास्त्रियस्यतथाद्विजाः २० क्षत्रियःशतवर्षीचदशवर्षीद्विजोत्तमः पितापुत्रौचविज्ञेयौतयोर्हिब्राह्मणोगुरुः २१
नारीतुपत्यभावेवैदेवरंकुरुतेपतिम् पृथिवीब्राह्मणालाभेक्षत्रियंकुरुतेपतिम् २२ पुत्रवच्चततोरक्ष्याउपास्यागुरुवच्चते अग्नि
वच्चोपचर्यावैब्राह्मणाःकुरुसत्तम २३ ::

वृजिनंसंकटं फलाशोत्विवावत् पूज्यत्वाद्देवतान्पूजयामि नतुफलायेत्यर्थः १६ तेनब्राह्मणाराधनेन अ
द्यशरपंजरस्थोपिनतपामिनव्यथांप्राप्नोमीतिस्वानुभवंदर्शयति १७ ब्रह्मण्योब्रह्मजातोआसक्तः १८ यायिनोऽनुचरस्यमे १९ २० २१ २२ २३ ६

२४ तेजस इति ब्राह्मणादिभ्य इति न तु तपस्तेजस्तपसी स्वीये प्रकाशयेदित्यर्थः तेजः क्रोधबलं तपः योगबलम् २५ तयोस्तपस्तेजसोर्ब्राह्मणक्षत्रियस्य यौ व्यवसायः फलं अभिभवरूपं शीघ्रं नीत्रं तथापि तपस्विन एवेन राजन् हन्युर्न तेजस्विन इत्यर्थः २६ भूय इति ल्यब्लोपे पंचमी अकोपनं ब्राह्मणं प्राप्य यत्तु भूयः बहुतरः उभयं तपस्तेज आरब्धं स्यात् ततः दत्तं खण्डितं भवतीति शेषः क्षमावता प्रयुक्तं तेजो बह्वपि तूलराशिवत्सद्यो नश्यतीत्यर्थः उभयत उभयं चेत् शेषं कुर्यात् न तद्दत्तशेषं शेषयेदित्यन्वयः द्वाभ्यां अन्योन्यस्मिन्प्रयुक्ते तेज आदिद्वयं न निःशेषं नश्यति किंतु शेषं क्षमावता खण्डितस्य तस्यावशिष्टं तु न शेषयेन्न शि-

ऋजून्सतः सत्यशीलान्सर्वभूतहिते रतान् आशीविषानिव क्रुद्धान्द्विजान्परिचरेत्सदा २४ तेजसस्तपसश्चैव नित्यं बिभ्येद्युधिष्ठिर
उभे चैते परित्याज्ये तेजश्चैव तपस्तथा २५ व्यवसायस्तयोः शीघ्रमुभयोरेव विद्यते हन्युः क्रुद्धा महाराज ब्राह्मणा ये तपस्विनः २६
भूयः स्यादुभयं दत्तं ब्राह्मणाद्यदकोपनात् कुर्यादुभयतः शेषं दत्तशेषं न शेषयेत् २७ दण्डपाणिर्यथा गोषु पालो नित्यं हि रक्षयेत् ब्रा
ह्मणान्ब्रह्म च तथा क्षत्रियः परिपालयेत् २८ पितेव पुत्रान्रक्षेथा ब्राह्मणान्धर्मचेतसः गृहे चैषामवेक्षेथाः किंस्विदस्तीति जीव-
नम् २९ इति श्रीमहाभारते आनुशासनिके पर्वणि अष्टमोऽध्यायः ८ युधिष्ठिर उवाच ब्राह्मणानां तु ये लोकाः प्रतिश्रुत्य
पितामह न प्रयच्छन्ति मोहात्ते के भवन्ति महाद्युते १ एतन्मे तत्त्वतो ब्रूहि धर्मं धर्मभृतां वर प्रतिश्रुत्य दुरात्मानो न प्रयच्छन्ति ये नराः
२ भीष्म उवाच यो न दद्यात्प्रतिश्रुत्य स्वल्पं वा यदि वा बहु आशास्तस्य हताः सर्वाः क्लीबस्येव प्रजाफलम् ३ यां रात्रिं जायते
जीवो यां रात्रिं च विनश्यति एतस्मिन्नन्तरे यद्यत्सुकृतं तस्य भारत ४ यच्च तस्य हुतं किंचिद्दत्तं वा भरतर्षभ तपस्तप्तमथो वापि सर्वं
तस्योपहन्यते ५ अथैतद्वचनं प्राहुर्धर्मशास्त्रविदो जनाः निशम्य भरतश्रेष्ठ बुद्ध्या परमयुक्तया ६ अपि चोदाहरन्तीमं धर्मशा
स्त्रविदो जनाः अश्वानां श्यामकर्णानां सहस्रेण स मुच्यते ७ अत्रैवोदाहरन्तीममितिहासं पुरातनम् शृगालस्य च संवादं वानर
स्य च भारत ८ तौ सखायौ पुरा ह्यास्तां मानुषत्वे परंतप अन्यां योनिं समापन्नौ शार्गालीं वानरीं तथा ९ ततः परासून्खादन्तं शृ
गालं वानरोऽब्रवीत् श्मशानमध्ये संप्रेक्ष्य पूर्वजातिमनुस्मरन् १० किं त्वया पापकं पूर्वं कृतं कर्म सुदारुणम् यस्त्वं श्मशाने मृतका
न्पूतिकानत्सि कुत्सितान् ११ एवमुक्तः प्रत्युवाच शृगालो वानरं तदा ब्राह्मणस्य प्रतिश्रुत्य न मया तदुपाहृतम् १२

ष्यते अपितु निःशेषमेव नश्यतीत्यर्थः २७ २८ अस्तीति अभावे तद्देयमित्यर्थः २९ इति श्रीमहाभारते आनुशासनिके पर्वणि टीकायां अष्टमोऽध्यायः ८ ॥ ब्राह्मणानां १ २ ३ ४ ५ निशम्य विचार्य ६ अपि चेति तत्र प्रायश्चित्तं सहस्रश्यामकर्णदानं अशक्यमनुष्ठातुमत एनत् पापं दुर्जरमिति भावः ७ अत्रैव प्रतिश्रुतस्य अप्र-
दाने विषये ८ ९ १० ११ १२

१३ १४ १५ ब्रुवतोध्यापकस्यकथांकथयतोमुखात्श्रुतम् १६ श्रुतश्चायमितिहासः कृष्णस्यव्यासस्य नृगकथांकथयतोवासुदेवस्यवामुखात् श्रुतोयमर्थः १७
१८ आशावंध्याशा १९ २० अक्षय्यंपित्र्यर्थमुद्दिष्टंदानंभुक्तेइत्यक्षय्यभुगग्निः. २१ अगदसंकाशःचिकित्सकतुल्यः २२ शांतिरिष्टेन शांत्याहितेनक्षेमेण
शिष्टंक्षेमेइतिमेदिनी २३ .२४ .२५ २६ इतःअस्मिन्लोके ब्राह्मणएवदानपात्रमितिप्रयत्नःकार्यः २७ तीर्थमपिब्राह्मणएवेत्याहमहर्द्धिरिति

तत्कृतेपापंपक्वींयोनिमापन्नोस्मिप्लवंगम तस्माद्देवविधंभक्ष्यंभक्षयामिबुभुक्षितः १३ भीष्मउवाच शृगालोवानरंप्राह पु
नरेवनरोत्तम किंत्वयापातकंकर्मकृतंयेनासिवानरः १४ वानरउवाच सदाचारफलाहारोब्राह्मणानांप्लवंगमः तस्मान्न
ब्राह्मणस्वंतुहर्त्तव्यंविदुषासदा समंविवादोमोक्तव्योदातव्यंचप्रतिश्रुतम् १५ भीष्मउवाच इत्येतद्ब्रुवतोराजन्ब्राह्मणस्य
मयाश्रुतम् कथांकथयतःपुण्यांधर्मज्ञस्यपुरातनीम् १६ श्रुतश्चापिमयाभूयःकृष्णस्यापिविशांपते कथांकथयतःपूर्वंब्राह्मण-
प्रतिमंडव १७ नहर्तव्यंविप्रधनंक्षंतव्यंतेषुनित्यशः बालाश्चनावमंतव्यादरिद्राःकृपणाअपि १८ एवमेवचमानित्यंब्राह्म-
णाःसंदिशंतिवै प्रतिश्रुत्यभवेद्देयंनाशाकार्याद्विजोत्तमे १९ ब्राह्मणोह्याशयापूर्वंकृतयापृथिवीपते सुसमिद्धोयथादीप्तःपावक
स्तद्विधःस्मृतः २० यंनिरीक्षेतसंक्रुद्धआशयापूर्वजातया प्रदहेच्चहितंराजन्कक्षमक्षय्यभुग्यथा २१ सएवहियदातुष्टोवचसा
प्रतिनंदति भवत्यगदसंकाशोविषयेतस्यभारत २२ पुत्रान्पौत्रान्पशूंश्चैवबांधवान्सचिवांस्तथा पुरंजनपदंचैवशांतिरिष्टेन
पोषयेत् २३ एतद्धिपरमंतेजोब्राह्मणस्येहदृश्यते सहस्रकिरणस्येवसवितुर्धरणीतले २४ तस्माद्दातव्यमेवेह प्रतिश्रुत्ययुधि
ष्ठिर यदीच्छेच्छोभनांजातिंप्राप्तुंभरतसत्तम २५ ब्राह्मणस्यहिदत्तेनध्रुवंस्वर्गोह्यनुत्तमः शक्यःप्राप्तुंविशेषेणदानंहिमहतीक्रि
या २६ इतोदत्तेनजीवंतिदेवताःपितरस्तथा तस्माद्दानानिदेयानिब्राह्मणेभ्योविजानता २७ महर्द्धिर्भरतश्रेष्ठब्राह्मणस्तीर्थ
मुच्यते वेलायांनतुकस्यांचिद्गच्छेद्धिप्रात्यपूजितः २८ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेशृगालवानरसंवादेन
वमोऽध्यायः ९ युधिष्ठिरउवाच मित्रसौहार्दयोगेनउपदेशंकरोतियः जात्याधमस्यराजर्षेदोषस्तस्यभवेन्नवा १ एतदि
च्छामितत्त्वेनव्याख्यातंवैपितामह सूक्ष्मागतिर्हिधर्मस्ययत्रमुह्यंतिमानवाः २ भीष्मउवाच अत्रतेवर्णयिष्यामिशृणुराजन्यथा
क्रमम् ऋषीणांवदतांपूर्वंश्रुतमासीद्यथापुरा ३

२८ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांनवमोऽध्यायः ९ मित्रसौहार्देत्य
ध्यायेनत्नीचायधर्मरहस्यंनदद्यादित्युक्तं मित्रंउपकारमपेक्ष्यउपकर्त्ता सुहृत्तुउपकारमनपेक्ष्योपकर्त्ता लोभात्कृपयावेत्यर्थः १ २ ३ ४ ५

उपाध्यायस्य उपदेशकर्तुः भाव्यं न शूद्राय मतिं दद्यादित्यादि शास्त्रेण ४ दुरुक्तं दुःखस्थं नीचं प्रति उक्तं वचनं ५ ६ ७ व्रतिभिर्ब्रह्मचारिभिः तापसैः वानप्रस्थैः ८ ९ यतिभिः संन्यासिभिः १० दयान्वितः सर्वभूताभयदानेन प्रव्रज्यां कृतवानित्यर्थः ११ दीक्षां नियमं १२ तपस्ये तपः कर्तुं १३ वक्तुं अधिगन्तुं व्रजगन्ता विप्रस्य रूपम् प्रव्राजयितुं विधिवत् स्वोचितकर्मत्याजयितुम् १४ १५ लिंगं संन्यासिचिन्हं सेवकस्य तव प्राव्राज्यान

उपदेशो न कर्तव्यो जातिहीनस्य कस्यचित् उपदेशे महान् दोष उपाध्यायस्य भाष्यते ४ निदर्शनमिदं राजन् शृणु मे भरतर्षभ दुरुक्त वचने राजन् यथा पूर्वं युधिष्ठिर ५ ब्रह्माश्रमपदे वृत्तं पार्श्वे हिमवतः शुभे तत्राश्रमपदं पुण्यं नानावृक्षगणायुतम् ६ नानागुल्मलताकीर्णं मृगद्विजनिषेवितम् सिद्धचारणसंयुक्तं रम्यपुष्पितकाननम् ७ व्रतिभिर्बहुभिः कीर्णं तापसैरुपसेवितम् ब्राह्मणैश्च महाभागैः सूर्यज्वलनसन्निभैः ८ नियमव्रतसंपन्नैः समाकीर्णं तपस्विभिः दीक्षितैर्भरतश्रेष्ठ यताहारैः कृतात्मभिः ९ तपोध्ययनघोषैश्च नादितं भरतर्षभ वालखिल्यैश्च बहुभिर्यतिभिश्च निषेवितम् १० तत्र कश्चित् समुत्साहं कृत्वा शूद्रो दयान्वितः आगतो ह्याश्रमपदं पूजितश्च तपस्विभिः ११ तांस्तु दृष्ट्वा मुनिगणान् देवकल्पान्महौजसः विविधा वहतो दीक्षाः संप्रहृष्यत भारत १२ अथास्य बुद्धिरभवत् तपस्ये भरतर्षभ ततोऽब्रवीत् कुलपतिं पादौ संगृह्य भारत १३ भवत्प्रसादादिच्छामि धर्मं वक्तुं द्विजर्षभ तन्मां त्वं भगवन्वक्तुं प्रव्राजयितुमर्हसि १४ वर्णावरोऽहं भगवन् शूद्रो जात्यास्मि सत्तम शुश्रूषां कर्तुमिच्छामि प्रपन्नाय प्रसीद मे १५ कुलपतिरुवाच न शक्यमिह शूद्रेण लिंगमाश्रित्य वर्तितुम् आस्यतां यदि ते बुद्धिः शुश्रूषानिरतो भव १६ शुश्रूषया परांल्लोकानवाप्स्यसि न संशयः १७ भीष्म उवाच एवमुक्तस्तु मुनिना स शूद्रोऽचिन्तयन्नृप कथमत्र मया कार्यं श्रद्धा धर्मपरा च मे १८ विज्ञातमेवं भवतु करिष्ये प्रियमात्मनः गत्वाश्रमपदात् दूरमुटजं कृतवांस्तु सः १९ तत्र वेदीं च भूमिं च देवतायतनानि च निवेश्य भरतश्रेष्ठ नियमस्थोऽभवन्मुनिः २० अभिषेकांश्च नियमान् देवतायतनेषु च बलिं च कृत्वा हुत्वा च देवतां चाप्यपूजयत् २१ संकल्पनियमोपेतः फलाहारो जितेन्द्रियः नित्यं सन्निहिताभिस्तु ओषधीभिः फलैस्तथा २२ अतिथीन् पूजयामास यथावत् समुपागतान् एवं हि सुमहान्कालो व्यत्यक्रामत तस्य वै २३ अथास्य मुनिरागच्छत् संगत्यार्थं तमाश्रमम् संपूज्य स्वागतेनर्षिं विधिवत् समतोषयत् २४

धिकारान्न युक्तम् १६ १७ १८ आत्मनः प्रियं विक्षेपकस्य शुश्रूषाख्यस्य स्वधर्मस्य त्यागम् लिंगधारणानधिकारेऽपि त्यागमात्रे सर्वस्याधिकारात् उटजं पर्णशालाम् १९ वेदीं पूजार्थं भूमिं शयनाद्यर्थं २० अभिषेकान् त्रिसंध्यस्नानानि २१ संकल्पस्य नियमो निग्रहः चित्तवृत्तिनिरोध इति यावत् तेन उपेतः २२ २३ २४

२५ २६ २७ २८ २९ बृसींचरमशीर्षिकीम् आसनंकूर्चंपश्चिमाग्रम् ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ वेदेऋ

अनुकूलाःकथाःकृत्वायथागतंमपृच्छत ऋषिःपरमतेजस्वीधर्मात्मासंशितव्रतः २५ एवंसुबहुशस्तस्यशूद्रस्यभरतर्षभ सोगच्छ-
दाश्रमंमृषिःशूद्रंद्रष्टुंनरर्षभ २६ अथतंतापसःशूद्रःसोब्रवीद्भरतर्षभ पितृकार्यंकरिष्यामितत्रमेनुग्रहंकुरु २७ बाढमित्येवतंवि-
प्रउवाचभरतर्षभ शुचिर्भूत्वासशूद्रस्तुतस्यर्षेःपाद्यमानयत् २८ अथदर्भांश्चवन्यांश्चओषधीर्भरतर्षभ पवित्रमासनंचैवबृसींच
समुपानयत् २९ अथदक्षिणमावृत्यबृसींचरमशीर्षिकीम् कृतामन्यायतोदृष्ट्वाततःशूद्रमृषिरब्रवीत् ३० कुरुष्वेतांपूर्वशीर्षांभवा-
ञ्छोदङ्मुखःशुचिः सचतत्कृतवान्शूद्रःसर्वंयदृषिरब्रवीत् ३१ यथोपदिष्टंमेधावीदर्भार्घादियथातथम् हव्यकव्यविधिंकृत्स्न
मुक्तंतेनतपस्विना ३२ ऋषिणापितृकार्येचसचधर्मपथेस्थितः पितृकार्येकृतेचापिविसृष्टःसजगामह ३३ अथदीर्घस्यकाल-
स्यसतप्यन्शूद्रतापसः वनेपंचत्वमगमत् सुकृतेनचतेनवै ३४ अजायतमहाराजवंशेसचमहाद्युतिः ३५ तथैवसऋषिस्ता
तकालधर्ममवाप्यह ३६ पुरोहितकुलेविप्रआजातोभरतर्षभ एवंतौतत्रसंभूतावुभौशूद्रमुनीतदा ३७ क्रमेणवर्धितौचापि
विद्यासुकुशलावुभौ अथर्ववेदेवेदेचबभूवर्षिःसुनिष्ठितः कल्पप्रयोगेचोत्पन्नेज्योतिषेचपरंगतः ३८ सांख्येचैवपराप्रीति-
स्तस्यचैवव्यवर्धत पितर्युपरतेचापिकृतशौचस्तुपार्थिवः ३९ अभिषिक्तःप्रकृतिभीराजपुत्रःसपार्थिवः अभिषिक्तेनसऋषिर
भिषिक्तःपुरोहितः ४० सतंपुरोधायसुखमवसद्भरतर्षभ राज्यंशशासधर्मेणप्रजाश्चपरिपालयन् ४१ पुण्याहवाचनेनित्यं
धर्मकार्येषुचासकृत् उत्स्मयन्प्राहसच्चापिदृष्ट्वाराजापुरोहितम् ४२ एवंसबहुशोराजन्पुरोधसमुपाहसत् लक्षयित्वापुरो
धासंबहुशस्तंनराधिपम् ४३ उत्स्मयंतंचसततंदृष्ट्वासोमन्युमाविशत् अथशून्येपुरोधास्तुसहराज्ञासमागतः ४४ कथाभि
रनुकूलाभीराजानंचाभ्यरोमयत् ततोब्रवीन्नरेंद्रंसपुरोधाभरतर्षभ ४५ वरमिच्छाम्यहंत्वेकंत्वयादत्तंमहाद्युते ४६ राजो
वाच वराणांतेशतंदद्यांकिंबतैकंद्विजोत्तम स्नेहाच्चबहुमानाच्चनास्त्यदेयंहिमेतव ४७ पुरोहितउवाच एकंवैवरमिच्छा
मियदितुष्टोसिपार्थिव प्रतिजानीहितावत्त्वंसत्यंयद्वदनानृतम् ४८ भीष्मउवाच बाढमित्येवतंराजाप्रत्युवाचयुधिष्ठिर
यदिज्ञास्यामिवक्ष्यामिअजानन्नतुसंवदे ४९ पुरोहितउवाच पुण्याहवाचनेनित्यंधर्मकृत्येषुचासकृत् शांतिहोमेषुचसदाकिं
हससिवीक्ष्यमाम् ५०

वेदत्रिये कल्पप्रयोगेसूत्रोक्तयज्ञप्रयोगे ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५०

५१ ५२ ५३ ५४ ५५ ५६ ५७ मत्कृतस्यमत्संस्कृतस्य ५८ ५९ विपर्ययेणशूद्रोप्यहंजातिस्मरोजातःमुनिरपित्वंपुरोहितोजातइति
वैपरीत्येन मन्युर्दैन्यम् ६० भवेभवनिमित्तं ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ सत्यानृ

सव्रीडइवैभृशंतिहिमनोमेहसतात्वया। कामयाशापितोराजन्नान्यथावक्तुमर्हसि ५१ सम्यक्तंकारणंत्वत्र नतेहास्यमकारणम् को
तूहलंमेसुभृशंतत्त्वेनकथयस्वमे ५२ राजोवाच एवमुक्तेत्वयाविप्रयदवाच्यंभवेदपि अवश्यमेववक्तव्यंशृणुष्वैकमनाद्वि-
ज ५३ पूर्वदेहेयथावृत्तंतन्निबोधद्विजोत्तम जातिस्मरोस्म्यहंब्रह्मन्नवधानेनमेशृणु ५४ शूद्रोहमभवंपूर्वंतपसाभृशसंयु
तः ऋषिरुग्रतपास्त्वंचतदाभूर्द्विजसत्तम ५५ प्रीयताहितदाब्रह्मन्ममानुग्रहबुद्धिना पितृकार्येत्वयापूर्वमुपदेशःकृतोनघ ५६
वृस्यांदर्भेषुहव्येचकव्येचमुनिसत्तम एतेनकर्मदोषेणपुरोधास्त्वमजायथाः ५७ अहंराजाचविप्रेन्द्रपश्यकालस्यपर्ययम् म
त्कृतस्योपदेशस्यत्वयावाप्तमिदंफलम् ५८ एतस्मात्कारणाद्ब्रह्मन्प्रहसेत्वांद्विजोत्तम नत्वांपरिभवन्ब्रह्मन्प्रहसामिगुरुर्भवान् ५९ वि
पर्ययेणमेमन्युस्तेनसंतप्यतेमनः जातिंस्मराम्यहंतुभ्यमतस्त्वांप्रहसामिवै ६० एवंतवोग्रंहितपउपदेशेननाशितम् पुरोहितत्वमु-
त्सृज्ययतस्वत्वंपुनर्भवे ६१ इतस्त्वमधमामन्यांमायोनिंप्राप्स्यसेद्विज गृह्यतांद्रविणंविप्रपूतात्माभवसत्तम ६२ भीष्मउवाच
ततोविसृष्टोराज्ञातुविप्रोदानान्यनेकशः ब्राह्मणेभ्योददौवित्तंभूमिंग्रामांश्चसर्वशः ६३ कृच्छ्राणिचीर्त्वाचततोयथोक्तानिद्वि-
जोत्तमैः तीर्थानिचापिगत्वावैदानानिविविधानिच ६४ दत्वागाश्चैवविप्रेभ्यःपूतात्माभवदात्मवान् तमेवचाश्रमंगत्वाचचारविपुलं
तपः ६५ ततःसिद्धिंपरांप्राप्तोब्राह्मणोराजसत्तम संमतश्चाभवत्तेषामाश्रमेतन्निवासिनाम् ६६ एवंप्राप्तोमहत्कृच्छ्रमृषिःसनृप
सत्तम ब्राह्मणेननवक्तव्यंतस्माद्वर्णावरेजने ६७ ब्राह्मणाःक्षत्रियावैश्यास्त्रयोवर्णाद्विजातयः एतेषुकथयन्राजन्ब्राह्मणोनप्रदुष्य
ति ६८ तस्मात्सद्भिर्नवक्तव्यंकस्यचित्किंचिदग्रतः सूक्ष्मागतिर्हिधर्मस्यदुर्ज्ञेयाह्यकृतात्मभिः ६९ तस्मान्मौनेनमुनयोदीक्षांकुर्वन्ति
चादृताः दुरुक्तस्यभयाद्राजन्नाभाषन्तेचकिंचन ७० धार्मिकागुणसंपन्नाःसत्यार्जवसमन्विताः दुरुक्तवाचाभिहितेःप्राप्नुवन्तीहदु
ष्कृतम् ७१ उपदेशोनकर्तव्यःकदाचिदपिकस्यचित् उपदेशाद्धितत्पापंब्राह्मणःसमवाप्नुयात् ७२ विमृश्यतस्मात्प्राज्ञेनकर्तव्यं
धर्ममिच्छता सत्यानृतेनहिकृतउपदेशोहिनस्तिहि ७३ वक्तव्यमिहपृष्टेनविनिश्चित्यविनिश्चयम् सचोपदेशःकर्तव्योयेनधर्ममवा-
प्नुयात् ७४

तेन वाणिज्येनधनलोभेनेत्यर्थः सत्यानृतंतुवाणिज्यमितिस्मृतिः ७३ विनिश्चयंनिश्चेतव्यम् ७४ ७५ ७६ ७७ ७८

७५ इतिश्रीमहाभारते आनुशासनिके पर्वणि टीकायां दशमोऽध्यायः १० ॥ ७ कीदृश इति श्रीमानेव ददातीति श्रीकरान्योगान् कथयितुमध्यायः श्रीः रू-
पौदार्यादिशोभा तद्युता पद्याधनसमृद्धिः श्रीः पद्मेत्युच्यते १ पर्यपृच्छत प्रियमित्यपकृष्यते २ ३ उपसेवसे गजतुरगादिरूपेण संतिष्ठसे धैर्यौदार्यसौ-
दर्यशौर्यादिरूपेण पुरुषे वससि ४ देव्या रुक्मिण्या ५ प्रगल्भे वाग्मिनि दक्षे अनलसे देवपरे देवाराधननिष्ठे ६ नृशंसवर्णे निष्ठुराक्षरभाषिणि अस-

एतज्ज्ञे सर्वमाख्यातमुपदेशकृते मया महान्क्लेशो हि भवति तस्मान्नोपदिशेद्द्विज ७५ इतिश्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे
शूद्रमुनिसंवादे दशमोऽध्यायः १० युधिष्ठिर उवाच कीदृशे पुरुषे तात स्त्रीषु वा भरतर्षभ श्रीः पद्मा वसते नित्यं तन्मे ब्रूहि पितामह
१ भीष्म उवाच अत्र ते वर्णयिष्यामि यथावृत्तं यथाश्रुतम् रुक्मिणी देवकीपुत्रसन्निधौ पर्यपृच्छत २ नारायणस्याङ्कगतां ज्वलं-
तीं दृष्ट्वा श्रियं पद्मसमानवर्णां कौतूहलाद्विस्मितचारुनेत्रा पप्रच्छ मातां मकरध्वजस्य ३ कानीह भूतान्युपसेवसे त्वं संतिष्ठसे कानि
वसे न्न सेलम् तानि त्रिलोकेश्वरभूतकान्ते तत्त्वेन मे ब्रूहि महर्षिकल्पे ४ एवं तदा श्रीरभिभाष्यमाणा देव्या समक्षं गरुडध्वजस्य उवाच
वाक्यं मधुराभिधानं मनोहरं चन्द्रमुखी प्रसन्ना ५ श्रीरुवाच वसामि नित्यं सुभगे प्रगल्भे दक्षे नरे कर्मणि वर्तमाने अक्रोधने दे-
वपरे कृतज्ञे जितेन्द्रिये नित्यमुदीर्णसत्वे ६ नाकर्मशीले पुरुषे वसामि न नास्तिके सांकरिके कृतघ्ने न भिन्नवृत्ते न नृशंसवर्णे न चापि चौ-
रे न गुरुष्वसूये ७ ये चाल्पतेजोबलसत्वमानाः क्लिश्यन्ति कुप्यन्ति च यत्र तत्र न चैव तिष्ठामि तथाविधेषु नरेषु संगुप्तमनोरथेषु ८ य-
श्चात्मनि प्रार्थयते न किंचिद्यश्च स्वभावोपहतान्तरात्मा तेष्वल्पसंतोषपरेषु नित्यं नरेषु नाहं निवसामि सम्यक् ९ स्वधर्मशीलेषु च धर्मवित्सु
वृद्धोपसेवानिरते च दान्ते कृतात्मनि क्षान्तिपरे समर्थे क्षान्तासु दान्तासु तथाबलासु १० सत्यस्वभावार्जवसंयुतासु वसामि देवद्विजपूजिका-
सु प्रकीर्णभाण्डामनवेक्ष्यकारिणीं सदा च भर्तुः प्रतिकूलवादिनीं ११ परस्य वेश्माभिरतामलज्जामेवंविधां तां परिवर्जयामि पापामचो-
क्षामवलेहिनीं च व्यपेतधैर्यां कलहप्रियां च १२ निद्राभिभूतां सततं शयानामेवंविधां तां परिवर्जयामि सत्यासु नित्यं प्रियदर्शनासु सौभा-
ग्ययुक्तासु गुणान्वितासु १३ वसामि नारीषु पतिव्रतासु कल्याणशीलासु विभूषितासु यानेषु कन्यासु विभूषणेषु यज्ञेषु मेघेषु च वृष्टि-
मत्सु १४ वसामि फुल्लासु च पद्मिनीषु नक्षत्रवीथीषु च शारदीषु गजेषु गोष्ठेषु तथासनेषु सरःसु फुल्लोत्पलपङ्कजेषु १५

ये असूयावन्ति ७
तेजः शौर्यं सत्वं बुद्धिः यत्र तत्र विशिष्टपुरुषे संगुप्तमनोरथेषु अन्यतः ध्यायन्त्यन्यद्दर्शयन्ति तादृशेषु ८ स्वभावेन त्यादेमौढ्योपहतचित्त इत्यर्थः ९ स्वधर्मेति-
सार्द्धश्लोकः १० ११ पापा निर्दया अचोक्षा अशुचिः अवलेहिनीम सृक्किणी लेढि हीनासदा कुड्यामित्यर्थः १२ १३ यानादिषु रमणीयेषु सर्वेषु वसामीत्यर्थः १४
१५

१६ १७ यस्मिन्निति लक्ष्मीआमुसुपायाएतदित्यर्थः १८ १९ भावेनआदरेण शरीरभूताशरीरवती २० नाहमितिनारायणादन्यत्रधर्मादिव्रद्धिरूपेणैव वसामिनशरीरेणेत्यर्थः २१ इतिश्रीमहाभारतेअनुशासनपर्वणिटीकायांएकादशोऽध्यायः ११ ६७ स्त्रीपुंसयोरिति पूर्वाध्यायांतेसंवर्द्धते धर्मयशोर्थका मैरितिकामसुखवृद्धिरपिलक्ष्मीवत्वस्तीत्युक्तंतत्र स्त्रीपुंपमर्थेक्षयाकामसुखवृद्धिरस्तीतिलक्ष्मीकामेनकामिन्यःप्रीतिमत्योलक्ष्मीबुद्ध्यापूजनीयाइत्यध्याय

नदीषुहंसस्वननादितासुक्रौंचावघुष्टस्वरशोभितासु विकीर्णकूलद्रुमराजितासुतपस्विसिद्धद्विजसेवितासु १६ वसामिनित्यंसुबहूदका सु सिंहैर्गजैश्चाकुलितोदकासु मत्तेगजेगोवृषभेनरेंद्रे सिंहासनेसत्पुरुषेषुनित्यम् १७ यस्मिन्जनोहव्यभुजंजुहोतिगोब्राह्मणंचार्च तिदेवताश्च कालेचपुष्पैर्बलयःक्रियंतेतस्मिन्गृहेनित्यमुपैमिवासम् १८ स्वाध्यायनित्येषुसदाद्विजेषुक्षत्रेचधर्माभिरतेसदैव वैश्ये चकृष्याभिरतेवसामिशूद्रेचशुश्रूषणनित्ययुक्ते १९ नारायणेत्वेकमनावसामिसर्वेणभावेनशरीरभूता तस्मिन्हिधर्मःसुमहान्निविष्टो ब्रह्मण्यताचात्रतथाप्रियत्वं २० नाहंशरीरेणवसामिदेविनैवंमयाशक्यमिहाभिधातुम् भावेनयस्मिन्निवसामिपुंसिसंवर्द्धतेधर्मय- शोर्थकामैः २१ इतिश्रीमहाभारतेअनुशासनपर्वणिदानधर्मेश्रीरुक्मिणीसंवादेएकादशोऽध्यायः ११ युधिष्ठिरउवाच स्त्री पुंसयोःसंप्रयोगेस्पर्शःकस्याधिकोभवेत् एतस्मिन्संशयेराजन्यथावद्वक्तुमर्हसि १ भीष्मउवाच अत्राप्युदाहरंतीममितिहा- संपुरातनम् भंगास्वनेनशक्रस्ययथावैरमभूत्पुरा २ पुराभंगास्वनोनामराजर्षिरतिधार्मिकः अपुत्रःपुरुषव्याघ्रपुत्रार्थंयज्ञमाह रत् ३ अग्निष्टुतंसराजर्षिरिंद्रद्विष्टंमहाबलः प्रायश्चित्तेषुमर्त्यानांपुत्रकामेषुचेष्यते ४ इंद्रोज्ञात्वातुतंयज्ञंमहाभागःसुरेश्वरः अं तरंतस्यराजर्षेरन्विच्छन्नियतात्मनः ५ नचैवास्यांतरंराजन्सददर्शमहात्मनः कस्यचित्त्वथकालस्यमृगयांगतवान्नृपः ६ इदमंत रमित्येवशक्रोनृपममोहयत् एकाश्वेनचराजर्षिर्भ्रांतइंद्रेणमोहितः ७ नदिशोविंदतन्नृपःक्षुत्पिपासार्दितस्तदा इतश्चेतश्चवैराजन् श्रमतृष्णान्वितोनृप ८ सरोपश्यत्सुरुचिरंपूर्णंपरमवारिणा सोवगाह्यसरस्तातपाययामासवाजिनम् ९ अथपीतोदकंसोश्वं- वृक्षेबध्वानृपोत्तमः अवगाह्यततःस्नातस्तत्रस्त्रीत्वमवाप्तवान् १० आत्मानंस्त्रीकृतंदृष्ट्वाव्रीडितोनृपसत्तमः चिंतानुगतसर्वात्मा व्याकुलेंद्रियचेतनः ११ आरोहिष्येकथंत्वश्वंकथंयास्यामिवैपुरम् इष्टेनाग्निष्टुताचापिपुत्राणांशतमौरसम् १२ जातंमहाबलानां मेतान्प्रवक्ष्यामिकिंत्वहम् दारेषुचात्मकीयेषुपौरजानपदेषुच १३

तात्पर्यम् स्पर्शःवैषयिकंसुखं १ २ ३ वैरमूलमाहाग्निष्टुतमिति त्रिगुणतोग्नि १८
ष्टोमोऽग्निष्टुत् तत्रत्वग्निरेवस्तूयनेसचपुत्रंददातिदाशुषइतिमंत्रवर्णात्पुत्रप्रदःक्रतुः सचेंद्रद्विष्टस्तत्रेंद्रस्यप्राधान्याभावात् ४ यज्ञंक्रतुमितितिशेषः ५ ६ ७
८ ९ १० ११ १२ १३

मृदुत्वादयःस्त्रीगुणाआगताः १४ कर्कशत्वादयःपुरुषगुणाःनष्टाःकेनमित्तेनमेममस्त्रीत्वमभवदितिसंबंधः १५ १६ स्त्रीकृतःइंद्रेणस्त्रीत्वंशापितः १७
१८ १९ २० २१ २२ प्रत्यपद्यत भर्तृत्वेनस्त्रीकृतंवती. २३ २४ २५. २६ स्त्रीत्वदानेनद्विगुणितपुत्रप्राप्तिरूपउपकारएवजातोन-

मृदुत्वंचतनुत्वंचविक्लवत्वंतथैवच स्त्रीगुणाऋषिभिःप्रोक्ताधर्मतत्वार्थदर्शिभिः १४ व्यायामेकर्कशत्वंचवीर्यंचपुरुषेगुणाः पौरुषंवि
प्रनष्टंवैस्त्रीत्वंकेनापिमेभवत्. १५ स्त्रीभावात्पुनरश्वंतकथमारोढुमुत्सहे महतात्वथयत्नेनआरुह्याश्वंनराधिपः १६ पुनराया-
त्पुरंतातस्त्रीकृतोनृपसत्तमः पुत्रादाराश्चभृत्याश्चपौरजानपदाश्चते १७ किंन्विदंत्वितिविज्ञायविस्मयंपरमंगताः अथोवाचसरा
जर्षिःस्त्रीभूतोवदतांवरः १८ मृगयामस्मिनिर्यातोबलैःपरिवृतोदृढम् उद्भ्रान्तःप्राविशंघोरामटवींदैवचोदितः १९ अटव्यांचसु-
घोरायांतृष्णार्तोनष्टचेतनः सरःसुरुचिरप्रख्यमपश्यंपक्षिभिर्वृतम् २० तत्रावगाढःस्त्रीभूतोदैवेनाहंकृतःपुरा नामगोत्राणि
चाभाष्यदाराणांमंत्रिणांतथा २१ आहपुत्रान्सततःसोथस्त्रीभूतःपार्थिवोत्तमः संप्रीत्याभुज्यतांराज्यंवनंयास्यामिपुत्रकाः २२ ए
वमुक्त्वापुत्रशतंवनमेवजगामह गत्वाचैवाश्रमंसातुतापसंप्रत्यपद्यत २३ तापसेनास्यपुत्राणामाश्रमेष्वभवच्छतम् अथसादाय
तान्सर्वान्पूर्वपुत्रानभाषत २४ पुरुषत्वेसुतायूयंस्त्रीत्वेचेमेशतंसुताः एकत्रभुज्यतांराज्यंभ्रातृभावेनपुत्रकाः २५ सहिताभ्रात
रस्तेतुराज्यंबुभुजिरेतदा तान्दृष्ट्वाभ्रातृभावेनभुंजानान्राज्यमुत्तमम् २६ चिंतयामासदेवेंद्रोमन्युनाथपरिप्लुतः उपकारोस्यरा
जर्षेःकृतोनापकृतंमया २७ ततोब्राह्मणरूपेणदेवराजःशतक्रतुः भेदयामासतान्गत्वानगरेवैनृपात्मजान् २८ भ्रातॄणांनास्ति
सौभ्रात्रंयेप्येकस्यपितुःसुताः राज्यहेतोर्विवदिताःकश्यपस्यसुरासुराः २९ यूयंभंगास्वनापत्यास्तापसस्येतरेसुताः कश्यपस्य-
सुराश्चैवअसुराश्चसुतास्तथा ३० युष्माकंपैत्रिकंराज्यंभुज्यतेतापसात्मजैः इंद्रेणभेदितास्तेतुयुद्धेन्योन्यमपातयन् ३१ ततःश्रुत्वा
तापसीचापिसंतप्ताप्ररुरोदह ब्राह्मणश्छद्मनाभ्येत्यतामिंद्रोथान्वपृच्छत ३२ केनदुःखेनसंतप्तारोदिषित्वंवरानने ब्राह्मणंतंत-
तोदृष्ट्वासास्त्रीकरुणमब्रवीत् ३३ पुत्राणांद्वेशतेब्रह्मन्कालेनविनिपातिते अहंराजाभवंविप्रतत्रपुत्रशतंमम ३४ समुत्पन्नंस्व
रूपाणांसुभ्राणांब्राह्मणोत्तम कदाचिन्मृगयांयातउद्भ्रान्तोगहनेवने ३५ अवगाढश्चसरसिस्त्रीभूतोब्राह्मणोत्तम पुत्रान्राज्येप्रति
ष्ठाप्यवनमस्मिततोगतः ३६ स्त्रियाश्चमेपुत्रशततापसेनमहात्मना आश्रमेजनितंब्रह्मन्नीततन्नगरंमया ३७

स्त्रीत्वकृतोऽपकारइत्य
र्थः ३७. २८ २९ ३० ३१ ३२ ३३ ३४ स्वरूपाणांस्वस्यैवरूपंयेषांतेषां ३५ ३६ स्त्रियाःस्त्रीभूतस्यमेमम ३७ ७ ७ ७

३८ ३९ इंद्रद्विष्टेन अग्निष्टुतायज्ञेन धिष्ठितं अधिष्ठितं क्रतूनिति शेषः ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१
अध्यायतात्पर्यमाह स्त्रिया इति ५२ ५३ ५४ इतिश्रीमहाभारते आनुशासनिके पर्वणि टीकायां द्वादशोऽध्यायः १२ ७ तदेवं गौतमीसुदर्शनशक्र
प्रभृतीनामाख्यानैर्यदृच्छोपगतेषु दुःखेषु अनुद्विग्नमना अतिथिभक्त आनृशंस्यादिधर्मवान् श्रियं प्राप्नोति तस्याश्च फलं कामः इंद्रियप्रीतिरूपः सा च स्त्री-

तेषां च वैरमुत्पन्नं कालयोगेन वै द्विज एकच्छोत्राम्यहं ब्रह्मन् दैवेन समभिप्लुता ३८ इंद्रस्तां दुःखितां दृष्ट्वा अब्रवीत्परुषं वचः पुरा सु
दुःसहं भद्रे मम दुःखं त्वया कृतम् ३९ इंद्रद्विष्टेन यजता मामनादृत्य धिष्ठितम् इंद्रोहमस्मि दुर्बुद्धे वैरं ते पातितं मया ४० इंद्रं दृष्ट्वा-
तु राजर्षिः पादयोः शिरसा गतः प्रसीद त्रिदशश्रेष्ठ पुत्रकामेन स क्रतुः ४१ इष्टस्त्रिदशशार्दूल तत्र मे क्षन्तुमर्हसि प्रणिपातेन तस्येंद्रः परि
तुष्टो वरं ददौ ४२ पुत्रास्ते कतमे राजन् जीवंतु तत्त्वमाचक्ष्व मे स्त्रीभूतस्य हि ये जाताः पुरुषस्याथ ये भवन् ४३ तापसी तु ततः शक्रमुवाच
प्रयतांजलिः स्त्रीभूतस्य हि ये पुत्रास्ते मे जीवंतु वासव ४४ इंद्रस्तु विस्मितो दृष्ट्वा स्त्रियं पप्रच्छ तां पुनः पुरुषोत्पादिता ये ते कथं द्वेष्याः
सुतास्तव ४५ स्त्रीभूतस्य हि ये जाताः स्नेहस्तेभ्योधिकः कथम् कारणं श्रोतुमिच्छामि तन्मे वक्तुमिहार्हसि ४६ स्त्र्युवाच स्त्रि
यास्त्वभ्यधिकः स्नेहो न तथा पुरुषस्य वै तस्मात्ते शक्र जीवंतु ये जाताः स्त्रीकृतस्य वै ४७ भीष्म उवाच एवमुक्तस्ततस्त्विंद्रः प्रीतो-
वाक्यमुवाच ह सर्व एवेह जीवंतु पुत्रास्ते सत्यवादिनि ४८ वरं च वृणु राजेंद्र यं त्वमिच्छसि सुव्रत पुरुषत्वमथ स्त्रीत्वं मत्तो यदभिकां
क्षसे ४९ स्त्र्युवाच स्त्रीत्वमेव वृणे शक्र पुंस्त्वं नेच्छामि वासव एवमुक्तस्तु देवेंद्रस्तां स्त्रियं प्रत्युवाच ह ५० पुरुषत्वं कथं त्यक्त्वा स्त्री
त्वं चोदयसे विभो एवमुक्तः प्रत्युवाच स्त्रीभूतो राजसत्तमः ५१ स्त्रियाः पुरुषसंयोगे प्रीतिरभ्यधिका सदा एतस्मात्कारणाच्छक्र स्त्री
त्वमेव वृणोम्यहम् ५२ रमिताभ्यधिकं स्त्रीत्वे सत्यं वै देवसत्तम स्त्रीभावेन हि तुष्टास्मि गम्यतां त्रिदशाधिप ५३ एवमस्त्विति चोक्त्वा
तामापृच्छ्य त्रिदिवं गतः एवं स्त्रिया महाराज अधिका प्रीतिरुच्यते ५४ इतिश्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे द्वादशोऽ
ध्यायः १२ युधिष्ठिर उवाच किं कर्तव्यं मनुष्येण लोकयात्राहितार्थिना कथं वै लोकयात्रां तु किंशीलश्च समाचरेत् १ भीष्म उवा०
कायेन त्रिविधं कर्म वाचा चापि चतुर्विधम् मनसा त्रिविधं चैव दशकर्मपथांस्त्यजेत् २

णामेव भूयसी पुंसस्त्वल्पतरेत्येतावता ग्रंथेनोक्तं तमिमं कामं
तुच्छीकृत्य परमपुरुषावाप्तिकामस्य पूर्वोक्तानुद्वेगादीनुपासीनस्य वक्ष्यमाणविधिना परमेश्वरमाराधयिष्यतो हेयं दोषजातं वक्तुमयमध्यायं आरभ्यते किमिति
लोकयात्रा ऐहिकशिष्टव्यवहारं हितं च पारलौकिकं श्रेयः तदर्थिना किं कर्तव्यं किमवश्यमनुष्ठेयं लोकयात्रां लोकद्वयश्रेयःसाधनं १ कर्मपथान् स्वाभाविककर्ममार्गान् २

प्राणातिपातः हिंसा ३ असत्प्रलापं ग्राम्यवार्त्तादि पारुष्यं निष्ठुरभाषणं पैशून्यं राजद्वारादौ परदोषसूचनं अनृतं मिथ्यावादः परपीडाकरः मनसाप्येवं वदि-
ष्यामीति नानुचिंतयेत् ४ अनभिध्येति श्लोकेन परद्रव्ये अभिध्यानं परस्यानिष्टचिंतनम् वेदवादेषु नास्तिक्यमिति त्रीणि त्याज्यानि लक्षयेत् दशत्यजेदित्यु-
पक्रमात् ५ शुभं अहिंसादि आस्तिक्यांतं अशुभं अहिंसादि नास्तिक्यांतं फलं अभ्युदयदुःखादि स्वर्गनरकांतम् ६ इति श्री आनुशासनिके पर्वणि टीका-
यां त्रयोदशोऽध्यायः १३ ॥ ७ ॥ अशुभानि परित्यज्य शुभान्याचरता यज्ज्ञातव्यं तज्ज्ञानं स्वयमेव पृच्छति त्वयेति आपगेय गांगेय पितामहस्यापि ईशाय
अंतर्यामिणे सर्वत्र षष्ठ्यर्थे चतुर्थी शंभुः शंभवत्यस्मादित्यानंदाविर्भावः १ बभ्रवे विशालाय बभ्रुर्वैश्वानर इत्यादि विशाले पिंगले न्यवदिति मेदिनी महाभा-
ग्यं ऐश्वर्यं गुरावित्यादिः सप्तम्यापि षष्ठ्यर्थे अव्यक्तं जगत्कारणं अव्याकृताख्यं तस्य योनये उत्पत्तिप्रलयस्थानाय २ योहीति सर्वगतः सर्वोपादान-

प्राणातिपातः स्तैन्यं च परदारमथापि च त्रीणि पापानि कायेन सर्वतः परिवर्जयेत् ३ असत्प्रलापं पारुष्यं पैशून्यमनृतं तथा चत्वारि
वाचा राजेंद्र न जल्पेन्नानुचिंतयेत् ४ अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम् कर्मणां फलमस्तीति त्रिविधं मनसाचरेत् ५ त-
स्माद्वाक्कायमनसा नाचरेदशुभं नरः शुभाशुभान्याचरन्हि तस्य तस्याश्नुते फलम् ६ इति श्री महाभारते आनुशासनिके पर्वणि दा-
नधर्मे लोकयात्राकथने त्रयोदशोऽध्यायः १३ युधिष्ठिर उवाच त्वयापगेय नामानि श्रुतानीह जगत्पतेः पितामहेशाय विभो-
नामान्याचक्ष्व शंभवे १ बभ्रवे विश्वरूपाय महाभाग्यं च तत्त्वतः सुरासुरगुरोर्देव शंकरस्याव्यक्तयोनये २ भीष्म उवाच अश-
क्तोऽहं गुणान्वक्तुं महादेवस्य धीमतः यो हि सर्वगतो देवो न च सर्वत्र दृश्यते ३ ब्रह्मविष्णुसुरेशानां स्रष्टा च प्रभुरेव च ब्रह्मादयः
पिशाचांता यं हि देवा उपासते ४ प्रकृतीनां परत्वेन पुरुषस्य च यः परः ५ चिंत्यते यो योगविद्भिरृषिभिस्तत्त्वदर्शिभिः अक्षरं
परमं ब्रह्म असच्च सदसच्च यः ६

त्वात् सर्वत्र न दृश्यते दृश्यत्वे शरीरत्वापातादल्पत्वाच्च ३ ब्रह्मा विराट् विष्णुः सूत्रात्मा सुरेशः प्रा-
ज्ञः तेषां स्रष्टा उपादानं प्रभुर्निमित्तं उपासते स्वस्वोपाधित्यागेन अधिगच्छंति ४ प्रकृतीनां पंचतन्मात्राहंकारमहदव्यक्तानां विश्वकारणानां पुरुष-
स्य जीवात् भोक्तुरित्यर्थः पंचम्यर्थे षष्ठी इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्ता-
त्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति च श्रुतेस्तेभ्यस्तेभ्यः परः निष्कलः ५ चिंत्य-
ते न किंचिदपि चिंतयेदिति स्मृतेः सर्वचिंतात्यागेन प्राप्यते योगविद्भिः योगी बुध्याद्यसंगस्तैर्ऋषिभिः अक्षरं अपरिणामि परमं ब्रह्म अत्यंतपरिच्छेदत्रयशू-
न्यम् तदेव असत् अव्याकृतं द्व्यकारणम् सदसत् रज्जुसर्पवद्भासमानमप्यसत्त्वं निर्वचनीयमित्यर्थः ६ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

२९ ३१ आराध्यस्त्वमाहात्म्यं वासुदेवं उवाच शुश्रूषध्यमित्यादिना ननु मन्मना भव मामेव शरणं व्रजेति स्वस्यैवोपेयत्वं वदतः कथमन्य आराध्यः स्यादिति चेन्न मामेव विजानीहीति वक्तृ शास्त्रदृष्ट्या परमात्मनोऽस्मदर्थत्वात् पृथक्त्वेन मामुपास्स्वेति वदतस्तद्रूपस्यैव देवस्योपेयत्वाभावात् उपाधिनिष्कृष्टस्योपेयत्वं त्वन्मदादिसाधारणेन वासुदेवत्वस्योत्कर्षमर्हतीति यस्तु तस्तु यत्सर्वोपाधिशून्यं ब्रह्म अस्मदाद्यन्तरं तरं तदेव मुख्यमस्मच्छब्दालंबनं वासुदेवशब्दितं मायया मानुषवद्भूत्वा स्वप्राप्त्युपायभूतं तमुपास्य रूपमात्मनः स्वशास्त्रतत्त्वं स्वयमेव लोकानुग्रहार्थमुपदिशतीति न तयोर्भेदगंधोऽपीति ३२ ३३ नेत्वया ३४ ३५

शंभुं बलवतां श्रेष्ठं कांतरूपमकल्मषम् आत्मतुल्यं मम सुतं प्रयच्छ अच्युत माचिरम् ३० नहि ते प्राप्यमस्तीह त्रिषु लोकेषु किंचन लोकान् सृजेस्त्वमपरानिच्छन् यदुकुलोद्वह ३१ त्वया द्वादश वर्षाणि व्रती भूतेन शुष्यता आराध्य पशुभर्तारं रुक्मिण्या जनिताः सुताः ३२ चारुदेष्णः सुचारुश्च चारुवेशो यशोधरः चारुश्रवाश्चारुयशाः प्रद्युम्नः शंभुरेव च ३३ यथा ते जनिताः पुत्रा रुक्मिण्यां चारुविक्रमाः तथा ममापि तनयं प्रयच्छ मधुसूदन ३४ इत्येवं चोदितो देव्या तामुवाच सुमध्यमाम् अनुजानीहि मां राज्ञि करिष्ये वचनं तव ३५ सा च मामब्रवीद्गच्छ शिवाय विजयाय च ब्रह्मा शिवः काश्यपश्च नद्यो देवा मनोनुगाः ३६ क्षेत्रौषध्यो यज्ञवाहाश्छंदांस्यृषिगणाध्वराः समुद्रा दक्षिणा स्तोभा ऋक्षाणि पितरो ग्रहाः देवपत्न्यो देवकन्या देवमातर एव च ३७ मन्वंतराणि गावश्च चंद्रमाः सविता हरिः ३८ सावित्री ब्रह्मविद्या च ऋतवो वत्सरास्तथा क्षणा लवा मुहूर्त्ताश्च निमेषा युगपर्ययाः ३९ रक्षंतु सर्वत्र गतं त्वां यादव सुखाय च अरिष्टं गच्छ पंथानमप्रमत्तो भवानघ ४० एवं कृतस्वस्त्ययनस्तयाहं ततोऽभ्यनुज्ञाय नरेंद्रपुत्रीम् पितुः समीपे नरसत्तमस्य मातुश्च राज्ञश्च तथाहुकस्य गत्वा समावेद्य यदब्रवीन्मां विद्याधरेंद्रस्य सुता भृशार्त्ता ४१ तानभ्यनुज्ञाय तदातिदुःखाद्गदं तथैवातिबलं च रामम् अथोचतुः प्रीतियुतौ तदानीं तपः समृद्धिर्भवतोऽस्त्वविघ्नम् ४२ प्राप्यानुज्ञां गुरुजनाद्दहं तार्क्ष्यमचिंतयम् सोऽवहद्धिमवंतं मां प्राप्य चैनं व्यसर्जयम् ४३ तत्राहमद्भुतान्भावानपश्यं गिरिसत्तमे क्षेत्रं च तपसां श्रेष्ठं पश्याम्यद्भुतमुत्तमम् ४४ दिव्यं वैयाघ्रपद्यस्य उपमन्योर्महात्मनः पूजितं देवगंधर्वैर्ब्राह्म्या लक्ष्म्या समावृतम् ४५ धवककुभकदंबनारिकेलैः कुरबककेतकजंबुपाटलाभिः वटवरुणकवत्सनाभबिल्वैः सरलकपित्थपियालसालतालैः ४६

३६ यज्ञवाहा ऋत्विजश्छंदसामेव विशेषणम् छंदांसि वेदे देवेभ्यो हव्यमूढ्वेति ब्राह्मणात् तेषां यज्ञवाहत्वसिद्धिः स्तोभाः साम पूरणान्यक्षराणि हुं मा इत्यादीनि ३७ ३८ ३९ ४० नरेंद्रपुत्रीं ऋक्षराजस्य जांबवतो दुहितरं कपींद्रेत्यपि पाठः पत्नीमिति पाठे हे नरेंद्रेति संबोधनम् ४१ अथोचतुरित्यर्द्धं ४२ ४३ तपसां धर्माणां तपस्विनां वा ४४ ४५ ४६ ६९

४७ ४८ भस्मराशिभिरिति भस्मच्छन्नैरग्निभिः ४९ ५० ५१ ५२ ५३ ५४ संप्रक्षालैः मैत्र्यादिभिश्चित्तशोधनं कुर्वद्भिः ५५ गोचा
रिणः गोवन्मुखेनैव चरन्तः हस्तव्यापारशून्या इत्यर्थः मरीचिपाश्चन्द्ररश्मिपानेनैव जीवन्तः ५६ ५७ नास्तान्म हतत् इति पाठे व हत इत्यध्याहारः ५८

बदरीकुन्दपुन्नागैरशोकाम्रातिमुक्तकैः मधुकैः कोविदारैश्च चंपकैः पनसैस्तथा ४७ वन्यैर्बहुविधैर्वृक्षैः फलपुष्पप्रदैर्युतम् पुष्पगु
ल्मलताकीर्णं कदलीखण्डशोभितम् ४८ नानाशकुनिसंभोज्यैः फलैर्वृक्षैरलङ्कृतम् यथास्थानविनिक्षिप्तैर्भूषितं भस्मराशिभिः
४९ रुरुवानरशार्दूलसिंहद्वीपिसमाकुलम् कुरंगबर्हिणाकीर्णं मार्जारभुजगावृतम् ५० पूगैश्च मृगजातीनां महिषर्क्षनिषेवितम्
सकृत्प्रभिन्नैश्च गजैर्विभूषितं प्रहृष्टनानाविधपक्षिसेवितम् सुपुष्पितैरम्बुधरप्रकाशैर्महीरुहाणां च वनैर्विचित्रैः ५० नानापु
ष्परजोमिश्रो गजदानाधिवासितः दिव्यस्त्रीगीतबहुलो मारुतोऽभिमुखो ववौ ५१ धारानिनादैर्विहगप्रणादैः शुभैस्तथा बृंहितैः
कुंजराणाम् गीतैस्तथा किन्नराणामुदारैः शुभैः स्वनैः सामगानां च वीर ५२ अचिन्त्यमनसाप्यन्यैः सरोभिः समलङ्कृतम् विशालै
श्चाग्निशरणैर्भूषितं कुसुमावृतैः ५३ विभूषितं पुण्यपवित्रतोयया सदा च जुष्टं नृप जह्नुकन्यया विभूषितं धर्मभृतां वरिष्ठैर्महात्म
भिर्वह्निसमानकल्पैः ५४ वाय्वाहारैरम्बुपैर्जप्यनित्यैः संप्रक्षालैर्योगिभिर्ध्याननित्यैः धूमप्राशैरूष्मपैः क्षीरपैश्च संजुष्टं च ब्राह्म
णेन्द्रैः समन्तात् ५५ गोचारिणोऽथाश्मकुट्टा दन्तोलूखलिकास्तथा मरीचिपाः फेनपाश्च तथैव मृगचारिणः ५६ अश्वत्थफलभक्षा
श्च तथा ह्युदकशायिनः चीरचर्माम्बरधरास्तथा वल्कलधारिणः ५७ सुदुःखान्नियमांस्तांस्तान्वहतः सुतपोधनान् पश्यन्मुनीन्बहु
विधान्प्रवेष्टुमुपचक्रमे ५८ सुपूजितं देवगणैर्महात्मभिः शिवादिभिर्भारत पुण्यकर्मभिः रराज तच्चाश्रममण्डलं सदा दिवीव राजन्
शशिमण्डलं यथा ५९ क्रीडन्ति सर्पैर्नकुला मृगैर्व्याघ्राश्च मित्रवत् प्रभावाद्दीप्ततपसां संनिकर्षान्महात्मनाम् ६० तत्राश्रमपदे श्रे
ष्ठे सर्वभूतमनोरमे सेविते द्विजशार्दूलैर्वेदवेदाङ्गपारगैः ६१ नानानियमविख्यातैर्ऋषिभिः सुमहात्मभिः प्रविशन्नेव चापश्य
जटाचीरधरं प्रभुम् ६२ तेजसा तपसा चैव दीप्यमानं यथानलम् शिष्यैरनुगतं शान्तं युवानं ब्राह्मणर्षभम् ६३ शिरसा वन्दमा
नं मामुपमन्युरभाषत ६४ स्वागतं पुण्डरीकाक्ष सफलानि तपांसि नः यः पूज्यः पूजयसि मां द्रष्टव्यो द्रष्टुमिच्छसि ६५

५९ क्रीडन्तीति अहिंसा
प्रतिष्ठायां तत्संनिधौ वैरत्याग इति योगसूत्रात् सर्पनकुलादीनां वैरत्यागलिङ्गेन तत्रस्थानां मुनीनां अत्यन्तं अहिंसादियमनियमनिष्ठावत्त्वं दर्शितम् ६० ६१ नियमाः अ
नुपानादयस्तैरैर्वायुभक्षैः क्षीरपैः इत्यादिनामभिः ख्यातैः प्रविशन्नेवापश्यं उपमन्युमिति शेषः ६२ ६३ ६४ पूज्यः सगुणः द्रष्टव्यो निर्गुणः ६५ ६६ ६७ ६८

६६ ६७ ६८ ६९ ७० भावान् भमकामादीन् चित्ताभिप्रायान् सृजन्नित्यनेनांतर्यामित्वंदर्शितम् ७१ समानांसंवत्सराणामर्बुदंसमार्बुदं ७२ ७३
ग्रहस्यमंदारनाम्नः ७४ भगवतामहादेवेन ७५ उत्पादितंतस्यैवदैत्यस्यहननार्थं ७६ नद्रष्टुंशक्यंदुर्दर्शत्वात् ७७ जीर्णंजीर्णंतृणवद्व्यर्थमित्यर्थः ७८

तमहंप्रांजलिर्भूत्वामृगपक्षिष्वथाग्निषु । धर्मेचशिष्यवर्गेचसमपृच्छमनामयम् ६६ ततोमांभगवानाहसाम्नापरमवल्गुना लप्स्यसे
तनयंकृष्णआत्मतुल्यमसंशयम् ६७ तपःसुमहदास्थायतोषयेशानमीश्वरम् इहदेवःसपत्नीकःसमाक्रीडत्यधोक्षज ६८ इहै
वदैवतश्रेष्ठंदेवाःसर्षिगणाःपुरा तपसाब्रह्मचर्येणसत्येनचदमेनच ६९ तोषयित्वाशुभान्कामान् प्रापुस्तेजनार्दन तेजसांतपसां
चैवनिधिःसभगवानिह ७० शुभाशुभान्वितान्भावान्विसृजन्संक्षिपन्नपि आस्तेदेव्यासदाचिंत्योयंप्रार्थयसिशत्रुहन् ७१ हिर-
ण्यकशिपुर्योभूद्दानवोमेरुकंपनः तेनसर्वामरैश्वर्यंशर्वात्प्राप्तंसमार्बुदम् ७२ तस्यैवपुत्रप्रवरोमंदारोनामविश्रुतः महादेववरात्शक्रं
वर्षार्बुदमयोधयत् ७३ विष्णोश्चक्रंचतद्घोरंवज्रमाखंडलस्यच शीर्णंपराभवत्तातग्रहस्यांगेषुकेशव ७४ यत्तद्भगवतापूर्वंदत्तंच-
क्रंतवानघ जलांतरचरंहत्वादैत्यंचबलगर्वितम् ७५ उत्पादितंवृषांकेनदीप्तज्वलनसन्निभम् दत्तंभगवतातुभ्यंदुर्धर्षंतेजसाद्भुतम्
७६ नशक्यंद्रष्टुमन्येनवर्जयित्वापिनाकिनम् सुदर्शनंभवत्येवंभवेनोक्तंतदातुतत् ७७ सुदर्शनंतदानस्यलोकेनामप्रतिष्ठितम् तज्जी
र्णमभवत्तातग्रहस्यांगेषुकेशव ७८ ग्रहस्यातिबलस्यांगेवरदत्तस्यधीमतः नशस्त्राणिवहंत्यंगेचक्रवज्रशतान्यपि ७९ अर्द्यमा-
नाश्चविबुधाग्रहेणसुबलीयसा शिवदत्तवरान्जघ्नुरसुरेंद्रान्सुराभृशम् ८० तुष्टोविद्युत्प्रभस्यापित्रिलोकेश्वरतांददौ शतंवर्ष-
सहस्राणांसर्वलोकेश्वरोभवत् ८१ ममैवानुचरोनित्यंभवितासीतिचाब्रवीत् तथापुत्रसहस्राणामयुतंचददौप्रभुः ८२ कुशद्वीपं
चसददौराज्येनभगवानजः तथाशतमुखोनामधात्रासृष्टोमहासुरः ८३ येनवर्षशतंसाग्रमात्ममांसैर्हुतोनलः तंप्राहभगवांस्तुष्टः
किंकरोमीतिशंकरः ८४ तंवैशतमुखःप्राहयोगोभवतुमेद्भुतः बलंचदैवतश्रेष्ठशाश्वतंसंप्रयच्छमे ८५ तथेतिभगवानाहतस्यतद्
वचनंप्रभुः स्वायंभुवःक्रतुश्चापिपुत्रार्थमभवत्पुरा ८६ आविश्ययोगेनात्मानंत्रीणिवर्षशतान्यपि तस्यचोपददौपुत्रान्सहस्रंक्रतु-
संमितान् ८६ योगेश्वरंदेवगीतंवेत्थकृष्णनसंशयः याज्ञवल्क्यइतिख्यातऋषिःपरमधार्मिकः ८७

वरदत्तस्यसर्वशस्त्रावध्यस्त्वं
भवेतिदत्तवरस्य ७९ अर्द्यमानाःसुराअसुरेंद्रान्जघ्नुःतेऽन्योन्यंकलहमकुर्वन्नित्यर्थः ८० ८१ ८२ ८३ ८४ योगःचंद्रसूर्यपर्जन्यपृथिव्या-
दिसृष्टिसामर्थ्यं शाश्वतंबलंब्रह्मविद्योत्थं ८५ ८६आत्मानंहिरण्यगर्भंआविश्याभवत्आविष्टोभूत् सूत्रात्मनोध्यानंकुर्वन्नित्यर्थः ८६ ८७

८८ ८९ ९० ९१ सप्तकपालेनत्र्यंबकदेवत्येनहेतुना देवैःसप्तकपालेनरुद्रमिष्ट्वा आपोनिर्मिताइत्यर्थः देवेनेतिपाठेइंद्रेण ९२ अत्रेरिति पति
द्वेषिण्योपिस्त्रियोमहादेवंप्राप्यकृतकृत्याभवंतीतिभावः ९३ ९४ मुसलेषु अयोग्रेषुकाष्ठकीलेषु अयोग्रेमुसलंमतमितिविश्वलोचनः ९५ विनेति

आराध्यसमहादेवंप्राप्तवानतुलंयशः वेदव्यासश्चयोगात्मा पराशरसुतोमुनिः ८८ सोपिशंकरमाराध्यप्राप्तवानतुलंयशः वाल-
खिल्यामघवतात्यवज्ञाताःपुराकिल ८९ तैःक्रुद्धैर्भगवान्रुद्रस्तपसातोषितोह्यभूत् तांश्चापिदेवतश्रेष्ठःप्राहप्रीतोजगत्पतिः ९०
सुपर्णसोमहर्त्तारंतपसोत्पादयिष्यथ महादेवस्यरोषाच्च आपोनष्टाःपराभवन् ९१ ताश्चसप्तकपालेनदेवैरन्याःप्रवर्त्तिताः ततःपा
नीयमभवत्तस्मिन्त्र्यंबकेभुवि ९२ अत्रेर्भार्यापिभर्त्तारंसंत्यज्यब्रह्मवादिनी नाहंतस्यमुनेर्भूयोवशगास्यांकथंचन ९३ इत्युक्त्वा
सामहादेवमगच्छच्छरणंकिल निराहाराभयादत्रेस्त्रीणिवर्षशतान्यपि ९४ अशेतमुसलेष्वेवप्रसादार्थंभवस्यसा तामब्रवीद्ध-
सन्देवोभवितावैसुतस्तव ९५ विनाभर्त्राचरुद्रेणभविष्यतिनसंशयः वंशेतवैवनाम्नातुख्यातियास्यतिचेप्सिताम् ९६ विकर्णश्च
महादेवंतथाभक्तःसुखावहम् प्रसाद्यभगवान्सिद्धिंप्राप्तवान्मधुसूदन ९७ शाकल्यःसंशितात्मावैनववर्षशतान्यपि आराधयामास
भवमनोयज्ञेनकेशव ९८ तंचाहभगवांस्तुष्टोग्रंथकारोभविष्यसि वत्साक्षयाचतेकीर्त्तिस्त्रैलोक्येवैभविष्यति ९९ अक्षयंचकुलंते-
स्तुमहर्षिभिरलंकृतम् भविष्यतिद्विजश्रेष्ठःसूत्रकर्त्तासुतस्तव १०० सावर्णिश्चापिविख्यातऋषिरासीत्कृतेयुगे इहतेनतपस्तप्तंष
ष्टिवर्षशतान्यथ १०१ तमाहभगवान्रुद्रःसाक्षात्तुष्टोस्मितेनघ ग्रंथकृल्लोकविख्यातोभवितास्यजरामरः २ शक्रेणतुपुरादेववा
राणस्यांजनार्दन आराधितोभूद्भक्तेनदिग्वासाभस्मगुंठितः ३ आराध्यसमहादेवंदेवराजमवाप्तवान् नारदेनतुभक्त्यासौभवआ
राधितःपुरा ४ तस्यतुष्टोमहादेवोजगौदेवगुरुर्गुरुः तेजसातपसाकीर्त्यात्वत्समोनभविष्यति ५ गीतेनवादितव्येननित्यंमामनुया
स्यसि मयापिचयथादृष्टोदेवदेवःपुराविभो ६ साक्षात्पशुपतिस्तातनच्चापिशृणुमाधव यदर्थंचमयादेवःप्रयतेनतथाविभो ७
प्रबोधितोमहातेजास्तच्चापिशृणुविस्तरम् यदवाप्तंचमेपूर्वंदेवदेवान्महेश्वरात् ८ तत्सर्वंनिखिलेनाद्यकथयिष्यामितेनघ पुरा
कृतयुगेतातऋषिरासीन्महायशाः ९ व्याघ्रपादइतिख्यातोवेदवेदांगपारगः तस्याहमभवंपुत्रोधौम्यश्चापिममानुजः १०

चरुद्रःचरोर्द्रवःमंडइतियावत् चरुशब्दपूर्वेण द्रवतेरन्येभ्योपिदृश्यंतइतिडुः भर्त्तारंविनापिचरुद्रवपानमात्रेणनवपुत्रोभविष्यतीत्यर्थः तवैवना-
म्नाअनसूयेति ९६ ९७ ९८ ९९ १०० १०१ १०२ १०३ १०४ १०५ १०६ १०७ १०८ १०९ ११० ६

१११ ११२ १३ १४ १५ १६ १७ १८ १९ १२० पावनानांपवनाशिनां वनाशानांअब्भक्षाणां २१ २२ २३ प्रप द्यप्रपन्नो
भव २४ २५ २६ २७ २८ २९ दुर्विज्ञेयःशास्त्रतोपिज्ञातुमशक्यः दुराधारःशास्त्रात्ज्ञातोपिमनसिधर्तुमशक्यः दुराबाधःध्रियमाणोपि

कस्यचित्त्वथकालस्यधौम्येनसहमाधव आगच्छमाश्रमंक्रीडन्मुनीनांभावितात्मनाम् १११ तत्रापिचमयादृष्टादुह्यमानापयस्विनी लक्षि
तेचमयाक्षीरस्वादतोह्यमृतोपमम् १२ ततोहमब्रुवंबाल्याज्जननीमात्मनस्तथा क्षीरोदनसमायुक्तंभोजनंहिप्रयच्छमे १३ अभावा
च्चैवदुग्धस्यदुःखिताजननीतदा ततःपिष्टंसमालोड्यतोयेनसहमाधव १४ आवयोःक्षीरमित्येवपानार्थंसमुपानयत् अथगव्यंपय
स्तातकदाचित्प्राशितंमया १५ पित्राहंयज्ञकालेहिनीतोज्ञातिकुलंमहत् तत्रसाक्षरतेदेवीदिव्यागोःसुरनंदिनी १६ तस्याहंतत्पयः
पीत्वारसेनह्यमृतोपमम् ज्ञात्वाक्षीरगुणांश्चैवउपलभ्यहिसंभवम् १७ सचपिष्टरसस्तातनमेप्रीतिमुपावहत् ततोहमब्रुवंबा
ल्याज्जननीमात्मनस्तदा १८ नेदंक्षीरोदनंमातर्यत्त्वंमेदत्तवत्यसि ततोमामब्रवीन्मातादुःखशोकसमन्विता १८ पुत्रस्नेहात्परि
ष्वज्यमूर्ध्निचाघ्रायमाधव कुतःक्षीरोदनंवत्समुनीनांभावितात्मनाम् १९ वनेनिवसतांनित्यंकंदमूलफलाशिनाम् आस्थितानांन
दीःदिव्यावालखिल्यैर्निषेविताम् कुतःक्षीरंवनस्थानांमुनीनांगिरिवासिनाम् २० पावनानांवनाशानांवनाश्रमनिवासिनाम् ग्रा
म्याहारनिवृत्तानामरण्यफलभोगिनाम् २१ नास्तिपुत्रपयोरण्येसुरभीगोत्रवर्जिते नदीगह्वरशैलेषुतीर्थेषुविविधेषुच २२ तप
साजप्यनित्यानांशिवोनःपरमागतिः अप्रसाद्यविरूपाक्षंवरदंस्थाणुमव्ययम् २३ कुतःक्षीरोदनंवत्ससुखानिवसनानिच तंप्र
पद्यसदावत्ससर्वभावेनशंकरम् २४ तत्प्रसादाच्चकामेभ्यःफलंप्राप्स्यसिपुत्रक जनन्यास्तद्वचःश्रुत्वातदाप्रभृतिशत्रुहन् २५ प्रां
जलिःप्रणतोभूत्वाइदमंबामचोदयम् कोयमंबमहादेवःसकथंचप्रसीदति २६ कुत्रवावसतेदेवोद्रष्टव्योवाकथंचन तुष्यतेवाकथं
शर्वोरूपंतस्यचकीदृशम् २७ कथंज्ञेयःप्रसन्नोवादर्शयेज्जननीमम एवमुक्तातदाकृष्णमातामेसुतवत्सला २८ मूर्ध्न्याघ्राय
गोविंदसबाष्पाकुललोचना प्रमार्जंतीवगात्राणिममवैमधुसूदन दैन्यमालंब्यजननीइदमाहसुरोत्तम २९ अंबोवाच दुर्वि
ज्ञेयोमहादेवोदुराधारोदुरंतकः दुराबाधश्चदुर्ग्राह्योदुर्दृश्योह्यकृतात्मभिः ३० यस्यरूपाण्यनेकानिप्रवदंतिमनीषिणः स्थानानि
चविचित्राणिप्रसादाश्चाप्यनेकशः ३१

लयविक्षेपादिविघ्नैःसंकटःअतोदुरंतकः दुष्टानिबंधकानियस्मिन्विघ्नाभावेपिदुर्ग्राह्यःदिव्यविषयवैवश्येनपरवैरा
ग्याभावात् सत्यपिवैराग्येदुर्दृश्यः आत्मनीवप्रकृतावपिचेतसोलयस्यसंभवात् ३० एवंनिर्विशेषस्यरूपस्यदुर्ज्ञेयत्वमुक्त्वासविशेषमेवरूपमाह यस्यरूपाण्यनेका
नीत्यादिना ३१ ७

३२ ३३ द्विलोके सेंदेवैः ३४ अनुग्रहार्थमेवनोच स्वन्यस्यापि स्वधारणेन स्वतः ३५ ब्रह्मादिस्तुतिकांतमस्यैव रूपमित्याह ब्रह्मेत्यादिना ३६ ३७
कूर्ममत्स्य इति अवतारांतराभासुपलक्षणम् प्रवालांकुरभूषणो रक्तः तेन कालोप्ययमवेत्यर्थः ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५

कोहितस्मिन् हेदरीशस्य चरितं शक्रमन् कृतवान्यानि सहस्राणि देवदेवः पुराकिल कीर्तितेन तथा शर्वः प्रसीदति यथा च वै ३२ हृदिस्थः सर्वभू
तानि स्थितिः फलेश्वरः भक्तानामनुकंपार्थं दर्शनं च यथाश्रुतम् ३३ मुनीनां ब्रुवतां दिव्यमीशानचरितं शक्रमम् कृतवान्यानि सहस्राणि
लोकेनात्मदिवौकसेः ३४ अनुग्रहार्थं विप्राणां शृणु वत्स समासतः तानि ते कीर्त्तयिष्यामि यन्मां लप त्वं पृच्छसि ३५ अबोवाच ब्र
ह्मविष्णुसुरेंद्राणां रुद्रादित्याश्विनामपि विश्वेषामपि देवानां वपुर्धारयते भवः ३६ नराणां देवनारीणां तथा प्रेतपिशाचयोः किरात-
शबराणां च जलजानामनेकशः ३७ करोति भगवान्रूपमटव्यां शबराण्यपि कूर्मो मत्स्यस्तथा शंखः प्रवालांकुरभूषणः ३८ यक्षरा
क्षसर्पाणां दैत्यदानवयोरपि वपुर्धारयते देवो भूयश्च बिलवासिनाम् ३९ व्याघ्रसिंहमृगाणां च तरक्ष्वृक्षपतत्त्रिणाम् उलूकश्व-
शृगालानां रूपाणि कुरुते पि च ४० हंसकाकमयूराणां कृकलासकसारसाम् रूपाणि च बलाकानां गृध्रचक्रांगयोरपि ४१ करोति वा
स रूपाणि धारयत्यपि पर्वतम् गोरूपश्च महादेवो हस्त्यश्वोष्ट्रखराकृतिः ४२ छागशार्दूलरूपश्च अनेकमृगरूपधृक् अंडजानां च
दिव्यानां वपुर्धारयते भवः ४३ दंडी छत्री च कुंडी च द्विजानां वारणस्तथा षण्मुखो वै बहुमुखस्त्रिनेत्रो बहुशीर्षकः ४४ अनेकक
टिपादश्च अनेकोदरवक्त्रधृक् अनेकपाणिपार्श्वश्च अनेकगणसंवृतः ४५ ऋषिगंधर्वरूपश्च सिद्धचारणरूपधृक् भस्मपांडुरगात्र
श्च चंद्रार्द्धकृतभूषणः ४६ अनेकरावसंघुष्टश्चानेकस्तुतिसंस्तुतः सर्वभूतांतकः सर्वः सर्वलोकप्रतिष्ठितः ४७ सर्वलोकांतरात्मा च
सर्वगः सर्ववाद्यपि सर्वत्र भगवान्ज्ञेयो हृदिस्थः सर्वदेहिनाम् ४८ यो हि यं कामयेत्कामं यस्मिन्नर्थेऽर्च्यते पुनः तत्सर्वं वेत्ति देवेश
स्तं प्रपद्य यदीच्छसि ४९ नंदते कुप्यते चापि तथा हुंकारयत्यपि चक्री शूली गदापाणिर्मुसली खड्गपट्टिशी ५० भूधरो नागमौंजी
च नागकुंडलकुंडली नागयज्ञोपवीती च नागचर्मोत्तरच्छदः ५१ हसते गायते चैव नृत्यते च मनोहरम् वादयत्यपि वाद्यानि विचि
त्राणि गणसंयुतः ५२ वल्गते जृंभते चैव रुदते रोदयत्यपि उन्मत्तमत्तरूपं च भाषते चापि सुस्वरः ५३ अतीव हसते रौद्रस्त्रासयन्न
यनैर्जनम् जागर्ति चैव स्वपिति जृंभते च यथासुखम् ५४

४६ ४७ ४८ ४९ नंदते आनंदयते कुप्यते कोपं करोति मित्रामित्ररू
पेणाप्ययमेवानुगृह्णाति निगृह्णातीत्यर्थः ५० भूधरः शेषनागः ५१ ५२ ५३ ५४

एतत् दूषयत्युपमन्युः सदसदिति प्रवाहानादित्वं मीमांसकमतम् असदिति शून्यं माध्यमिकमतं व्यक्तं परमाणवः तार्किकमतम् अव्यक्तं प्रधानं सांख्यसं मतम् एतच्चतुष्कमपि यदिभिन्नमाहुः ततः नित्यं अविनाशि एकं असंहतं परमशिवाख्यं अनेकं कार्यकारणात्मकं तस्मा द्दूरं हृणीमहे अयंभावः यथा बीजशक्ते विलसितं अंकुरकांडस्कंधशाखापल्लवाश्च पुष्पफलबीजांतविकारः उत्पत्तिमन्तः यथावान् तस्य च भक्तिरेवैक्या नित्या सर्वविशेषशून्या मृत् अस्ति साच बीजशक्तस्पृष्टा अनेक

उपमन्युरुवाच सदसद्व्यक्तमव्यक्तं यमाहुर्ब्रह्मवादिनः नित्यमेकमनेकं च वरं तस्मा द्वृणीमहे
९० अनादिमध्यपर्यंतं ज्ञानैश्वर्यमचिंतितम् आत्मानं परमं यस्मा द्दूरं तस्मा द्वृणीमहे ९१

रूपा च भवति एवं अव्यक्तादिकम् सर्वं बीजादिस्थानीयं यत्र लीयते तत्परमशिवाख्यं तत्त्वं कारणकारणमस्तीति न तदपह्नोतुं शक्यमिति ९० चिंति तं चिंतया निर्दिष्टं ज्ञेयं इंगितव्यं च ताभ्यां रहितं स्वरूपभूतमेव ज्ञानैश्वर्यं परमं च आत्मानं यस्मात्तमाहुर्ब्रह्मवादिनो तस्मात्तस्मा द्दूरं द्वृणीमहे इतरत्र ज्ञानै- श्वर्यं त्वनात्मभूतमित्यर्थः ९१ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

एतदेवाहऐश्वर्यमिति बीजंमायाशक्त्यवच्छिन्नंचैतन्यंतस्माज्जातंसकलंऐश्वर्यंबीजसंभूतंईशेशितव्यसापेक्षंतच्चाव्ययंसंसारप्रवाहाविच्छेदात् अतएव
तत्यस्मात्शिवात्अबीजात्बीजादन्यस्मान्मृत्सामान्यस्थानीयात्अनुत्पादितंतस्मादीश्वरप्राप्तस्तुरीयतुरीयइतिश्रुतिप्रसिद्धात्वरंवृणीमहेतथाचश्रु-
तौसर्वंह्येतद्ब्रह्मायमात्माब्रह्मेतिसमष्टिव्यष्टिब्रह्मणीउपक्षिप्यस्थूलसूक्ष्मकारणोपाधित्वसामान्यात् व्यष्टेःसमष्टिमंतर्भाव्यविश्वतैजसप्राज्ञान्चतुष्प
दआत्मनःत्रीन्पादान्निरूप्यप्राज्ञंतृतीयंपादंप्रक्रम्यएषसर्वेश्वरएषसर्वज्ञएषोंतर्याम्येषयोनिःसर्वस्यप्रभवाप्ययौहिभूतानामितिप्राज्ञस्यैवपादस्यपरप-
र्यायंबीजत्वमुक्तं तथाचतुर्थंपादंअबीजंसर्वोपाध्युपहितभिन्नंपंचदशभिर्विशेषणैःपृथग्दर्शयति श्रुतिःनांतःप्रज्ञंनबहिःप्रज्ञंनोभयतःप्रज्ञंनप्रज्ञंनाप्र-
ज्ञंनप्रज्ञाघनं अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदेश्यं एकात्मप्रत्ययसारंप्रपंचोपशमंशिवमद्वैतंचतुर्थंमन्यंतेसआत्मासविज्ञेयइति अत्र
जलचंद्रन्यायेनषडुपहितचैतन्यानिषडुपाधयश्चतेषांमध्येनांतःप्रज्ञमितिसमष्टिसूक्ष्मोपाध्युपहितस्यसूत्रात्मनोनिरासः नबहिःप्रज्ञमितिविराजः नो-
भयतःप्रज्ञमित्यात्मनोनिष्कलत्वंसकलत्वंचजानतईश्वरस्य नप्रज्ञमितिविशेषविज्ञानवतोविश्वस्य नाप्रज्ञमितिप्रज्ञाभिन्नत्वेपितत्सदृशस्यतैजसस्य ना

ऐश्वर्यंसकलंयस्मादनुत्पादितमव्ययम् अबीजाद्बीजसंभूतंवरंतस्माद्वृणीमहे १२ तमसःपरमंज्योतिस्तपस्तद्वृत्तिनांपरम्
यंज्ञात्वानानुशोचंतिवरंतस्माद्वृणीमहे १३ भूतभावनभावज्ञंसर्वभूताभिभावनम् सर्वगंसर्वदेवंचपूजयामिपुरंदर १४
हेतुवादैर्विनिर्मुक्तंसांख्ययोगार्थदंपरम् यमुपासंतितत्त्वज्ञावरंतस्माद्वृणीमहे १५

प्रज्ञानघनमितिप्राज्ञस्य तथाअदृष्टमितिसर्वेंद्रियग्राह्यस्यविराडुपाधेः अव्यवहार्यमितिवाचिकव्यवहारार्हस्यसूत्रोपाधेः अग्राह्यमितियोगिग्राह्य-
स्यईश्वरोपाधेः अलक्षणमितिशिरःपाण्यादिलक्षणवतोविश्वोपाधेः अचिंत्यमितिचिंतनमात्रनिर्वृत्तस्यतैजसोपाधेः अव्यपदेश्यमितिअहमज्ञइतिव्य
पदेशार्हस्यज्ञानस्यप्राज्ञोपाधेश्चनिरासः एकात्मप्रत्ययसारमितिषण्णामुपहितानां प्रपंचोपशमइतिषण्णामुपाधीनां अद्वैतमितिसर्वेषांनिरासःशिवंस-
र्वबाध्यावधिभूतमानंदमात्रंपरिशिनष्टि तस्माद्युक्तमुक्तंसकलमैश्वर्यंअबीजादनुत्पादितंबीजसंभूतंचेति तस्मात्कारणकारणस्यशिवस्यसत्वेयुक्तिःश्रु-
तिश्चप्रमाणमस्तीतिभावः १२ १३ एवमीशस्यकारणकारणत्वंनिरूप्यइदानींकारणत्वंकार्यत्वंचनिरूपयति भूतभावनेत्यादिना भूतानांखादीनांजीवा
नांचभावनंरचनंभावज्ञमभिप्रायंसर्वज्ञंसर्वशक्तिंचेत्यर्थः १४ यत्तुनरुक्तंईशसत्तायांकोहेतुरितितत्राह हेत्विति कारणात्मापिश्रुतिंविनायुक्तिमात्रेणनसिध्य
तिकिंपुनः[illegible]सांख्ययोगयोःसम्यगालोचनंसांख्यं वृत्तिनिरोधोयोगःतयोरर्थःप्रयोजनंतत्रसाक्षात्कारस्तत्प्रदं अतएवउपास्यम् १५ ७

मघवन्मघवत्त्वेव आत्मानंजीवानामंतरात्मानमित्यर्थः मघवात्मानमितिवर्णलोपआर्षं नांतमेव वा प्रातिपदिकम् १६ यतवत्स्मृतस्थानीयं तदेव आकाशंबी जभूतमव्याहृतं आपूर्यस्वसत्तयाव्याप्य तद्द्वारा पांचभौतिकं अंडं ब्रह्मांडं सृष्ट्वा तदंतर्ब्रह्माणमसृजदित्यन्वयः १७ अंडसृष्टिक्रममेवाह अग्निरिति अग्न्यादि शब्दैरत्र पंचतन्मात्राणि शब्दतन्मात्रादीनि सूक्ष्मभूतान्युच्यंते बुद्धिरिन्यहंकारः मनइत्यव्यक्तं एषां अंडोपादानभूतानाम् १८ यत्रमनःशब्दितमव्यक्तमु- क्तं तदेव महच्छब्दितामतिरहंकारादिकं च तदेवेत्यर्थः एषां मनआदीनां परमपरायणाय भवेतस्मशिवादन्यःकोन्योस्तीतियोजनाय याबीजशक्त्युपहितामृदेव वृक्षएवमज्ञानशक्त्युपहितः शिवएव सर्वअनोवृक्षस्य मृदिव सर्वस्याशिवएव परायणमयनमितिभावः ९९ ब्रह्मादिष्वपि जगत्कर्तृत्वसिद्धिः शिवप्रसादायत्तेत्याह स्रष्टारमिति एतेन भौतिकार्थस्य स्रष्टृत्वमपिशिवस्यैवेतिदर्शितम २०० भगवतिएकैकगुणप्रधानोपाधीनां ब्रह्मविष्णुरुद्राणां स्रष्टा एसर्वगुणोपाधौ तूर्यमूर्तौ-

मघवन्मघवात्मानं यं वदंति सुरेश्वरम् सर्वभूतगुरुंदेवं वरं तस्माद्वृणीमहे १६ यत्पूर्वमसृजद्देवं ब्रह्माणं लोकभावनम् अंडमाकाशमापूर्य वरं तस्माद्वृणीमहे १७ अग्निरापोनिलः पृथ्वी खंबुद्धिश्च मनो महान् स्रष्टा चैषां भवेद्योन्यो ब्रूहि कः परमेश्वरात् १८ मनोमतिरहं कारस्तन्मात्राणींद्रियाणि च ब्रूहि चैषां भवेच्छक्र कोन्योस्ति परमं शिवात् ९९ स्रष्टारं भुवनस्येह वदंतीह पितामहम् आराध्य स तु देवे- शमश्नुते महतीं श्रियम् २०० भगवत्युत्तममैश्वर्यं ब्रह्मविष्णुपुरोगमम् विद्यते वै महादेवाद्ब्रूहि कः परमेश्वरात् २०१ दैत्यदानवमुख्या नामाधिपत्यारिमर्दनात् कोन्यः शक्नोति देवेशा द्दितेः संपादितुं सुतान् २ दिक्कालसूर्यतेजांसि ग्रहवाय्विंदुतारकाः विद्धि त्वेते महादेवात् ब्रूहि कः परमेश्वरात् ३ अथोत्पत्तिविनाशे वा यज्ञस्य त्रिपुरस्य वा दैत्यदानवमुख्यानामाधिपत्यारिमर्दनः ४ किं चात्र बहुभिः सूक्तैर्हेतु वादैः पुरंदर सहस्रनयनं दृष्ट्वा त्वामेव शक्र सत्तम ५ पूजितं सिद्धगंधर्वैर्देवैश्च ऋषिभिस्तथा देवदेवप्रसादेन तत्सर्वं कुशिकोत्तम ६ अव्यक्तमुक्तकेशाय सर्वगस्येदमात्मकम् चेतनाचेतनाद्येषु शक्र विद्धि महेश्वरात् २०७

महेश्वरेपि यदुत्तममैश्वर्यं विद्यते तदपि महादेवादेव तेन प्राप्तमतः कः कस्मात्परमेश्वरादन्य ईश्वरोस्तीति ब्रूहि न कोप्यस्तीति भावः २०१ दितेः सुतान् हिरण्याक्षादीन् संपादितुं ऐश्वर्येण योजयितुं दैत्यादीनां च यत्पर पीडानुग्रहसमर्थत्वं तत्सर्वमीश्वरायत्तमेवेति भावः २ ३ यज्ञत्रिपुरयोरुत्पत्तौ विनाशे च तथा दैत्यादीनामुपरि आधिपत्ये एत्य जित्वा अरिमर्दनः परमेश्वरादन्यः कोस्तीति पूर्वेण संबंधः ४ किंचेति देवप्रसादात् देवैः पूजितत्वात् दृष्ट्वा न बहुभिः सूक्तैः किमिति द्वयोः संबंधः ५ ६ अव्यक्तेति एषु लोकेषु सर्वगस्य व्यापकस्य इदमात्मकं व्याप्यं कृत्स्नं दृश्यं चेतनाचेतनादि सजीवं निर्जीवं आदिपदात् परोक्षं स्वर्गादि अहमर्थश्च देहेंद्रियादिः एतत्सर्वं भोग्यं महेश्वरात् महेश्वरानुग्रहात् अव्यक्तकेशाय जीवाय जीवार्थं तस्य भोगाय भवतीति विद्धि हे शक्र अव्यक्तं अस्पष्टं यथा स्यात्तथा मुक्तः त्यातितिरोहितं नित्यमुक्तत्वमस्येत्यर्थः स चासौ केशइव २३

केशाःशिवांशाः इतिअव्यक्तमुक्तकेश यत्किंचिज्ञोग्यंय कश्चन नेनु शिवादेवान्नोतिनान्योभवदादिस्तत्प्रदइतिभावः ७ पृच्छतिपदंव्याचष्टे भुवाद्येष्वितिभू
रादिष्विति द्रष्टव्यंतेनभूर्भुवःस्वर्महःशब्दिनाल्लोकाः भूरितिवा अयंलोकः इत्यादिश्रुतिप्रसिद्धाः तथा आलोकाः भूरितिवा अग्निर्भूरितिवाऋचइत्यादिश्रुतिप्रसि
द्धाःतथाअंतराःभूरितिप्राणइत्याद्याःसूर्यचंद्रअह्लादानास्तेतसुविभवेषुदिव्यप्रकेषु अथयदतःपरोदिवोज्योतिर्दीप्यतेविश्वतःपृष्ठेषुसर्वतःपृष्ठेष्वनुत्तमेषूत्तमे
षुलोकेष्वितिश्रुतंज्योतिःशब्दितंदेवंवदंतेतत्त्वदर्शिनोवैदिकाइत्यर्थःमाद्यश्लोकः ८ भवाह्वतिभवतुल्यामूर्तिःशरणंनामेवेतिशेषः ९ अभिघातेषुयुद्धेषुअ

भुवाद्येषुमहान्तेषुलोकालोकान्तरेषुच। द्वीपस्थानेषुमेरोश्चविभवेष्वन्तरेषुच ८ भगवन्भववन्देवंवदंतेतत्त्वदर्शिनः यदिदेवाःसुराः
शक्रपूर्वंत्वन्त्यभवाकृतिम् ९ किन्नगच्छंतिशरणंनाहितास्त्वासुरैःसुराः अभिघातेषुदेवानांसयक्षोरगरक्षसाम् १० परस्पर
विनाशेषुस्वस्थानैश्वर्यदोभवः अंधकस्याथशुक्रस्यदुंदुभेर्महिषस्यच। ११ यक्षेंद्रबलरक्षःसुनिवातकवचेषुच वरदानावघा
तायब्रूहिकोन्योमहेश्वरात् १२ सुरासुरगुरोर्वक्त्रेकस्यरेतःपुराहुतम् कस्यवान्यस्यरेतस्तद्येनहैमोगिरिःकृतः १३ दिग्वासाःकी
र्तितेकोन्योलोकेकश्चोर्ध्वरेतसः कस्यचार्धेस्थिताकान्ताअनंगःकेननिर्जितः १४ ब्रूहींद्रपरमंस्थानंकस्यदेवैःप्रशस्यते श्मशाने
कस्यक्रीडार्थंनृत्येवाकोभिभाष्यते १४ कस्यैश्वर्यंसमानंचभूतैःकोवापिक्रीडते कस्यतुल्यबलादेवगणाश्चैश्वर्यदर्पिताः १५
घुष्यतेह्यचलंस्थानंकस्यत्रैलोक्यपूजितम् वर्षतेतपतेकोन्योज्वलतेतेजसात्वकः १५ कस्मादोषधिसंपत्तिःकोवाधारयतेवसु प्रकामंक्री
डतेकोवात्रैलोक्येसचराचरे १६ ज्ञानसिद्धिक्रियायोगैःसेव्यमानश्चयोगिभिः ऋषिगंधर्वसिद्धैश्चविहितंकारणंहरे १७ कर्मयज्ञक्रि
यायोगैःसेव्यमानःसुरासुरैः नित्यंकर्मफलैर्हीनंतमहंकारणंवदे १८ स्थूलंसूक्ष्ममनौपम्यमग्राह्यंगुणगोचरम् गुणहीनंगुणाध्य
क्षंपरंमाहेश्वरंपदम् १९ विश्वस्योत्पत्त्योःकारणंचलोकालोकान्तकारणम् भूतभव्यभविष्यंचजनकंसर्वकारणम् २० अक्षरंक्षरमव्य
क्तंविद्याविद्येकृताकृते धर्माधर्मौयतःशक्रतमहंकारणंवदे २१ प्रत्यक्षमिहदेवेंद्रपश्यलिंगंभगांकितम् देवदेवेनरुद्रेणसृष्टिसंहार
हेतुना २२ मात्रापूर्वंममाख्यातंकारणंलोककारणम् नास्तिचेशात्परंशक्रतंप्रपद्येयदीच्छसि २३

न्योन्यंविनाशयत्सुऐश्वर्यंनास्तिकिं
तुविनाशएवास्तीत्यर्थः अवस्वस्थानेवाभिलक्ष्यभुवनैश्वर्यंदोभवतीतिभावः १० ११ वरदानमाहितोऽयघातोविमर्दनंतस्मैसमर्थइतिशेषः १२ सुरेति
रुद्रस्यरेतोवह्नौस्कन्नंतेनचंद्रगिरिःकृतःसतत्कनककलशमात्रमितिपुराणांतरस्थाकथासूचिता १३ दिग्वासाइति विग्रहवतोपिशिवस्यचरितंनिरूपमंकि
मतांविग्रहस्येतिशेषयंत्रतात्पर्यं १४ १५ १६ १७ १८ १९ २० २१ २२ २३ ७ ७ ७ ५ ७

प्रत्यक्षंननुतेसुरेशविदितंसंयोगलिंगोद्भवंत्रैलोक्यंसविकारनिर्गुणगणंब्रह्मादिरेतोद्भवम् यद्रुद्रेंद्रहुताशविष्णुसहितादेवाश्चदैत्या
सुरानान्यत्कामसहस्रकल्पितधियःशंसंतियस्मात्परम् २४ तंदेवंसचराचरस्यजगतोव्याख्यातवेद्योत्तमंकामार्थीवरयामिसंयतम
नामोक्षायसद्यःशिवम् २५ हेतुभिर्वाकिमन्यैस्तेईशःकारणकारणम् नशुश्रुमयदन्यस्यलिंगमभ्यर्चितंसुरैः २६ कस्यान्यस्यसु
रैःसर्वैर्लिंगंमुक्त्वासुरेश्वरम् अर्चतेर्चितपूर्ववाब्रूहियद्यस्तितेश्रुतिः २७ यस्यब्रह्माचविष्णुश्चत्वंचापिसहदैवतैः अर्चयेथाःसदा-
लिंगंतस्माच्छ्रेष्ठतमोहिसः २८ नपद्मांकानचक्रांकानवज्रांकायतःप्रजाः लिंगांकाचभगांकाचतस्मान्माहेश्वरीप्रजा २९ देव्याःकारणरू
पभावजनिताःसर्वाभगांकास्त्रियोलिंगेनापिहरस्यसर्वपुरुषाःप्रत्यक्षचिन्हीकृताः योन्यत्कारणमीश्वरात्प्रवदतेदेव्याचयन्नांकितंत्रैलो-
क्येसचराचरेनसपुमान्मूढोभवेत्दुर्मतिः ३० पुल्लिंगंसर्वमीशानंस्त्रीलिंगंविद्धिचाप्युमाम् द्वाभ्यांतनुभ्यांव्याप्तंहिचराचरमिदंजगत्
३१ तस्माद्वरमहंकांक्षेनिधनंचापिकौशिक गच्छवानिष्ठवाशक्रयथेष्टंबलसूदन ३२ काममेषवरोमेस्तुशापोवाथमहेश्वरात् नचा
न्यांदेवतांकांक्षेसर्वकामफलामपि ३३ एवमुक्त्वातुदेवेंद्रंदुःखादाकुलितेंद्रियः नप्रसीदतिमेदेवःकिमेतदितिचिंतयन् ३४ अथाप
श्यंक्षणेनैवतमेवैरावतंपुनः हंसकुंदेंदुसदृशंमृणालरजतप्रभम् ३५ वृषरूपधरंसाक्षात्क्षीरोदमिवसागरम् कृष्णपुच्छंमहाकायं-
मधुपिंगललोचनम् ३६ वज्रसारमयैःशृंगैर्निष्टप्तकनकप्रभैः सुतीक्ष्णमृदुरक्ताग्रैरुत्किरंतमिवावनिम् ३७ जांबूनदेनदाम्नाच
सर्वतःसमलंकृतम् सुवक्त्रखुरनासंचसुकर्णंसुकटीतटम् ३८ सुपार्श्वंविपुलस्कंधंसुरूपंचारुदर्शनम् ककुदंतस्यचाभातिस्कंधमा
पूर्यधिष्ठितम् ३९ तुषारगिरिकूटाभंसिताभ्रशिखरोपमम् तमास्थितश्चभगवान्देवदेवःसहोमया ४० अशोभतमहादेवःपौर्ण
मास्यामिवोडुराट् तस्यतेजोभवोवन्हिःसमेघःस्तनयित्नुमान् ४१ सहस्रमिवसूर्याणांसर्वमापूर्यधिष्ठितः ईश्वरःसुमहातेजाःसंवर्त
कइवानलः ४२ युगांतेसर्वभूतानांदिधक्षुरिववेद्युतः तेजसातुतदाव्याप्तंदुर्निरीक्ष्यंसमंततः ४३ पुनरुद्विग्नहृदयःकिमेतदिति
चिंतयन् मुहूर्तमिवतत्तेजोव्याप्यसर्वादिशोदश ४४ प्रशांतंदिक्षुसर्वासुदेवदेवस्यमायया अथापश्यंस्थितंस्थाणुंभगवंतंमहेश्व
रम् ४५ नीलकंठंमहात्मानमसक्तंतेजसांनिधिम् अष्टादशभुजंस्थाणुंसर्वाभरणभूषितम् ४६ शुक्लांबरधरंदेवंशुक्लमाल्यानुले २४
पनम् शुक्लध्वजमनाधृष्यंशुक्लयज्ञोपवीतिनम् ४७

४३ ४४ ४५ ४६ ४७ ७ ७ ७

४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५

गायद्भिर्नृत्यमानैश्च वादयद्भिश्च सर्वशः वृतं पार्श्वचरैर्दिव्यैरात्मतुल्यपराक्रमैः ४८ बालेंदुमुकुटं पांडुं शरच्चंद्रमिवोदितम् त्रिभिर्नेत्रैः
कृतोद्योतं त्रिभिः सूर्यैरिवोदितैः ४९ अशोभत तस्य देवस्य माला गात्रे सितप्रभे जातरूपमयैः पद्मैर्ग्रथिता रत्नभूषिता ५० मूर्तिमंति तथा
स्त्राणि सर्वतेजोमयानि च मया दृष्टानि गोविंद भवस्यामिततेजसः ५१ इंद्रायुधसवर्णाभं धनुस्तस्य महात्मनः पिनाकमिति विख्यात
मभवत्पन्नगो महान् ५२ सप्तशीर्षो महाकायस्तीक्ष्णदंष्ट्रो विषोल्बणः ज्यावेष्टितमहाग्रीवः स्थितः पुरुषविग्रहः ५३ शरश्च सूर्यसं
काशः कालानलसमद्युतिः एतदस्त्रं महाघोरं दिव्यं पाशुपतं महत् ५४ अद्वितीयमनिर्देश्यं सर्वभूतभयावहम् सस्फुलिंगं महाकायं
विसृजंतमिवानलम् ५५ एकपादं महादंष्ट्रं सहस्रशिरसोदरम् सहस्रभुजजिह्वाक्षमुद्गिरंतमिवानलम् ५६ ब्राह्मान्नारायणा
च्चैंद्रादाग्नेयादपि वारुणात् यद्विशिष्टं महाबाहो सर्वशस्त्रविघातनम् ५७ येन तत्त्रिपुरं दग्ध्वा क्षणाद्भस्मीकृतं पुरा शरेणैकेन गोविं
द महादेवेन लीलया ५८ निर्ददाह च यत्कृत्स्नं त्रैलोक्यं सचराचरम् महेश्वरभुजोत्सृष्टं निमेषार्द्धन्न संशयः ५९ नावध्यो यस्य
लोकेस्मिन् ब्रह्मविष्णुसुरेष्वपि तदहं दृष्टवांस्तत्र आश्चर्यमिदमुत्तमम् ६० गुह्यमस्त्रवरं चान्यत् तत्तुल्यमधिकं हि वा यत्तच्छू-
लमिति विख्यातं सर्वलोकेषु शूलिनः ६१ दारयेद्यां महीं कृत्स्नां शोषयेद्वा महोदधिम् संहरेद्वा जगत्कृत्स्नं विसृष्टं शूलपाणिना यौव-
नाश्वो हतो येन मांधाता सबलः पुरा ६२ चक्रवर्त्ती महातेजास्त्रिलोकविजयी नृपः महाबलो महावीर्यः शक्रतुल्यपराक्रमः करस्थे
नैव गोविंद लवणस्येह रक्षसः ६३ तच्छूलमतितीक्ष्णाग्रं सुभीमं लोमहर्षणम् त्रिशिखां भ्रुकुटिं कृत्वा तर्जमानमिव स्थितम् ६४
विधूमं सार्चिषं कृष्णं कालसूर्यमिवोदितम् सर्पहस्तमनिर्देश्यं पाशहस्तमिवांतकम् ६५ दृष्टवानस्मि गोविंद तदस्त्रं रुद्रसन्निधौ
परशुस्तीक्ष्णधारश्च दत्तो रामस्य यः पुरा ६६ महादेवेन तुष्टेन क्षत्रियाणां क्षयंकरः कार्त्तवीर्यो हतो येन चक्रवर्त्ती महामृधे ६७ त्रिः
सप्तकृत्वः पृथिवी येन निःक्षत्रिया कृता जामदग्न्येन गोविंद रामेणाक्लिष्टकर्मणा ६८ दीप्तधारः सुरौद्रास्यः सर्पकंठाग्रमधिष्ठितः अ
भवच्छूलिनोभ्याशे दीप्तवह्निशिखोपमः ६९ असंख्येयानि चास्त्राणि तस्य दिव्यानि धीमतः प्राधान्यतो मयैतानि कीर्त्तितानि तवान
घ ७० सव्यदेशे तु देवस्य ब्रह्मा लोकपितामहः दिव्यं विमानमास्थाय हंसयुक्तं मनोजवम् ७१ वामपार्श्वगतश्चापि तथा नारायणः
स्थितः वैनतेयं समारुह्य शंखचक्रगदाधरः ७२ स्कंदो मयूरमास्थाय स्थितो देव्याः समीपतः शक्तिं घंटे समादाय द्वितीय इव पावकः ७३

६७ ६८ ६९ ७० ७१ ७२ ७३ ७ ७ ७ ७ ७ ७ ७ ७

७४ ७५ ७६ रथंतरंज्येष्ठसामनी ७७ ७८ ७९ ८० ८१ ८२ ८३ शुक्लकर्महिंसारहितोध्यानादिधर्मः ८४ ८५ ८६

पुरस्ताच्चैवदेवस्यनंदिंपश्याम्यवस्थितम् शूलंविष्टभ्यतिष्ठंतंद्वितीयमिवशंकरम् ७४ स्वायंभुवाद्यामनवोभृग्वाद्याऋषयस्तथा श
क्राद्यादेवताश्चैवसर्वएवसमभ्ययुः ७५ सर्वभूतगणाश्चैवमातरोविविधाःस्थिताः तेभिवाद्यमहात्मानंपरिवार्यसमंततः ७६ अस्तु
वन्विविधैःस्तोत्रैर्महादेवंसुरास्तदा ब्रह्माभवंतदास्तोषीद्रथंतरमुदीरयन् ७७ ज्येष्ठसाम्नाचदेवेशंजगौनारायणस्तदा ७७ गृण
न्ब्रह्मपरंशक्रःशतरुद्रियमुत्तमम् ब्रह्मानारायणश्चैवदेवराजश्चकौशिकः ७८ अशोभंतमहात्मानस्त्रयस्त्रयइवाग्नयः तेषांमध्य
गतोदेवोरराजभगवाञ्छिवः ७९ शरदभ्रविनिर्मुक्तःपरिधिस्थइवांशुमान् अयुतानिचचंद्रार्कानपश्यंतिदिविकेशव ततोहमस्तुवंदे
वंविश्वस्यजगतःपतिम् ८० उपमन्युरुवाच नमोदेवाधिदेवायमहादेवायतेनमः शक्ररूपायशक्रायशक्रवेषधरायच ८१
नमस्तेवज्रहस्तायपिंगलायारुणायच पिनाकपाणयेनित्यंशंखशूलधरायच ८२ नमस्तेकृष्णवासायकृष्णकुंचितमूर्द्धजे कृ
ष्णाजिनोत्तरीयायकृष्णाष्टमिरतायच ८३ शुक्लवर्णायशुक्लायशुक्लांबरधरायच शुक्लभस्मावलिप्तायशुक्लकर्मरतायच ८४ न
मोस्तुरक्तवर्णायरक्तांबरधरायच रक्तध्वजपताकायरक्तस्रगनुलेपिने ८५ नमोस्तुपीतवर्णायपीतांबरधरायच नमोस्तूच्छ्रित
छत्रायकिरीटवरधारिणे ८६ अर्धहारार्धकेयूरअर्धकुंडलकर्णिने नमःपवनवेगायनमोदेवायवैनमः ८७ सुरेंद्रायमुनींद्रा
यमहेंद्रायनमोस्तुते नमःपद्मार्धमालायउत्पलैर्मिश्रितायच ८८ अर्धचंदनलिप्तायअर्धस्रगनुलेपिने नमआदित्यव-
क्त्रायआदित्यनयनायच ८९ नमआदित्यवर्णायआदित्यप्रतिमायच नमःसोमायसौम्यायसौम्यवक्त्रधरायच ९० सौम्यरू-
पायमुख्यायसौम्यदंष्ट्राविभूषणे नमःश्यामायगौरायअर्धपीतार्धपांडवे ९१ नारीनरशरीरायस्त्रीपुंसायनमोस्तुते नमोवृषभ
वाहायगजेंद्रगमनायच ९२ दुर्गमायनमस्तुभ्यमगम्यागमनायच नमोस्तुगणगीतायगणवृंदरतायच ९३ गणानुयातमार्गाय
गणनित्यव्रतायच नमःश्वेताभ्रवर्णायसंध्यारागप्रभायच ९४ अनुद्दिष्टाभिधानायस्वरूपायनमोस्तुते नमोरक्ताग्रवासायरक्त
सूत्रधरायच ९५ रक्तमालाविचित्रायरक्तांबरधरायच मणिभूषितमूर्द्धायनमश्चंद्रार्द्धभूषिणे विचित्रमणिमूर्द्धायकुसुमाष्ट
धरायच ९६ नमोग्निमुखनेत्रायसहस्रशशिलोचने अग्निरूपायकांतायनमोस्तुगहनायच ९७

८७ मिश्रितायमिश्रितमालाय ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५ ९६ ९७ छ छ छ छ

९८ अधिवासेनपुष्पादिवासनावासिततयासुवाससे प्रतिपत्तिं ज्ञानंस्करंचनदुभयात्मने ९९ मुकुंदेमुकुंदाय ३०० त्रीणिनेत्राणीवनेत्राणिलोकयात्रा निर्वाहकानि अग्निचंद्रसूर्याख्यानिनेत्राणियस्यतस्मैत्रिनेत्रनेत्राय लोचनेलोचनाय १ शंयोर्यज्ञसानुगुण्यकर्त्र्यादेवतायाअभिस्रवंतायप्रसादरूपा-

खचरायनमस्तुभ्यंगोचराभिरतायच भूचरायभुवनायअनंतायशिवायच ९८ नमोदिग्वाससेनित्यमधिवाससुवाससे नमोजग-
न्निवासायप्रतिपत्तिसुखायच ९९ नित्यमुद्बद्धमुकुटेमहाकेयूरधारिणे सर्पकंठोपहारायविचित्राभरणायच ३०० नमस्त्रिनेत्र
नेत्रायसहस्रशतलोचने स्त्रीपुंसायनपुंसायनमःसांख्याययोगिने १ शंयोरभिस्रवंतायअथर्वायनमोनमः नमःसर्वार्तिनाशा
यनमःशोकहरायच २ नमोमेघनिनादायबहुमायाधरायच बीजक्षेत्राभिपालायस्रष्टारायनमोनमः ३ नमःसुरासुरेशाय-
विश्वेशायनमोनमः नमःपवनवेगायनमःपवनरूपिणे ४ नमःकांचनमालायगिरिमालायवैनमः नमःसुरारिमालायचंडवेगा
यवैनमः ५ ब्रह्मशिरोपहर्त्रायमहिषघ्नायवैनमः नमःस्त्रीरूपधाराययज्ञविध्वंसनायच ६ नमस्त्रिपुरहर्त्रायज्ञविध्वंसना-
यच नमःकामांगनाशायकालदंडधरायच ७ नमस्कंदविशाखायब्रह्मदंडायवैनमः नमोभवायशर्वायविश्वरूपायवैनमः ८
ईशानायभवघ्नायनमोस्त्वंधकघातिने नमोविश्वायमायायचिंत्याचिंत्यायवैनमः ९ त्वंनोगतिश्चश्रेष्ठश्चत्वमेवहृदयंतथा त्वंब्र
ह्मासर्वदेवानांरुद्राणांनीललोहितः आत्माचसर्वभूतानांसांख्येपुरुषउच्यते १० ऋषभस्त्वंपवित्राणांयोगिनांनिष्कलःशिवः गृ
हस्थस्त्वमाश्रमिणामीश्वराणांमहेश्वरः ११ कुबेरःसर्वयक्षाणांक्रतूनांविष्णुरुच्यते पर्वतानांभवान्मेरुर्नक्षत्राणांचचंद्रमाः १२
वसिष्ठस्त्वमृषीणांचग्रहाणांसूर्यउच्यते आरण्यानांपशूनांचसिंहस्त्वंपरमेश्वरः १३ ग्राम्याणांगोवृषश्चासिभवाँल्लोकप्रपूजितः आ
दित्यानांभवान्विष्णुर्वसूनांचैवपावकः १४ पक्षिणांवैनतेयस्त्वमनंतोभुजगेषुच सामवेदश्चवेदानांयजुषांशतरुद्रियम् १५ सन
त्कुमारोयोगीनांसांख्यानांकपिलोह्यसि शक्रोसिमरुतांदेवपितॄणांहव्यवाडसि १६ ब्रह्मलोकश्चलोकानांशैलानांहिमवान्गिरिः व
र्णानांब्राह्मणश्चासिविप्राणांदीक्षितोद्विजः १७ आदिस्त्वमसिलोकानांसंहर्ताकालएवच यच्चान्यदपिलोकेवैसर्वतेजोधिकंस्मृतम्
१८ तत्सर्वंभगवानेवइतिमेनिश्चितामतिः नमस्तेभगवन्देवनमस्तेभक्तवत्सल १९ योगेश्वरनमस्तेस्तुनमस्तेविश्वसंभव प्रसी
दममभक्तस्यदीनस्यकृपणस्यच ३२० ॥

य २ स्रष्टाराय औण्णादिकःसृजेस्तृन् स्रष्टेरित्यर्थः ३ ४ गिरिमालायगिरौक्रीडापराय ५ ६ हर्तायी
स्त्रे ७ ८ मायायमायावन ९ मातःप्रार्थस्थानं श्रेष्ठःपूज्यतमः ब्रह्मादिस्तंबविभूतिर्विशेषाभिव्यक्तिस्थानं १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०

२१ २२ २३ २४ २५ २६ २७ २८ कामेभ्यः कामान् काम्यमानान् अर्थान् २९ ३० ३१ ३२ ३३ ३४ ३५ ३६
एवंपुरोवर्त्तिमूर्त्तिरूपम् यत् अजं अनाविर्भूतं अक्षरं व्यापकं ज्ञानं तदेव इति एवं प्रकारेण ख्यातं प्रथां गतं विशेषविशिष्टं देवतां तरापेक्षया सनातनमिति मूर्त्तेर

अनेनैश्वर्येणयुक्तस्यगतिर्भवसनातन यच्चापराधकृतवान्ज्ञात्वापरमेश्वर २१ मद्भक्तइतिदेवेशनत्सर्वंक्षंतुमर्हसि मोहितश्चास्मि
देवेशत्वयारूपविपर्ययात् २२ नार्घ्यंतेनमयादत्तंपाद्यंचापिमहेश्वर एवंस्तुत्वाहमीशानंपाद्यमर्घ्यंचभक्तितः २३ कृतांजलिपु
टोभूत्वासर्वंतस्मैन्यवेदयम् ततःशीतांबुसंयुक्तादिव्यगंधसमन्विता २४ पुष्पवृष्टिःशुभातानपपातममभूर्द्धनि दुंदुभिश्चतदा-
दिव्यस्ताडितोदेवकिंकरैः ववौचमारुतःपुण्यःशुचिगंधःसुखावहः २५ ततःप्रीतोमहादेवःसपत्नीकोवृषध्वजः अब्रवीत्त्रिदशांस्त
त्रहर्षयन्निवमांतदा २६ पश्यध्वंत्रिदशाःसर्वेउपमन्योर्महात्मनः मयिभक्तिपरांनित्यमेकभावादवस्थिताम् २७ एवमुक्तास्तदा
कृष्णसुरास्तेशूलपाणिना ऊचुःप्रांजलयःसर्वेनमस्कृत्वावृषध्वजम् २८ भगवन्देवदेवेशलोकनाथजगत्पते लभतांसर्वकामे
भ्यःफलंत्वत्तोद्विजोत्तमः २९ एवमुक्तस्ततःशर्वःसुरैर्ब्रह्मादिभिस्तथा आहमांभगवानीशःप्रहसन्निवशंकरः ३० भगवानु
वाच वत्सोपमन्योतुष्टोस्मिपश्यमांमुनिपुंगव दृढभक्तोसिविप्रर्षेमयाजिज्ञासितोह्यसि ३१ अनयाचैवभक्त्यातेअत्यर्थं
प्रीतिमानहम् तस्मात्सर्वान्ददाम्यद्यकामांस्तवयथेप्सितान् ३२ एवमुक्तस्यचैवाथमहादेवेनधीमता हर्षादश्रूण्यवर्त्तंतरोम
हर्षस्त्वजायत ३३ अब्रुवंचतदादेवंहर्षगद्गदयागिरा जानुभ्यामवनींगत्वाप्रणम्यचपुनःपुनः ३४ अद्यजातोह्यहंदेवसफ
लंजन्मचाद्यमे सुरासुरगुरुर्देवोयत्तिष्ठतिममाग्रतः ३५ यंनपश्यंतिचैवाद्धादेवाह्यमितविक्रमम् तमहंदृष्टवान्देवकों-
न्योधन्यतरोमया ३६ एवंध्यायंतिविद्वांसःपरंतत्त्वंसनातनम् तद्विशेषमितिख्यातंयदजंज्ञानमक्षरम् ३७ सएषभग
वान्देवःसर्वसत्वादिरव्ययः सर्वतत्त्वविधानज्ञःप्रधानपुरुषःपरः ३८ योसृजद्दक्षिणादंगाद्ब्रह्माणंलोकसंभवम् वामपार्श्वात्तथाविष्णुंलो
करक्षार्थमीश्वरः ३९ युगांतेचैवसंप्राप्तेरुद्रमीशोसृजत्प्रभुः सरुद्रःसंहरन्कृत्स्नंजगत्स्थावरजंगमं ४० कालोभूत्वामहातेजाःसंवर्त्त
कइवानलः युगांतेसर्वभूतानिग्रसन्निवव्यवस्थितः ४१ एषदेवोमहादेवोजगत्सृष्ट्वाचराचरम् कल्पांतेचैवसर्वेषांस्मृतिमाक्षिप्यति
ष्ठति ४२ सर्वगःसर्वभूतात्मासर्वभूतभवोद्भवः आस्तेसर्वगतोनित्यमदृश्यःसर्वदैवतैः ४३ यदिदेयोवरोमह्यंयदितुष्टोसिमेप्रभो
भक्तिर्भवतुमेनित्यंत्वयिदेवसुरेश्वर ४४

पिनित्यत्वंव्यवहारापेक्षयाप्रोक्तं ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ७ ७

४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ षो
डशंवरान् सपत्नीकान् महेश्वरात् तत्रापिअष्टौ महेश्वरात् परिशेषा अष्टौ पत्नीतइतिषोडशेत्यर्थः यद्वा अष्टौ पत्नीतः प्रार्थिताः अष्टौतयास्वयंदत्ताइतिषोडशाअ

अतीतानागतंचैववर्त्तमानंचयद्विभो जानीयामितिमेबुद्धिःप्रसादात्सुरसत्तम ४५ क्षीरोदनंचभुंजीयामक्षयंसहबांधवैः आश्रमेचस
दास्माकंसान्निध्यंपरमस्तुते ४६ एवमुक्तःसमांप्राहभगवाल्लोकपूजितः महेश्वरोमहातेजाश्चराचरगुरुःशिवः ४७ श्रीभगवानुवाच
अजरश्चामरश्चैवभवत्वंदुःखवर्जितः यशस्वीतेजसायुक्तोदिव्यज्ञानसमन्वितः ४८ ऋषीणामभिगम्यश्चमत्प्रसादाद्भविष्यसि शी
लवान्गुणसंपन्नःसर्वज्ञःप्रियदर्शनः ४९ अक्षयंयौवनंतेस्तुतेजश्चैवानलोपमम् क्षीरोदःसागरश्चैवयत्रयत्रेच्छसिप्रियम् ५०
तत्रतेभविताकामंसान्निध्यंपयसोनिधेः क्षीरोदनंचभुंक्ष्वत्वममृतेनसमन्वितम् ५१ बंधुभिःसहितःकल्पंततोमामुपयास्यसि अ
क्षयाबांधवाश्चैवकुलंगोत्रंचतेसदा ५२ भविष्यतिद्विजश्रेष्ठमयिभक्तिश्चशाश्वती सान्निध्यंचाश्रमेनित्यंकरिष्यामिद्विजोत्तम ५३
निश्चवत्सयथाकामंनोत्कंठांचकरिष्यसि स्मृतस्त्वयापुनर्विप्रकरिष्यामिचदर्शनम् ५४ एवमुक्त्वासभगवान्सूर्यकोटिसमप्रभः ईशानः
सुवरान्दत्वातत्रैवांतरधीयत ५५ एवंदृष्टोमयाकृष्णदेवदेवःसमाधिना तदवाप्तंचमेसर्वंयदुक्तंतेनधीमता ५६ प्रत्यक्षंचैवतेकृष्णप
श्यसिद्धान्व्यवस्थितान् ऋषीन्विद्याधरान्यक्षान्गंधर्वाप्सरसस्तथा ५७ पश्यवृक्षलतागुल्मान्सर्वपुष्पफलप्रदान् सर्वर्त्तुकुसुमै-
र्युक्तान्सुखपत्रान्सुगंधिनः ५८ सर्वमेतन्महाबाहोदिव्यभावसमन्वितम् प्रसादाद्देवदेवस्य ईश्वरस्यमहात्मनः ५९ वासुदेवउवा
च एतच्छ्रुत्वावचस्तस्यप्रत्यक्षमिवदर्शनम् विस्मयंपरमंगत्वाअब्रुवंतंमहामुनिम् ६० धन्यस्त्वमसिविप्रेंद्रकस्त्वदन्योस्तिपु-
ण्यकृत्तम् यस्यदेवाधिदेवस्तेसान्निध्यंकुरुतेश्रमे ६१ अपितावन्ममाप्येवंदद्यात्सभगवाञ्छिवः दर्शनंमुनिशार्दूलप्रसादंचापिशंकरः
६२ उपमन्युरुवाच द्रक्ष्यसेपुंडरीकाक्षमहादेवंनसंशयः अचिरेणैवकालेनयथादृष्टोमयानघ ६२ चक्षुषाचैवदिव्येनपश्याम्य
मितविक्रमम् षष्ठेमासिमहादेवद्रक्ष्यसेपुरुषोत्तम ६३ षोडशाष्टौवरांश्चापिप्राप्स्यसित्वंमहेश्वरात् सपत्नीकाद्यदुश्रेष्ठसत्यमेतद्ब्र
वीमिते ६४ अतीतानागतंचैववर्त्तमानंचनित्यशः विदितंमेमहाबाहोप्रसादात्तस्यधीमतः ६५ एतान्सहस्रशश्चान्यान्समनुध्यात
वान्हरः कस्मात्प्रसादंभगवान्नकुर्यात्तवमाधव त्वादृशेनहिदेवानांश्लाघनीयःसमागमः ६६

श्चेत्यर्थः ६४ ६५ एतानइहस्थानमुनीना
समसंध्यानवान् कृपयांआलोकितवान् एतेष्वपिदयौ त्वयि आत्मनिदयांकथंनकरिष्यंतीत्यर्थः ६६ ६७ ६७ ६७ ६७ ६७ ६७

६७ ६८ ६९ ७० ७१ ७२ तेजो वर्णयति इंद्रेति यस्य तेजसो मध्ये ऽनेकानि इंद्रधनूंषि विद्युतो नीलमेघाः श्वेतमेघाश्च पर्वत
बलाकारूणा भांति तोदृशं चित्ररूपं तेज इत्यर्थः ७३ ७४ ७५ रराजेति नीलतेजसि सोमसूर्यप्रभो भवानीशंकरो इति भ्राजत इत्यर्थः ७६ ७७ ७८ ७९

अब्रह्मण्येनानृशंसेन अश्रद्दधानेन चाप्युत जप्यं तु ते प्रदास्यामि येन द्रक्ष्यसि शंकरम् ६७ विष्णुरुवाच अब्रुवंतमहं ब्रह्मन् लत्प्रसादा
न्महामुने ईर्ष्ये दितिज संघानां मर्द नं त्रिदशेश्वरम् ६८ एवं कथयतस्तस्य महादेवाश्रिता कथाम् दिनान्यष्टौ ततो जग्मुर्मुहूर्त्तमिव भारत
६९ दिने ऽष्टमे तु विप्रेण दीक्षितो ऽहं यथाविधि दंडी मुंडी कुशी चीरी घृताक्तो मेखली कृतः ७० मासमेकं फलाहारो द्वितीयं सलिलाशनः तृ
तीयं च चतुर्थं च पंचमं च जलाशनः ७१ एकपादेन तिष्ठंश्च ऊर्ध्वबाहुरतंद्रितः तेजः सूर्यसहस्रस्य अपश्यं दिवि भारत ७२ तस्य मध्यग
तं चापि तेजसः पांडुनंदन इंद्रायुधपिनद्धांगं विद्युन्माला गवाक्षकम् ७३ नीलशैलचयप्रख्यं बलाकाभूषितांबरम् ७४ तत्रस्थित
श्च भगवान् देव्या सह महाद्युतिः तपसा तेजसा कांत्या दीप्तया सह भार्यया ७५ रराज भगवांस्तत्र देव्या सह महेश्वरः सोमेन सहितः
सूर्यो यथा मेघस्थितस्तथा ७६ संहृष्टरोमा कौंतेय विस्मयोत्फुल्ललोचनः अपश्यं देवसंघानां गतिमार्त्तिहरं हरम् ७७ किरीटिनं गदि
नं शूलपाणिं व्याघ्राजिनं जटिलं दंडपाणिम् पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रं शुभांगदं व्यालयज्ञोपवीतम् ७८ दिव्यां मालामुरसानेकवर्णां
समुद्वहंतं गुल्फदेशावलंबां चंद्रं यथा परिविष्टं ससंध्यं वर्षात्यये तद्वदपश्यमेनम् ७९ प्रथमानां गणैश्चैव समंतात्परिवारितम् शरदी
व सुदुःप्रेक्ष्यं परिविष्टं दिवाकरम् ८० एकादश शतान्येवं रुद्राणां वृषवाहनम् अस्तुवंत यतात्मानं कर्मभिः शुभकर्मिणम् ८१ आदि
त्या वसवः साध्या विश्वेदेवास्तथाश्विनौ विश्वाभिः स्तुतिभिर्देवं विश्वदेवं समस्तुवन् ८२ शतक्रतुश्च भगवान् विष्णुश्चादितिनंदनौ
ब्रह्मा रथंतरं साम ईरयंति भवांतिके ८३ योगीश्वराः सुबहवो योगदं पितरं गुरुम् ब्रह्मर्षयश्च ससुतास्तथा देवर्षयश्च वै ८४ पृथि
वी चांतरिक्षं च नक्षत्राणि ग्रहास्तथा मासार्द्धमासा ऋतवो रात्रिः संवत्सरः क्षणाः ८५ मुहूर्त्ताश्च निमेषाश्च तथैव युगपर्ययाः दिव्या
राजन्नमस्यंति विद्याः सर्वविदस्तथा ८६ सनत्कुमारो देवाश्च इतिहासास्तथैव च मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ८७
मनवः सप्त सोमश्च अथर्वा सबृहस्पतिः भृगुर्दक्षः कश्यपश्च वसिष्ठः काश्य एव च ८८ छंदांसि दीक्षा यज्ञाश्च दक्षिणाः पावको हविः
यज्ञोपगानि द्रव्याणि मूर्त्तिमंति युधिष्ठिर ८९ प्रजानां पालकाः सर्वे सरितः पन्नगा नगाः देवानां मातरः सर्वा देवपत्न्यः सकन्यकाः ९०

परिविष्टं परिवेषवंतं ८० ८१ विश्वाभिः ब्रह्मपरत्वेन स्तुतिरेव कृत्स्नस्तुतिः इतरा तु एकदेशस्तुतिरित्यर्थः विश्वदेवं सर्वेश्वरं ८२ ८३ ८४ पृथिव्यादयो ऽत्र मूर्त्तिमं
तो ज्ञेयाः ८५ ८६ ८७ ८८ ८९ ९०

शाश्वतोऽपरिणामी सन् सर्वयोनिः ब्रह्मणो वेदस्याधिपः स्वयम्भुः तपः चित्तेंद्रियाणामैकाग्र्यं ९८ धाता ईश्वर-
ः त्वष्टा रूपनिर्माता विधाता धर्मरूपं धर्म ९९ स्थावराणि चिरकालस्थायीनि महदादीनि चराणि स्थूलभूतादीनि चराचरं लोकप्रसिद्धं ४०० वायवः पं
च प्राणाः सप्ताग्नयः गार्हपत्यदक्षिणाग्न्याहवनीयसभ्यावसथ्याः पंच श्रौताः स्मार्त्तः षष्ठः लौकिकः सप्तमः यद्वा सप्त वायव आवहाद्याः अंतरिक्षे ये भुव आ-
दीन् सत्यांतान् लोकान् धारयंति अग्नय आदित्यादिज्योतींषि गतेः सर्वत्र्येच ये देवसंस्थाः देवे मृत्रात्मनि संस्था समाप्तिर्येषां तेन तथा त्वत्त एव देवताः स्तुतियोग्याः देवाः

सहस्राणि मुनीनां च अयुतान्यर्बुदानि च नमस्यति प्रभुः शान्तः पर्वताः सागरा दिशः गंधर्वाप्सरसश्चैव गीतवादित्रकोविदाः ९१ दिव्यतालेषु गायंतः स्तुवंति भवमद्भुतम् विद्याधरा दानवाश्च गुह्यका राक्षसास्तथा ९२ नमस्यति महाराज वाङ्मनःकर्मभिर्विभुम् पुरस्ताधिष्ठितः शर्वो ममासीत् त्रिदशेश्वरः ९३ पुरस्ताधिष्ठितं दृष्ट्वा ममेशानं च भारत सप्रजापतिशक्रांतं जगन्मामभ्युदैक्षत ९४ ईक्षितुं च महादेवं न मे शक्तिरभूत्तदा ततो मामब्रवीद्देवः पश्य कृष्ण वदस्व च ९५ त्वया ह्याराधितश्चाहं शतशोऽथ सहस्रशः त्वत्समो नास्ति मे कश्चित्त्रिषु लोकेषु वै प्रियः ९६ शिरसा वंदिते देवे देवी प्रीता ह्युमा तदा ततोऽहमब्रुवं स्थाणुं स्तुतं ब्रह्मादिभिः सुरैः ९७ विष्णुरुवाच
नमोऽस्तु ते शाश्वत सर्वयोने ब्रह्माधिपं त्वामृषयो वदंति तपश्च सत्त्वं च रजस्तमश्च त्वामेव सत्यं च वदंति संतः ९८ त्वं वै ब्रह्मा च रुद्रश्च
वरुणोऽग्निर्मनुर्भवः धाता त्वष्टा विधाता च त्वं प्रभुः सर्वतोमुखः ९९ त्वत्तो जातानि भूतानि स्थावराणि चराणि च त्वया सृष्टमिदं कृत्स्नं
त्रैलोक्यं सचराचरम् ४०० यानींद्रियाणीह मनश्च कृत्स्नं ये वायवः सप्त तथैव चाग्नयः ये देवसंस्थास्तव देवताश्च तस्मात्परं त्वामृष-
यो वदंति १ वेदाश्च यज्ञाः सोमश्च दक्षिणा पावको हविः यज्ञोपगं च यत्किंचिद्भगवांस्तदसंशयम् २ इष्टं दत्तमधीतं च व्रतानि नियमाश्च ये ह्रीः कीर्तिः श्रीर्द्युतिस्तुष्टिः सिद्धिश्चैव तदर्पणी ३ कामः क्रोधो भयं लोभो मदः स्तंभोऽथ मत्सरः आधयो व्याधयश्चैव भगवंस्तनयास्तव ४ कृतिर्विकारः प्रणयः प्रधानं बीजमव्ययम् मनसः परमा योनिः प्रभावश्चापि शाश्वतः ५ अव्यक्तः पावनोऽचिंत्यः सहस्रांशुर्हिरण्मयः

तस्मात् एतेषां समुदायात् परं वाचामगोचररूपादिहीनं त्वां ऋषयो वदंति १ स्रुक्स्रुवपात्रमिल्कुशदेशकालादिकं यज्ञोपगं यज्ञोपयोगि
२ सिद्धिर्योगपरिपाकजा दर्पणी तव स्वरूपप्रापिका ३ ४ कृतिः क्रिया विकारस्तत्फलं सुखदुःखादिः प्रणयस्तदभावः प्रधानं यस्मिन् सर्वमिति प्रधानं वासना
बीजं अज्ञानं तदेवाव्ययं मनसो योनिः च अन्नमयं हि सोम्य मन इति श्रुतेरन्नस्यापि मनोयोनित्वं उपचारमात्रेण नतु मुख्यमिति तत्कुः परमेति योनिविशेषणं प्रभावः ऐश्वर्य-
व्यतं अकर्मजं ४ हिरण्मयः चिज्ज्योतीरूपः गण्यंते संख्यायंत इति गणास्तत्त्वानि तेषां अव्यक्तादीनि तेषामादिः जीवितानाम् अयः नदीसमुद्रवज्जीवस्य प्राप्यस्थानं ५ ६

महानितिमहदाद्यैश्चतुर्दशभिः पर्यायशब्दैः वेदे महानात्मा परमात्मा भवानेव विभाव्यते विचार्यते वेदार्थविद्भिः एतैः शब्दैस्त्वां वेदा दुध्वा मोहं संसारमूलं अज्ञानं नियच्छ
तिनितरां नाशयति ६ हृदयं हृदयस्थः क्षेत्रं महाभूतादिधृत्यंतं तज्ज्ञः तन्मयः शकः ऋषिभिर्मंत्रैः स्तुतः स्तुतिमेवाह सर्वत इति ७ प्रभा विश्वतिग्मांशोः कर्मसु फ-
लं स्वर्गसुखं च त्वमसि ८ अणिमा दुर्लक्ष्यसन्मात्रं महिमा त्रिविधपरिच्छेदशून्यसन्मात्रं अत्र प्रकृत्यर्थो दुर्लक्ष्यत्वादिः प्रकृत्यर्थः सत्तेति विवेकः ९ सत्यस
त्वाः सत्यसंकल्पाः १० य इति वेदयते जानाति ज्ञात्वा शिष्यान् ज्ञापयतीति वा, विग्रहं त्रिशिष्टानुभवरूपं निष्कलज्ञप्तिमात्रमित्यर्थः ११ विदित्वा उपास्य सप्त

अस्मद्गणानां सर्वेषां भवान्वै जीविताश्रयः ५ महानात्मा मतिर्ब्रह्मा विश्वः शंभुः स्वयंभुवः बुद्धिः प्रज्ञोपलब्धिश्च संवित्ख्यातिर्धृतिः स्मृतिः
पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यते त्वां बुद्ध्वा ब्राह्मणो विद्वान् प्रमोहं विनियच्छति ६ हृदयं सर्वभूतानां क्षेत्रज्ञस्त्वमृषिष्टुतः
सर्वतःपाणिपादस्त्वं सर्वतोक्षिशिरोमुखः ७ सर्वतःश्रुतिमाँल्लोके सर्वमावृत्य तिष्ठसि फलं त्वमसि तिग्मांशो निमेषादिषु कर्मसु ८ त्वं
वै प्रभार्चिः पुरुषः सर्वस्य हृदि संश्रितः अणिमा महिमा प्राप्तिरीशानो ज्योतिरव्ययः ९ त्वयि बुद्धिर्मतिर्लोकाः प्रपन्नाः संश्रिताश्च ये ध्या
निनो नित्ययोगाश्च सत्यसत्वा जितेंद्रियाः १० यस्त्वां ध्रुवं वेदयते गुहाशयं प्रभुं पुराणं पुरुषं च विग्रहम् हिरण्मयं बुद्धिमतां परां गतिं स बु
द्धिमान् बुद्धिमतीत्य तिष्ठति ११ विदित्वा सप्त सूक्ष्माणि षडंगं त्वां च मूर्तितः प्रधानविधियोगस्थस्त्वामेव विशते बुधः १२ एवमुक्ते मया पा
र्थ भवे चार्तिविनाशने चराचरं जगत्सर्वं सिंहनादं तदाकरोत् १३ तं विप्रसंघाश्च सुरासुराश्च नागाः पिशाचाः पितरो वयांसि रक्षोगणा
भूतगणाश्च सर्वे महर्षयश्चैव तदा प्रणेमुः १४ मम मूर्ध्नि च दिव्यानां कुसुमानां सुगंधिनाम् राशयो निपतंति स्म वायुश्च सुसुखो ववौ १५
निरीक्ष्य भगवान्देवीमुमां मां च जगद्धितः शतक्रतुं चाभिवीक्ष्य स्वयमामाह शंकरः १६ विद्मः कृष्ण परां भक्तिमस्मासु तव शत्रुहन् क्रि
यतामात्मनः श्रेयः प्रीतिर्हि त्वयि मे परा १७ वृणीष्वाष्टौ वरान्कृष्ण दातास्मि तव सत्तम ब्रूहि यादवशार्दूल यानिच्छसि सुदुर्लभान्
४१८ इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मे मेघवाहनोपाख्याने चतुर्दशोऽध्यायः १४

सूक्ष्माणि महदहंकारपंचतन्मात्राणि षडंगं
सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्येति अंगषट्कमुक्तं प्रधानं चित्तसत्वं तस्य आत्माभि
मानत्वेन नित्यं गृहीतस्य पृथक्त्वे नाज्ञानं तस्य ज्ञापनविधिः सत्वस्य पुरुषात् भिन्नत्वेन ज्ञानं तद्यस्मात्तादृशो योगो वृत्तिनिरोधस्तत्रस्थः तन्मात्रनिष्ठस्त्वां निष्कलं आवि
शते आरोहक्रमेण योगी भूम्यादीनि महदंतानि तत्वानि जित्वा जयसाधनं धीसत्वमप्यात्मनः पृथक्त्वेन ज्ञात्वा प्रत्यकृतत्वमात्रनिष्ठः विलीने सत्वे परं ब्रह्म संपद्यत इत्य
र्थः १२ १३ १४ १५ १६ १७ १८ मेघवाहनः इंद्ररूपी महादेवः तस्य माहात्म्यप्रतिपादकं पर्व मेघवाहनपर्व तत्रायमध्यायः चतुर्दशः इति अनुशासनपर्वणि टीका
यां चतुर्दशोऽध्यायः १४ ६७

मूर्ध्नीति सन्निचये स्थितमिति शेषः १ योगेन सहितं प्रियत्वं इति द्वौ वरौ २ धारिणी पोषिका ३ ४ ५ ६ एवं भविष्यतीति प्रार्थितान्वरानभ्यनुज्ञाय स्वयं भवानी वराष्टकं ददाति तत्रामरप्रभावेति संबोधनेनैको वरः सूचितः. नाहं मृषा जातु वदे इति त्वमपि मृषा मा वदेति द्वितीयः षोडशसहस्रभार्या इति तृतीयः तासु-प्रियत्वमिति चतुर्थः पूर्वोक्तात्सर्वप्रियत्वादन्यः अक्षयं धनधान्यादीत्यर्थादिति पंचमः ७ अन्यत्त्रयं स्पष्टार्थं एवं च उपक्रमस्थानां षोडशस्थानां वचनमुपपद्य-ते ८ ९ १० ११ इति श्रीमहाभारते आनुशासनिके पर्वणि टीकायां पंचदशोऽध्यायः १५ ७ ऋषिरिति अयमध्यायो यत्सूत्रं पूर्वमुपमन्युना कृष्णं प्रत्युक्तं ज

कृष्ण उवाच मूर्ध्ना निपत्य नियतस्तेजःसन्निचये ततः परमं हर्षमागत्य भगवन्तमथाब्रुवे १ धर्मे दृढत्वं युधि शत्रुघातं यशस्तथाग्र्यं परमं बलं च योगप्रियत्वं तव सन्निकर्षं वृणे सुतानां च शतं शतानि २ एवमस्त्विति तद्वाक्यं मयोक्तः प्राह शंकरः ततो मां जगतो माता धारिणी सर्वपावनी ३ उवाचोमा प्रणिहिता शर्वाणी तपसां निधिः दत्तो भगवता पुत्रः साम्बो नाम तवानघ ४ मत्तोऽप्यष्टौ वरानिष्टान्गृहाण त्वं ददामि ते. प्रणम्य शिरसा सा च मयोक्ता पाण्डुनंदन ५ द्विजेषु कोपं पितृतः प्रसादं शतं सुतानां परमं च भोगम् कुले प्रीतिं मातृतश्च प्रसादं शमप्राप्तिं प्रवृणे चापि दाक्ष्यम् ६ उमोवाच एवं भविष्यत्यमरप्रभाव नाहं मृषा जातु वदे कदाचित् भार्यासहस्राणि च षोडशैव तासु प्रियत्वं च तथाक्षयं च ७ प्रीतिं चाग्र्यां बान्धवानां सकाशाद्ददामि तेऽहं वपुषः काम्यतां च भोक्ष्यन्ते वै सप्ततिर्वै शतानि गृहे तुभ्यमतिथीनां च नित्यम् ८ वासुदेव उवाच एवं दत्वा वरान्देवो मम देवी च भारत अन्तर्हितः क्षणे तस्मिन्सगणो भीमपूर्वज ९ एतदत्यद्भुतं पूर्वं ब्राह्मणायामिततेजसे उपमन्यवे मया कृत्स्नं व्याख्यातं पार्थिवोत्तम नमस्कृत्वा तु स प्राह देवदेवाय सुव्रत १० उपमन्युरुवाच नास्ति-शर्वसमो देवो नास्ति शर्वसमा गतिः नास्ति शर्वसमो दाने नास्ति शर्वसमो रणे ११ इति श्रीमहाभारते अनुशासनपर्वणि मेघवाहनोपाख्याने पंचदशोऽध्यायः १५ उपमन्युरुवाच ऋषिरासीत्कृते तात तण्डिरित्येव विश्रुतः दशवर्षसहस्राणि तेन देवः समाधिना १ आराधितोऽभूद्भक्तेन तस्योदर्कं निशामय स दृष्टवान्महादेवमस्तौषीच्च स्तवैर्विभुम् २ इति तण्डिस्तपोयोगात्परमात्मानमव्ययम् चिंतयित्वा महात्मानमिदमाह सुविस्मितः ३ यं पठन्ति सदा सांख्याश्चिन्तयन्ति च योगिनः परं प्रधानं पुरुषमधिष्ठातारमीश्वरम् ४ उत्पत्तौ च विनाशे च कारणं यं विदुर्बुधाः देवासुरमुनीनां च परं यस्मान्न विद्यते ५ अजं तमहमीशानमनादिनिधनं प्रभुम् अत्यन्तसुखिनं देवमनघं शरणं व्रजे ६

भ्यं तु ते प्रदास्यामीत्युक्तं तज्जप्यं शिवसहस्रनामस्तोत्रं विवक्षुरुपमन्युमुखेन तदुपोद्घातार्थमारभ्यते समाधिना ध्यानयोगेन १ उदर्कं फलोदयम् २ इदं वक्ष्यमाणप्रकारेण ३ ४ ५ ६ ७ ७ ७ ७ ७ ७ ७

यपठनात्यादृग्ला कृतनमध्यानबलात्ताउ नादृष्टनदुच्चारणस्यफलमाहएवमिति अन्योप्येतैःश्लोकैःस्तुवन्वक्ष्यमाणरूपमीश्वरंपश्यतीतिभावः शाश्वतंश
श्वद्भवम् ध्रुवंकूटस्थं ७ निष्कलत्वादेवव्याख्यानंनिर्गुणत्वादि अक्षरंअविनाशि. ८ मनोमयंमनसोधर्मैः कर्तृत्वादिभिर्वशीकृतंजलचंद्रवत् ९ १०
यइतिसार्द्धश्लोकः यःदेवंआत्मानंप्राणवंतंजीवरूपिणंकृत्वातआवृत्तजीवमनोरूपंज्योतिर्मूलंजीवस्थितंबभूवतंदेवंदृष्ट्वातुष्टवेतिसंबंधः ११ पवित्राणांपा
वनानांगंगादीनामपिपावनं तेजसांचक्षुरादीनामपितेजःप्रकाशकं १२ भूरिकल्याणमोक्षस्तत्प्रद परंसत्यंअत्यंतंअबाध्यं १३ १४ तिस्रस्तनवःकाल
धातृव्यक्तविष्णुरुद्राख्या १५ अधीति अत्रसप्तभिरधिपौरुषादिसहिताभिःकृत्स्नंहेयमुपादेयंचत्वमेवेतिकथ्यतेतथाहि पुरुषःशिरःपाण्यादिमान्देहस्त
मधिकृत्यप्रवृत्तविज्ञानंअधिपौरुषम् तत्रचमातापूर्वरूपंपितोत्तररूपंप्रजासंधिःप्रजननंसंधानमितिश्रुतेःक्षेत्रबीजरूपाभ्यांमातापितृभ्यांसकाशादन्योन्य
मिथुनीभावेननिमित्तेनअंकुररूपाप्रजाजायते एवंप्रकृतिपुरुषाभ्यां जगदितितत्रमिथुनीभावस्याभावेनब्रह्मचर्येणप्रजावज्जगन्नोत्पद्यतइतिपुंप्रकृत्योर्विवे

एवंस्तुवन्ब्रतदादृदृशातपसांनिधिम् तमव्ययमनापम्यमाचंत्यंशाश्वतंध्रुवम् ७ निष्कलंसकलंब्रह्मनिर्गुणंगुणगोचरम् योगिनां
परमानंदमक्षरंमोक्षसंज्ञितम् ८ मनोरिंद्राग्निमरुतांविश्वस्यब्रह्मणोगतिम् अग्राह्यमचलंशुद्धंबुद्धिग्राह्यंमनोमयम् ९ दु-
र्विज्ञेयमसंख्येयंदुष्प्रापमकृतात्मभिः योनिंविश्वस्यजगतस्तमसःपरतःपरम् १०यःप्राणवंतमात्मानंज्योतिर्जीवस्थितंमनः तंदेवंदर्श
नाकांक्षीबहून्वर्षगणानृषिः तपस्युग्रेस्थितोभूत्वादृष्ट्वातुष्टावचेश्वरम् ११ तंडिरुवाच पवित्राणांपवित्रस्त्वंगतिर्गतिमतांवर
अत्युग्रंतेजसांतेजस्त्वंतपसांपरमंतपः विश्वावसुहिरण्याक्षपुरुहूतनमस्कृत १२ भूरिकल्याणदविभोपरंसत्यनमोस्तुते जातीम
रणभीरूणांयतीनांयततांविभो निर्वाणदसहस्रांशोनमस्तेस्तुसुखाश्रय १३ ब्रह्माशतक्रतुर्विष्णुर्विश्वेदेवामहर्षयः नविदुस्त्वां
तुतत्त्वेनकुतोवेत्स्यामहेवयम् त्वत्तःप्रवर्ततेसर्वंत्वयिसर्वंप्रतिष्ठितम् १४ कालाख्यःपुरुषाख्यश्चब्रह्माख्यश्चत्वमेवहि तनवस्ते
स्मृतास्तिस्रःपुराणज्ञैःसुरर्षिभिः १५ अधिपौरुषमध्यात्ममधिभूताधिदैवतम् अधिलोकाधिविज्ञानमधियज्ञस्त्वमेवहि १६
कमिच्छताउपस्थनिग्रहःकर्तव्यइतिविधीयते एवंअध्यात्मंआत्मनिदेहे अधराहनुःपूर्वरूपंउत्तराहनुरुत्त
ररूपं वाक्संधिः जिव्हासंधानमितिश्रुतेर्जिह्वानिग्रहेणतूष्णींभावोपिपूर्वोक्तविवेकार्थंविधीयते अन्यथावागादीन्प्रवर्त्ततोविवेकोनसंपद्यतेऽपितु संसारएवा
नवच्छिन्नोनुतन्यतेइतिएताःसंहितावेदितव्याः तथाअधिभूताधिदैवतं भूतानांदेहाद्यारंभकाणांदेवतानांप्राणचक्षुराद्यधिष्ठात्रीणांभूतदेवतानांचान्योन्या-
श्रयेणमिथुनीभावेनावस्थानंसंसारःतन्मूलंचअधिलोकाधिविज्ञानंलोक्यतइतिलोकोभूतमात्रादशशब्दादयोविषयाःविज्ञानंप्रज्ञामात्राःदशश्रोत्रादीनींद्रि
याणिज्ञानकरणानिउभयेषांमिथुनीभावोयदिभूतमात्रानस्युःनप्रज्ञामात्राःस्युर्यदिप्रज्ञामात्रानस्युर्नभूतमात्राःस्युस्तर्ह्यन्यतरतोरूपंकिंचनसिध्यतीतिश्रुतिप्रसि

न्द्रः ततश्च ब्रह्मचर्यपूर्वकं वागादिनियहे क्रियमाणे जीवब्रह्मणोर्भेदहेतूनामध्यात्माधिभूताधिदैवानाम् असुत्यक्तेरधियज्ञो घटनाशे घटाकाशमहाकाशयोरिव तयोः सं
गतिकरणं एकीभावलक्षणो यज्ञो मोक्षापरनामा सिद्ध्यति एतत्सर्वं त्वमेवेति श्लोकार्थः १६ १७ नवत्वा अनिच्छतः ज्ञातुमिति शेषः जन्ममृत्युश्च अनेकतो अनं
तः पुनः पुनर्भवतीत्यर्थः १८ १९ २० अस्तिच नास्तिचेति रज्जुभुजंगाभं प्रतीतिनेत्युक्तिस्ततो नास्ति ताहृशं जगत्कारणमज्ञानमुच्यते २१ विश्वाविश्वपरः कार्य
कारणाभ्यामन्यः भावः सत्तामात्ररूपः चिंत्याचिंत्यश्च चिंत्यः सोपाधिकरूपेण अचिंत्यो निरुपाधिकेन २२ २३ २४ अचेतसा अज्ञानेन यत्परं देवं न विद्मः

त्वा विदित्वात्मदेहस्थं दुर्विदं दैवतैरपि विद्वांसो यांति निर्मुक्ताः परं भावमनामयम् १७ अनिच्छतस्तव विभो जन्ममृत्युरनेकशः द्वा
रं तु स्वर्गमोक्षाणामाक्षेप्तात्वं ददासि च १८ त्वं वै स्वर्गश्च मोक्षश्च कामः क्रोधस्त्वमेव च सत्वं रजस्तमश्चैव अधश्चोर्ध्वं त्वमेव हि १९
ब्रह्मा भवश्च विष्णुश्च स्कंदेंद्रौ सविता यमः वरुणेंदू मनुर्धाता विधाता त्वं धनेश्वरः २० भूर्वायुः सलिलोग्निश्च खं वाग्बुद्धिः स्थितिर्म
तिः कर्म सत्यानृते चोभे त्वमेवास्ति च नास्ति च २१ इंद्रियाणींद्रियार्थाश्च प्रकृतिभ्यः परं ध्रुवम् विश्वाविश्वपरो भावश्चिंत्याचिंत्यस्त्वमेव
हि २२ यच्चैतत्परमं ब्रह्म यच्चैतत्परमं पदम् या गतिः सांख्ययोगानां स भवान्नात्र संशयः २३ नूनमद्य कृतार्थाः स्म नूनं प्राप्ताः सतां ग
तिम् यां गतिं प्रार्थयंतीह ज्ञाननिर्मलबुद्धयः २४ अहो मूढाः स्म सुचिरमिमं कालमचेतसा यन्न विद्मः परं देवं शाश्वतं यं विदुर्बुधाः २५
सेयमासादिता साक्षात्त्वद्भक्तिर्जन्मभिर्मया भक्तानुग्रहकृद्देवो यं ज्ञात्वामृतमश्नुते २६ देवासुरमुनीनां तु यच्च गुह्यं सनातनम् गु
हायां निहितं ब्रह्म दुर्विज्ञेयं सुरैरपि २७ स एष भगवान्देवः सर्वकृत्सर्वतोमुखः सर्वात्मा सर्वदर्शी च सर्वगः सर्ववेदिता २८ देहकृ
द्देहभृद्देही देहभुग्देहिनां गतिः प्राणकृत्प्राणभृत्प्राणी प्राणदः प्राणिनां गतिः २९ अध्यात्मगतिरिष्टानां ध्यायिनामात्मवेदिनाम् अ
पुनर्भवकामानां या गतिः सोयमीश्वरः ३० अयं च सर्वभूतानां शुभाशुभगतिप्रदः अयं च जन्ममरणे विदध्यात्सर्वजंतुषु अयं संसि
द्धिकामानां या गतिः सोयमीश्वरः ३१ भूराद्यान्सर्वभुवनानुत्पाद्य सदिवौकसः दधाति देवस्तनुभिरष्टाभिर्यो बिभर्ति च ३२ अतः
प्रवर्तते सर्वमस्मिन्सर्वं प्रतिष्ठितम् अस्मिंश्च प्रलयं याति अयमेकः सनातनः ३३ अयं स सत्यकामानां सत्यलोकः परः सताम् अपव
र्गश्च मुक्तानां कैवल्यं चात्मवेदिनाम् ३४

अतो मूढाः स्मः २५ २६ २७ २८ देहकृत् प्रजादिः देहभृत् देहपोषकोऽन्नादिः देही जीवः देहभुक् देहसंहर्ता प्राणिलिंगश-
रीरं तस्यानादित्वेपि तत्कर्तृत्वं तदाविर्भावनिमित्तत्वं दृष्टिसृष्टिन्यायेन मुख्यं वा ज्ञेयं २९ ३० अष्टाभिः भूम्यंबुवन्हिवायुव्योमसूर्यचंद्रयजमानाख्याभिः ३२ ३३ अ
यमिति सत्यं अव्यभिचारि वेदोक्तकर्मफलं स्वर्गः सतां ऊर्ध्वरेतसां परः स्वर्लोकात् परिमहर्लोकादि अपवर्गः क्रममुक्तिस्थानं ब्रह्मलोकाख्यं मुक्तानां विदेहाख्यानां योगिवि-
शेषाणां कैवल्यं मुख्या मुक्तिः ३४

गुह्ययांशास्त्रे गोपितः तत्र हेतुमाह देवेतिउक्तोपि सुरव नेयो मा भूदिति भंग्यंतरेण निरूपितः ब्रह्माद्यैर्मंत्रव्याख्यातृभिस्तथाहि चत्वारिशृंगेतिमंत्रोयास्केन यज्ञ परया पतंजलिना शब्दपरतया गोतमेनतटस्थेश्वर परतया च व्याख्यातः वस्तुतस्त्वध्यात्मपरोस्तीतिस्पष्टम् ३५ अनेन अहंकारेण अप्रकाशिना जडेन जडानृत- रूपस्याप्यस्य चित्सद्रूपेण त्वयैव प्रकाशः सत्ता च भवतीतिभावः तथाच मंत्रवर्णः 'अयंरोचयदरुचो रुचानोऽयंवासयदृतेन पूर्वीरिति अयंआत्मा रोचयत् प्रकाश यति अरुचः अप्रकाशान् अहंकारादीन् रुचानः स्वयंप्रकाशमानः अयंआत्मा पूर्वीः अहंमादिभूज्यानि विशेषतः पृथक्कृथिविकृतया ऋतेन स्वसत्तया वासयत्-

अयंब्रह्मादिभिःसिद्धैर्गुहायांगोपितः प्रभुः देवासुरमनुष्याणामप्रकाशोभवेदिति ३५ तत्वांदेवासुरनरास्तत्वेनन विदुर्भवम् मोहितास्त्व त्वनेनैवत्वंहृदिस्थेनाप्रकाशिना ३६ येचैनंप्रतिपद्यंतेभक्तियोगेनभाविताः तेषामेवात्मनात्मानंदर्शयत्येषहृच्छयः ३७ यंज्ञात्वानपुन र्जन्ममरणंचापिविद्यते यंविदित्वापरंवेद्यंवेदितव्यंनविद्यते ३८ यंलब्ध्वापरमंलाभंमनाधिकंमन्यतेबुधः यासूक्ष्मापरमाप्राप्तिंगच्छ- त्यव्ययमक्षयम् . ३९ यंसांख्यागुणतत्वज्ञाःसांख्यशास्त्रविशारदाः सूक्ष्मज्ञानंतराःसूक्ष्मंज्ञात्वामुच्यंतिबंधनैः ४० यंचवेदविदोवेद्यं वेदांतेचप्रतिष्ठितम् प्राणायामपरानित्यंयंविशंतिजपंतिच ४१ .ओंकाररथमारुह्यतेविशंतिमहेश्वरम अयसदेवयानानामादित्योद्वा रमुच्यते ४२ अयंचपितृयानानांचंद्रमोद्वारमुच्यते एषकाष्ठादिशश्चैवसंवत्सरयुगादिच ४३ दिव्यादिव्यःपरोलाभोअयनेदक्षिणो त्तरे .एनंप्रजापतिःपूर्वमाराध्यबहुभिःस्तवैः ४४ प्रजार्थंवरयामाससनीललोहितसंज्ञितम्. ऋग्भिर्यमनुशासंतितत्वेकर्मणिबह्वृचः ४५ यजुर्भिर्यंत्रिधावेद्यंजुह्वत्यध्वर्यवोध्वरे सामभिर्यंचगायंतिसामगाःशुद्धबुद्धयः ४६ ऋतंसत्यंपरंब्रह्मस्तुवंत्याथर्वणाद्विजाः य ज्ञस्यपरमायोनिःपतिश्चायंपरःस्मृतः ४७ रात्र्यहःश्रोत्रनयनःपक्षमासशिरोभुजः ऋतुवीर्यस्तपोधैर्योत्वब्दगुह्योरुपादवान् ४८ मृत्युर्यमोहुताशश्चकालःसंहारवेगवान् कालस्यपरमायोनिःकालश्चायंसनातनः ४९ चंद्रादित्यौसनक्षत्रौग्रहाश्चसहवायुना ध्रुवः सप्तर्षयश्चैवसप्तभुवनाःसप्तएवच ५० प्रधानंमहदव्यक्तंविशेषांतंसवैकृतम् ब्रह्मादिस्तंबपर्यंतंभूतादिसदसच्चयत् ५१

आच्छादयति अनृता

नयैतानृस्वसत्तैवसत्तावतःकरोतु रज्जुरिवसर्पादीनितिमंत्रपदानामर्थः ३६ ३७ ३८ गच्छत्गच्छतिबुधः ३९ सूक्ष्मंलिंगंज्ञानेननरांति अतिक्रम्यगच्छंतितेसू क्ष्मज्ञाननराः सूक्ष्मज्ञानेतिपाठेप्रकृतिदितीत्यांगताइत्यर्थः सूक्ष्मंपुरुषं ४० ४१ ४२ ४३ दिव्योलाभमैंद्रं अदिव्योलाभःसार्वभौमत्वं ४४ ४५ अनुशंसंती तिपाठःस्वच्छःतत्वेअनारोपितेरूपेविषयेकुर्वंयति ४५ त्रिधापाकयज्ञत्रये श्रौतस्मार्त्तध्यानयज्ञैरित्यर्थः ४६ ऋतंयज्ञःसत्यंतत्फलयोनिःब्रह्मासत्ये ४७ यज्ञपतिःश्रोत्रादिभावेनरात्र्यादीनिनिरूपयति रात्रीति ४८ ४९ कालस्ययोनिर्भवाहचंद्रेति ५० सत्भूम्यंबुतेजांसि असत्वाय्वाकाशौ ५१ ६२

अष्टौभूमिरापोनलोवायुःखंमनोबुद्धिरहंकारश्च परःमायावी अस्यमायाविनःभागंअंशंकृत्स्नंप्रपंचजातं ५२ एतस्मात्परमंआनंदमयादीश्वरादपिपरंशुद्धंआनंदंआ
नंदमात्रं नदेवशाश्वतंतेनपूर्वेषामशाश्वतत्वंदर्शितम् ५३ ध्यानंपरंपद्मंपदप्रापकं ५४ सेतिसाकाष्ठासापरागतिरितिश्रुतिप्रसिद्धा ५५ निर्वृत्तिःसुखं ५६
श्रुतिरितिश्रोत्रादिजन्याऽनुभूतिः इष्टानांयोगिनां अध्यात्मगतिःप्रत्यक्षावण्यरूपागतिः विदुषांअहंब्रह्मास्मीत्याजानतां अव्ययाअपुनरावर्त्तिनीप्राप्तिः ५७ प
रमांगतिंअपरमगतिपूर्विकांव्याचष्टेयजतामिति यज्ञशीलानांगतिःस्वर्गःइंद्रादिलोकः ५८ योगजपादिपराणांतपस्विनांनक्षत्रलोकाख्यापरमाभास्वतीगतिर्द्वि

अष्टौप्रकृतयश्चैवप्रकृतिभ्यश्चयःपरः अस्यदेवस्ययद्भागंकृत्स्नंसपरिवर्त्तते ५२ एतत्परममानंदंयत्तच्छाश्वतमेवच एषागतिर्वि
रक्तानामेषभावःपरःसताम् ५३ एतत्पदमनुद्विग्नमेतद्ब्रह्मसनातनम् शास्त्रवेदांगविदुषामेतद्ध्यानंपरंपदम् ५४ इयंसापर
माकाष्ठाइयंसापरमाकला इयंसापरमासिद्धिरियंसापरमागतिः ५५ इयंसापरमाशांतिरियंसानिर्वृतिःपरा यंप्राप्यकृतकृत्याः
स्मइत्यमन्यंततयोगिनः ५६ इयंतुष्टिरियंसिद्धिरियंश्रुतिरियंस्मृतिः अध्यात्मगतिरिष्टानांविदुषांप्राप्तिरव्यया ५७ यजतांकामयाना-
नांमखैर्विपुलदक्षिणैः यागतिर्यज्ञशीलानांसागतिस्त्वंनसंशयः ५८ सम्यग्योगजपैःशांतिर्नियमैर्देहतापनैः तप्यतांयागतिर्देव
परमासागतिर्भवान् ५९ कर्मन्यासकृतानांचविरक्तानांततस्ततः यागतिर्ब्रह्मसदनेसागतिस्त्वंसनातन ६० अपुनर्भवकामानांवै
राग्येवर्त्ततांचया प्रकृतीनांलयानांचसागतिस्त्वंसनातन ६१ ज्ञानविज्ञानयुक्तानांनिरूपाख्यानिरंजना कैवल्यायागतिर्देवपरमासा
गतिर्भवान् ६२ वेदशास्त्रपुराणोक्ताःपंचैतागतयःस्मृताः त्वत्प्रसादाद्धिलभ्यंतेनलभ्यंतेन्यथाविभो ६३ इतितंडिस्तपोराशिस्तुष्टा
वेशानमात्मना जगौचपरमंब्रह्मयत्पुरालोककृज्जगौ ६४ उपमन्युरुवाच एवंस्तुतोमहादेवस्तंडिनाब्रह्मवादिना उवाच-
भगवान्देवउमयासहितःप्रभुः ६५ ब्रह्माशतक्रतुर्विष्णुर्विश्वेदेवामहर्षयः नविदुस्त्वामितितततस्तुष्टःप्रोवाचतंशिवः ६६ श्री
भगवानुवाच अक्षयश्चाव्ययश्चैवभवितादुःखवर्जितः मत्प्रसादात्द्विजश्रेष्ठभवितादुःखवर्जितः ६७ यशस्वीतेजसायुक्तो-
दिव्यज्ञानसमन्वितः ऋषीणामभिगम्यश्चसूत्रकर्त्तासुतस्तव ६८ मत्प्रसादान्द्विजश्रेष्ठभविष्यतिनसंशयः कंवाकामंददाम्यद्य
ब्रूहियद्वत्ससंकांक्षसे ६९

तीया ५९ संन्यासिनांब्रह्मलोकःपुनरावृत्तिरूपागतिस्तृतीया ६० प्रकृतीनांयेलयमभ्यस्यंतितेषांदहरादिरूपकारणब्रह्मो-
पासकानां अपुनरावृत्तिरूपागतिश्चतुर्थी ६१ ज्ञानेनतिनिष्कलब्रह्मविदांमोक्षाख्यायांगतिःसाप्त वान् पूर्वास्तुगतयोः नान्यभूताइतिभावः ६२ ६३ ६४ ६५ त
नः ब्रह्मादयस्त्वांनविदुः इतिवाक्यान ६६ ६७ सूत्रकर्त्तातांडितइतियजुर्वेदेशाखाविशेषस्तत्रकल्पसूत्रकर्त्ता ६८ ६९ ७ ७ ७

७०, ७१, ७२ प्रथितानिमयातुभ्यंयेषांमध्येएकंउपदिष्टंतानिसर्वाणित्वंशृणुसिद्धयेमोक्षांतसकलप्राप्तये ७३ ७४ ७५ इतिश्रीमहाभारतेआनुशास
निकेपर्वणिटीकायांषोडशोऽध्यायः १६ नगाः १ २ सत्यैरन्वर्थैः वेदेकृतात्मनादत्तचित्तेन कृतैःवेदात्पृथक्कृतैः ३ यथोक्तैरिति स्तुत्यंसिंहावलोक-

प्रांजलिःसउवाचेदंत्वयिभक्तिर्दृढास्तुमे ७० उपमन्युरुवाच एतान्दत्वावरान्देवोवंद्यमानःसुरर्षिभिः स्तूयमानश्चविबुधैस्तत्रैवांतर
धीयत ७१ अंतर्हितेभगवतिसानुगेयादवेश्वर ऋषिराश्रममागम्यममैतत्प्रोक्तवानिह ७२ यानिचप्रथितान्यादौतण्डिराख्यातवान्म
म नामानिमनुजश्रेष्ठतानित्वंशृणुसिद्धये ७३ दशनामसहस्राणिदेवेष्वाहपितामहः सर्वस्यशास्त्रेषुतथादशनामशतानिच ७४ गु
ह्यानीमानिनामानितण्डिर्भगवतोऽच्युत देवप्रसादाद्देवेशपुराप्राहमहात्मने ७५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेमे-
घवाहनोपाख्यानेषोडशोऽध्यायः १६ वासुदेवउवाच ततःसप्रयतोभूत्वाममतातयुधिष्ठिर प्रांजलिःप्राहविप्रर्षिर्नामसंग्रहमा
दितः १ उपमन्युरुवाच ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदांगसंभवैः सर्वलोकेषुविख्यातंस्तुत्यंस्तोष्यामिनामभिः २ महद्भिर्विहितैःस
त्यैःसिद्धैःसर्वार्थसाधकैः ऋषिणातण्डिनाभक्त्याकृतैर्वेदकृतात्मना ३ यथोक्तैःसाधुभिःख्यातैर्मुनिभिस्तत्त्वदर्शिभिः प्रवरंप्रथमंस्व
र्ग्यंसर्वभूतहितंशुभम् ४ श्रुतैःसर्वत्रजगतिब्रह्मलोकावतारितैः सत्यैस्तत्परमंब्रह्मब्रह्मप्रोक्तंसनातनम् ५ वक्ष्येयदुकुलश्रेष्ठशृणु
ष्वावहितोमम वरयैनंभवंदेवंभक्तस्त्वंपरमेश्वर ६ तेनतेश्रावयिष्यामियत्तद्ब्रह्मसनातनम् नशक्यंविस्तरात्कृत्स्नंवक्तुंसर्वस्यकेन-
चित् ७ युक्तेनापिविभूतीनामपिवर्षशतैरपि यस्यादिर्मध्यमंतंचसुरैरपिनगम्यते ८ कस्तस्यशक्नुयाद्वक्तुंगुणान्कार्त्स्न्येनमाधव
किंतुदेवस्यमहतःसंक्षिप्तार्थपदाक्षरम् ९ शक्तितश्चरितंवक्ष्येप्रसादात्तस्यधीमतः अप्राप्यतुततोऽनुज्ञानंशक्यःस्तोतुमीश्वरः १० य
दातेनाभ्यनुज्ञातःस्तुतोवैस्सतदामया अनादिनिधनस्याहंजगद्योनेर्महात्मनः ११ नाम्नांकंचित्समुद्देशंवक्ष्याम्यव्यक्तयोनिनः वरद
स्यवरेण्यस्यविश्वरूपस्यधीमतः १२ शृणुनाम्नांचयंकृष्णयदुक्तंपद्मयोनिना दशनामसहस्राणियान्याहप्रपितामहः १३ तानि-
निर्मथ्यमनसादध्नोघृतमिवोद्धृतम् गिरेःसारंयथाहेमपुष्पसारंयथामधु १४ घृतात्सारंयथामण्डस्तथैतत्सारमुद्धृतम् सर्वपापापह
मिदंचतुर्वेदसमन्वितम् १५ प्रयत्नेनाधिगंतव्यंधार्यंचप्रयतात्मना मांगल्यंपौष्टिकंचैवरक्षोघ्नंपावनंमहत् १६

न्यायेनविशिनष्टिप्रवरमित्यर्द्धेन ४ श्रुतैरितिब्रह्मप्रोक्तैःवेदोक्तैः ५ वरयप्रार्थयउपसन्नोभवएनंमंत्रात्मकमीश्वरंलब्धुं तेनविधिना ६ ७
युक्तेनसन्नद्धेन ८ ९ १० ११ योनिनःयोनेः ब्रह्मणइतिशेषः १२ १३ १४ १५ १६ छ छ छ छ छ

१७ १८ इदमिति एतज्जपध्यानादिफलप्रद इत्यर्थः १९ यंस्तवं सकृदधिगमेनाप्यस्य परमां गतिं गच्छंतीत्यर्थः पवित्रं पापनाशकं मेध्यं यज्ञादिफल
प्रदं मंगलं अभ्युदयकरं पुण्यं कल्याणं परमानंदरूपम् २०, २१ . २२ २३ . २४ ब्रह्मणां वेदानां वाचामपि यो वागित्यर्थः पराणामिंद्रियार्थमनोबुद्धिमह
दव्यक्तानामपि यः परः पुरुष इत्यर्थः २५ तेजसां चक्षुरादीनामपि यच्चक्षुः तपसां पुण्यानां गंगादीनामपि यत्पुण्यं शांतानां उपरतचित्तानामपि आत्यंतिकी उपरति
र्मोक्षाख्या द्युतीनां ज्ञानानां वृत्तिरूपाणामपि ज्ञानं साक्षिरूपं अनुव्यवसायापरपर्यायं २६ दांतानां जितेंद्रियाणां मध्येऽत्यंतजितेंद्रियः धीमतां ज्ञानिनां धीः
आत्मानुभवरूपं ज्ञानं देवानां पूज्यानामपि पूज्यः ऋषीणां काव्यकर्तॄणामपि काव्यकर्ता वेदकर्तृत्वात् २७ यज्ञानां यज्ञभोक्तॄणां यज्ञः यज्ञस्य आराधनस्य भोक्ता
शिवानां कल्याणानामपि कल्याणं रुणद्धि येनमिति वा रोदित्यनेन वा रौत्यनेन वा रवणं वा रुत् अज्ञानं वा विपर्ययो वा शोको वा दुःखं वा रुत् तां द्रावयतीति रुद्रः ज्ञानं

इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च नाश्रद्दधानरूपाय नास्तिकायाजितात्मने १७ यश्चाभ्यसूयते देवं कारणात्मानमीश्वरम् स कृष्ण
नरकं यातिसह पूर्वैः सहात्मजैः १८ इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् १९ यं ज्ञात्वा अंत
कालेऽपि गच्छेत परमां गतिम् पवित्रं मंगलं मेध्यं कल्याणमिदमुत्तमम् २० इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः सर्वस्तवानां राजत्वे दि
व्यानां समकल्पयत् २१ तदाप्रभृति चैवायमीश्वरस्य महात्मनः स्तवराज इति ख्यातो जगत्यमरपूजितः २२ ब्रह्मलोकादयं स्वर्गे स्तव
राजोऽवतारितः यतस्तंडिः पुरा प्राप तेन तंडिकृतोऽभवत् २३ स्वर्गाच्चैवात्र भूर्लोकं तंडिना ह्यवतारितः सर्वमंगलमांगल्यं सर्वपापप्रणा
शनम् २४ निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् २५ तेजसामपि यत्तेजस्तपसामपि य
त्तपः शांतानामपि यः शांतो द्युतीनामपि या द्युतिः २६ दांतानामपि यो दांतो धीमतामपि या च धीः देवानामपि यो देव ऋषीणामपि यस्त्वृषिः
२७ यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः रुद्राणामपि यो रुद्रः प्रभा प्रभवतामपि २८ योगिनामपि यो योगी कारणानां च कारणम्
यतो लोकाः संभवंति न भवंति यतः पुनः २९ सर्वभूतात्मभूतस्य हरस्यामिततेजसः अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु यच्छ्रुत्वा मनु
जव्याघ्र सर्वान्कामानवाप्स्यसि ३०

आनंदो वा तेजसामप्यानंदः प्रभवतामीश्वराणामपि प्रभा ऐश्वर्यं २८ योगिनां ब्रह्मादीनामपि यो योगी ध्येयसंकल्प-
मात्रेण स्रष्टा कारणानां अव्यक्तादीनां कारणं निष्कलं २९ यद्यप्यत्र सहस्रनामस्तोत्रे नाम्नां शब्दतोऽर्थतश्च पौनरुक्त्यमस्ति तथापि अर्थैक्येऽपि शब्दभेदात्क्वचित्क्व
चित् शब्दैक्येऽप्यर्थभेदाच्च पौनरुक्त्यं दुष्टव्यं अपूर्वार्थत्वात् नहि सर्वात्मपदोच्चारणजन्यमपूर्वं विश्वात्मपदोच्चारणादुत्पाद्यते अन्यथा अग्नये जुष्टं निर्वपामीत्यत्र
वन्हये जुष्टमिति उच्चारणेऽपि तदपूर्वोत्पत्त्यापत्तेर्विधिगत एव शब्दः प्रयोक्तव्य इति मीमांसकमुद्राभंगः स्यात् अर्थभेदेऽपि शब्दैक्यं न पौनरुक्त्यावहं इंद्रशब्दस्यान्या
र्थस्यापि ऐन्द्र्या गार्हपत्यमुपतिष्ठते इति विधानाद्योगेनाग्निपरत्वदर्शनात् तथा च शब्दैक्येऽप्यर्थैक्यं नास्ति तथा वयमस्या व्याख्याया दर्शयिष्यामः ३० ६

तिष्ठतीतिस्थिरः तिष्ठंत्यस्मिन्निति स्थाणुश्च अजिरशिशिरेत्यादिनास्थाणुरितिच तिष्ठतेः किरच् टिलोपो प्रत्ययश्च विधीयते स्थिरः अचंचलः कूटस्थो नित्यः स्थाणुः गृहस्तंभवत्सर्वाश्रयः यथोक्तं संसारमंडपस्यास्यमूलस्तंभायशंभवइति प्रभुः ईश्वरोंतर्यामीत्यर्थः प्रकृष्टंभवनंसत्तायस्येति वापरमार्थसत्यइत्यर्थः प्रकर्षेण भावयतिविश्वंरचयतिजानातिवाविश्वकर्त्तासर्वज्ञोवेत्यर्थः विप्रसंभ्योड्वसंज्ञायामितिप्रपूर्वात्भवतेर्डुः याचकपाठकादिवद्गुणशब्दोयंनतुसंज्ञाशब्दः एवमुत्तरत्रापिज्ञेयं भीमः संहर्त्ताबिभेत्यस्माज्जगदितिव्युत्पत्तेः भीमादयोपादानेइतिसूत्रात्सिद्धिः प्रवरः श्रेष्ठः प्रकर्षेणभोगमोक्षकामैर्वरणीयः अनगघवृस्दःदृष्टप्रदःआतश्चोपसर्गेइतिप्रपूर्वाद्ददातेःकः वरः वृणोतिआच्छादयतिसर्वमितिवरः पचाद्यच् सर्वात्मासृतमनेनेतिसर्वःस चात्माचेतिसर्वात्माव्यापकः प्रत्यग्रूपः प्राणभृन्मात्रस्यांतरात्मेत्यर्थः सर्वनिघृष्टेत्यादिनासृतेर्वन्नंत त्वंनिपात्यते. आप्नोतिसर्वंभोग्यस्वार्थत्वेनलभनेआदत्तेस्वीकरोतिअतिभुंक्तेअंततेसततंतमेकरूपेणवर्त्ततइतिचआत्मा तथाचस्मृतिः यच्चाप्नोतियदादत्तेयच्चात्तिविषयानयं यच्चास्यसंततोभावस्तस्मादात्मेतिगीयतइति सर्ववि-

ओम् स्थिरः स्थाणुः प्रभुर्भीमः प्रवरोवरदोवरः सर्वात्मासर्वविख्यातः सर्वः सर्वकरोभवः
३१ जटीचर्मीशिखंडीचसर्वांगः सर्वभावनः हरश्चहरिणाक्षश्च सर्वभूतहरः प्रभुः ३२

ख्यातः सर्वत्रदेशेकालेचसर्वेषांप्राणिनांवाविख्यातः प्रत्यक्षेणप्रसिद्धः सर्वव्यापकः सर्वंसमाप्नोषिततोसिसर्वइतिभगवद्वचनात् सर्वंकरोतीतिसर्वकरः विश्वस्यकर्त्ता एतेननामद्वयेनउपादानत्वंनिमित्तत्वंचोक्तं अतएवभवत्यस्मादनन्यापेक्षाद्विश्वमितिभवत्यस्मिन्प्रलयइतिवाभवः सर्वस्योत्पत्तिप्रलयस्थानंऋदोरबित्यप् भवतीतिअस्तीतिसत्तार्थाद्भवतेःपचाद्यच् सत्ताचित्स्वरूपइत्यर्थः ३१ जटी जटझटसंघाते ऽस्मात्पचाद्यचिकेशानांसंघातोजटातद्वान् चर्मीचर्मव्याघ्रस्यगजस्यवाकृत्तिस्तद्वान् शिखंडीमयूरशिखावत्जटासंनिवेशोपरिकृतोजटाग्रगुच्छशिखंडस्तद्वान् सर्वजगदंगंअवयवभूतंयस्यसःसर्वांगः विराडित्यर्थः सर्वभावनोविश्वकर्त्ता हरः हरतिसर्वंसंहरतीतिहरः हरतेःपचाद्यच् हरिणाक्षः मृगनेत्रः सर्वाणिभूतानिहरतीतिसर्वभूतहरः हरतेरनुद्यमनेजित्यच् प्रभुः प्रकर्षेणभवतेप्राप्नोतिविश्वंभोग्यत्वेनेतिसर्वभोक्तापूर्ववद्डुः ३२ ६ ६ ६ ६ ६ ६

प्रवृत्तिः प्रकर्षेणकुर्वद्रूपतयावर्त्तनंप्रवृत्तिः निःकर्षेणनिरुद्यमतयावर्त्तनंनिवृत्तिः निपूर्वात्वृतुवर्त्तने स्मात्स्त्रियांक्तिन् यतंतेविषयग्रहणायस्वयंप्रवर्त्ततेतानि यतानिइंद्रियाणियतीप्रयत्नेस्मात्पचाद्यच् निगृहीतानियतानियेनसः नियतः तपस्वीत्यर्थः शाश्वतः शश्वद्भवः नित्यइत्यर्थः ध्रुवः अचलः श्मशानवासी शानःशवाःमृतजीवाः शेरतेस्मिन्पुनरुत्थानवर्जितंशयनंकुर्वन्त्यस्मिन्निति श्मशानंवाराणसीतत्रवस्तुंशीलमस्यसःश्मशानवासी शवदाहस्थलेतुश्मशानशब्दो गौणः नहितत्रमृतानांदेहानांदेहिनांवाभूद्भस्मीभूतानांयातनावशनांवासःसुषुप्तिर्वाद्रिश्रांतिस्थानं देहानांजडत्वेनविश्रांत्यनर्हत्वात् देहिनांशरीरांतरधारिणांविश्रां त्यभावात्वाराणस्यांमृतास्तुनपुनःसंसरंतीतिसहस्रशःप्रमाणानि अस्मत्कृतेअविमुक्तनिरुक्तिसारेद्रष्टव्यानि भगवान्ऐश्वर्यस्यसमग्रस्यज्ञानस्ययशसःश्रि- यः वैराग्यस्यचधर्मस्यषण्णांभगइतीर्यतेइतिस्मृतानिभगानिविद्यंतेस्मिन्नितिभगवान् खचरः हार्दाकाशचारीदहरोस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं शंभुराकाशमध्यइतिश्रुतिप्रसिद्धः चरेष्टः गोचरःगोषुइंद्रियेषुविषयतयाचरतीतिवागोभिःकरणैर्वाचरतिविषयान्भुंक्तइतिवागोचरः सर्वात्मत्वात्सर्वेंद्रियगम्यः इंद्रियद्वाराविषयभुगित्वार्थः अर्दयतिजनंपापिनंपीडयतिकालांतकरूपेणेत्यर्दनः नंद्यादित्वाल्युः ३३ अभिवाद्यः सर्वेषांनमस्कार्यः स्तुत्योवा महत्सृष्ट्या दिकंकर्मास्येतिमहाकर्मा तपएवस्वंधनंतद्वान्तपस्वी भूतानिग्वादीनिभावयतिसंकल्पमात्रेणसृजतीतिभूतभावनः उन्मत्तवेषेणादिग्वासस्त्वादिरूपेणप्र

प्रवृत्तिश्चनिवृत्तिश्चनियतःशाश्वतोध्रुवः श्मशानवासीभगवान्खचरोगोचरोर्दनः ३३ अभिवाद्योमहाकर्मातपस्वीभूतभावनः उन्मत्त वेषप्रच्छन्नःसर्वलोकप्रजापतिः ३४ महारूपोमहाकायोवृषरूपोमहायशाः महात्मासर्वभूतात्माविश्वरूपोमहाहनुः ३५ लोक पालोंतर्हितात्माप्रसादोहयगर्दभिः पवित्रंचमहांश्चैवनियमोनियमाश्रितः ३६

च्छन्नोदुर्ज्ञेयः लोकाःस्थानानिप्रजास्तत्रनिवसंतश्चेतनाःसर्वासांलो कप्रजानांपतिःस्वामी ३४ महत्अपरिच्छेद्यंरूपमस्यसमहारूपः महान्कायःस्थूलरूपंवैराजंयस्यसमहाकायः वृषोधर्मस्तद्रूपोवृषरूपः महच्चतद्यशश्च महायशः तस्यनाममहद्यशइतिश्रुतेः परमेश्वरः महात्मामहामना सर्वाणिभूतानिआत्मामनःसंकल्पमात्रंयस्यससर्वभूतात्मातदीक्षणमात्रत्वात्सर्वस्य वि श्वरूपमस्यविश्वस्मिन्रूप्यतेप्रकटीभवतीतिविश्वरूपः महाहनुः महत्योविश्वग्रासमसमर्थेहनूअधरोत्तरेमुखफलकेयस्यसमहाहनुः ३५ लोकपालःइंद्रादिरू पः अंतर्हितात्मा अविद्याकल्पितेनअहंकारादिनातिरोहिताखंडैकरसस्वभावः सर्पेणेवरज्जुः प्रसादः अभिरतिगनंदइतियावत् हयगर्दभिः हयंअश्वगर्दी भींचस्वयोनित्वेनआचक्षतेतौअश्वगर्दभ्यःअश्वतर्यस्ताः रथस्यवहंत्येनमितिहयगर्दभिः किंवतांस्त्रेनिक्षिप्त ततइमंनृत्यभावश्चार्य रुद्रोबाणमयदग्निः अश्वतरीर थेनाग्निसाजिमधावदितिश्रुतिःस्पष्टाअग्निरूपीदेवोश्वतरीरथंवाहनइतिगम्यते पवित्रंपवेरिवपवेःसंसारवज्रपातात्त्रायतइतिपवित्रं अतएवमहान्पूज्यः नियमः शौचसं तोषतपःस्वाध्यायेश्वरप्रणिधानाख्यैर्नियमैःप्राप्यतेइतिनियमः नियमैःसेरेवआश्रितःनारायणदक्षिणामूर्त्यादिरूपेणनियमानामाश्रयभूतइत्यर्थः ३६ ७ ७

सर्वकर्मासकलशिल्पाचार्योविश्वकर्मा स्वयंभूतःनित्यसिद्धः अतएवआदिःसर्वस्मात्प्रथमः आदिकरःहिरण्यगर्भस्रष्टा सवैशरीरीप्रथमइतिश्रुतेस्तस्यादि
त्वं निधिः पद्मशंखादिरूपोऽक्षयैश्वर्यइत्यर्थः सहस्राक्षः अनंतकरचरणादिमान् सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखमित्यादिशास्त्रात् देवेंद्रोवा सर्वस्यत
दभिन्नत्वात् ब्रह्मैवेदंसर्वमित्यादिश्रुतेः विशालानिअतीतादिप्रकाशकत्वेनविपुलान्यक्षाणिइंद्रियाणियस्यसःविशालाक्षः सोमश्चंद्रःलतारूपंयज्ञियंहविर्वा
यत्पुरुषेणहविषेतितस्यैवहविष्ट्वदर्शनात् नक्षत्रसाधकःसुकृतांवाएतानिज्योतींषियन्नक्षत्राणीतिश्रुतेः आकाशेदीप्यमानानिशरीराणिनक्षत्राणितेषांसा-
धकःइष्टादिकारिणांसोमल्लोकेदिव्यशरीरलाभस्यदर्शनात् ३७ चंद्रः सूर्यः शनिः केतुश्चप्रसिद्धः चंद्रार्कौगृण्हातीतिग्रहोराहुः ग्रहाणांपतिःक्रूरत्वान्मं
गलः वरोवरणीयः पूज्योबृहस्पतिःसएवशक्रः बृहस्पतिर्हिशुक्रोभूत्वेति मैत्रायणीयश्रुतेःशक्रस्यबृहस्पत्यवतारत्वश्रवणात् अत्रिःअत्रिगोत्रापत्यत्वाद्बुधः
तेनसर्वग्रहस्वरूपःप्रोक्तइत्यर्थः अत्र्याःअत्रिपत्न्याअनसूयायाःनमस्कर्त्तादत्तदुर्वाससोरूपेणतत्पुत्रत्वात् मृगबाणार्पणः मृगरूपधारिणियज्ञेबाणंअर्पयतीति
तथा अनघःयज्ञघ्नोपिनिष्पापःतेजीयस्त्वात्स्वतंत्रत्वाच्च ३८ महत्तपविश्वसृष्टिक्षमंतपआलोचनंयस्यसमहातपाःसईक्षतलोकान्नुसृजाइतिसइमाल्लो

सर्वकर्मास्वयंभूतआदिरादिकरोनिधिः सहस्राक्षोविशालाक्षःसोमोनक्षत्रसाधकः ३७ चंद्रःसूर्यःशनिःकेतुर्ग्रहोग्र
हपतिर्वरः अत्रिरत्र्यानमस्कर्त्तामृगबाणार्पणोनघः ३८ महातपाघोरतपाअदीनोदीनसाधकः संवत्सरकरोमंत्रःप्रमा
णंपरमंतपः ३९ योगीयोज्योमहाबीजोमहारेतामहाबलः सुवर्णरेताःसर्वज्ञःसुबीजोबीजवाहनः ४०

कानसृजनेतिश्रुतेः घोरंविश्वसंहारक्षमंतपोयस्येतिघोरतपाः योत्येवप्रभवःसएवाप्ययइतिश्रुतेः अदीनःमहामनाःसुग्रीवविभीषणाभ्यांप्रणतिमात्रेण-
राज्यप्रदः दीनसाधकःदीनानांशरणागतानांइष्टसाधकः संवत्सरस्यकरःकर्त्ताकालचक्रप्रवर्त्तकोध्रुवादिज्योतिर्गणरूपः मंत्रःमननात्त्रायतइतिप्रणवादिरू-
पः प्रमाणंवेदशास्त्रादिरूपः परमंतपःअयंतुपरमोधर्मोयद्योगेनात्मदर्शनमितियाज्ञवल्क्योक्तोधर्मः ३९ योगीयोगनिष्ठः योज्योयोगेनब्रह्मणिप्रविलाप
नीयः महाबीजःकारणस्यापिकारणं महारेताःमहत्जडानृतस्यापिअव्यक्तस्यस्फूर्त्तिसत्ताप्रदरेतःप्रतिबिंबोयस्यसमहारेताः अतएवमहाबलःउत्कृष्टसाम-
र्थ्यः सुवर्णरेताःअपएवससर्जादौतासुवीर्यमेवासृजत् तदंडमभवद्धैमंसहस्रांशुसमप्रभमितिस्कांदात् हिरण्मयब्रह्मांडस्रष्टा अग्निरूपेणसुवर्णरेताएववा
सर्वज्ञःमायावृत्त्यासर्वंजानन्सर्वश्चासौज्ञश्चेतिवा सुबीजःसुष्ठुअविकारीबीजभूतःसर्वकारणंभवतीत्यर्थः बीजवाहनबीजंअविद्याकामकर्मात्मकंतदेववा
हनंइहलोकपरलोकेसंचारार्थयस्येतितथा यथोक्तंआत्मानंरथिनंविद्धिशरीरंरथमेवतुइति शरीरपदमत्राव्यक्तपरमितिसिद्धांतः ४० ७ ७

दशबाहुः स्पष्टं अनिमिषो नहि दृष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादितिश्रुतेः क्षणमपि दृग्लोपहीनः नीलकंठः त्रैलोक्यसंहारक्षमस्य हालाहलस्य कंठे धारणा
न्नीलकंठः परमकारुणिकः अतएव उमापतिः उमां हैमवतीमिति केनोपनिषत्प्रसिद्धा ब्रह्मविद्या उमा तस्याः पतिः प्रदाता पक्षे पार्वतीशः विश्वानि रूपाणि यस्मा
ज्जायंते स विश्वरूपः स्वयंश्रेष्ठः अनागंतुकं श्रेष्ठत्वं प्रशस्यतमत्वं यस्य स तथा बलवीरः बलेन सामर्थ्येन वीरो विक्रांतः त्रिपुरपातनाद्यनन्यसाध्यकर्मकर्त्ता अबलः
निःसामर्थ्यः चेतनप्रयुक्तिं विना चलनाक्षमः गण्यते संख्यायते इति गणः तत्त्वसमूहः पंचविंशतिजडतत्त्वात्मेत्यर्थः स्वयं तु षड्विंशः तत्त्वानि च सांख्यस्मृत्यां अ
व्यक्तं महान् अहंकारः पंचतन्मात्राणि एकादशेंद्रियाणि पंच महाभूतानि पंचविंशो प्रोक्तेति ४१ एवंभूतस्यापि गणस्य कर्त्ता पतिर्नियंता चेति गणकर्त्ता गण
पतिश्च उच्यते इति प्रथमं शतं दिग्वासाः दारुकावने मुनिपत्नीमोहनार्थं नग्नत्वं धृतमिति ज्ञेयं वस्तुतस्तु दिशां अनंतानामपि वासइव वास आच्छादकः त
थाच श्रुतिः ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगदिति ईशा ईश्वरेणावास्यमाच्छादनीयमिति कामः स्मरोऽभिलाषो वा तद्रूपः मंत्रान् इषेत्वादीन् पाठ-
तोऽर्थतश्च वेत्तीति वा तैर्धृतिर्वेदनमस्येति वा मंत्रवित् यस्य ज्ञानमयं तपः नावेदविन्मनुते तं बृहंतमिति श्रुतिभ्यां परमो मंत्रः आत्मतत्त्वालोचनरूपो विचारः तस्य अध्या

दशबाहुस्त्वनिमिषो नीलकंठ उमापतिः विश्वरूपः स्वयंश्रेष्ठो बलवीरो बलो गणः ४१ गणकर्त्ता गणपतिर्दिग्वासाः
कामएव च मंत्रवित्परमो मंत्रः सर्वभावकरो हरः ४२ कमंडलुधरो धन्वी बाणहस्तः कपालवान् अशनी शतघ्नी ख
ड्गी पट्टिशी चायुधी महान् ४३ स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ४४

रोपापवादात्मकत्वात् तदनुगुणं नाम हृयं सर्वभावकरः जगत्कारणमित्यर्थः हरः तत्त्वविलापनस्थानं सर्वभावनः हर इति च पूर्वकालरूपेण सर्वकर्त्तृत्वं संहर्तृत्वे-
उक्ते इदानीं तत्त्वदृष्ट्येति भेदः तथाहि चतुर्विधः प्रलयः प्राकृतो ब्रह्मावसाने महदंतानां कार्याणां नाशः दैनंदिनो ब्रह्मदिनावसाने त्रैलोक्यनाशः नित्यो स्वप्नादि
सुषुप्तौ सर्वनाशः एते त्रयः सबीजाः इति उत्पत्तिमंतः आत्यंतिकस्तु तत्त्वज्ञानेन सकारणस्य कार्यस्य नाशः पुनरुत्पत्तिहीनो मोक्षाख्य इति शास्त्रप्रसिद्धः ४२
दशबाहुरित्युक्तानां बाहूनामायुधान्याह कमंडलुधरः धन्वी धनुष्मान् बाणहस्तः कपालवान् ब्रह्मणः शिरश्छित्वा तत्कपालं धारयतीत्यर्थः अशनिर्व-
ज्रं तद्वान् शतघ्नी शक्तिस्तद्वान् उभयत्र व्रीह्यादिभ्यश्चेति मत्वर्थीय इनिः खड्गी पट्टिशः खड्गविशेषः तद्वान् आयुधः स्वस्य असाधारणं शूलं तद्वान् शूलीत्य
र्थः महान् पूज्यः ४३ स्रुवो यज्ञपात्रं तद्धस्तः सुरूपः तेजः तेजस्वी तेजस्करो निधिः भक्तानां कांतिप्रदो निधिरिव निधिरतुच्छेद्यः उष्णीषी शिरोवेष्टनवान्
सुवक्त्रः उदग्रः ऊर्जितरूपः विनतः विनयवान् ४४

दीर्घः अत्युच्चः हरिकेशः हरय इंद्रियाण्येव केशा इव केशा रश्मयो यस्य स हरिकेशः इंद्रियद्वारा तत्तदर्थप्रकाशकर्ता यद्वा हरिश्च कश्च ईशश्च तेषां समाहारः त्रिमूर्ति रित्यर्थः शोभनश्चासौ तीर्थश्च सुतीर्थः महागुरुः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः तस्य वाचकः प्रणवः स पूर्वेषामपि गुरुरिति पतंजलिस्मरणात् कृष्णः कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति श्रुतेरानंदसन्मात्र इत्यर्थः ब्रह्मोत्तरखंडे वा गोपशिशुः प्रतिमह्यं देवेन तज्ज्ञान्वये सप्तमेऽहं भविष्यामीति वरदानान्महादेवस्यैवावतारः कृष्ण इत्यवगमात् शृगालरूपः वणिजा अवमानितं ब्राह्मणं प्रायोपविष्टं सांत्वितुमिंद्रेणेतद्रूपं धृतमिति मोक्षधर्मे भूपाख्याये तेन शृगालरूपं इंद्रस्तदभिन्न इत्यर्थः सिद्धार्थः सिद्धा एव न तु साध्या अर्था अर्थनीयाः पदार्था यस्य मुंडः परिव्राट् अत एव सर्वशुभंकरः सर्वभूताभयप्रदः ४५ अजः अजातः ब्रह्मादिवजलं आपेक्षिकं देवेषु भरत्सवत् हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् विष्णुरित्थापरमम स्य विद्वान्जातो ह्यहं नाभिपातितृतीयमिति ब्रह्मविष्ण्वादिषु जात इति विशेषणात् अजात इत्येवं कश्चिद्भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहीति रुद्र एवाजातत्वदर्शनात् बहुरूपः स्पष्टं गंधधारी कुंकुमकस्तूर्यादिसुरभिद्रव्यधर्ता कपर्दी कं जलं पिबतीति कपः कनिः सौत्रो धातुः स्पर्द्धायामैश्वर्ये चास्ति क्रतस्य द्वैनैश्ययोगिति

दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च शृगालरूपः सिद्धार्थो मुंडः सर्वशुभंकरः ४५ अजश्च बहुरूपश्च गंधधारी कपर्द्यपि ऊ-
र्ध्वरेता ऊर्ध्वलिंग ऊर्ध्वशायी नभःस्थलः ४६ त्रिजटश्चीरवासाश्च रुद्रः सेनापतिर्विभुः अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः ४७

वोपदवः अस्मात् भावेक्तिप्रकृत ऐश्वर्य ददातीति क्रद्दः कपश्चासौ क्रद्दश्चेति समासः सद्गुणः कपर्दः महादेवस्य हि जटाजूटेन स्वर्गात्पतंती गंगा प्रथमं पीता पश्चाद्भगीरथप्रार्थनया तस्या निर्गमनसामर्थ्यं च दत्तमतः स कपर्दः तद्वान्महेश्वरः कपर्दी ऊर्ध्वरेताः अविप्लुतब्रह्मचर्यः तत्र हेतुः ऊर्ध्वलिंगः अधोलिंगो हि रेतः सिंचति न तूर्ध्वलिंगः अत्रापि हेतुः ऊर्ध्वशायी उत्तानशयः एतेन नामत्रयेण उमयापि शिवो न ग्रस्तो न च स्पृश्यतः असंग इत्यर्थ च यदर्शितं एवं सत्यपि नभ एव आकाशशब्दिता शक्तिरेव स्थलं आवासो यस्य स नभःस्थलः यथोक्तमभियुक्तैः शक्तिः शरीरमधिदैवतमंतरात्मा ज्ञानं क्रियाकरणमासनजालमिच्छा ऐश्वर्यमायतनमावरणानि च लंकिंकिनयद्भवसिदं वशशांकमौलेरिति ४६ त्रिजटी चीरवासाः स्पष्टे रुद्रः प्राणा वाव रुद्रा एते हीदं सर्वं रोदयंतीति श्रुतेः सर्वेषां प्राणरूपः सेनापतिः विभुर्व्यापी अहश्चरो देवादिः नक्तंचरो राक्षसादिस्तदुभयरूपः तिग्ममन्युः तीक्ष्णक्रोधः सुवर्चसः सुतरां वर्चो ध्ययनतपआदिजं तेजो यस्मिन् समासांतोच् आर्षत्वात् ४७

गजहा वाराणस्यां पुरा यातो गजरूपी महासुरः जघ्नेतं कुंजरं भीममन्धृष्यमपि शंकर इतिस्कांदे उपाख्यानात् गजासुरहंता ५० दैत्यहा ५१ कालः मृत्युः संवत्सरादिर्वा ५२ लोकधाता लोकानामीश्वरः ५३ गुणाकरः दीनदयालुत्वज्ञानैश्वर्यादीनामाकरः खनिः ५४ सिंहः शार्दूलरूपः सर्वहिंस्रपशुरूपः ५५ आर्द्रचर्म गजकृत्तिस्तदेवांबरं तेनावृत्तः ५६ ४८ कालश्चासौ योगी कालयोगी ५७ महानादः अनाहतध्वनिरूपः सच हंसोपनिषत्प्रसिद्धः ५८ सर्वे कामा विषया अस्मिन्निति सर्वकामः अस्मिन् सर्वे कामाः समाहिता इतिश्रुतिः ५९ चतुष्पथः चत्वारः उपासनार्थं पंथानोस्य स तथा ते च विश्वतैजसप्राज्ञशिवध्यानरूपाः ६० निशाचरः वेतालादिः ६१ प्रेतैर्भूतैश्च सह चरतीति प्रेतचारी ६२ भूतचारी ६३ महेश्वरः इंद्रादिभ्य ईश्वरेभ्यो महान् ६४ ४९ बहुभूतः सच्चासच्चाभवदिति सत्यंचानृतंच सत्यमभवदित्यं तेन श्रुतमस्य बहुभवनं ६५ बहुधरः महतः प्रपंचस्य धर्त्ता ६६ स्वर्भानुः मूलाज्ञानरूपस्तमः शाश्वतो गृहः ६७ अमितः अनंतः भूमेत्यर्थः ६८ गतिः मुक्तप्राप्यः ६९ नृत्यप्रियः तांडवेश्वरश्चिदंबरमूर्तिः ७० नित्यः संततः नर्त्तो नर्त्तनं यस्य नित्यनर्त्तः ७१ नर्त्तकः नर्त्तयिता ७२ सर्वेषु लालसा प्रीतिरस्य विश्वबंधुरित्यर्थः ७३ ५० घोरः शिवस्य हे तन्वौ घोरान्याक्षतृषादिर घोरान्या संतोषादिस्तद्रूपत्वात् घोरः ७४

गजहा दैत्यहा कालो लोकधाता गुणाकरः सिंहशार्दूलरूपश्च आर्द्रचर्मांबरावृतः ४८ कालयोगी महानादः सर्वकामश्चतुष्पथः निशाचरः प्रेतचारी भूतचारी महेश्वरः ४९ बहुभूतो बहुधरः स्वर्भानुरमितो गतिः नृत्यप्रियो नित्यनर्त्तो नर्त्तकः सर्वलालसः ५० घोरो महातपाः पाशो नित्यो गिरिरुहो नभः सहस्रहस्तो विजयो व्यवसायो ह्यतंद्रितः ५१ अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः दक्षयागापहारी च सुसहो मध्यमस्तथा ५२ तेजोपहारी बलहा मुदितोर्थोजितो वरः गंभीरघोषो गंभीरो गंभीरबलवाहनः ५३ ७

महातपाः महत् सर्वसंहारक्षमं तप आलोचनं यस्य ७५ पाशयति स्वमायया वा भातीति पाशः ७६ नित्यः ध्वंसरहितः ७७ गिरिरुहः पर्वतारूढः कैलासवासीत्यर्थः ७८ नभः व्योमवदसंगः ७९ सहस्रहस्तः ८० विजयः ८१ व्यवसायो निश्चय उद्योगो विनपहेतुः ८२ अत एवातंद्रितः तंद्रा तमोमयी वृत्तिः प्रवृत्तिनिरोधिनी तद्रहितः अनिंदित इति पाठे व्यवसायस्य विशेषणं ८३ ५१ अधर्षणः अप्रकंप्यः ८४ धर्षणात्मा भयरूपः ८५ यज्ञहा बलियज्ञघ्नः बौध्यावताररूपेण वा यज्ञघ्नः विश्वंभूतंभुवनंचित्रं बहुधाजातं जायमानंच यत् सर्वो ह्येषरुद्रस्तस्मै रुद्राय नमो अस्त्विति मंत्रवर्णेन विष्ण्वादेरन्यत्वाच्छिवस्य न हि वक्ष्ये इदमुक्तं ८६ कामनाशकः स्मरस्य भक्तकामप्रदत्वेन इच्छाया वा नाशकः ८७ दक्षयागापहारी स्पष्टं ८८ सुसहः सौम्यः ८९ मध्यमः ईषत्सौम्यः ९० ५२ तेजोपहारी अतिक्रूरः ९१ बलहा इंद्ररूपेण बलनामानं दैत्यं हतीतिर्नथा ९२ मुदितः कारणरूपेण नित्यमानंदयुक्तः ९३ अर्थः धनरूपेणार्थनीयः ९४ अजितः संग्रामादौ कृष्णेन तु बाणासुरयुद्धे शिवाज्ञयैव शिवो जितो न स्वबलेन प्रथा भीष्मेण कृष्णः स्वप्रतिज्ञां समर्थयता न्यूतः कृतः भक्तपारवश्यदर्शनाय तद्वत् एतच्च पुराणे प्रसिद्धं ९५ ७

अवरः नास्ति वरोवरणीयो यस्मादन्य इत्यवरः १६ गंभीरघोषो दुंदुभि समुद्रादि रूपेण १७ गंभीरो दुरवगाहना त्मार्यः वेद रूपेण १८ गंभीरं अगाधं परेः नागादिनतन्त्वं वलं
सेना शारीर सामर्थ्यं वा वाहनं वृष अश्वं धर्मरूपं यस्य सः गंभीरबलवाहनः १९ ५३ न्यग्रोधरूपः न्यक् नीचैः रोहतीति ऊर्ध्वमूलोऽवाक् शाख एषोऽश्वत्थः स-
नातन इति श्रुति प्रसिद्धः संसार वृक्षः २०० इति द्वितीयं शतं न्यग्रोधः वटरूपः वटनिकटं आसीत् दक्षिणामूर्ति रूप इत्यर्थः मार्कंडेय दृष्टो वा एकार्णवस्थो वटस्त-
च्छायी बालकृष्ण स्वरूपी महाविष्णुर्वा १ वृक्षस्य कर्णा इव कर्णः एकदेशाः पर्णा तत्र स्थितिर्यस्य स वृक्षकर्णस्थितिः वृक्षकल्प स्थितिरिति पाठे यथैकस्माद्बीजाद्को-
वटस्ततोऽनंतानि बीजानि तेभ्यस्तावंतो वटा इति उत्तरोत्तर वृद्धिमतः कार्यस्यानंत्यं तत्कल्पात नइव नन्यूना स्थितिः संसार वृक्षपालनं यस्य सः न्यूनत्वज्ञानेन भ-
र्जितेन बीजे पुनः प्ररोहासंभवात् अभर्जितेन तस्यानिवार्यत्वादिति सूचयितुं कल्पम्. मार्कंडेयस्यापि एकार्णवे ब्रह्मण्येकदेशे संसार वटोऽन्योप्यनंत प्ररोहोस्तीति भ-
गवतात्स्व मायारूपं वटव्याजेन प्रदर्शितं अत्र च शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः संसार बंधुः सर्वज्ञः परमात्मेति मुख्यतः नामाष्टकमिदं तस्य प्रतिपादकमी-

न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः सुतीक्ष्ण दशनश्चैव महाकायो महाननः ५४ विष्वक्सेनो हरिर्यज्ञः सं
युग्यापीड वाहनः तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ५५

शितुरिति शैवे विष्णु पितामहयोरपि शिवादनन्यत्वात्तद्वाचिभिरपि शब्दैः शिव एवाभिधीयत इति दर्शनात् हरिवंशे कैलासयात्रायां नामानि तव गोविंद यानि लोके महांति च
तान्येव मम नामानि नात्र कार्या विचारणेति शिव वचनाच्च सर्वस्मिन् पुराणे शिवपर्यायैर्विष्णु पर्यायैर्वा एक एव ईश्वरोऽभिधीयते शिव विष्णोर्भेद उत्तमानुत्तम भावं च कल्पयतः
पाषंडिनः शिरसि पतत्वनुकर्षणातः यथोक्तं सूतसंहितायां ब्रह्माण केशवं विष्णु भेद भावेन मोहिताः पश्यंत्येक न जानंति पाखंडोपहता जना इति अत एव माता धाता पितामहः रुद्रो
बहुशिरा बभ्रुरिति विष्णुनाम सु ब्रह्म रुद्र नामानि पठ्यंते तथा महादेवोऽव्ययो हरिः गणनाथ प्रजापतिरिति शिवनामसु विष्णु प्रजापति नामानि इतरेषामितरत्न गौण मुख्य वृत्ति भे-
देन प्रवृत्तिरिति कल्पनया उदाहृत शैव स्कांद वाक्य बाधितत्वेनानुत्थानात् यो देवानां नामधा एक एव नामानि सर्वाणि यमाविशंति एवं सतं बहुधा कल्पयंति एकं सद्विप्रा बहुधा वदंत्यग्निं यमं
मातरिश्वानमाहुरित्या द्यागम दार्ढ्य भूतत्वाच्चैनेउपेक्ष्या एवेति दिक् निपुणतरमुपपादितमेतदादि पर्वण्युपोद्घाते २ विभुः विविधरूपेण हरिहर दुर्गा गणेश शार्काग्नि वाय्वादिरू-
पेण भक्तानामनुग्रहाय भवतीति विभुः ३ सुतीक्ष्णाः अनेक ब्रह्मांड चर्वण क्षमा दशना यस्य स सुतीक्ष्ण दशनः ४ महाकायः ५ महानन इति तदनुगुणे शरीरमु-
खे अनुवर्णिते ६ ५४ विष्वक् विष्वक् सर्वतः अंचंति पलायंते यस्य प्रयाणोद्योगे दैत्यानां सेना इति विष्वक्सेनः सर्वतः पूज्यते सेना यस्येति वा अंचु गति पूजनयोरिति धातुः ७ हरिः
गजेंद्र मोक्षणे आपदं हरतीति हरिः सर्व संहर्ता वा ८ यज्ञः वृष्टि बीज भूतः तथा च श्रुतिः अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति ९ संयु-
गे संग्रामे आपीड इव आपीडो ध्वजभूतं वाहनं वृषरूपं यस्य वृषध्वज एव वाहन सर्पा त्यर्थः १० तीक्ष्णतापोऽग्निः तदात्मा ११ हरयः अतिवेगवाहिनः अश्वा यस्य स हर्यश्वः सूर्यस्तदात्मा
सहायः नीचस्य सख्या द्वा सुपर्णा सयुजा सखाय इति मंत्र वर्णात् १३ कर्मणां दर्शादीनां कालं यथोक्तं वेत्तीति कर्मकालवित् १४ ५५ ६७. १२

ष्णुनाप्रसादितश्चकला भाथ मितिविष्णुप्रसादित १५ यज्ञःविष्णुरूपी यज्ञोवैविष्णुरितिश्रुतेः १६ समुद्रः १७ वडवामुखः वन्हिविशेषोयः सामुद्रं जलं नित्यं शोषयति १८ हु-
ताशनसहायः वायुः १९ प्रशांतात्मा निस्तरंगसागरस्वरूपः २० हुताशनोऽग्निः २१ ५६ सएवउग्रतेजाः दुःसहस्पर्शः २२ महातेजाः विश्वतः प्रकाशः २३ जन्ये-
संग्रामेसाधुर्जन्यः २४ यतो विजयकालवित् तेनभूरेपिकालज्ञानाभावे पराजितोभवतीति गम्यते २५ ज्योतिषांग्रहनक्षत्राणामयनं गमनं वर्ण्यते तदाख्यं
ज्योतिषामयनं कालवित्कालरूपश्चेतिनामद्वयार्थः २६ सिद्धिर्जपरूपा २७ सर्वं कालादिकं विग्रहोदेहोयस्यसर्वविग्रहः सांधीति पाठे सधिविग्रहयानासनादि
रूपः २८ ५७ शिखी शिखावान्गृहस्थः २९ मुंडीतद्रहितः संन्यासी एतेननैष्ठिकब्रम्हचारिणोपिग्रहणंदंडीतिपाठेपिपालाशंवेणवंचदंडं धारयतस्तावेव ३०
जटीजटावान्वानप्रस्थः ३१ ज्वालीज्वालावान् अर्चिरादिमार्गः शिखिप्रभृतिभिःप्राप्यः ३२ मूर्त्तोशरीरेजायते आविर्भवतीतिमूर्तिजः ३३ मूर्द्धगः मूर्द्धनि
सहस्रारेवागच्छतीतिमूर्द्धगः ३४ बलीबलवान्बलीतिपाठे बलिमान्रक्षः ३५ वेणुपणवतालाख्यावाद्यविशेषास्तद्वान् वेणवी ३६ पणवी ३७ तालीं ३८
खलंधान्यस्थानंतद्वान् ३९ कालकटंकटः कालस्यकटोवंचकः आवरणं यामायातामपिकटन्यावृणोतीतिकालकटंकटः कटेवर्षावरणयोरितिधातुः शालेति

विष्णुप्रसादितोयज्ञःसमुद्रोवडवामुखः हुताशनसहायश्च प्रशांतात्माहुताशनः ५६ उग्रतेजामहातेजाजन्योविजयकालवित् ज्यो-
तिषामयनंसिद्धिःसर्वविग्रह एवच ५७ शिखीमुंडीजटीज्वालीमूर्तिजोमूर्द्धगोबली वेणवीपणवीतालीखलीकालकटंकटः ५८ नक्षत्र-
विग्रहमतिर्गुणबुद्धिर्लयोगमः प्रजापतिर्विश्वबाहुर्विभागःसर्वगोमुखः ५९ विमोचनःसुसरणोहिरण्यकवचोद्भवः मेंढ्रजोब-
लचारीचमहीचारीस्रुतस्तथा ६०

पत्ये वृक्षाणांभावरको वायुस्तस्याप्यावरकोव्योमरूपी ४० ५८ नक्षत्रविग्रहं ग्रहताराादिशरीरंकान्त्यकंत
दनुसारिणी मतिर्यस्यसदवज्ञो वा पाठांतरे गमयतिचालयतिवानक्षत्रविग्रहगमः मतिर्वा ४१ गुणेषुगुणकार्येषुविषयेषुबुद्धिर्यस्य जीवरूपीत्यर्थः ४२ लीयं
तेस्मिन्सर्वेमिति लयईश्वरः ४३ अगमः अचंचलः कूटस्थश्चिन्मात्रःयम इतिपाठेपिनियोयमयिताः यस्मात्तत्तुल्यःसएव ४४ प्रजापतिःविराट् ४५ अतएवविश्वबाहुः
विश्वेषांबाहवएवबाहवोयस्यासतथा ४६ विभागः विभज्यते पृथक्क्रियतइतिव्यष्टिकार्यरूपः ४७ सर्वगः समष्टिकार्यरूपः ४८ अतएवसर्वगः अमुखः भोगसाध
नहीनःअभोक्तेत्यावत् सर्वतोमुखइतिपाठेलेकंनाम ४९ ५९ विमोचनःसंसारमोचकः ५० सुसरणः सुप्रापः सुशरणइतिपाठेशोभनंशरणंरक्षितृत्वंयस्यअपुनरा
वृत्तिगृहमित्यर्थः ५१ हिरण्यकवचः हरतीतिहिरण्यंमायातद्विकारभूतंकवचमिवकवचं आवरकंशरीरं हिरण्मयेनपात्रेणसत्यस्यापिहितंमुखमितिश्रुतेः तत्रउद्भ
व आविर्भावोयस्यसहिरण्यकवचोद्भवः ५२ मेंढ्रजः मेंढ्रेलिंगेआविर्भवतीतिमेंढ्रजः ५३ बलचारीभवनेचरः शबरः देवावैबलेगाः पर्यपश्यन्नितिब्राम्हणात्बलश
ब्दस्यबनवाचित्वं ५४ महीकुत्स्नाचरतीतिमहीचारी ५५ स्रुतः सर्वत्रगतः प्रामः कर्मपिच्छः ५६ ६० श्रीरामचंद्रार्पणमस्तु ६६ ६६ ६६ ६६

सर्वतूर्यनिनादःस्पष्टं ५७ सर्वतोद्यपरिग्रहः अतोद्याप्रतोदनार्हाःजीवपशवस्तएवसर्वेपरिग्रहःकुटुंबंयस्यपशुपतिरित्यर्थः ५८ व्यालरूपःशेषा
त्मा ५९ गुहावासीयोगी जैगीषव्यादिः ६० गुहः कार्त्तिकेयः ६१ मालीवनमालाधारी ६२ तरंगवित् तरंगतुल्यानि विषयसुखानि विंदति लभतेइतितत्
थातरंगवित् ६३ ६१ त्रिदशाः तिस्रोदशाःजन्मास्थितिर्नाशाः प्राणिना यस्मादिति ६४ त्रिकालजातं वस्तु धारयतीति त्रिकालधृक्‌ यथोक्तं अनागतमतीतंच भविष्य
तुस्थूलमण्वपि तथादूरमदूरंच निमेषः कल्पइत्यपि चिदात्मनिस्थितान्येव पश्यमायाविजृंभितमिति ६५ कर्माणिसंचितक्रियमाणानिबंधाख्या विद्याकामात्म
काः तेभ्यःमोचयतीतिकर्मसर्वबंधविमोचनः ६६ बंधनस्त्वसुरेंद्राणांवामनरूपेण बलेर्बंधकर्त्ता बहुवचनंकल्पभेदाभिप्रायं ६७ युधिशत्रुविनाशनःस्पष्टार्थं ६८
६९ सांख्यप्रसादः आत्मानात्मविवेकः सांख्यंतेनैवप्रसीदतिज्ञानैकलभ्यइत्यर्थः अथवासांख्यज्ञानप्रदोदत्तात्रेयइत्यर्थः ६९ दुर्वासास्तस्यैवसोदर्योरुद्रांशः
७० सर्वसाधुनिषेवितःइतिब्राह्मणानांराजासोमउक्तः ७१ प्रस्कंदनःब्रह्मादीन्निमपिच्यावयिता मन्येत्वाच्यवनमच्युतानांमितिमंत्रवर्णः ७२ विभागज्ञः प्राणिनां
यथोचितंतत्तत्कर्मफलानांविभाजकः ७३ अतएवअतुल्यः नत्वत्समोस्त्यभ्यधिकः कुतोन्यइतिगीतावचनात् ७४ यज्ञविभागवित्‌यज्ञियानांहविषांविभागाभिज्ञः
७५ ६३

सर्वतूर्यनिनादश्चसर्वतोद्यपरिग्रहः व्यालरूपोगुहावासीगुहोमालीतरंगवित् ६१ त्रिदशस्त्रिकालधृक्कर्मसर्वबंधविमोचनः बंधन-
स्त्वसुरेंद्राणांयुधिशत्रुविनाशनः ६२ सांख्यप्रसादोदुर्वासाःसर्वसाधुनिषेवितः प्रस्कंदनोविभागज्ञोअतुल्योयज्ञभागवित् ६३ सर्व-
वासःसर्वचारीदुर्वासावासवोमरः हैमोहेमकरोयज्ञःसर्वधारीधरोत्तमः ६४ लोहिताक्षोमहाक्षश्च विजयाक्षोविशारदः संग्रहोनि-
ग्रहःकर्त्तासर्पचीरनिवासनः ६५ मुख्योमुख्यश्चदेहश्चकाहलिःसर्वकामदः सर्वकालप्रसादश्चसुबलोबलरूपधृक् ६६ ७

सर्वत्रवासोवसतिस्थानमस्यसर्ववासः ७६ सर्वचारी ७७ दुर्वासाः दुस्थंआर्द्रगजकृत्तिरूपं वासोयस्यदुर्लभंवावासोय
स्यअनंतपारत्वादितिदुर्वासाः ७८ वासवः ७९ अमरः ८० हैमोहिमस्यायंसमूहोहैमोहिमालयरूपी ८१ हेमकरोजांबूनदस्यसुवर्णस्यकर्त्ताजंबूद्वीपविनेन्द्र भूतोजंबूवृक्षः
तस्यहिफलंप्रस्कन्नंसुवर्णलभजतीसुपाख्यायतेपुराणेषु ८२ अयज्ञः निष्कर्मा ८३ अथवसर्वधारीसकलकर्मफलधर्त्ता ८३ धराणांदिग्गजशेषकूर्मादीना-
मप्युत्तमः अनन्याधारःसन्नेतैःसर्वैःसहितस्यब्रह्मांडस्यधर्त्ता ८४ ६४ लोहिताक्षःरक्तनेत्रः ८५ महान्तिविश्वव्यापकानि अक्षराणि इंद्रियाणि यस्यसमहाक्षः ८६
विजयावहःअक्षोपलक्षितोरथोयस्यसविजयाक्षः ८७ विशारदः पण्डितः ८८ संग्रहः संगृण्हातिबाणादीनदासान्स्वीकरोतीतिसंग्रहः ८९ निग्रहः निगृण्हाति इंद्रा
दीनुत्सिक्तान् दंडयतीतिनिग्रहः ९० अंतएवकर्त्ता ९१ सर्पाएवचीरस्यवस्त्रस्य निवासनं विष्टंभकंयस्य ससर्पचीरनिवासनः वस्त्रस्तंभेऽस्यरूपं ९२ ६५
मुख्यःपरमः ९३ अमुख्यःअवमः देदेवानामित्यर्थः अग्निर्वैदेवानामवमोविष्णुःपरमस्तदंतरेणसर्वाअन्यादेवताइतिब्राह्मणात् सर्वदेवतामयइत्यर्थः ९४ देहःउपचि
तः अत्यंतपुष्टइतियावत् ९५ काहलावाद्यविशेषस्तद्वान्काहलिः अर्शआदित्वप्रत्ययः देहाहरिरित्यपिपठंति ९६ सर्वकामप्रदः ९७ सर्वकालप्रसादः ९८ सुबलः शोभनंपरपीडा
पहारिबलंसामर्थ्यंयस्यदयानिधिरित्यर्थः ९९ बलोबलरामस्तद्रूपधारीबलरूपधृक् बलंचरूपंचतयोर्धर्त्ता ३०० ६६ श्रीकृष्णार्पणमस्तु ७ ७ ७ ७

सर्वकामवरः सर्वेषां काम्यमानानां वरः श्रेष्ठः मोक्ष इत्यर्थः १ सर्वदः स्पष्टं २ सर्वतोमुखः इति सर्वतः पाणिपादत्वादेरुपलक्षणं ३ अकाशनिर्विरूपश्च आकाशादिर्यनिर्गच्छंति विविधानि रूपाणि यस्मादिति स तथा अनेन वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यंत एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति श्रुतेरर्थो दर्शितः स च यथा आकाशतादात्म्यं प्राप्ताः वाय्वादयो शरीरा अविभाव्यमानस्वरूपास्तेति प्रारूढाः प्रभेतन. पृथक्रूपस्वेन रूपेणोपसंपन्ना भूत्वा निर्वाणदीपवत् परंज्योतिर्गत्वा नाभिनिष्पन्ना भवंति देहतादात्म्यापन्नः संप्रसादाख्यो जीवो देहात्पृथगविभाव्यमानस्वरूपोऽपि ध्यानकाले . देहांतरवद्देहादुत्थाय स्वेनापहतपाप्मादिगुणाष्टकेन रूपेणाभिनिष्पन्नस्तद्वदेव परंज्योतिर्निर्विशेषब्रह्माभिमुख्येन प्रत्यगभेदेन निष्पद्यत इति ३ देहगर्ते निपतितं तत्तादात्म्यं प्राप्तं शीलमस्येति निपाती ४ अत एवावशः देहसंबंधाद परिहार्यदुःखादिसंबंधः ५ खगः स्वे हार्दाकाशे गः शब्दनरूपेणेत्यर्थः हार्दाकाश एव तावदस्माकं दुर्गतस्तत्कृतरागमसंग सन्निपत्य अवशश्च भवस्य होमादहस्यमाहात्म्यमपारमिति भावः ६ ६७ रौद्ररूपो महाभैरवः ७ अंशुर्देवनाभेदः ८ आदित्यस्तत्सहचारी पार्शोपरनामा देवः तस्य अश्वत्थपर्णश्चाजायतेतामिति-

> सर्वकामवरश्चैव सर्वदः सर्वतोमुखः । आकाशनिर्विरूपश्च निपाती ह्यवशः खगः ॥ ६७ ॥ रौद्ररूपोंऽशुरादित्यो बहुरश्मिः सुवर्चसी । वसुवेगो महावेगो मनोवेगो निशाचरः ॥ ६८ ॥ सर्ववासी श्रियावासी उपदेशकरोऽकरः । मुनिरात्मनिरालोकः संभग्नश्च सहस्रदः ॥ ६९ ॥ पक्षी च पक्षरूपश्च अतिदीप्तो विशांपतिः । उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ॥ ७० ॥

ब्राह्मणात् ९ बहुरश्मिः सूर्य एव १० शोभनं वर्चस्तेजः सुवर्चः तद्वान् सुवर्चसी ११ वसुवेगः वासयति स्थापयत्यंते तत्सर्वमात्मनीति वसुः वायुः वायुर्वै क्षेपिष्ठा देवतेति श्रुतेः तस्येव वेग इव वेगो यस्य स तथा १२ महावेगस्ततोऽप्यधिकवेगः १३ मनोवेगः मनसोऽप्यधिकवेगः मनसो जवीय इति मंत्रवर्णात् १४ निशाचरः निशेव निशा अविद्या तस्यां चरति विषयान् भुंक्ते स तथा १५ ६८ सर्वेषु शरीरेषु वसतीति सर्ववासी १६ श्रिया सह वसतीति श्रियावासी अलक्ष्मीनाम श्रीः च सा मानियतं विमर्शाहे श्रीरग्मृतामतापितिश्चत्युक्तविद्यायाः १७ अत एव उपदेशकरः १८ अकरः उपदेशमपि तूष्णीं भावेनास्थानं यथोक्तं चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशया इति बाष्कलिनाच बाध्वः पृष्टः पुनस्तूष्णीं भूत एवास्थितात्तृतीये प्रश्ने प्राह ब्रूमः खलु त्वं तु न विजानास्युपशांतोऽयमात्मेति १९ अकरत्वादेव मुनिर्मौनवान् २० आत्मनि जीवे निश्चितं देहादुपर्येव निर्गत्य आलोचयतीत्यात्मनिरालोकः २१ संभग्नः सम्यक्सेवितः भजसेवायामित्यस्य रूपं भग्नः २२ अत एव सहस्रदः अनंतस्य धनादेर्दाता २३ ६९ पक्षी गरुत्मान् २४ पक्षरूपः मित्ररूपेण सहायः २५ अतिदीप्तः कोटिसूर्यप्रतीकाशः शंभुर्तेजोऽभिभावकः २६ अत एव सर्वासां विशां प्रजानां पतिः सार्वभौमः २७ उन्मादयतीत्युन्मादः मोहकः २८ यतः मदनः अनंगः २९ कामः काम्यमानः स्त्र्यादिविषयरूपः ३० अश्वत्थः संसारवृक्षः कामबंधनात्मकत्वात् ३१ अर्थकरः धनादिप्रदः ३२ यशः कीर्तिप्रद

वामदेवः वामानांकर्मफलानांदेवः देवोराजाविभाजकः ३४ वामः कर्मफलरूपः विषयसंपर्कजानंदमात्रस्वरूपइत्यर्थः ३५ प्राक्सर्वेषामाद्यः ३६ दक्षिणश्चत्रैलोक्याक्रमण
समर्थः ३७ वामनः बलिबंधनकर्ता ३८ सिद्धयोगीसनत्कुमारादिः ३९ महर्षिर्वसिष्ठादिः ४० सिद्धार्थः ऋषभदत्तात्रेयादिः ४१ सिद्धश्चासौसाधकश्च
ज्ञानोत्तरंसंन्यासमभीप्सन् याज्ञवल्क्यादिर्विविदिषासंन्यासी ४२ ७१ भिक्षुर्लिंगधारीहंसः ४३ भिक्षुरूपः अलिंगः परमहंसः ४४ अनणुर्विपणोनिर्व्यवहा
रः दंडादिरहितः ४५ मृदुः सर्वभूताभयदाता ४६ अव्ययः निर्विकारः मानापमानादिप्राप्तावपिहर्षविषादशून्यः ४७ महासेनः कार्तिकेयोदेवसेनापतिः ४८
विशाखस्ततएवइंद्रेणवज्रप्रहारेकृतेजातस्तत्सहायः ४९ षष्टिभागः षष्टिस्तत्त्वानियस्यभागोभोज्यं अतिथिभागइतिवत् सषष्टिभागः तानिचजागरितस्थानइत्या
दिनामांडूक्यादौप्रसिद्धानि यथाजाग्रदवस्था बहिर्मुखेप्रज्ञानं सप्तशब्दादयः पंचमंतव्यबोद्धव्याभ्यांसहिताः स्वसंकल्पोत्थाविषयाः एकोनविंशतिर्भोगद्वारा
णिदशेंद्रियाणिपंचप्राणामनोबुद्ध्यहंकारचित्तानिचेतिस्थूलंभोग्यंशब्दाद्याश्रयभूतमितिएकोनत्रिंशत् तथास्वप्नावस्थाअंतर्मुखंप्रज्ञानंवासनामयाश्चइतरेसर्वे
सूक्ष्मभोग्यांताएकोनत्रिंशदेव तथासुषुप्तस्थानंचेतश्चसूक्ष्मतरंमुखंइतिषष्टिःभोग्यवर्गः यस्तुभोक्तासाक्षी आनंदरूपोस्यामवस्थायांमन्यगानंदसूक्ष्माभिश्चेतोवृत्तिभि-

वामदेवश्चवामश्चप्राग्दक्षिणश्चवामनः सिद्धयोगीमहर्षिश्चसिद्धार्थःसिद्धसाधकः ७१ भिक्षुश्चभिक्षुरूपश्चविपणोमृदुरव्ययः
महासेनोविशाखश्चषष्टिभागोगवांपतिः ७२ वज्रहस्तश्चविष्कंभीचमूस्तंभनएवच वृत्तावृत्तकरस्तालोमधुर्मधुकलोचनः ७३
वाचस्पत्योवाजसनोनित्यमाश्रमपूजितः ब्रह्मचारीलोकचारीसर्वचारीविचारवित् ७४

र्भुंक्तेइतिषष्टिभागः ५० गवामिंद्रियाणांपतिश्चालकः ५१ ७२ वज्रहस्तःपर्वतभेत्ताशक्रः ५२ निष्कंभोविस्तारस्तद्वान्विष्कंभी ५३ चमूस्तंभनोदैत्यसेना
स्तंभनकृत् ५४ वृत्तंपुष्परथेन मंडलानां करणं आवृत्तंपरसेनांभित्त्वापुनरस्तेनआगमनंतयोःकरः कर्तावृत्तावृत्तकरः ऋतावृत्तेतिपाठेनिष्कपटभावस्तत्कर्ता
५५ तालः संसारसिंधोस्तलंआधारंस्थानंवेत्तीतितालः शब्दब्रह्मवित् तालंसंस्तंभयिता ५६ मधुर्वसंतः ५७ मधुकोयष्टिकाख्यः पक्षीतद्वल्लोच
नेयस्यसमधुकलोचनः मध्वेवमधुकं क्षौद्रंतद्वत्पिंगनेत्रइतिवा ५८ ७३ वाचस्पतिं अनुदेवपुरोहितंअनुजातः वाचस्पत्यःपुरोहितकर्मकर्ता बृहस्प
तिर्हिवैदेवानांपुरोहितस्तमन्वन्येमनुष्यराज्ञांपुरोहिताइति ब्रह्मणोबृहस्पतिंयस्कभृतंबिभर्तीतिमंत्रस्थ बृहस्पतिपदस्यव्याख्यानात् ५९ वाजसनः
शाखाविशेषप्रवर्तकोध्वर्युकर्मकर्ता ६० नित्यमाश्रमपूजितःस्पष्टं ६१ ब्रह्मचारीब्रह्मणिचरतीतिब्रह्मनिष्ठः ६२ लोकेषुब्राह्मणादिगृहेषुचरतिभक्षयती
तिलोकचारीभिक्षुः ६३ सर्वचारीसर्वगः यएवंवेदाहंब्रह्मास्मीतिसइदंसर्वंभवतीतिश्रुतेरात्मज्ञानात्सार्वात्म्यंप्राप्तइत्यर्थः ६४ विचारवित् वि
परीतंचरणंअंतर्मुखत्वतयागमनंतद्वेत्ता ६५ ७४ ७ ७ ७ ७ ७ ७

ईष्टे इतीशानः नियंतांतर्यामीत्यर्थः लटः शानच् ६६ ईश्वरः अश्नोति व्याप्नोतीति अश्नोतेराशुकर्मणिवरट् इत्युणादिसूत्रेण अश्रूङ्व्याप्ताविन्यस्मात् वरट् चात्पूर्वसूत्रात् किशरीष्वोपधायाइत्वंच ६७. कालः कलयति सर्वेषां पुण्यपापादिकं तत्तत्फलप्रदानार्थं संख्यातीतिकालः चित्रगुप्तात्मा ६८ निशाचारी ब्राह्म्यां निशायां महाप्रलयरूपायामपि चरति प्रत्यगानंदं अनुभवतीतिनिशाचारी ६९ पातिरक्षतीतिपिनाकः धनुर्विशेषः तद्वान्पिनाकी पिनाकादयश्चे तिपातेराकप्रत्ययो नुगागमश्चं निपात्यन्ते ७० निमित्तं लक्ष्यं देवादिः तत्रस्थस्तदंतर्यामी ७१ निमित्तं तद्रूपश्चविश्वरूपत्वात् ७२ नंदिः समृद्धिःएषास्य परमासंपदितिश्रुतेः ज्ञानसंपद्रूपः ७३ नंदिकरस्संपत्करः ७४ हरिर्हनुमान् रामरूपस्यविष्णोःसहायः ७५ ७५ नंदी शिवस्यगणः वाहनंवातस्येश्वरः ७६ नंदीगणरूपीचं ७७ नंदन आनंदयिता ७८ नंदिवर्धनः दत्ताया अपिसंपदश्छेदकः ७९ भगानिइंद्रादीनामैश्वर्याणितान्यपिहरतीतिभगहारी ८० नि हंतामृत्युरूपेण ८१ कालः कलानंचतुःषष्टिसंमिताानां निवासः कालः ८२ अतएवब्रह्मा अतिशयेनमहान् ८३ पितामहः पितुर्विष्णोरपिपिता इंदिरालोक मातरमिति लक्ष्म्याःलोकमातृत्वस्य प्रसिद्धत्वेन तद्भर्तुर्विष्णोर्लोकपितृत्वात् ८४ ७६ . चतुर्मुखःविधाता ८५ महत्सर्वदेवाकरादिपूज्यं लिं

ईशान ईश्वरः कालो निशाचारी पिनाकधृक् निमित्तस्थो निमित्तंच नंदिर्नंदिकरो हरिः ७५ नंदीश्वरश्चनंदी च नंदनो नंदिवर्द्धनः भगहारी निहंता च कालो ब्रह्मा पितामहः ७६ चतुर्मुखो महालिंगश्चारुलिंगस्तथैवच लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगाव हः ७७ बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः इतिहासः सकल्पश्च गौतमोथ निशाकरः ७८ ७ ७ ७

गमस्य समन्नलिंगः ८६ चारुलिंगः रमणीयवेषः ८७ लिंगाध्यक्षः लीनमावृत्तमर्थं गमयंतीतिलिंगानिप्रत्यक्षादीनिप्रमाणानि तेषां अध्यक्षः प्रवृत्तिनिवृ त्तिनियामकः ८८ सुराध्यक्षः चक्षुरादिप्रमाणानां अधिष्ठातारः सुरास्तेषामप्यध्यक्षः ८९ योगाध्यक्षः तेषामेवेंद्रियदेवतानां द्वादशकाशैककरणे योगः अत्रह्ये ते सर्वे एकं भवंतीतिश्रुतेः तस्याप्यध्यक्षः एतत्रूपस्यैवयोगः प्राप्यइत्यर्थः ९० युगावहः युगानि पुण्यपापतारतम्यवंति कृतत्रेताद्वापरकलिसंज्ञानि आवह तिनिर्वर्तयतीति वा ९१ ७७ बीजं धर्माधर्मौ तयोरध्यक्षः फलदाता बीजाध्यक्षः ९२ बीजकर्तास्पष्टं ९३ अध्यात्मानुगतः आ त्मानमधिकृत्य प्रवृत्तं शास्त्रं अनुसरन् साधकइत्यर्थः ९४ बलः बलानिधृत्यादीनि वर्त्तंते स्मिन्निति बलः मन्वर्थीयाश अद्यजंत ९५. इतिहासो भारता दिः ९६ संकल्पः यज्ञकल्पकर्मप्रयोगविधिविचारेण सहितः मीमांसान्यायसंघः गौतमस्तर्कशास्त्रप्रणेता ९८ निशाकरश्चंद्रः श्वाद्व्या करणप्रणेता ९९. ७८ ७ ७ ७ ७ ७ ७ ७

दंभः दम्भातिशत्रून्मदमयतीतितथा ४०० इतिचतुर्थंशतं अदंभः नास्तिदंभोदमकोयस्य १ वेदंभः दंभोधर्मध्वजित्वंतद्विरहितावेदंभाः तेषामयंस्वभूतो-
वैदंभः २ वश्यीभक्तपराधीनः ३ वशकरः अन्यान्वशंकर्तुंसमर्थः वंश्योवंशकरइतिपाठेस्पष्टोर्थः ४ कलिः अन्योन्यंदेवासुरादीनांवैरकर्ता ५ लोक-
कर्ताभौतिकचतुर्दशभुवननिर्मिता ६ पशुपतिः ब्रह्मादिस्तंबपर्यंतानांजीवपशूनांपतिः पालकः ७ महाकर्ता पंचभूतानामपिस्रष्टा अनोषधः
व्रीह्याद्यन्नजातीयरहितः अभोक्तेतियावत् ९ ७९ अक्षरंअव्ययं १० परमंब्रह्मअन्नाद्यवरब्रह्मापेक्षयापरमंउत्कृष्टंआनंदमात्रस्वरूपं ११
बलवत्बलाभिमानीदेवतारूपं १२ अतएवशक्नोतीतिशक्रः शतक्रतुशब्दावयवयोरंत्यवर्णयोर्लोपेनवाशक्रः १३ नीतिर्दंड्येषुदंडप्रणयना
दिः १४ अनीतिस्तद्विपर्ययः १५ शुद्धात्माविमलचित्तः १६ शुद्धःदोषास्पर्शी १७ मान्यःमानार्हः १८ गतागतःयातायातवान्संसारः १९ ८०
बहुप्रसादः २० सुस्वप्नः स्वप्नावस्थाभिमानीतैजसोप्ययमेव २१ दर्पणः दर्पणंइवविश्वप्रतिबिंबदर्शनास्पदं २१ अमित्रजित् बाह्याभ्यंतर

दंभोह्यदंभोवैदंभोवश्योवशकरःकलिः लोककर्तापशुपतिर्महाकर्ताह्यनौषधः ७९ अक्षरंपरमंब्रह्मबलवच्छक्रएवच नीति-
र्ह्यनीतिःशुद्धात्माशुद्धोमान्योगतागतः ८० बहुप्रसादःसुस्वप्नोदर्पणोथत्वमित्रजित् वेदकारोमंत्रकारोविद्वान्समरमर्दनः
८१ महामेघनिवासीचमहाघोरोवशीकरः अग्निज्वालोमहाज्वालोअतिधूम्रोहुतोहविः ८२ वृषणःशंकरोनित्यंवर्च-
स्वीधूमकेतनः नीलस्तथांगलुब्धश्चशोभनोनिरवग्रहः ८३ स्वस्तिदःस्वस्तिभावश्चभागीभागकरोलघुः उत्संगश्चमहांगश्चमहागर्भ-
परायणः ८४

शत्रुजित् २३ वेदकारोनिश्वसितमेतद्यदृग्वेदइत्यादिश्रुतेः वेदानांकर्ता २४ मंत्रावेदादन्येतांत्रिकपौराणिकादेशभाषामयाः तेषां-
कर्ता मंत्रकर्ता २५ विद्वान् २६ समरमर्दनःसमरेशत्रूणांमर्दनः २७ ८१ महांतोमेघाः प्रलयकालिकास्तेषुतदधिष्ठातृदेवतात्वेनवसतीतिमहामेघनिवासी
२८ महाघोरः प्रलयकर्तृत्वात् २९ वशेसर्वमस्यास्तीतिवशी ३० कृणोतिहिनस्तिजगदितिकरःसंहारकर्ता ३१ अग्नेरिवतेजोज्वालायस्यसोऽग्निज्वालः ३२ ततोपि
महाज्वालः ३३ अतिधूम्रः कालाग्निरूपेणसर्वदाहकालेऽत्यंतधूम्रमयः ३४ हुतः आर्द्रकर्मणिक्तः होमनप्रीतः ३५ हविःपयआदिरूपः ३६ ८२ वृषणः वर्षतिक-
र्मफलानीतिवृषणोधर्मःगुणाभावआर्षःयद्वावृषोधर्मोस्त्यस्मिन्नितिवृषणःपामादित्वान्नप्रत्ययः ३७ शंकरःसुखप्रदः ३८ नित्यंवर्चस्वी धूमकेतनः वन्हिरूपः ४० नीलःमर
कतवर्णः ४१ तथेतिततएवहेतोःअंगलुब्ध. अंगंस्वीयोवयवः लिंगमितियावत्तत्रलुब्धः नीलेऽनीलेवालिंगेनित्यंसन्निहितइत्यर्थः ४२ शोभनः कल्याणहेतुः ४३ निरवग्रहः
प्रतिबंधशून्योमनोरथवृष्टिकर्ता ४४ ८३ स्वस्तिदः ४५ स्वस्तिभावःसुतरांअस्तिभावःसत्तास्येतिस्वस्तिभावः ४६ भागीयज्ञेभागवान् ४७ भागकरः यज्ञियहविषांविभाज-
कः ४८ लघुःशीघ्रः ४९ उत्संगःप्रसंगः ५० महांगःमहालिंगः ५१ महान्गर्भउत्पादनीयलेपरायणंअवश्यंगम्यंयस्यसमहागर्भपरायणःप्रजननात्मकः कंदर्पइत्यर्थः ५२ ८४

कृष्णवर्णो विष्णुरूपेण ५३ सुवर्णः श्वेतवर्ण. सांबरूपेण ५४ सर्वदेहिनामिंद्रियं सर्वेंद्रियरूपः ५५ महापादः ५६ महाहस्तः ५७ महाकायः ५८ महायशाः ५९ ८५ महामूर्धा ६० महामात्रः महाप्रमाणः ६१ महानेत्रः ६२ निशालयः निशेवनिशा अविद्यातस्यालयोयत्र ६३ महांतकः मृत्युमृत्युः ६४ महाकर्णः ६५ महोष्ठः ६६ महाहनुः ६७ ८६ महानासः ६८ महाकंबुर्महाकंठः ६९ महाग्रीवः ७० श्मशानभाक् श्मनाशरीराणां शयनं तनूकरणं भजतीति श्मशानभाक् देहबंधछेतेत्यावत् ७१ महावक्षाः रक्षाइति पाठे महतीरक्षारक्षणं यस्यसतथा ७२ महोरस्कः ७३ अंतरात्मा ७४ मृगालयः अंकाधिरोपितमृगइत्यर्थः ७५ ८७ लंबते रिमन्ननेकानितरोफलानीव ब्रह्मांडानीतिलंबनः ७६ लंबितोष्ठः प्रलयकाले विश्वंग्रसितुं लंबितो दीर्घीकृतो ओष्ठोयेनसः ७७ महतीब्रम्हादिभिरप्यजय्यामायायस्यसमहामायः ७८ पयोनिधिः क्षीरसमुद्रः ७९ महादंतः ८० महादंष्ट्रः ८१ महाजिव्हः ८२ महामुखः ८३ ८८ महानखः नृसिंहः ८४ महारोमा वराहः ८५ महाकोशः महोदरः ८६ महाजटः ८७

कृष्णवर्णः सुवर्णश्च इंद्रियं सर्वदेहिनां महापादो महाहस्तो महाकायो महायशाः ८५ महामूर्धा महामात्रो महानेत्रो निशालयः महांतको महाकर्णो महोष्ठश्च महाहनुः ८६ महानासो महाकंबुर्महाग्रीवः श्मशानभाक् महावक्षा महोरस्को ह्यंतरात्मा मृगालयः ८७ लंबनो लंबितोष्ठश्च महामायः पयोनिधिः महादंतो महादंष्ट्रो महाजिव्हो महामुखः ८८ महानखो महारोमा महाकेशो महाजटः प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ८९ स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ९० गंडली मेरुधामा च देवाधिपतिरेव च अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ९१

प्रसन्नः ८८ प्रसादः प्रसन्नता ८९ प्रत्ययोनुभवः ९० गिरिसाधनः पर्वतएवसाधनं रणेजयदं तुर्यस्य गिरि धन्वेत्यर्थः ९१ ८९ स्निह्यतीति स्नेहनः पितृवत्प्रजासु स्नेहवान् ९२ अस्नेहनस्तद्विपरितः ९३ अजितः ९४ महामुनिः अत्यंतं मौनवान् मननशीलोवा ९५ वृक्षाकारः संसारवृक्षएवाकारोयस्य ९६ वृक्षकेतुः संसारवृक्षएवकेतुर्ज्ञापकोयस्य नहिदेहेंद्रियाण्यनुपादाय ब्रम्ह जिज्ञासितुंशक्यं ९७ अनलो नास्तिअलंमूर्तिर्यस्य अज्ञानस्यसोनलः अग्निः ९८ वायुरेववाहनं देशाद्देशांतरं प्रविशतः साधनः सवायुवाहनः ९९ ९० गडइव गंडोभूमेरुच्चप्रदेशः क्षुद्रशैलास्तेषुलीयते गच्छंतीति गंडली गंडशब्दपूर्वात्लीगतावस्मात् क्विपुविभक्तिलोपः स्फापांफल्गुगिरिति पूर्वसवर्णो वा आर्षः १०० मेरुधामा १ देवाधिपतिः अथर्वशीर्षः ३ सामास्यः ४ ऋक्सहस्रामितक्षणः ५ ९१ छ छ छ

छ छ छ छ छ श्रीकृष्णार्पणमस्तु छ छ छ छ छ छ

यजुः पादभुजः ६ गुह्यः उपनिषद्देशः ७ प्रकाशः कर्मकांडः ८ जंगमः नृपश्वादिरूपः ९ अर्थोऽर्थनेयांक्ष्याअमोघोऽर्थोयत्रसः अमोघार्थः
१०. प्रसादः प्रसीदतामितिदयालुः ११ अभिगम्यः सुखप्राप्यः १२ सुदर्शनः मंगलावहंदर्शनंयस्य १३ ९२ उपकारः प्रीणनरूपः १४ प्रियः सुखदा
यी १५ सर्वः सरत्यभिमुखं अयातीतिसर्वः १६ कनकः स्वर्णादिप्रियवस्तुरूपः १७ कांचनच्छविः १८ नाभिः भुवनस्य मध्यदेशः अयंयज्ञोभुव
नस्यनाभिर्यज्ञरूपः अत्युर्ध्वगतिहेतुत्वा भात्राध ——— ज्ञस्यनाभित्वं १९ नंदिकरः यज्ञफलसमृद्धिकर्त्ता २० भावः क्रतुश्रद्धारूपः २१ पुष्करस्य
ब्रम्हांडस्यस्थपतिःस्वामी २२ स्थिरः स्थावरः पर्वतादिरूपः २३ . ९४ द्वादशः नृणांदशगर्भवासादयोदशास्तासांमृत्युर्दशमीस्वर्गएकादशी मो-
क्षोद्वादशीति द्वादशइतिसंसारापेक्षमोक्षउच्यते २४ त्रासनः आंतरालिकदशारूपेण भयजननः २५ आद्यः संसारात्प्राचीनः श्रुतः आद्यंतमध्यरू
पइनिनामत्रयार्थः २६ यज्ञः जीवेशयोः संगतिकरणरूपोयोगः २७ अतएवयज्ञसमाहितः तत्रस्थः तदेकलभ्यइत्यर्थः २८ नक्तमिवनक्तंअप्र
काशात्मामहामोहः २९ कलिस्तत्कार्यभूतः कामक्रोधलोभादिरूपः ३० कालस्तस्यापिकार्यं जन्ममरणप्रवाहः कालयतिसंचलयतीतियोगात् ३१

यजुःपादभुजोगुह्यःप्रकाशोजंगमस्तथा अमोघार्थःप्रसादश्च अभिगम्यःसुदर्शनः ९२ उपकारःप्रियःसर्वःकनकःकां
चनच्छविः नाभिर्नंदिकरोभावःपुष्करस्थपतिःस्थिरः ९३ द्वादशस्त्रासनश्चाद्योयज्ञोयज्ञसमाहितः नक्तंकलिश्च
कामश्चमकरःकालपूजितः ९४ सगणोगणकारश्च भूतवाहनसारथिः भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः ९५

मकरः मकराकारं शिशुमारचक्रं कालस्यज्ञापकं तत्स्वरूपः ३२ कालेनमृत्युना
पूजितः कालपूजितः ३३ ९४ सगणः प्रमथादियुक्तः ३४ गणकारः बाणादीन् भक्तान्स्वगणान्करोतीतिगणकारः ३५ भूतानांवाहनोयोगक्षेम
निर्वाहकोब्रम्हासारथिर्यस्य भूतवाहनसारथिः ३६ भस्मशयः भस्मभर्त्सनदीप्त्योरितिजोहोत्यादिकाद्धातोरन्येभ्योपिदृश्यतइति मनिन् बभस्ति-
भर्त्सयतिदोषान् भासयतिवा आत्मानमिति भस्म तथाचोक्तं वासिष्ठलिंगे भर्त्सनात्सर्वपापानांपशनानांचमहामुने भस्मेतिकीर्त्यतेरक्षारोगानांचापिभ
र्त्सनादिति बाह्यमोक्षेन किं भस्मधारणंमोक्षलक्षणं भस्मेनानित्ययुक्तस्यज्ञानमुत्पद्यतेऽचिरादिति श्रुतावप्यथर्वशिरसि अग्निरित्यादिना भस्मग
हीत्वामृज्यंगानि संस्पृशेद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षायेति भस्मनिशेते भस्मशयः तेनउद्धूलनादिकमपिकर्त्तव्यं यथाह वृद्धशातातपः स्तेयं
कृत्वागुरुदारांश्च गत्वामद्यंपीत्वाब्रम्हहत्यांचकृत्वा भस्मच्छन्नो भस्मशय्यांशयानोरुद्राध्यायी मुच्यतेसर्वपापैरिति ३७ भस्मगोप्ता भस्मनागोपायतिजगदिति
भस्मगोप्ता वक्ष्यतिचाग्रेवरक्षार्थंमंगलार्थंच गोपनार्थंच भामिनि लांछनार्थंच भक्तानां भस्मदत्तंमयापुरेति ३८ भस्मभूतः एतच्चमंकणकनाम्नि
मुनौकरात् च्युतंशाकरसंदृष्ट्वानृत्यतिसतितन्नृत्योपशमार्थं महादेवेनस्वमंगुलिंभित्वा तज्जंभस्मदर्शिनं तेनस्वस्य वपुः केवलंभस्ममयमितिज्ञाप्यते
३९ तरुः कल्पवृक्षादिः ४० गणः भृंगिरिटिनंदिकेश्वरादिस्तद्रूपः ४१ ९५ ६९

लोकाश्चतुर्दश भुवनानि तेषां पालो लोकपालः ४२ अलोकः लोकातीतः ४३ महात्मा पूर्णः ४४ सर्वपूजितः ४५ शंकुः शंकुः ४६ त्रिशंकुः त्रीणि कायवाङ्मनांसि शंकुनि यस्य ४७ अतएव संपन्नः कैवल्यंप्राप्तः ४८ शुचि आगंतुकमपिमलं नस्पृशति असंगइत्यर्थः ४९ भूतैः पूर्वाचार्यैर्निषेवितः भूतनिषेवितः ५० ९६ आश्रमेषुचतुर्षु धर्मरूपेण तिष्ठतीत्याश्रमस्थः ५१ क्रियावस्थः धर्मस्यैव पूर्वरूपं क्रियायागादिस्तदवस्थापन्नः ५२ विश्वकर्ममतिः देवशिल्पिनो यत्कौशलं तद्रूप इत्यर्थः ५३ वरः श्रियमइति वरो लक्ष्म्यादिरूपः ५४ विशालशाखः दीर्घबाहुः शाखापक्षांतरे बाहो इति मेदिनी ५५ ताम्रोष्ठः ५६ अंबुजालः जलसमूहः सागरइत्यर्थः जालंगवाक्षआनाये क्षारकेदंभवृंदयोरिति मेदिनी ५७ सुनिश्चलः पर्वतादिरूपः ५८ ९७ कपिलः ५९ कपिशः ६० शुक्ल इति त्रयोऽपि वर्णवाचिनस्तद्वान् ६१ आयुर्जीवनकालः ६२ परः प्राचीनः ६३ अपरोऽर्वाचीनः ६४ गंधर्वश्चित्ररथादिः ६५ अदितिर्देवमाताइयं वा अदितिरितिश्रुतेः पृथ्वी वा ६६ तार्क्ष्यः वैनतेयः ६७ सुविज्ञेयः सुखेन ज्ञातुं योग्यः ६८ सुशारदः शोभनवाक् ६९ ९८ छ छ छ छ छ

लोकपालस्तथालोको महात्मा सर्वपूजितः शंकुस्त्रिशंकुः संपन्नः शुचिर्भूतनिषेवितः ९६ आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः विशालशाखस्ताम्रोष्ठो ह्यंबुजालः सुनिश्चलः ९७ कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः गंधर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः ९८ परश्वधायुधो देव अनुकारी सुबांधवः तुंबवीणो महाक्रोध ऊर्ध्वरेता जलेशयः ९९ उग्रो वंशकरो वंशो वंशनादो ह्यनिंदितः सर्वांगरूपो मायावी सुहृदो ह्यनिलो नलः १०० बंधनो बंधकर्त्ता च सुबंधनविमोचनः सयज्ञारिः सकामारिर्महादंष्ट्रो महायुधः १०१

परश्वधायुधः ७० देवः विजिगीषुः ७१ अनुकारी भीष्मे हंतुं आयुधं प्रक्षेप्तुमनुकरोति वासोऽनुकारी ७२ शोभनश्चासौ बांधवश्च सुबांधवोऽर्जुनसखा ७३ तुंबवीणः तुंबी फलद्वययुक्ता वीणा यस्य सैव रुद्रवीणेति लोके प्रसिद्धा ७४ महाक्रोधः प्रलयकाले ७५ ऊर्ध्वरेता ऊर्ध्वं देवमनुष्येभ्य उपर्युपरि रेतः प्रजा ब्रह्मविष्ण्वादिरूपा यस्य सः ७६ जलेशयः विष्णुरूपी शेषपर्यंके जलशायी ७७ ९९ उग्रः उत्कर्षेण ग्रसतीत्युग्रः ७८ वंशकरः ७९ वंशश्च प्रसिद्धः ८० वंशनादः ८१ अनिंदितः ८२ सर्वांगरूपः सर्वेष्वंगेषु रूपं सौंदर्यमस्यास्तीति रूपं स्वभावे सौंदर्ये इति मेदिनी ८३ मायावी मायाविशिष्टः मायिनं तु महेश्वरमिति प्रसिद्धः ८४ सुहृदः अदंतत्वमार्षं प्रत्युपकारमनपेक्ष्य उपकर्त्ता ८५ अनिलः वायुः ८६ अनलोऽग्निः ८७ १०० बध्नात्यनेनेति बंधनं संसारपाशः ८८ बंधकर्त्ता संसारनिर्माता ८९ सुबंधनविमोचनः सुनरां बंधनस्य मायापाशस्य मोचनकर्त्ता ९० यज्ञारयो दैत्यास्तैः सदा पिवसतीति सयज्ञारिः ९१ कामारयो जितकामाः योगिनः तैश्च सहास्तीति सकामारिः ९२ महादंष्ट्रः ९३ महायुधः ९४ १०१ छ छ छ छ छ

बहुधानिंदितः दारुकावने अतिकमनीयरूपं धृत्वानग्नः सन् अयंपापिष्ठोस्मत्स्त्रीनांचित्तं मोहयितुमागतोस्तीति सर्वैर्ऋषिभिर्निंदितः १५ शृणाति हिनास्ति दारुकावनस्थान्मुनीन् मोहयतीतिशर्वः १६ शंकरस्तेषामपिकुशलं करे यस्य स्वाधीनं यस्येत्यर्थः १७ शंकानां समूहः शंकं तस्य रइवरः शंकरः सर्वसंशयदाहकः रोर्कत्कामानिले वन्हाविति विश्वलोचनः येर्मुनिभिर्दारुकावनस्थैर्निंदितवांश्च मोहितवान् तेषामेव कारुण्यात्कल्याणं सर्वसंशयोच्छेदंच तत्वज्ञानदानेन कृतवानिति नामचतुष्कतात्पर्यं १८ अधनः दिगंबरत्वात् १९ एवमप्यमराणांईशः अमरेशः ६०० महादेवो इंद्रादीनामपिपूज्यः यथोक्तं सांबपुराणे पूज्यते यः सुरैः सर्वैर्महांश्चैव प्रमाणतः महेतिधातुः पूजायांमहादेवस्ततः स्मृतइति १ विश्वदेवः विश्वं विष्णुर्वषट्कार इति वक्ष्यमाणत्वाद्विश्वं विष्णुः तस्यापिदेव आराध्यः २ स्मरारिहा ३ १०२ अहिर्बुध्न्यः अहिः सर्पः तस्य विशेषणं बुध्न्यः बुध्नं मूले साधुरिति ब्रम्हांडस्मूलं पातालं तत्र वर्त्तत इति यावत् शेषस्वरूप इत्यर्थः यथोक्तं विष्णुपुराणे संकर्षणात्मको रुद्रो निष्क्रम्यात्तिजगत्त्रयमिति पदद्वयात्मकमेकंनाम ४ अनिलाभः वायुर्यथा अप्रत्यक्षोपि स्पर्शेन ज्ञायते एवमयं विषयसंस्पर्शजन्यानुभवरूपः यथोक्तं परागर्थप्रमेयेषु याफलत्वेन संमता संवित्सैवकमेयोर्थो

बहुधानिंदितः शर्वः शंकरः शंकरोधनः अमरेशो महादेवो विश्वदेवः स्मरारिहा १०२ अहिर्बुध्न्योनिलाभश्च
चेकितानो हविस्तथा अजैकपाच्च कापाली त्रिशंकुरजितः शिवः १०३ धन्वंतरिर्धूमकेतुः स्कंदो वैश्रवणस्त-
था धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः १०४

वेदांतोक्तिप्रमाणतः ५ चेकितानः कितज्ञाने अदादिः अस्मात् यङ् लुकि शानच् अतिशयेन चिकेत्ति जानातीति चेकितानः युगपदशेषविशेषविज्ञानवानित्यर्थः ६ हविरिव हविस्तस्यैव भोक्तु भोग्यजातं हरिरितिपाठेपि तस्यैव हर्त्तव्यं वस्त्विति स एवार्थः हृत्र् औणादिकः सर्वधातुभ्य इति कर्मणि बाहुलकादिन् ७ अजैकपात् एकादशरुद्रेषु कश्चित् ८ कापालीकपालाभ्यं द्यु पृथिवीरूपाभ्यां निर्वृतं कापालं ब्रम्हांडं तदस्यास्तीति कापाली ब्रम्हांडाधीशः ९ शंकुः त्रयोगुणाः शंकवः कीलइव यस्य विष्टंभकाः सं त्रिशंकुः संसारी न तदस्ति पृथिव्या वादिविदेवेषु वापुनः सत्वंप्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैरिति गीतावचनात् सर्वजीवरूप इत्यर्थः १० अजितः तैरेव शंकुभिरवशीकृतः ११ अत एव शिवः शुद्धः निरूपाधिरित्यर्थः यथोक्त वायुसंहितायां विशुद्धिः शिवतास्यतइति १२ १०३ धन्वंतरिः महावैद्यः भिषक्तमंत्वाभिषजां शृणोमीति मंत्र प्रसिद्धः १३ धूमकेतु उत्पातविशेषः १४ स्कंदः १५ वैश्रवणः १६ धाता १७ शक्रः १८ विष्णुः १९ मित्रः २० त्वष्टा २१ ध्रुवः २२ धरः २३ १०४ ॐ ॐ ॐ ॐ

प्रभावः प्रभा वाख्योवसुः २४ सर्वगोवायुः सूत्रात्मा वायुर्नावैगौतमसूत्रेणायंचलोकः परश्चलोकः सर्वाणिचभूतानिसंदब्धानीतिश्रुतेः पदद्वयात्मकंएकनाम २५ अर्यमा २६ सविता २७ रविः २८ उषंगुर्नृपविशेषः मांधातृसाहचर्यात्तस्यदाउपदाहेः स्यात्दगुपधज्ञाप्रीकिरः कइतिकप्रत्ययेउपंदाद कंगावः किरआयस्ये त्युषंगुः विभक्त्यलोपआर्षः वेदाःप्रमाणमितिवल्लिंगवचनभेदेपिपदयोः सामानाधिकरण्यं धन्वंतर्यादयः शब्ददेवताविशेषवाचिनः शिवेसार्वात्म्योपपादनार्था एवेतिसर्वत्रज्ञेयं पुनरुक्तानामपितत्तद्यौगिकार्थभेदादपौनरुक्त्यं ज्ञेयंसन्यपिपौनरुक्त्येस्तुत्यर्थत्वान्नदोषः २९ विधाताविविधप्रकारेणपोषः ३० मांधाताअस्माच्छब्दार्थंजाघंधयतिपास्यतीतिमांधाताजीवस्यतृप्तिकरः ३१ भूतानांभावनंरज्वामुरगस्येवयस्मिन्निनिति भूतभावनः ३२ १०५ विभुःविविधरूपेणभवति अस्तीतिविभुःभवतेःसत्तार्थकत्वात् पूर्ववदुप्रत्ययः ३३ वर्णान्श्वेतपीतादीनविविधरूपेणभावयतीतिवर्णविभावी तस्मिन्शुक्लमुतनीलमाहुरित्यादिश्रुतेरेनदतसुरवप्रनांनाडीमार्गगतंप्रत्यक्षम् श्रुत्यंतरेचनीहारधूमार्कानिलानलानांखद्योतविद्युत्स्फटिकाशशीनां एतानिरूपाणिपुरःसराणि ब्रह्मण्यभिव्यक्तिकराणियोगइति ३४ सर्वकामगुणावहः तत्रैवअंतर्मुखत्वकाले सर्वान् कामान् काम्यमानान् विषयान् गुणांश्च शांत घोरमूढान योगिविघ्नकरान्सुखास्वादविक्षेपःलयापरनामधेयान् ध्यायिभ्य आवहतिसाकल्येनप्रापयतीतितथा ३५ पद्मनाभः पद्मविश्वस्यायतनंनाभौतत्रस्थेमणिपूरचक्रे अस्तीतिपद्मनाभ ना

प्रभावः सर्वगोवायुरर्यमासवितारविः उषंगुश्चविधाताचमांधाताभूतभावनः १०५ विभुर्वर्णविभावीचसर्वकामगुणावहः पद्मनाभोमहागर्भश्चंद्रवक्त्रोनिलोनलः १०६ बलवांश्चोपशांतश्चपुराणःपुण्यचञ्चुरी कुरुकर्ताकुरुवासीकुरुभूतोगुणौषधः १०७ सर्वाशयोदर्भचारीसर्वेषांप्राणिनांपतिः देवदेवःसुखासक्तःसदसत्सर्वरत्नवित् १०८

भ्यामुपरिष्टतिष्ठतिविश्वस्यायतनंमहदितिश्रुतेः ३६ महागर्भः महांतोब्रह्मादयोगर्भाउदरगतागतायस्यसतथा ३७ चंद्रवक्त्रः रम्यरूपः ३८ अनिलः ३९ अनिलश्चपूर्वंभूतरूपेणोक्तौतत्रतदभिमानिदेवतारूपावितिविशेषः ४० १०६ बलवान् ४१ उपशांतः ४२ पुराणःस्पष्टार्थंनामत्रयं ४३ पुण्यचंचुः पुण्येनजातःतेनवित्तश्चंचुपूचणपावितिचंचुप् ४४ ईलक्ष्मीरित्येकाक्षरंनाम ईविषादेऽनुकंपायांलक्ष्म्यांपुनरनव्ययमितिमेदिनी ४५ कुरुकर्ता अत्रनामैकदेशग्रहणेनंनामग्रहणंभीमासत्यभामेतिवत् कुरुपदेनंकुरुक्षेत्रमुच्यते तेनअविमुक्तंवैकुरुक्षेत्रमितिश्रुतेः सर्वलोकप्रसिद्धश्चतद्विविधंतयोः कर्मोपास्तिस्थानयोर्निर्माता ४६ कुरुवासीकुरुक्षेत्रहृयवासी ४७ कुरुभूतः कुरुक्षेत्रहृयात्मा ४८ गुणौषधः ऐश्वर्यज्ञानवैराग्यधर्मादीनामौषधवदुद्दीपक ४९ १०७ सर्वाशयः सर्वेआशेरतेस्मिन्निति अत्रत्येतेसर्वएकंभवतीतिश्रुतेः सर्वस्यसुषुप्तिस्थानंप्राज्ञइत्यर्थः ५० दर्भेषु अंतर्वेदिस्थबहिरूपेषुआसादितानिहवींषिचरतिभक्षयतीतिदर्भचारी ५१ सर्वेषांप्राणिनांपतिः ५२ देवदेवः ५३ सुखासक्तः ५४ सतकार्यअसतकारणम् ५५ सर्वरत्नवित्सर्वाणिरत्नानितत्तज्जातिषूत्कृष्टवस्तूनिविंदतेलभतेज्ञातितया
५६ १०८

कैलासगिरिवासी ५६ हिमवद्गिरिसंश्रयः ५७ कूलहारी महाप्रवाहरूपेण गर्तानस्य दुस्तहारी ५८ कूलकर्त्ता पुष्करादीनां महतां तडागानां कर्त्ता कूलप्रतीरे से-
न्यस्थपृष्ठे कूपतडागयोरितिविश्वलोचनः ५९ बहुविद्यः ६० बहुप्रदः ६१ १०९ वणिजो वणिक् अकारान्तत्वं आर्षं ६२ वर्द्धकीतक्षा ६३ वृक्षस्तक्षणीयः
संसारवृक्षः ६४ बकुलः वृक्षविशेषः ६५ चंदनः ६६ छदः सप्तपर्णः ६७ सारग्रीवः दृढकंधरः ६८ महाजत्रुः जत्रुरत्र कंठस्कंधयोरधोऽस्थि ६९ अलो-
लः ७० महौषधः व्रीहियवरूपः ७१ ११० सिद्धार्थकारी ७२ सिद्धार्थः पूर्वपक्षं निरस्य यो निष्पन्नोऽर्थः स सिद्धार्थ उच्यते स एव सिद्धान्त इति प्रसिद्धः तस्यैव विशे-
षणं छंदोव्याकरणोत्तर इति वेदव्याख्यानोपबृंहित इत्यर्थः ७३ सिंहनादः ७४ सिंहदंष्ट्रः ७५ सिंहगः सिंहारूढः ७६ सिंहवाहनः सिंहयुक्तं वाहनं रथोऽस्य
७७ १११ प्रभावात्मा प्रकृष्टो भावः सत्ता तद्रूप इत्यर्थः प्राणा वै सत्यं तेषामेष सत्यमिति श्रुतेः सत्यस्य सत्य इत्यर्थः ७८ जगतः काल ग्रासकर्त्ता जगत्कालः स एव स्थाने
भोजनं पोषणं यस्य ७९ लोकहितः ८० तरुस्तारकः ८१ सारंगः पक्षिविशेषः ८२ नवश्चासौ चक्राङ्गो हंसश्च नवचक्राङ्गः ८३ केतुरिव केतुः शिखा तया मालते-
शोभते इति केतुमाली मयूरकुक्कुटादिपक्षिरूपः ८४ सभा धर्मपरीक्षास्थानं अवतीति सभावनः ८५ ११२ भूतालयः ८६ भूतपतिः ८७ अहोरात्रम् ८८

कैलासगिरिवासी च हिमवद्गिरिसंश्रयः कूलहारी कूलकर्त्ता बहुविद्यो बहुप्रदः १०९ वणिजो वर्धकी वृक्षो बकुलश्चंदनच्छदः सार-
ग्रीवो महाजत्रुरलोलश्च महौषधः ११० सिद्धार्थकारी सिद्धार्थः छंदोव्याकरणोत्तरः सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः १११ प्र
भावात्मा जगत्कालस्थानो लोकहितस्तरुः सारंगो नवचक्राङ्गः केतुमाली सभावनः ११२ भूतालयो भूतपतिरहोरात्रमनिंदितः
११३ वाहिता सर्वभूतानां निलयश्च विभुर्भवः अमोघः संयतोऽश्वो भोजनः प्राणधारणः ११४ धृतिमान्मतिमान्दक्षः सत्कृतश्च युगाधि
पः गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः ११५ हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम् प्रकृष्टारिर्महाहर्षो जितकामो जितेंद्रियः ११६

अनिंदितः ८९ ११३ वाहिता वोढा सर्वभूतानामित्युभयत्र संबध्यते सर्वभूतानां वाहिता इत्येकं नाम ९० सर्वभूतानां निलयः सदनमित्यपरम् ९१ विभुः विगतं
भूर्भुवनं कस्मादित्यजन्माभावार्थे पूर्ववत् भवतेर्डुः ९२ भवः अस्तीति भवः अस्तेः पचाद्यच् विभूभावः ९३ अमोघः नैष्फल्यरहितः ९४ संयतः धारणा-
ध्यानसमाधिमान् ९५ अश्वः उच्चैःश्रवादिरूपः ९६ भोजयतीति भोजनोऽन्नदाता ९७ अत एव प्राणधारणः ९८ ११४ धृतिमान् ९९ मतिमान् १००
दक्षः उत्साही १ सत्कृतः आदृतः २ युगाधिपः युगशब्देन धर्माधर्मौ लक्ष्येते तनयोः फलदः ३ गोपालिः इंद्रियाणां पालयिता ४ गोपतिः रश्मीनां पतिः सूर्यादिः ५
ग्रामः समूहः ६ गोचर्मवसनः ७ हरिः हरति भक्तानां दुःखमिति हरिः ८ ११५ हिरण्यबाहुः रमणीयबाहुः ९ प्रवेशिनां अंतःप्रवेशशीलानां योगिनां चि
रकालकाष्ठवत्स्थायिनां गुहा शरीरं तस्य रक्षकः १० प्रकृष्टाः प्रकर्षेण कृताः अरयः कामादयो येन स प्रकृष्टारिः साधकोत्तमः ११ महाहर्षः १२ जितकामः १३ जितेंद्रियः
१४ ११६

गांधारः स्वरविशेषः १५ सुवाप्स शोभनं वसतिस्थानं केलाससाख्यमस्य १६ तपःसक्तः १७ रतिः प्रीतिरूपः १८ नरः नयति प्रापयति ब्रह्मांडमितिनरो विराट् १९
महागीतः २० महानृत्यः २१ अप्सरोगणसेवितः २२ ११७ महान्केतुर्वृषरूपीयस्य समहाकेतुः २३ महाधातुः मेरुपर्वतः २४ तस्यैवनैकसानुचरः अ-
नंतशिखरसंचारी २५ चलः दुर्ग्रहः २६ आवेदनीयः वाचामगोचरोपि गुरुभिरुपदेष्टुं शक्यः २७ आदेशः साक्षादुपदेशरूपः २८ सर्वगंधसुखावहः
युगपत्सर्वेषां गंधानां विषयस्पर्शानां सुखं आवहतीति तथा २९ ११८ तोरणः पुरद्वारादिरूपः ३० तारणः परिवादीन तारयति जिगीषून् ३० परिधीप
रिधिरस्यास्तीति परिधी दुर्गरूपः ३१ पतिश्चासौ खेचरश्चेति खेचरेश्वरो गरुडः ३२ संयोगो वर्द्धनः वृद्धिहेतुभूतः संयोगः स्त्रीपुंसयोः संबंधः प्रजनश्चा
स्मि कंदर्प इत्युक्तः ३३ वृद्धो गुणाधिकः गुणै र्ज्ञानैश्वर्यादिभिरधिकत्वेन वृद्ध इत्यर्थः न तु वलीपलितादिना यथोक्तं विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु शौर्यतः
वैश्यानां धनबाहुल्यात् शूद्राणां वयसाधिकइति ३४ ११९ नित्यआत्मसहायश्चेत्येकनाम नित्यश्चासावात्मसहायश्चेति समासे विभक्त्यलोप आर्षः
३५ देवासुरपतिः ३६ पतिर्यथावंत्सर्वस्य ३७ युक्तः सन्नद्धः संग्रामादौ ३८ युक्तबाहुः शत्रुमर्दनयोग्यो बाहुर्यस्य ३९ देवोदिविसुपर्वणः दिवि स्वर्गेयः

गांधारश्च सुवासश्च तपःसक्तो रतिर्नरः महागीतो महानृत्योऽप्सरोगणसेवितः ११७ महाकेतुर्महाधातुर्नैकसानुचरश्चलः आवेदनीय
आदेशः सर्वगंधसुखावहः ११८ तोरणस्तारणो वातः परिधी पतिखेचरः संयोगो वर्द्धनो वृद्धो अधिवृद्धो गुणाधिकः ११९ नित्यआ
त्मसहायश्च देवासुरपतिः पतिः युक्तश्च युक्तबाहुश्च देवो दिविसुपर्वणः १२० आषाढश्च सुषाढश्च ध्रुवोथ हरिणो हरः वपुरावर्त्तमानेभ्यो
वसुश्रेष्ठो महापथः २१ शिरोहारी विमर्षश्च सर्वलक्षणलक्षितः अक्षश्च रथयोगी च सर्वयोगी महाबलः १२२

सुपर्वा इंद्रसंज्ञो महान्तस्य देव आराधनीयः ४० १२० आषाढः साहयते कर्त्तरि निष्ठा आसमंतात् सर्वं साहयति सहनं कारयतीत्याषाढः सर्वसहनसामर्थ्य
प्रद इत्यर्थः ४१ सुषाढः ईषत्करं पूर्वोक्तं यस्य सः सुषाढः ४२ ध्रुवः अचंचलः ४३ हरिणः श्वेतः शुद्ध इत्यर्थः ४४ हरः हंतीति हा मृत्युः तं राति आदत्ते स हरः हंतेः क-
र्त्तरि क्विप् तत्पूर्वात्तं राते आतोनुपसर्गे क इति कः हरः शूलीत्यर्थः ४५ वपुः वपुः प्रदाता आवर्त्तमानेभ्यः स्वर्गच्युतेभ्यः वसुरिति पाठे सेवकेभ्यो धनप्रद इत्यर्थः
४६ वसुश्रेष्ठः धनादप्यधिकः प्राणो वित्तादिति श्रुतेः ४७ महापथः शिष्टाचाररूपः ४८ १२१ शिरोहारी ब्रह्मणः शिरश्छेत्ता विमर्षः विशेषेण विचारवान् वि
वेकेनैव ब्रह्मशिरश्छिन्नं न तु क्रोधमात्रेणेति भावः पदद्वयात्मकमेकं नाम ४९ सर्वलक्षणलक्षितः सामुद्रिकोक्तशुभलक्षणयुक्तः सर्वाणि लक्ष्यंते ज्ञायंते यैः
एतैरिति प्रमाणानि लक्षणान्युच्यंते नैर्लक्ष्यते न तु साक्षात्क्रियत इत्यर्थः ५० अक्षः रथसंधानदारु अतएव रथयोगी रथेन संबंधः ५१ सर्वयोगी सर्वसंस्प
र्शी विभुत्वात् ५२ महाबलः महांश्चासौ बलश्च महाबलः बलशब्दान्मत्वर्थीय अर्शआद्यच् प्रबलवद्राग इत्यर्थः ५३ १२२ ७ ७ ७

समाम्नायोवेदः ५४ असमाम्नायस्तदन्यः स्मृतीतिहासपुराणागमादिः ५५ तीर्थदेवः ५६ महारथः पृथिवीस्यंदनः ५७ निर्जीवः अचेतनप्रपंचात्मा ५८ जीवनः अचेतनस्यापिदेहादेश्चैतन्यप्रदाता ५९ मंत्रः प्रणवादिर्मृतसंजीवनोवा ६० शुभाक्षः शांतदृष्टिः ६१ बहुकर्कशः संहर्तृत्वात् ६२ १२३ रत्नप्रभूतः प्रभूतानिबहूनिरत्नानिउत्तमवस्तूनिअस्मिन् रत्नप्रभूतः आहिताग्न्यादिवत्पूर्वनिपातः ६३ रक्तांगः ६४ महार्णवनिपानवित् निपानंकूपाद्बहिःपशूनांपानार्थंकृतंकुंडम् महार्णवाएवसर्वेयस्यनिपानभूतास्तान्शोषणीयान्विंदतिलभतेइति ६५ मूलंसंसारतरोरधिष्ठानम् ६६ विशालः अत्यंतंशोभमानः ६७ अमृतः सुधारूपः ६८ व्यक्ताव्यक्तः कार्यकारणात्मा ६९ तपोनिधिर्महामुनिः ७० १२४ आरोहणः परपदंआरुरुक्षुः ७१ अधिरोहः तदेवंअधिरूढः ७२ शीलधारीसदाचारः ७३ महायशाः पुण्यकीर्तिः ७४ सेनाकल्पः सेनांअलंकारः पराक्रमइत्यर्थः ७५ महाकल्पः दिव्यभूषणः ७६ योगः चित्तवृत्तिनिरोधः ७७ युगानिकल्पादीनिकरोतियस्य कल्पादिप्रदः ७८ हरतिशरीरंदेशाद्देशांतरंप्रतिनयतीतिहरिः पादाभिमानिनीदेवतात्रिविक्रमइत्यर्थः ७९ १२५ युगरूपः धर्माधर्मतत्संकररूपः ८० महारूपः महांश्चासौअरूपश्चेतितथा ८१ महानागहनः गजासुरघ्नः ८२ वधः मृत्युः ८३ न्यायनिर्वपणः न्याययुक्तंनिर्वपणंदानंयस्य यथाधर्ममनोरथप्रदः ८४ पादः पंथतइतिगम्यः ८५ पंडितः परोक्षज्ञानी ८६ अचलोपमोनिश्चलः तलज्ञानीत्यर्थः ८७ १२६ बहुनिरवधिशालतेशोभतेइतिअनंतलीलः ८८ महामालः महतीअपादलंबिनीअम्लानत्वादिगुणयुक्तावामालायस्य ८९ शशीचंद्रः सएवहरसुलोचनः महादेवस्यशांतदृष्टिरूपः ९० विस्तारोलवणः कूपः विशिष्टस्तारआच्छादनंयस्यसोतिविस्तीर्णःलवणः क्षाररसः तादृशःकूपइवकूपः महाकूपतुल्यः क्षारसमुद्ररूपीत्यर्थः त्रिपदमेकंनाम ९१ त्रियुगः कलिर्बहिर्भूतःअतएव ९२ सफलोदयः ९३ १२७ ७ ७ ७

समाम्नायोऽसमाम्नायस्तीर्थदेवोमहारथः निर्जीवोजीवनोमंत्रःशुभाक्षोबहुकर्कशः १२३ रत्नप्रभूतोरक्तांगोमहार्णवनिपानवित् मूलंविशालोह्यमृतोव्यक्ताव्यक्तस्तपोनिधिः १२४ आरोहणोधिरोहश्चशीलधारीमहायशाः सेनाकल्पोमहाकल्पोयोगोयुगकरोहरिः १२५ युगरूपोमहारूपोमहानागहनोवधः न्यायनिर्वपणःपादःपंडितोह्यचलोपमः २६ बहुमालोमहामालःशशीहरसुलोचनः विस्तारोलवणःकूपस्त्रियुगःसफलोदयः १२७

त्रिनेत्रः त्रीणिशास्त्राचार्यध्यानानिलोचंमानीवलोचनानिदर्शनसाधनानियस्यसत्रिलोचनः ९४ विषण्णांगःविशेषेणसन्नाः निरन्वयमुच्छिन्नाःअंगा-
ख्याभूम्यादयोष्टौमूर्त्तयोयस्य अमूर्त्तेहिसूक्ष्मरूपेणमूर्त्तीनामन्वयोस्तितोप्ययमंतरंगःशद्धोभूमेत्यर्थः ९५ मणिविद्धःमणिपिधानार्थंकर्णदेशोविद्धः
कृतच्छिद्रःकुंडलीत्यर्थः ९६ जटाधरः ९७ बिंदुरनुस्वारः ९८ विसर्गःविसर्जनीय ९९ सुमुखःव्यक्तवर्णः ८०० शरबाणः १ सर्वायुधः २ स
हःसर्वंसहतेमर्षयतिसहः ३ १२८ निवेदनःनिर्हीनंसर्वंदृत्युपरमेणवेदनंज्ञानंयस्य ४ सुखाजातःसुखरूपेणअजातः वृत्तिविलयेसतिआविर्भू
तः ५ सुगंधारःशीघ्रनोगंधारदेशोद्भवः ६ महाधनुःपिनाकधन्वा ७ गंधपालीगंधाःलेशाःसूक्ष्माःप्रपंचवासनाःताःपालयतीतिगंधपालीसर्व-
प्राणिधीवासनामयइत्यर्थः सएवभगवान्ईश्वरःएकंनाम ८ उत्थानःसर्वकर्मणां उत्तिष्ठंत्यस्मादित्युत्थानः ९ १२९ मंथानोविश्वविलोडनसमर्थोब

त्रिनेत्रश्चविषण्णांगोमणिविद्धोजटाधरः बिंदुर्विसर्गःसुमुखःशरःसर्वायुधःसहः १२८ निवेदनःसुखाजातःसुगंधारो
महाधनुः गंधपालीचभगवानुत्थानःसर्वकर्मणाम् १२९ मंथानोबहुलोवायुःसकलःसर्वलोचनः तलस्तालःक
रस्थालीऊर्ध्वसंहननोमहान् १३० छत्रंसुछत्रोविख्यातोलोकःसर्वाश्रयःक्रमः मुंडोविरूपोविकृतोदंडीकुंडीवि-
कुर्वणः १३१ हर्यक्षःककुभोवज्रीशतजिह्वःसहस्रपात् सहस्रमूर्द्धादेवेंद्रःसर्वदेवमयोगुरुः १३२

हुलोनिर्यधिर्वायुःमहान्प्रलयानिलइत्येकंनामत्रिपदम् १० सकलःपूर्णः ११ सर्वलोचनःसर्वद्रष्टा १२ तलस्तालःकरतलोस्यएवतालवाद्यविशेषः
१३ करावेवस्थालीभोजनभाजनंतदस्यास्तीतिकरस्थाली १४ ऊर्ध्वसंहननोग्रेष्ठोदृढशरीरश्चेत्यर्थः १५ महान्अत्युच्चः १६ १३० छत्रं १७ सु
छत्रः १८ विख्यातोलोकःप्राणिभृन्मात्रप्रसिद्धःयशः१९सर्वाश्रयःक्रमःसर्वस्यआश्रयःआधारभूतःक्रमःपादविक्षेपःत्रिविक्रमेणरूपेणपादाक्रांतजग
न्मयइत्यर्थः २० मुंडःमुंडितशिराः २१ अतएवविरूपःविकटरूपः २२ विकृतःसर्वाविक्रियाप्राप्तः २३ दंडी २४ कुंडी २५ विकुर्वणःकरोतीतिकुर्वा
विगतःकुर्वायस्मात्विकुर्वणःकर्माप्राप्यइत्यर्थः २६ हर्यक्षःसिंहः २७ ककुभःसर्वदिग्रूपः २८ वज्री २९ शतजिह्वः ३० सहस्रपात्३१सहस्रमू
र्द्धा ३२ देवेंद्रः ३३ सर्वदेवमयः ३४ गुरुः ३५ १३२ ७ ७ ७ ७ ७ ७ ७ ७ ७

सहस्रबाहुः ३६ सर्वांगः सर्वं अंगतिप्राप्नोतीतिसर्वांगः ३७ शरण्यः शरणायसाधुः ३८ सर्वलोककृत् ३९ पवित्रपावनस्तीर्थादिरूपः ४० त्रिककुन्मंत्रः
त्रीणिककुदीवककुदिउच्चस्थानानिबीजशक्तिकीलकानियस्यतादृशोमंत्रः ४१ कनिष्ठः अदितिपुत्राणांमध्येयः कनिष्ठोवामनरूपीविष्णुस्तद्रूपः ४२ कृष्णापिं
गलः हरिहरमूर्तिः विष्णुर्नारायणः कृष्णइतिकृष्णशब्दस्यहरौनिधिभेदे कपौरुद्रेपिंगलः कपिलेन्यवदितिनानार्थकोशात पिंगलशब्दस्यहरेचप्रसिद्धिदर्शना
त् पुरुषंकृष्णपिंगलंदरिद्रंनीललोहितेत्यादिश्रुतेरप्ययमेवार्थः नीलग्रीवोविलोहितस्तरुद्रस्यपूर्वंलोहितः पश्चान्नीलइतिकालभेदेनवाकंठेनीलः सर्वांगे-
लोहितइतिवावामांगेनीलोदक्षिणांगेलोहितइतिदेशभेदेनवाआवरकप्रकृत्यंशेननीलस्तत्प्रवर्तकपुरुषांशेनलोहितइतिगुणभेदेनवागृह्यतेतदागुणवाचि
नोः शब्दयोर्द्रव्यवाचित्वंनहृत्तावतएकदेशवाचित्वमितिविप्रकृष्टार्थकल्पना अस्माकंतुविलोहितकृष्णपदयोः मुख्यवृत्त्यैवशिवकेशववाचित्वंदृष्टंतेनतत-
त्पर्यायश्चयोर्नीलपिंगलपदयोरपिहरिहरवाचित्वंयुक्तंयुज्यतेतथाचकृष्णपिंगलपदेननीललोहितपदेनवाहरिहरावेवग्राह्यौ निर्णीतार्थकपदांतरसमभि
व्याहारसामर्थ्यादनिर्णीतार्थकस्यापिपदस्यार्थोव्यवस्थापयितुंशक्यएवेतियुक्तमुपदिशामः यद्यपिपूर्वंवायुक्तेष्वप्यर्थेषुकुशकाशावलंबनंनकिंचिन्प्रमाणंउ-

सहस्रबाहुः सर्वांगः शरण्यः सर्वलोककृत् । पवित्रंत्रिककुन्मंत्रः कनिष्ठः कृष्णपिंगलः १३३
ब्रह्मदंडविनिर्माताशतघ्नीपाशशक्तिमान् । पद्मगर्भोमहागर्भोब्रह्मगर्भोजलोद्भवः १३४ ग
भस्तिर्ब्रह्मकृद्ब्रह्मीब्रह्मविद्ब्राह्मणोगतिः । अनंतरूपोनेकात्मातिग्मतेजाः स्वयंभुवः १३५

न्नेतुंशक्यंतथापिऋजुमार्गेणसिद्धस्यार्थस्यवक्रेणसाधनायोगात् शिवविष्णुनाम्नामन्योन्यस्मिन्प्रयोगदर्शनाच्चतयोरेकस्यैवव्यूहद्वयात्मत्वादत्रइदमेवव्याख्या
नमिष्टं तच्चैवमिंद्राग्निपदवद्द्विवचनेनभाव्यं तत्पुरुषादिपदेष्विवकृष्णश्चासौपिंगलश्चेत्यभेदेनैवपदयोरन्वयोपपत्तौभेदसूचकद्विवचनायोगाद्वहरिहरयो
रभेदस्यचप्रागेवप्रतिपादितत्वादित्तिदिक् तदयंसंग्रहः ४३ १३३ ब्रह्मदंडविनिर्माता ४३ शतघ्नीपाशशक्तिमान् ४४ पद्मगर्भोब्रह्मा ४५ महागर्भोमहान्गर्भोंतरव
काशोयस्य ४६ ब्रह्मगर्भोवेदगर्भितः ४७ जलोद्भवः जलेसलिलएकोद्रष्टेतिश्रुतेरेकार्णवेउद्भवआविर्भावोयस्यमायाविनइत्यर्थः ४८ १३४ गभस्तिः रश्मिमा-
न् ४९ ब्रह्मकृत्वेदकर्ता ५० ब्रह्मीवेदाध्यायी ५१ ब्रह्मवित्वेदार्थवित् ५२ ब्राह्मणः ब्रह्मिष्ठः ५३ गतिः ब्रह्मिष्ठानामेवपरायणं ५४ अनंतरूपमस्यसोऽनंतरू-
पः ५५ अतएवानेकात्माअनेकशरीरधारी ५६ तिग्मतेजाः स्वयंभुवः ब्रह्मणोदृष्ट्यातिग्मतेजाः दुःसहपराक्रमः स्वशिरच्छेदकत्वात् ५७ १३५ ६७

ऊर्ध्वगात्माउपाधित्रयाद्रूपंरिगतआत्मास्वरूपंयस्य सभूमिंसर्वतोवृत्वाऽत्यतिष्ठद्दशांगुलमितिश्रुतेः ५८ पशुपतिःजीवानामीश्वरः ५९ वातरंहाः ६० मनो-
जवः ६१ चंदनीचंदनालिप्तगात्रः ६२ पद्मनालाग्रःपद्मनालमस्याग्रेस्तीतितथा कदाचिद्ब्रह्माश्रयभूतपद्मनालस्यांतंद्रक्ष्येइतिबुध्यानालमार्गेणगच्छन्नृत
दादिनप्राप्तवान् अतोर्वाचीनस्यापिनालस्यांतोनदृष्टःकिमुतनालक्षेत्रस्यभूस्थानीयस्येतिभावः ६३ सुरभ्युत्तरणः कदाचिद्विष्णुस्पर्द्धयाब्रह्माशिवस्यशिरो
देशोमयादृष्टस्तत्रत्वया साक्ष्यंदेयमितिकामधेनुमुक्तवान् सापिब्रह्मभयादनृतसाक्ष्यंदत्तवतीततोमहादेवेनशप्ताऽमेध्याशिनीतिसंततिर्भविष्यतीतितांददसु
तःसुरभिंकामधेनुमूर्ध्वपदादधउत्तारयतीतिसुरभ्युत्तरणः ६४ एवंमूर्त्तिद्वयस्याप्यंतोयेनदृष्टःसोप्ययमेवेत्याहनरइति नरातिआदत्तेप्राप्नोत्यंतमितिन
रःआतोनुपसर्गेकः ६५ १३६ कर्णिकारपुष्पमयीमहतीमालातद्वान्कर्णिकारमहास्रग्वी ६६ नीलमौलिःनीलमणिमयंकिरीटंमौलौयस्य ६७ पिना
कधृक्पितःप्राप्तःनाकोद्योर्येनसपिनाकःपिगतावित्यतोनिष्ठातस्यन्लोपः त्रिपुरासुरेणाहृतःस्वर्गादेवध्रु द्धलातप्राप्तस्तन्महादेवस्यशैलेंद्ररूपंधनुःपिनाक
स्तंस्यधर्त्तापिनाकधृक् यथानमुचिफेनेननिघ्नतइंद्रस्यफेनेयथावज्रप्रवेशएवंशैलेपिपिनाकप्रवेशात्सोपिपिनाकइत्यर्थः ६८ उमापतिःब्रह्मविद्यातस्याः

ऊर्ध्वगात्मापशुपतिर्वातरंहामनोजवः चंदनीपद्मनालाग्रःसुरभ्युत्तरणोनरः १३६ कर्णिकारमहास्रग्वीनील
मौलिःपिनाकधृक् उमापतिरुमाकांतोजान्हवीधृगुमाधवः १३७ वरोवराहोवरदोवरेण्यःसुमहास्वनः महाप्रसा
दोदमनःशत्रुहाश्वेतपिंगलः १३८ पीतात्मापरमात्माचप्रयतात्माप्रधानधृक् सर्वपार्श्वमुखस्त्र्यक्षोधर्मसाधारणोवरः १३९

पतिर्यथेष्टविनियोगात्स्वामी ६९ उमयातयैवब्रह्मविद्ययाकांतःकामितःवशीकृतः ७० जान्हवीधृक् ७१ उमायाःशैलपुत्र्याःधवोभर्त्ताउमाधवः ७२ वरोवरा
हः आद्येभूमेरुद्धर्त्तायज्ञरूपीवराहः ७३ वरैःश्रेष्ठैरूपैःदयतेनानावतारैर्जगत्पालयतीतिवरदः ७४ अतएववरेण्यःवरणीयः ७५ सुमहास्वनःवेदगर्जि
तोहयग्रीवः ७६ महाप्रसादः ७७ दमनइवसुगंधित्वाद्दमनःतत्पूज्यत्वाद्वा ७८ शत्रून्कामादीन्हंतीतिशत्रुहा ७९ श्वेतपिंगलः अर्द्धनारीनटेश्वरोदक्षि
णार्द्धेकर्पूरगौरः वामार्द्धेकनकपिंगलः येतुश्वेतपिंगलपदस्यार्थंकृष्णपिंगलपदेनब्रुवतेतेश्वेतमपिकृष्णीकर्त्तुंसमर्थामह्यतोभवंतीति ८० १३८ पी
तात्मासुवर्णवर्णशरीरः यएषोंतरादित्योहिरण्मयःपुरुषोदृश्यतेहिरण्यश्मश्रुर्हिरण्यकेशआप्रणखात्सर्वएवसुवर्णइतिश्रुत्युक्तः ८१ परमात्माअन्नम
यप्राणमयमनोमयविज्ञानमयानंदमयेभ्यःपंचभ्योऽपरमेभ्यआत्मभ्योऽन्यःषष्ठआनंदमात्रस्वरूपः ८२ प्रयतात्माशुद्धचित्तः ८३ प्रधानधृक्त्रिगुणा
त्मकंजगत्कारणंप्रधानाख्यंयज्ज्ञानंतदधिष्ठानभूतः ८४ सर्वपार्श्वमुखःपार्श्वेषुदिक्षुऊर्ध्वंचमुखंयस्येतिपंचवक्त्रउक्तः ८५ त्र्यक्षःत्रीणिसोमसूर्याग्निरू
पाणिअक्षाणिनेत्राणियस्य ८६ धर्मसाधारणोवरःपुण्यानुरूपप्रसादात्मा ८७ १३९ ७ ७ ७ ७ ७ ७

चराचरात्मारलयोरैक्यात् चलाचलात्मा द्विविपंथाश्चलाचलइतिश्रुत्युक्तोयोआवृत्त्यनावृत्तिमार्गोतद्रूपश्चराचरात्मा कर्मानुरूपःप्रसादानुरूपोमार्गोप्य
यमेवेतिनामद्वयार्थः ८८ सूक्ष्मात्मामार्गद्वयागोचरस्वरूपः ८९ अमृतोमरणवर्जितोनिष्कामः गोवृषःपृथिवीपतिर्धर्मःतस्यईश्वरः निष्कामधर्मस्या-
मृतमोक्षरूपफलदातुसमर्थः ९० साध्याःदेवानामपिदेवाःतेषामपिऋषिःआचार्यःसाध्यर्षिः ९१ वसुःदेवताविशेषःउपरिचरस्यराज्ञोव्यावृत्त्यर्थंतस्यै
वविशेषणंआदित्यइतिअदितेःपुत्रोवसुर्नामेत्यर्थः ९२ विवस्वान्विशेषेणवस्तेआच्छादयत्यनेनभुवनमितिविवःअंशुजालंतद्वान् सूयतेइतिसविताछंदो
बहुलमितिवार्त्तिकात्कर्मणिअच्बाहुलकात्यज्ञेअभिषूयमाणःअमृतःसोमः अंशुरंशुष्टेदेवसोमेतिमंत्रलिंगात्अपामसोमममृताअभूमेतिअमृतत्वसा
धनत्वस्यधनश्रुतेश्चसोमस्यबिंबस्थत्वममृतत्वंचज्ञेयंतेनत्रिपदमेकंनाम ९३ १४० व्यासःपुराणेतिहासादेःस्रष्टा ९४ सर्गःतस्यैवसृज्यंपुराणादि
अस्यविशेषणेसंक्षेपोविस्तरइतिचसूत्रादिरूपोभाष्यादिरूपइत्यर्थः इदमपित्रिपदंनाम एवंसतिहोमेएकैकनामंजपेवाएवंमंत्रऊह्यः ॐसर्गायसंक्षेपायविस्त
रायस्वाहेति ॐनमःसर्गायसंक्षेपायविस्तरायेतिच भूरग्नयेचपृथिव्यैचमहतेचस्वाहेतिवदनेकपदतोप्येकनामत्वंज्ञेयं ९५ पर्ययोनरःपरितःअयतेव्याप्नो

चराचरात्मासूक्ष्मात्मा अमृतोगोवृषेश्वरः साध्यर्षिर्वसुरादित्योविवस्वान्सवितामृतः १४० व्यासःसर्गःसुसंक्षेपोविस्तरःपर्ययोनरः ऋतुः
संवत्सरोमासःपक्षःसंख्यासमापनः ४१ कलाकाष्ठालवामात्रामुहूर्त्ताहःक्षपाःक्षमाः विश्वक्षेत्रंप्रजाबीजंलिंगमाद्यस्तुतिर्मम ४२
सदसद्व्यक्तमव्यक्तंपितामातापितामहः स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपम ४३ निर्वाणंह्लादनश्चैवब्रह्मलोकःपरागतिः देवा
सुरविनिर्माता देवासुरपरायणः ४४ देवासुरगुरुर्देवोदेवासुरनमस्कृतः देवासुरमहामात्रोदेवासुरगणाश्रयः १४५

तीतिपर्ययःसचनरोजीवःसमष्टिजीवोवैश्वानरइत्यर्थः ९६ ऋतुः ९७ संवत्सरः ९८ मासः ९९ पक्षः १०० इतिनाम्नांनवमंशतं संख्यासमापनःऋ
त्वादिसंख्यासमाप्तिरूपःसंक्रांतिदर्शपूर्णमासादिरूपः १ १४१ कला २ काष्ठा ३ लवाः ४ मात्रा ५ मुहूर्त्ताहः क्षपाइतिसमस्तंनाम ६ क्षमाःऋत्वाद्याः
कालावयवाःस्पष्टार्थाः ७ विश्वक्षेत्रंब्रह्मांडवृक्षस्यालवालं चिन्मात्रं ८ प्रजानांबीजंमाविशिष्टचैतन्यरूपंअव्यक्तं ९ लिंगंमहत्तत्वं १० आद्योनिर्गमःअं
कुररूपीअहमितिप्रथमोध्यासः ११ १४२ सत्त्वत्रयं १२ असत्कारणं १३ व्यक्तंइंद्रियग्राह्यं १४ अव्यक्तंअहंनजानामीत्यनुभवैकवेद्यंविज्ञानं १५ पिता १६ माता
१७ पितामहः १८ स्वर्गद्वारंतपः १९ प्रजाद्वारंरागः २० मोक्षद्वारंवैराग्यं २१ त्रिविष्टपं स्वर्गसाधनधर्मः २२ १४३ निर्वाणंमोक्षः २३ ह्लादनःआनंदयिताएषह्येवानं
दयतीतिश्रुतेः २४ ब्रह्मलोकःसत्यलोकः २५ परागतिःततोप्यधिकागतिर्गंतव्यः २६ देवासुरविनिर्माता २७ देवासुरपरायणःपुंस्त्वमार्षं २८ १४४ देवासु
रगुरुःबृहस्पतिशुक्ररूपः २९ देवोविजिगीषुः ३० देवासुरनमस्कृतः ३१ देवासुरमहामात्रःमहामात्रःश्रेष्ठः ३२ देवासुरगणाश्रयःआश्रयणीयः ३३ १४५

देवासुरगणाध्यक्षइंद्रविरोचनादिरूपः ३४ देवासुरगणाग्रणीःस्वामिकार्त्तिकेयादिदैत्यरूपः ३५ देवातिदेवः इंद्रियाण्यतिक्रम्यस्वयमेवप्रकाशमानः ३६
देवर्षिर्नारदादिरूपः ३७ देवासुरवरप्रदोब्रह्मरुद्रादिरूपेण ३८ १४६ देवासुरेश्वरस्तेषामंतर्यामी ३९ विश्वःविशत्यस्मिन्निति विश्वः जगद्गर्भेशयः ४०
देवासुरमहेश्वरःअंतर्यामिणईश्वरस्याप्यधिष्ठानंअतोमहेश्वरः ४१ सर्वदेवमयः अग्निर्मूर्द्धाचक्षुषीचंद्रसूर्यावित्यादिश्रुतेः ४२ अचिंत्यःनास्तिचिंत्योः
न्योयस्ययस्माद्वा ४३ देवतात्मा देवतानामंतरात्मा प्रत्यग्रूपः ४४ आत्मसंभवः स्वतःसिद्धः ४५ १४७ उद्भितउद्भिद्याविर्भवतीतिवाफलउद्भिनत्तीति-
वास्थावररूपोयज्ञादिरूपोवा ४६ त्रिविक्रमःत्रीणिभुवनानिक्रमतइतिवामनः ४७ वैद्योविद्यावान् ४८ विरजःनिर्मलः ४९ नीरजःरजोगुणहीनः ५०
अमरःविनाशहीनः ५१ ईड्यःस्तुत्यः ५२ हस्तीश्वरःकालहस्तीश्वराख्यंवायव्यलिंगरूपः ५३ व्याघ्रोव्याघ्रेश्वरनामकलिंगरूपः ५४ देवसिंहःदेवे
षुपराक्रमी ५५ नरर्षभःनरेष्वपिश्रेष्ठः ५६ १४८ विबुधःविशेषेणप्राज्ञः ५७ अग्रवरःअग्रेवृणोतियज्ञभागादिकमित्यग्रवरः ५८ सूक्ष्मःदुर्लक्ष्यः
५९ सर्वदेवःतत्तद्देवतात्मकात्स्न्येनपरिसमाप्तः ६० तपोमयःतपःप्रधानः ६१ सुयुक्तःसुतरांयुक्तःसंनद्धः ६२ शोभनःकल्याणः ६३ वज्रीवज्रायुधः ६४

देवासुरगणाध्यक्षोदेवासुरगणाग्रणीः देवातिदेवोदेवर्षिर्देवासुरवरप्रदः १४६ देवासुरेश्वरोविश्वोदेवासुरमहेश्वरः सर्वदेवम
योऽचिंत्योदेवतात्मात्मसंभवः १४७ उद्भित्त्रिविक्रमोवैद्योविरजोनीरजोऽमरः ईड्योहस्तीश्वरोव्याघ्रोदेवसिंहोनरर्षभः १४८
विबुधोऽग्रवरःसूक्ष्मःसर्वदेवस्तपोमयः सुयुक्तःशोभनोवज्रीप्रासानांप्रभवोऽव्ययः १४९ गुहःकांतोनिजःसर्गःपवित्रःसर्वपावनः शृं
गीशृंगप्रियोबभ्रूराजराजोनिरामयः १५० अभिरामःसुरगणोविरामःसर्वसाधनः ललाटाक्षोविश्वदेवोहरिणोब्रह्मवर्चसः १५१

प्रासानांआयुधविशेषाणांप्रभवउत्पत्तिस्थानं ६५ अव्ययःनावाव्ययनरूपणएतिप्राप्नोत्येनंसाधकइत्यव्ययः एकाग्रचित्तप्राप्यःएरच्प्रत्ययांतोयं
६६ १४९ गुहःकुमारः ६७ कांतःकस्यसुखस्यअंतःसीमाआनंदस्यपराकाष्ठेत्यर्थः ६८ निजःसर्गःसृज्यतइतिसर्गःतस्यविशेषणंनिजःस्वस्मान
अनन्यः ६९ पवित्रं पविर्वज्रंतत्तुल्यमृत्युदुःखंतस्मात्त्रायतइतिपवित्रं ७० अतएवसर्वपावनःसर्वेषांब्रह्मादीनामपिशुद्धिकरः ७१ शृंगीवृषभा
दिरूपः ७२ शृंगप्रियःपर्वतशिखराश्रयः ७३ बभ्रुःशनैश्चरः ७४ राजराजःकुबेरः ७५ निरामयःनिर्दोषः ७६ १५० अभिरामःप्रीतिजनकः ७७ सुरगणः
देवसंघरूपः ७८ विरामःसर्वोपरमरूपः ७९ सर्वसाधनःसर्वाणिआश्रमकर्माणिसदेवाश्रयेसाधनानियस्मिन्निति ८० ललाटाक्षः ८१ विश्वदेवःवि
श्वैर्ब्रह्मांडकंदुकैर्दीव्यतीतिक्रीडतइति ८२ हरिणःमृगरूपः ८३ ब्रह्मवर्चसंविद्यातपःसमुद्भवंतेजःतद्वान् अर्शआद्यच्प्रत्ययांतोयम् ८४ १५१ ७

स्थावराणांपतिः हिमाचलादिरूपः ८५ नियमेंद्रियवर्द्धनः नियमैर्नियहैः छित्वा इंद्रियाणांसमनस्कानांवर्द्धनोहिंसकः क्षीणमनालब्धसमाधिरित्यर्थः
८६ सिद्धार्थः नित्यसिद्धएकमोक्षोज्ञानापगममात्रेणकंठगतविस्मृतचामीकरवदर्थोऽर्थनीयोयस्यससिद्धार्थः तत्वज्ञानार्थी ८७ अतएवसिद्धभूता
र्थः पूर्वंसिद्धःपश्चाद्भूतःसाधितः सिद्धभूतः पूर्वकालेकेतिसमासः सचासौअर्थश्चसिद्धभूतार्थः उक्तविधोमोक्षः ८८ अतएव अचिंत्यःचिंत्यादुपा-
स्यादन्यःप्रत्यगात्मत्वात तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतेइतिश्रुतेश्च ८९ सत्यव्रतःसत्यंब्रह्मतदर्थान्येवव्रतानितपांसियस्य ९० शुचिःनिर्मल
चित्तः ९१ १५२ व्रताधिपःतत्तद्व्रतफलप्रदः ९२ परंविश्वतैजसप्राज्ञेभ्योऽपरब्रह्मभ्यःपरंतुरीयंशिवाख्यं शिवमद्वैतंचतुर्थंमन्यंतइतिश्रुतिप्रसि-
द्धं ९३ अतएवब्रह्मदेशतःकालतोवस्तुतश्चपरिच्छेदशून्यंनेहनानास्तिकिंचनेतिश्रुतेविश्वादीनामनृतत्वेनस्वगतभेदस्याप्यभावादखंडैकरसंवस्तुत
न्मात्रं ९४ भक्तानांपरमागतिः भंजोआमर्दनेऽस्यरूपंभक्तानांविश्वादिषुपूर्वपूर्वस्यउत्तरस्मिन्नुत्तरस्मिन्प्रविलापनलक्षणंविना आमर्दनसैंधवखि

स्थावराणांपतिश्चैवनियमेंद्रियवर्द्धनः सिद्धार्थःसिद्धभूतार्थोचिंत्यःसत्यव्रतःशुचिः १५२
व्रताधिपःपरंब्रह्मभक्तानांपरमागतिः विमुक्तोमुक्ततेजाश्चश्रीमान्श्रीवर्द्धनोजगत् १५३

ल्यसलिलन्यायेनकृतांपरमागतिरितिसायागतिःकैवल्यरूपाविश्रांतिः ९५ विमुक्तःदेहांतेविशेषेणमुक्तः ९६ कुतोविमुक्तत्वमतआहमुक्ततेजाइ
ति तेजःपदेनात्रलिंगशरीरमुच्यते ततमुक्तंतेजोऽनेनेतितथा ९७ मुक्तस्तेजस्त्वमपिकुतः यतःश्रीमान्योगैश्वर्यवान् तथाहियोगीजितमृत्युर्यथा-
कामंभीष्मवदिहैवानिष्ठति ब्रह्मलोकंवामूर्द्धन्यनाड्यागच्छति इहैवलिंगशरीरंकवचवत्यक्त्वाविशुद्धकैवल्यमाप्नोति ९८ श्रीमत्वमपिकुतःयतःश्री
वर्द्धनः ऋचःसामानियजूंषिसाहिश्रीरमृतासतामितिश्रुतेःवेदत्रयरूपाश्रियंकर्मोपास्तिज्ञानकांडात्मिकांवर्द्धयतितत्तदुक्तार्थानुष्ठानेनसम्यक्परिपो
षयतिसश्रीवर्द्धनः ९९ जगत्अव्याकृतादिघटांतनश्वरवस्तुरूपः गच्छतिनित्यंरूपांतरंप्राप्नोतीतिजगदितिव्युत्पत्तेःप्रधानादीनामपिजगत्वंत्वलंगु
णावृत्तमितिकापिलसिद्धांताच्च एवंचयआदौस्थिरउक्तःसएवंजगदित्युक्तेस्थिरेभूमात्मनिजगत्कल्पितमित्युक्तंभवति ततश्चात्मैवेदंसर्वंब्रह्मैवेदं
सर्वंतत्त्वमस्यहंब्रह्मास्म्ययमात्मेत्यादिशास्त्रसिद्धब्रह्माद्वैतंप्रतिपादितंभवतीतिशिवम् १००० १५३ इतिनाम्नांदशमंशतम् ६७

यथेति बहूनांमध्येसहस्रंप्रधानानिनामान्युद्धृत्यस्तुतोसीत्यर्द्धस्यार्थः ५४ ५५ ५६ ५७ एतद्धीति परमंब्रह्मउत्कृष्टाब्रह्मप्राप्तिसाधनभूताविद्या
गतामृजपन्परंब्रह्म कैवल्यंअधिगच्छतीत्यध्याहृत्ययोज्यं ५८ आत्मसंस्थाकरः आत्मनिप्रतीचीसंस्थाअनन्यव्यापाररूपापरिसमाप्तिःतांक-
रोतिमोक्षप्रदइत्यर्थः ५९ तथैवेति बहुभिर्जन्मभिःईशानंस्तवैःस्तुवंतःस्तुष्यंतिचरमंतिचेतिप्रथमद्वितीयचतुर्थस्थैरन्वयः ६० भक्त्याआराध्योयमिति-
निश्चयेन भावेनप्रीत्या ६१ व्रजन्नित्याद्येकवचनानिबहुवचनानि सुपांसुलुगितिवाविभक्तेःसुरार्षःसुः ६२ ६३ ६४ अनन्याअभेदेनशिवोहमस्मी

यथाप्रधानंभगवानितिभक्त्यास्तुतोमया तंनब्रह्मादयोदेवाविदुस्तत्त्वेननर्षयः १५४ स्तोतव्यमर्च्यंवंद्यंचकःस्तोष्यतिजगत्पतिम् भक्त्या
त्वेवंपुरस्कृत्यमयायज्ञपतिर्विभुः ५५ ततोभ्यनुज्ञांसंप्राप्य स्तुतोमतिमतांवरः शिवमेभिःस्तुवन्देवनामभिःपुष्टिवर्द्धनैः ५६ नित्ययु
क्तःशुचिर्भक्तःप्राप्नोत्यात्मानमात्मना ५७ एतद्धिपरमंब्रह्मपरंब्रह्माधिगच्छति ऋषयश्चैवदेवाश्चस्तुवंत्येतेनतत्परम् ५८ स्तूयमा
नोमहादेवस्तुष्यतेनियतात्मभिः भक्तानुकंपीभगवानात्मसंस्थाकरोविभुः ५९ तथैवचमनुष्येषुयेमनुष्याःप्रधानतः आस्तिकाःश्रद्-
धानाश्चबहुभिर्जन्मभिःस्तवैः ६० भक्त्याह्यनन्यमीशानंपरंदेवंसनातनम् कर्मणामनसावाचाभावेनामिततेजसः ६१ शयानाजा-
ग्रमाणाश्चव्रजन्नुपविशंस्तथा उन्मिषन्निमिषंश्चैवचिंतयंतःपुनःपुनः ६२ शृण्वंतःश्रावयंतश्चकथयंतश्चतेभवम् स्तुवंतःस्तूयमानाश्च
तुष्यंतिचरमंतिच ६३ जन्मकोटिसहस्रेषुनानासंसारयोनिषु जंतोर्विगतपापस्यभवेभक्तिःप्रजायते ६४ उत्पन्नाचभवेभक्तिरनन्यास
र्वभावतः भाविनःकारणेचास्यसर्वयुक्तस्यसर्वथा ६५ एतद्देवेषुदुष्प्रापंमनुष्येषुनलभ्यते निर्विघ्नानिश्चलारुद्रेभक्तिरव्यभिचारिणी
६६ तस्यैवचप्रसादेनभक्तिरुत्पद्यतेनृणाम् येनयांतिपरांसिद्धिंतद्भागवतचेतसः ६७ येसर्वभावानुगताःप्रपद्यंतेमहेश्वरम् प्रपन्नवत्स
लोदेवःसंसारात्तान्समुद्धरेत् ६८ एवमन्येविकुर्वंतिदेवाःसंसारमोचनम् मनुष्याणामृतेदेवंनान्याशक्तिस्तपोबलम् ६९ इतितेनेंद्रक
ल्पेनभगवान्सदसत्पतिः कृत्तिवासाःस्तुतःकृष्णतंडिनाशुभबुद्धिना १७० स्तवमेतंभगवतोब्रह्मास्वयमधारयत् गीयतेचसबुध्येतब्र-
ह्माशंकरसन्निधौ ७१

तिभावनया तथाचश्रुतिः अथयोन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदयथापशुरेवंसदेवानामितिभेदेनोपासनंनिंदति शिवैककारणेभक्तिरस्यपुंसःभावि
नोभाग्ययान्सर्वयुक्तस्यसर्वसाधनवतःसर्वथासर्वैःप्रकारैरुत्पन्नाभवतीतिसंबंधः ६५ ६६ ६७ ६८ एवमितिसंसारमोचनंदेवंऋतेअन्येदेवाःमनुष्याणांत
पोबलंविकुर्वंतिनाशयंतीतिसंबंधः तेषांयतोऽन्याशक्तिर्नास्ति ६९ इतितेनेतिनतंडिना १७० गीयतेचसंस्तवोब्रह्मणाशंकरसंन्निधौअतस्तब्राह्मणोबुध्येतजानीया

७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० स्पष्टार्थो ग्रंथशेषः ८१ १८२ इतिश्रीमहाभारते आनुशासनिके पर्वणि टीकायां सप्त-
दशोऽध्यायः १७ ॥ महायोगी पठस्वपुत्रवसितिशेषः हेपुत्रयुधिष्ठिर १ २ ३ ४ आलंबायन आलंबगोत्रः ५ ६ हेपुत्रशतपुत्राणामिशेषः ७

इदं पुण्यं पवित्रं च सर्वदा पापनाशनम् योगदं मोक्षदं चैव स्वर्गदं तोषदं तथा ७२ एवमेतत्पठंते य एकभक्त्या तु शंकरम् या गतिः सांख्ययोगानां व्रजंत्येतां गतिं तदा ७३ स्तवमेवं प्रयत्नेन सदा रुद्रस्य सन्निधौ अब्दमेकं चरेद्भक्तः प्राप्नुयादीप्सितं फलम् ७४ एतद्रहस्यं परमं ब्रह्मणो हृदि संस्थितम् ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ७५ मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तंडिमागमत् महता तपसा प्राप्तस्तंडिना ब्रह्मसद्मनि ७६ तंडिः प्रोवाच शुक्राय गौतमाय च भार्गवः वैवस्वताय मनवे गौतमः प्राह माधव ७७ नारायणाय साध्याय समाधिष्ठाय धीमते यमाय प्राह भगवान्साध्यो नारायणोऽच्युतः ७८ नाचिकेताय भगवानाह वैवस्वतो यमः मार्कंडेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत ७९ मार्कंडेयान्मया प्राप्तो नियमेन जनार्दन तवाप्यहममित्रघ्न स्तवं दद्यां ह्यविश्रुतम् १८० स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन संमितम् नास्य विघ्नं विकुर्वंति दानवा यक्षराक्षसाः ८१ पिशाचा यातुधाना वा गुह्यका भुजगा अपि यः पठेत शुचिः पार्थ ब्रह्मचारी जितेंद्रियः अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् १८२ इतिश्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे महादेवसहस्रनामस्तोत्रे सप्तदशोऽध्यायः १७ वैशंपायन उवाच महायोगी ततः प्राह कृष्णद्वैपायनो मुनिः पठस्व पुत्र भद्रं ते प्रीयतां ते महेश्वरः १ पुरा पुत्र मया मेरौ तप्यता परमं तपः पुत्रहेतोर्महाराज स्तव एषोऽनुकीर्तितः २ लब्धवानीप्सितान्कामानहं वै पांडुनंदन तथा त्वमपि शर्वाद्धि सर्वान्कामानवाप्स्यसि ३ कपिलश्च ततः प्राह सांख्यर्षिर्देवसंमतः मया जन्मान्यनेकानि भक्त्या चाराधितो भवः ४ प्रीतश्च भगवान्ज्ञानं ददौ मम भवांतकम् चारुशीर्षस्ततः प्राह शक्रस्य दयितः सखा आलंबायन इत्येवं विश्रुतः करुणात्मकः ५ मया गोकर्णमासाद्य तपस्तप्त्वा शतं समाः अयोनिजानां दांतानां धर्मज्ञानां सुवर्चसाम् ६ अजराणामदुःखानां शतवर्षसहस्रिणाम् लब्धं पुत्रशतं शर्वात्पुरा पांडुनृपात्मज ७ वाल्मीकिश्चाह भगवान्युधिष्ठिरमिदं वचः विवादे साग्निमुनिभिर्ब्रह्मघ्नो वै भवानिति ८ उक्तः क्षणेन चाविष्टस्तेनाधर्मेण भारत सोऽहमीशानमनघममोघं शरणं गतः ९ मुक्तश्चास्मि ततः पापैस्ततो दुःखविनाशनः आह मां त्रिपुरघ्नो वै यशस्तेऽग्र्यं भविष्यति १० जामदग्न्यश्च कौंतेयमिदं धर्मभृतां वरः ऋषिमध्ये स्थितः प्राह ज्वलन्निव दिवाकरः ११

विवादे वेदे विपरीतवादे अग्निसहितैर्मुनिभिरुक्तः इतिसं-
बंधः ८ तेनवेदविरोधजेन ९ १० ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पितृतुल्याविप्राज्ज्येष्ठोभ्राता पितुःसम इति स्मृतेः ज्येष्ठाभ्रातरस्तेषांवधेन १२ १३ १४ शिखंडीकपर्दीशिवविग्रहः कल्याणशरीरः १५ १६ १७ शक्रस्यधर्म-
शास्त्रे क्वचिदन्यथाकरणात्कुपितस्य प्रभुःप्रार्थितःसन्नितिशेषः १८ १९ २० उच्चारितेअन्ययेतिशेषः २१ पापंवितथाभिनिवेशंत्यक्त्वामर्मास्पृशविचारय
अयज्ञवाहिनंनयज्ञंवहतीतितंपापंअवक्षरपाठजमपराधं २२ २३ २४ २५ निधनेअंतेसद्यएवेत्यर्थः २६ साम्यंअवैषम्यं युवयोःयुवयोःप्रत्यसमदर्शनकर्त्तो

पितृविप्रवधेनाहमार्त्तोवैपांडवाग्रज शुचिर्भूत्वामहादेवंगतोस्मिशरणंनृप १२ नामभिस्त्वास्तुवंदेवंततस्तुष्टोभवद्भवः परशुंचततोदेवोदि
व्यान्यस्त्राणिचैवमे १३ पापंचतेनभविताअजेयश्चभविष्यसि नतेप्रभवितामृत्युरजरश्चभविष्यसि १४ आहमांभगवानेवंशिखंडीशि
वविग्रहः तद्वाप्तंचमेसर्वंप्रसादात्तस्यधीमतः १५ विश्वामित्रस्तदोवाचक्षत्रियोहंतदाभवम् ब्राह्मणोहंभवानीतियथाचाराधितोभ
वः १६ तत्प्रसादान्मयाप्राप्तंब्राह्मण्यंदुर्लभंमहत् असितोदेवलश्चैवप्राहपांडुसुतंनृपम् १७ शापाच्छक्रस्यकौंतेयविभोधर्मोनशत्तदा
तन्मेधर्म्यंयशश्चाग्र्यमायुश्चैवाददत्प्रभुः १८ ऋषिर्गृत्समदोनामशक्रस्यदयितःसखा प्राहाजमीढंभगवान्बृहस्पतिसमद्युतिः १९
वरिष्ठोनामभगवांश्चाक्षुषस्यमनोःसुतः शतक्रतोरचिंत्यस्यसत्रेवर्षसहस्रिके २० वर्त्तमानेऽब्रवीद्वाक्यंसाम्न्युच्चारितेमयारथंत
रंद्विजश्रेष्ठनसम्यगितिवर्त्तते २१ समीक्षस्वपुनर्बुद्ध्यापापंत्यक्त्वाद्विजोत्तम अयज्ञवाहिनंपापमकार्षीस्त्वंसुदुर्मते २२ एवमुक्त्वामहा
क्रोधःप्राहशंभुःपुनर्वचः प्रज्ञयारहितोदुःखीनित्यभीतोवनेचरः २३ दशवर्षसहस्राणिदशाष्टौचशतानिच नष्टपानीयपवनेमृगैरन्यै-
श्चवर्जिते २४ अयज्ञीयद्रुमेदेशेरुरुसिंहनिषेविते भवितात्वंमृगःक्रूरोमहादुःखसमन्वितः २५ तस्यवाक्यस्यनिधनेपार्थजातोस्म्य
हंमृगः ततोमांशरणंप्राप्तंप्राहयोगीमहेश्वरः २६ अजरश्चामरश्चैवभवितादुःखवर्जितः साम्यंसमस्तुतेसौख्यंयुवयोर्वर्द्धतांक्रतुः २७
अनुग्रहानेवमेषकरोतिभगवान्विभुः परंधाताविधाताचसुखदुःखेचसर्वदा २८ अचिंत्यएषभगवान्कर्मणामनसागिरा नमेतातस्तु
धिश्रेष्ठविद्ययापंडितःसमः २९ वासुदेवस्तदोवाचपुनर्मतिमतांवरः सुवर्णाक्षोमहादेवस्तपसातोषितोमया ३० ततोथभगवानाह
प्रीतोमांवैयुधिष्ठिर अर्थात्प्रियतरःकृष्णमत्प्रसादाद्भविष्यसि ३१ अपराजितश्चयुद्धेषुतेजश्चैवानलोपमम् एवंसहस्रशश्चान्यान्महा
देवोवरंददौ ३२ मणिमंथेथशैलेवैपुरासंपूजितोमया वर्षायुतसहस्राणांसहस्रंशतमेवच ३३ ततोमांभगवान्प्रीतइदंवचनमब्रवी
त् वरंवृणीष्वभद्रंतेयस्तेमनसिवर्त्तते ३४

२७ परंउत्कृष्टंयथास्यात्तथा २८ नमेमयाममःपंडितोस्तिविद्ययाहेतुना २९ ३० अर्थात्ध-
र्मस्यफलंकामस्यमूलंचार्थः सर्वस्मात्प्रियः ततोपिप्रियः अंतरात्मातंतुल्यःसर्वेषांभविष्यतीत्यर्थः ३१ ३२ पुरापूर्वंवतारे ३३ ३४ ६ ७

३५ ३६ ३७ चतुःषष्टिः अंगानि अवयवायस्य तं कलासमूहज्ञानस्य तत् मनोयज्ञेन मानसेन पूजनेन ३८ ३९ ४० ४१ इतिमत्वा हृदिस्थि
तंमतं ज्ञात्वा सुरसत्तमःमांप्राह यातवमयिसंभावना एतस्मात्फलमहं प्राप्स्ये इति अस्याः फलात् पुण्यात्तवकृष्णोनाम पुत्रोभविष्यति ४२ ४३ ४४
४५ ४६ ४७ पादाच्चतुर्थात् तपःशौचंदयासत्यमितिचत्वारोधर्मस्यपादाःतेषांचतुर्थात्सत्वादेवतवात्माशरीरम् ४८ ४९ ५० ५१ पित

ततःप्रणम्यशिरसा इदंवचनमब्रुवम् यदिप्रीतोमहादेवोभक्त्यापरमयाप्रभुः ३५ नित्यकालंतवेशान भक्तिर्भवतुमेस्थिरा एवमस्त्विति
भगवांस्तत्रोक्त्वांतरधीयत ३६ जैगीषव्यउवाच ममाष्टगुणमैश्वर्यंदत्तंभगवतापुरा यत्नेनान्येनबलिनावाराणस्यांयुधिष्ठिर
३७ गर्गउवाच चतुःषष्ट्यंगमददत्कलाज्ञानंममाद्भुतम् सरस्वत्यास्तटेतुष्टोमनोयज्ञेनपांडव ३८ तुल्यंममसहस्रंतुसुतानां-
ब्रह्मवादिनाम् आयुश्चैवसपुत्रस्यसंवत्सरशतायुतम् ३९ पराशरउवाच प्रसाद्येहपुराशर्वंमनसाचिंतयंनृप महातपामहाते-
जामहायोगीमहायशाः ४० वेदव्यासःश्रियावासोब्राह्मणःकरुणान्वितः अप्यसावीप्सितःपुत्रोममस्याद्वैमहेश्वरात् ४१ इतिमत्वा
हृदिमतंप्राहमांसुरसत्तमः मयिसंभावनायास्याःफलात्कृष्णोभविष्यति ४२ सावर्णस्यमनोःसर्गेसप्तर्षिश्चभविष्यति वेदानांच-
सवैवक्ताकुरुवंशकरस्तथा ४३ इतिहासस्यकर्ताचपुत्रस्तेजगतोहितः भविष्यतिमहेंद्रस्यदयितःसमहामुनिः ४४ अजरश्चामर-
श्चैवपराशरसुतस्तव एवमुक्त्वासभगवांस्तत्रैवांतरधीयत ४५ युधिष्ठिरमहायोगीवीर्यवानक्षयोव्ययः मांडव्यउवाच अचौ
रश्चौरशंकायांशूलेभिन्नोह्यहंतदा तत्रस्थेनस्तुतोदेवःप्राहमांवैनरेश्वर ४६ मोक्षंप्राप्स्यसिशूलाच्चजीविष्यसिसमार्बुदम् रुजाशू
लकृताचैवनतेविप्रभविष्यति ४७ आधिभिर्व्याधिभिश्चैववर्जितस्त्वंभविष्यसि पादाच्चतुर्थात्संभूतोआत्मायस्मान्मुनेतव ४८ त्वंभ
विष्यस्यनुपमोजन्मवैसफलंकुरु तीर्थाभिषेकंसकलंत्वमविघ्नेनवाप्स्यसि ४९ स्वर्गंचैवाक्षयंविप्रविदधामितवोर्जितम् एवमुक्त्वा
तुभगवान्वरेण्योवृषवाहनः ५० महेश्वरोमहाराजकृत्तिवासामहाद्युतिः सगणोदेवतश्रेष्ठस्तत्रैवांतरधीयत ५१ गालवउवाच
विश्वामित्राभ्यनुज्ञातोह्यहंपितरमागतः अब्रवीन्मांततोमातादुःखितारुदतीभृशम् ५२ कौशिकेनाभ्यनुज्ञातंपुत्रंवेदविभूषितम् न
तातंतरुणंदांतंपितात्वांपश्यतेनघ ५३ श्रुत्वाजनन्यावचनंनिराशोगुरुदर्शने नियतात्मामहादेवमपश्यंसोब्रवीच्चमाम् ५४ पिता
माताचतेत्वंचपुत्रमृत्युविवर्जिताः भविष्यथविशक्षिप्रंद्रष्टासिपितरंक्षये ५५ अनुज्ञातोभगवतागृहंगत्वायुधिष्ठिर अपश्यंपि
तरंतातइष्टिंकृत्वाविनिःसृतम् ५६

रुद्रस्येइतिबुध्वागृहमागतः दुःखितावैधव्यदुःखेन ५२ ५३ ५४ क्षयेगृहेविशप्रविश ५५ ५६ ५७

शरणाकुरून् वाय्वाघातेनवास्वयंवापक्वतयाफलानामधःपतनेनविशरणंशूरणात्प्रधानाःकुरवोऽन्यानिशरणाकुरवस्तान् शीर्यतेविशरणेऽस्माद्वावेल्युः कुरुर्न
पांतरेभक्तेइतिमेदिनी भक्तओदनःसास्नलीदाविलेईक्षणेऽयस्य ५७ ५८ ईश्वरोविष्णुः ५९ ६० ६१ ६२ ६३ ६४ कूलानि गृहतडागादी
नि गृहेकूलंतटेकपेसैन्यपश्चंतटाकयोरितिमेदिनी ६५ आत्मनाचित्तेन ६६ ६७ ६८ ६९ आदित्यचंद्रावित्यादिसर्वेशर्वाज्जातंविद्धीतिसप्तमस्थेनान्वयः

उपस्पृश्यगृहोत्वधमकुशाश्वशरणाकुरून् तान्वसृज्यचमाप्राह्मपितासास्राविलेक्षणः ५७ प्रणमंतंपरिष्वज्यमूर्ध्न्युपाघ्रायपांडव दिष्ट्या
दृष्टोसिमेपुत्रकृतविद्यइहागतः ५८ वैशंपायनउवाच एतान्यत्यद्भुतान्येवकर्माण्यथमहात्मनः प्रोक्तानिमुनिभिःश्रुत्वाविस्मयामास
पांडवः ५८ ततःकृष्णोब्रवीद्वाक्यंपुनर्मतिमतांवरः युधिष्ठिरंधर्मनिधिंपुरुहूतमिवेश्वरः ५९ वासुदेवउवाच उपमन्युर्मयिप्राह
तपन्निवदिवाकरः अशुभैःपापकर्माणोयेनराःकलुषीकृताः ६० ईशानंनप्रपद्यंतेतमोराजसवृत्तयः ईश्वरंसंप्रपद्यंतेद्विजाभावितभाव
नाः ६१ सर्वथावर्तमानोपियोभक्तःपरमेश्वरे सदृशोरण्यवासीनांमुनीनांभावितात्मनाम् ६२ ब्रह्मत्वंकेशवत्वंवाशिवत्वंवासुरैःसह
त्रैलोक्यस्याधिपत्यंवातुष्टोरुद्रःप्रयच्छति ६३ मनसापिशिवंतातयेप्रपद्यंतिमानवाः विधूयसर्वपापानिदेवैःसहवसंतिते ६४ भित्वा
भित्वाचकूलानिहत्वासर्वमिदंजगत् यजेद्देवंविरूपाक्षंनसपापेनलिप्यते ६५ सर्वलक्षणहीनोपियुक्तोवासर्वपातकैः सर्वंनुदतितत्पाप
भावयंच्छिवमात्मना ६६ कीटपक्षिपतंगानांतिरश्चामपिकेशव महादेवप्रपन्नानांनभयंविद्यतेक्वचित् ६७ एकमेवमहादेवभक्तायेमा
नवाभुवि ६८ नतेसंसारवशगाइतिमेनिश्चितामतिः ततःकृष्णोब्रवीद्वाक्यंधर्मपुत्रंयुधिष्ठिरम् ६९ विष्णुरुवाच आदित्यचंद्रा
वनिलानलौचद्यौर्भूमिरापोवसवोथविश्वे ७० ब्रह्माशक्रोमारुतोब्रह्मसत्यंवेदायज्ञादक्षिणावेदवाहाः सोमोयष्टायच्चहव्यंहविश्चर
क्षादीक्षासंयमायेचकेचित् ७१ स्वाहावौषट्ब्राह्मणाःसौरभेयीधर्मंचाग्र्यंकालचक्रंबलंच यशोदमोबुद्धिमतास्थितिश्चशुभाशुभंये
मुनयश्चसप्त ७२ अग्र्याबुद्धिर्मनसादर्शनेचस्पर्शश्चाग्र्यःकर्मणांयाचसिद्धिः गणादेवानामूष्मपाःसोमपाश्चलेखाःसुयामास्तुषि
ताब्रह्मकायाः ७३ आभासुरागंधपाधूमपाश्चवाचाविरुद्धाश्चमनोविरुद्धाः शुद्धाश्चनिर्माणरताश्चदेवाःस्पर्शाशनादर्शपाआज्यपाश्च
७४ चिन्त्यद्योतायेचदेवेषुमुख्यायेचाप्यन्येदेवतास्त्वाजमीढ सुपर्णगंधर्वपिशाचदानवायक्षास्तथाचारणपन्नगाश्च ७५

७० सत्यंब्रह्मतत्त्वावेदको
वेदउपनिषत्प्राधान्यात्पृथक्कीर्तनं वेदवाहाःवेदपाठकाः हव्यंहविर्देवभागः ७१ ७२ अग्र्यासूक्ष्माब्रह्माकारधीवृत्तिः ७३ धूमपाधूमेनैवतृप्यंतः वा
चाविरुद्धाःवाङ्नियमनशीलाःनिर्माणंअनेकधाभवनंयोगेनानेकशरीरधारणंतद्रताः ७४ चिन्त्यद्योताःसंकल्पितमात्रंवस्तुयेषांसद्यःपुरतःप्रकाशतेतादृशाः

७६ तत्संभृताइति भूतेःसकाशाद्बीजानितथ्याकृताकाशाख्याईश्वराःभूतकृतोदियदादिस्रष्टारस्तनएवानंदमात्रशरीराश्चतुर्थात्संभृताः तेचवरेण्याः उपासकैःशंकरइत्यपेप्सुभिर्वरणीयाः पूर्वबीजाद्बीजांतरमिवानादौसृष्टिप्रवाहःपूर्वपूर्वस्मादीशादुत्तरउत्तरईशोभूमभूमौउत्पद्यतेइत्याशयेनोक्तंपुरातनीमिति यथाबीजशक्त्याशर्कराद्यासुविविद्यमानयाभूतवृक्षीक्रियतएवंईश्वरशक्त्याआनंदचिन्मात्रंवस्तुविश्वाकारंक्रियतइतितेनशक्तिंविनाकथंकेवलाद्दुःसृष्टिरित्यपास्तंशक्त्यानादित्वस्याभ्युपगमात् एतेनबीजशक्तेर्भर्जनेन ज्ञानेनजीवगताविद्याशक्तेर्विद्याग्निनादाहेसतिमुक्तानापुनरनुत्पत्तिःकेवलीभावश्च व्याख्यातः ७७ यततपसाध्यानेनविचिन्वंतःविचिन्वंतिआलोचयंतिईश्वरसूत्रंविराजंवातत्सर्वंततःस्थवीयःस्थूलतरमेव अतःकारणात्प्राणहेतोःजीवनार्थंमोक्षार्थंकिंचिद्वाङ्मनसयोरगोचरंतत्त्वंनतोस्मिशरणीभूयप्राप्तोस्मि सएवईश्वररूपोभूत्वावरान्ददातुभूमिरिवबीजाद्यात्मतागताजनास्तत्पर्यंतानद्य

स्थूलंसूक्ष्मंमृदुचाप्यसूक्ष्मंदुःखंसुखंदुःखमनंतरंच सांख्ययोगंतत्पराणांपरंचशर्वाज्जातंविद्धियत्कीर्तितंमे ७६ तत्संभूताभूतकृतोवरेण्याःसर्वेदेवाभुवनस्यास्यगोपाः आविश्येमांधरणींयेभ्यरक्षन्पुरातनींतस्यदेवस्यसृष्टिं ७७ विचिन्वतस्तत्तपसानत्स्थवीयः किंचित्तत्त्वंप्राणहेतोर्नतोस्मि ददातुवेदःसवरानिहेष्टानभिष्टुतोनःप्रभुरव्ययःसदा ७८ इमस्तवंसन्नियतेंद्रियश्चभूत्वाशुचिर्यःपुरुषःपठेत् अभग्नयोगोनियतोमासमेकंसप्राप्नुयादश्वमेधेफलंयत् ७९ वेदान्कृत्स्नान्ब्राह्मणःप्राप्नुयात्तुजयेन्नृपःपार्थमहींचकृत्स्नां वैश्योलाभंप्राप्नुयान्नैपुणंचशूद्रोगतिंप्रेत्यतथासुखंच ८० स्तवराजमिमंकृत्वारुद्रायदधिरेमनः सर्वदोषापहंपुण्यंपवित्रंचयशस्विनः ८१ यावत्यस्यशरीरेषुरोमकूपाणिभारत तावंत्यब्दसहस्राणिस्वर्गेवसतिमानवः ८२ इतिश्रीमहाभारतेआनुशासनिके पर्वणिदानधर्मेमेघवाहनोपाख्यानेअष्टादशोऽध्यायः १८ युधिष्ठिरउवाच यदिदंसहधर्मेतिप्रोच्यतेभरतर्षभ पाणिग्रहणकालेतुस्त्रीणामेतत्कथंस्मृतम् १

त ७८ इमंभीष्मवाक्यादारभ्यएतावत्पर्यंतम् ७९ ८० कृत्वाशरणीकृत्यरुद्रायरुद्रेनिदधिरेप्रविलापितवंतः ८१ ८२ नामूर्तेर्मूर्तंभेदःकखमिवलिपिभिद्रेतुमीष्टेकथंचिद्बीजंचामूर्तंभेदोऽनिमिवकरखमिवच्छ्जकान्यत्वजन्मा कोभिद्याद्बीजबाजंखमिवलिपिभिदामूर्तिभेदेनमंदःक्लेनाद्वैतंचतुर्थंशिवमुपनिषदिज्ञातमात्मानमीहे १ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांदानधर्मेषुमेघवाहनोपाख्यानेअष्टादशोऽध्यायः १८ तमेवशरणंव्रजेत्यथतमेवचाद्यंपुरुषंप्रपद्यइतिसूचितंविवृतवान्हरिःपुरुषम् अथैतदुपलब्धयेविविधधर्मजातंवदन्नविकुलयतियोषितःपरविरक्तनाशाय ज्ञेयंवस्तुश्रुत्वातज्ज्ञानसाधनधर्मंशुश्रूषुःसहोभौसरतांधर्मंक्षौमेवसानौजायापतीअग्निमादधीयातामितिधर्मेपत्नीसाहित्यंशास्त्रेदृश्यमानमाक्षिपति पाणिग्रहणात्प्राक्साहित्याभावात्सहोभावितिवाक्यंव्याकुप्येतेतिभावः १

धर्मविशेषे एव साहित्यमपेक्ष्यते तेन सर्वत्रेति आशंक्य धर्मं विकल्पयति आर्षइति ऋषिभिर्मंत्रैः प्रकाशितः श्रौतस्मार्तक्रियारूप आर्षः केवलं वेदविहितत्वाद्वा प्राजा
पत्यः प्रजापतिना संतानकर्मणा प्रथितः नापुत्रस्य लोकोस्तीति श्रुतत्वात् अकरणेऽनिष्टदर्शनाद्वा आसुरः असुषु रमंते इति असुरास्तेषामयमासुरः केवलं इंद्रियप्रीतिदर्श
नाद्वा साहित्यमुक्तमित्यर्थः २ आद्यमाक्षिप्य संदेहमाहार्द्धेन संदेहइति अत्र दोषं स्पष्टयति इहैव साहित्यं दंपत्योर्दृश्यते परलोके तयोः साहित्यं क्व नु न क्वापीत्य
र्थः ३ एतदेवोपपादयति पूर्वमिति सार्द्धेन सत्यपि कर्मणि साहित्ये दंपत्योः स्वस्ववासनाभेदकृतो धर्मभेदो दुर्वार इत्यार्षं प्रमाणं निर्युक्तिकमित्यर्थः ४ ५ प्र
जार्थं साहित्यमिति द्वितीयमक्षं दूषयति अनृताः स्त्रिय इति सूत्रकारो धर्मप्रवक्ता अनृतं साहसं माया मूर्खत्वमतिलोभता इति स्त्रीधर्मानाह एवं च प्रजार्थं साहि-

आर्ष एष भवेद्धर्मः प्राजापत्योथवासुरः यदेतत्सहधर्मेति पूर्वमुक्तं महर्षिभिः २ संदेहः सुमहानेष विरुद्ध इति मे मतिः इह यः सहधर्मो वै प्रे
त्यायं विहितः क्व नु ३ स्वर्गो मृतानां भवति सहधर्मः पितामह पूर्वमेकस्तु म्रियते क्व चैकस्तिष्ठते वद ४ नानाधर्मफलोपेता नानाक
र्मनिवासिनः नानानिरयनिष्ठांता मानुषा बहवो यदा ५ अनृताः स्त्रिय इत्येवं सूत्रकारो व्यवस्यति यदानृताः स्त्रियस्तात सहधर्मः
कुतः स्मृतः ६ अनृताः स्त्रिय इत्येवं वेदेष्वपि हि पठ्यते धर्मोयं पूर्विका संज्ञा उपचारः क्रियाविधिः ७ गह्वरं प्रतिभात्येतन्मम चिंतयतो
निशम् निःसंदेहमिदं सर्वं पितामह यथाश्रुति ८ यदेतद्यादृशं चैतद्यथा चैतत्प्रवर्त्तितम् निखिलेन महाप्राज्ञ भवानेतद्ब्रवीतु मे .
९ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनम् अष्टावक्रस्य संवादं दिशया सह भारत १० निवेष्टुकामस्तु पुरा अ
ष्टावक्रो महातपाः ऋषेरथ वदान्यस्य वव्रे कन्यां महात्मनः ११

त्यमप्यनुपपन्नं कुंडगोलकादीनामप्युत्पत्तिदर्शनात् ६ पूर्विका पूर्ववती गौणी धर्मसंज्ञा धर्मपत्न्यां विधौ यथा भिक्षुकाणामयं धर्मो भूमिः परगृहादिति वद्धर्मोपि
धर्मपदप्रयोग इत्यर्थः तत्र च पाणिग्रहणादेर्वेदविहितत्वमपि श्येनादिवत् पुरुषेच्छामनुरुध्यैव न तु वस्तुतस्तस्य धर्मत्वमित्याह उपचारः क्रियाविधिरिति ७ ग
ह्वरं गहनं दुर्बोधमित्यर्थः ८ ९ कामुकयोः रागतः प्राप्तो मिथुनीभाव इति न तत्र विधिरित्याशंक्याथ कामुकत्वेनाह अत्रेत्यादिना अयं भावः यथा दर्शपूर्णमा
सादपूर्वप्रयुक्तमपां प्रणयनमाश्रित्य गोदोहनेन पशुकामस्य प्रणयेदित्यादिविधयः प्रवर्त्तंते एवं रागप्रयुक्तं दारसंग्रहमाश्रित्य धर्मप्रजाविधयः प्रवर्त्तंते नी
रागस्य तु न दारसंग्रहो विधीयते तेनितरां तदुत्तरकालीना धर्मप्रजादिविधयः इति दिशया दिगभिमानिदेवतया १० निवेष्टुकामः दारसंग्रहार्थं ११ ७ ७

१२ १२मनोजहारेत्यनेनअर्जुःअमुकलंविवरीतुंकथामाहऋषिरित्यादिना १४ : १५ नान्दैःकांस्यमयैर्वाद्यभांडैः शंपानालैःविद्युद्वदतिचपलैर्भ्रमणा

सःअप्रमान्नामवैनाम्नारूपेणाप्रतिमांभुवि गुणप्रभावशीलेनचारित्रेणचशोभनाम् १२ सातस्यदृष्ट्वैवमनोजहारशुभलोचना वनरा
जीयथाचित्रावसंतेकुसुमाचिता १३ ऋषिस्तमाहदेक्षामेसुतातुभ्यंहितच्छृणु गच्छतावद्दिशंपुण्यामुत्तरांद्रक्ष्यसेनतः १४ अष्टाव
क्रउवाच किंद्रष्टव्यंमयातत्रवक्तुमर्हतिमेभवान् तथेदानीमयाकार्यंयथावक्ष्यतिमांभवान् १५ वदान्यउवाच धनदंसमतिक्रम्य
हिमवंतंचपर्वतम् रुद्रस्यायतनंद्रक्ष्यसिसिद्धचारणसेवितम् १५ संहृष्टैःपार्षदैर्जुष्टंनृत्यद्भिर्विविधाननैः दिव्यांगरागैःपैशाचैर्वन्यैर्ना-
नाविधैःप्रभो १५ पाणितालसतालैश्चशंपातालैःसमैस्तथा संप्रहृष्टैःप्रनृत्यद्भिःशर्वस्तत्रनिषेव्यते १६ इष्टंकिलगिरेःस्थानंतद्दिव्य
मितिशुश्रुमः नित्यंसन्निहितोदेवस्तथातेपार्षदाःस्मृताः १७ तत्रदेव्यातपस्तप्तंशंकरार्थंसुदुश्चरम् अतस्तदिष्टंदेवस्यतथोमायाइ
तिश्रुतिः १८ पूर्वेतत्रमहापार्श्वेदेवस्योत्तरतस्तथा ऋतवःकालरात्रिश्चयेदिव्यायेचमानुषाः १९ देवंचोपासतेसर्वेरूपिणःकिलतत्र
ह तदतिक्रम्यभवनंत्वयायातव्यमेवहि २० ततोनीलवनोद्देशंद्रक्ष्यसेमेघसन्निभम् रमणीयमनोग्राहितत्रवैद्रक्ष्यसेस्त्रियम् २१
तपस्विनीमहाभागांवृद्धांदीक्षामनुष्ठिताम् द्रष्टव्यासात्वयातत्रसंपूज्याचैवयत्नतः २२ तांदृष्ट्वाविनिवृत्तस्त्वंततःपाणिंगृहीष्यसि
यद्येषसमयःसर्वःसाध्यतांतत्रगम्यताम् २३ अष्टावक्रउवाच तथास्तुसाधयिष्यामितत्रयास्याम्यसंशयम् यत्रत्वंवदसेसा
धोभवान्भवतुसत्यवाक् २४ भीष्मउवाच ततोगच्छत्सभगवानुत्तरामुत्तरांदिशम् हिमवंतंगिरिश्रेष्ठंसिद्धचारणसेवितम्
२५ सगत्वाद्विजशार्दूलोहिमवंतंमहागिरिम् अभ्यगच्छन्नदींपुण्यांबाहुदांधर्मशालिनीम् २६ अशोकेविमलेतीर्थेस्नात्वातर्पित-
प्र्यदेवताः २७ तत्रवासायशयनेकौश्येसुखमुवासह २८ ततोरात्र्यांव्यतीतायांप्रातरुत्थायसद्विजः २९ स्नात्वाप्रादुश्चकाराग्निंस्तु
त्वाचैनंप्रधानतः ३० रुद्राणीरुद्रमासाद्यहृदेतत्रसमाश्वसत् ३१ विश्रान्तश्चसमुत्थायकैलासमभितोययौ ३२ सोपश्यत्कांचनद्वा
रंदीप्यमानंश्रियाश्रिया मंदाकिनींचनलिनींधनदस्यमहात्मनः ३३ अथतेराक्षसाःसर्वेयेभिरक्षंतिपद्मिनीम् प्रत्युत्थिताभगवंतम
णिभद्रपुरोगमाः ३४ सतान्प्रत्यर्चयामासराक्षसान्भीमविक्रमान् निवेदयतमांक्षिप्रंधनदायेतिचाब्रवीत् ३५ तेराक्षसास्तथा
राजन्भगवंतमथाब्रुवन् असौवैश्रवणोराजास्वयमायातितेंतिकम् ३६ विदितोभगवानस्यकार्यमागमनस्ययत् पश्यैनंत्वंमहाभा
गज्वलंतमिवतेजसा ३७

दिव्यरैतैःगीतनृत्यक्रियामानविशेषैःसमैर्भ्रमणादिरहितैस्तैरेवं १६ १७ १८ महापार्श्वेपर्वते १९ २० २१ २२ २३ २४ उत्तरांश्रेष्ठां २५ २६ २७ २८ २९ ३०
३१ ३२ ३३ ३४ ३५ ३६ ३७

३८ ३९ ४० ४१ ४२ भवच्छंदंभवदिच्छा ४३ ४४ ४५ ४६ प्रनृत्ताप्सरसः पदार्थाभिनयोवाक्यार्थाभिनयश्चयत्रवर्त्ततेतत्प्रनृत्तंतत्प्रियाः
अप्सरसःप्रनृत्ताप्सरसःमध्यमपदलोपीसमासः ४७ ४८ ४९ हार्यंहरतीतिहार्यः ५० ५१ ५२ भगवानअष्टावक्रःउत्पत्तिंचनिरोधंचभूताना
मागतिंगतिं वेत्तिविद्यामविद्यांचसवाच्योभगवानिति दिव्यैर्भोगैरजितोपिसर्वज्ञोपिवदान्यकन्याभार्थदिगंतंप्रतिगतइतिअहोकष्टंकामपिशाचोदुर्जे

ततोवैश्रवणोभ्येत्यअष्टावक्रमनिंदितम् विधिवत्कुशलंपृष्ट्वाततोब्रह्मर्षिमब्रवीत् ३८ सुखंप्राप्तोभवान्कच्चित्किंवामत्तश्चिकीर्षति
ब्रूहिसर्वंकरिष्यामियन्मांवक्ष्यसिवैद्विज ३९ भवनंप्रविशत्वंमेयथाकामंद्विजोत्तम सत्कृतःकृतकार्यश्चभवान्यास्यत्यविघ्नतः ४० प्रा
विशद्भवनंस्वंवैगृहीत्वातंद्विजोत्तमम् आसनंस्वंददौचैवपाद्यमर्घ्यंतथैवच ४१ अथोपविष्टयोस्तत्रमाणिभद्रपुरोगमाः निषेदुस्त
त्रकौबेरायक्षगंधर्वकिन्नराः ४२ ततस्तेषांनिषण्णानांधनदोवाक्यमब्रवीत् भवच्छंदंसमाज्ञायनृत्यंत्वप्सरोगणाः ४३ आति
थ्यंपरमंकार्यंसुश्रूषाभवतस्तथा संवर्त्ततामित्युवाचमुनिर्मधुरयागिरा ४४ अथोर्वरामिश्रकेशीरंभाचैवोर्वशीतथा अलंबुषा
घृताचीचचित्राचित्रांगदारुचिः ४५ मनोहरासुकेशीचसुमुखीहासिनीप्रभा विद्युताप्रशमीदांताविद्योतारतिरेवच ४६ एताश्चा-
न्याश्चवैबह्व्यःप्रनृत्ताप्सरसःशुभाः अवादयंश्चगंधर्वावाद्यानिविविधानिच ४७ अथप्रवृत्तेगांधर्वेदिव्येऋषिरुपाविशत् दिव्यंसं
वत्सरंतत्रारमत्तैषमहातपाः ४८ ततोवैश्रवणोराजाभगवंतमुवाचह साग्रःसंवत्सरोजातोविप्रेहनवपश्यतः ४९ हार्योयंविषयोब्र-
ह्मन्गांधर्वोनामनामतः छंदतोवर्त्ततांविप्रयथावदतिवाभवान् ५० अतिथिःपूजनीयस्त्वमिदंचभवतोगृहम् सर्वमाज्ञाप्यतामा-
भुपरवंतोवयंत्वयि ५१ अथवैश्रवणंप्रीतोभगवान्प्रत्यभाषत अर्चितोस्मियथान्यायंगमिष्यामिधनेश्वर ५२ प्रीतोस्मिसदृशं
चैवंतवसर्वंधनाधिप तवप्रसादाद्भगवान्महर्षेश्चमहात्मनः ५३ नियोगादद्ययास्यामिवृद्धिमानृद्धिमान्भव अथनिष्क्रम्यभ
गवान्प्रययावुत्तरामुखः ५४ कैलासंमंदरंहैमंसर्वाननुचचारह तानतीत्यमहाशैलान्कैरातंस्थानमुत्तमम् ५५ प्रदक्षिणंतथाचक्रे
प्रयतःशिरसानतः धरणीमवतीर्याथपूतात्मासौतदाभवत् ५६ सतंप्रदक्षिणंकृत्वात्रिःशैलंचोत्तरामुखः समेनभूमिभागेनययौ-
प्रीतिपुरस्कृतः ५७ ततोपरंवनोद्देशंरमणीयमपश्यत सर्वर्तुभिर्मूलफलैःपक्षिभिश्चसमन्वितैः ५८ रमणीयैर्वनोद्देशैस्तत्रतत्रवि
भूषितम् तत्राश्रमपदंदिव्यंददर्शभगवानथ ५९

यइतिभावः ५३ ऋद्धिरुपचयस्तद्वान् ऋद्धिःसंपत्तद्वान् ५४ कैरातंकिरातवेषधारिणोम
हादेवस्य ५५ धरणीमवतीर्येत्यनेनाकाशमार्गेणाष्टावक्रोगच्छतीतिगम्यते ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४

६० ६१ ० ६२ ६३ ६४ ६५ ६६ ६७ सप्तइतरदिग्देवताः उत्तराधिष्ठात्रीतुदेवतामुख्याऽष्टमी ६८ ६९ ७० ७१ सेवज
रायुक्ता ७२ . ७३ प्रज्ञाताअत्यंतंज्ञानवतीप्रशांतातानिर्जितचित्ता ७४ ७५ ७६ . ७७ अर्थेतिअतिवृद्धायाअपिस्त्रियइयंगतिःकिंमुवक्तव्यंयुवत्या अ

शैलांश्चविविधाकारान्कांचनान्रत्नभूषितान् मणिभूमौनिविष्टाश्चपुष्करिण्यस्तथैवच ६० अन्यान्यपिसुरम्याणिपश्यतःसुबहून्य
था भृशंतस्यमनोरेमेमहर्षेर्भावितात्मनः ६१ सतत्रकांचनंदिव्यंसर्वरत्नमयंगृहम् ददर्शाद्भुतसंकाशंधनदस्यगृहाद्वरम् ६२ महांतो
यत्रविविधामणिकांचनपर्वताः विमानानिचरम्याणिरत्नानिविविधानिच ६३ मंदारपुष्पैःसंकीर्णांतथामंदाकिनींनदीम् स्वयंप्रभा-
श्चमणयोवज्रैर्भूमिश्चभूषिता ६४ नानाविधैश्चभवनैर्विचित्रमणितोरणैः मुक्ताजालविनिक्षिप्तैर्मणिरत्नविभूषितैः ६५ मनोदृष्टि
हरैरम्यैःसर्वतःसंवृतंशुभैः ऋषिभिश्चावृततत्रआश्रमंतंमनोहरम् ६६ ततस्तस्याभवच्चिंताकुत्रवासोभवेदिति अथद्वारंसमभि-
तोगत्वास्थितातताब्रवीत् अतिथिंसमनुप्राप्तमभिजानंतुयेत्रवै ६७ अथकन्याःपरिवृतागृहात्तस्माद्विनिर्गताः नानारूपाःसप्तविभो
कन्याःसर्वामनोहराः ६८ यांयामपश्यत्कन्यांवैसासातस्यमनोहरा नचशक्तोवारयितुमनोस्याथावसीदति ६९ ततोधृतिःसमु-
त्पन्नातस्यविप्रस्यधीमतः अथतंप्रमदाःप्राहुर्भगवान्प्रविशत्विति ७० सचतासांसुरूपाणांतस्यैवभवनस्यहि कौतूहलसमावि-
ष्टःप्रविवेशगृहंद्विजः ७१ तत्रापश्यज्जरायुक्तामरजोंबरधारिणीम् वृद्धांपर्यंकमासीनांसर्वाभरणभूषिताम् ७२ स्वस्तीतितेनचै
वोक्तासास्त्रीप्रत्यवदत्तदा प्रत्युत्थायचतंविप्रमास्यतामित्युवाचह ७३ अष्टावक्रउवाच सर्वाःस्वानालयान्यांतुएकामामुप-
तिष्ठतु प्रज्ञाताया प्रशांतायाशेषागच्छंतु छंदतः ७४ ततःप्रदक्षिणीकृत्यकन्यास्ताःसमृषिंतदा निश्चक्रमुर्गृहात्तस्मात्सावृद्धा
थव्यतिष्ठत ७५ अथतांसंविशन्प्राहशयनेभास्वरेतदा त्वयापिसुप्यतांभद्रेरजनीह्यतिवर्त्तते ७६ संलापात्तेनविप्रेणतथा
सातत्रभाषिता द्वितीयेशयनेदिव्येसंविवेशमहाप्रभे ७७ अथसावेपमानांगीनिमित्तंशीतजंतदा व्यपदिश्यमहर्षेर्वैशयनंव्यवरोहत ७८
स्वागतेनागतांतांतुभगवानभ्यभाषत सोपागूहद्भुजाभ्यांतुऋषिंप्रीत्यानरर्षभ ७९ निर्विकारमृषिंचापिकाष्ठकुड्योपमंतदा दुःखिताप्रे
क्ष्यसंजल्पमकार्षीदृषिणासह ८० ब्रह्मन्नकामतोन्यास्तिस्त्रीणांपुरुषतोधृतिः कामेनमोहिताचाहंत्वांभजंतींभजस्वमाम् ८१ प्रहृ-
ष्टोभवविप्रर्षेसमागच्छस्वमयासह उपगूहचमांविप्रकामार्त्ताहंभृशंत्वयि ८२

धैर्यमिति ७८ उपगूहत्आलिंगितवती ७९ ८० अकामतोनिच्छातःस्व
भावइत्यर्थः पुरुषतःपुरुषंप्राप्यस्त्रीणांधृतिर्धैर्यंअन्यापरकीयास्ति पुंयोगेस्त्रीणांधृतिःस्वकीयासर्वथानास्तीत्यर्थः ८१ उपगूहआलिंगस्व प्रहृष्टःकामुकोभव ८२

८३ ८४ ८५ ८६ ८७ ८८ ८९ अनभिज्ञोऽस्मीतिमान् ९०।९१ ९२ एकाऽरतिशीलेतिशेषः ९३ ९४ लीलायंत्यः लीलांरतिं आत्मनइच्छं-
त्यः अभाषतनैताइत्यादिसार्द्धश्लोकः ९५ एकाग्रः स्त्रीदोषान् अनुसंदधानः स्त्रियं प्रतिआस्यतां तूष्णीं स्थीयतां रुचितः रुचिंप्राप्य च्छंदः इच्छा भवतीति अभा
षत त्वंरुचिज्ञामामिच्छसि अहंत्वरुचिज्ञोन त्वांस्प्रष्टुमिच्छामीतिभावः एवमपियत्कार्यंकर्त्तव्यंतद्वदतन्मेब्रवीहि ९६ द्रक्ष्यसेस्पर्शगुणंज्ञास्यसे ९७

एताभूतवधर्मात्मस्तपसःपूज्यतफलम् प्रार्थितदर्शनादेव भजमानांभजस्वमाम् ८३ मगचेदंधनंसर्वंयच्चान्यदपिपश्यसि प्रभुस्त्वंभवसर्
वत्रमयिचैवनसंशयः ८४ सर्वान्कामान्विधास्यामिरमस्वसहितोमया रमणीयेवनेविप्रसर्वकामफलप्रदे ८५ त्वद्वशाहंभविष्यामिर
स्यसेचमयासह सर्वान्कामानुपाश्नानोयेदिव्यायेचमानुषाः ८६ नातःपरंहिनारीणांविद्यतेचकदाचन यथापुरुषसंसर्गःपरमेतद्धिनः
फलम् ८७ आत्मच्छंदेनवर्त्तंतेनार्योमन्मथचोदिताः नचदह्यंतिगच्छंत्यःसुतप्तैरपिपांसुभिः ८८ अष्टावक्रउवाच परदारान-
हंभद्रेनगच्छेयंकथंचन दूषितंधर्मशास्त्रज्ञैःपरदाराभिमर्शनम् ८९ भद्रेनिवेष्टुकामंमांविद्धिसत्येनवैशपे विषयेष्वनभिज्ञोहंधर्मार्थं
किलसंततिः ९० एवंलोकान्गमिष्यामिपुत्रैरितिनसंशयः भद्रेधर्मंविजानीहिज्ञात्वाचोपरमस्वह ९१ स्त्र्युवाच नानिलोग्निर्नव
रुणोनचान्येत्रिदशाद्विज प्रियाःस्त्रीणांयथाकामोरतिशीलाहियोषितः ९२ सहस्रैकिलनारीणांप्राप्यैतेकाकदाचन तथाशतसहस्रेषु
यदिकाचित्पतिव्रता ९३ नैताजानंतिपितरंनकुलंनचमातरम् नभ्रातॄन्नचभर्त्तारंनचपुत्रान्नदेवरान् ९४ लीलायंत्यःकुलंघ्नंतिकूला
नीवसरिद्वराः दोषान्सर्वांश्चमत्वाशुप्रजापतिरभाषत ९५ भीष्मउवाच ततःसऋषिरेकाग्रस्तांस्त्रियंप्रत्यभाषत आस्यतांरुचितश्छं
दःकिंचकार्यंब्रवीहिमे ९६ सास्त्रीप्रोवाचभगवन्द्रक्ष्यसेदेशकालतः वसतावन्महाभागकृतकृत्योभविष्यसि ९७ ब्रह्मर्षिस्तामथोवाच
सतथेतियुधिष्ठिर वत्स्येहंयावदुत्साहोभवत्यानात्रसंशयः ९८ अथर्षिरभिसंप्रेक्ष्यस्त्रियंतांजरयार्दिताम् चिंतांपरमिकांभेजेसंतप्तइव
चाभवत् ९९ यद्यदंगंहिसोपश्यत्तस्याविप्रर्षभस्तदा नारमत्तत्रतत्रास्यदृष्टीरूपविरागिता १०० देवतेयंगृहस्यास्यशापात्किंनुविरूपि
तां अस्याश्चकारणंवेत्तुंनयुक्तंसहसामया १०१ इतिचिंताविविक्तस्यतमर्थंज्ञातुमिच्छतः व्यगच्छत्तदहःशेषंमनसाव्याकुलेनतु १०२
अथसास्त्रीतदोवाचभगवन्पश्यवैरवेः रूपंसंध्याभ्रसंरक्तंकिमुपस्थाप्यतांतव १०३ सउवाचततस्तांस्त्रींस्नानोदकमिहानय उपासिष्येत-
तःसंध्यांवाग्यतोनियतेंद्रियः १०४ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेअष्टावक्रदिक्संवादेऊनविंशोऽध्यायः १९

रूपविरागितामनैराग्यवतीदृष्टिर्नारमत् नरेमे १०० १०१ १०२ १०३ १०४ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांऊनविंशोऽध्यायः १९

अथनास्त्रीत्यादेरध्यायस्यतात्पर्यंकुत्सितायाआज्ञायाअपिस्त्रियःकरस्पर्शमात्रेणविरक्तोपिविज्ञानवानप्यशक्तोऽतीतंकालंनबुबुधेकाकथायुवत्यांरतिरक्तः
मूढस्यातआतुरबुभोत्स्यंनदृति १ अभ्यमृक्षत अभ्यंजितवती २ उत्सादितःचालितः ३ ४ ५ नाजानत्नज्ञातवान् ६ ७ ८ नप्रभूतंनचकाम्यपूर्णमि-
तिनाभ्यवददित्यर्थःस्पर्शासक्तोगतांरात्रिमिवरत्यासक्तोगतंदिनमपिनाबुध्यतेतिभावः ९ १० ११ सेति स्वातंत्र्यान्ममनतवपारदार्यदोषोस्तीत्यर्थः धर्म-

भीष्मउवाच अथसास्त्रीतमुवाचबाढमेवंभवत्विति तैलंदिव्यमुपादायस्नानशाटीमुपानयत् १ अनुज्ञाताचमुनिनासास्त्रीतेनमहा-
त्मना अथास्यतैलेनांगानिसर्वाण्येवाभ्यमृक्षत २ शनैश्चोत्सादितस्तत्रस्नानशालामुपागमत् भद्रासनंततश्चित्रंऋषिरन्वगमन्नवम्
३ अथोपविष्टश्चयदातस्मिन्भद्रासनेतदा स्नापयामासशनकैस्तमृषिंसुखहस्तवत् ४ दिव्यंचविधिवच्चक्रेसोपचारंमुनेस्तदा सतेन
सुसुखोष्णेनतस्याहस्तसुखेनच ५ व्यतीतांरजनींकृत्स्नांनाजानत्समहाव्रतः ततउत्थायसमुनिस्तदापरमविस्मितः ६ पूर्वस्यांदिशि
सूर्यंचसोपश्यदुदितंदिवि तस्यबुद्धिरियंकिंनुमोहस्तत्त्वमिदंभवेत् ७ अथोपास्यसहस्रांशुंकिंकरोमीत्युवाचताम् साचामृतरसप्र-
ख्यंऋषेरन्नमुपाहरत् ८ तस्यस्वादुतयान्नस्यनप्रभूतंचकारसः व्यगमच्चाप्यहःशेषंततःसंध्यागमत्पुनः ९ अथसास्त्रीभगवंत
सुप्यतामित्यचोदयत् तत्रवैशयनेदिव्येतस्यतस्याश्चकल्पिते १० पृथक्चैवतयासुप्तौसास्त्रीसचमुनिस्तदा तथार्धरात्रेसास्त्रीतुशयनं
तदुपागमत् ११ अष्टावक्रउवाच नभद्रेपरदारेषुमनोमेसंप्रसज्जति उत्तिष्ठभद्रेभद्रंतेस्वयंवैविरमस्वच ११ भीष्मउवाच
साप्ततदातिनविप्रेणतथातेननिवर्तिता स्वतंत्रास्मीत्युवाचर्षिंनधर्मच्छलमस्तिते १२ अष्टावक्रउवाच नास्तिस्वतंत्रतास्त्रीणाम-
स्वतंत्राहियोषितः प्रजापतिमतंह्येतन्नस्त्रीस्वातंत्र्यमर्हति १३ स्त्र्युवाच बाधतेमैथुनंविप्रममभक्तिंचपश्यवै अधर्मंप्राप्स्यसे
विप्रयन्मांत्वंनाभिनंदसि १४ अष्टावक्रउवाच हरंतिदोषजातानिनरंजातंयथेच्छकम् प्रभवामिसदाधृत्याभद्रेस्वंशयनंव्रज
१५ स्त्र्युवाच शिरसाप्रणमेविप्रप्रसादंकर्तुमर्हसि भूमौनिपतमानायाःशरणंभवमेनघ १६ यदिवादोषजातंत्वंपरदारेषुपश्य
सि आत्मानंस्पर्शयाम्यद्यपाणिंगृह्णीष्वमेद्विज १७ नदोषोभविताचैवसत्येनैतद्ब्रवीम्यहम् स्वतंत्रांमांविजानीहियोऽधर्मःसोस्तुवैम
यि १८ त्वय्यावेशितचित्ताचस्वतंत्रास्मिभजस्वमाम् अष्टावक्रउवाच स्वतंत्रात्वंकथंभद्रेब्रूहिकारणमत्रवै नास्तित्रिलोकेस्त्री
काचिद्यावैस्वातंत्र्यमर्हति १९

च्छलंपरपुरुषप्रलोभनं १२ नास्तीतिअप्रदत्तांत्वांनकामयेइत्यर्थः १३ १४ दोषाःकामक्रोधादयः यथेच्छकंस्वैरिणं
१५ १६ १७ स्वतंत्रांआत्मप्रदानेइतिशेषः योधर्मःपाणिग्रहणादिसंस्कारःमयिमन्निमित्तंसोस्तु १८ १९ ७ ७ ७ ७

२० विजहि मामानाशय २१ यथेति अहंआत्मदर्शनेन त्वांस्मरातुरांवेद्मि त्वमपिस्वदर्शनेनमांतथाभूतंविद्धीतिभावः तुभ्यंतवसंगमश्रद्धेतिउभयत्रशेषः किंतस्य मयाकन्यार्थिनाप्रार्थितस्यतत्कर्तृकाइयंजिज्ञासाममपरीक्षाकिमयंसाधुरसाधुर्वेतिउतकिंनेतिकाकुःविघ्नएवायंकिंनभवेत्अपितुविघ्नएवेत्यर्थः २२ विघ्नत्वमेवाह आश्चर्यमितिपूर्वंअतिजीर्णत्वेनदृष्टापुनःकन्येवदृश्यतइतिमायारूपमाश्चर्यम् २३ एतदेवाह किमिति अत्रअस्मिन्विषयेकिंउत्तरंश्रेष्ठतरंपूर्वपरिगृहीतस्यात्यागःउतएतस्याःस्वीकारःकर्तव्यइतिभावः २४ स्वमतमाह यथेति शक्तिःकामदमनसामर्थ्यंधृतिःपूर्वप्राप्तस्यात्यागःतदुभयंधृत्वानव्युत्थास्येअ-

पितारक्षतिकौमारेभर्त्तारक्षतियौवने पुत्राश्चस्थाविरेकालेनास्तिस्त्रीणांस्वतंत्रता २० स्त्र्युवाच कौमारंब्रह्मचर्यंमेकन्यैवास्मिन संशयः पत्नींकुरुष्वमाविप्रश्रद्धांविजहिमामम २१ अष्टावक्रउवाच यथाममतथातुभ्यंयथातुभ्यंतथामम जिज्ञासेयमृषेस्तस्य विघ्नःसत्यंनकिंभवेत् २२ आश्चर्यंपरमंहीदंकिंतुश्रेयोहिमेभवेत् दिव्याभरणवस्त्राहिकन्येयंमामुपस्थिता २३ किंत्वस्याःपरमंरूपं जीर्णमासीत्कथंपुनः कन्यारूपमिहाद्यैवकिमिवात्रोत्तरंभवेत् २४ यथापरंशक्तिधृतेर्नव्युत्थास्येकथंचन नरोचतेहिव्युत्थानंसत्ये-नासादयाम्यहम् २५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेअष्टावक्रदिक्संवादेविंशोऽध्यायः २० युधिष्ठिरउवाच नबिभेतिकथंसास्त्रीशापाच्चपरमद्युते कथंनिवृत्तोभगवांस्तद्भवान्प्रब्रवीतुमे १ भीष्मउवाच अष्टवक्रोऽन्वपृच्छत्तांरूपंविकुरुषेकथम् नचानृतंतेवक्तव्यंब्रूहिब्राह्मणकाम्यया २ स्त्र्युवाच द्यावापृथिव्योर्यत्रैषाकाम्याब्राह्मणसत्तम शृणुष्वावहितःसर्वं यदिदंसत्यविक्रम ३ जिज्ञासेयंप्रयुक्तामेस्थिरीकर्तुंतवानघ अव्युत्थानेनतेलोकाजिताःसत्यपराक्रम ४ उत्तरांमांदिशंविद्धिदृष्टं-स्त्रीचापलंचते स्थविराणामपिस्त्रीणांबाधतेमैथुनज्वरः ५ तुष्टःपितामहस्तेऽद्यतथादेवाःसवासवाः सत्वंयेनचकार्येणसंप्राप्तोभगवानिह ६ प्रेषितस्तेनविप्रेणकन्यापित्राद्विजर्षभ तवोपदेशंकर्तुंवैतच्चसर्वंकृतंमया ७ क्षेमीगमिष्यसिगृहंश्रमश्चनभविष्यति कन्यांप्राप्स्यसितांविप्रपुत्रिणीचभविष्यति ८ काम्ययापृष्टवांस्त्वंवाततोव्याहृतमुत्तमम् अनतिक्रमणीयासाकृत्स्नैर्लोकैस्त्रिभिःसदा ९

स्याःस्वीकारंनकरिष्ये व्युत्थानंधर्मातिक्रमं नमेव्युत्थानंरोचतेकिंतुसत्येनासादयाम्यहं दारानितिशेषः २५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांविंशोऽध्यायः २० नबिभेति १ विकुरुषेऽन्यथाऽन्यथाकरोषि ब्राह्मणकाम्यया ब्राह्मणंपानलिप्सया २ द्यावापृथिव्योःदिविपृथिव्यांचयत्रस्थीयतेतत्रएषाकाम्यास्त्रीपुंसयोःअन्योन्याभिलाषरूपाइच्छास्ति मोक्षादन्यत्रनिष्कामपदंनास्तीत्यर्थः ३ मेमया नकृतं ४ ५ ६ ७ ८ साकाम्याऽनतिक्रमणीया ९

१० ऋषिणावदान्येन ११ १२ १३ १४ १५ १६ १७ १८ यथाष्टधिकृमामेवगृजदेयंभवन्त्येवंस्त्रीमतामेवदैवंपित्र्यंचऋणमापतति स्त्रीमत्वंतु
कामकृतंचवैधमितिस्त्र्यभावे ऽकस्यापिऋणंनभवतीतिभावः कार्यः १९ इतिश्रीमहाभारते आनुशासनिकेपर्वणिटीकायांएकविंशोऽध्यायः २१ एवंगार्हस्थ्य
हेतुकामसुक्त्वागृहस्थोचितान्दानधर्मान्वक्तुंश्रोतुपात्रादिगुणान्पृच्छति किमित्यादिना ब्राह्मणंब्रह्मविदं लिंगिनंयतिंब्रह्मचारिणंसन्यासिनंचदंडादिलिं
गवंतं १ स्ववृत्तिं जीवनार्थंस्वोचितांवृत्तिंअभिपन्नायशरणीकुर्वते लिंगीअलिंगीवास्वधर्मसेवीयःसएवतपस्वीपात्रंचेत्यर्थः २ स्वधर्मनिष्ठत्वंपात्रगुणमु-

गच्छस्वसुकृतंकृत्वाकिंचान्यच्छ्रोतुमिच्छसि यावद्ब्रवीमिविप्रर्षेअष्टावक्रयथातथम् १० ऋषिणाप्रसादितावास्मितवहेतोर्द्विजर्षभ न
स्वसंमाननार्थमेतत्वयिवाक्यंप्रभाषितम् ११ भीष्मउवाच श्रुत्वातुवचनंतस्याःसविप्रःप्रांजलिःस्थितः अनुज्ञातस्तयाचापिस्वगृहं
पुनराव्रजत् १२ गृहमागत्यविश्रांतःस्वजनंपरिपृच्छ्यच अभ्यगच्छत्ततविप्रंन्यायतःकुरुनंदन १३ पृष्टश्चतेनविप्रेणदृष्टंत्वेतन्निदर्श
नम् प्राहविप्रस्तदाविप्रःसुप्रीतेनांतरात्मना १४ भवतासमनुज्ञातःप्रस्थितोगंधमादनम् तस्यचोत्तरतोदेशेदृष्टंमेदैवतंमहत् १५ तया
चाहमनुज्ञातोभवांश्चापिप्रकीर्त्तितः श्राविताश्चापितद्वाक्यंगृहंचाभ्यागतःप्रभो १६ तमुवाचतदाविप्रःसुतांप्रतिगृहाणमे नक्षत्रवि
धियोगेनपात्रंहिपरमंभवान् १७ भीष्मउवाच अष्टावक्रस्तथेत्युक्त्वाप्रतिगृह्यचतांप्रभो कन्यांपरमधर्मात्माप्रीतिमांश्चाभवत्त
दा १८ कन्यांतांप्रतिगृह्यैवभार्यांपरमशोभनाम् उवासमुदितस्तत्रस्वाश्रमेविगतज्वरः १९ इतिश्रीमहाभारतेआनुशासनिकेप
र्वणिदानधर्मेअष्टावक्रदिक्संवादेएकविंशोऽध्यायः २१ युधिष्ठिरउवाच किमाहुर्भरतश्रेष्ठपात्रंविप्राःसनातनाः ब्राह्मणंलि-
गिनंचैवब्राह्मणंवाप्यलिंगिनम् १ भीष्मउवाच स्ववृत्तिमभिपन्नायलिंगिनेचेतरायच देयमाहुर्महाराजउभावेतौतपस्विनौ २
युधिष्ठिरउवाच श्रद्धयापरयापूतोयःप्रयच्छेत्द्विजातये हव्यंकव्यंतथादानंकोदोषःस्यात्पितामह ३ भीष्मउवाच श्रद्धा
पूतोनरस्तातदुर्दांतोपिनसंशयः पूतोभवतिसर्वत्रकिमुतत्वंमहाद्युते ४ युधिष्ठिरउवाच नब्राह्मणंपरीक्षेतदैवेषुसततंनरः क-
व्यप्रदानेतुबुधाःपरीक्ष्यंब्राह्मणंविदुः ५ भीष्मउवाच नब्राह्मणःसाधयतेहव्यंदैवात्प्रसिध्यति देवप्रसादादीज्यन्तेयजमानेनसं
शयः ६

स्त्वाश्रद्धावत्त्वंदातृगुणमाहश्रद्धयेतिद्वाभ्यां अपूतोपिपरयाश्रद्धयायदिप्रयच्छतितर्हितस्यदातुरपूतत्वप्रयुक्तःकोदोषःस्यात्तंवद ३ श्रद्धे
ति श्रद्धैवास्यपूतत्वंकरोतीत्यर्थः ४ नेति श्रद्धैवपूतत्वकर्त्रीचेत्कव्येपात्रपरीक्षानविधेयास्यादित्याशयः ५ देवानांसमूहोदैवातत्श्रद्धादिभ्यइत्यर्थः ह
[illegible]

पिच्यनुकम्पं ब्राह्मणानुग्रहादेव पूर्णं भवतीति तत्रानुग्रहकर्त्तारं तपोबलमावश्यकमित्याशयेनाह ब्राह्मणानिति । लोकेषु पितृपितामहादिषु पूजनीयेषु ब्राह्मणेष्वेव ब्राह्मण्यभक्तौ निविशेदित्यर्थः । अग्निमुखा वै देवाः पाणिमुखाः पितर इत्याश्वलायनोदाहृतश्रुतेः श्रौतः स्मार्त्तः उदयो वाग्निः स्वनः शुद्धो देवांस्तर्पयति पाणिस्तु सत्कर्मवानेव पितॄंस्तर्पयितुं शक्नोतीति नान्यथेति कव्ये त्वावश्यकी पात्रपरीक्षेति भावः ७ कथं केन हेतुना पूर्वादीनां पञ्चानां पात्रत्वमिति प्रश्नार्थः ८ उत्तरे तु त्रयः अपूर्वसंबंधितपस्विनः कुलीनत्वादिगुणसमकयुक्ता एव पात्रत्वं भजन्ते परिशेषात् यज्ञशीलविद्वांसौ कर्मकृद्वैद्यपदोदितौ कुलीनत्वादिगुणपञ्चकयुक्तावेव एतेषां गुणानामभावे पात्रत्वं न कस्यापीत्यर्थः ९ एतदेव शिष्टसंमत्या द्रढयति तत्रेति तेजसां तेजस्विनां सर्वज्ञानामिति यावत् १० नेष्टुः पांसुपिण्डः त्रिभिरे

ब्राह्मणान्भरतश्रेष्ठ सततं ब्रह्मवादिनः मार्कण्डेयः पुरा प्राह इति लोकेषु बुद्धिमान् ७ युधिष्ठिर उवाच अपूर्वो वाप्यथ वा विद्वान्संबन्धी वाथ यो भवेत् तपस्वी यज्ञशीलो वा कथं पात्रं भवेत्तु सः ८ भीष्म उवाच कुलीनः कर्मकृद्वैद्यस्तथा चाप्यानृशंस्यवान् ह्रीमानृजुः सत्यवादी पात्रं पूर्वे च ये त्रयः ९ तत्रेमं शृणु मे पार्थ चतुर्णां तेजसां मतम् पृथिव्याः काश्यपस्याग्नेर्मार्कण्डेयस्य चैव हि १० पृथिव्युवाच यथा महार्णवे क्षिप्तः क्षिप्रं लोष्टो विनश्यति तथा दुश्चरितं सर्वं त्रिवृत्त्या च निमज्जति ११ काश्यप उवाच सर्वे च वेदाः सह षड्भिरङ्गैः सांख्यं पुराणं च कुले च जन्म नैतानि सर्वाणि गतिर्भवन्ति शीलव्यपेतस्य नृप द्विजस्य १२ अग्निरुवाच अधीयमानः पण्डितमन्यमानो यो विद्यया हन्ति यशः परेषाम् भ्रश्यते सोऽचरते न सत्यं लोकास्तस्य ह्यन्तवन्तो भवन्ति १३ मार्कण्डेय उवाच अश्वमेधसहस्रं च सत्यं च तुलया धृतम् नाभिजानामि यद्यस्य सत्यस्यार्धमवाप्नुयात् १४ भीष्म उवाच इत्युक्त्वा ते जग्मुराशु चत्वारोऽमिततेजसः पृथिवी काश्यपोऽग्निश्च प्रकृष्टायुश्च भार्गवः १५

यवनिःजीवनं यस्यां सा ब्राह्मी संपत् तस्यां त्रिवृत्त्यां याजनाध्यापनप्रतिग्रहैरेव जीवति मम हानं एतेन कुलीनत्वं संगृहीतम् ११ ह्रीमत्त्वऋजुत्वे शीलपदेन संगृह्णाति सर्वे चेति १२ आनृशंस्यं कर्मकृत्त्वं च गृह्णाति अधीयान इति मन्यं यज्ञादिकं अभ्यभिचारितं फलं कर्म न चरते न करोति १३ अश्वमेधेति सत्यसंग्रहः एतेषां गुणानामेकतमस्याप्यभावे पात्रत्वं न भवतीति चतुर्णामपि मतम् ननु चत्वारि पृथक् मतानि उपक्रमे, तेजसां मतमित्येकवचनात् तेषां चाविसंवाददर्शनादिति भावः १४ १५ ७

व्रतिनः ब्रह्मचारिणः कथं तत्सुकृतमिति तदीयव्रतनाशस्तोयं श्राद्धं दुष्यति न वेति प्रश्नः १६ आदिष्टं द्वादशवर्षाणि ब्रह्मचर्यं चरेति गुर्वादेशः तद्वंतः भोक्तुरेव व्रतं
लुप्यते न तु दातुः पात्रत्वं वेति अपि तु कर्मनिष्ठस्तपोनिष्ठः पंचाग्निब्रह्मचारिणः पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपद इति व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोज
येदिति च स्मरणात्पुण्यभागेव भवतीति भावः एतेन श्राद्धादन्यत्र लोभादि प्रदर्शनेन परव्रतनाशयतो दाने पि किंचिद्वैगुण्यं जायत इति गम्यते अत एव मनसा पात्र-
मुद्दिश्य जलमध्ये जलं क्षिपेत् दाता तत्फलमाप्नोति प्रतिग्राही न दोषभागिति पात्रादरार्थं कल्पांतरं स्मर्यते नाप्येवं युधिष्ठिरेण शंक्यमिति दिक् १७ अंतो निष्ठा अ
नेकांतं अनेकफलाकारमित्यर्थः पात्रगुणानामनंतत्वात् के गुणाः नियमेन पात्रतायां नि मित्तं तानेव संक्षेपेण ब्रूहीति प्रश्नार्थः १८ उत्तरमाह त्रिभिः अहिंसेति

युधिष्ठिर उवाच यदि ते ब्राह्मणा लोके व्रतिनो भुंजते हविः दत्तं ब्राह्मणकामाय कथं तत्सुकृतं भवेत् १६ भीष्म उवाच आदिष्टिनो ये
राजेंद्र ब्राह्मणा वेदपारगाः भुंजते ब्रह्मकामाय व्रतलुप्ता भवंति ते १७ युधिष्ठिर उवाच अनेकांतं बहुद्वारं धर्ममाहुर्मनीषिणः किंनि
श्चितं भवेदत्र तन्मे ब्रूहि पितामह १८ भीष्म उवाच अहिंसा सत्यमक्रोध आनृशंस्यं दमस्तथा आर्जवं चैव राजेंद्र निश्चितं धर्मलक्षण
म् १९ ये तु धर्मं प्रशंसंतश्चरंति पृथिवीमिमाम् अनाचरंतस्तद्धर्मं संकरेऽभिरताः प्रभो २० तेभ्यो हिरण्यं रत्नं वा गामश्वं वा ददाति यः दश
वर्षाणि विष्ठां स भुंक्ते निरयमास्थितः २१ मेदानां पुल्कसानां च तथैवांतेवसायिनाम् कृतं कर्माकृतं वापि रागमोहेन जल्पताम् २२ वैश्वदे
वं च ये मूढा विप्राय ब्रह्मचारिणे ददतीह नरा राजेंद्र ते लोकान्भुंजतेऽशुभान् २३ युधिष्ठिर उवाच किं परं ब्रह्मचर्यं च किं परं धर्मलक्ष
णम् किं च श्रेष्ठतमं शौचं तन्मे ब्रूहि पितामह २४ भीष्म उवाच ब्रह्मचर्यं परं तात मधुमांसस्य वर्जनम् मर्यादायां स्थितो धर्मः शम
श्चैवास्य लक्षणम् २५ युधिष्ठिर उवाच कस्मिन्काले चरेद्धर्मं कस्मिन्कालेऽर्थमाचरेत् कस्मिन्काले सुखी च स्यात्तन्मे ब्रूहि पितामह २६
भीष्म उवाच कल्यमर्थं निषेवेत ततो धर्ममनंतरम् पश्चात्कामं निषेवेत न च गच्छेत्प्रसंगिताम् २७ ब्राह्मणांश्चैव मन्येत गुरूंश्चाप्यभिपू
जयेत् सर्वभूतानुलोमश्च मृदुशीलः प्रियंवदः २८

२१ मेदानां स विष्ठां भुंक्ते इति संबंधः मेदानां गोमहिष्यादीनां मृतानां मांसमश्नंतः पुल्क
साः ये ब्राह्मणादीनपि स्वभाकादेव हिंसंति अंतेवसायिनश्चर्मकारादयः कृतमकृतं वा परकीयं पापं कर्म ये प्रकाशयंति ब्राह्मणादयोपि ते मेदादितुल्या एवेति तेषाम
पीति पदार्थः २२ वैश्वदेवं तत्संबंधि नहंतकारं ब्रह्मचारिणे इति संन्यासिनोप्युपलक्षणम् यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभाविति स्मृतेः अशुभानिति-
च्छेदः २३ परं श्रेष्ठं २४ शमः विषयेभ्य इंद्रियाणां निवृत्तिः एतदेव श्रेष्ठतरं शौचं धर्मस्य लक्षणं मर्यादांतर्गतम् २५ कल्यं पूर्वाह्णे २६ २७ २८ ७ ७

२९ ३० ३१ ३२ ३३ ३४ ३५ षड्भ्यः अनुपदोक्तैः मधुमांसवर्जनमर्यादापालनशौचैः सहाध्ययनयागदानेभ्यः तान्यनुष्ठातुंप्रवृत्तइत्यर्थः
३६ ३७ ३८ नशोचतिप्रतिपादयन् ३९ द्विजोत्तमः निर्दोषः एतेपूर्वोक्तागुणाश्चनतुयदिलभ्यन्तेतेनहितारयेत्तेनकिम् ४० निशम्यज्ञात्वाईदृशपात्रआप्तो
समीपस्थस्याल्पगुणस्यातिक्रमेपिदोषोनास्तीतिभावः ४१ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायां द्वाविंशोऽध्यायः २२ ६७ श्राद्धेतिकालादौ

अधिकारेयदनृतंयच्चराजसुपैशुनम् गुरोश्चालीककरणंतुल्यंतद्ब्रह्महत्यया २९ प्रहरेन्ननरेंद्रेषुनहन्याद्गांतथैवच भ्रूणहत्यासमंचैव
तउभयंयोनिषेवते ३० नाग्निंपरित्यजेज्जातुनचवेदान्परित्यजेत् नचब्राह्मणमाक्रोशेत्समंतद्ब्रह्महत्यया ३१ युधिष्ठिरउवाच
कीदृशाःसाधवोविप्राःकेभ्योदत्तंमहाफलम् कीदृशानांचभोक्तव्यंतन्मेब्रूहिपितामह ३२ भीष्मउवाच अक्रोधनाधर्मपराःसत्य
नित्यादमेरताः तादृशाःसाधवोविप्रास्तेभ्योदत्तंमहाफलम् ३३ अमानिनःसर्वसहादृढार्थाविजितेंद्रियाः सर्वभूतहितामैत्रास्तेभ्योद
त्तंमहाफलम् ३४ अलुब्धाःशुचयोवैद्याह्रीमन्तःसत्यवादिनः स्वकर्मनिरतायेचतेभ्योदत्तंमहाफलम् ३५ सांगांश्चचतुरोवेदानधीते
योद्विजर्षभः षड्भ्यःप्रवृत्तःकर्मभ्यस्तंपात्रमृषयोविदुः ३६ येत्वेवंगुणजातीयास्तेभ्योदत्तंमहाफलम् सहस्रगुणमाप्नोतिगुणार्हायप्र
दायकः ३७ प्रज्ञाश्रुताभ्यांवृत्तेनशीलेनचसमन्वितः तारयेतकुलंसर्वमेकोपीहद्विजर्षभः ३८ गामश्वंवित्तमन्नंवातद्विधेप्रतिपादये
त् द्रव्याणिचान्यानितथाप्रेत्यभावेनशोचति ३९ तारयेत्तत्कुलंसर्वमेकोपीहद्विजोत्तमः किमंगपुनरेवैतेतस्मात्पात्रंसमाचरेत् ४०
निशम्यचगुणोपेतंब्राह्मणंसाधुसंमतं दूरादानाय्यसत्कृत्यसर्वतश्चापिपूजयेत् ४१ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदान-
धर्मेबहुप्राश्निकेद्वाविंशोऽध्यायः २२ युधिष्ठिरउवाच श्राद्धकालेचदैवेचपित्र्येपिचपितामह इच्छामीहत्वयाख्यातंविहितंय-
त्सुरर्षिभिः १ भीष्मउवाच दैवंपूर्वाण्हिकुर्यादपराण्हेतुपैतृकम् मंगलाचारसंपन्नःकृतशौचःप्रयत्नवान् २ मनुष्याणांतु
मध्यान्हेप्रदद्यादुपपत्तिभिः कालहीनंतुयद्दानंतंभागंरक्षसांविदुः ३ लंघितंचावलीढंचकलिपूर्वंचयत्कृतम् रजस्वलाभिर्दृष्टंचतंभा
गंरक्षसांविदुः ४ अवघुष्टंचयद्भुक्तमव्रतेनचभारत परामृष्टंशुनाचैवतंभागंरक्षसांविदुः दुरात्मनाचयद्भुक्तंतंभागंरक्षसांविदुः
५ केशकीटावपतितंक्षुतंश्वभिरवेक्षितम् रुदितंचावधूतंचभागंतंरक्षसांविदुः ६ निरोंकारेणयद्भुक्तंसशस्त्रेणचभारत दुरात्मना
चयद्भुक्तंतंभागंरक्षसांविदुः ७ परोच्छिष्टंचयद्भुक्तंपरिभुक्तंचयद्भवेत् दैवेपित्र्येचसततंतंभागंरक्षसांविदुः ८

विहितंविशेषमितिशेषः १
२ उपपत्तिभिः आदरादिभिर्युक्तःसन् ३ ४ ५ क्षुतंक्षुतेनदूषितं ६ निरोंकारेणअनभ्यनुज्ञातेनशूद्रेणवा ७ परिभुक्तंदेवातिथिपितृबालकादीनवर्जयित्वा
भुक्तंस्वेनैववा ८ ६७

९ आज्याहुतिंपात्राभिघारणंविना १० विसर्गस्यब्राह्मणेदानस्यपात्रभूते ११ पतिताःमहापातकेनजातिबहिर्भूताः केतनंनिमंत्रणम् १२ श्वित्रीश्वेतकुष्ठी कुष्ठीमंडल कुष्ठी यक्ष्महतोमहारोगी अपस्मारीग्रहग्रस्तः १३ देवलकाःदेवार्चनवृत्तिजीविनः वृथानियमंधारिणोदंभवंतः १४ प्लवकाःकूर्दनपराः कथकाःवृथालापिनः योधकाः मल्लाः १५ वृषलानांशूद्राणांहोतारोयाजकाः वृषलशिष्याःशूद्रदासाः १६ अनुयोक्ताभृतकाध्यापकः अनुयुक्तःभृतकाध्येता १७ वर्णावरपरिग्रहःशूद्रापतिः १८ अनग्नयःश्रौतस्मार्त्तकर्मरहिताः येवापेताःस्वकर्मभ्यःस्तेनास्तेपरिकीर्त्तिताः कर्मणादेहदोषेश्चयोनितश्चैवकुत्सिताः पतितास्तान्विजानीयान्महापातकिन श्चयेइतिस्तेनपतितोयमोक्तोवाग्रात्स्यो १९ गणपूर्वायामण्यः पुत्रिकापूर्वपुत्राःअस्यामुत्पन्नः पुत्रोमदीयइतिनियमेनयादीयतेतस्यांचयोजातःसपुत्रिकापूर्वपु-

मंत्रहीनंक्रियाहीनंयच्छ्राद्धंपरिविश्यते त्रिभिर्वर्णैर्नरश्रेष्ठतंभागंरक्षसांविदुः ९ आज्याहुतिंविनाचैवयत्किंचित्परिविश्यते दुराचारैश्च यद्भुक्तंतंभागंरक्षसांविदुः १० येभागारक्षसांप्रोक्तास्तउक्ताभरतर्षभ. अतऊर्ध्वंविसर्गस्यपरीक्षांब्राह्मणेशृणु ११ यावंतःपतिताविप्राजडोन्मत्तास्तथैवच दैवेवाप्यथपित्र्येवाराजन्नार्हंतिकेतनम् १२ श्वित्रीक्लीबश्चकुष्ठीचतथायक्ष्महतश्चयः अपस्मारीचयश्चापिराजन्नार्हंतिकेतनम् १३ चिकित्सकादेवलकावृथानियमधारिणः सोमविक्रयिणश्चैवराजन्नार्हंतिकेतनम् १४ गायनानर्त्तकाश्चैवप्लवकावादकास्तथा कथकायोधकाश्चैवराजन्नार्हंतिकेतनम् १५ होतारोवृषलानांचवृषलाध्यापकास्तथा तथावृषलशिष्याश्चराजन्नार्हंतिकेतनम् १६ अनुयोक्ताचयोविप्रोअनुयुक्तश्चभारत नार्हतस्तावपिश्राद्धंब्रह्मविक्रयिणोहितौ १७ अग्रणीर्यःकृतपूर्वंवर्णावरपरिग्रहः ब्राह्मणःसर्वविद्योपिराजन्नार्हंतिकेतनम् १८ अनग्नयश्चयेविप्रामृतनिर्यातकाश्चये स्तेनाश्चपतिताश्चैवराजन्नार्हंतिकेतनम् १९ अपरिज्ञातपूर्वाश्चगणपूर्वाश्चभारत पुत्रिकापूर्वपुत्राश्चश्राद्धेनार्हंतिकेतनम् २० ऋणकर्त्ताचयोराजन्यश्चवार्धुषिकोनरः प्राणिविक्रयवृत्तिश्चराजन्नार्हंतिकेतनम् २१ स्त्रीपूर्वाःकांडपृष्ठाश्चयावंतोभरतर्षभ अजपाब्राह्मणाश्चैवश्राद्धेनार्हंतिकेतनम् २२ श्राद्धेदैवेचनिर्दिष्टोब्राह्मणोभरतर्षभ दातुःप्रतिगृहीतुश्चशृणुष्वानुग्रहंपुनः २३ चीर्णव्रतागुणैर्युक्ताभवेयुर्येपिकर्षकाः सावित्रीज्ञाःक्रियावंतस्तेराजन्केतनक्षमाः २४

त्रः सपितृगोत्राद्भ्रष्टोमातृगोत्रोपजीवित्वान्निंद्यः २० ऋणकर्त्तावृद्ध्यर्थंधनप्रयोक्ताकुसीदीनामा वार्द्धुषिकःसमर्घंधान्यमादायमहर्घ्यंयःप्रयच्छति सवैवार्धुषिकोनामहव्यकव्यबहिष्कृतःइतिस्मृतिप्रसिद्धः २१ स्त्रीपूर्वाःस्त्रीजिताःस्त्रीपण्योपजीविनोवा कांडपृष्ठोवेश्यापतिः कांडपृष्ठःसद्भिरेवनिगद्यतइतियमेन व्याख्यातः अजपाःसंध्यावंदनहीनाः २२ अनुग्रहंनिषिद्धानामपिकेनचिद्गुणेनाभ्यनुज्ञानम् २३ २४ ७ ७ ७ ७ ७

वणिजं वणिग्वृत्तिम् २५ । २६ । २७ उदितः आद्यः अस्तमितः दरिद्रः पूर्वाह्णे लाभकाले आद्यः सद्यस्तस्य व्यये दरिद्रः एवं प्रातर्लाभकाले ऽस्तमितः मध्याह्ने लाभे सति उदितः अल्पदोषो विद्वत्त्वादिविशेषगुणरहितः अदाता २८ अकल्ककः अदांभिकः अपापो वा । कल्कः पापे च दंभे चेति कोशः अकल्प कः इति पाठे स्वेच्छया धर्माधर्मकल्पकः अतर्कः अहैतुकः शुष्कतर्कपरः संसर्गे संगत्य द्वे गृहे ज्ञाते भैक्ष्यवृत्तिः २९ कितवो धूर्तः ३० सर्वदेवतादिकं अतिथिरेव यस्य स सर्वातिथिः ३१ ब्रह्म वेदः क्लैब्यात् दीनभाषणेन मिथ्याशपथादिना वा ३२ अपवर्गे श्राद्धसमाप्तौ क्रियमाणे दक्षिणापादे लज्जमानः युक्तं अस्तु स्वधेत्यादिवचनं गवानृतं अनृतं गोशपथस्य पापम् ३३ सोमक्षयो दर्शः आरण्यं मृगादिमांसं च यदा प्राप्तं तदैव श्राद्धस्य कालः ३४ स्वधोच्यतामिति प्रदात्रोक्ते अस्तु स्वधेति ब्राह्मणो वदेत् एवमुत्तरं

क्षात्रधर्मेण वाप्यार्जेत् कौन्तेय कुलजो द्विजः न त्वेव वणिजं तात श्राद्धे च परिकल्पयेत् २५ अग्निहोत्री च यो विप्रो ग्रामवासी च यो भवेत् अस्तेनश्चातिथिज्ञश्च स राजन् केतनक्षमः २६ सावित्रीं जपते यस्तु त्रिकालं भरतर्षभ भिक्षावृत्तिः क्रियावांश्च स राजन् केतनक्षमः २७ उदितास्तमितो यश्च तथैवास्तमितोदितः अहिंस्रश्चाल्पदोषश्च स राजन् केतनक्षमः २८ अकल्ककोऽस्तर्कश्च ब्राह्मणो भरतर्षभ संसर्गभैक्ष्यवृत्तिश्च स राजन् केतनक्षमः २९ अव्रती कितवः स्तेनः प्राणिविक्रयिको वणिक् पश्चाच्च पीतवान् सोमं स राजन् केतनक्षमः ३० अर्जयित्वा धनं पूर्वं दारुणैरपि कर्मभिः भवेत् सर्वातिथिः पश्चात् स राजन् केतनक्षमः ३१ ब्रह्मविक्रयनिर्दिष्टं स्त्रिया यच्चार्जितं धनम् अदेयं पितृविप्रेभ्यो यच्च क्लैब्यादुपार्जितम् ३२ क्रियमाणेऽपवर्गे च यो द्विजो भरतर्षभ न व्याहरति यद्युक्तं तस्याधर्मो गवानृतम् ३३ श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृतं तथा सोमक्षयश्च मांसं च यदारण्यं युधिष्ठिर ३४ श्राद्धापवर्गे विप्रस्य स्वधा वै मुदिता भवेत् क्षत्रियस्यापि यो ब्रूयात् प्रीयन्तां पितरस्त्विति ३५ अपवर्गे तु वैश्यस्य श्राद्धकर्मणि भारत अक्षय्यमभिधातव्यं स्वस्ति शूद्रस्य भारत ३६ पुण्याहवाचनं दैवं ब्राह्मणस्य विधीयते एतदेव निरोंकारं क्षत्रियस्य विधीयते ३७ वैश्यस्य चैव वक्तव्यं प्रीयन्तां देवता इति कर्मणामानुपूर्व्येण विधिपूर्वं कृतं शृणु ३८ जातकर्मादिकान् सर्वांस्त्रिषु वर्णेषु भारत ब्रह्मक्षत्रे हि मन्त्रोक्ता वैश्यस्य च युधिष्ठिर ३९ विप्रस्य रशना मौञ्जी मौर्वी राजन्यगामिनी बाल्वजीत्येव वैश्यस्य धर्म एष युधिष्ठिर

नत्र मुदिता प्रीतिकरी पितॄणामित्यर्थात् ३५ । ३६ पुण्याहेति पुण्याहं भवन्तो ब्रुवन्त्विति यजमानेन प्रोक्ते ॐ पुण्याहमस्त्विति ब्राह्मणाः ब्रूयुः दैवं सोंकारं ३७ दैवे ओंकारस्थाने प्रीयन्तां देवताः पुण्याहमस्त्विति प्रतिवदेदित्यर्थः कृतं क्रियां अनुष्ठानक्रममिति यावत् वैश्यस्य च मन्त्रोक्ताः इत्यनुषंगः ३८ ३९ रशना मेखला मौञ्जी मुञ्जमयी मौर्वी धनुर्ज्या बाल्वजी बल्वजस्तृणविशेषस्तन्मयी ४० ६० ६० ६० ६०

धर्मोदातुःअधर्मःप्रतिगृहीतुरितितावुभौश्रृणु तत्राधर्ममेवसामान्यतंआह ब्राह्मणस्येति एककार्षापणार्थेअनृतवक्तुर्ब्राह्मणस्ययावानधर्मोभवतिसएवचतुर्गुणःक्ष
त्रियस्याष्टगुणोवैश्यस्यतावन्मात्रार्थेभवतीत्यर्थः सार्द्धश्लोकः ४१ नेतिय.पूर्वस्यनिमंत्रयितुरश्नातिसज्यायान् परस्याश्ननयवीयान् तत्रब्राह्मणेनकेतितः सन्
यदियवीयान्भक्तेर्हिंस्यापशुहिंसायाःपूर्णपापंप्राप्नुयात क्षत्रियादिनाकेतितःसन्यदियवीयान्स्यात्तर्हित्यापशुहिंसायाअर्द्धंपापंप्राप्नुयादितिश्लोकद्वयार्थः
४२ ४३ ४४ आशौचःजननमरणाशौचवान् ४५अर्थिनप्रयोजनेनतीर्थयात्राव्यपदेशेनजीविकाद्यर्थीयोधनंलिप्सेत्योवाकर्मार्थंमेभिक्षांदेहीत्यामंत्रयति-
दातारमभिमुखीकरोतितस्यापिअनृतंगवामृतमेवस्मृतम् ४६ वेदव्रतंचारित्रंचयेषांनास्तितेयेनमंत्रवत्मंत्रयुक्तंयथास्यात्तथाश्राद्धेपरिविश्यंतेतस्य ४७ ४८

दातुःप्रतिगृहीतुश्चधर्माधर्माविमौश्रृणु ब्राह्मणस्यानृतेधर्मःप्रोक्तःपातकसंज्ञितः चतुर्गुणःक्षत्रियस्यवैश्यस्याष्टगुणःस्मृतः ४१ नान्य
त्रब्राह्मणोश्नीयात्पूर्वंविप्रेणकेतितः यवीयान्पशुहिंसायांतुल्यधर्मोभवेत्सहि ४२ तथाराजन्यवैश्याभ्यामयद्यश्नीयात्तुकेतितः यवीयान्
पशुहिंसायाभागार्द्धंसमवाप्नुयात् ४३ दैवंवाप्यथवापित्र्यंयोश्नीयाद्ब्राह्मणादिषु अस्नातोब्राह्मणोराजंस्तस्याधर्मोगवानृतम् ४४ आ
शौचोब्राह्मणोराजन्योश्नीयाद्ब्राह्मणादिषु ज्ञानपूर्वमथोलोभात्तस्याधर्मोगवानृतम् ४५ अर्थेनान्येनयोलिप्सेतकर्मार्थंचैवभारत आमं
त्रयतिराजेंद्रतस्याधर्मोनृतंस्मृतम् ४६ अवेदव्रतचारित्रास्त्रिभिर्वर्णैर्युधिष्ठिर मंत्रवत्परिविश्यंतेतस्याधर्मोगवानृतम् ४७ युधिष्ठि
रउवाच पित्र्यंवाप्यथवादैवंदीयतेयत्पितामह एतदिच्छाम्यहंज्ञातुंदत्तंकेषुमहाफलम् ४८ भीष्मउवाच येषांदाराःप्रतीक्षंते
सुवृष्टिमिवकर्षकाः उच्छेषपरिशेषंहिनान्भोजययुधिष्ठिर ४९ चारित्रनिरताराजन्येकृशाःकृशवृत्तयः अर्थिनश्चोपगच्छंतितेषुदत्तं
महाफलम् ५० तद्भक्तास्तद्गृहाराजंस्तद्बलास्तदपाश्रयाः अर्थिनश्चभवंत्यर्थेतेषुदत्तंमहाफलम् ५१ तस्करेभ्यःपरेभ्योवायेभयार्त्तायु
धिष्ठिर अर्थिनोभोक्तुमिच्छंतितेषुदत्तंमहाफलम् ५२ अकल्ककस्यविप्रस्यरौद्र्यात्करकृतात्मनः बटवोयस्यभिक्षंतितेभ्योदत्तंमहाफ
लम् ५३ हृतस्वाहृतदाराश्चयेविप्रादेशसंप्लवे अर्थार्थमभिगच्छंतितेभ्योदत्तंमहाफलम् ५४

भोजनपात्रेऽवशिष्टमुच्छेषःतेनसहितंपरिशेषंस्थाल्या
मवशिष्टंप्रतीक्षंते येषांपाकपात्र्यांसम्मेवधान्यादिकमस्तिनकुसूलादौतान्भोजय ४९ ५० तद्भक्ताःचारित्रमेवभक्तोऽन्नंनतूज्जीवनंयेषांते तद्गृहाःतदेवगृहंयेषांत्रा
दौयेषांते बलंइहलोकेदोषाभिभवसामर्थ्यं अपाश्रयःपरलोकगमनालंबनम् अर्थेप्रयोजनेसत्येवार्थिनोभवंतिनसंग्रहार्थं ५१ ५२ रौद्र्यात्दारिद्र्यात् क
रेकृतःआत्मेवात्माजीवनमन्नंहस्तेगृहीतान्नस्यबटवःक्षुधार्त्ताःमन्द्यंदेहिमह्यंदेहीतियाचंतेतेभ्योऽतिदरिद्रेभ्य ५३ हृतेतिपाठेपिकृतंहिंसितंदूरीकृतंहृतमित्येवार्थः

५५ चःपादपूरणार्थः पाखंडानांसमयोमर्यादायेषुधर्मेष्वितितत्र अत्युत्क्रांताः असंतंततोदूरेस्थिताः ५६ भुक्तान्नमेवस्पृहयंतिनस्वादं अतएवनचतुर्थी स्वादु-
त्वेनानीप्सितत्वादन्नस्य किंतुगर्त्तापूरणंयथाकथंचित्कर्त्तव्यंतत्रान्नंयमेवेश्वरेणकर्त्तव्यमित्याशयवंतइत्यर्थः ५७ ५८ ५९ अभयार्थंभयनिवृत्तिरूपंप्रयो-
जनम् ६० अभिमर्षिणोजाराः प्रयोक्तारः दूर्ताभिमर्षिणोदूताः ६१ परेषांदोषस्येतिशेषः ६२ ६३ ६४ आशायाश्छेदमित्येकदेशानुषंगःकुर्वंतीतिशेषः
६५ सूचकाराजगामिपैशून्यवादिनःसेतुःआर्यमर्यादा ६६ पाखंडाःवेदविरोधिनःशाक्यादयः दूषकाःमतानांनिंदकाः समयानांधर्मसंकेतानां प्रत्यवसिताः

व्रतिनोनियमस्थाश्चयेविप्राःश्रुतसम्मताः तत्समाप्त्यर्थमिच्छंतितेभ्योदत्तंमहाफलम् ५५ अत्युत्क्रांताश्चधर्मेषुपाखंडसमयेषुच कृ
शप्राणाःकृशधनास्तेभ्योदत्तंमहाफलम् ५६ कृतसर्वस्वहरणानिर्दोषाःप्रभविष्णुभिः स्पृहयंतिचभुक्तान्नंतेषुदत्तंमहाफलम् ५७
तपस्विनस्तपोनिष्ठास्तेषांभैक्षचराश्चये अर्थिनःकिंचिदिच्छंतितेषुदत्तंमहाफलम् ५८ महाफलविधिर्दानेश्रुतस्तेभरतर्षभ निरयंयेनग
च्छंतिस्वर्गंचैवहितच्छृणु ५९ गुर्वर्थमभयार्थंवावर्जयित्वायुधिष्ठिर येनृतंकथयंतिस्मतेवैनिरयगामिनः ६० परदाराभिहर्त्तारःपर-
दाराभिमर्षिणः परदारप्रयोक्तारस्तेवैनिरयगामिनः ६१ येपरस्वापहर्त्तारःपरस्वानांचनाशकाः सूचकाश्चपरेषांयेतेवैनिरयगामिनः
६२ प्रपाणांचसभानांचसंक्रमाणांचभारत अगाराणांचभेत्तारोनरानिरयगामिनः ६३ अनाथांप्रमदांबालांवृद्धांभीतांतपस्विनीम्
वंचयंतिनरायेचतेवैनिरयगामिनः ६४ वृत्तिच्छेदंगृहच्छेदंदारच्छेदंचभारत मित्रच्छेदंतथाशायास्तेवैनिरयगामिनः ६५ सूचकाः
सेतुभेत्तारःपरवृत्त्युपजीवकाः अकृतज्ञाश्चमित्राणांतेवैनिरयगामिनः ६६ पाखंडादूषकाश्चैवसमयानांचदूषकाः येप्रत्यवसिताश्चैव
तेवैनिरयगामिनः ६७ विषमव्यवहाराश्चविषमाश्चैववृद्धिषु लाभेषुविषमाश्चैवतेवैनिरयगामिनः ६८ द्यूतसंव्यवहाराश्चनि
ष्परीक्षाश्चमानवाः प्राणिहिंसाप्रवृत्ताश्चतेवैनिरयगामिनः ६९ कृताशंकृतनिर्देशंकृतभक्तंकृतश्रमम् भेदैर्येव्यपकर्षंतितेवै-
निरयगामिनः ७० पर्यश्नंतिचयेदारानग्निभृत्यातिथींस्तथा उत्सन्नपितृदेवेज्यास्तेवैनिरयगामिनः ७१ वेदविक्रयिणश्चैववेदानांचैवदूष-
काः वेदानांलेखकाश्चैवतेवैनिरयगामिनः ७२ चातुराश्रम्यबाह्याश्चश्रुतिबाह्याश्चयेनराः विकर्मभिश्चजीवंतितेवैनिरयगामिनः ७३

आरूढपतिताः ६७ विषमाःजनविरोधिनोव्यवहारादयोयेषांते ६८ ६९ कृताशंदास्यमाशयेनवा निर्देशंतुभ्यमिदंदास्यामीतिप्रतिज्ञा साकृतायस्मैइतिसमासः
भक्तंवेतनम् व्यपकर्षंतिपत्युःसकाशाद्दूरीकुर्वंति ७० पर्यश्नंतिपरित्यज्याश्नंति ७१ ७२ विकर्मभिःस्वस्यनिषिद्धैःकर्मभिः ७३ ७ ७ ७ ७

केशाश्चामरकंबलादयः ७४ अंतरयांतिअंतगयाभवंति ७५ कर्त्तारः शस्त्रशल्यादीनां ७६ ७७ ७८ अप्राप्तः अदांतः प्राप्तंलब्धेसमंजसेइतिमेदिनी पशूनां
युगेनगोण्याअंडमर्दनेनवाबल्वीर्ययोर्नाशका अप्राप्तदमकाः ७९ ८० ८१ ८२ ८३ सर्वेष्वितियेब्राह्मणातिक्रमंनकुर्वंतितेस्वर्गगामिनइत्यर्थः ८४

केशविक्रयिकाराजन्विषविक्रयिकाश्चये क्षीरविक्रयिकाश्चैवतेवैनिरयगामिनः ७४ ब्राह्मणानांगवांचैवकन्यानांचयुधिष्ठिर येंतरयां-
तिकार्येषुतेवैनिरयगामिनः ७५ शस्त्रविक्रयिकाश्चैवकर्त्तारश्चयुधिष्ठिर शल्यानांधनुषांचैवतेवैनिरयगामिनः ७६ शिलाभिःशंकुभिर्वा
पिश्वभ्रैर्वाभरतर्षभ येमार्गमनुरुंधंतितेवैनिरयगामिनः ७७ उपाध्यायांश्चभृत्यांश्चभक्तांश्चभरतर्षभ येत्यजंत्यविकारांस्त्रींस्तेवैनिरयगा
मिनः ७८ अप्राप्तदमकाश्चैवनासानांवेधकाश्चये बंधकाश्चपशूनांयेतेवैनिरयगामिनः ७९ अगोप्तारश्चराजानोबलिषड्भागतस्कराः स
मर्थाश्चाप्यदातारस्तेवैनिरयगामिनः ८० क्षांतान्दांतांस्तथाप्राज्ञान्दीर्घकालंसहोषितान् त्यजंतिकृतकृत्यायेतेवैनिरयगामिनः ८१
बालानामथवृद्धानांदासानांचैवयेनराः अदत्वाभक्षयंत्यग्रेतेवैनिरयगामिनः ८२ एतेपूर्वंविनिर्दिष्टाःप्रोक्तानिरयगामिनः भागिनःस्वर्ग
लोकस्यवक्ष्यामिभरतर्षभ ८३ सर्वेष्वेवतुकार्येषुदैवपूर्वेषुभारत हंतिपुत्रान्पशून्कृत्स्नान्ब्राह्मणातिक्रमःकृतः ८४ दानेनतपसाचैव
सत्येनचयुधिष्ठिर येधर्ममनुवर्त्तंतेतेनराःस्वर्गगामिनः ८५ शुश्रूषाभिस्तपोभिश्चविद्यामादायभारत येप्रतिग्रहनिःस्नेहास्तेनराःस्व
र्गगामिनः ८६ भयात्पापात्तथाबाधाद्दारिद्र्याद्व्याधिधर्षणात् यत्कृतेप्रतिमुच्यंतेतेनराःस्वर्गगामिनः ८७ क्षमावंतश्चधीराश्चधर्मका
र्येषुचोत्थिताः मंगलाचारसंपन्नाःपुरुषाःस्वर्गगामिनः ८८ निवृत्तामधुमांसेभ्यःपरदारेभ्यएवच निवृत्ताश्चैवमद्येभ्यस्तेनराःस्वर्गगा
मिनः ८९ आश्रमाणांचकर्त्तारःकुलानांचैवभारत देशानांनगराणांचतेनराःस्वर्गगामिनः ९० वस्त्राभरणदातारोभक्तपानान्नदास्त-
था कुटुंबानांचदातारःपुरुषाःस्वर्गगामिनः ९१ सर्वहिंसानिवृत्ताश्चनराःसर्वसहाश्चये सर्वस्याश्रयभूताश्चतेनराःस्वर्गगामिनः ९२
मातरंपितरंचैवशुश्रूषंतिजितेंद्रियाः भ्रातॄणांचैवसस्नेहास्तेनराःस्वर्गगामिनः ९३ आढ्याश्चबलवंतश्चयौवनस्थाश्चभारत येवैजि
तेंद्रियाधीरास्तेनराःस्वर्गगामिनः ९४ अपराधेषुसस्नेहामृदवोमृदुवत्सलाः आराधनसुखाश्चापिपुरुषाःस्वर्गगामिनः ९५ सहस्र
परिवेष्टारस्तथैवचसहस्रदाः त्रातारश्चसहस्राणांतेनराःस्वर्गगामिनः ९६ सुवर्णस्यचदातारोगवांचभरतर्षभ यानानांवाहनानांच-
तेनराःस्वर्गगामिनः ९७ वैवाहिकानांद्रव्याणांप्रेष्याणांचयुधिष्ठिर दातारोवाससांचैवतेनराःस्वर्गगामिनः ९८

८५ ८६ आबाधात् संकटात् ८७ ८८
मधुस्त्रौद्रं ८९ कर्त्तारःपालनकर्त्तारः ९० कुटुंबानांदातारः ९१ ९२ ९३ ९४आराधनेनइतरान्सुखयंतितेतथा ९५ ९६ ९७ द्रव्याणांवस्त्रालंकारादीनां प्रेष्याणांदासीदासानां
९८

९९ १०० १ २ दानंस्वभन्यर्पणस्य दानंचासौधर्मश्चेतिशौभकोधर्मःक्लीबत्वमार्ष अमुत्रार्थं परलोकफलम् ३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणि
टीकायांत्रयोविंशोऽध्यायः २३ इदंमेइति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटी

विहारावसथोद्यानकूपारामसभाप्रपाः वप्राणांचैवकर्तारस्तेनराःस्वर्गगामिनः ९९ निवेशनानांक्षेत्राणांवसतीनांचभारत दातारःप्रा-
र्थितानांचतेनराःस्वर्गगामिनः १०० रसानाञ्चाथबीजानांधान्यानाञ्चयुधिष्ठिर स्वयमुत्पाद्यदातारःपुरुषाःस्वर्गगामिनः १ यस्मिंस्तस्मि
न्कुलेजाताबहुपुत्राःशतायुषः सानुक्रोशाजितक्रोधाःपुरुषाःस्वर्गगामिनः २ एतदुक्तममुत्रार्थंदैवंपित्र्यंचभारत दानधर्मंचदानस्यच
पूर्वमृषिभिःकृतम् १०३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेस्वर्गनरकवर्णनेनामत्रयोविंशोऽध्यायः २३ युधिष्ठिरउ
वाच इदंमेतत्त्वतोराजन्वक्तुमर्हसिभारत अहिंसयित्वाकेनेहब्रह्महत्याविधीयते १ भीष्मउवाच व्यासमामन्त्र्यराजेन्द्रपुराय
त्पृष्टवानहम् तत्तेहंसंप्रवक्ष्यामितदिहैकमनाःशृणु २ चतुर्थस्त्ववसिष्ठस्यतत्त्वमाख्याहिमेमुने अहिंसयित्वाकेनेहब्रह्महत्याविधीयते
३ इतिपृष्टोमयाराजन्पराशरशरीरजः अब्रवीन्निपुणोधर्मेनिःसंशयमनुत्तमम् ४ ब्राह्मणंस्वयमाहूयभिक्षार्थेकृशवृत्तिनम् ब्रूयान्-
नास्तीतियःपश्चात्तंविद्याद्ब्रह्मघातिनम् ५ मध्यस्थस्येहविप्रस्ययोनूचानस्यभारत वृत्तिंहरतिदुर्बुद्धिस्तंविद्याद्ब्रह्मघातिनम् ६
गोकुलस्यतृषार्तस्यजलार्थेवसुधाधिप उत्पादयतियोविघ्नंतंविद्याद्ब्रह्मघातिनम् ७ यःप्रवृत्तांश्रुतिंसम्यक्शास्त्रंवामुनिभिःकृतम्
दूषयत्यनभिज्ञायतंविद्याद्ब्रह्मघातिनम् ८ आत्मजांरूपसंपन्नांमहतींसदृशेवरे नप्रयच्छतियःकन्यांतंविद्याद्ब्रह्मघातिनम् ९
अधर्मनिरतोमूढोमिथ्यायोवैद्विजातिषु दद्यान्मर्मातिगंशोकंतंविद्याद्ब्रह्मघातिनम् १० चक्षुषाविप्रहीनस्यपङ्गुलस्यजडस्यवा ह
रेतयोवैसर्वस्वंतंविद्याद्ब्रह्मघातिनम् ११ आश्रमेवावनेवापिग्रामेवायदिवापुरे अग्निंसमुत्सृजेन्मोहात्तंविद्याद्ब्रह्मघातिनम्
१२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेब्रह्मघ्नकथनेचतुर्विंशोऽध्यायः २४ युधिष्ठिरउवाच तीर्थानांदर्शनंश्रेयः
स्नानंचभरतर्षभ श्रवणंचमहाप्राज्ञश्रोतुमिच्छामितत्त्वतः १ पृथिव्यांयानितीर्थानिपुण्यानिभरतर्षभ वक्तुमर्हसिमेतानिश्रोतास्मिनि
यतंप्रभो २ भीष्मउवाच इदमङ्गिरसाप्रोक्तंतीर्थवंशंमहाद्युते श्रोतुमर्हसिभद्रंतेप्राप्स्यसेधर्ममुत्तमम् ३ तपोवनगतंविप्रमभिग
म्यमहामुनिम् प्रपच्छाङ्गिरसंधीरंगौतमःसंशितव्रतः ४

कायांचतुर्विंशोऽध्यायः २४ ७ तीर्थानामित्यध्यायस्यतात्पर्यंदरिद्राणां
दातृत्वंधर्मसाधनंतीर्थाटनादन्यन्नास्तीति श्रोतुमिच्छामितीर्थानीत्यर्थात १ २ तीर्थवंशंतीर्थसंघम ३ ४ ७ ७ ७

तीर्थेभ्यःतीर्थान्युद्दिश्यपावनानिनवेतिधर्मसंशयोस्ति ५ प्रेत्यभावेजन्मांतरे ६ मुनिवत्भवेत मुनीनांगतिंलभेतेत्यर्थः ७ नदंसिंधुम् ८ ९ १० ११
१२ गंगाद्वारादयो ऽत्रब्रह्मगिरेगोदावर्यनुगताएवग्राह्याः भागीरथीमहात्म्यस्यअग्रेस्वातंत्र्येणवर्ण्यमानत्वात् १३ १४ त्रिःस्थानेस्वर्गमृत्युपाताले १५

अस्तिमेभगवन्कश्चित्तीर्थेभ्योधर्मसंशयः. तत्सर्वंश्रोतुमिच्छामि तन्मेशंसमहामुने ५ उपस्पृश्यफलंकिंस्यात्तेषुतीर्थेषुवैमुने प्रेत्यभा
वेमहाप्राज्ञतद्यथास्तितथावद ६ अंगिराउवाच सप्ताहंचंद्रभागांवैवितस्तामूर्मिमालिनीम् विगाह्यवैनिराहारोनिर्मलोमुनिवद्भ-
वेत् ७ काश्मीरमंडलेनद्योयाःपततिमहानदम् तानदीःसिंधुमासाद्यशीलवान्स्वर्गमाप्नुयात् ८ पुष्करंचप्रभासंचनैमिषंसागरोद
कम् देविकामिंद्रमार्गंचस्वर्णबिंदुंविगाह्यच ९ विबोध्यतेविमानस्थःसोप्सरोभिरभिष्टुतः हिरण्यबिंदुंविक्षोभ्यप्रयतश्चाभिवाद्यच
१० कुशेशयंचदेवत्वंधूयतेतस्यकिल्बिषम् इंद्रतोयांसमासाद्यगंधमादनसन्निधौ ११ करतोयांकुरंगेचत्रिरात्रोपोषितोनरः अश्व
मेधमवाप्नोतिविगाह्यप्रयतःशुचिः १२ गंगाद्वारेकुशावर्तेबिल्वकेनीलपर्वते तथाकनकलेस्नात्वाधूतपाप्मादिवंव्रजेत् १३ अपांह्रद
उपस्पृश्यवाजिमेधफलंलभेत् ब्रह्मचारीजितक्रोधःसत्यसंधस्त्वहिंसकः १४ यत्रभागीरथीगंगापततेदिशमुत्तराम् महेश्वरस्यत्रिः
स्थानेयोनरस्त्वभिषिच्यते १५ एकमासंनिराहारःसपश्यतिहिदेवताः सप्तगंगेत्रिगंगेचइंद्रमार्गेचतर्पयन् १६ सुधांवैलभतेभोक्तुं
योनरोजायतेपुनः महाश्रमउपस्पृश्ययोग्निहोत्रपरःशुचिः १७ एकमासंनिराहारःसिद्धिंमासेनसंव्रजेत् महाह्रदउपस्पृश्यभृगुतुंगे-
त्वलोलुपः १८ त्रिरात्रोपोषितोभूत्वामुच्यतेब्रह्महत्यया कन्याकूपउपस्पृश्यबलाकायांकृतोद्यमः १९ देवेषुलभतेकीर्तिंयशसाचवि
राजते २० देविकायांउपस्पृश्यतथासुंदरिकाह्रदे अश्विन्यांरूपवर्चस्कंप्रेत्यवैलभतेनरः २१ महागंगामुपस्पृश्यकृत्तिकांगारकेतथा
पक्षमेकंनिराहारःस्वर्गमाप्नोतिनिर्मलः २२ वैमानिकउपस्पृश्यकिंकिणीकाश्रमेतथा निवासेप्सरसांदिव्येकामचारीमहीयते २३ का
लिकाश्रममासाद्यविपाशायांकृतोदकः ब्रह्मचारीजितक्रोधस्त्रिरात्रंमुच्यतेभवात् २४ आश्रमेकृत्तिकानांतुस्नात्वायस्तर्पयेत्पितॄन्
तोषयित्वामहादेवंनिर्मलःस्वर्गमाप्नुयात् २५ महापुरउपस्पृश्यत्रिरात्रोपोषितःशुचिः त्रसानांस्थावराणांचद्विपदानांभयंत्यजेत् २६
देवदारुवनेस्नात्वाधूतपाप्माकृतोदकः देवलोकमवाप्नोतिसप्तरात्रोषितःशुचिः २७ शरस्तंबेकुशस्तंबेद्रोणशर्मपदेतथा अपांप्र
पतनासेवीसेव्यतेसाप्सरोगणैः २८ चित्रकूटेजनस्थानेतथामंदाकिनीजले विगाह्यवैनिराहारोराजलक्ष्म्यानिषेव्यते २९

१६ १७ १८ १९ २० रूपवर्चसोःसमाहारःरूपवर्चस्कम् वर्चस्तेजः २१ २२ २३ २४ २५ त्रसानांजंगमानाम् २६ २७ २८ २९ ६७

अंतर्धानफलं गंधर्वादिभोगम् ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ गयायांगयांतर्गतेऽश्मपृष्ठेप्रेतशि
लायां एकांब्रह्महत्यांव्यपोह्यनिरविंदेनिश्चितेअविंदोऽलाभोयत्रतस्मिन्सुखगंधहीनेप्रेतपर्वतेद्वितीयांब्रह्महत्यांनिरस्यक्रौंचपदीतिसर्वेषांविष्णुपदा-

श्यामायास्त्वाश्रमंगत्वाउषित्वाचाभिषिच्यते एकपक्षंनिराहारस्त्वंतर्द्धानफलंलभेत् ३० कौशिकींतुसमासाद्यवायुभक्षस्त्वलोलुपः ए
कविंशतिरात्रेणस्वर्गमारोहतेनरः ३१ मतंगवाप्यांयःस्नायादेकरात्रेणसिद्ध्यति विगाहतित्यनालंबमंधकंवैसनातनम् ३२ नैमिषेस्व
र्गतीर्थेचउपस्पृश्यजितेंद्रियः फलंपुरुषमेधस्यलभेन्मासंकृतोदकः ३३ गंगाह्रदउपस्पृश्यतथाचैवोत्पलावने अश्वमेधमवाप्नोतिति
त्रमासंकृतोदकः ३४ गंगायमुनयोस्तीर्थेतथाकालंजलेगिरौ दशाश्वमेधानाप्नोतितत्रमासंकृतोदकः ३५ षष्टिह्रदउपस्पृश्यचा-
न्नदानाद्विशिष्यते दशतीर्थसहस्राणितिस्रःकोट्यस्तथापराः ३६ समागच्छंतिमाघ्यांतुप्रयागेभरतर्षभ माघमासंप्रयागेतुनियः
तःसंशितव्रतः ३७ स्नात्वातुभरतश्रेष्ठनिर्मलःस्वर्गमाप्नुयात् मरुद्गणउपस्पृश्यपितॄणामाश्रमेशुचिः ३८ वैवस्वतस्यतीर्थेचतीर्थभू
तोभवेन्नरः तथाब्रह्मसरोगत्वाभागीरथ्यांकृतोदकः ३९ एकमासंनिराहारःसोमलोकमवाप्नुयात् ४० उत्पातकेनरःस्नात्वाअष्टावक्रे-
कृतोदकः द्वादशाहंनिराहारोनरमेधफलंलभेत् ४१ अश्मपृष्ठेगयायांचनिरविंदेचपर्वते तृतीयांक्रौंचपद्यांचब्रह्महत्यांविशुद्ध्य
ति ४२ कलविंकउपस्पृश्यविद्याच्चबहुशोजलम् अग्नेःपुरेनरःस्नात्वाअग्निकन्यापुरेवसेत् ४३ करवीरपुरेस्नात्वाविशालायांकृ
तोदकः देवह्रदउपस्पृश्यब्रह्मभूतोविराजते ४४ पुनरावर्त्तनंदांचमहानंदांचसेव्यवै नंदनेसेव्यतेदांतस्त्वप्सरोभिरहिंसकः ४५
उर्वशीकृत्तिकायोगेगत्वाचैवसमाहितः लौहित्येविधिवत्स्नात्वापुंडरीकफलंलभेत् ४६ रामह्रदउपस्पृश्यविपाशायांकृतोदकः द्वा
दशाहंनिराहारःकल्मषाद्विप्रमुच्यते ४७ महाह्रदउपस्पृश्यशुद्धेनमनसानरः एकमासंनिराहारोजमदग्निगतिंलभेत् ४८ विंध्ये
संताप्यचात्मानंसत्यसंधस्त्वहिंसकः विनयात्तपआस्थायमासेनैकेनसिद्ध्यति ४९ नर्मदायामुपस्पृश्यतथासूर्पारकोदके एकपक्षं
निराहारोराजपुत्रोविधीयते ५० जंबूमार्गेत्रिभिर्मासैःसंयतःसुसमाहितः अहोरात्रेणचैकेनसिद्धिंसमधिगच्छति ५१ कोकामु-
खेविगाह्याथगत्वाचांगुलिकाश्रमम् शाकभक्षश्चीरवासाःकुमारीर्विंदतेदश ५२ वैवस्वतस्यसदनंनसगच्छेत्कदाचन यस्यक-
न्याह्रदेवासीदेवलोकंसगच्छति ५३ प्रभासेत्वेकरात्रेणअमावास्यांसमाहितः सिध्यतेतुमहाबाहोयोनरोजायतेमरः ५४

दीनामुपलक्षणंतेषु
तृतीयांब्रह्महत्यांसंकल्पमात्रागतांएवविशुद्ध्यतेदैत्यंनाशयित्वापूतोभवति ४२ ४३ ४४ ४५ उर्वशीउर्वशीतीर्थेकृत्तिकायोगेकार्त्तिक्यांपौर्णमास्यां ४६ ४७ ४८ ४९
५० ५१ ५२ ५३ ५४

५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ शरीरमिति विधिपूर्वकं आत्मश्राद्धादिकं कृत्वा अनाशके अनशनव्रते कृते सति बुद्धिपूर्वकं अत्रैव शरीरमुत्सृजेत् तीव्ररोगाद्यनभिभूतस्याप्येतन्मरणं विधीयते अध्रुवमिति वाक्यशेषात् इदमपि वेदान्तगस्य ज्ञाततत्त्वस्य शरीरधारणे प्रयोजनमपश्यत एव इतरेषां त्विह मरणं रोगादिमहानिमित्ते सत्येव महापातकप्रायश्चित्तार्थं वा उचितं नान्यथेति व्याख्यातं प्राग्वे वनपर्वणि ६३ ६४ ६५ ६६ इदं तीर्थसेवनं मेध्यं यज्ञफलप्रदं पुण्यपा

उज्जानकउपस्पृश्य आर्ष्टिषेणस्य चाश्रमे पिंगायाश्चाश्रमे स्नात्वा सर्वपापैः प्रमुच्यते ५५ कुल्यायां समुपस्पृश्य जप्त्वा चैवाघमर्षणम् अश्वमेधमवाप्नोति त्रिरात्रोपोषितो नरः ५६ पिंडारकउपस्पृश्य एकरात्रोषितो नरः अग्निहोत्रमवाप्नोति प्रभातां शर्वरीं शुचिः ५७ तथा ब्रह्मसरो गत्वा धर्मारण्योपशोभितम् पुंडरीकमवाप्नोति उपस्पृश्य नरः शुचिः ५८ मैनाके पर्वते स्नात्वा तथा संध्यामुपास्य च कामं जित्वा च वै मासं सर्वयज्ञफलं लभेत् ५९ कालोदकं नंदिकुंडं तथा चोत्तरमानसम् अभ्येत्य योजनशताद्भ्रूणहा विप्रमुच्यते ६० नंदीश्वरस्य मूर्तिं तु दृष्ट्वा मुच्येत किल्बिषैः स्वर्गमार्गे नरः स्नात्वा ब्रह्मलोकं स गच्छति ६१ विख्यातो हिमवान्पुण्यः शंकरश्वशुरो गिरिः आकरः सर्वरत्नानां सिद्धचारणसेवितः ६२ शरीरमुत्सृजेत्तत्र विधिपूर्वमनाशके अध्रुवं जीवितं ज्ञात्वा यो वै वेदान्तगो द्विजः ६३ अभ्यर्च्य देवतास्तत्र नमस्कृत्य मुनींस्तथा ततः सिद्धो दिवं गच्छेद्ब्रह्मलोकं सनातनम् ६४ कामं क्रोधं च लोभं च यो जित्वा तीर्थमावसेत् न तेन किंचिन्न प्राप्तं तीर्थाभिगमनाद्भवेत् ६५ यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च मनसा तानि गम्यानि सर्वतीर्थसमीक्षया ६६ इदं मेध्यमिदं पुण्यमिदं स्वर्ग्यमनुत्तमम् इदं रहस्यं वेदानामाप्लाव्यं पावनं तथा ६७ इदं दद्याद्द्विजातीनां साधूनामात्महितस्य च सुहृदां च जपेत्कर्णे शिष्यस्यानुगतस्य च ६८ दत्तवान्गौतमस्यैतदंगिरा वै महातपाः अंगिराः समनुज्ञातः काश्यपेन च धीमता ६९ महर्षीणामिदं जप्यं पावनानां तथोत्तमम् जपंश्चाभ्युत्थितः शश्वन्निर्मलः स्वर्गमाप्नुयात् ७० इदं यश्चापि शृणुयाद्रहस्यं त्वंगिरोमतम् उत्तमे च कुले जन्म लभेज्जातिं च संस्मरेत् ७१

इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे अंगिरसस्तीर्थयात्रायां पंचविंशोऽध्यायः २५ वैशंपायन उवाच बृहस्पतिसमं बुद्ध्या क्षमया ब्रह्मणः समम् पराक्रमे शक्रसमं आदित्यसमतेजसम् १ गांगेयमर्जुनेनाजौ निहतं भूरितेजसम् भ्रातृभिः सहितोऽन्यैश्च पर्यपृच्छद्युधिष्ठिरः २

पद्मं अत एव स्वर्ग्यं आप्लाव्यं आप्लवः स्नानमित्यर्थः आभाष्यमिति पाठे सहस्पदवाच्यं स्वार्थे ष्यङ् ६७ ६८ समनुज्ञातः प्रार्थितः काश्यपेन एतद्द्विजानुकामेनेति शेषः ६९ ७० ७१ इति आनुशासनिके पर्वणि टीकायां पंचविंशोऽध्यायः २५ ॥ बृहस्पतीति अध्यायः सर्वतीर्थश्रेष्ठां गंगां कथयितुं प्रवर्तते इतोऽन्यत् तीर्थान्तरं नास्तीति स्पष्टयन् १ यदापृच्छत्तं देवाजस्मुगिनि द्वितीयेन यत्तदोरध्याहारेणान्वयः यस्य प्रश्नमात्रेण सिद्धानां दर्शनं भवति किमु तद्दर्शनादिनेति

३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ महाभाग्यंयोगैश्वर्यंखेचरत्वांतर्धानशत्यादिसिद्धिमत्वम् १६ १७
देशाःभूमिभागाःजनपदाःमहाजननिवासस्थानानि आश्रमाः ऋषिस्थानानि १८ १९ २० २१ २२ २३ २४ आश्रमाइत्याकारस्य पूर्वरू-

शयानंवीरशयनेकालाकांक्षिणमच्युतम् आजग्मुर्भरतश्रेष्ठंद्रष्टुकामामहर्षयः ३ अत्रिर्वसिष्ठोथभृगुःपुलस्त्यःपुलहःक्रतुः अंगिरागौत
मोगस्त्यःसुमतिःसुयतात्मवान् ४ विश्वामित्रःस्थूलशिराःसंवर्त्तःप्रमतिर्दमः बृहस्पत्युशनोव्यासाश्च्यवनःकाश्यपोध्रुवः ५ दुर्वासाज
मदग्निश्चमार्कंडेयोथगालवः भरद्वाजोथरैभ्यश्चयवक्रीतस्त्रितस्तथा ६ स्थूलाक्षःशबलाक्षश्चकण्वोमेधातिथिःकृशः नारदःपर्वत
श्चैवसुधन्वाथैकतोद्विजः ७ नितंभूर्भुवनोधौम्यःशतानंदोकृतव्रणः जामदग्न्यस्तथारामःकचश्चेत्येवमादयः ८ समागतामहात्मानो
भीष्मंद्रष्टुंमहर्षयः तेषांमहात्मनापूजामागतानांयुधिष्ठिरः ९ भ्रातृभिःसहितश्चक्रेयथावदनुपूर्वशः तेपूजिताःसुखासीनाःकथाश्च
क्रुर्महर्षयः १० भीष्माश्रिताःसुमधुराःसर्वेंद्रियमनोहराः भीष्मस्तेषांकथाश्रुत्वाऋषीणांभावितात्मनाम् ११ मेनेदिविष्टमात्मानंतु
ष्ट्यापरमयायुतः ततस्तेभीष्ममामंत्र्यपांडवांश्चमहर्षयः १२ अंतर्धानंगताःसर्वेसर्वेषामेवपश्यताम् तानृषीन्सुमहाभागानंतर्धानग-
तानपि १३ पांडवास्तुष्टुवुःसर्वेप्रणेमुश्चमुहुर्मुहुः प्रसन्नमनसःसर्वेगांगेयंकुरुसत्तमम् १४ उपतस्थुर्यथोद्यंतमादित्यंमंत्रकोविदाः
प्रभावात्तपसस्तेषामृषीणांवीक्ष्यपांडवाः १५ प्रकाशंतोदिशःसर्वाविस्मयंपरमंययुः महाभाग्यंपरंतेषामृषीणामनुचिंत्यते पांडवाः
सहभीष्मेणकथांश्चक्रुस्तदाश्रयाः १६ वैशंपायनउवाच कथांतेशिरसापादौस्पृष्ट्वाभीष्मस्यपांडवः धर्म्यंधर्मसुतःप्रश्नंपर्यपृच्छ
तयुधिष्ठिरः १७ युधिष्ठिरउवाच केदेशाःकेजनपदाःआश्रमाःकेचपर्वताः प्रकृष्टाःपुण्यतःकाश्चज्ञेयानद्यःपितामह १८
भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् शिलोंछवृत्तेःसंवादंसिद्धस्यचयुधिष्ठिर १९ इमांकश्चित्परिक्रम्यपृथिवींशै-
लभूषणाम् असकृद्द्विपदांश्रेष्ठःश्रेष्ठस्यगृहमेधिनः २० शिलवृत्तेर्गृहंप्राप्तःसतेनविधिनार्चितः उवासरजनींतत्रसमुखःसुखभागृ-
षिः २१ शिलवृत्तिस्तुयत्कृत्यंप्रातस्तत्कृतवान्छुचिः कृतकृत्यमुपातिष्ठत्सिद्धंतमतिथिंतदा २२ तौसमेत्यमहात्मानौसुखासीनौकथाः
शुभाः चक्रतुर्वेदसंबद्धास्तच्छेषकृतलक्षणाः २३ शिलवृत्तिःकथांतेतुसिद्धमामंत्र्ययत्नतः प्रश्नंपप्रच्छमेधावीयन्मात्वंपरिपृच्छसि
२४ शिलवृत्तिरुवाच केदेशाःकेजनपदाःकेश्रमाःकेचपर्वताः प्रकृष्टाःपुण्यतःकाश्चज्ञेयानद्यस्तदुच्यताम् २५ सिद्धउवाच
तेदेशास्तेजनपदास्तेश्रमास्तेचपर्वताः येषांभागीरथीगंगामध्येनेतिसरिद्वरा २६

पमार्थम् २५ तेदेशाइतिप्रकृष्टाःपुण्यतइतिअनुषंगः २६ ७

२७ गात्राणि अस्थीनि न्यस्तानि गंगायाम् २८ २९ ३० व्युष्टिः पुण्यवृद्धिः व्युष्टिः फले समृद्धौ चेति मेदिनी ३१ ३२ ३३ ३४ ३५ ३६ ३७
गवां निर्हारः आहारनिर्गमनमार्गस्ततो निर्मुक्तं यावकं यवविकारस्तस्मात गोयवानादपि स्नानच्छद्र दंतर्गतान्यवान् पञ्चाभुंजानो यावकव्रतीत्युच्यते ३८

तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः गतिं तां न लभेज्जंतुर्गंगां संसेव्य यां लभेत् २७ स्पृष्टानि येषां गांगेयैस्तोयैर्गात्राणि देहिनाम् न्य
स्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते २८ सर्वाणि येषां गांगेयैस्तोयैः कार्याणि देहिनाम् गां त्यक्त्वा मानवा विप्र दिवि तिष्ठंति ते जनाः
२९ पूर्वे वयसि कर्माणि कृत्वा पापानि ये नरः पश्चाद्गंगां निषेवंते तेपि यांत्युत्तमां गतिम् ३० स्नातानां शुचिभिस्तोयैर्गांगेयैः प्रयतात्मनाम्
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ३१ यावदस्थि मनुष्यस्य गंगातोयेषु तिष्ठति तावद्वर्षसहस्राणि स्वर्गलोके महीयते ३२ अप
हत्य तमस्तीव्रं यथा भात्युदये रविः तथापहत्य पाप्मानं भाति गंगाजलोक्षितः ३३ विसोमा इव शर्वर्यो विपुष्पास्तरवो यथा तद्वद्देशा-
दिशश्चैव हीना गंगाजलैः शिवैः ३४ वर्णाश्रमा यथा सर्वे धर्मज्ञानविवर्जिताः क्रतवश्च यथासोमास्तथा गंगां विना जगत् ३५ यथा ही
नं नभोऽर्केण भूः शैलैः खं च वायुना तथा देशा दिशश्चैव गंगाहीना न संशयः ३६ त्रिषु लोकेषु ये केचित् प्राणिनः सर्व एव ते तर्प्यमाणाः परां तृ
प्तिं यांति गंगाजलैः शुभैः ३७ यस्तु सूर्येण निष्टप्तं गांगेयं पिबते जलम् गवां निर्हारनिर्मुक्ताद्यावकात्तद्विशिष्यते ३८ चंद्रव्रतसहस्रं
तु यश्चरेत्कायशोधनम् पिबेद्यश्चापि गंगांभः समौ स्यातां न वा समौ ३९ तिष्ठेद्युगसहस्रं तु पदेनैकेन यः पुमान् मासमेकं तु गंगायां स
मौ स्यातां न वा समौ ४० लंबतेऽवाक्शिरा यस्तु युगानामयुतं पुमान् तिष्ठेद्यथेष्टं यश्चापि गंगायां स विशिष्यते ४१ अग्नौ प्रास्तं प्रधूये-
त यथा तूलं द्विजोत्तम तथा गंगावगाढस्य सर्वपापं प्रधूयते ४२ भूतानामिह सर्वेषां दुःखोपहतचेतसाम् गतिमन्वेषमाणानां न गंगास
दृशी गतिः ४३ भवंति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात् गंगाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते ४४ अप्रतिष्ठाश्च ये केचिदधर्मशर
णाश्रये तेषां प्रतिष्ठा गंगेह शरणं शर्म वर्म च ४५ प्रकृष्टैरशुभैर्ग्रस्तानानेकैः पुरुषाधमान् पततो नरके गंगा संश्रितान्प्रेत्य तारयेत्
४६ ते संविभक्ता मुनिभिर्नूनं देवैः सवासवैः येऽभिगच्छंति सततं गंगामभिगतां वर ४७ विनयाचारहीनाश्च अशिवाश्च नराधमाः ते
भवंति शिवा विप्र ये वै गंगां समाश्रिताः ४८ यथा सुराणाममृतं पितॄणां च यथा स्वधा सुधा यथा च नागानां तथा गंगाजलं नृणाम् ४९ उ
पासते यथा बाला मातरं क्षुधयार्दिताः श्रेयस्कामास्तथा गंगामुपासंतीह देहिनः ५० स्वायंभुवं यथा स्थानं सर्वेषां श्रेष्ठमुच्यते स्नातानां स
रितां श्रेष्ठा गंगा तद्वदिहोच्यते ५१

इंदुव्रतं चांद्रायणं ३९ ४० ४१ धूयते दूरं जायते भस्मीभूयापि न शिष्यते इत्यर्थः ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१

५२ सोमसंस्थानि अमृतानिदेवाउपजीवंतीति प्रथमांपिबतेवन्हिर्द्वितीयांपिबतेरविरित्यादिनास्पष्टं अर्कसंस्थानीत्यर्पिच्छोदोग्येरोहितादीनिपंचामृतानिआ
स्वाद्यउपजीवंतीप्रसिद्धम् ५३ ५४ ५५ ५६ व्यसनैः धृतपानादिव्यसनजैर्दुःखैः ५७ ५८ ५९ कार्याणिभोगान् ६० ६१ ६२ ६३ ६४

यथोपजीविनांधेनुर्देवादीनांधरास्मृता । तथोपजीविनांगंगासर्वप्राणभृतामिह ५२ देवाःसोमार्कसंस्थानियथासत्रादिभिर्मखैः अमृ-
तान्युपजीवंतितथागंगाजलंनराः ५३ जान्हवीपुलिनोत्थाभिःसिकताभिःसमुक्षितम् आत्मानमन्यतेलोकोदिविष्ठमिवशोभितम्
५४ जान्हवीतीरसंभूतांमृदंमूर्ध्नाबिभर्त्तियः बिभर्त्तिरूपंसोर्कस्यतमोनाशायनिर्मलम् ५५ गंगोर्मिभिरथोदिग्धःपुरुषंपवनोयदा
स्पृशतेसोस्यपाप्मानंसद्यएवापकर्षति ५६ व्यसनैरभितप्तस्यनरस्यविनशिष्यतः गंगादर्शनजाप्रीतिर्व्यसनान्यपकर्षति ५७ हं
सारावैःकोकरवैरवैरन्यैश्चपक्षिणाम् पस्पर्द्धगंगागंधर्वान्पुलिनैश्चशिलोच्चयान् ५८ हंसादिभिःसुबहुभिर्विविधैःपक्षिभिर्वृताम्
गंगागोकुलसंबाधांदृष्ट्वास्वर्गोपिविस्मृतः ५९ नसाप्रीतिर्दिविष्ठस्यसर्वकामानुपाश्नतः संभवेद्यापराप्रीतिर्गंगायाःपुलिनेनृणाम् ६०
वाङ्मनःकर्मजैर्ग्रस्तःपापैरपिपुमानिह वीक्ष्यगंगांभवेत्पूतोअत्रमेनास्तिसंशयः ६१ सप्तावरान्सप्तपरान्पितॄंस्तेभ्यश्चयेपरे पुमां
स्तारयतेगंगांवीक्ष्यस्पृष्ट्वावगाह्यच ६२ श्रुताभिलषितापीतास्पृष्टादृष्टावगाहिता गंगातारयतेनृणामुभौवंशौविशेषतः ६३ दर्शना
त्स्पर्शनात्पानात्तथागंगेतिकीर्त्तनात् पुनात्यपुण्यान्पुरुषाञ्छतशोथसहस्रशः ६४ यइच्छेत्सफलंजन्मजीवितंश्रुतमेवच सपितॄंस्तर्प-
येद्गंगामभिगम्यसुरांस्तथा ६५ नसुतैर्नचवित्तेनकर्मणानचतत्फलम् प्राप्नुयात्पुरुषोत्यंतंगंगांप्राप्ययदाप्नुयात् ६६ जात्यंधैरिहतु-
ल्यास्तेमृतैःपंगुभिरेवच समर्थायेनपश्यंतिगंगांपुण्यजलांशिवाम् ६७ भूतंभव्यभविष्यज्ञैर्महर्षिभिरुपस्थिताम् देवैःसेंद्रैश्चकोगं
गांनोपसेवेतमानवः ६८ वानप्रस्थैर्गृहस्थैश्चयतिभिर्ब्रह्मचारिभिः विद्यावद्भिःश्रितागंगापुमान्कोनामनाश्रयेत् ६९ उत्क्रामद्भिश्च
यःप्राणैःप्रयतःशिष्टसंमतः चिंतयेन्मनसागंगांसगतिंपरमांलभेत् ७० नभयेभ्योभयंतस्यनपापेभ्योनराजतः आदेहपतनाद्गंगा
मुपास्तेयःपुमानिह ७१ महापुण्यांचगगनात्पततींवैमहेश्वरः दधारशिरसागंगांतामेवदिविसेवते ७२ अलंकृतास्त्रयोलोकाःप-
थिभिर्विमलैस्त्रिभिः यस्तुतस्याजलंसेवेत्कृतकृत्यःपुमान्भवेत् ७३ दिविज्योतिर्यथादित्यःपितॄणांचैवचंद्रमाः देवेशश्चतथानृणां
गंगाचसरितांतथा ७४ मात्रापित्रासुतैर्दारैर्विमुक्तस्यधनेनवा नभवेद्धितथादुःखंयथागंगावियोगजम् ७५

६५ ६६ ६७ उपस्थितांनित्यं
सेविता ६८ ६९ ७० भयेभ्यः घोरेभ्योव्याघ्रादिभ्यःपिशाचादिभ्योवा पापेभ्यःब्रह्मवधादिभ्यः ७१ ७२ ७३ दिविदेवानामितिशेषःदेवेशःराजेंद्रः ७४ ७५

अर॰ ण्यश्चार्णवौतृतीयस्यामितोदिवीतिश्रुतेररण्याख्यसरोद्वयवान्ब्रह्मलोकोअरंण्यस्तत्रभवैरारणेयैर्विषयैः इष्टयागादितत्प्राप्तैरिष्टविषयैःस्वर्ग्यैः
७६ ७७ तद्भावःतस्याभेवभ्भावःश्रद्धायस्यसतथा धर्मेश्रद्धावानपिस्त्रीपुत्रादिमनाभवतिनदृष्टार्थत्वर्थंतन्मनाइति श्रद्धमनश्चकादाचित्कोपियागादो-
भवतिनत्वाराध्यदेवतायामिवतत्रनैरंतर्येणनितरांस्थितिर्भवतितदर्थतन्निष्ठइतित्रयमपिस्वर्गाद्यर्थंकस्यचिद्भवतितथानभवतिकिंतुपरायणंप्राप्यम
पिगंगैवयस्यसतत्परायणः एवंभूत्वायोनुगतः अनुसृतःभक्त्याआराध्यत्वज्ञानेनसगंगायाःप्रियोभवेत् ७८ ७९ भस्माख्यान्भस्मीभूतान् ८० दु
ग्धःनिर्दोषत्वेनदीप्ताः ८१ पयोघृतंयागीयेहविषिसमृद्धिर्यागफलंतद्वती यागादिजपुण्यंतत्फलंस्वर्गादिचगंगाप्राप्त्यैवलभ्यतइत्यर्थः ८२ बृहतीश्रेष्ठा विश्व

नारंणेयैर्नेष्टविषयैर्नसुतैर्नधनागतैः तथाप्रसादोभवतिगंगांवीक्ष्ययथाभवेत् ७६ पूर्णमिंदुंयथादृष्ट्वानृणांदृष्टिःप्रसीदति तथात्रिपथगांदृ
ष्ट्वानृणांदृष्टिःप्रसीदति ७७ तद्भावस्तद्गतमनास्तन्निष्ठस्तत्परायणः गंगांयोनुगतोभक्त्यासतस्याःप्रियतांव्रजेत् ७८ भूस्थैःखस्थैर्दिवि
स्थैश्चभूतैरुच्चावचैरपि गंगाविगाह्यासततमेतत्कार्यंतमंसताम् ७९ विश्वलोकेषुपुण्यत्वाद्गंगायाःप्रथितंयशः यत्पुत्रान्सगरस्यैतोभस्मा
ख्यानानयद्दिवम् ८० वाय्वीरिताभिःसुमनोहराभिर्द्रुताभिरत्यर्थसमुत्थिताभिः गंगोर्मिभिर्भानुमतीभिरिद्धाःसहस्ररश्मिप्रतिमाभवंति
८१ पयस्विनींघृतिनीमत्युदारांसमृद्धिनींवेगिनींदुर्विगाह्यां गंगांगतायैःशरीरंविसृष्टंगताधीरास्तेविबुधैःसमत्वम् ८२ अंधान्जडान्
द्रव्यहीनांश्चगंगायशस्विनीबृहतीविश्वरूपा देवैःसेंद्रैर्मुनिभिर्मानवैश्चनिषेवितासर्वकामैर्युनक्ति ८३ ऊर्जावतीमहापुण्यांमधुमतींत्रि
वर्त्मगाम् त्रिलोकगोप्त्रींयेगंगांसंश्रितास्तेदिवंगताः ८४ योवत्स्यतिद्रक्ष्यतिवापिमर्त्यस्तस्मैप्रयच्छंतिसुखानिदेवाः तद्भाविताःस्पर्शन
दर्शनेनइष्टांगतिंतस्यसुरादिशंति ८५ दक्षांपृश्निंबृहतींविप्रकृष्टांशिवामृद्धांभागिनींसुप्रसन्नाम् विभावरींसर्वभूतप्रतिष्ठांगंगांगतायै
त्रिदिवंगतास्ते ८६ ख्यातिर्यस्याःखंदिवंगांचनित्यंपुरादिशोविदिशश्चावतस्थे तस्याजलंसेव्यसरिद्वरायामर्त्याःसर्वेकृतकृत्याभवंति ८७
इयंगंगेतिनियतंप्रतिष्ठागुहस्यरुक्मस्यचगर्भयोषा प्रातस्त्रिवर्गाघृतवहाविपाप्मागंगावतीर्णावियतोविश्वतोया ८८

देवादीनांरूपंसौभाग्यंययाप्राप्य
तेसाविश्वरूपा ८३ ऊर्कअन्नपश्वादिः ऊर्जेतिभागुरिमतात्टाप् तत्प्रदामित्यर्थः मधुंकर्मफलंब्रह्मवानत्प्रदांमधुमतीं ८४ योगंगामितिशेषः तयागंगयाभाविताःमहं
त्वंगताःदेवाःस्पर्शनदर्शनेनगंगायाएव ८५ दक्षांतारणसमर्थां पृश्निंविष्णुमातरंबृहतींवाग्बृहतीतिश्रुतेः भागिनींभगानामैश्वर्यादीनांषण्णांसमूहोभागंतद्वतीं विभाव
रींप्रकाशिकां ८६ ख्यातिःपुण्यत्वकीर्त्तिःसेव्यनिषेव्य ८७ गंगादृष्ट्वाइयंगंगेतिअन्यान्गंगांदर्शयतःपुरुषस्यनियतंनियमेनगंगैवप्रतिष्ठासंसारावसानहेतुर्भवति गुहस्यका-
र्त्तिकेयस्यरुक्मस्यचगर्भयोषागर्भधारिणीस्त्रीवियतःसकाशात्प्रातरवतीर्णातेनास्यांप्रातःस्नानंअतिप्रशस्तमितिसूचितं त्रिवर्गाधर्मार्थकामदा घृतवहाजलवाहिनी विश्व
तोयाविश्वप्रियतोया ८८ ६२ ६७

अवनीध्रस्यमेरोःहिमवतोवापर्वतस्य कृतंअनुरूपंअलंकारोययासाकृतानुरूपा ८९ मधुस्रवाधर्मद्रवा घृतधारानेजोधारा घृतार्चिःआज्यस्येवअर्चिर्वर्चोयं
यासा घृतंदीप्त्याज्यवारिष्विति विश्वलोचनः अवनीध्रात् पृथिवीध्रात्पर्वतात्स्वर्गात्प्राप्तेतिशेषः ९० वरिष्ठायोनिःपरमकारणंविरजानिर्मला वितन्वीसुस्वविशेषेणतन्वीसूक्ष्मा श
य्यादीर्घनिद्रातल्पःमरणंजान्हवीतटइतिवचनात् अचिराशीघ्रा विश्वावनीविश्वंअवंतीपालयंतीनुम्भावआर्षः आकृतिःसत्तासामान्यरूपा आकृतिस्तुस्त्रि
यांरूपेसामान्यवपुषोरपीतिमेदिनी इष्टसिद्धाइष्टःसिद्धोयस्याःसासिद्धानामिष्टाइतिवा उक्षितानांस्नातानां भुवनस्यस्वर्गस्यलक्षांत्यादित्रयेमत्यानुल्येतिसंबं
धः गुहस्यकुमारस्यसमताब्रह्मण्यतयाब्राह्मणजात्यनुग्राहकत्वया ९२ मनसापिप्रपन्नाःकिमुतसाक्षात् ९३ जननीवोपास्येतिसंबंधः अवेक्ष्यनश्वरानितिशेषः

सन्नावनींध्रस्यहरस्यभार्यादिवोभुवश्चापिकृतानुरूपा भव्यापृथिव्यांभागिनीचापिराजनगंगालोकानांपुण्यदावैत्रयाणाम् ८९ मधुस्रवाघृ
तधाराघृतार्चिर्महोर्मिभिःशोभिताब्राह्मणैश्च दिवश्च्युताशिरसाप्ताशिवेनगंगावनीध्रात्त्रिदिवस्यमाता ९० योनिर्वरिष्ठाविरजावितन्वीशय्या
चिराद्वारिवहायशोदा विश्वावनीचाकृतिरिष्टसिद्धागंगोक्षितानांभुवनस्यपंथाः ९१ क्षांत्यामन्त्यागोपनेधारणेचदीप्त्याकृशानोस्तपन-
स्यचैव तुल्यागंगासमताब्राह्मणानांगुहस्यब्रह्मण्यतयाचनित्यम् ९२ ऋषिष्टुतांविष्णुपदींपुराणांसुपुण्यतोयांमनसापिलोके सर्वात्म
नाजान्हवींयेप्रपन्नास्तेब्रह्मणःसदनंसंप्रयाताः ९३ लोकानवेक्ष्यजननीवपुत्रान्सर्वात्मनासर्वगुणोपपन्नान् तत्स्थानकंब्राह्ममभी
प्समानैर्गंगासदैवात्मवशैरुपास्या ९४ उस्रांपुष्टामिषतींविश्वभोज्यामिरावतींरेवतींभूधराणाम् शिष्टाश्रयाममृतांब्रह्मकांतांगंगाश्रयेदा
त्मवान्सिद्धिकामः ९५ प्रसाद्यदेवान्सविभून्समस्तान्भगीरथस्तपसोग्रेणगंगाम् गामानयत्तामभिगम्यशश्वत्पुंसाभयंनेहचामुत्रवि
द्यात् ९६ उदाहृतःसर्वथातेगुणानामयैकदेशःप्रसमीक्ष्यबुध्या शक्तिर्नमेकाचिदिहास्तिवक्तुंगुणान्सर्वान्परिमातुंतथैव ९७ मेरोःस
मुद्रस्यचसर्वरत्नैःसंख्योपलानामुदकस्यवापि शक्यंवक्तुंनेहगंगाजलानांगुणाख्यानंपरिमातुंतथैव ९८ तस्मादेतान्परयाश्रद्धयोक्ता
न्गुणान्सर्वान्जान्हवीयान्सदैव भवेद्वाचामनसाकर्मणाचभक्त्यायुक्तःश्रद्धयाश्रद्दधानः ९९

९४ उस्रांधेनुंअमृतदुघामितियावत् मिष
तींपश्यंतींसर्वज्ञामित्यर्थः इरावतींअन्नवतींइरातुमदिरावारिभारत्यशनभूमिषुइतिविश्वलोचनः धारिणीमित्यत्ररेवतीमितिपाठेमातरंरेवतीहरिभार्यायांतागभि
न्नात्रमंदयोरितिमेदिनी ब्रह्मणोपिकांतांवेनोहरां सिद्धिर्मोक्षः ९५ सविभून्सेश्वरान् गांपृथ्वीम् ९६ गुणानांगंगायाइतिशेषः ९७ ९८ मदुक्ता-
न्गंगागुणान्ज्ञात्वावाचादिभिःस्तोत्रध्यानस्नानादिषुश्रद्दधानोभवेदितिसंबंधः ९९ ७ ७ ७ ७ ७ ७ ७

गगाकृतान् गंगासेवनेभासान् इष्टान् संकल्पसिद्धान् पाठांतरंयथेष्टमिष्टंमधुरंयथास्यात्तथा १०० महानुभावागंगामतिंजुषतु प्रीणातु गंगादर्शनादिनामतिः
प्रसीददित्यर्थः अभिमतः श्रद्धालुः १ २ ३ ४ ५ ६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांषड्विंशोऽध्यायः २६ गंगासंमताब्रा-
ह्मणानांमितिब्रह्मविदांकृतंकृत्यानामपिगंगापूज्यत्वेनसंमतेत्युक्तेनेनब्राह्मण्यंमहदितिमत्वापृच्छतिप्रज्ञेति वृत्तमाचारः शीलंविनयः १ २ ३ चेदिच्छेत्त

लोकानिमांस्त्रीनयशसावितत्यसिद्धिंप्राप्यमहतींदुरापाम् गंगाकृतानचिरेणैवलोकान्यथेष्टमिष्टान्विहरिष्यसित्वम् १०० तवममचगुणै
र्महानुभावाजुषतुमतिंसततंस्वधर्मयुक्तैः अभिमतजनवत्सलाहिगंगाजगतियुनक्तिसुखैश्चभक्तिमंतम् १ भीष्मउवाच इतिपरमम
तिर्गुणानशेषान्शिलरतयेत्रिपथानुयोगरूपान् बहुविधमनुशास्यतथ्यरूपान्गगनतलद्युतिमान्विवेशासिद्धः २ शिलवृत्तिस्तुसिद्ध
स्यवाक्यैःसंबोधितस्तदा गंगामुपास्यविधिवत्सिद्धिंप्रापसुदुर्लभाम् ३ तथात्वमपिकौंतेयभक्त्यापरमयायुतः गंगामभ्येहिसततंप्रा-
प्स्यसेसिद्धिमुत्तमाम् ४ वैशंपायनउवाच श्रुत्वेतिहासंभीष्मोक्तंगंगायाःस्तवसंयुतम् युधिष्ठिरःपरांप्रीतिमगच्छद्भ्रातृभिःसह
५ इतिहासमिमंपुण्यंशृणुयाद्यःपठेतवा गंगायाःस्तवसंयुक्तंसमुच्येत्सर्वकिल्बिषैः १०६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदा
नधर्मेगंगामाहात्म्यकथनेषड्विंशोऽध्यायः २६ युधिष्ठिरउवाच प्रज्ञाश्रुताभ्यांवृत्तेनशीलेनचयथाभवान् गुणैश्चविविधैःसर्वैर्व-
यसाचसमन्वितः १ भवान्विशिष्टोबुद्ध्याचप्रज्ञयातपसातथा तस्माद्भवंतंपृच्छामिधर्मंधर्मभृतांवर २ नान्यस्त्वदन्योलोकेषुप्रष्टव्यो
स्तिनराधिप क्षत्रियोयदिवावैश्यःशूद्रोवाराजसत्तम ३ ब्राह्मण्यंप्राप्नुयाद्येनतन्मेव्याख्यातुमर्हसि तपसावासुमहताकर्मणावाश्रुतेन
वा ४ ब्राह्मण्यमथचेदिच्छेत्तन्मेब्रूहिपितामह ५ भीष्मउवाच ब्राह्मण्यंतातदुष्प्राप्यंवर्णैःक्षत्रादिभिस्त्रिभिः परंहिसर्वभूतानां-
स्थानमेतद्युधिष्ठिर ५ बह्वीस्तुसंसरन्योनीर्जायमानःपुनःपुनः पर्यायेतातकस्मिंश्चिद्ब्राह्मणोनामजायते ६ अत्राप्युदाहरंतीममि
तिहासंपुरातनम् मतंगस्यचसंवादंगर्दभ्याश्चयुधिष्ठिर ७ द्विजातेःकस्यचित्ताततुल्यवर्णःसुतस्त्वभूत् मतंगोनामनाम्नावैसर्वैःसमु
दितोगुणैः ८ सयज्ञकारःकौंतेयपित्रोत्सृष्टःपरंतपः प्रायाद्गर्दभयुक्तेनरथेनाप्याशुगामिना ९ सबालंगर्दभंराजन्वहंतंमातुरंतिके
निरवध्यत्प्रतोदेननासिकायांपुनःपुनः १० तत्रतीव्रव्रणंदृष्ट्वागर्दभीपुत्रगृद्धिनी उवाचमाशुचःपुत्रचंडालस्त्वाधितिष्ठति ११

हिकेनप्राप्नुयात्तदितिअनुषज्यव्याख्येयोयमर्द्धः ४ ५ पर्यायेआवृत्तौजन्मनाम् ६ ७ तुल्यवर्णःअंत्यवर्णजोपिजातकर्मादिसंस्कारयोगात्तु-
ल्यवर्णत्वंगतः नामप्रसिद्धं ८ यज्ञकारःयज्ञंकारयन्आर्त्विज्यंकुर्वन्नित्यर्थः प्रायात्अग्निचयनार्थमिष्टकाआनेतुमित्यर्थाद्गम्यते ९ बालंअशिक्षितम् १० ११

आवापइतिपाठे आलबालंपितृमातृतुल्येत्यर्थः आवापोभांडवजने परिक्षेपबालंबालयोरितिमेदिनी १२ बालेत्वयि भावःजातिस्वभावः मांबुद्धिंनियच्छतिमार्गान
दपकर्षतीति १३ १४ १५ ब्राह्मण्यंलोकदृश्यंनश्यतेअंतर्धीयते येनलक्षणेनतत्कथ्यंयतःमांचंडालंवेत्सि १६ अनशत् नष्टंक्रूरत्वलिंगेन १७ १८ संसिद्धो
संसिद्ध्यर्थं १९ अंतयोनिश्चंडालजातिः अयोनिस्तदन्यःकुत्सितयोनिः तयोर्हीनकर्मतयाकुशलित्वनास्तीत्यर्थः २० २१ २२ सुचरितात्तपसश्चहेतोःस्थानं

ब्राह्मणेदारुणंनास्तिमैत्रीब्राह्मणउच्यते आचार्यःसर्वभूतानांशास्ताकिंप्रहरिष्यति १२ अयंतुपापप्रकृतिर्बालेनकुरुतेदयाम् स्वयोनिं
मानयत्येषभावोभावंनियच्छति १३ एतच्छ्रुत्वामतंगस्तुदारुणंरासभीवचः अवतीर्यरथात्तूर्णंरासभींप्रत्यभाषत १४ ब्रूहिरासभिकल्याणि
मातामेयेनदूषिता कथंमांवेत्सिचंडालंक्षिप्रंरासभिशंसमे १५ कथंमांवेत्सिचंडालंब्राह्मण्यंयेननश्यते तत्त्वेनैतन्महाप्राज्ञेब्रूहिसर्वम
शेषतः १६ गर्दभ्युवाच ब्राह्मण्यांवृषलेनत्वंमत्तायांनापितेनह जातस्त्वमसिचांडालोब्राह्मण्यंतेनतेनशत् १७ एवमुक्तोमत
गस्तुप्रतिप्रायाद्गृहंप्रति तमागतमभिप्रेक्ष्यपितावाक्यमथाब्रवीत् १८ मयात्वंयज्ञसंसिद्धौनियुक्तोगुरुकर्मणि कस्मात्प्रतिनिवृत्तो-
सिकच्चिन्नकुशलंतव १९ मतंगउवाच अंतयोनिरयोनिर्वाकथंसकुशलीभवेत् कुशलंतुकुतस्तस्ययस्येयंजननीपितः २० ब्रा-
ह्मण्यांवृषलाज्जातंपितर्वेदयतीवमाम् अमानुषीगर्दभीयंतस्मात्तप्स्येतपोमहत् २१ एवमुक्त्वासपितरंप्रतस्थेकृतनिश्चयः ततोगत्वा
महारण्यमतपत्सुमहत्तपः २२ ततःसंतापयामासविबुधांस्तपसान्वितः मतंगःसुखसंप्रेप्सुःस्थानंसुचरितादपि २३ तंतथातप
सायुक्तमुवाचहरिवाहनः मतंगतप्यसेकिंत्वंभोगानुत्सृज्यमानुषान् २४ वरंददामितेहंतवृणीष्वत्वंयदिच्छसि यच्चाप्यवाप्यंत्वद्दितेसर्वंतद्ब्रू
हिमाचिरम् २५ मतंगउवाच ब्राह्मण्यंकामयानोहमिदमारब्धवांस्तपः गच्छेयंतदवाप्येहवरएषवृतोमया २६ भीष्मउवाच ए
तच्छ्रुत्वातुवचनंतमुवाचपुरंदरः मतंगदुर्लभमिदंविप्रत्वंप्रार्थ्यतेत्वया २७ ब्राह्मण्यंप्रार्थयानस्त्वमप्राप्यमकृतात्मभिः विनशिष्यसिदुर्बु
द्धेतदुपारममाचिरम् २८ श्रेष्ठतासर्वभूतेषुतपोर्थंनातिवर्तते तदग्र्यंप्रार्थयानस्त्वमचिराद्विनशिष्यसि २९ देवतासुरमर्त्येषुयत्पवित्रं
परंस्मृतम् चंडालयोनौजातेननतत्प्राप्यंकथंचन ३० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेइंद्रमातंगसंवादेसप्तविंशो
ध्यायः २७ भीष्मउवाच एवमुक्तोमतंगस्तुसंशितात्मायतव्रतः अतिष्ठदेकपादेनवर्षाणांशतमच्युतः १

ब्राह्मण्यंसुखेनप्रेप्सुः

विबुधांस्तापयामासेतिसंबंधः २३ हरिवाहनइंद्रः २४ २५ २६ २७ २८ श्रेष्ठतारूपमर्थंब्राह्मण्यंतपःनातिवर्ततेतेनवशीकर्तुमर्हतीति २९
३० इतिश्रीमन्महाभारतेआनुशासनिकेपर्वणिटीकायांसप्तविंशोध्यायः २७ ॥ ॥ एवमुक्तइति १ ॥ ॥ ॥ ॥

२ ३ ४ ५ ६ ७ ८ ९ १० कांडपृष्ठतांशस्त्रजीवित्वं शस्त्राजीवीकांडपृष्ठ इत्यमरः वेश्यापतिः कांडपृष्ठः सद्भिरेवनिगद्यतइतियमः
११ जप्तांगायत्रीमात्रसेविनांकुलेजन्मेतिशेषः १२ श्रोत्रियःअधीतवेदः १३ तत्तदाश्रोत्रियत्वप्राप्तेपि १४ तेशोकादयः एनंश्रोत्रियं पातयंतेअत्यंतंनीच

तमुवाचततःशक्रःपुनरेवमहायशाः ब्राह्मण्यंदुर्लभंतातप्रार्थयानोनलप्स्यसे २ मतंगपरमंस्थानंप्रार्थयन्विनशिष्यसि माकृथाःसाहसं
पुत्रनैषधर्मपथस्तव ३ नहिशक्यंत्वयाप्राप्तुंब्राह्मण्यमिहदुर्मते अप्राप्यंप्रार्थयानोहिनचिराद्विनशिष्यसि ४ मतंगपरमंस्थानंवा-
र्यमाणोसकृन्मया चिकीर्षस्येवतपसासर्वथानभविष्यसि ५ तिर्यग्योनिगतःसर्वोमानुष्यंयदिगच्छति सजायतेपुल्कसोवाचंडा
लीवाप्यसंशयः ६ पुल्कसःपापयोनिर्वायःकश्चिदिहलक्ष्यते सतस्यामेवसुचिरंमतंगपरिवर्त्तते ७ ततोदशशतेकालेलभतेशूद्रता
मपि शूद्रयोनावपिततोबहुशःपरिवर्त्तते ८ ततस्त्रिंशद्गुणेकालेलभतेवैश्यतामपि वैश्यतायांचिरंकालंतत्रैवपरिवर्त्तते ९ ततः
षष्टिगुणेकालेराजन्योनामजायते ततःषष्टिगुणेकालेलभतेब्रह्मबंधुताम् १० ब्रह्मबंधुश्चिरंकालंततस्तुपरिवर्त्तते ततस्तुद्विशतेका
लेलभतेकांडपृष्ठताम् ११ कांडपृष्ठश्चिरंकालंतत्रैवपरिवर्त्तते ततस्तुत्रिंशतेकालेलभतेजपतामपि १२ तंचप्राप्यचिरंकालंतत्रैवपरि
वर्त्तते ततश्चतुःशतेकालेश्रोत्रियोनामजायते श्रोत्रियत्वेचिरंकालंतत्रैवपरिवर्त्तते १३ तदेवंशोकहर्षौतुकामद्वेषौचपुत्रक अतिमा-
नातिवादौचप्रविशेतेद्विजाधमम् १४ तांश्चेज्जयतिशत्रून्सतदाप्राप्नोतिसद्गतिम् अथतेवैजयंत्येनंतालाग्रादिवपात्यते १५ मतंगसंप्र
धार्यैवंयदहंत्वामचूचुदम् वृणीष्वकाममन्यंत्वंब्राह्मण्यंहिसुदुर्लभम् १६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेइंद्रमतंग-
संवादेअष्टाविंशोऽध्यायः २८ भीष्मउवाच एवमुक्तोमतंगस्तुसंशितात्मायतव्रतः सहस्रमेकपादेनततोध्यानेव्यतिष्ठत १ तं
सहस्रावरेकालेशक्रोद्रष्टुमुपागमत् तदेवचपुनर्वाक्यमुवाचबलवृत्रहा २ मतंगउवाच इदंवर्षसहस्रंवैब्रह्मचारीसमाहितः अ
तिष्ठमेकपादेनब्राह्मण्यंनाप्नुयांकथम् ३ शक्रउवाच चंडालयोनौजातेननावाप्यंवैकथंचन ४ अन्यंकामंवृणीष्वत्वंमावृथातेस्त्व
यंश्रमः एवमुक्तोमतंगस्तुभृशंशोकपरायणः ५ अध्यतिष्ठद्गयांगत्वासोंगुष्ठेनशतंसमाः सुदुर्वहंवहन्योगंकृशोधमनिसंततः ६ त्वग
स्थिभूतोधर्मात्मासपपातेतिनःश्रुतम् तंपतंतमभिद्रुत्यपरिजग्राहवासवः ७ वराणामीश्वरोदातासर्वभूतहितेरतः शक्रउवाच मतं
गब्राह्मणत्वंतेविरुद्धमिहदृश्यते ब्राह्मण्यंदुर्लभतरंसंवृतंपरिपंथिभिः ८

योनिंप्राप्नोतीत्यर्थः १५ १६ इतिआनुशासनिकेपर्वणिटीकायांअष्टाविंशोऽध्या
यः २८ एवमुक्तःसहस्रंवत्सरान् १ २ ३ ४ ५ ६ अभिद्रुत्यगत्वा ७ दुर्लभतरमपिपरिपंथिभिःकामाद्यैश्चोरैःसंवृतमतोदुःसंरक्ष्यमपीत्यर्थः ८

पूजयन्ब्राह्मणमितिशेषः ९ ब्राह्मणेभ्यः तद्द्वारादेवादयः तृप्यंतीत्यर्थः १० यद्यद्वांच्छतितत्तत्कुरुते ११ १२ १३ लब्ध्वापिनबुभूषसेनप्राप्नोषिमा दृशोपितपस्विनिकारुण्याभावात्तन्नाशयसीतिभावः १४ दुर्लभंब्राह्मण्यंप्राप्यापिनानुतिष्ठंतिनंदुचितान्शमोदमस्तपःशौचंक्षांतिरार्जवमेवच ज्ञानंविज्ञान मास्तिक्यंब्रह्मकर्मस्वभावजमितिभगवदुक्तान्नसेवंतेऽतःप्राप्तमपिदुःसंरक्ष्यमितिभावः १५ नजानीतेरक्षितुमितिशेषः १६ १७ १८ दैवंप्राक्कर्म

पूजयन्सुखमाप्नोतिदुःखमाप्नोत्यपूजयन् ९ ब्राह्मणःसर्वभूतानांयोगक्षेमसमर्पिता ब्राह्मणेभ्योनुतृप्यंतेपितरोदेवतास्तथा १० ब्राह्म णःसर्वभूतानांमतंगपरउच्यते ब्राह्मणःकुरुतेयद्धियथायद्यच्चवांच्छति ११ बह्वीस्तुसंविशन्योनीर्जायमानःपुनःपुनः पर्यायेतातक स्मिंश्चिद्ब्राह्मण्यमिहविंदति १२ तदुत्सृज्येहदुष्प्रापंब्राह्मण्यमकृतात्मभिः अन्यंवरंवृणीष्वत्वंदुर्लभोयंहितेवरः १३ मतंगउवाच किंमांतुदसिदुःखार्त्तंमृतंमारयसेचमाम् त्वांतुशोचामियोलब्ध्वाब्राह्मण्यंनबुभूषसे १४ ब्राह्मण्यंयदिदुष्प्रापंत्रिभिर्वर्णैःशतक्रतो सु दुर्लभंसदावाप्यनानुतिष्ठंतिमानवाः १५ यःपापेभ्यःपापतमस्तेषामधमएवसः ब्राह्मण्यंयोनजानीतेधनंलब्ध्वेवदुर्लभम् १६ दुष्प्रा- पंखलुविप्रत्वंप्राप्तंदुरनुपालनम् दुरवापमवाप्यैतन्नानुतिष्ठंतिमानवाः १७ एकारामोह्यहंशक्रनिर्द्वंद्वोनिष्परिग्रहः अहिंसादमदा- स्थायकथंनार्हामिविप्रताम् १८ दैवंतुकथमेतद्वैयदहंमातृदोषतः एतामवस्थांसंप्राप्तोधर्मज्ञःसन्पुरंदर १९ नूनंदैवंनशक्यंहिपौरुषे- णातिवर्त्तितुम् यदर्थंयत्नवानेवनलभेविप्रतांविभो २० एवंगतेतुधर्मज्ञदातुमर्हसिमेवरम् यदितेहमनुग्राह्यःकिंचिद्वासुकृतंमम २१ वैशंपायनउवाच तृणीष्वेतितदाप्राहततस्तंबलवृत्रहा चोदितस्तुमहेंद्रेणमतंगःप्राब्रवीदिदम् २२ यथाकामविहारीस्यांकामरूपी विहंगमः ब्रह्मक्षत्राविरोधेनपूजांचप्राप्नुयामहम् २३ यथाममाक्षयाकीर्त्तिर्भवेच्चापिपुरंदर कर्तुमर्हसितद्देवशिरसात्वांप्रसादये २४ शक्रउवाच छंदोदेवइतिख्यातःस्त्रीणांपूज्योभविष्यसि कीर्त्तिश्चतेतुलावत्सत्रिषुलोकेषुयास्यति २५ एवंतस्मैवरंदत्वावास वोंतरधीयत प्राणांस्त्यक्त्वामतंगोपिसंप्राप्तःस्थानमुत्तमम् २६ एवमेतत्परंस्थानंब्राह्मण्यंनामभारत तच्चदुष्प्रापमिहवैमहेंद्रवचनंयथा २७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेइंद्रमतंगसंवादेएकोनत्रिंशोऽध्यायः २९ युधिष्ठिरउवाच श्रुतंमेमह- दाख्यानमेतत्कुरुकुलोद्वह सुदुष्प्रापंब्रवीषित्वंब्राह्मण्यंवदतांवर १ विश्वामित्रेणचपुराब्राह्मण्यंप्राप्तमित्युत श्रूयतेवदसेतच्चदु- ष्प्रापमितिसत्तम २

यृत्यतः एतांअब्राह्मणत्वरूपाम् १९ २० २१ २२ २३ २४ २५ २६ एतत्परंगतस्याद्देवताभावात्परंश्रेष्ठं नप सादेवभावोपिलब्धुंशक्योनविप्रता इत्येतत्कथयामासमतंगकथयामुनिरिति २७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटी०एकोनत्रिंशोऽध्यायः२९ श्रुतमिति १

३ ४ ५ ६ तस्यशर्यातेरन्ववायेवत्सस्यपुत्रौद्वौराजानावितियोजना ७ ८ ९ १० वीतहव्यदायादैः दैहयस्यैवनामांतरवीतहव्यइतितत्पुत्रैः ११ व
त्स्यानांवत्सवंश्यानांराज्ञा १२ १३ १४ १५ १६ १७ वप्रांतेतटसमीपे यद्वास्थानेसुमानस्त्रीरेणुस्तत्रैचयेनतदिदृइतिमेदिनी १८ १९ २० दशती

वीतहव्यश्चनृपतिः श्रुतोमेविप्रतांगतः तदेवतावद्गांगेयश्रोतुमिच्छाम्यहंविभो ३ सकेनकर्मणाप्राप्तोब्राह्मण्यंराजसत्तमः वरेणतपसावा
पितन्मेव्याख्यातुमर्हसि ४ भीष्मउवाच शृणुराजन्यथाराजावीतहव्योमहायशाः राजर्षिर्दुर्लभंप्राप्तोब्राह्मण्यंलोकसत्कृतम् ५
मनोर्महात्मनस्तातप्रजाधर्मेणशासतः बभूवपुत्रोधर्मात्माशर्यातिरितिविश्रुतः ६ तस्यान्ववायेद्वौराजन्राजानौसंबभूवतुः हेहयस्ता
लजंघश्चवत्सस्यजयतांवरः ७ हेहयस्यतुराजेंद्रदशसुस्त्रीषुभारत शतंबभूवपुत्राणांशूराणामनिवर्त्तिनाम् ८ तुल्यरूपप्रभावानां
बलिनांयुद्धशालिनाम् धनुर्वेदेचवेदेचसर्वत्रैवकृतश्रमाः ९ काशिष्वपिनृपोराजन्दिवोदासपितामहः हर्यश्वइतिविख्यातोबभूवजयं
तांवरः १० सवीतहव्यदायादैरागत्यपुरुषर्षभ गंगायमुनयोर्मध्येसंग्रामेविनिपातितः ११ तंतुहत्वानरपतिंहेहयास्तेमहारथाः प्रतिज
ग्मुःपुरींरम्यांवत्स्यानामकुतोभयाः १२ हर्यश्वस्यचदायादःकाशिराजोभ्यषिच्यत सुदेवोदेवसंकाशःसाक्षाद्धर्मइवापरः १३ सपाल
यामासमहींधर्मात्माकाशिनंदनः तैर्वीतहव्यैरागत्ययुधिसर्वैर्विनिर्जितः १४ तमथाजौविनिर्जित्यप्रतिजग्मुर्यथागतम् सौदेवस्त्वथका
शीशोदिवोदासोभ्यषिच्यत १५ दिवोदासस्तुविज्ञायवीर्यंतेषांयतात्मनाम् वाराणसींमहातेजानिर्ममेशक्रशासनात् १६ विप्रक्षत्रिय
संबाधांवैश्यशूद्रसमाकुलाम् नैकद्रव्योच्चयवतींसमृद्धविपणापणाम् १७ गंगायाउत्तरेकूलेवप्रांतेराजसत्तम गोमत्यादक्षिणेकूले
शक्रस्येवामरावतीम् १८ तत्रतंराजशार्दूलंनिवसंतंमहीपतिम् आगत्यहैहयाभूयःपर्यधावंतभारत १९ सनिष्क्रम्यददौयुद्धंतेभ्योराजा
महाबलः देवासुरसमंघोरंदिवोदासोमहाद्युतिः २० सतुयुद्धेमहाराजदिनानांदशतीर्दश हतवाहनभूयिष्ठस्ततोदैन्यमुपागमत् २१ ह
तयोधस्ततोराजन्क्षीणकोशश्चभूमिपः दिवोदासःपुरींत्यक्त्वापलायनपरोभवत् २२ गत्वाश्रमपदंरम्यंभरद्वाजस्यधीमतः जगामशर
णंराजाकृतांजलिररिंदम २३ तमुवाचभरद्वाजोज्येष्ठःपुत्रोबृहस्पतेः पुरोधाःशीलसंपन्नोदिवोदासंमहीपतिम् २४ किमागमनकृत्यं
तेसर्वंप्रब्रूहिमेनृप यत्तेप्रियंतत्करिष्येनमेत्रास्तिविचारणा २५ राजोवाच भगवन्वैतहव्यैर्मेयुद्धेवंशःप्रणाशितः अहमेकःप
रिद्यूनोभवंतंशरणंगतः २६ शिष्यस्नेहेनभगवंस्त्वंमांरक्षितुमर्हसि एषशेषःकृतोवंशोममतैःपापकर्मभिः २७

दश सहस्रमित्यर्थः
षष्टिसप्ततिनवतिवद्दशतिशब्दोपिदशगुणितान्दशब्रूते २१ २२ २३ २४ २५ परिद्यूनःसर्वतोनिरस्तः २६ २७ ६७ ६७ ६७

२८ २९ ३० सद्योवद्वृधेचत्रयोदशवार्षिकोऽभूत सद्यश्चवेदान्जगौ ३१ योगेनयोगबलेनलोक्यंलोकेषुसर्वेषुविद्यमानंतस्मिन्देशेप्रतर्दनदेहेसमावि
शत्समावेशितवान् ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ नस्थतंप्रतिमांआ-

तमुवाचमहाभागोभरद्वाजःप्रतापवान् नभेतव्यंनभेतव्यंसोदेवव्येतुतेभयम् २८ अहमिष्टिंकरिष्यामिपुत्रार्थंतेविशांपते वीतहव्यसहस्रा
णियेनत्वंप्रहरिष्यसि २९ ततइष्टिंचकारर्षिस्तस्यवैपुत्रकामिकीम् अथास्यतनयोजज्ञेप्रतर्दनइतिस्मृतः ३० सजातमात्रोववृधेसमाःसद्य
स्त्रयोदश वेदंचापिजगौकृत्स्नंधनुर्वेदंचभारत ३१ योगेनचसमाविष्टोभरद्वाजेनधीमता तेजोलोक्यंससंगृह्यतस्मिन्देशेसमाविशत
३२ ततःसकवचीधन्वीस्तूयमानःसुरर्षिभिः बंदिभिर्वंद्यमानश्चबभौसूर्यइवोदितः ३३ सरथीबद्धनिस्त्रिंशोबभौदीप्तइवानलः प्रययौसध
नुर्धुन्वन्वज्रीचर्मीशरासनी ३४ तंदृष्ट्वापरमंहर्षंसुदेवतनयोययौ मेनेचमनसादग्धान्वीतहव्यान्सपार्थिवः ३५ ततोसौयौवराज्येचस्था
पयित्वाप्रतर्दनम् कृतकृत्यंतदात्मानंसराजाअभ्यनंदत ३६ ततस्तुवीतहव्यानांवधायसमहीपतिः पुत्रंप्रस्थापयामासप्रतर्दनमरिंदम
म् ३७ सरथःसतुसतीर्यगंगामाशुपराक्रमी प्रययौवीतहव्यानांपुरींपरपुरंजयः ३८ वीतहव्यास्तुसंश्रुत्यरथघोषंसमुद्धतम् निर्ययु
र्नगराकारैरथैःपररथारुजैः ३९ निष्क्रम्यतेनरव्याघ्रादंशिताश्चित्रयोधिनः प्रतर्दनंसमाजघ्नुःशरवर्षैरुदायुधाः ४० शस्त्रैश्चविविधा
कारैरथौघैश्चयुधिष्ठिर अभ्यवर्षंतराजानंहिमवंतमिवांबुदाः ४१ अस्त्रैरस्त्राणिसंवार्यतेषांराजाप्रतर्दनः जघानतान्महातेजावज्रान-
लसमैःशरैः ४२ कृत्तोत्तमांगास्तेराजन्भल्लैःशतसहस्रशः अपतन्रुधिरार्द्रांगानिकृत्ताइवकिंशुकाः ४३ हतेषुतेषुसर्वेषुवीतहव्यःसु
तेष्वथ प्राद्रवन्नगरंहित्वाभृगोराश्रममप्युत ४४ ययौभृगुंचशरणंवीतहव्योनराधिपः अभयंचददौतस्मैराज्ञेराजन्भृगुस्तदा ४५
अथानुपदमेवाशुतत्रागच्छत्प्रतर्दनः सप्राप्यचाश्रमपदंदिवोदासात्मजोब्रवीत् ४६ भोभोकेत्राश्रमेसंतिभृगोःशिष्यामहात्मनः द्र
ष्टुमिच्छेमुनिमहंतस्याचक्षतमामिति ४७ सतंविदित्वातुभृगुर्निश्चक्रामाश्रमात्तदा पूजयामासचततोविधिनानृपसत्तमम ४८ उ
वाचचैनंराजेंद्रकिंकार्यंब्रूहिपार्थिव सचोवाचनृपस्तस्मैयदागमनकारणम् ४९ राजोवाच अयंब्रह्मन्नितोराजावीतहव्योवि
सर्ज्यताम् तस्यपुत्रैर्हिमेकृत्स्नोब्रह्मन्वंशःप्रणाशितः ५० उत्सादितश्चविषयःकाशीनारत्नसंचयः एतस्यवीर्यदृप्तस्यहतंपुत्रशतंम
या ५१ अस्येदानींवधादद्यभविष्याम्यनृणःपितुः तमुवाचकृपाविष्टोभृगुर्धर्मभृतांवरः ५२ नेहास्तिक्षत्रियःकश्चित्सर्वेहीमेद्विजात
यः एतत्तुवचनंश्रुत्वाभृगोस्तथ्यंप्रतर्दनः ५३

गतंआचक्षतंकथयत ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

५४ ५५ ५६ आख्यायिकातात्पर्यमाह भृगोरिति ५७ ५८ श्रुतिः तद्गार्त्समदमेतेनवैगृत्समद इंद्रस्यप्रियंधामोपैयायेत्यादिका ५९ ६० ६१
६२ ६३ ६४ ६५ ६६ ६७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांत्रिंशोऽध्यायः ३० केपूज्याइति ब्राह्मण्यस्यदुष्प्रापत्वंविप्रानु
ग्रहैकलभ्यत्वंचोक्त्वापूज्यत्वहेतून्साधारणानसाधारणान्स्वधर्मानाहानेनाध्यायेन १ २ ३ तेषुमानवेषुबहुमानपरःसन्कान्नमस्यसीतियोज्यम् ४ ५

पादावुपस्पृश्यशनैःप्रहृष्टोवाक्यमब्रवीत् एवमप्यस्मिभगवन्कृतकृत्योनसंशयः ५४ यएषराजावीर्येणस्वजातिंत्याजितोमया अनुजा
नीहिमांब्रह्मन्ध्यायस्वचशिवेनमाम् ५५ त्याजितोहिमयाजातिमेवराजाभृगूद्वह ततस्तेनाभ्यनुज्ञातोययौराजाप्रतर्दनः ५६ यथागतं
महाराजमुक्त्वाविषमिवोरगः भृगोर्वचनमात्रेणसचब्रह्मर्षितांगतः ५७ वीतहव्योमहाराजब्रह्मवादित्वमेवच तस्यगृत्समदःपुत्रोरूपे
णेंद्रइवापरः ५८ शक्रस्त्वमितियोदैत्यैर्निगृहीतःकिलाभवत् ऋग्वेदेवर्ततेचाग्र्याश्रुतिर्यस्यमहात्मनः ५९ यत्रगृत्समदोब्रह्मन्ब्राह्म
णैःसमहीयते सब्रह्मचारीविप्रर्षिःश्रीमान्गृत्समदोऽभवत् ६० पुत्रोगृत्समदस्यापिसुचेताअभवद्द्विजः वर्चाःसुतेजसःपुत्रोविहव्यस्तस्य
चात्मजः ६१ विहव्यस्यतुपुत्रस्तुवितत्यस्तस्यचात्मजः वितत्यस्यसुतःसत्यःसंतःसत्यस्यचात्मजः ६२ श्रवास्तस्यसुतश्चर्षिःश्रवस-
श्चाभवत्तमः तमसश्चप्रकाशोभूत्तनयोद्विजसत्तमः प्रकाशस्यचवागिंद्रोबभूवजयतांवरः ६३ तस्यात्मजश्चप्रमितिर्वेदवेदांगपारगः
घृताच्यांतस्यपुत्रस्तुरुरुर्नामोदपद्यत ६४ प्रमद्वरायांतुरुरोःपुत्रःसमुदपद्यत शुनकोनामविप्रर्षिर्यस्यपुत्रोथशौनकः ६५ एवंविप्रत्व
मगमद्वीतहव्योनराधिप भृगोःप्रसादाद्राजेंद्रक्षत्रियःक्षत्रियर्षभ ६६ तथैवकथितोवंशोमयागार्त्समदस्तव विस्तरेणमहाराजकिं
मन्यदनुपृच्छसि ६७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेवीतहव्योपाख्यानंनामत्रिंशोऽध्यायः ३० युधिष्ठिरउवाच
केपूज्याःकेनमस्कार्याःलोकेस्मिन्मानवाभरतर्षभ विस्तरेणतदाचक्ष्वनहितृप्यामिकथ्यतः १ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरा
तनम् नारदस्यचसंवादंवासुदेवस्यचोभयोः २ नारदंप्रांजलिंदृष्ट्वापूजयानंद्विजर्षभान् केशवःपरिपप्रच्छभगवन्कान्नमस्यसि ३
बहुमानपरस्तेषुभगवन्कान्नमस्यसि शक्यंचेच्छ्रोतुमस्माभिर्ब्रूह्येतद्धर्मवित्तम ४ नारदउवाच शृणुगोविंदयानेतान्पूजयाम्य
रिमर्दन त्वत्तोन्यःकःपुमाल्लोकेश्रोतुमेतदिहार्हति ५ वरुणंवायुमादित्यंपर्जन्यंजातवेदसम् स्थाणुंस्कंदंतथालक्ष्मींविष्णुंब्राह्मणमे
वच ६ वाचस्पतिंचंद्रमसमपःपृथ्वींसरस्वतीम् सततंयेनमस्यंतितान्नमस्याम्यहंविभो ७ तपोधनान्वेदविदोनित्यंवेदपरायणान्
महार्हान्वृष्णिशार्दूलसदासंपूजयाम्यहम् ८

६ ७ महार्हान् महान्अर्हःपूजायेषाम् अतिपूज्यानित्यर्थः ८ ९ ९ ९

अविकत्थनाः श्लाघाहीनाः ९ सत्यंधर्मंचयजंतिपूजयंतिद्विक्षितिंगाश्चयजंतिब्राह्मणेभ्यःप्रयच्छंति यजदेवपूजासंगतिकरणदानेषुगर्तेर्थार्यथासंभवंग्राह्याः
१० ११ १२ १३ आपृष्ठतापात्यावन्मध्यान्हम् १४ स्वाध्यायेब्रह्मयज्ञेमंत्रजपेवा १५ १६ १७ निर्ह्रीकाःदिगंबराः कौपीनमात्रमपिपरिग्रहं
नकुर्वतीत्यर्थः १८ १९ कपोतवृत्तयः कणश आदायये संग्रहंनकुर्वंतीत्यर्थः २० त्रिवर्गोधर्मार्थकामाः कृत्येषुकर्तुयोग्येषुकर्मसुवर्त्ततेउत्तममध्यमाधमभावेनव

अभुक्त्वादेवकार्याणिकुर्वंतेयेविकत्थनाः संतुष्टाश्चक्षमायुक्तास्तान्नमस्याम्यहंविभो ९ सम्यग्यजंतियेचेष्टीःक्षांतादांताजितेंद्रियाः स
त्यंधर्मंक्षितिंगाश्चतान्नमस्यामियादव १० येवैतपसिवर्त्ततेवनेमूलफलाशनाः असंचयाःक्रियावंतस्तान्नमस्यामियादव ११ येभृत्य-
भरणेशक्ताःसततंचातिथिव्रताः भुंजतेदेवशेषाणितान्नमस्यामियादव १२ येवेदंप्राप्यदुर्धर्षावाग्मिनोब्रह्मचारिणः याजनाध्यापने
युक्तानित्यंतान्पूजयाम्यहम् १३ प्रसन्नहृदयाश्चैवसर्वसत्वेषुनित्यशः आपृष्ठतापात्स्वाध्यायेयुक्तास्तान्पूजयाम्यहम् १४ गुरुप्रसादेस्वा
ध्यायेयत्नतोयेस्थिरव्रताः शुश्रूषवोनसूयंतस्तान्नमस्यामियादव १५ सुव्रतामुनयोयेचब्राह्मणाःसत्यसंगराः वोढारोहव्यकव्यानांता
न्नमस्यामियादव १६ भैक्ष्यचर्यासुनिरताःकृशागुरुकुलाश्रयाः निःसुखानिर्धनायेतुतान्नमस्यामियादव १७ निर्ममानिःप्रतिद्वंद्वा
निर्ह्रीकानिष्प्रयोजनाः येवेदंप्राप्यदुर्धर्षावाग्मिनोब्रह्मवादिनः १८ अहिंसानिरतायेचयेचसत्यव्रतानराः दांताःशमपराश्चैवतान्नम
स्यामिकेशव १९ देवतातिथिपूजायांयुक्तायेगृहमेधिनः कपोतवृत्तयोनित्यंतान्नमस्यामियादव २० येषांत्रिवर्गःकृत्येषुवर्त्तते नोपहीयते शिष्टाचारप्रवृत्ताश्चतान्नमस्याम्यहंसदा २१ ब्राह्मणाःश्रुतसंपन्नायेत्रिवर्गमनुष्ठिताः अलोलुपाःपुण्यशीलास्तान्नमस्यामिके
शव २२ अब्भक्षावायुभक्षाश्चसुधाभक्षाश्चयेसदा व्रतैश्चविविधैर्युक्तास्तान्नमस्यामिमाधव २३ अयोनीनग्नियोनींश्चब्रह्मयो-
नींस्तथैवच सर्वभूतात्मयोनींश्चतान्नमस्याम्यहंसदा २४ नित्यमेतान्नमस्यामिकृष्णलोककरानृषीन् लोकज्येष्ठान्कुलज्येष्ठांस्तमो-
घ्नान्लोकभास्करान् २५ तस्मात्त्वमपिवार्ष्णेयद्विजान्पूजयनित्यदा पूजिताःपूजनार्हाहिसुखदास्युतितेनघ २६ अस्मिँल्लोकेस
दांत्वेतेपरत्रचसुखप्रदाः चरंतेमान्यमानावैप्रदास्यंतिसुखंतव २७ येसर्वातिथयोनित्यंगोषुचब्राह्मणेषुच नित्यंसत्येचाभिरतादु
र्गाण्यतितरंतिते २८ नित्यंशमपरायेचतथायेचानसूयकाः नित्यस्वाध्यायिनोयेचदुर्गाण्यतितरंतिते २९

तेनेनन्युहीयते अधममध्य
मोत्तमंभावेनेत्यर्थः २१ अलोलुपाइत्यनेनधर्ममपेक्ष्यअर्थानादरउक्तः पुण्यशीलाइत्यनेनधर्मव्यतिरिक्तकामपरिहारउक्तः कुतोभार्यामुपेयादित्येतावानेव
कामोधर्मएवनान्यः २३ सुधावैश्वदेवशेषः २३ अयोनीन्अकृतदारान् अग्नियोनीन् दाराग्निहोत्रयुतान् ब्रह्मणोवेदस्ययोनीन्आश्रयभूतान् २४ २५ २६
२७ २८ २९

सर्वानिनिस्वाध्यायेसर्वेयज्ञा अंतर्भवंतीत्यर्थः ३० भिक्षचर्येतिद्वौश्लोकौपुनःपाठदुमेक्षितौगौडैः ३१ ३२ ३३ ३४ ३५ ३६ इतिश्रीम
हाभारतेआनुशासनिकेपर्वणिटीकायांएकत्रिंशोऽध्यायः ३१ पितामहेत्यादेरध्यायस्यपक्षिमात्रस्यापिस्वशरीरदानेनरक्षणंकार्यंकिमुतपूर्वोक्तानांपूज्यानामर्था
दिनेतितात्पर्यम् १ २ ३ प्रपात्यमानःआकाशादितिशेषः वृषदर्भऔशीनरम्शिबिम् ४ ५ ६ नवनीलंचयदुत्पलंतस्यआपीडइवालंकारभूतम्त्वा

सर्वान्देवान्नमस्यंतियेचैकंवेदमाश्रिताः श्रद्दधानाश्चदांताश्चदुर्गाण्यतितरंतिते ३० तथैवविप्रप्रवरान्नमस्कृत्ययतव्रताः भवंतियेदान
रतादुर्गाण्यतितरंतिते ३१ तपस्विनश्चयेनित्यंकौमारब्रह्मचारिणः तपसाभावितात्मानोदुर्गाण्यतितरंतिते ३२ देवतातिथिभृत्या-
नांपितॄणांचार्चनेरताः शिष्टान्नभोजिनोयेचदुर्गाण्यतितरंतिते ३३ अग्निमाधायविधिवत्प्रणताधारयंतिये प्राप्ताःसोमाहुतिंचैवदुर्गा
ण्यतितरंतिते ३४ मातापित्रोर्गुरुषुचसम्यग्वर्त्ततियेसदा यथात्वंनृपशार्दूलेत्युक्त्वेवविरराससः ३५ तस्मात्त्वमपिकौंतेयपितृदेव
द्विजातिथीन् सम्यक्पूजयसेनित्यंगतिमिष्टामवाप्स्यसि ३६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेकृष्णनारदसंवादेएक-
त्रिंशत्तमोऽध्यायः ३१ युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशारद त्वत्तोहंश्रोतुमिच्छामिधर्मंभरतसत्तम १ शरणा
गतंयेरक्षंतिभूतग्रामंचतुर्विधम् किंतस्यभरतश्रेष्ठफलंभवतितत्त्वतः २ भीष्मउवाच इदंशृणुमहाप्राज्ञधर्मपुत्रमहायशः इ
तिहासंपुरावृत्तंशरणार्थेमहाफलम् ३ प्रपात्यमानःश्येनेनकपोतःप्रियदर्शनः वृषदर्भंमहाभागंनरेंद्रंशरणंगतः ४ सतंदृष्ट्वाविशुद्धा
त्माव्रासादंकमुपागतम् आश्वसस्वाश्वसिहीत्याहनतेस्तिभयमंडज ५ भयंतेसुमहत्कस्मात्कुत्रकिंवाकृतंत्वया येनत्वमिहसंप्राप्तोवि
संज्ञोभ्रांतचेतनः ६ नवनीलोत्पलापीडचारुवर्णसुदर्शन दाडिमाशोकपुष्पाक्षमात्रसस्त्वाभयंतव ७ मत्सकाशमनुप्राप्तंनत्वांकश्चि-
त्समुत्सहेत् मनसाग्रहणंकर्त्तुंरक्षाध्यक्षपुरस्कृतम् ८ काशिराज्यंतदद्यैवत्वदर्थंजीवितंतथा त्यजेयंभवविस्रब्धःकपोतनभयंतव
९ श्येनउवाच ममैतद्विहितंभक्ष्यंनराजंस्त्रातुमर्हसि अतिक्रांतंचप्राप्तंचप्रयत्नाच्चोपपादितम् १० मांसंचरुधिरंचास्यमज्जा
मेदश्चमेहितम् परितोषकरोह्येषममास्याग्रतोभव ११ तृष्णामेबाधतेत्युग्राक्षुधानिर्दहतीवमाम् मुंचैनंनहिशक्ष्यामिराजन्मंद-
यितुंक्षुधाम् १२ मयाह्यनुसृतोह्येषमत्पक्षनखविक्षतः किंचिदुच्छ्वासनिश्वासंनराजन्गोप्तुमर्हसि १३ यदिस्वविषयेराजन्प्रभु
स्त्वंरक्षणेनृणाम् खेचरस्यतृषार्त्तस्यनत्वंप्रभुरथोत्तम १४ यदिवैरिषुभृत्येषुस्वजनव्यवहारयोः विषयेष्विंद्रियाणांचआकाशेमापराक्रम १५

रुर्वर्णोयस्य ७ ८ ९ अतिक्रांतं गतप्रायजीवितं १० अस्यमदन्नस्याग्रतोंतरायभूतोमाभव ११ तृष्णाएतद्रुधिरपिपासा १२ १३ १४ यदिवैर्यादिषुपराक्रमसेतद्युक्तं न
त्वाकाशेआकाशचारिषु १५ ६२

पक्षहरेषु आशाभंगिषु शत्रुषु मां अशत्रुमपि जीवनहरणेन बाधमानस्य तव धर्मार्थिनोप्यधर्मो भविष्यतीति भावः १६ एवं श्येनं तद्वाक्यं च संभाव्य स्तुत्वा तव-
र्थो कपोतार्थो १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ अशनैः शीघ्रं २८ मांसक्षयं मांसालयं शरीरम् २९ ३०

प्रभुत्वं हि पराक्रम्य सम्यक्पक्षहरेषु ते यदि त्वमिह धर्मार्थी मामपि द्रष्टुमर्हसि १६ भीष्म उवाच श्रुत्वा श्येनस्य तद्वाक्यं राजर्षिर्विस्म-
यं गतः संभाव्य चैनं तद्वाक्यं तदर्थं प्रत्यभाषत १७ राजोवाच गोवृषो वा वराहो वा मृगो वा महिषोपि वा त्वदर्थमद्य क्रियतां क्षुधा प्रश-
मनाय ते १८ शरणागतं न त्यजेयमिति मे व्रतमाहितम् न मुंचति ममांगानि द्विजोयं पश्य वै द्विज १९ श्येन उवाच न वराहं न चोक्षा-
णं न चान्यान्विविधान्द्विजान् भक्षयामि महाराज किमन्नाद्येन तेन मे २० यस्तु मे विहितो भक्ष्यः स्वयं देवैः सनातनः श्येनाः कपोतान्खादं-
तिस्थितिरेषा सनातनी २१ उशीनर कपोते तु यदि स्नेहस्तवानघ ततस्त्वं मे प्रयच्छाद्य स्वमांसं तुलया धृतम् २२ राजोवाच महाननु-
ग्रहो मेद्य यस्त्वमेवमिहात्थ माम् बाढमेव करिष्यामीत्युक्त्वासौ राजसत्तमः २३ उत्कृत्योत्कृत्य मांसानि तुलया समतोलयत् अंतःपुरे तत-
स्तस्य स्त्रियो रत्नविभूषिताः २४ हाहाभूता विनिष्क्रांताः श्रुत्वा परमदुःखिताः तासां रुदितशब्देन मंत्रिभृत्यजनस्य च २५ बभूव सुमहा-
न्नादो मेघगंभीरनिःस्वनः निरुद्धं गगनं सर्वं व्यभ्रं मेघैः समंततः २६ मही प्रचलिता चासीत्तस्य सत्येन कर्मणा स राजा पार्श्वतश्चैव बा-
हुभ्यामूरुतश्च यत् २७ तानि मांसानि संछिद्य तुलां पूरयते ऽशनैः तथापि न समस्तेन कपोतेन बभूव ह २८ अस्थिभूतो यदा राजा नि-
र्मांसो रुधिरस्रवः तुलां ततः समारूढः स्वमांसक्षयमुत्सृजन् २९ ततः सेंद्रास्त्रयो लोकास्तं नरेंद्रमुपस्थिताः भेर्यश्चाकाशगैस्तत्र वादि-
ता देवदुंदुभिः ३० अमृतेनावसिक्तश्च वृषदर्भो नरेश्वरः दिव्यैश्च सुसुखैर्माल्यैरभिवृष्टः पुनःपुनः ३१ देवगंधर्वसंघातैरप्सरोभिश्च
सर्वतः नृत्तश्चैवोपगीतश्च पितामह इव प्रभुः ३२ हेमप्रासादसंबाधं मणिकांचनतोरणम् सवैदूर्यमणिस्तंभं विमानं समधिष्ठित ३३
स राजर्षिर्गतः स्वर्गं कर्मणा तेन शाश्वतम् शरणागतेषु चैवं त्वं कुरु सर्वं युधिष्ठिर ३४ भक्तानामनुरक्तानामाश्रितानां च रक्षिता दयावा-
न्सर्वभूतेषु परत्र सुखमेधते ३५ साधुवृत्तो हि यो राजा सद्वृत्तमनुतिष्ठति किं न प्राप्तं भवेत्तेन स्वव्याजेनेह कर्मणा ३६ स राजर्षिर्विशुद्धा-
त्मा धीरः सत्यपराक्रमः काशीनामीश्वरः ख्यातस्त्रिषु लोकेषु कर्मणा ३७ योप्यन्यः कारयेदेवं शरणागतरक्षणम् सोपि गच्छेत्तथैव
गतिं भरतसत्तम ३८ इदं वृत्तं हि राजर्षेर्वृषदर्भस्य कीर्तयन् पूतात्मा वै भवेल्लोके शृणुयाद्यश्च नित्यशः ३९ इति श्रीमहाभारते आनु-

३१ नृत्तः नृत्येन तोषितः गीतमुपगीतः ३२ ३३ ३४ ३५ साधुवृत्तः सुशीलः सद्वृत्तं शिष्टाचारं स्वव्याजेन सतुरां निष्कपटेन ३६ ३७ अस्यां कथायां विधेयमाह
योपीति ३८ ३९ ७१

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांद्वात्रिंशोऽध्यायः ३२ किंराज्ञइत्यध्यायस्यतात्पर्यंस्पष्टं १ अनुष्ठानंआराधनं २ ३ ४ ५ एषांब्राह्मणानां
मध्ये ६ वासवेपर्जन्ये ७ अभिचारैःश्येनादिभिः उपायैःकौलिकशास्त्रप्रसिद्धैःतेजसःसंकल्पमात्रेण ८ अंतंनाशकरंदिशश्चैषांनअपावृताःसर्वत्राकुंठितागतिरितेषामित्यर्थः
तिरितेषामित्यर्थः अग्निशिखाइवदहंतः ९ एभ्यएभ्यःसाहसिकाअकार्यकारिणोपिबिभ्यतिकिमुतविवेकिनः छन्नाःकेचिज्जडभरतादयः अपरेवसिष्ठादयः

शासनिकेपर्वणिदानधर्मेषुश्येनकपोताख्यानेद्वात्रिंशोऽध्यायः ३२ युधिष्ठिरउवाच किंराज्ञःसर्वकृत्यानांगरीयःस्यात्पितामह कुर्वन्किं
कर्मनृपतिरुभौलोकौसमश्नुते १ भीष्मउवाच एतद्राज्ञःकृत्यतमंअभिषिक्तस्यभारत ब्राह्मणानामनुष्ठानमत्यंतंसुखमिच्छता २ कर्तव्यं
पार्थिवेंद्रेणतथैवभरतर्षभ श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत् ३ पौरजानपदांश्चापिब्राह्मणांश्चबहुश्रुतान् सांत्वेनभोग
दानेननमस्कारैस्तथार्चयेत् ४ एतत्कृत्यतमंराज्ञोनित्यमेवोपलक्षयेत् यथात्मानंयथापुत्रांस्तथैतान्प्रतिपालयेत् ५ येचाप्येषांपूज्यत
मास्तान्दृढंप्रतिपूजयेत् तेषुशांतेषुतद्राष्ट्रंसर्वमेवविराजते ६ तेपूज्यास्तेनमस्कार्यामान्यास्तेपितरोयथा तेष्वेवयात्रालोकानांभूतानां
मिववासवे ७ अभिचारैरुपायैश्चदहेयुरपितेजसा निःशेषंकुपिताःकुर्युरुग्राःसत्यपराक्रमाः ८ नांतमेषांप्रपश्यामिनदिशश्चाप्यपा
वृताः कुपिताःसमुदीक्षंतेदावेष्वग्निशिखाइव ९ बिभ्यत्येषांसाहसिकागुणास्तेषामतीवहि कूपाइवतृणच्छन्नाविशुद्धाद्यौरिवापरे
१० प्रसह्यकारिणःकेचित्कार्पासमृदवोपरे संतिचैषामतिशठास्तथैवान्येतपस्विनः ११ कृषिगोरक्ष्यमप्येकेभैक्ष्यमन्येप्यनुष्ठिताः चौ
राश्चान्येनृताश्चान्येतथान्येनटनर्त्तकाः १२ सर्वकर्मसहाश्चान्येपार्थिवेष्वितरेषुच विविधाकारयुक्ताश्चब्राह्मणाभरतर्षभ १३ नाना
कर्मसुरक्तानांबहुकर्मोपजीविनाम् धर्मज्ञानंसतांतेषांनित्यमेवानुकीर्त्तयेत् १४ पितृणांदेवतानांचमनुष्योरगरक्षसाम् पुरस्थेतेम
हाभागाब्राह्मणावैजनाधिप १५ नैतेदेवैर्नपितृभिर्नगंधर्वैर्नराक्षसैः नासुरैर्नपिशाचैश्चशक्याजेतुंद्विजातयः १६ अदैवंदैवतंकु
र्युर्दैवतंचाप्यदैवतम् यमिच्छेयुःसराजास्याद्योनेष्टःसपराभवेत् १७ परिवादंचयेकुर्युर्ब्राह्मणानामचेतसः सत्यंब्रवीमितेराजन्
विनश्येयुर्नसंशयः १८ निंदाप्रशंसाकुशलाकीर्त्यकीर्त्तिपरायणाः परिकुप्यंतितेराजन्सततंद्विषतांद्विजाः १९

१० प्रसह्यकारिणःदुर्वासःप्रभृतयःमृदवो
गौतमादयः येपांदचारेपिहिंसाभयात्पादयोरेवाक्षिचक्षुरित्यक्षपादत्वंगताः अतिशठाअगस्त्यादयःवातापिंजरयितुंमांसेलोलुपतांदर्शयंतः ११ कृषिंकुर्वंतःउद्दालकगु-
र्वादयः गोरक्षंगुरोरेवउपमन्युप्रभृतयः भैक्ष्यंदत्तात्रेयादयः चोराःवाल्मीकिविश्वामित्रादयः अनृताःकलहप्रियाःनारदादयः नटनर्त्तकाःभरतादयः १२ सर्वकर्मसहाः
समुद्रशोषणादावपिसमर्थाः १३ नानेतिस्वरूपप्रच्छादनार्थंलोकरक्षार्थंवानिषिद्धेनापिकर्मणावर्त्तमानाःवस्तुतस्तुधर्मज्ञास्तेषांतान्नित्यमेवानुकीर्त्तयेत् १४ पुरःपू
ज्याइतिशेषः १५ १६ १७ एषांब्राह्मणानांसंबंधेकुपितेनापिब्राह्मणानावमंतव्याइतिशेषः १८ परायणाःहेतवः १९ ७ ७

२० अदर्शनात् अननुग्रहात् २१ २२ २३ २४ परिवादइति द्विजातीनांपरीवादोनश्रोतव्यः कथंचन कथमपिपरिवादश्रवणेततःसमुत्थायव्रजेत्
अन्यत्रगमनाशक्तौतत्राधोमुखस्तूष्णींआसीत २५ नसजातइति कश्चनसपुरुषः पृथिव्यांनंजातः अजनिष्यद्वायोब्राह्मणविरोधेन ब्राह्मणसहविरोधेन
ब्राह्मणस्यविरुद्धाचरणेनवासुखंजीवितुंउत्सहेतइत्यन्वयः २६ २७ . इतिश्रीमन्महाभारतेआनुशासनिकेपर्वणिटीकायांत्रयस्त्रिंशोऽध्यायः ३३

ब्राह्मणाग्र्यंप्रशंसंतिपुरुषःसप्रवर्द्धते ब्राह्मणैर्यःपराकृष्टःपराभूयात्क्षणाद्धिसः २० शकायवनकांबोजास्तास्ताःक्षत्रियजातयः वृ-
षलत्वंपरिगताब्राह्मणानामदर्शनात् २१ द्राविडाश्चकलिंगाश्चपुलिंदाश्चाप्युशीनराः कोलिसर्पामहिषकास्तास्ताःक्षत्रियजातयः २२
वृषलत्वपरिगताब्राह्मणानामदर्शनात् श्रेयान्पराजयस्तेभ्योनजयोजयतांवर २३ यस्तुसर्वमिदंहन्याद्ब्राह्मणंचनतत्समम् ब्रह्मवध्यामहा-
न्दोषइत्याहुःपरमर्षयः २४ परिवादोद्विजातीनांनश्रोतव्यःकथंचन आसीताधोमुखस्तूष्णींसमुत्थायव्रजेत्तुवा २५ नसजातोजनिष्यद्वा
पृथिव्यामिहकश्चन योब्राह्मणविरोधेनसुखंजीवितुमुत्सहेत् २६ दुर्ग्राह्योमुष्टिनावायुर्दुःस्पर्शःपाणिनाशशी दुर्धरापृथिवीराजन्दुर्ज-
याब्राह्मणाभुवि २७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेब्राह्मणप्रशंसानामत्रयस्त्रिंशोऽध्यायः ३३ भीष्मउवाच
ब्राह्मणानेवसततंभृशंसंपरिपूजयेत् एतेहिसोमराजानईश्वराःसुखदुःखयोः १ एतेभोगैरलंकारैरन्यैश्चैववकिमिच्छकैः सदापूज्यान-
मस्कारैरक्ष्याश्चपितृवन्नृपैः २ ततोराष्ट्रस्यशांतिर्हिभूतानामिववासवात् जायतांब्रह्मवर्चस्वीराष्ट्रेवैब्राह्मणःशुचिः ३ महारथश्चराज-
न्यएष्टव्यःशत्रुतापनः ब्राह्मणंजातिसंपन्नंधर्मज्ञंसंशितव्रतम् ४ वासयेत्स्वगृहेराजन्नतस्मात्परमस्तिवै ब्राह्मणेभ्योहविर्दत्तंप्रति
गृण्हंतिदेवताः ५ पितरःसर्वभूतानांनैतेभ्योविद्यतेपरम् आदित्यश्चंद्रमावायुरापोभूरंबरंदिशः ६ सर्वेब्राह्मणमाविश्यसदान्नमुप-
भुंजते नतस्याश्नंतिपितरोयस्यविप्रानभुंजते ७ देवाश्चाप्यस्यनाश्नंतिपापस्यब्राह्मणद्विषः ब्राह्मणेषुतुतुष्टेषुप्रीयंतेपितरःसदा
८ तथैवदेवताराजन्नात्रकार्याविचारणा तथैवतेपिप्रीयंतेयेषांभवतितद्धविः ९ नचप्रेत्यविनश्यंतिगच्छंतिचपरांगतिम् ये
नयेनैवहविषाब्राह्मणांस्तर्पयेन्नरः १० तेनतेनैवप्रीयंतेपितरोदेवतास्तथा ब्राह्मणादेवतद्भूतंप्रभवंतियतःप्रजाः ११

ब्रह्मणानित्याराध्यायत्र
येणदानंपात्रत्वंब्राह्मणानांमुच्यते सोमोराजायेषांतेसोमराजानः १ किमिच्छसीति प्रश्नपूर्वकंयत्तदिष्टंदीयतेतत्किमिच्छकंतैः २ ३ ४ ५ ६ ७ ८
तेपिदातारोपि नतत्प्रदेयंद्रव्यं ९ १० ततयज्ञादिकंभूतमुत्पन्नं अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः ११

वेदेष्वइति एषब्राह्मणः स्वर्गस्यमार्गंपंथानं वेदजानीहिकुपितः सन् नरकस्यंमार्गंजानीहि १२ अतीतानागते भूतभविष्ये १३ येब्राह्मणमनुवर्त्ततेते परा-
भवंनयांतीत्यन्वयः प्रेत्यपरलोके १४ भूतात्मानः भूतंप्राप्तंवशीकृतंआत्माचित्तंयैस्ते १५ १६ भृगवः भृगुवंश्यास्तालजंघानजयन् आंगिरसः अं-
गिरोवंश्यानीपान् अजयन् भरद्वाजोवैतहव्यानित्यादि १७ तेवैतहव्यादयः कृष्णाजिनध्वजाः कृष्णाजिनंकृष्णचर्मसध्वजोयेषांते ब्राह्मणाएवकृष्णाजि-
नध्वजाइतिभावः ब्राह्मणस्यमहिमांतरमाह प्रक्षिप्येति कुंपृथिवींब्राह्मणायप्रक्षिप्यदत्वा पारगामिनंपरलोकहितंकर्मआरभेदाचरेत् भानु दीप्तिंकु

यतश्चायंप्रभवतिप्रेत्ययत्रचगच्छति वेदेषुमार्गःस्वर्गस्यतथैवनरकस्यच १२ अतीतानागतेचोभेब्राह्मणोद्विपदांवरः ब्राह्मणोभर-
तश्रेष्ठस्वधर्मंचैववेदयः १३ येचैनमनुवर्त्ततेतेनयांतिपराभवम् नतेप्रेत्यविनश्यंतिगच्छंतिनपराभवम् १४ यद्ब्राह्मणमुखात्प्राप्तं
प्रतिगृह्णंतिवैवचः भूतात्मानोमहात्मानस्तेनयांतिपराभवम् १५ क्षत्रियाणांप्रतपतांतेजसाचबलेनच ब्राह्मणेष्वेवशाम्यतितेजां-
सिचबलानिच १६ भृगवस्तालजंघांश्चनीपानांगिरसोजयन् भरद्वाजोवैतहव्यानैलांश्चभरतर्षभ १७ चित्रायुधांश्चाप्यजयन्नेते
कृष्णाजिनध्वजाः प्रक्षिप्याथचकुंभानुपारगामिनमारभेत् १८ यत्किंचित्कथ्यतेलोकेश्रूयतेपठ्यतेपिवा सर्वंतद्ब्राह्मणेष्वेवगूढोग्नि-
रिवदारुषु १९ अत्राप्युदाहरंतीममितिहासंपुरातनम् संवादंवासुदेवस्यपृथ्व्याश्चभरतर्षभ २० वासुदेवउवाच मातरंसर्व-
भूतानांपृच्छेत्वांसंशयंशुभे केनस्वित्कर्मणापापंव्यपोहतिनरोगृही २१ पृथिव्युवाच ब्राह्मणानेवसेवेतपवित्रंह्येतदुत्तमम्
ब्राह्मणान्सेवमानस्यरजःसर्वंप्रणश्यति २२ अतोभूतिरतःकीर्त्तिरतोबुद्धिःप्रजायते महारथश्चराजन्यःपृष्टव्युःशत्रुतापनः २३
इतिमांनारदःप्राहसततंसर्वभूतये ब्राह्मणंजातिसंपन्नंधर्मज्ञंसंशितंशुचिम् २४ अपरेषांपरेषांचपरेभ्यश्चैवयेपरे ब्राह्मणायं
प्रशंसंतिसमनुष्यःप्रवर्द्धते २५ अथयोब्राह्मणान्क्रुष्टःपराभवतिसोचिरात् यथामहार्णवेक्षिप्तासीतानेष्टुर्विनश्यति २६ त-
थादुश्चरितंसर्वंपराभावायकल्पते पश्यचंद्रेकृतंलक्ष्मसमुद्रोलवणोदकः २७

वदुभयलोकइति प्रक्षिप्याचाथकुम्भांवाइतिपाठे कुंभ्यांकलश्यांप्रक्षिप्य
अर्थाद्धान्यंपरगामिनंपरलोकहितंकर्मारभेत् देहयात्रार्थंधनमाहरेत् श्वःस्तनोभवेत् १८ यत्किंचिदतीतानागतंव्यवहितंस्थूलसूक्ष्मंब्राह्मणोहार्दाकाशास्थ्यब्र-
ह्मविदिकाष्ठाग्निवद्ध्याननिर्मथनादभिव्यज्यतइत्यर्थः १९ २० २१ रजःध्यानेंऽतरायभूतोविक्षेपः भूतिरैश्वर्यंबुद्धिरात्मज्ञानंसार्द्धश्लोकः २२ २३ अपरेब्राह्म-
णंसर्वभूतयेइच्छेदित्याहुरितिनिविपरिणामेनानुषंगः २४ २५ क्रुष्टःक्रोशतिकर्त्तरिक्तः सीतानेष्टुर्लांगलपद्धतिगतःपांसुपिंडः लोष्टेलेष्टुरितिकोशकाराःअंतस्थादिमि-
मंशब्दंपठंति २६ दुश्चरितंब्राह्मणद्रोहः २७ ६७

२८ विधेयमाह ब्राह्मणेत्यर्द्धेन २९ ३० ३१ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांचतुस्त्रिंशोऽध्यायः ३४ ६७ जन्मनैवसंस्का
राद्यभावेपिब्राह्मणोनमस्यएवप्रसृतंप्रश्रितंपक्वमन्नंतस्याग्रेभोक्तुमर्हःप्रसृताग्र्यभुक् १ सर्वेअर्थाःधर्मादयोयेभ्यस्ते सुमनसांदेवानांमुखमिवभूतास्सु
मनोमुखाः २ नोऽस्माकंद्विषतः शत्रून् तैरपूजिताःब्राह्मणाःदारुणयुक्ताभिःतवशत्रवोनश्यंतीत्यादिभिर्गीर्भिः अभिध्यासुअभिध्यायंतु अभिहन्युरिति

तथांभगसहस्रेणमहेंद्रःपरिचिन्हितः तेषामेवप्रभावेनसहस्रनयनोत्थसौ २८ शतक्रतुःसमभवत्पश्यमाधवयादृशम् इच्छन्कीर्त्तिं
चभूतिंचलोकांश्चमधुसूदन ब्राह्मणानुमतेतिष्ठेत्पुरुषःशुचिरात्मवान् २९ भीष्मउवाच इत्येतद्वचनंश्रुत्वामेदिन्यामधुसूद-
नः साधुसाध्वितिकौरव्यमेदिनींप्रत्यपूजयत् ३० एतांश्रुत्वोपमांपार्थप्रयतोब्राह्मणर्षभान् सततंपूजयेथास्त्वंततःश्रेयोभिपत्स्य
से ३१ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपृथिवीवासुदेवसंवादेचतुस्त्रिंशोऽध्यायः ३४ भीष्मउवाच ज
न्मनैवमहाभागोब्राह्मणोनामजायते नमस्यःसर्वभूतानामतिथिःप्रसृताग्रभुक् १ सर्वार्थाःसुहृदस्तातब्राह्मणाःसुमनोमुखाः गी
र्भिर्मंगलयुक्ताभिरनुध्यायंतिपूजिताः २ सर्वान्नोद्विषतस्तातब्राह्मणाजातमन्यवः गीर्भिर्दारुणयुक्ताभिरभिध्यासुरपूजिताः ३ अ
त्रगाथाःपुरागीताःकीर्त्तयंतिपुराविदः सृष्ट्वाद्विजातीन्धाताहियथापूर्वंसमादधत् ४ नचान्यदिहकर्त्तव्यंकिंचिदूर्ध्वंयथाविधि गुप्तो
गोपायतेब्रह्मश्रेयोवस्तेनशोभनम् ५ स्वमेवकुर्वतांकर्मश्रीर्वोब्राह्मीभविष्यति प्रमाणंसर्वभूतानांप्रग्रहाश्चभविष्यथ ६ नशौ
द्रंकर्मकर्त्तव्यंब्राह्मणेनविपश्चिता शौद्रंहिकुर्वतःकर्मधर्मःसमुपरुध्यते ७ श्रीश्चबुद्धिश्चतेजश्चविभूतिश्चप्रतापिनी स्वाध्याये-
नैवमाहात्म्यंविपुलंप्रतिपत्स्यते ८ हुत्वाचाहवनीयस्थंमहाभाग्येप्रतिष्ठिताः अग्रभोज्याःप्रसूतीनांश्रियाब्राह्म्यानुकल्पिताः
९ श्रद्धयापरयायुक्ताह्यनभिद्रोहलब्धया दमस्वाध्यायनिरताःसर्वान्कामानवाप्स्यथ १० यच्चैवमानुषेलोकेयच्चदेवेषुकिंचन सर्वंतु
तमसासाध्यंज्ञानेननियमेनच ११ इत्येवंब्रह्मगीतातेसमाख्यातामयानघ विप्राणामनुकंपार्थंतेनप्रोक्तंहिधीमता १२

स्पष्टार्थःपाठः ३ समादधत्समाधिंनियमंकृतवान् ४
ब्रह्मब्राह्मणःवःशोभनंश्रेयस्तेनैव ५ स्वंकर्मब्राह्मणगोपनं प्रग्रहाःदमनक्षमारज्जवइव ६ शौद्रंकर्मसेवा कर्त्तव्यंकारयितव्यंकुर्वतःकारयतः ७ श्रीश्चेत्यादेः
श्रियमित्यर्थः ८ आहवनीयस्थंदेवतागणं प्रसूतीनांशिशुभ्योप्यग्रेभोज्यंयेषांते ब्राह्म्याश्रियाविद्ययाऽनुकल्पिताःपात्रीभूताः ९ १० ११ इत्येवमिति ब्राह्मणानां
संबंधेब्रह्मगीताब्रेदकथिताःगीतातेतुभ्यं अनुकंपार्थंकथिताइत्यन्वयः तेनपुराविदाधीमताप्रोक्तमिदंब्राह्मणमाहात्म्यमितिशेषः १२ ६५ ६७ ६५ ६७

भूयइति तेषांब्राह्मणानांबलंसामर्थ्यंअहंमन्ये बलंयथाराज्ञः क्षत्रियस्य तपस्विनः तपोबलेनदुर्दांताः प्रजासुदांताभवंति चंडत्वादिदोषवंतोपिपूज्याएवेत्यर्थः १३
१४ १५ १६ १७ अमर्षणात्ब्राह्मणकोपासहनात् १८ १९ २० २१ २२ तेभ्योरक्ष्यंस्वकुलमितिशेषः २३ इतिश्रीमहाभारतेआ
नुशासनिकेपर्वणि टीकायांपंचत्रिंशोध्यायः ३५ अत्रापीत्यध्यायस्यतात्पर्यंअसुराणामपिश्रीर्ब्राह्मणप्रसादलभ्येवेति १ रथमास्थायपप्रच्छशंबरं वि

भूयस्तेषांबलंमन्येयथाराज्ञस्तपस्विनः दुरासदाश्चचंडाश्चरभसाःक्षिप्रकारिणः १३ संत्येषांसिंहसत्वाश्चव्याघ्रसत्वास्तथापरे वराह-
मृगसत्वाश्चजलसत्वास्तथापरे १४ सर्पस्पर्शसमाःकेचित्तथान्येमकरस्पृशः विभाष्यघातिनःकेचित्तथाचक्षुर्हणोपरे १५ संतिचाशी
विषसमाःसंतिमंदास्तथापरे विविधानीहवृत्तानिब्राह्मणानांयुधिष्ठिर १६ मेकलाद्राविडालाटाःपौंड्राःकोन्वशिरास्तथा शौंडिकादरदा
दर्वाश्चौराःशबरबर्बराः १७ किरातायवनाश्चैवतास्ताःक्षत्रियजातयः वृषलत्वमनुप्राप्ताब्राह्मणानाममर्षणात् १८ ब्राह्मणानांपरि
भवादसुराःसलिलेशयाः ब्राह्मणानांप्रसादाच्चदेवाःस्वर्गनिवासिनः १९ अशक्यंस्प्रष्टुमाकाशमचाल्योहिमवान्गिरिः अधार्यासे
तुनागंगादुर्जयाब्राह्मणाभुवि २० नब्राह्मणविरोधेनशक्याशास्तुंवसुंधरा ब्राह्मणाहिमहात्मानोदेवनामपिदेवताः २१ तान्पूजयस्व
सततंदानेनपरिचर्यया यदीच्छसिमहींभोक्तुमिमांसागरमेखलाम् २२ प्रतिग्रहेणतेजोहिविप्राणांशाम्यतेनघ प्रतिग्रहंयेनेच्छेयु
स्तेभ्योरक्ष्यस्त्वयानृप २३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेब्राह्मणप्रशंसायांपंचत्रिंशोऽध्यायः ३५ भीष्मउवाच
अत्राप्युदाहरंतीममितिहासंपुरातनम् शक्रशंबरसंवादंतन्निबोधयुधिष्ठिर १ शक्रोह्यज्ञातरूपेणजटीभूत्वारजोगुणः विरूपंरथ
मास्थायप्रश्नंपप्रच्छशंबरम् २ शक्रउवाच केनशंबरवृत्तेनस्वजात्यानधितिष्ठसि श्रेष्ठत्वांकेनमन्यंतेतन्मेप्रब्रूहितत्त्वतः ३
शंबरउवाच नासूयामियदाविप्रान्ब्राह्मंमेवचमेमतम् शास्त्राणिवदतोविप्रान्संमन्यामियथासुखम् ४ श्रुत्वाचनावजानामिना
पराध्यामिकर्हिचित् अभ्यर्च्याम्यनुपृच्छामिपादौगृह्णामिधीमताम् ५ तेविश्रब्धाःप्रभाषंतेसंपृच्छंतेचमांसदा प्रमत्तेष्वप्रमत्तोस्मि
सदासुप्तेषुजागृमि ६ तेमांशास्त्रपथेयुक्तंब्रह्मण्यमनसूयकम् समासिंचंतिशास्तारःक्षौद्रंमध्विवमक्षिकाः ७ यच्चभाषंतिसंतु-
ष्टास्तच्चगृण्हामिमेधया समाधिमात्मनोनित्यमनुलोममचिंतयम् ८

रूपंरूपमास्थायेतिचपाठः २ स्वजात्यान्स्वसंबंधीयान् ३ ४ ५ प्रमत्ते
षुअहमप्रमत्तोस्मि ६ मांमयिमधुअमृततुल्यांविद्यांसमासिंचंति क्षौद्रंमधुपटलं मक्षिकामध्विवेत्यावृत्त्यायोज्यं ७ यच्चभाषंतीति संतुष्टाःयद्भाषंतिवदंतितच्चा
हंगृण्हामि अनुलोममनुकूलमात्मनःसमचिंतयंअचिंतयमब्राह्मणभाषणेनित्यंतिष्ठामीतिभावः ८ ७ ७ ७ ७ ७

वागग्रे जिह्वाग्रे भिक्षविद्यामृतं येषां ब्राह्मणानां रसनामुक्तसुधानां ९ १० ११ १२ १३ ब्राह्मीं वेदार्थां दुर्वसतीः गुरुकुलवासक्लेशान् अपि अपिवास
तिर्वैराग्ये कारयतिः स्यात् नैष्ठिकब्रह्मचर्यात् पारिव्राज्यमेव कुर्यादित्यर्थः १४ पितुर्गृहे वेदाध्ययनं निंदति अपीति १५ अप्रवासिनं वेदार्थग्रामांतरे नामसमकु
र्वाणं १६ १७ १८ १९ इतिश्रीमहाभारते आनुशासनिके पर्वणि टीकायां षट्त्रिंशोऽध्यायः ३६ अपूर्वंस्येत्यध्यायः ब्राह्मणेष्वपि पात्रविशे

सोहं वागग्रे मिष्टानां रसानामवलेहकः स्वजात्याननधितिष्ठामि नक्षत्राणि च चंद्रमाः ९ एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमम् यद्ब्राह्म-
णमुखाच्छास्त्रमिह श्रुत्वा प्रवर्तते १० एतत्कारणमाज्ञाय दृष्ट्वा देवासुरं पुरा युद्धं पितामहेन्द्र श्रुत्वा विस्मितः समपद्यत ११ दृष्ट्वा च ब्रा-
ह्मणानां तु महिमानं महात्मनाम् पर्यपृच्छत्कथममी सिद्धा इति निशाकरम् १२ सोम उवाच ब्राह्मणास्तपसा सर्वे सिध्यंते वासव
लाः सदा भुजवीर्याश्च राजानो वागस्त्राश्च द्विजातयः १३ प्रवसंश्चाप्यधीयीत ब्राह्मीर्दुर्वसतीर्वसन् निर्मन्युरपि निर्वाणो यतिः स्यात्स
मदर्शनः १४ अपि च ज्ञानसंपन्नः सर्वान्वेदान्पितुर्गृहे श्लाघ्यमान इवाधीयाद्ग्राम्य इत्येव तं विदुः १५ भूमिरेतौ निगिरति सर्पो बिल-
शयानिव राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनम् १६ अभिमानः श्रियं हंति पुरुषस्याल्पमेधसः गर्भेण दूष्यते कन्या गृहवासेन
च द्विजः १७ इत्येतन्मे पिता श्रुत्वा सोमादद्भुतदर्शनात् ब्राह्मणान्पूजयामास तथैवाहं महाव्रतान् १८ भीष्म उवाच श्रुत्वैतद्व
चनं शक्रो दानवेंद्रमुखात्च्युतम् द्विजान्संपूजयामास महेंद्रत्वमवाप च १९ इतिश्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे ब्रा
ह्मणप्रशंसायामिंद्रशंबरसंवादे षट्त्रिंशोऽध्यायः ३६ युधिष्ठिर उवाच अपूर्वं वा भवेत्पात्रमथवापि चिरोषितम् दूरादभ्यागतं चा
पि किं पात्रं स्यात्पितामह १ भीष्म उवाच क्रिया भवति केषांचिदुपांशुव्रतमुत्तमम् यो यो याचेत यत्किंचित्सर्वं दद्याम इत्यपि २
अपीडयन्भृत्यवर्गमित्येवमनुशुश्रुम पीडयन्भृत्यवर्गं हि आत्मानमपकर्षति ३ अपूर्वं वापि यत्पात्रं यच्चापि स्याच्चिरोषितम् दू
रादभ्यागतं चापि तत्पात्रं च विदुर्बुधाः ४ युधिष्ठिर उवाच अपीडयन्च भूतानां धर्मस्याहिंसया तथा पात्रविद्यात्तु तत्त्वेन यस्मै दत्तं
न संतपेत् ५

षपरीक्षार्थं १ तत्र अपूर्वश्चिरोषितो दूरादागतश्च पात्रं तेषां मध्ये कश्चिद्यज्ञार्थं कश्चित् गुरुदक्षिणार्थं कश्चित्कुटुंबभरणार्थमिति एवंरू-
पा क्रिया केषांचित्पात्रत्वे प्रधानं भवति केषांचिदुपांशुव्रतं मौनं पारिव्राज्यमिति तथा क्रिया मौनं योऽस्तारतम्यादेभ्यो नाम्य नम्रसुपंत इत्याह क्रियेति दद्याम
ददाम इत्येव वक्तव्यं न त्वेते पुंकं त्रिस्यांच दीनेत्यर्थः २ ३ ४ दत्तं भद्रं यवस्त्वाभिमानिनी देवता न संतपेत यथा तादृशाय देयं नान्यस्मै स्मर्यते हि न ष्टशौ
चे व्रतभ्रष्टे विप्रे वेदविवर्जिते दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतमिति अतः कस्मा इत्याशंक्य प्रश्न ५ ६ ७ ८ ९ १०

मुख्यं पात्रंविशेषेणंश्रुवंतीः नसूयकाइति ६ ७ तया अक्रोधादिगुणविशिष्टं ८ । ९ १० अपात्रतावीजमाह अप्रामाण्यमिति आत्मनः पात्रतायाइ-
तिशेषः ११ निरर्थिकांश्रुतिविरोधित्वेनमोक्षानुपयोगिनीम् १२ हेतुवादान्ब्रुवन्युक्त्याजगत्कारणगोष्ठीः कुर्वन्नपिअहेतुवादिकः शास्त्रोक्तहेतुवादविरोधात्
१३ बोद्धव्यः अस्पृश्यत्वेनेतिशेषः तत्रहेतुमाह श्वानंहितंविदुः शिष्टाइतिशेषः १४ एतदेवोपपादयतियथेति १५ लोकयात्राशिष्टाचारादिव्यवहारः धर्मः श्रुतिस्मृत्यु
क्तः आत्महितानिशमदमादीनि १६ देवानामृणंयज्ञेनऋषीणांवेदाधिगमेनपितॄणांप्रजोत्पादनेनविप्राणांदानमानेनअतिथीनांवैश्वदेवांतेआगतानांसम्यग्आ
तिथ्येनचउन्मुच्य अपाङ्क्त्यकर्माणिकुर्वन्नित्युत्तरेणान्वयः १७ पर्यायेणयथाक्रमेणसुशिक्षितेनकर्मणायत्नेकर्माणियज्ञादीनि १८ इतिश्रीमहाभारते

भीष्मउवाच । ऋत्विक्पुरोहिताचार्याःशिष्यसंबंधिबांधवाः सर्वेपूज्याश्चमान्याश्चश्रुतवंतोनसूयकाः ६ अतोन्यथावर्तमानाःसर्वेना
र्हंतिसत्क्रियाम् तस्मान्नित्यपरीक्षेतपुरुषान्प्रणिधायवै ७ अक्रोधःसत्यवचनमहिंसादमआर्जवम् अद्रोहोनभिमानश्चह्रीस्तितिक्षादमःशमः ८ यस्मिन्नेतानिदृश्यंतेनचाकार्याणिभारत स्वभावतोनिविष्टानितत्पात्रंमानमर्हति ९ तथाचिरोषितंचापिसंप्रत्यागत
मेवच अपूर्वंचैवपूर्वंचतत्पात्रंमानमर्हति १० अप्रामाण्यंचवेदानांशास्त्राणांचाभिलंघनम् अव्यवस्थाचसर्वत्रएतन्नाशनमात्मनः
११ भवेत्पंडितमानीयोब्राह्मणोवेदनिंदकः आन्वीक्षिकींतर्कविद्यामनुरक्तोनिरर्थिकाम् १२ हेतुवादान्ब्रुवन्सत्सुविजेताहेतुवादिकः
आक्रोष्टाचातिवक्ताचब्राह्मणानांसदैवहि १३ सर्वाभिशंकीमूढश्चबालःकटुकवागपि बोद्धव्यस्तादृशस्तातनरश्वानंहितंविदुः १४
यथाश्वाभषितुंचैवहंतुंचैवावसज्जते एवंसंभाषणार्थायसर्वशास्त्रवधायच । १५ लोकयात्राचद्रष्टव्याधर्मश्चात्महितानिच एवंन-
रोवर्तमानःशाश्वतीर्वर्द्धतेसमाः १६ ऋणमुन्मुच्यदेवानामृषीणांचतथैवच पितॄणामथविप्राणामतिथीनांचपंचमम् १७ पर्यायेण
विशुद्धेनसुविनीतेनकर्म्मणा एवंगृहस्थःकर्माणिकुर्वन्धर्मान्नहीयते १८ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपात्रप
रीक्षायांसप्तत्रिंशोऽध्यायः ३७ युधिष्ठिरउवाच । स्त्रीणांस्वभावमिच्छामिश्रोतुंभरतसत्तम स्त्रियोहिमूलंदोषाणांलघुचित्ताहि-
ताःस्मृताः १

आनुशासनिकेपर्वणिटीकायांसप्तत्रिंशोऽध्यायः ३७ स्त्रीणामितिपूर्वंमेघवाहनपर्वणिवेधंवन्मूलंतहेदनंधर्मबलादेवभवतीतियज्ञादिधर्मोवक्तव्यः सचका
मकारविहतदारपरिग्रहाधीनइत्यष्टावक्रदिक्संवादेप्रदर्शितः तत्रापिक्रोबिगात्माधनंजायाशुद्धयस्यचतुष्टयंतस्याग्निहोत्रंस्वर्गायनरकायेतरस्यचेतिस्मृतेर्य-
ज्ञांगभूतात्मशुद्धिः ऋत्विक्शुद्धिश्चतीर्थब्राह्मणमाहात्म्याभ्यांउक्ता अथस्त्रीशुद्धिर्द्रव्यशुद्धिश्चमहताप्रबंधेनप्रस्तूयतेतत्रतावदस्मिन्नध्यायेस्त्रीदोषानेव
दर्शयतिस्त्रीणामित्यादिनालघुचित्ताःवायुवत्चलचित्ताः १ ६२

२ ब्राह्मींब्रह्मलोकस्थां ३. ४ विषयेवक्तुंयोग्यत्वे ५ ६ ७ ८ ९ कृतमतिःवक्ष्यामीतिकृतनिश्चयाऽभवत् १० ११ १२ १३ १४ १५
१६ १७ १८ १९ २० २१ गतिःप्राप्तिअन्योन्यकृत्रिमलिंगधारिण्योभूत्वामैथुनार्थंप्रवर्त्तंते एतच्चलोकप्रसिद्धंभर्तृषुदूरस्थेषुइतिशेषः नहितिष्ठं

भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् नारदस्यचसंवादंपुंश्चल्यापंचचूडया २ लोकाननुचरन्सर्वान्देवर्षिर्नारदःपुरा
ददर्शाप्सरसंब्राह्मींपंचचूडामनिंदिताम् ३ तांदृष्ट्वाचारुसर्वांगींपप्रच्छाप्सरसंमुनिः संशयोहृदिकश्चिन्मेब्रूहितन्मेसुमध्यमे ४
भीष्मउवाच एवमुक्ताथसाविप्रंप्रत्युवाचाथनारदम् विषयेसतिवक्ष्यामिसमर्थांमन्यसेचमाम् ५ नारदउवाच नत्वामविष
येभद्रेनियोक्ष्यामिकथंचन स्त्रीणांस्वभावमिच्छामित्वत्तःश्रोतुंवरानने ६ भीष्मउवाच एतच्छ्रुत्वावचस्तस्यदेवर्षेरप्सरोत्तमा
प्रत्युवाचनशक्ष्यामिस्त्रीसतीनिंदितुंस्त्रियः ७ विदितास्तेस्त्रियोयाश्चयादृशाश्चस्वभावतः नमामर्हसिदेवर्षेनियोक्तुंकार्यदृशे ८ ता
मुवाचसदेवर्षिःसत्यंवदसुमध्यमे मृषावादेभवेद्दोषःसत्येदोषोनविद्यते ९ इत्युक्तासाकृतमतिरभवच्चारुहासिनी स्त्रीदोषांश्छा
श्वतान्सत्यान्भाषितुंसंप्रचक्रमे १० पंचचूडोवाच कुलीनारूपवत्यश्चनाथवत्यश्चयोषितः मर्यादासुनतिष्ठंतिसदोषःस्त्रीषुनारद
रद ११ नस्त्रीभ्यःकिंचिदन्यद्वैपापीयस्तरमस्तिवै स्त्रियोहिमूलंदोषाणांतथात्वमपिवेत्थह १२ समाज्ञातानृद्धिमतःप्रतिरूपान्वशेस्थि
तान् पतीनंतरमासाद्यनालंनार्यःप्रतीक्षितुम् १३ असद्धर्मस्त्वयंस्त्रीणामस्माकंभवतिप्रभो पापीयसोनरान्यद्वैलज्जांत्यक्त्वाभ
जामहे १४ स्त्रियंहियःप्रार्थयतेसन्निकर्षंचगच्छति ईषच्चकुरुतेसेवांतमेवेच्छंतियोषितः १५ अनर्थित्वात्मनुष्याणांभयात्परिज
नस्यच मर्यादायाममर्यादाःस्त्रियस्तिष्ठंतिभर्तृषु १६ नासांकश्चिदगम्योस्तिनासांवयसिनिश्चयः विरूपंरूपवंतंवापुमानित्येवभुंज
ते १७ नभयान्नाप्यनुक्रोशान्नार्थहेतोःकथंचन नज्ञातिकुलसंबंधात्स्त्रियस्तिष्ठंतिभर्तृषु १८ यौवनेवर्तमानानांमृष्टाभरणवास
साम् नारीणांस्वैरवृत्तीनांस्पृहयंतिकुलस्त्रियः १९ याश्चशश्वद्बहुमतारक्षंतेदयितास्त्रियः अपितासंप्रसज्जंतेकुब्जांधजडवाम
नैः २० पंगुष्वथचदेवर्षेयेचान्येकुत्सितानराः स्त्रीणामगम्योलोकेस्मिन्नास्तिकश्चिन्महामुने २१ यदिपुंसांगतिर्ब्रह्मन्कथंचिन्नोप
पद्यते अप्यन्योन्यंप्रवर्त्तंतेनहितिष्ठंतिभर्तृषु २२ अलाभात्पुरुषाणांहिभयात्परिजनस्यच वधबंधभयाच्चापिस्वयंगुप्ताभवंतिताः
२३ चलस्वभावादुःसेव्यादुर्ग्राह्याभावतस्तथा प्राज्ञस्यपुरुषस्येहयथावाचस्तथास्त्रियः २४

निर्धैर्येइतिशेषः २२ २३ चलस्वभावाःसा
लावृकाणांहृदयान्येतेतिश्रुतेर्यथावृकविशेषःभृत्यहननंवमांसमिच्छंतिन्यायसंननेनरमंतएवंस्त्रियःपुरुषमित्यर्थः २४ ७ ७ ७ ७

काष्ठानांकाष्ठैः २५, २६ २७ २८ अंतकादित्सद्योनाशकाइत्यर्थः २९ यतइतिवन्द्योषयवत्स्वाभाविकाएतेस्त्रीणांदोषाइत्यर्थः यथोक्तंनीतौ अनृतंसाहसंमायामूर्खत्वमतिलोभता अशौचंनिर्दयत्वंच स्त्रीणांदोषाः स्वभावजा इतिकामश्चाष्टगुणःस्मृतइतिच ३० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांअष्टत्रिंशोऽध्यायः ३८ इमइति एवंस्वभावदुष्टाअपिस्त्रियः परेभ्योदुःसंरक्ष्याइत्याख्यायिकातात्पर्यं १ २ ३ ४ ५ ६ ७ ८ ९

नाग्निस्तृप्यतिकाष्ठानांनापगानांमहोदधिः नांतकःसर्वभूतानांनपुंसांवामलोचनाः २५ इदमन्यच्चदेवर्षेरहस्यंसर्वयोषिताम् दृष्ट्वैवपुरुषंहृद्यंयोनिःप्रक्लिद्यतेस्त्रियाः २६ कामानामपिदातारंकर्तारंमानसांप्रियम् रक्षितारंनमृष्यंतिस्वभर्त्तारमलंस्त्रियः २७ नकामभोगान्विपुलान्नालंकारान्नसंश्रयान् तथैवबहुमन्यंतेयथारत्यामनुग्रहम् २८ अंतकःपवनोमृत्युःपातालंवडवामुखम् क्षुरधाराविषंसर्पोवन्हिरित्येकतःस्त्रियः २९ यतश्चभूतानिमहांतिपंचयतश्चलोकाविहिताविधात्रा यतःपुमांसःप्रमदाश्चनिर्मितास्तदेवदोषाःप्रमदासुनारद ३० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपंचचूडानारदसंवादेअष्टत्रिंशोऽध्यायः ३८ युधिष्ठिरउ० इमेवैमानवालोकेस्त्रीषुसज्जंत्यभीक्ष्णशः मोहेनपरमाविष्टादैवसृष्टेनपार्थिव १ स्त्रियश्चपुरुषेष्वेवप्रत्यक्षंलोकसाक्षिकम् अत्रमेसंशयस्तीव्रोहृदिसंपरिवर्तते २ कथमासांनराःसंगंकुर्वतेकुरुनंदन स्त्रियोवाकेषुरज्यंतेविरज्यंतेचताःपुनः ३ इतिताःपुरुषव्याघ्रकथंशक्यास्तुरक्षितुम् प्रमदाःपुरुषेणेहतन्मेव्याख्यातुमर्हसि ४ एताहिरममाणास्तुवंचयंतीहमानवान् नचासांमुच्यतेकश्चित्पुरुषोहस्तमागतः ५ गावोनवतृणानीवगृण्हंत्येतानवंनवम् शंबरस्यचयामायामायायानमुचेरपि ६ बलेःकुंभीनसेश्चैवंसर्वास्ताय्योषितोविदुः हसंतंप्रहसंत्येतारुदंतंप्ररुदंतिच ७ अप्रियंप्रियवाक्यैश्चगृण्हतेकालयोगतः उशनावेदयच्छास्त्रंयच्चवेदबृहस्पतिः ८ स्त्रीबुध्यानविशिष्येततास्तुरक्ष्याःकथंनरैः अनृतंसत्यमित्याहुःसत्यंचापितथानृतम् ९ इतियास्ताःकथंवीरसंरक्ष्याःपुरुषैरिह स्त्रीणांबुध्यर्थनिष्कर्षादर्थशास्त्राणिशत्रुहन् १० बृहस्पतिप्रभृतिभिर्मन्येसद्भिःकृतानिवै संपूज्यमानाःपुरुषैर्विकुर्वंतिमनोनृषु ११ अपास्ताश्चतथाराजन्विकुर्वंतिमनःस्त्रियः इमाःप्रजामहाबाहोधार्मिक्यइतिनःश्रुतम् १२ सत्कृतासत्कृताश्चापिविकुर्वंतिमनःसदा कस्ताःशक्तोरक्षितुंस्यादितिमेसंशयोमहान् १३

स्त्रीणामितिस्त्रीबुद्धिमनुसृत्यैवबृहस्पत्यादिभिर्वचनाशास्त्रंप्रवर्तितमित्यत्युक्तिः १० एनापूजिताधिकृतावातुल्यवद्विकारंजनयंतीत्यर्थः ११ एतदेवाहइमा-इतिइमाःस्त्रीरूपाःधार्मिक्यइतिश्रुतिमात्रंसावित्र्यादिषुदृष्टम् १२ अनुभवस्तुनतथेत्याहसत्कृतेति १३ ७ ७ ७ ७

१४ इतिश्रीमहाभारते आनुशासनिके पर्वणि टीकायां एकोनचत्वारिंशोऽध्यायः ३९ एवमेवेत्यध्यायस्य तात्पर्यं नानारूपेभ्यो निरिदेभ्यो योगबलेनैव स्वभावचप
लाः स्त्रियः संरक्षितुं शक्या नान्यथेति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

तथा ब्रूहि महाभाग कुरूणां वंशवर्द्धन यदि शक्या कुरुश्रेष्ठ रक्षा तासां कदाचन कर्तुं वा कृतपूर्वं वा तन्मे व्याख्यातुमर्हसि १४ इतिश्रीम-
हाभारते आनुशासनिके पर्वणि दानधर्मे विपुलोपाख्याने एकोनचत्वारिंशोऽध्यायः ३९ भीष्म उवाच एवमेव महाबाहो नात्र मिथ्या-
स्ति किंचन यथा ब्रवीषि कौरव्य नारीं प्रति जनाधिप १ अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् यथा रक्षा कृता पूर्वं विपुलेन महात्मना
२ प्रमदाश्च यथा सृष्टा ब्रह्मणा भरतर्षभ यदर्थं तच्च ते तात प्रवक्ष्यामि नराधिप ३ नहि स्त्रीभ्यः परं पुत्र पापीयः किंचिदस्ति वै अग्नि
र्हि प्रमदा दीप्तो मायाश्च मयजा विभो ४ क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः प्रजा इमा महाबाहो धार्मिक्य इति नः श्रुतम् ५ स्वयं
गच्छन्ति देवत्वं ततो देवानियाद्भयम् अथाभ्यगच्छन् देवास्ते पितामहमरिंदम ६ निवेद्य मानसं चापि तूष्णीमासन्नधोमुखाः तेषामं
तर्गतं ज्ञात्वा देवानां स पितामहः ७ मानवानां प्रमोहार्थं कृत्या नार्योऽसृजत्प्रभुः पूर्वसर्गे तु कौन्तेय साध्व्यो नार्य इहाभवन् ८ असाध्व्यस्तु
समुत्पन्नाः कृत्यासर्गात्प्रजापतेः ताभ्यः कामान्यथाकामं प्रादाद्धि स पितामहः ९ ताः कामलुब्धाः प्रमदाः प्रबाधन्ते नरान्सदा क्रोधं का
मस्य देवेशः सहायं चासृजत्प्रभुः १० असज्जन्त प्रजाः सर्वाः कामक्रोधवशं गताः न च स्त्रीणां क्रिया काश्चिदिति धर्मो व्यवस्थितः ११ नि
रिन्द्रिया ह्यशास्त्राश्च स्त्रियोऽनृतमिति श्रुतिः शय्यासनमलंकारमन्नपानमनार्यताम् १२ दुर्वाग्भावं रतिं चैव ददौ स्त्रीभ्यः प्रजापतिः न ता-
सां रक्षणं शक्यं कर्तुं पुंसा कथंचन १३ अपि विश्वकृता तात कुतस्तु पुरुषैरिह वाचा च वधबन्धैर्वा क्लेशैर्वा विविधैस्तथा १४ न शक्या
रक्षितुं नार्यस्ता हि नित्यमसंयताः इदं तु पुरुषव्याघ्र पुरस्ताच्छ्रुतवानहम् १५ यथा रक्षा कृता पूर्वं विपुलेन गुरुस्त्रियाः ऋषिरासीन्म-
हाभागो देवशर्मेति विश्रुतः १६ तस्य भार्या रुचिर्नाम रूपेणासदृशी भुवि अस्या रूपेण सम्मत्ता देवगन्धर्वदानवाः १७ विशेषेण तु राजे-
न्द्र वृत्रहा पाकशासनः नारीणां चरितज्ञश्च देवशर्मा महामुनिः १८ यथाशक्ति यथोत्साहं भार्यां तामभ्यरक्षत पुरंदरं च जानीते परस्त्रीका
मचारिणम् १९ तस्माद्यत्नेन भार्याया रक्षणं स चकार ह स कदाचिदृषिस्तात यज्ञं कर्तुमनास्तदा भार्यासंरक्षणं कार्यं कथं स्यादित्य
चिन्तयत् २० रक्षाविधानं मनसा स संचिन्त्य महातपाः आहूय दयितं शिष्यं विपुलं प्राह भार्गवम् २१ देवशर्मोवाच यज्ञकारो ग
मिष्यामि रुचिं चेमां सुरेश्वरः यतः प्रार्थयते नित्यं तां रक्षस्व यथाबलम् २२

१७ १८ १९ २० २१ २२ ७ ७ ७

अप्रमत्तेनतेभाव्यंसदाप्रतिपुरंदरम् सहिरूपाणिकुरुतेविविधानिभृगूत्तम २३ भीष्मउवाच इत्युक्तोविपुलस्तेनतपस्वीनियतेंद्रियः स
दैवोग्रतपाराजन्नग्न्यर्कसदृशद्युतिः २४ धर्मज्ञःसत्यवादीचतथेतिप्रत्यभाषत पुनश्चेदंमहाराजपप्रच्छप्रस्थितंगुरुम् २५ विपुल
उवाच कानिरूपाणिशक्रस्यभवत्यागच्छतोमुने वपुस्तेजश्चकीदृग्वैतन्मेव्याख्यातुमर्हसि २६ भीष्मउवाच ततस्सभगवांस्त
स्मैविपुलायमहात्मने आचचक्षेयथातत्त्वंमायाशक्रस्यभारत २७ देवशर्मोवाच बहुमायःसविप्रर्षेभगवान्पाकशासनः तां
स्तान्विकुरुतेभावान्बहूनथमुहुर्मुहुः २८ किरीटीवज्रभृद्धन्वीमुकुटीबद्धकुंडलः भवत्यथमुहूर्त्तेनचंडालसमदर्शनः २९ शिखी-
जटीचीरवासाःपुनर्भवतिपुत्रक बृहच्छरीरश्चपुनश्चीरवासाःपुनःकृशः ३० गौरश्यामश्चकृष्णश्चवर्णंविकुरुतेपुनः विरूपोरूपवांश्चै
वयुवावृद्धस्तथैवच ब्राह्मणःक्षत्रियश्चैववैश्यःशूद्रस्तथैवच ३१ प्रतिलोमोनुलोमश्चभवत्यथशतक्रतुः शुकवायसरूपीचहंसको
किलरूपवान् ३२ सिंहव्याघ्रगजानांचरूपंधारयतेपुनः दैवंदैत्यम थार्गज्ञावपुर्धारयतेपिच ३३ अण्डशोवायुभग्नांगःशकुनिर्वि-
कृतस्तथा चतुष्पाद्बहुरूपश्चपुनर्भवतिबालिशः ३४ मक्षिकामशकादीनांवपुर्धारयतेपिच नशक्यमस्यग्रहणंकर्तुंविपुलकेनचित्
३५ अपिविश्वकृतातातयेनसृष्टमिदंजगत् पुनरंतर्हितःशक्रोदृश्यतेज्ञानचक्षुषा ३६ वायुभूतश्चसपुनर्देवराजोभवत्युत एवंरू
पाणिसंततंकुरुतेपाकशासनः ३७ तस्माद्विपुलयत्नेनरक्षेमांतनुमध्यमाम् यथारुचिनावलिहेद्देवेंद्रोभृगुसत्तम ३८ क्रतावुपहि
तेन्यस्तंहविःश्वेवदुरात्मवान् एवमाख्यायसमुनिर्यज्ञकागेगमत्तदा देवशर्मामहाभागस्ततोभरतसत्तम ३९ विपुलस्तुवचःश्रुत्वा-
गुरोश्चित्तमुपेयिवान् रक्षांचपरमांचक्रेदेवराजान्महाबलात् ४० किंनुशक्यमयाकर्तुंगुरुदाराभिरक्षणे मायावीहिसुरेंद्रोसौदुर्धर्ष
श्चापिवीर्यवान् ४१ नापिधायाश्रमंशक्योरक्षितुंपाकशासनः उटजंवातथाह्यस्यनानाविधिसरूपता ४२ वायुरूपेणवाशक्रोगुरु-
पत्नींप्रधर्षयेत् तस्मादिमांसंप्रविश्यरुचिंस्थास्येहमद्यवै ४३ अथवापौरुषेणेयंनशक्यारक्षितुंमया बहुरूपोहिभगवाञ्छ्रूयतेपा-
कशासनः ४४ सोहंयोगबलादेनांरक्षिष्येपाकशासनात् गात्रेणगात्रेरस्याहंसंप्रवेक्ष्येहिरक्षितुम् ४५ यद्युच्छिष्टामिमांपत्नीमद्यपश्य
तिमेगुरुः शप्स्यत्यसंशयंकोपाद्दिव्यज्ञानोमहातपाः ४६ नचेयंरक्षितुंशक्यायथान्याप्रमदानृभिः मायावीहिसुरेंद्रोसावहोप्राप्तोस्मि
संशयम् ४७

अवश्यंकरणीयंहिगुरोरिहहिशासनम् यदिचैतदहंकुर्यामाश्चर्यंस्यात्कृतंमया ४८ योगेनानुप्रवेशोहिगुरुपत्न्याःकलेवरे अशक्तः
पद्मपत्रस्थोजलबिंदुर्यथाचलः ४९ निर्मुक्तस्यरजोरूपान्नापराधोभवेन्मम यथाहिशून्यांपथिकःसभामध्यासतेपथि ५० तथाध्या
वासयिष्यामिगुरुपत्न्याःकलेवरम् एवमेवशरीरेऽस्यानिवत्स्यामिसमाहितः ५१ इत्येवंधर्ममालोक्यवेदवेदांश्चसर्वशः तपश्चविपुलं
दृष्ट्वागुरोरात्मनएवच ५२ इतिनिश्चित्यमनसारक्षांप्रतिसभार्गव अन्वतिष्ठत्परंयत्नंयथातच्छृणुपार्थिव ५३ गुरुपत्नींसमासीनो
विपुलःसमहातपाः उपासीनामनिंद्यांगींयथार्थैःसमलोभयत् ५४ नेत्राभ्यांनेत्रयोरस्यारश्मीन्संयोज्यरश्मिभिः विवेशविपुलःकायमा
काशंपवनोयथा ५५ लक्षणंलक्षणेनैववदनंवदनेनच अविचेष्टन्नतिष्ठद्वैच्छायेवांतर्हितोमुनिः ५६ ततोविष्टभ्यविपुलोगुरुपत्न्याः
कलेवरम् उवासरक्षणेयुक्तोनचसातमबुध्यत ५७ यंकालंनागतोराजन्गुरुस्तस्यमहात्मनः क्रतुंसमाप्यस्वगृहंतंकालंसोभ्यरक्षत
५८ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेविपुलोपाख्यानेचत्वारिंशोऽध्यायः ४० भीष्मउवाच ततःकदाचिद्देवें
द्रोदिव्यरूपवपुर्धरः इदमंतरमित्येवमभ्यगात्तमथाश्रमम् १ रूपमप्रतिमंकृत्वालोभनीयंजनाधिपः दर्शनीयतमोभूत्वाप्रविवेशतमा-
श्रमम् २ सददर्शतमासीनंविपुलस्यकलेवरम् निश्चेष्टंस्तब्धनयनंयथालेख्यगतंतथा ३ रुचिंचरुचिरापांगींपीनश्रोणि
पयोधराम् पद्मपत्रविशालाक्षींसंपूर्णेंदुनिभाननाम् ४ सातमालोक्यसहसाप्रत्युत्थातुमियेषह रूपेणविस्मिताकोसीत्यथव
क्तुमिच्छती ५ उत्थातुकामातुसतीविष्टब्धाविपुलेनसा निगृहीतामनुष्येंद्रनशशाकविचेष्टितुम् ६ तामाबभाषेदेवेंद्रःसाम्ना-
परमवल्गुना त्वदर्थमागतंविद्धिदेवेंद्रंमांशुचिस्मिते ७ क्लिश्यमानमनंगेनत्वत्संकल्पभवेनह तत्संप्राप्तंहिमांसुभ्रुपुराकालोति
वर्तते ८ तमेवंवादिनंशक्रंशुश्रावविपुलोमुनिः गुरुपत्न्याःशरीरस्थोददर्शत्रिदशाधिपम् ९ नशशाकचसाराजन्प्रत्युत्थातुम-
निंदिता वक्तुंचनाशकद्राजन्विष्टब्धाविपुलेनसा १० आकारंगुरुपत्न्यास्तुसविज्ञायभृगूद्वहः निजग्राहमहातेजायोगेनबलवत्प्रभो
११ बबंधयोगबंधैश्चतस्याःसर्वेंद्रियाणिसः तांनिर्विकारांदृष्ट्वातुपुनरेवशचीपतिः १२ उवाचव्रीडितोराजंस्तांयोगबलमोहिताम्
एह्येहीतिततःसातुप्रतिवक्तुमियेषतम् १३ सतांवाचंगुरोःपत्न्याविपुलःपर्यवर्तयत् भोःकिमागमनेकृत्यमितितस्याविनिःसृता १४

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२
३३ ३४ ३५ ३६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांएकचत्वारिंशोध्यायः ४१ ७ विपुलस्त्वित्यध्यायस्यतात्पर्यपद्मपत्रा

वक्त्राच्छशांकसदृशाह्यणीसंस्कारभूषणा व्रीडितासातुतंद्दाष्व्यमुक्त्वापरवशात्तदा १५ पुरंदरश्चतत्रस्थोबभूवविमनाभृशम् सतंदृ
ष्टतमालक्ष्यदेवराजोविशांपते १६ अवैक्षतसहस्राक्षस्तदादिव्येनचक्षुषा सददर्शमुनितस्याःशरीरांतरगोचरम् १७ प्रतिबिंबमि
वादर्शेगुरुपत्न्याःशरीरगम् सतंघोरेणतपसायुक्तंदृष्ट्वापुरंदरः १८ प्रावेपतसुसंत्रस्तःशापभीतस्तदाविभो विमुच्यगुरुपत्नींतुविपु
लःसुमहातपाः १९ स्वकलेवरमाविश्यशक्रंभीतमथाब्रवीत् १९ विपुलउवाच अजितेंद्रियदुर्बुद्धेपापात्मकपुरंदर नचिरंपू
जयिष्यंतिदेवास्त्वांमानुषास्तथा २० किंनुतद्विस्मृतंशक्रनतन्मनसितेस्थितम् गौतमेनासियन्मुक्तोभगांकपरिचिन्हितः २१ जानेत्वां
बालिशमतिमकृतात्मानमीश्वरम् मयेयंरक्ष्यतेमूढगच्छपापयथागतम् २२ नाहंत्वामद्यमूढात्मन्दहेयंहिस्वतेजसा कृपायमान
स्तुनतेदग्धुमिच्छामिवासव २३ सचघोरतमोधीमान्गुरुस्त्वांपापचेतसम् दृष्ट्वात्वांनिर्दहेदद्यक्रोधदीप्तेनचक्षुषा २४ नैवंतु-
शक्रकर्त्तव्यंपुनर्मान्याश्चतेद्विजाः मागमःस्वसुतामात्योत्ययब्रह्मबलार्दितः २५ अमरोस्मीतियद्बुद्धिंसमास्थायप्रवर्त्तसे मावमं-
स्थास्तपसानसाध्यंनामकिंचन २६ भीष्मउवाच तच्छ्रुत्वावचनंशक्रोविपुलस्यमहात्मनः अकिंचिदुक्त्वाव्रीडार्त्तस्तत्रैवां-
तरधीयत २७ मुहूर्त्तयातेतस्मिंस्तुदेवशर्मामहातपाः कृत्वायज्ञंयथाकाममाजगामस्वमाश्रमम् २८ आगतेथगुरौराजन्विपुलः
प्रियकर्मकृत् रक्षितांगुरवेभार्यांन्यवेदयदनिंदिताम् २९ अभिवाद्यचशांतात्मासगुरुंगुरुवत्सलः विपुलःपर्युपातिष्ठद्यथापूर्वम
शंकितः ३० विश्रांतायततस्तस्मैसहासीनायभार्यया निवेदयामासतदाविपुलःशक्रकर्मतत् ३१ तच्छ्रुत्वासमुनिश्रेष्ठोविपुलस्य
प्रतापवान् बभूवशीलवृत्ताभ्यांतपसानियमेनच ३२ विपुलस्यगुरौवृत्तिंभक्तिमात्मनितत्प्रभुः धर्मेचस्थिरतांदृष्ट्वासाधुसाध्वित्यभा
षत ३३ प्रतिलभ्यचधर्मात्माशिष्यंधर्मपरायणम् वरेणच्छंदयामासदेवशर्मामहामतिः ३४ स्थितिंचधर्मेजग्राहसतस्माद्गुरुवत्सलः
अनुज्ञातश्चगुरुणाचचारानुत्तमंतपः ३५ तथैवदेवशर्मापिसभार्यःसमहातपाः निर्भयोबलवृत्रघ्नाच्चचारविजनेवने ३६ इतिश्रीमहा
भारतेआनु० दानधर्मेविपुलोपाख्यानेएकचत्वारिंशोऽध्यायः ४१ भीष्मउवाच विपुलस्त्वकरोत्तीव्रंतपःकृत्वागुरोर्वचः तपोयुक्तमथात्मान
ममन्यतसवीर्यवान् १

[illegible] निवेदनस्थातव्यमितिच १ ७ ७ ७

२ ३ आदीयतेऽस्मिन्वांधवैर्द्दत्तंउपायनादिकंस आदानंविवाहाद्युत्सवः प्रभूतं,बहुधनादिकंयत्र ४ ५ ६ निमंत्रकः आकारणार्थंदूतः ७ ८ ९
चोदयामासमदर्थमप्येतानिपुष्पाणिआनयेतिप्रेरितवती १० ११ १२ १३ १४ १५ १६ परिवर्त्तंतमितिपुंस्त्वंनडभावश्चार्षः १७ तत्पदे-
इतरस्यपदेवापुंव्यक्तेआकर्षणेनविवर्तयन्विषमतांनयन् १८ नेतिनेतिअन्योन्यवचनंदूषयंताविन्यर्थः अयंभावःमिथुनस्थेऽर्केशीघ्रंगच्छंतौरात्रिंअहर्द्दिवना-

सतेनकर्म्मणास्पर्द्धन्पृथिवींपृथिवीपते चचारगतभीःप्रीतोलब्धकीर्तिर्वरोनृप २ उभौलोकौजितौचापितथैवामन्यतप्रभुः कर्म्मणातेन
कौरव्यतपसाविपुलेनच ३ अथकालेव्यतिक्रान्तेकस्मिंश्चित्कुरुनंदन रुच्याभगिन्याआदानंप्रभूतधनधान्यवत् ४ एतस्मिन्नेव-
कालेतुदिव्याकाचिद्वराङ्गना बिभ्रतीपरमंरूपंजगामाथविहायसा ५ तस्याःशरीरात्पुष्पाणिपतितानिमहीतले तस्याश्रमस्याविदू-
रेदिव्यगन्धानिभारत ६ तान्यगृह्णात्ततोराजन्रुचिर्ललितलोचना तदानिमंत्रकस्तस्याअंगेभ्यःक्षिप्रमागमत् ७ तस्याहिभगिनीतात
ज्येष्ठानाम्नाप्रभावती भार्याचित्ररथस्याथबभूवांगेश्वरस्यवै ८ पिनह्यतानिपुष्पाणिकेशेषुवरवर्णिनी आमंत्रिताततोगच्छद्रुचिर-
ङ्गपतेर्गृहम् ९ पुष्पाणितानिदृष्ट्वाथतदांगेन्द्रवरांगना भगिनींचोदयामासपुष्पार्थेचारुलोचना १० साभर्त्रेसर्वमाचष्टरुचिःसुरुचि-
रानना भगिन्याभाषितंसर्वमृषिस्तच्चाभ्यनंदत ११ ततोविपुलमानाय्यदेवशर्मामहातपाः पुष्पार्थेचोदयामासगच्छगच्छेतिभारत १२
विपुलस्तुगुरोर्वाक्यमविचार्यमहातपाः सतथेत्यब्रवीद्राजंस्तंचदेशंजगामह १३ यस्मिन्देशेतुतान्यासन्पतितानिनभस्तलात् अम्ला-
नान्यपितत्रासन्कुसुमान्यपराण्यपि १४ सततस्तानिजग्राहदिव्यानिरुचिराणिच प्राप्तानिस्वेनतपसादिव्यगंधानिभारत १५ सं-
प्राप्यतानिप्रीतात्मागुरोर्वचनकारकः तदाजगामतूर्णंचचंपांचंपकमालिनीम् १६ सवनेनिर्ज्जनेतातददर्शमिथुनंनृणाम् चक्रवत्प-
रिवर्त्तंतंगृहीत्वापाणिनाकरम् १७ तत्रैकस्तूर्णमगमत्तत्पदेचविवर्त्तयन् एकस्तुनतदाराजंश्चक्रतुःकलहंततः १८ त्वंशीघ्रंगच्छ-
सीत्येकोब्रवीन्नेतितथापरः नेतिनेतिचतौराजनपरस्परमथोचतुः १९ तयोर्विस्पर्द्धतोरेवंशपथोयमभूत्तदा सहसोद्दिश्यविपुलंततो
वाक्यमथोचतुः २० आवयोरनृतंप्राहयस्तस्याभूत्द्विजस्यवै विपुलस्यपरेलोकेयागतिःसाभवेदिति २१ एतच्छ्रुत्वातुविपुलोविष-
ण्णवदनोभवत् एवंतीव्रतपाश्चाहंकष्टश्चायंपरिश्रमः २२ मिथुनस्यास्यकिंमेस्यात्कृतंपापंयथागतिः अनिष्टासर्वभूतानांकीर्त्तितानेन
मेद्यवै २३

शीघ्रंगच्छसीतिलोकद्रष्टापर्यनुयुक्तोरात्रिस्तुसमानेनैवाहंगच्छामिनशीघ्रमितिपरिहरतिएवंउभावपिसत्यवादिनौनानृतंशपथंचक्रतुरि-
ति १९ २० २१ अयंमिथुनस्यपरिश्रमः कष्टइत्यन्वयः गतिरनिष्टेतिसार्द्धः २२ २३ । ७ ७ ७ ७ ७

२४ षड्न्नरान्वा दीव्यमानान् अन्योन्यंजेतुमिच्छंतः नसंनादन्योहिवृषादीन्समराशीनभिसंधायायंमदीयोयंमदीयइतिविवदंतेतेपिमनभेदान्नानृतवादिनः मीनादिर्वसंत इतिपक्षेहिवृषोद्योष्मांतर्गतःमेषादिपक्षेवसंतांतर्गतइति २४ २५ २६ २७ २८ २९ रुच्याःगुरुभार्यायाः ३० लक्षणंस्त्रीपुंसयोरसाधारणंचिन्हं विधायएकीकृत्यपिधायेति पाठेपिसएवार्थः ३१ ३२ ३३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांद्विचत्वारिंशोऽध्यायः ४२ ६७

एवंसंचिंतयन्नेवविपुलोराजसत्तमः अवाङ्मुखोदीनमनादध्यौदुष्कृतमात्मनः २४ ततःषडन्यान्पुरुषानक्षैःकांचनराजतैः अपश्य-द्दीव्यमानान्वैलोभहर्षान्वितांस्तथा २५ कुर्वतःशपथंतेनयःकृतोमिथुनेनतु विपुलंवैसमुद्दिश्यतेपिवाक्यमथाब्रुवन् २६ लोभमास्थाययोस्माकंविषमंकर्तुमुत्सहेत् विपुलस्यपरेलोकेयागतिस्तामवाप्नुयात् २७ एतच्छ्रुत्वातुविपुलोनापश्यद्धर्मसंकरम् जन्मप्रभृतिकौ-रव्यकृतपूर्वंतथात्मनः २८ सप्रदध्यौतथाराजन्नग्नावग्निरिवाहितः दह्यमानेनमनसाशापंश्रुत्वातथाविधम् २९ तस्यचिंतयतस्तात बह्व्योदिननिशाययुः इदमासीन्मनसिचरुच्यारक्षणकारितम् ३० लक्षणंलक्षणेनैववदनंवदनेनच विधायनमयाचोक्तंसत्यमेतद्गुरो स्तथा ३१ एतदात्मनिकौरव्यदुष्कृतंविपुलस्तदा अमन्यतमहाभागतथातच्चनसंशयः ३२ सचपानगरीमेत्यपुष्पाणिगुरवेददौ अम न्यतमहाभागस्तथातच्चनसंशयः पूजयामासचगुरुंविधिवत्सगुरुप्रियः ३३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेविपुलो पाख्यानेद्विचत्वारिंशोऽध्यायः ४२ भीष्मउवाच तमागतमभिप्रेक्ष्यशिष्यंवाक्यमथाब्रवीत् देवशर्म्मामहातेजायत्तच्छृणुजना धिप १ देवशर्म्मोवाच किंतेविपुलदृष्टंवैतस्मिन्शिष्यमहावने तेत्वांजानंतिविपुलआत्माचरुचिरेवच २ विपुलउवाच ब्रह्मर्षेमिथुनंकिंतत्केचतेपुरुषाविभो येमांजानंतितत्त्वेनयन्मांत्वपरिपृच्छसि ३ देवशर्म्मोवाच यद्वैतन्मिथुनंब्रह्मन्नहोरात्रं हिविद्धितत् चक्रवत्परिवर्त्तेततत्तेजानातिदुष्कृतम् ४ येचतेपुरुषाविप्रअक्षैर्दीव्यंतिहृष्टवत् ऋतूंस्तानभिजानीहितेतेजानंतिदुष्कृ तम् ५ नमांकश्चिद्विजानीतइतिकृत्वानविश्वसेत् नरोरहसिपापात्मापापकंकर्मवैद्विज ६ कुर्वाणंहिनरंकर्म्मपापंरहसिसर्वदा प श्यंतिऋतवश्चापितथादिननिशेप्युत ७ तथैवहिभवेयुस्तेलोकाःपापकृतोयथा कृत्वानाचक्षतःकर्ममममतच्चयथाकृतम् ८ तेत्वांह र्षस्मितंदृष्ट्वागुरोःकर्मानिवेदकम् स्मारयंतस्तथाप्राहुस्तेयथाश्रुतवान्भवान् ९ अहोरात्रंविजानातिऋतवश्चापिनित्यशः पुरुषेपा पकंकर्म्मशुभंवाशुभकर्म्मिणः १० तत्त्वयाममयत्कर्मव्यभिचारात्भयात्मकम् नाख्यातमितिजानंतस्तेत्वामाहुस्तथाद्विज ११

तमागतमित्यध्यायेनपूर्वोक्तार्थविवरणपूर्वकंआख्यायिकार्थमुपसंहरति १ तेत्वया २ ३ ४ ५ ६ ७ ८ हर्षस्मितंहर्षेणगर्वितं ९ १० ११

तेनैवअनाख्यानेनैव १२ अशक्येतिच्छेदः १३ १४ १५. १६ १७ १८ १९ २० सहजैःपाणिपादैरेवादिभिः २१ २३ यःसंग
मेतिसएवप्रियोऽन्यःप्रियोनामनास्तीतियोजना २३ कृत्याःप्राणग्राहिदेवतारूपाःकार्याःकृताश्चपूर्वमेकेनकृताःस्वीकृताअपिपश्चादन्येनापिकर्तुंयोग्याःव्यभि
चारिण्यःप्राणग्राहिण्यश्चेत्यर्थः २४ खेदमास्थायअप्रीत्याविष्टिगृहीतवत्भुंजीतनतुप्रीत्याधर्मंकृतुकालानुरोधं २५ निहन्यात्वधंप्राप्नुयात्मुक्तिःअनासक्तिःयु-

तेनैवहिभवंयुस्तेलोकाःपापकृतोयथा कृत्वानाचक्षतःकर्म्मममयच्चत्वयाकृतम् १२ त्वयाशक्याचदुर्वृत्तारक्षितुंप्रमदाद्विज नचत्वंकृत
वान्किंचिदतःप्रीतोस्मितेननते १३ यदित्वहंत्वादुर्वृत्तमद्राक्षंद्विजसत्तम शपेयंत्वामहंक्रोधान्नमेत्रास्तिविचारणा १४ सज्जंतिपुरु
षेनार्य्यःपुंसांसोर्थश्चपुष्कलः अन्यथारक्षतःशापोभविष्यतिमतिश्चमे १५ रक्षिताचत्वयापुत्रममचापिनिवेदिता अहंतेप्रीतिमांस्ता
तस्वस्थःस्वर्गंगमिष्यसि १६ इत्युक्त्वाविपुलंप्रीतोदेवशर्म्मामहानृषिः मुमोदस्वर्गमास्थायसहभार्य्यःसशिष्यकः १७ इदमाख्यातवां
श्चापिमामाख्यानेमहामुनिः मार्कंडेयःपुराराजन्गंगाकूलेकथांतरे १८ तस्माद्ब्रवीमिपार्थत्वांस्त्रियोरक्ष्याःसदैवच उभयंदृश्यते
तासुसततंसाध्वसाधुच १९ स्त्रियःसाध्व्योमहाभागाःसंमतालोकमातरः धारयंतिमहींराजन्निमांसवनकाननाम् २० असाध्व्यश्चापि
दुर्वृत्ताःकुलघ्न्यःपापनिश्चयाः विज्ञेयालक्षणैर्दुष्टैःस्वगात्रसहजैर्नृप २१ एवमेतासुरक्षावैशक्याःकर्त्तुंमहात्मभिः अन्यथाराजशा
र्दूलनशक्यारक्षितुंस्त्रियः २२ एताहिमनुजव्याघ्रतीक्ष्णास्तीक्ष्णपराक्रमाः नासामस्तिप्रियोनाममैथुनेसंगमेतियः २३ एताःकृत्या
श्चकार्याश्चकृताश्चभरतर्षभ नचैकस्मिन्रमंत्येताःपुरुषेपांडुनंदन २४ नासांस्नेहोनरैःकार्य्यस्तथैवेर्ष्याजनेश्वर खेदमास्थायभुं-
जीतधर्म्ममास्थायचैवह २५ निहन्यादन्यथाकुर्वन्नरःकौरवनंदन सर्वथाराजशार्दूलमुक्तिःसर्वत्रपूज्यते २६ तेनैकेनतुरक्षावैवि
पुलेनकृतास्त्रियाः नान्यःशक्तस्त्रिलोकेस्मिन्रक्षितुंनृपयोषितम् २७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेविपुलोपाख्या
नेत्रिचत्वारिंशोऽध्यायः ४३ युधिष्ठिरउवाच यन्मूलंसर्वधर्म्माणांस्वजनस्यगृहस्यच पितृदेवातिथीनांचतन्मेब्रूहिपितामह
१ अयंहिसर्वधर्म्माणांधर्म्मश्चिंत्यतमोमतः कीदृशस्यप्रदेयास्यात्कन्येतिवसुधाधिप २ भीष्मउवाच शीलवृत्तंसमाज्ञायवि
द्यांयोनिंचकर्मचं सद्भिरेवप्रदातव्याकन्यागुणयुतेवरे ब्राह्मणानांसतामेषब्राह्मोधर्म्मोयुधिष्ठिर ३

क्तिरितिपादेसमाधिः २६ २७ इति-
आनुशासनिकेपर्वणिनैलकंठीयेभारतभावदीपेत्रिचत्वारिंशोऽध्यायः ४३ यन्मूलं १ २ योनिंमातृतःपितृतश्चशुद्धिं अत्रब्राह्मइत्यनेनार्षदैवयोरपिग्रहणंब्राह्मणयोग्या
एतेविवाहाः यदाहाश्वलायनः अलंकृत्यकन्यामुदकपूर्वांदद्यादेषब्राह्मोविवाह ऋत्विजेवितनेकर्मणिदद्यादलंकृत्यसदैवःगोमिथुनंदत्वोपयच्छेतसआर्षइति ३

नेतिप्रथममत्तरमपक्षयोर्यथेष्टं एकेनेतरबाधेपिनदोषोस्तीत्यर्थः धर्मतःपाणिग्रहणविधितःप्रयच्छंतिबांधवाइतिशेषः तस्याहरणेनात्यंतंदोषःनापिगृहीतःशु
ल्कायाइत्यर्थः २३ तत्राद्यमुपपादयतिबंधुभिरिति क्रीतायास्तुहरणेदोषाभावमग्रेवक्ष्यति २४ उभयसन्निपातेसिद्धांतमाह यस्त्विति यद्यपिज्ञाति
भिःकृतसमयोगुरुस्तथापिमंत्रपूर्वकःसमयोगुरुतरइत्यर्थः २५ अत्रागमंमानमाह देवेति देवःप्राक्कर्मईश्वरोवावेत्तिलभते २६ २७ उभयतोदोषे
शिष्टातिक्रमात् बंधुसंमतिपूर्वकविक्रयातिक्रमाच्चदोषेसतिकुर्वन् कर्त्ताश्रेयःप्रशस्तरंकिंसमाचरेदित्याध्याहृत्ययोज्यं चिंत्यतमःसंदिग्धत्वेनविचार्यतमः
२८ आचक्ष्व यतोनहितृप्यमितस्मात्कथ्यतामित्यादरसूचनार्थापुनरुक्तिः २९ नैवेति तेनक्रेत्राशुल्कमौल्यंनिष्ठाकरंस्त्रीत्वनिश्चयकरमितिज्ञात्वा
नआहृतं किंतुक्रयार्थेन क्रयमात्रेणभार्यात्वंसिध्यतीत्यर्थः नापिशुल्कपराःददतिदानंकुर्वंतिअपितुविक्रीणंतितस्मात्आहृच्छिकेस्मिन्क्रयविक्रयव्यवहा

नैकांतोदोषएकस्मिंस्तदाकेनोपपद्यते धर्मतोयांप्रयच्छंतियाँचक्रीणंतिभारत २३ बंधुभिःसमनुज्ञातेमंत्रहोमौप्रयोजयेत् तथासि
ध्यंतितेमंत्रानादत्तायाःकथंचन २४ यस्तत्रमंत्रसमयोभार्यापत्योर्मिथःकृतः तमेवाहुर्गरीयांसंयश्चासौज्ञातिभिःकृतः २५ वेदद्
त्तांपतिर्भार्यांवेत्तिधर्मस्यशासनात् सदैवींमानुषींवाचमनृतांपर्युदस्यति २६ युधिष्ठिरउवाच कन्यायांप्राप्तशुल्कायांज्यायां
श्चेदाव्रजेदूरः धर्मकामार्थसंपन्नोवाच्यमत्रानृतंनवा २७ तस्मिन्नुभयतोदोषेकुर्वन्छ्रेयःसमाचरेत् अयंनःसर्वधर्माणांधर्मश्चिं
त्यतमोमतः २८ तत्त्वंजिज्ञासमानानांचक्षुर्भवतुनोभवान् तदेतत्सर्वमाचक्ष्वनहितृप्यामिकथ्यताम् २९ भीष्मउवाच नैव
निष्ठाकरंशुल्कंज्ञात्वासीत्तेननाहृतम् नहिशुल्कपराःसंतःकन्यांददतिकर्हिचित् ३० अन्यैर्गुणैरुपेतंतुशुल्कंयाचंतिबांधवाः अलंकृत्वा
वहस्वेतियोदद्यादनुकूलतः ३१ यच्चतांचददत्येवंनशुल्कंविक्रयोनसः प्रतिगृह्यभवेद्देयमेषधर्मःसनातनः ३२ दास्यामिभवतेक-
न्यामितिपूर्वंनभाषितम् येचाहुर्येचनाहुर्येयेचावश्यंवदंत्युत ३३ तस्मादाग्रहणात्पाणेर्याचयंतिपरस्परम् कन्यावरःपुरादत्तोमरु
द्भिरितिनःश्रुतम् ३४ नानिष्टायप्रदातव्याकन्याइत्यृषिचोदितम् तन्मूलंकाममूलस्यप्रजनस्येतिमेमतिः ३५

रेकन्यापहारजोदोषोनास्ती-
त्यर्थः ३० गुणैर्वयोधिकत्वादिभिः ३१ कन्यायांअलंकारग्रहणेनदोषोस्तीत्याह सार्धेन अलंकृत्वेति ३२ नभाषितमित्येकंपदंयेपूर्वंदास्यामीत्याहुःयेच
नदास्यामीत्याहुःयेचअवश्यंदास्यामीतिवदंतितत्सर्वंनभाषितंअभाषितवदेवेत्यर्थः ३३ यस्मादेवंतस्मात्आपाणिग्रहणात्कन्यांयाचतेतिमरुतांवरस्तेनततःपू
र्वंविशिष्टवरार्थमपहारेपिनदोषइतिभावः यथोक्तं दत्तामपिहरेत्कन्यांश्रेयांश्चेद्वरआव्रजेदिति ३४ तत्कन्याकामोमूलंयस्य तस्मादुत्तमदौहित्रार्थिनाश्रेयसे
एवकन्याप्रदेयेतिभावः ३५

संवासात्चिरपरिचयात्पाणयोः क्रयविक्रययोः ३६ वीर्यमपिशुल्कंभवतीत्यभिप्रायेणाह अहमिति अंबिकांबालिकयोरेकत्वविवक्षया द्वे इत्युक्तं ३७ प्राप्तशुल्का वीर्येणनिर्जितापिकन्या अगृहीताअप्राप्तपाणिग्रहा इयंअंबाविसर्ज्या उत्स्रष्टुंयोग्या इतिपितापितृव्यः बाल्हीकः अब्रवीदित्युत्तरेणान्वयः ३८ अनुपप्रच्छअनु पृष्टवानहं शंकमान इतिवैचित्र्यात्पारोक्ष्यमभिसंधाय उत्तमपुरुषप्रयोगः बहुजगदपुरस्तादितिवत् ३९ ४० ४१ यदीति प्राप्तशुल्का येनपाठांतरेयस्याः सावाल्लाजांतरंउपासीत इतियास्मृतिस्साहिबाध्येनेत्यध्याहृत्ययोजना लाजाःविधीयंते होम्यद्रव्यमस्मिन्इतिलाजशब्दोऽर्शआद्यच्प्रत्ययांतः ४२ येषांशुल्कतोनिष्ठातेषांप्राप्यतः वाक्यंप्रमाणंस्मृतमितिधर्मविदोनहि आहुरित्यन्वयः ४३ एवंबाधकसद्भावंसाधकाभावंचोक्त्वा लोकेविरोधमप्याह अ

समीक्ष्यचबहून्दोषान्संवासाद्विद्विपाणयोः तथानिष्ठाकरंशुल्कंनजात्वासीत्तथाशृणु ३६ अहंविचित्रवीर्यस्यद्वेकन्येसमुदावहम् जि त्वाचमागधान्सर्वान्काशीनथचकोसलान् ३७ गृहीतपाणिरेकासीत्प्राप्तशुल्कापराभवत् कन्यागृहीतातत्रैवविसर्ज्या इतिमेपिता अ ब्रवीदितराकन्यामावहेतिसकौरवः ३८ अप्यन्याननुपप्रच्छशंकमानःपितुर्वचः अतीवह्यस्यधर्मेच्छापितुर्मेऽभ्यधिकाभवत् ३९ त तोहमब्रुवंराजन्नाचारेप्सुरिदंवचः आचारंतत्वतोवेत्तुमिच्छामिचपुनःपुनः ४० ततोमयैवमुक्तेतुवाक्येधर्मभृतांवरः पितामम म हाराजबाल्हीकोवाक्यमब्रवीत् ४१ यदिवःशुल्कतोनिष्ठानपाणिग्रहणात्तथा लाजांतरमुपासीतप्राप्तशुल्कामितिस्मृतम् ४२ नहिध र्मविदःप्राहुःप्रमाणंवाक्यतःस्मृतम् येषांवैशुल्कतोनिष्ठानपाणिग्रहणात्तथा ४३ प्रसिद्धंभाषितंदानेनेषांप्रत्यायनंपुनः येमन्यंतेक्रयं शुल्कंनतेधर्मविदोनराः ४४ नचैतेभ्यःप्रदातव्यानवोढव्यातथाविधा नत्येवभार्याक्रेतव्यानविक्रय्याकथंचन ४५ येचक्रीणंति दासीवविक्रीणंतितथैवच भवेत्तेषांतथानिष्ठालुब्धानांपापचेतसाम् ४६ अस्मिन्नर्थेसत्यवंतंपर्यपृच्छंतवैजनाः कन्यायाःप्राप्तशुल्का याश्शुल्कदःप्रशमंगतः ४७ पाणिगृहीतावान्यस्यादत्रनोधर्मसंशयः तन्नश्छिंधिमहाप्राज्ञत्वंहिवैप्राज्ञसंमतः ४८ तत्त्वंजिज्ञासमा- नानांचक्षुर्भवतुनोभवान् तानेवंब्रुवतःसर्वान्सत्यवान्वाक्यमब्रवीत् ४९ यत्रेष्टंतत्रदेयास्यान्नात्रकार्याविचारणा कुर्वतेजीवतो प्येवंमृतेनैवास्तिसंशयः ५०

द्वैनप्रसिद्धमितिकन्यायादानंइत्येवोच्यते नतुक्रयोजययोर्वेति एषांशुल्कवादिनांप्रत्यायकंभार्यात्वज्ञापकंकिमपिनास्ति परिणयेनादेवभार्याभवतिनंशुल्कमात्रादितिलोकव्यवहारस्यस्पष्टत्वादित्यर्थः एतदेवोपपादयतियइतिक्रयमितिजयस्याप्युपलक्षणम् ४४ ४५ ४६ ४७ ४८ ४९ जीवतइत्यनादरेषष्ठीजीवंतमपिशुल्कदंअनादृत्यशिष्टाएवंयथेष्टदानंकुर्वतइत्यर्थः ५० ५१ ५२ ५३

देवरंमिति भगानरधर्मः कलौदेवरात्सुतोत्पत्तेर्निषेधात् ५१ लिखंतीति केषांचिन्मतेदेवरादयः आऽरक्षितांभ्रातृभार्यांलिखंत्येवसुरतेनयोजयंत्येव अपरेषांम
तेशनैर्मैथुनमिदंप्रवृत्तिः ऐच्छिकीनतुवैधीत्यर्थः ५२ आम्नायस्यहृदयेनियममाहुतदिति सर्वाणिमंगलानि हरिद्रास्नानादीनिमंत्राश्चप्राक्पाणिग्रहणीयायत्रानि
ष्पन्नास्तादृशमथ्यंतरं कालव्यवधानंयत्रवर्ततेतन्त्रैवपूर्वोक्तौनियमविकल्पौप्रवर्तेते नतुपाणिग्रहणादूर्ध्वं तत्रसंकल्पपूर्वकंदत्तायाअपिकन्यायाअपहारस्तज्ज
न्योमृषावादःऽपातकोभवति दातुर्नतुतावन्मात्रेणतस्याभार्यात्वमुत्पन्नमित्यर्थः ५३ कदात्विर्हितदुत्पद्यतेतआहपाणीति यत्रतुदानादूर्ध्वंसप्तमपदात्प्राक्भर्तु
र्मरणंसगोत्रत्वादिज्ञानंवाजातंतत्राव्यवस्थेयदेमृषावादेदोषोपिनास्तीत्यर्थः ५४ देयंदानं एवंवक्ष्यमाणं तमेवाह अनुकूलामिति अनुवंशांस्ववंशानुरूपांअयं
भावः धयाऽधानपात्रमानेष्टिभ्यांसमुचिताभ्यामग्नयउत्पद्यंतेनतुलेकैकेन एवंदानपाणिग्रहाभ्यांभार्यात्वमुत्पद्यतेतत्राद्याभावेचौर्येणाहृतायाःनधर्मपत्नीत्वं प

देवरंप्रविशेत्कन्यातपेद्वापितपःपुनः तमेवानुगताभूत्वापाणिग्राहस्यकाम्यया ५१ लिखंत्येवतुकेषांचिदपरेषांशनैरपि इतियेसंव
दंत्यत्रतएतंनिश्चयंविदुः ५२ तत्पाणिग्रहणात्पूर्वमंतरंयत्रवर्तते सर्वमंगलमंत्रावैमृषावादस्तुपातकः ५३ पाणिग्रहणमंत्राणां
निष्ठास्यात्सप्तमेपदे पाणिग्राहस्यभार्यास्याद्यस्यचाद्भिःप्रदीयते ५४ इतिदेयंवदंत्यत्रतएनंनिश्चयंविदुः अनुकूलामनुवंशांभ्रा
त्रादत्तामुपाग्निकाम् ५५ परिक्रम्ययथान्यायंभार्यांविंदेद्द्विजोत्तमः ५६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेचतु
श्चत्वारिंशोऽध्यायः ४४ युधिष्ठिरउवाच कन्यायाःप्राप्तशुल्कायाःपतिश्चेन्नास्तिकश्चन तत्रकाप्रतिपत्तिःस्यात्तन्मेब्रूहिपि
तामह १ भीष्मउवाच यापुत्रकस्यऋद्धस्यप्रतिपाल्यातदाभवेत् अथचेन्नाहरेत्शुल्कंक्रीताशुल्कप्रदस्यसा २ तस्यार्थेपत्य
मीहेतयेनन्यायेनशक्नुयात् नतस्मान्मंत्रवत्कार्यंकश्चित्कुर्वीतकिंचन ३ स्वयंवृत्तेनसावित्रीपित्रावैप्रत्यपद्यत तत्तस्यान्येप्रशंसंति
धर्मज्ञानेतरेजनाः ४

रत्याभावेतुतस्याःदासीत्वान्नकर्मसंबंधइति ५५ ५६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांचतुश्चत्वारिंशोऽध्यायः ४४
कन्यायाइति शुल्कदश्चेत्प्रोषितःतद्भयादन्यश्चनवृणुतेतदातत्पित्रा किंकर्तव्यमिति प्रश्नार्थः १ याकन्यापितुःप्रतिपाल्यापितायद्रितत्शुल्कंपरपक्षीयेभ्यःप
रावृत्यनदद्यात् तर्हिसाकन्याशुल्कप्रदस्यैवज्ञेयानतुपितुस्तस्याअन्यस्मैदातुंअधिकारोस्तीत्यर्थः २ तस्यशुल्कदस्यार्थेन्यायेनउत्तमात्रेतसःक्रमेणपुत्रंईहेत स
चास्याःपुत्रस्यशुल्कदस्यचोपकारायभवति नतुतस्मात्शुल्कदादन्यःकश्चिन्मंत्रवत्कार्यंविधितस्तस्याःपाणिग्रहणंकुर्वीत ३ एवंप्राप्तशुल्कायाःकर्तव्यमुक्त्वाअप्रा
प्तशुल्कायास्तादृश्याःकागतिरित्यतआह स्वयमिति पित्राआज्ञप्तासतीस्वयंवृत्तेनैवभर्त्रायोगंप्रत्यपद्यततच्चइतरेधर्मज्ञानप्रशंसंति ४ ७ ७

तत्रहेतुः एतत्तुनापरेजातुचक्रुरिति अपरेपुनःशिष्टाचारत्वादिदमपिगरीयइत्याहुः ५ नेनरइत्यस्मिन्पक्षेशिष्टाचारंप्रमाणयति अस्मिन्निति ६ नसाद्ध्वाचरितेमार्गेसतिपितरियत्कन्यावरमन्वेषयतिइदंवचनंनस्त्रीस्वातंत्र्यमर्हतीतिशास्त्रविरुद्धं कथमत्रशास्त्रार्थोवक्तव्यः प्रश्नःसंशयोवाअसंदिग्धत्वादस्यार्थस्यनायंसंशयउत्तिष्ठतीत्यर्थः उपालभेतउपालंभंकथंकुर्यादित्यर्थः ७ धर्मस्यस्त्रीणामस्वातंत्र्यलक्षणस्यधर्मस्यप्रदानंखंडनंयत्सआसुरोधर्मःएतांपद्धतिं पूर्वेषुवृद्धेषुकर्मसुविवाहेषु ८ स्वल्पोअदृष्टसंधानरूपःसूक्ष्मःशास्त्रैकगम्यःसचसर्वांगोपसंहारमंतरेणनसिध्यति अतस्तंविनाकेवलरत्यर्थंयथाकथंचिद्दारान्नोद्वहेदित्यर्थः ९ पुंसांपुरुषैःतस्यअपुत्रस्य १० अन्योभ्रात्रादिःएतच्चासत्यांमातरिज्ञेयम् ११ मातुरिति सतिअसतिवापुत्रेमातुर्यौतकंपृथक्कृतं धनंतत्पित्रादिभिर्दत्तंविवाहकालेज्ञातस्वैयन्स्वसुरादिभिर्दत्तंभर्त्रावातवेदमितिपृथग्दत्तंकर्तनाद्यर्जितंवातत्सर्वंकुमारीभागएव नपुत्राणामि

एतत्तुनांपरेचक्रुर्नपरेजातुसाधवः साधूनांपुनराचारोगरीयान्धर्मलक्षणः ५ अस्मिन्नेवप्रकरणेसुक्रतुर्वाक्यमब्रवीत् नसाविदेहराजस्यजनकस्यमहात्मनः ६ असदाचरितेमार्गेकथंस्यादनुकीर्त्तनम् अत्रप्रश्नःसंशयोवासतामेवमुपालभेत् ७ असदेवाहिधर्मस्यप्रदानंधर्मआसुरः नानुशुश्रुमजात्वेतामिमांपूर्वेषुकर्मसु ८ भार्यापत्योर्हिसंबंधःस्त्रीपुंसोःस्वल्पएवतु रतिःसाधारणोधर्मइतिचाहसपार्थिवः ९ युधिष्ठिरउवाच अथकेनप्रमाणेनपुंसामादीयतेधनम् पुत्रवद्धिपितुस्तस्यकन्याभवितुमर्हति १० भीष्मउवाच यथैवात्मातथापुत्रःपुत्रेणदुहितासमा तस्यामात्मनितिष्ठंत्यांकथमन्योधनंहरेत् ११ मातुश्चयौतकंयत्स्यात्कुमारीभागएवसः दौहित्रएवतद्रिक्थमपुत्रस्यपितुर्हरेत् १२ ददातिहिसपिंडान्वैपितुर्मातामहस्यच पुत्रदौहित्रयोर्नेवविशेषोनास्तिधर्मतः १३ अन्यत्रजामयासार्द्धंप्रजानांपुत्रईहते दुहितान्यत्रजातेनपुत्रेणापिविशिष्यते १४ दौहित्रकेणधर्मेणनात्रपश्याम्यकारणम् विक्रीतासुहियेपुत्राभवंतिपितुरेवते १५ असूयवस्त्वधर्मिष्ठाःपरस्वादायिनःशठाः आसुरादधिसंभूताधर्माद्विषमवृत्तयः १६

त्यर्थः तद्रिक्थंधनंमातुःपितुःमातामहस्य १२ अत्रहेतुमाह ददातीति यःपिंडदःसरिक्थहारीत्यर्थः पिंडार्थेइतिपाठेपिंडःअर्थ्यतेस्मिन्तत्रश्राद्धे १३ अन्यत्रेतिपुत्रवतोधनेविभजनीये जामयाकन्ययापितामपेक्ष्येत्यर्थः तत्रकन्यापूर्वंपुत्रीकृता ततःपुत्रोपिजातः तत्रपंचधाभक्तस्यधनस्यद्वौकन्याहरतित्रीन्पुत्रःनतस्यकन्यामपेक्ष्यपुत्रःसार्द्धअशंईहते अन्यत्रजातेनऔरसादन्येनदत्तक्रीतादिनास्वयंसंस्कृतेनपुत्रेणतमपेक्ष्यऔरसीकन्याविशिष्यते अत्रापिपंचानामंशानांत्रीन्कन्याहरेद्द्वौपुत्रइत्यर्थः १४ अत्रवक्ष्यमाणस्थलेकारणंनिमित्तंतदेवस्थलमाह विक्रीतास्विति अयमर्थःविक्रीतायाःकन्यायाःपुत्रोऽनौरसेपिपुत्रेसतिनदायभागंचेतीति १५ आसुराद्विवाहात्कन्याक्रयपूर्वात् १६ ६२

अत्रआसुरंविवाहनिंदायाम् १७ १८ कालसाह्वयेकालसूत्रारव्ये १९ २० अन्येषांबलात्कन्याहरणशीलानांराक्षसानाम् २१ एतानपिनिंदति वश्या
मिति बलतोवश्यांननुस्वच्छंदतइत्यर्थः २२ अन्योपिपशुरपि २३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांपंचचत्वारिंशोऽध्यायः ४५ ६७
प्राचेतसस्यदक्षस्य ज्ञातयःकन्यापक्षीयाःस्वयंनाददतेऽर्थंचकन्यालंकारार्थमिच्छंतिसविक्रयोनभवतीत्यर्थः १ २ ३ नरोचेतनकामयेतनप्रमोदयेत्
कार्मुकंनकुर्यात् प्रजननःसंततिः ४ ५ ६ ७ स्वल्पईषदायासेनअपनेयःकोपीनोगुह्याच्छादनपटोयासां सद्योहार्याइत्यर्थः सुहृदःसौहार्दयुक्तान्

अत्रगाथायमोद्गीताःकीर्त्तयंतिपुराविदः धर्मज्ञाधर्मशास्त्रेषुनिबद्धाधर्मसेतुषु १७ योमनुष्यःस्वकंपुत्रंविक्रीयधनमिच्छति कन्यांवाजी
वितार्थाययःशुल्केनप्रयच्छति १८ सप्तावरेमहाघोरेनिरयेकालसाह्वये स्वेदंमूत्रंपुरीषंचतस्मिन्मूढःसमश्नुते १९ आर्षेगोमिथुनंशु
ल्कंकेचिदाहुर्मृषैवतत् अल्पोवाबहुवाराजन्विक्रयस्तावदेवसः २० यद्यप्याचरितःकैश्चिन्नैषधर्मःसनातनः अन्येषामपिदृश्यंतेलो-
कतःसंप्रवृत्तयः २१ वश्यांकुमारींबलतोयेतांसमुपभुंजते एतेपापस्यकर्त्तारस्तमस्यंधेचशेरते २२ अन्योप्यथनविक्रेयोमनुष्यःकिं
पुनःप्रजाः अधर्ममूलैर्हिधनैस्तैर्नधर्मोस्थिकश्चन २३ इतिश्रीमहा०आनुशासानिकेपर्वणिदानधर्मेविवाहधर्मेयमगाथानामपंचच-
त्वारिंशोऽध्यायः ४५ भीष्मउवाच प्राचेतसस्यवचनंकीर्तयंतिपुराविदः यस्याःकिंचिन्नाददतेज्ञातयोनसविक्रयः १ अर्हणं
तत्कुमारीणामानृशंस्यतमंचतत् सर्वंचप्रतिदेयंस्यात्कन्यायैतदशेषतः २ पितृभिर्भ्रातृभिश्चापिश्वशुरैरथदेवरैः पूज्याभूषयितव्या
श्चबहुकल्याणमीप्सुभिः ३ यदिवैस्त्रीनरोचेतपुमांसंनप्रमोदयेत् अप्रमोदात्पुनःपुंसःप्रजननोनप्रवर्द्धते ४ पूज्यालालयितव्याश्च
स्त्रियोनित्यंजनाधिप स्त्रियोयत्रचपूज्यंतेरमंतेतत्रदेवताः ५ अपूजिताश्चयत्रैताःसर्वास्तत्राफलाःक्रियाः तदाचैतत्कुलंनास्तियदा
शोचंतिजामयः ६ जामीशप्तानिगेहानिनिकृत्तानीवकृत्यया नैवभांतिनवर्धंतेश्रियाहीनानिपार्थिव ७ स्त्रियःपुंसांपरिददेमनुर्जि
गमिषुर्दिवम् अबलाःस्वल्पकौपीनाःसुहृदःसत्यजिष्णवः ८ ईर्ष्यवोमानकामाश्चचंडाश्चासुहृदोऽबुधाः स्त्रियस्तुमानमर्हंतिता
मानयतमानवाः ९ स्त्रीप्रत्ययोहिवैधर्मोरतिभोगाश्चकेवलाः परिचर्यानमस्कारास्तदायत्ताभवंतुवः १० उत्पादनमपत्यस्यजा
तस्यपरिपालनम् प्रीत्यर्थंलोकयात्रायाःपश्यतस्त्रीनिबंधनम् ११ संमन्यमानाश्चैताहिसर्वकार्याण्यवाप्स्यथ विदेहराजदुहिता
चात्रश्लोकमगायत १२ नास्तियज्ञक्रियाकाचिन्नश्राद्धंनोपवासकम् धर्मःस्वभर्तृशुश्रूषातयास्वर्गंजयंत्युत १३

बुध्यंतइत्यबुधाः ८ ९ स्त्रीप्रत्ययःस्त्रीहेतुकः १० ११ अत्रस्त्रीधर्मविषये १२ १३ ६७ ६७ ६७

१४ १५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांषट्चत्वारिंशोऽध्यायः ४६ सर्वेति १ २ एवमृत्विगान्मस्त्रीशुद्धिमुक्त्वाधनशब्दार्थंदायवि
भागंप्रस्तौति ३ रतिमिच्छतएवविहितानतुधर्मे. शूद्रांशयनमारोप्यब्राह्मणोयात्यधोगतिं अपत्यंजनयित्वास्यांब्राह्मण्यादेवहीयतइतिनिंदास्मरणात् ४
५ किंयत्प्रमाणं ६ ७ दृष्टंततःशास्त्रतः ८ अविहितमप्यनिषिद्धंचेत्तत्राह.शूद्रामिति कूष्मांडैर्जुहुयाद्योऽपूतइवमन्येतयथास्तेनोयथाभ्रूणहैवमेषभवति-
योऽयोनौरेतःसिंचतीतिक्षत्रियायांवैश्यायांचोत्पन्नस्यसाक्षाद्वाकतिपयपुरुषव्यवधानाद्वाब्राह्मण्यलाभोदृश्यतेइतिनतयोगर्हितयोनित्वंशूद्रायास्तुनतथात्वादयो

पितारक्षतिकौमारेभर्तारक्षतियौवने पुत्राश्चस्थाविरेभावेनस्त्रीस्वातंत्र्यमर्हति १४ श्रियएताःस्त्रियोनामसत्कार्याभूतिमिच्छता पालि
तानिगृहीताश्चश्रीःस्त्रीभवतिभारत १५ इतिश्रीमहाभा० आनुशासनिकेपर्वणिदानधर्मेविवाहधर्मोनामषट्चत्वारिंशोऽध्यायः ४६
युधिष्ठिरउवाच .सर्वशास्त्रविधानज्ञराजधर्मविदुत्तम अतीवसंशयच्छेत्ताभवान्वैप्रथितःक्षितौ १ कश्चित्तुसंशयोमेस्तितन्मेब्रूहि-
पितामह जातेस्मिन्संशयेराजन्नान्यंपृच्छेमकंचन .२ यथानरेणकर्तव्यंधर्ममार्गानुवर्तिना एतत्सर्वंमहाबाहोभवान्व्याख्यातुमर्हति ३
चतस्रोविहिताभार्याब्राह्मणस्यपितामह ब्राह्मणीक्षत्रियावैश्याशूद्राचरतिमिच्छतः ४ तत्रजातेषुपुत्रेषुसर्वासांकुरुसत्तम आनुपूर्व्येणक
स्तेषांपित्र्यंदायाद्यमर्हति ५ केनवाकिंततोहार्यंपितृवित्तात्पितामह एतदिच्छामिकथितंविभागस्तेषुयःस्मृतः ६ भीष्मउवाच
ब्राह्मणःक्षत्रियोवैश्यस्त्रयोवर्णाद्विजातयः एतेषुविहितोधर्मोब्राह्मणस्ययुधिष्ठिर. ७ वैषम्यादथवालोभात्कामाद्वापिपरंतप ब्राह्म
णस्यभवेच्छूद्रानतुदृष्टाततःस्मृता ८ शूद्रांशयनमारोप्यब्राह्मणोयात्यधोगतिम् प्रायश्चित्तीयतेचापिविधिदृष्टेनकर्मणा ९ त-
त्रजातेष्वपत्येषुद्विगुणंस्याद्युधिष्ठिर आपद्यमानमृक्थंतुसंप्रवक्ष्यामिभारत १० लक्षण्यंगोवृषोयानंयत्प्रधानतमंभवेत् ब्राह्म
ण्यास्तद्धरेत्पुत्रएकांशंवैपितुर्धनात् ११ शेषंतुदशधाकार्यंब्राह्मणस्वंयुधिष्ठिर तत्रतेनैवहर्तव्याश्चत्वारोंशाःपितुर्धनात् १२ क्ष
त्रियायास्तुयःपुत्रोब्राह्मणःसोप्यसंशयः सतुमातुर्विशेषेणत्रीनंशान्हर्तुमर्हति १३ वर्णेतृतीयेजातस्तुवैश्यायांब्राह्मणादपि द्विरंश
स्तेनहर्तव्योब्राह्मण्यस्वाद्युधिष्ठिर १४ शूद्रायांब्राह्मणाज्जातोनित्यादेयधनःस्मृतः अल्पंचापिप्रदातव्यंशूद्रापुत्रायभारत १५ द
शधाप्रविभक्तस्यधनस्यैषभवेत्क्रमः सवर्णासुतुजातानांसमान्भागान्प्रकल्पयेत् .१६

नित्यंननतस्त्यागेतःसेकेप्रायश्चित्तीभवत्येव कूष्मांडैःयद्दे-
वहेडनमितियजुर्वेदप्रसिद्धमंत्रविशेषः, अनेनैवविधिनावदनदृष्टेनकर्मणाप्रायश्चित्तमात्मनइच्छतिप्रायश्चित्तीयतेअन्यथाऽधोगतिंयातीत्यर्थः ९
द्विगुणंप्रायश्चित्तं १० एकांशंमुख्यांशं ११ तेनैवब्राह्मणीपुत्रेणैव १२ १३ १४ नित्यंसर्वथाअदेयंधनमस्यसनित्यादेयधनःअथापिअल्पंएकांशः १५ १६

अब्राह्मणंत्विति दीर्घतमसः पुत्रेषु शूद्रायांजातेषु काक्षीवदादिषु ब्राह्मण्यदर्शनादितिभावः एवं तस्य अमंत्रकाः संस्कारा अपि भवंति त्रिषुक्षत्रियादिषु ए-
तच्च दायार्थं अवध्यत्वार्थं चोक्तं विभृत् वैश्यायांशूद्रायां जातस्यमातृजातीयत्वस्यवक्ष्यमाणत्वात् १७ १८ १९ समुत्पन्नं आनृशंस्यं २० यद्यपी
ति एतेनबंधुषु अपुत्रात्स पुत्रोधिकंभागमर्हतीतिज्ञायते २१ वृथायज्ञादिप्रयोजनंविनानसाधयेत् प्रतिग्रहादिनावादायहरणेनवानलिप्सेत् २२
त्रीति सहस्रत्रयाद्बहुवित्तवतापिस्त्रियोधिकोदायोनदेयइत्यर्थः तदपिनयादतंचेन्भर्ताभोक्तुंशक्नोतिनत्वदत्तं २३ कुर्युः पुत्रा इतिशेषः पतिवित्तात्पत्याद-

अब्राह्मणंतुमन्यंतेशूद्रापुत्रमनैपुणात् त्रिषुवर्णेषुजातोहिब्राह्मणाद्ब्राह्मणोभवेत् १७ स्मृतास्त्रवर्णाश्चत्वारःपंचमोनाधिगम्यते ह
रेच्चदशमंभागंशूद्रापुत्रःपितुर्धनात् १८ तत्तुदत्तंहरेत्पित्रानादत्तंहर्तुमर्हति अवश्यंहिधनंदेयंशूद्रापुत्रायभारत १९ आनृशंस्यं-
परोधर्मइतितस्मैप्रदीयते यत्रतत्रसमुत्पन्नंगुणायैवोपपद्यते २० यद्यप्येषसपुत्रःस्यादपुत्रोयदिवाभवेत् नाधिकंदशमाद्दद्या
च्छूद्रापुत्रायभारत २१ त्रैवार्षिकाद्यदाभक्तादधिकंस्याद्द्विजस्यतु यजेततेनद्रव्येणनवृथासाधयेद्धनम् २२ त्रिसहस्रपरो-
दायःस्त्रियैदेयोधनस्यवै भर्तातच्चधनंदत्तंयथार्हंभोक्तुमर्हति २३ स्त्रीणांतुपतिदायाद्यमुपभोगफलंस्मृतम् नापहारंस्त्रि
यःकुर्युःपतिवित्तात्कथंचन २४ स्त्रियास्तुयद्भवेद्वित्तंपित्रादत्तंयुधिष्ठिर ब्राह्मण्यास्तद्धरेत्कन्यायथापुत्रस्तथाहिसा २५ सा
हिपुत्रसमाराजन्विहिताकुरुनंदन एवमेवसमुद्दिष्टोधर्मोवैभरतर्षभ एवंधर्ममनुस्मृत्यनवृथासाधयेद्धनम् २६ युधिष्ठि
रउवाच शूद्रायांब्राह्मणाज्जातोयद्यदेयधनःस्मृतः केनप्रतिविशेषेणदशमोप्यस्यदीयते २७ ब्राह्मण्यांब्राह्मणाज्जातोब्रा
ह्मणःस्यान्नसंशयः क्षत्रियायांतथैवस्याद्वैश्यायामपिचैवहि २८ कस्मात्तुविषमंभागंभजेरन्नृपसत्तम यदासर्वेत्रयोवर्णास्त्व
योक्ताब्राह्मणाइति २९ भीष्मउवाच दाराइत्युच्यतेलोकेनाम्नैकेनपरंतप प्रोक्तेनचैवनाम्नायंविशेषःसुमहान्भवेत् ३०
तिस्रःकृत्वापुरोभार्याःपश्चाद्विंदेतब्राह्मणीम् साज्येष्ठासाचपूज्यास्यात्साचभार्यागरीयसी ३१

त्वाहित्वात् २४ २५ धर्मोविभागप्रकारः वृथा अन्यायेनसाधितैर्द्रव्यैः कृत
मपियागादिनिष्फलंभवतीतिभावः २६ शूद्रायामिति तस्यप्रागुक्तंनित्यादेयधनत्वंनचानंतरोक्तदशमांशदानविधिनाविरुद्धमित्यर्थः २७ यदातिसृणामपिपुत्रा ब्राह्म
णाएवतदाकिमर्थमेषांभागवैषम्यमितिद्वितीयआक्षेपः २८ २९ आद्रियंतेत्रिवर्गार्थिभिरितिदारपदप्रवृत्तिनिमित्तंआदरः सचभोगार्थायांशूद्रायामप्यस्तिअतस्त
त्पुत्रोपिदायमर्हति यतश्चभर्तुरादरस्ताभिर्वर्णक्रमेणयथायोग्यंतारतम्यक्रमेणक्रियतइतितत्पुत्राणांभागवैषम्यंचास्तीत्यभिप्रायवानाह प्रोक्तेनवैतिनाम्नानिर्वचनमपे
क्ष्यैवायंविशेषोस्तीत्यर्थः ३० विशेषमेवाह तिस्रइति पश्चात्परिणीतापिवयसाकनिष्ठापिपितृगौरवाद्ब्राह्मणीमेवसर्वेषुलौकिकवैदिकेषुकार्येष्वाद्रियेतेत्यर्थः ३१ ६७

३२ ३३ ३४ ३५ ब्राह्मणचांडालः ब्राह्मणक्षेत्रे शूद्राज्जातः पूर्वोक्तो मातंगस्सदृक्तस्तेन कर्मणा ज्ञेय इत्यर्थः कर्मणा ज्ञायते जातिर्भोगेन ज्ञायते कृतमि
तिन्यायात् ३६ ३७ ३८ भूयोभूयोपि अधिकमधिकं संहार्यः संविभजनीयः ३९ ४० ४१ ४२ ४३ ४४ ४५ उक्तं दायवि

स्नानंप्रसाधनंभर्तुर्दन्तधावनमञ्जनम् हव्यंकव्यंचयच्चान्यद्धर्मयुक्तंगृहेभवेत् ३२ नतस्यांजातुतिष्ठंत्यामन्यात्तत्कर्तुमर्हति ब्राह्मणी
त्वेवकुर्यात्तद्ब्राह्मणस्ययुधिष्ठिर ३३ अन्नपानंचमाल्यंचवासांस्याभरणानिच ब्राह्मण्यैतानिदेयानिभर्तुःसाहिगरीयसी ३४ म
नुनाभिहितंशास्त्रंयच्चापिकुरुनंदन तत्राप्येषमहाराजदृष्टोधर्मःसनातनः ३५ अथचेदन्यथाकुर्याद्यदिकामाद्युधिष्ठिर यथाब्रा
ह्मणचांडालःपूर्वदृष्टस्तथैवसः ३६ ब्राह्मण्याःसदृशःपुत्रःक्षत्रियायाश्चयोभवेत् राजन्विशेषोयस्त्वत्रवर्णयोरुभयोरपि ३७ ननु
जात्याश्रमंलोकेब्राह्मण्याःक्षत्रियाभवेत् ब्राह्मण्याःप्रथमःपुत्रोभूयान्स्याद्राजसत्तम ३८ भूयोभूयोपिसंहार्यःपितृवित्ताद्युधिष्ठि
र यथानसदृशीजातुब्राह्मण्याःक्षत्रियाभवेत् ३९ क्षत्रियायास्तथावैश्यानजातुसदृशीभवेत् श्रीश्चराज्यंचकोशश्चक्षत्रियाणांयु
धिष्ठिर ४० विहितंदृश्यतेराजन्सागरान्ताचमेदिनी क्षत्रियोहिस्वधर्मेणश्रियंप्राप्नोतिभूयसीम् ४१ राजादण्डधरोराजन्रक्षानान्य
त्रक्षत्रियात् ब्राह्मणाहिमहाभागादेवानामपिदेवताः तेषुराजन्प्रवर्तेतपूजयाविधिपूर्वकम् ४२ प्रणीतमृषिभिर्ज्ञात्वाधर्मंशाश्वतम
व्ययम् लुप्यमानंस्वधर्मेणक्षत्रियोह्येषुरक्षति ४३ दस्युभिर्ह्रियमाणंचधनंदाराश्चसर्वशः सर्वेषामेववर्णानांत्राताभवतिपार्थिवः
४४ भूयान्स्यात्क्षत्रियापुत्रोवैश्यापुत्रान्नसंशयः भूयस्तेनापिहर्तव्यंपितृवित्तंयुधिष्ठिर ४५ युधिष्ठिरउवाच उक्तोवै वि-
धिवद्राजन्ब्राह्मणस्यपितामह इतरेषांतुवर्णानांकथंवैनियमोभवेत् ४६ भीष्मउवाच क्षत्रियस्यापिभार्येद्वेविहितेकुरु
नंदन तृतीयाचभवेच्छूद्रानतुदृष्टांततःस्मृता ४७ एषएवक्रमोहिस्यात्क्षत्रियाणांयुधिष्ठिर अष्टधातुभवेत्कार्यंक्षत्रियस्वंजनाधिप
४८ क्षत्रियायाहरेत्पुत्रश्चतुरोंशान्पितुर्धनात् युद्धावहारिकंयच्चपितुःस्यात्सहरेत्तुतत् ४९ वैश्यापुत्रस्तुभागांस्त्रीनच्छूद्रापुत्रस्त-
थाष्टमम् सोपिदत्तंहरेत्पित्रानादत्तंहर्तुमर्हति ५० एकैवहिभवेद्भार्यावैश्यस्यकुरुनंदन द्वितीयातुभवेच्छूद्रानतुदृष्टांततःस्मृ-
ता ५१ वैश्यस्यवर्तमानस्यवैश्यायांभरतर्षभ शूद्रायांचापिकौन्तेयतयोर्विनियमःस्मृतः ५२

भागादिनियमोदायविभागे अत्रापिक्षत्रियस्य
बोढावैश्यस्त्वन्येधनंचधनविभक्तेकैकांशहीनाइतरभागउक्तविशेषोस्तीतिप्रष्टुरभिप्रायः ४६ ४७ क्षत्रियाणांक्षत्रियस्त्रीणांमेषएवक्रमोभर्तुःस्नाना-
दिप्रदानेतस्यांसवर्णायांसत्यांहीनवर्णातन्नकुर्यादित्यर्थः ४८ युद्धेलब्धंयत्तेलद्रव्यगजाश्वायुधकवचादिकंयुद्धावहारिकम् ४९ ५० ५१ ५२ ५३

५३ ५४ शूद्रस्यअदेयधनत्वेहेतुःत्रिभिर्वर्णैर्जातइति ५५ ५६ ५७ ५८ ५९ ६० ६१ इतिश्रीमहाभारतेआनुशासनिकेपर्वणि
टीकायांसप्तचत्वारिंशोऽध्यायः ४७. एवमनुलोमजातिजानांपुत्राणांतारतम्यमुक्त्वाप्रतिलोमजातिजानामपितदाहाध्यायेन अर्थादिति लोभात्कामाद्वा
उत्तमवर्णास्त्रीहीनवर्णानुगाभवतीतिप्रसिद्धं तेनगूढोत्पत्तिसंभवात्वर्णानांनिश्चयोनजायते ननुकर्मणाज्ञायतेजातिरित्यभियुक्तैरुच्यतेएव नानिषेकका-
लेदुर्मुहूर्तदुष्टभावस्मरणादिनापिनिमित्तेनअसतउत्पत्तिसंभवात् प्रच्छन्नप्रतिलोमजेष्वपिक्वचित्सदाचारदर्शनेन वर्णानामज्ञानाच्चावश्यंवर्णसंकरोभवत्ये
वेत्यर्थः १ एतेनउक्तेनविधिनाप्रकारेण २ तत्रप्रथमंचत्वारएववर्णाःयज्ञार्थसृष्टास्तत्रशूद्राणांसेवाद्वारायज्ञार्थत्वंनतुसाक्षात् तस्माच्छूद्रोयज्ञेऽनव-

पंचधातुभवेत्कार्यंवैश्यस्वंभरतर्षभ तयोरपत्येवक्ष्यामिविभागंचजनाधिप ५३ वैश्यापुत्रेणहर्तव्याश्चत्वारोंशाःपितुर्धनात् पंचमस्तु
स्मृतोभागःशूद्रापुत्रायभारत ५४ सोपिदत्तंहरेत्पित्रानादत्तंहर्तुमर्हति त्रिभिर्वर्णैःसदाजातःशूद्रोदेयधनोभवेत् ५५ शूद्रस्यस्यात्स
वर्णैवभार्यानान्याकथंचन समभागाश्चपुत्राःस्युर्यदिपुत्रशतंभवेत् ५६ जातानांसमवर्णायाःपुत्राणामविशेषतः सर्वेषामेववर्णा
नांसमभागोभवेत्स्मृतः ५७ ज्येष्ठस्यभागोज्येष्ठःस्यादेकांशोयःप्रधानतः एषदायविधिःपार्थपूर्वमुक्तःस्वयंभुवा ५८ समवर्णा
सुजातानांविशेषोस्त्यपरोनृप विवाहवैशिष्ट्यकृतःपूर्वःपूर्वोविशिष्यते ५९ हरेज्ज्येष्ठःप्रधानांशमेकंतुल्यासुतेष्वपि मध्यमोमध्य
मंचैवकनीयांस्तुकनीयसम् ६० एवंजातिषुसर्वासुसवर्णःश्रेष्ठतांगतः महर्षिरपिचैतद्वैमारीचःकाश्यपोब्रवीत् ६१ इतिश्री
महाभारतेआनुशा० दानधर्मेविवाहधर्मेरिक्थविभागोनामसप्तचत्वारिंशोऽध्यायः ४७ युधिष्ठिरउवाच अर्थाल्लोभाद्वाका
माद्वावर्णानांचाप्यनिश्चयात् अज्ञानाद्वापिवर्णानांजायतेवर्णसंकरः १ तेषामेतेनविधिनाजातानांवर्णसंकरे कोधर्मःकानि
कर्माणितन्मेब्रूहिपितामह २ भीष्मउवाच चातुर्वर्ण्यस्यकर्माणिचातुर्वर्ण्यंचकेवलम् असृजत्सहियज्ञार्थेपूर्वमेवप्रजा
पतिः ३ भार्याश्चतस्रोविप्रस्यद्वयोरात्माप्रजायते आनुपूर्व्यात्द्वयोर्हीनौमातृजात्यौप्रसूयतः ४ परंशवाद्ब्राह्मणस्यैवपुत्रःशूद्रा
पुत्रंपारशवंतमाहुः शुश्रूषकःस्वस्यकुलस्यसःस्यात्स्वंचारित्रंनित्यमथोनजह्यात् ५

क्लृप्तइतिश्रुतेः ३ आत्माब्राह्मणःएवंक्षत्रियायामपिजायतइत्यर्थः सचकिंचिन्नीचः यदाहमनुःस्त्रीष्वनंत
रजातासुद्विजैरुत्पादितान्सुतान् सदृशानेवतानाहुर्मातृदोषविगर्हितानिति मातृजात्यौवैश्यायांवैश्योऽम्बष्ठोनामशूद्रायांशूद्रोनिषादोनामपारशवाख्योभव-
ति मनुःब्राह्मणाद्वैश्यकन्यायामम्बष्ठोनामजायते निषादःशूद्रकन्यायांयःपारशवउच्यतइति ४ एतच्चाचष्टेपरमितिशवात् शवात्परंपद्युवाकवाएतत्स्मा

शानं यच्छूद्र इति श्रुतेः शवस्थानतुल्यात् शूद्रात्परं उत्कृष्टं पद्यायुतं पद्युपादयुक्तं जंगमं श्मशानं शूद्र इत्यर्थः ५ तत्र उपकरणं वयसाऽन्येष्वेवोपि पारशवो द्विज-
स्य त्रिवर्णजस्य कनीयानेवेति संबंधः ६ वैश्यायामपि क्षत्रियात्क्षत्रिय एव भवतीत्याह द्वयोरिति उग्राः शूद्रविशेषाः ७ वैश्यात् शूद्रायामपि वैश्य एव भ-
वतीत्याह द्वे इति ८ अतः स्वपितुरविशिष्टेनाधिकः सन्नधमः शूद्रो गुरूणां ब्राह्मणादीनां दारप्रधर्षकश्चेत् बाह्यं चंडालादि ९ विप्रायामिति सूतः सार-
थिः जातितः कर्मतश्च सूतानामश्वसारथ्यमित्युक्तेः स्तोमक्रियः स्तोत्रकरणं च राजादीनां यथोक्तं सूताः पौराणिकाः मता इति मौद्गल्यः स्त्रीकार्यं अंतःपुररक्षणा-
दि तत्कारित्वं वैदेहिकानां स्त्रीकार्यमित्युक्तेः अपवर्जितं संस्कारानर्हं १० वध्यानां चोरादीनां शिरश्छेदादिकार्यकारिणं वध्यघ्नं ११ बंदीति मागधानां

सर्वानुपायानथ संप्रधार्य समुद्धरेत्स्वस्य कुलस्य तंत्रम् ज्येष्ठो यवीयानपि यो द्विजस्य शुश्रूषया दानपरायणः स्यात् ६ तिस्रः क्षत्रि-
यसंबंधात् द्वयोरात्मास्य जायते हीनवर्णास्तृतीयायां शूद्रा उग्रा इति स्मृतिः ७ द्वे चापि भार्ये वैश्यस्य द्वयोरात्मास्य जायते शूद्रा-
शूद्रस्य चाप्येकस्याः शूद्रमेव प्रजायते ८ अतो विशिष्टस्त्वधमो गुरुदारप्रधर्षकः बाह्यं वर्णं जनयति चातुर्वर्ण्यविगर्हितम् ९ वि-
प्रायां क्षत्रियो बाह्यं सूतं स्तोमक्रियापरम् वैश्यो वैदेहकं चापि मौद्गल्यमपवर्जितम् १० शूद्रश्चांडालमत्युग्रं वध्यघ्नं बाह्यवासिन-
म् ब्राह्मण्यां संप्रजायंत इत्येते कुलपांसनाः एते मतिमतां श्रेष्ठ वर्णसंकरजाः प्रभो ११ बंदी तु जायते वैश्यात् मागधो वाक्यजीवनः शू-
द्रान्निषादो मत्स्यघ्नः क्षत्रियायां व्यतिक्रमात् १२ शूद्रादायोगवश्चापि वैश्यायां ग्रामधर्मिणः ब्राह्मणैरप्रतिग्राह्यस्तक्षा स्ववधनजीव-
नः १३ एतेऽपि सदृशान्वर्णान्जनयंति स्वयोनिषु मातृजात्यां प्रसूयंते प्रवरा हीनयोनिषु १४ यथा चतुर्षु वर्णेषु द्वयोरात्मास्य जा-
यते आनंतर्यात्प्रजायंते तथा बाह्याः प्रधानतः १५ ते चापि सदृशं वर्णं जनयंति स्वयोनिषु परस्परस्य दारेषु जनयंति विगर्हितान् १६

वणिक्पथ इति मनुः वाक्यं प्रस्तावसदृशी उक्तिः निषादस्तु मत्स्यघ्नानाम् यदाह मनुः शूद्रादायोगवः क्षत्ता चंडालश्चाधमो नृणां वैश्यराजन्यविप्रासु जायंते वर्णसंकरा इ-
ति अस्य वृत्तिं मनुरन्यामाह क्षत्रुग्रपुल्कसानां तु बिलौकोवधबंधनमिति अत्र मनुना निषादो नुलोमजेषूक्तः तात्र प्रतिलोमजेषूक्तः व्यासेन तु विपरीतमुक्तं विदुरे
क्षत्तृशब्दं तत्र तत्र प्रयुंजानेन अत एव शूद्रायां निषादो जातः पारशवोपि वा क्षत्रियान्मागधं वैश्यात् शूद्रात्क्षत्तारमेव चेति याज्ञवल्क्यः उभयत्र क्षत्तृशब्दं पठन् अनयो-
र्निषादलक्षणतुल्यत्वं सूचयति तेनेन विप्रात् शूद्रायां क्षत्रात् शूद्रात् क्षत्रियायां निषाद इत्यपि साधु १२ ग्राम्यधर्मिणः ग्राम्यधर्मो मैथुनं तद्वंतः तक्षा वर्धकिः १३ एतेन
अंबष्ठपारशवोग्राः सूतवैदेहकचंडालाः मागधनिषादायोगवाः नव तेषां स्वयोनौ अनंतरयोनौ च स्वात्मैव जायते पूर्ववत् अव्यवहितनीचयोनौ तु मातृजातीया इति श्लोकद्वया-
र्थः १४ १५ ते चापि संकरजा अपि विगर्हितान् अधमादुत्तमायां उत्तमादधमायां वा सूतादयो वैदेहादिवत् विगर्हितानेव जनयंतीत्यर्थः १६

१७ १८ पंचदशव्रात्याउक्तास्तान्व्याचष्टे व्रात्यानामित्यादिना मागधेषुसैरंध्यामित्यनेनान्वयः सैरंध्रकमव्याचष्टे प्रसाधनेति प्रसाधनंराजादीनां
पुंसांअलंकरणंपुरुषैः सैरंध्रैः राजस्त्रीणांचसैरंध्रीभिःउपचारः तेषांदिव्यांगरागादर्पणेनस्तवादिनाचसंतोषणंनदभिज्ञंअदासमितिसामान्येनपुंसकं १९ अतःअ
त्रमागधविशेषैःसैरंध्रयोनौआयोगवं आयोगवस्यापत्यंसैरंध्रंनामसूतेऽर्थादायोगवसैरंध्रंवागुरावृत्तीतिमनुःतस्यामेवमाध्व्यंमैरेयकंनामतःमाधुकंमद्यकरंकर्म
तश्चपुत्रंवैदेहःसूते २० मद्गुरंमधुमन्मीनविशेषात्रातिआदत्तेतंमद्गुरंदासंनामतःमृतपंचप्रदेशानाधिकारिणं २१ एतेमागध्यांआयोगवादिभ्यश्चतुर्भ्यःक्र
माज्जायंतेइत्युपसंहरति चतुरइति एतेचत्वारोवागुरादिनाजीवंतीतिमायोपजीविनः अन्येपिचत्वारोमागध्यांविश्रुताः सजातीयाउत्पद्यंतेतेषांनामानिमांसमित्या

यथाशूद्रोपिब्राह्मण्यांजंतुंबाह्यंप्रसूयते एवंबाह्यतराद्बाह्यश्चातुर्वर्ण्यात्प्रजायते १७ प्रतिलोमंतुवर्तंतेबाह्याद्बाह्यतरान्पुनः हीना
हीनाःप्रसूयंतेवर्णाःपंचदशैवतु १८ अगम्यागमनाच्चैवजायतेवर्णसंकरः बाह्यानामनुजायंतेसैरंध्र्यांमागधेषुच प्रसाधनोपचा
रज्ञमदासंदासजीविनम् १९ अतश्चायोगवःसूतेवागुराबंधजीवनम् मैरेयकंचवैदेहःसंप्रसूतेथमाधुकम् २० निषादोमद्गुरंसू
तेदासंनावोपजीविनम् मृतपंचापिचांडालःश्वपाकमितिविश्रुतम् २१ चतुरोमागधीसूतेक्रूरान्मायोपजीविनः मांसंस्वादुकरंक्षौद्रं
सौगंधमितिविश्रुतम् २२ वैदेहकाच्चपापिष्ठंक्रूरंमायोपजीविनम् निषादान्मद्रनाभंचखरयानप्रयायिनम् २३ चांडालात्पुल्क
सश्चापिखराश्वगजभोजिनम् मृतचैलप्रतिच्छन्नंभिन्नभाजनभोजिनं २४ आयोगवीषुजायंतेहीनवर्णास्तुतेत्रयः क्षुद्रोवैदेह
कादंध्रोबहिर्ग्रामप्रतिश्रयः २५ कारावरोनिषाद्यांतुचर्मकारान्प्रसूयते चांडालात्पांडुसोपाकस्त्वक्सारव्यवहारवान् २६ आ-
हिंडकोनिषादेनवैदेह्यांसंप्रसूयते चंडालेनतुसोपाकोचंडालसमवृत्तिमान् २७ निषादीचापिचांडालात्पुत्रमंतेवसायिनम् स्मशा
नगोचरंसूतेबाह्यैरपिबहिष्कृतम् २८

दि मांसंमांसविक्रेतारंस्वादुकरंमांसस्यसंस्कारकंक्षौद्रंसूदंमृद्रमितिपाठेत्रयोपिशाकाद्यन्नपाककराः सौगंधंउक्तलक्षणंसैरंध्रं एकस्यैवमागधस्यैत
द्वृत्तिचतुष्टयमुक्तमितिज्ञेयम् २२ आयोगव्यांवैदेहकादिभ्योजातांस्त्रीन्भेदानाह सार्द्धद्वयेन वैदेहकादिति २३ २४ क्षुद्रइतिनिषाद्यांवैदेहकअ
न्त्यस्तुद्रोमेदः अंध्रश्चआरण्यपशुहिंसकोकारावरारव्यश्चर्मकारइतित्रयोभवंतीत्यर्थः २५ चंडालात्निषाद्यामेव त्वक्सारोवेणुः २६ आहिंडकइतिस्पष्टार्थौश्लोकौ २७

इतीति अत्रमागध्यांअयोगववैदेहकनिषादचंडालेभ्यश्चत्वारस्तेनैरवायोगव्यांस्वीयवर्जितैस्त्रयः निषाद्यांचंडालवैदेहाभ्यांद्वौवैदेह्यांचंडालनिषादाभ्यांद्वौ
निषाद्यांचंडालश्चैकइतिद्वादशभेदाउक्ताः शूद्राज्जातोनिषाद्यांतुसवैकुक्कुटकःस्मृतः वैदेहकेनत्वंबष्ठ्यामुत्पन्नोवेनउच्यतइतिद्वौ द्विजातयःसवर्णासुजन
यंत्यव्रतांस्तुयान् तान्सावित्रीपरिभ्रष्टान्व्रात्यानित्यभिनिर्दिशेदितिव्रात्यजातीयएकइत्येवंमनूक्तैः त्रिभिःसहपंचदशसंकरजाताः व्रात्यस्यापिधर्मसा
कर्यादितेष्वेवगणना प्रच्छन्नाअज्ञानयोनयोपिपूर्वोक्तैःकर्मभिस्तेसंकरयोनयइतिवेदितव्याः २९ चातुर्वर्ण्यस्यैवधर्माःशास्त्रेविहिताः इतरेषांतुजातिभेद
नांधर्मनियमइयत्ताचनास्ति तथाहिचतुर्भ्योवर्णेभ्यःषडनुलोमजाः षड्विलोमजाश्चेति द्वादश तेभ्योपिषट्षष्टिरनुलोमजाःषट्षष्टिर्विलोमजाइतिद्वात्रिं
शदधिकंशतंतेभ्यएवंप्रातिलोम्यानुलोम्यगणनायांतेभ्यस्तेभ्यश्चैवमनंताःभेदाभवंति तेचसर्वेपंचदशस्वेवांतर्भवंतीतितावत्परिगणनंकृतमित्यर्थः ३०

इत्येतेसंकरेजाताःपितृमातृव्यतिक्रमात् प्रच्छन्नावाप्रकाशावावेदितव्याःस्वकर्मभिः २९ चतुर्णामेववर्णानांधर्मोनान्यस्यविद्यते
वर्णानांधर्महीनेषुसंख्यानास्तीहकस्यचित् ३० यदृच्छयोपसंपन्नैर्यज्ञसाधुबहिष्कृतैः बाह्याबाह्यैस्तुजायंतेयथावृत्तियथाश्रयम् ३१
चतुष्पथश्मशानानिशैलांश्चान्यान्वनस्पतीन् कार्ष्णायसमलंकारंपरिगृह्यचनित्यशः ३२ वसेयुरेतेविज्ञातावर्तयंतःस्वकर्मभिः
युंजंतोवाप्यलंकारांस्तथोपकरणानिच ३३ गोब्राह्मणायसाहाय्यंकुर्वाणावैनसंशयः आनृशंस्यमनुक्रोशःसत्यवाक्यंतथाक्षमा ३४
स्वशरीरैरपित्राणंबाह्यानांसिद्धिकारणम् भवंतिमनुजव्याघ्रतत्रमेनास्तिसंशयः ३५ यथोपदेशंपरिकीर्तितासुनरःप्रजायेतवि.
चार्यबुद्धिमान् नहीनयोनिर्हिसुतोऽवसादयेत्तितीर्षमाणोहियथोपलोजले ३६ अविद्वांसमलंलोकेविद्वांसमपिवापुनः नयंति-
ह्युत्पथंनार्यःकामक्रोधवशानुगम् ३७ स्वभावश्चैवनारीणांनराणामिहदूषणम् अत्यर्थंनप्रसज्जंतेप्रमदासुविपश्चितः ३८
युधिष्ठिरउवाच वर्णापेतमविज्ञायनरंकलुषयोनिजम् आर्यरूपमिवानार्यंकथंविद्यामहेवयम् ३९ भीष्मउवाच यो
निसंकलुषेजातंनानाभावसमन्वितम् कर्मभिःसज्जनाचीर्णैर्विज्ञेयायोनिशुद्धता ४०

यदृच्छयाजात्यनियमेनउपसंपन्नैर्मिथुनीभावंगतैर्यज्ञेभ्यः
साधुभ्यश्चबहिष्कृतैः यथावृत्तियथाश्रयंजीविकाजातिविशेषंचयदृच्छयातत्कर्मणाप्राप्नुयादित्यर्थः ३१ ३२ ३३ तेषांसाधारणान्धर्मानाहगोविंदेति
३४ ३५ यथेति निहीनासुरेतःसेकंनकुर्यादितिभावः ३६ तदर्थमेकत्वोरभ्यइवस्त्रीभ्यआत्मानंरक्षेदित्याहद्वाभ्यां अविद्वांसमिति ३७ ३८ कलुषयोनि
जंसंकरयोनिजं आर्यगृहेजातत्वादार्यरूपमिवआसमानमपिउत्पत्तितोअनार्यं ३९ नानाभावैःआर्येभ्यःपृथग्भूताभिश्चेष्टाभिःसमन्वितंनरंसंकरयोनिजंजानीयात्
४०

अनार्यत्वादिष्वेकैकमपिकलुषयोनित्वव्यंजकंकिमुतद्वित्रीणिसर्वाणिचेतिभावः ४१ प्रकृतिंयोनिंनियच्छतिगूहितुंशक्नोतीत्यर्थः ४२ व्याघ्रइत्युपलक्षणं
बीजादेरपि तथाहितिर्यक्स्थावरादिकंबीजगुणंनत्यजत्येवंमनुष्येपीत्यर्थः ४३ संच्छन्नेसुगुप्तेपियस्यजन्मनीतिशेषः सःतच्छीलंसंकरकर्तुःस्वभावं ४४
स्वस्यशीलंस्वभावोनिश्चयेकार्यस्यनिष्ठायांसुवर्णंशोभनवर्णंअन्यवर्णंवापुरुषंशास्तिकथयतिसुवर्णोबहिःक्रूरोपिकार्यकालेऽदारुणोभवतीतिभावः ४५ सु
श्लिष्टंशोभनंवृत्तेननविरज्यतेउपचितंवृत्तंविहायनान्यथाभातीत्यर्थः ४६ तस्यसंकरजस्यशरीरंत्वेनशास्त्रीयबुध्यानपरिकृष्यतेननीचमार्गादपकृष्यतेबीजगु-
णस्यप्राबल्यात् सत्त्वस्यकालभेदेनज्येष्ठत्वादिभावेपियत्तुल्यसत्वंशरीरारंभकंयत्सत्वंज्येष्ठाद्य न्यतमंतदेवप्रमोदतेअन्यत्तुउत्पन्नमपिसत्वंशारदिकाभ्र
वल्लीयतइतिभावः ४७ ४८ ४९ ५० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांअष्टचत्वारिंशोऽध्यायः ४८ ब्रूहीतिपूर्वेक्तलिंकृक्षः-

अनार्यत्वमनाचार्यःक्रूरत्वंनिष्क्रियात्मता पुरुषंव्यंजयंतीहलोकेकलुषयोनिजम् ४१ पित्र्यंवाभजतेशीलंमातृजंवातथोभयम् न
कथंचनसंकीर्णःप्रकृतिंस्वांनियच्छति ४२ यथैवसदृशोरूपेमातापित्रोर्हिजायते व्याघ्रश्चित्रैस्तथायोनिंपुरुषःस्वांनियच्छति ४३
कुलेस्त्रोतसिसंच्छन्नेयस्यस्याद्योनिसंकरः संश्रयत्येवतच्छीलंनरोल्पमथवाबहु ४४ आर्यरूपसमाचारंचरंतंकृतकेपथि सुवर्ण
मन्यवर्णंवास्वशीलंशास्तिनिश्चये ४५ नानावृत्तेषुभूतेषुनानाकर्मरतेषुच जन्मवृत्तसमंलोकेसुश्लिष्टंनविरज्यते ४६ शरीर-
मिहसत्वेननतस्यपरिकृष्यते ज्येष्ठमध्यावरंसत्वंतुल्यसत्वंप्रमोदते ४७ ज्यायांसमपिशीलेनविहीनंनैवपूजयेत् अपिशूद्रंचधर्म
ज्ञंसद्वृत्तमभिपूजयेत् ४८ आत्मानमाख्यातिहिकर्मभिर्नरःसुशीलचारित्रकुलैःशुभाशुभैः प्रनष्टमप्यात्मकुलंतथानरःपुनःप्रका
शंकुरुतेस्वकर्मतः ४९ योनिष्वेतासुसर्वासुसंकीर्णास्वितरासुच अत्रात्मानंनजनयेद्बुधस्तांपरिवर्जयेत् ५० इतिश्रीमहा०आ
नुशासनिकेपर्वणिदानधर्मेविवाहधर्मेसंकरोनामअष्टचत्वारिंशोऽध्यायः ४८ युधिष्ठिरउवाच ब्रूहितातकुरुश्रेष्ठवर्णा-
नांत्वंपृथक्पृथक् कीदृश्यांकीदृशाश्चापिपुत्राःकस्यचकेचते १

द्विज्ञानार्थंअनार्यत्वमनाचारःक्रूरत्वंनिष्क्रियात्मतेतिसंकरजस्यलक्षणान्युक्तानि
इदानींयन्मेयातापमादायदव्रचारानजुव्रतं तन्मेरेतःपितावृङ्क्तामितिमंत्रलिंगात् मातापमादात्कामकाराद्वायदननुव्रतंप्रतिकूलंपरस्परेतसोधारणंचचारतद्भवतीतद्रेतः
मेममपितावृङ्क्तांस्वीयकरोतुपालनसंस्कारादिकर्तृत्वात्यथाऽत्पततःपक्षिणोमुखात्पतितंबीजंपरक्षेत्रेअधिरूढंक्षेत्रपतेरेवनतुबीजपतेस्तद्वत्पः अप्रमत्तारक्षत
तंतुमेतंमात्रः क्षेत्रेपरबीजानिवाप्सुःजनयितुःपुत्रोभवतिसांपरायेमोघंवेत्ताकुरुतेतंतुमेतमितिद्विविधशास्त्रश्रवणात् क्षेत्रजःपुत्रःसंस्कार्योनवेतिसंदिहानःपृच्छति १

विप्रवादाः विविधाः प्रवादाः पूर्वोक्ता एव २ अत्रोत्तरमाह आत्मेति अनंतरजः औरसः निरुक्तजः स्वक्षेत्रे अन्योरेतःसेकार्थमुक्तः तज्जः प्रसृतः अनियुक्तोपि यो लौल्यात्परक्षेत्रे रेतः सिंचति तज्जः प्रसृतजः ३ तथा पतितान्स्वभार्यायामेव जातः दत्तः पंचमः कृतः क्रीतः स्वयमुपाय गम्यो वा षष्ठः अध्यूढः यस्य माता गर्भवत्येव ऊढा तादृशः सप्तमः ४ षडपध्वंसजा वक्ष्यमाणाः कानीनः कन्यायां विवाहात्प्राक् उत्पन्नः चतुर्दश अपसदाः वक्ष्यमाणाः षट् एते विंशतिः तान्सर्वान् पुत्रानिति विजानीहि ५ परवर्णासु अनुलोमजाः षट् अपध्वंसजाः अपसदाः ६ ७ अपसदाः षडिति ज्ञेयं ८ ९ १० मिथ्याकर्तुं एते पुत्राः न भवंतीति कर्तुं न शक्यंत इत्यर्थः अयं भावः अप्रमत्तेति श्रुतिरनौरसस्याशास्त्यमात्र परायन्मे मातेति श्रुतेस्तु अनौरसस्यापि पुत्रत्वमस्तीत्येव परेति न कश्चिद्विरोधः तथाच

विप्रवादाः सुबहवः श्रूयंते पुत्रकारिताः अत्र नो मुह्यतां राजन्संशयं छेत्तुमर्हसि १ भीष्म उवाच आत्मा पुत्रश्च विज्ञेयस्तस्यानंतरजश्च यः निरुक्तजश्च विज्ञेयः सुतः प्रसृतजस्तथा २ पतितस्य तु भार्यायां भर्त्रा सुसमवेतया तथा दत्तकृतौ पुत्रावध्यूढश्च तथापरः ३ षडपध्वंसजाश्चापि कानीनापसदास्तथा इत्येते वै समाख्यातास्तान्विजानीहि भारत ४ युधिष्ठिर उवाच षडपध्वंसजाः के स्युः के वाप्यपसदास्तथा एतत्सर्वं यथातत्त्वं व्याख्यातुं मे त्वमर्हसि ५ भीष्म उवाच त्रिषु वर्णेषु ये पुत्रा ब्राह्मणस्य युधिष्ठिर वर्णयोश्च द्वयोः स्यातां यौ राजन्यस्य भारत ६ एको द्विवर्ण एवाथ तथात्रैवोपलक्षितः षडपध्वंसजास्ते हि तथैवापसदान्शृणु ७ चांडालो व्रात्यवैद्यौ च ब्राह्मण्यां क्षत्रियासु च वैश्यायां चैव शूद्रस्य लक्ष्यंतेपसदास्त्रयः ८ मागधो वामकश्चैव द्वौ वैश्यस्योपलक्षितौ ब्राह्मण्यां क्षत्रियायां च क्षत्रियस्यैक एव तु ९ ब्राह्मण्यां लक्ष्यते सूत इत्येतेपसदाः स्मृताः पुत्रा ह्येते न शक्यंते मिथ्या कर्तुं नराधिप १० युधिष्ठिर उवाच क्षेत्रजं केचिदेवाहुः सुतं केचित्तु शुक्रजम् तुल्यावेतौ सुतौ कस्य तन्मे ब्रूहि पितामह ११ भीष्म उवाच रेतजो वा भवेत्पुत्रस्त्यक्तो वा क्षेत्रजो भवेत् अध्यूढः समयं भित्त्वेत्येतदेव निबोध मे १२ युधिष्ठिर उवाच रेतजं विद्म वै पुत्रं क्षेत्रजस्यागमः कथम् अध्यूढं विद्म वै पुत्रं भित्त्वा तु समयं कथम् १३ भीष्म उवाच आत्मजं पुत्रमुत्पाद्य यस्त्यजेत्कारणांतरे न तत्र कारणं रेतः स क्षेत्रस्वामिनो भवेत् १४

च अनौरस औरसो वा सुशीलः श्राद्धपरः पितॄणां स्वर्गाय भवति विपरीतस्तु नरकायेति ११ कस्य द्वयोः पित्रोः क्षेत्रपतिनिषेक्त्रोर्मध्ये कस्यायं पुत्रः उभयोः पितृत्वाविशेषादित्यर्थः १२ रेतजः औरस पुत्र एव क्षेत्रजोपि बीजादेः त्यक्तश्चेत् स्वीय एव भवति एवमध्यूढोपि रेतःपतिना त्यक्तश्चेद्वोढुरेव अदत्तो तु वोढुरपि रेतःप्रदस्यैवेत्यर्थः १३ एतदेव प्रश्नोत्तराभ्यां व्याचष्टे रेतजमिति आगमः पुत्रत्वप्रापकं शास्त्रं कथं कीदृशं समयभेदश्च कथमित्यर्थः १४ कारणांतरे लोकापवादादिभये सति १५ ७ ७ ७ ७ ७

आगममुक्त्वा समयभेदमाह पुत्रेति यां गर्भवतीं कन्यां वृणीते तत्र स पुत्रः वोढुरेव क्षेत्रजः नतु स सेक्तुरात्मजः १६ अन्यत्रेति त्र्यल् अनर्थकः परक्षेत्रे जातः पुत्रोऽमुकसदृशोऽमुकसदृशोऽयमिति तदीयत्वेन लक्ष्यते हेतुं गूढहेतुं दृष्टांतं प्रत्यक्षमेवोपगतो ज्ञातः दृश्यते चापि सारूप्यमिति स्मृतेः एवं चाध्यूढः वोढुः पुत्रकाम्याभावे रेतःपतेरेव भवतीत्युक्तम् १७ १८ शुक्रक्षेत्रयोरन्यतरदीयमपि पुत्रत्वे प्रमाणं न लक्ष्यं भवति स कृतकः पुत्रः कीदृश इत्यर्थः १९ २० तस्य पोषयितुः पुनः सः तद्वर्णः पोषयितुर्वर्णः २१ कथं केन प्रकारेण कस्य वा कार्यमिति ज्ञातव्यं कथं वास्य संस्कारः प्रयोक्तव्य इति प्रश्नः २२ स्वामिवद्वर्णं प्रपद्यते-

पुत्रकामो हि पुत्रार्थे यां वृणीते विशांपते क्षेत्रजं तु प्रमाणं स्यान्नवै तत्रात्मजः सुतः १६ अन्यत्र क्षेत्रजः पुत्रो लक्ष्यते भरतर्षभ नत्यात्मा शक्यते हेतुं दृष्टांतोपगतोत्थसो १७ क्वचिच्च कृतकः पुत्रः संग्रहादेव लक्ष्यते न तत्र रेतः क्षेत्रं वा यत्र लक्ष्येत भारत १८ युधिष्ठिर उ० कीदृशः कृतकः पुत्रः संग्रहादेव लक्ष्यते शुक्रक्षेत्रप्रमाणं वा यत्र न लक्ष्यतु भारत १९ भीष्म उवाच मातापितृभ्यां यस्त्यक्तः पथि यस्तं प्रकल्पयेत् न चास्य मातापितरौ ज्ञायेतां स हि कृत्रिमः २० अस्वामिकस्य स्वामित्वं यस्मिन्संप्रति लक्ष्यते यो वर्णः पोषयेत्तं च तद्वर्णस्तस्य जायते २१ युधिष्ठिर उवाच कथमस्य प्रयोक्तव्यः संस्कारः कस्य वा कथम् देया कन्या कथं चेति तन्मे ब्रूहि पितामह २२ भीष्म उवाच आत्मवत्तस्य कुर्वीत संस्कारं स्वामिवत्तथा त्यक्तो मातापितृभ्यां यः सवर्णं प्रतिपद्यते २३ तद्गोत्रबंधुजं तस्य कुर्यात्संस्कारमुच्यते अथ देया तु कन्या स्यात्तद्वर्णस्य युधिष्ठिर २४ संस्कर्तुर्वर्णगोत्रं च मातृवर्णविनिश्चये कानीनाध्यूढजो वापि विज्ञेयौ पुत्रकिल्बिषौ २५ तावपि स्वाविव सुतौ संस्कार्याविति निश्चयः क्षेत्रजो वाप्यपसदो येऽध्यूढास्तेषु चाप्युत २६ आत्मवद्वै प्रयुंजीरन्संस्कारान्ब्राह्मणादयः धर्मशास्त्रेषु वर्णानां निश्चयोऽयं प्रदृश्यते २७ एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि २८ इति श्रीमहाभारते अनुशासनिके पर्वणि दानधर्मे विवाहधर्मे नाम एकोनपंचाशत्तमोऽध्यायः ४९ युधिष्ठिर उवाच दर्शने कीदृशः स्नेहः संवासे च पितामह महाभाग्यं गवां चैव तन्मे व्याख्यातुमर्हसि १

अतः स्वामी तस्यात्मवत्संस्कारं करोति २३ ननु अन्यवर्णत्वशंकायां कथमेतत्स्यादित्याशंक्याह अन्यवर्णत्वनिश्चये तद्गोत्रं वर्णजेषु गोत्रादिजो ममेव तस्य संस्कारं स्वामी कुर्यात् अनिश्चये तु येन संस्कृतः तस्यैव वर्णो गोत्रं च संस्कारसामर्थ्याद्भवतीत्यर्थः अन्यगोत्रोऽप्यन्यवर्णोऽपि संस्कर्तुरेव गोत्रं भजत इति भावः २४ २५ २६ २७ २८ इति श्रीमहाभारते आनुशासनिके पर्वणि टीकायां एकोनपंचाशत्तमोऽध्यायः ४९ एवं यज्ञांगानां स्त्रीधनलिंगानां शुद्धिमुक्त्वा यज्ञे दक्षिणात्वेनोपस्थितानां गवां माहात्म्यं पृच्छति दर्शन इति परपीडादर्शने परैः सहसंवासे च कीदृशः स्नेह आनृशंस्यं च कर्तव्यं गवां माहात्म्यं च ब्रूहीति प्रश्नद्वयम् १ ५ ७ ७

तस्योत्तरं तंत्रेणाह हंत इत्यादिना २ ३ ४ ५ ६ ७ ८ ऊर्ध्वस्थितः उपविष्टः ९ १० आसतः आसीनस्य ११ १२ १३ १४

भीष्म उवाच हंत ते कथयिष्यामि पुरावृत्तं महाद्युते नहुषस्य च संवादं महर्षेश्च्यवनस्य च १ पुरा महर्षिश्च्यवनो भार्गवो भरतर्षभ उद-
वासकृतारंभो बभूव स महाव्रतः २ निहत्य मानं क्रोधं च प्रहर्षं शोकमेव च वर्षाणि द्वादश मुनिर्जलवासे धृतव्रतः ३ आदधत्सर्वभूते-
षु विश्रंभं परमं शुभम् जलेचरेषु सर्वेषु शीतरश्मिरिव प्रभुः ४ स्थाणुभूतः शुचिर्भूत्वा दैवतेभ्यः प्रणम्य च गंगायमुनयोर्मध्ये जले सम्प्र-
विवेश ह ५ गंगायमुनयोर्वेगं सुभीमं भीमनिस्वनम् प्रतिजग्राह शिरसा वातवेगसमं जवे ६ गंगा च यमुना चैव सरितश्च सरांसि च
प्रदक्षिणमृषिं चक्रुर्न चैनं पर्यपीडयन् ७ अंतर्जले स सुष्वाप काष्ठभूतो महामुनिः ततश्चोर्ध्वस्थितो धीमानभवद्भरतर्षभ ८ जलौक-
सां स सत्वानां बभूव प्रियदर्शनः उपाजिघ्रंत च तदा तस्यौष्ठं हृष्टमानसाः ९ तत्र तस्यासतः कालः समतीतोभवन्महान् ततः कदाचि-
त्समये कस्मिंश्चिन्मत्स्यजीविनः १० तं देशं समुपाजग्मुर्जालहस्ता महाद्युते निषादा बहवस्तत्र मत्स्योद्धरणनिश्चयाः ११ व्यायता
बलिनः शूराः सलिलेष्वनिवर्तिनः अभ्याययुश्च तं देशं निश्चिता जालकर्मणि १२ जालं ते योजयामासुर्निःशेषेण जनाधिप मत्स्योद-
कं समासाद्य तदा भरतसत्तम १३ ततस्ते बहुभिर्योगैः कैवर्ता मत्स्यकांक्षिणः गंगायमुनयोर्वारि जालैरभ्यकिरंस्ततः १४ जालं सुवि-
ततं तेषां नवसूत्रकृतं तथा विस्तारायामसंपन्नं यत्तत्र सलिलेक्षमम् १५ ततस्ते सुमहच्चैव बलवच्च सुवर्तितम् अवतीर्य ततः सर्वे जा-
लं चकृषिरे तदा १६ अभीतरूपाः संहृष्टा अन्योन्यवशवर्तिनः बबंधुस्तत्र मत्स्यांश्च तथान्यान् जलचारिणः १७ तथा मत्स्यैः परिवृतं
च्यवनं भृगुनंदनम् आकर्षयन्महाराज जालेनाथ यदृच्छया १८ नदीशैवलदिग्धांगं हरिश्मश्रुजटाधरम् लग्नैः शंखनखैर्गात्रैः क्रो-
डैश्चित्रैरिवार्पितम् १९ तं जालेनोद्धृतं दृष्ट्वा ते तदा वेदपारगम् सर्वे प्रांजलयो दाशाः शिरोभिः प्रापतन्भुवि २० परिखेदपरित्रासात्
जालस्याकर्षणेन च मत्स्या बभूवुर्व्यापन्नाः स्थलसंस्पर्शनेन च २१ स मुनिस्तत्तदा दृष्ट्वा मत्स्यानां कदनं कृतम् बभूव कृपयाविष्टो
निश्वसंश्च पुनः पुनः २२ निषादा ऊचुः अज्ञानाद्यत्कृतं पापं प्रसादं तत्र नः कुरु करवाम प्रियं किं ते तन्नो ब्रूहि महामुने २३ इ-
त्युक्तो मत्स्यमध्यस्थश्च्यवनो वाक्यमब्रवीत् यो मेद्य परमः कामस्तं शृणुध्वं समाहिताः २४ प्राणोत्सर्गं विसर्गं वा मत्स्यैर्यास्याम्यहं सह सं-
वासान्नोत्सहे त्यक्तुं सलिलेध्युषितानहम् २५ इत्युक्तास्ते निषादास्तु सुभृशं भयकंपिताः सर्वे विवर्णवदना नहुषाय न्यवेदयन् २६

अभ्यकिरन् व्यामवन् १५ १६ १७ १८ १९ शंखानां जलजंतुविशेषाणां नखानि तैः २० २१ २२ २३ २४ २५ २६ २७

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांपंचाशत्तमोऽध्यायः ५० ६७ १ २ ३ ४ ५ ६ ७ ८ ९

इतिश्रीमहाभारतेआनुशासनि० दानधर्मेच्यवनोपाख्यानेपंचाशत्तमोऽध्यायः ५० भीष्मउवाच नहुषस्तुततःश्रुत्वाच्यवनंतंतथा
गतम् त्वरितःप्रययौतत्रसहामात्यपुरोहितः १ शौचंकृत्वायथान्यायंप्रांजलिःप्रयतोनृपः आत्मानमाचचक्षेचच्यवनायमहात्मने २
अर्चयामासतंचापितस्यराज्ञःपुरोहितः सत्यव्रतंमहात्मानंदेवकल्पंविशांपते ३ नहुषउवाच करवाणिप्रियंकिंतेतन्मेब्रूहिद्वि-
जोत्तम सर्वंकर्तास्मिभगवन्यद्यपिस्यात्सुदुष्करम् ४ च्यवनउवाच श्रमेणमहतायुक्ताःकैवर्तामत्स्यजीविनः ममभूल्यंप्रय
च्छैभ्योमत्स्यानांविक्रयैःसह ५ नहुषउवाच सहस्रंदीयतांमूल्यंनिषादेभ्यःपुरोहित निष्क्रयार्थंभगवतोयथाहभृगुनंदन ६
च्यवनउवाच सहस्रंनाहमर्हामिकिंवात्वंमन्यसेनृप सदृशंदीयतांमूल्यंस्वबुद्ध्यानिश्चयंकुरु ७ नहुषउवाच सहस्रा
णांशतंविप्रनिषादेभ्यःप्रदीयताम् स्यादिदंभगवन्मूल्यंकिंवान्यन्मन्यतेभवान् ८ च्यवनउवाच नाहंशतसहस्रेणनिमेयः
पार्थिवर्षभ दीयतांसदृशंमूल्यममात्यैःसहचिंतय ९ नहुषउवाच कोटिःप्रदीयतांमूल्यंनिषादेभ्यःपुरोहित यदेतदपिनोमू-
ल्यमतोभूयःप्रदीयताम् १० च्यवनउवाच राजन्नार्हाम्यहंकोटिंभूयोवापिमहाद्युते सदृशंदीयतांमूल्यंब्राह्मणैःसहचिंतय
११ नहुषउवाच अर्धंराज्यंसमग्रंवानिषादेभ्यःप्रदीयताम् एतन्मूल्यमहंमन्येकिंवान्यन्मन्यसेद्विज १२ च्यवनउवाच
अर्धंराज्यंसमग्रंचमूल्यंनार्हामिपार्थिव सदृशंदीयतांमूल्यमृषिभिःसहचिंत्यताम् १३ भीष्मउवाच महर्षेर्वचनंश्रुत्वानहुषो
दुःखकर्शितः सचिंतयामासतदासहामात्यपुरोहितः १४ तत्रत्वन्योवनचरःकश्चिन्मूलफलाशनः नहुषस्यसमीपस्थोगविजातोऽभ
वन्मुनिः १५ सतमाभाष्यराजानमब्रवीद्द्विजसत्तमः तोषयिष्याम्यहंक्षिप्रंयथातुष्टोभविष्यति १६ नाहंमिथ्यावचोब्रूयांस्वैरेष्व-
पिकुतोन्यथा भवतोयदहंब्रूयांतत्कार्यमविशंकया १७ नहुषउवाच ब्रवीतुभगवान्मूल्यंमहर्षेःसदृशंभृगोः परित्रायस्वमा
मस्माद्विषयंचकुलंचमे १८ हन्याद्धिभगवान्क्रुद्धस्त्रैलोक्यमपिकेवलम् किंपुनर्मांतपोहीनंबाहुवीर्यपरायणम् १९ अगाधांभ
सिमग्नस्यसामात्यस्यसऋत्विजः प्लवोभवमहर्षेत्वंकुरुमूल्यविनिश्चयम् २० भीष्मउवाच नहुषस्यवचःश्रुत्वागविजातःप्र
तापवान् उवाचहर्षयन्सर्वान्सामात्यान्पार्थिवंचतम् २१ अनर्घेयामहाराजद्विजावर्णेषुचोत्तमाः गावश्चपुरुषव्याघ्रगोर्मूल्यंपरि
कल्प्यताम् २२

१० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ ६७ ६७ ६७

२३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

नहुषस्तुततःश्रुत्वामहर्षेर्वचनंनृप हर्षेणमहतायुक्तःसहामात्यपुरोहितः २३ अभिगम्यभृगोःपुत्रंच्यवनंसंशितव्रतम् इदंप्रोवाचनृप-
तेवाचासंतर्पयन्निव २४ नहुषउवाच उत्तिष्ठोत्तिष्ठविप्रर्षेगवाक्रीतोसिभार्गव एतन्मूल्यमहंमन्येतवधर्मभृतांवर २५ च्यवन
उवाच उत्तिष्ठाम्येषराजेंद्रसम्यक्क्रीतोस्मितेनघ गोभिस्तुल्यंनपश्यामिधनंकिंचिदिहाच्युत २६ कीर्तनंश्रवणंदानंदर्शनंचापिपार्थि
व गवांप्रशस्यतेवीरसर्वपापहरंशिवम् २७ गावोलक्ष्म्याःसदामूलंगोषुपाप्मानविद्यते अन्नमेवसदागावोदेवानांपरमंहविः २८ स्वा
हाकारवषट्कारौगोषुनित्यंप्रतिष्ठितौ गावोयज्ञस्यनेत्र्योवैतथायज्ञस्यतामुखम् २९ अमृतंह्यव्ययंदिव्यंक्षरंतिचवहंतिच अमृता
यतनंचैताःसर्वलोकनमस्कृताः ३० तेजसावपुषाचैवगावोवह्निसमाभुवि गावोहिसुमहत्तेजःप्राणिनांचसुखप्रदाः ३१ निविष्टं-
गोकुलंयत्रश्वासंमुंचतिनिर्भयम् विराजयतितंदेशंपापंचास्यापकर्षति ३२ गावःस्वर्गस्यसोपानंगावःस्वर्गेपिपूजिताः गावःकाम
दुहोदेव्योनान्यत्किंचित्परंस्मृतम् ३३ इत्येतद्गोषुमेप्रोक्तंमाहात्म्यंभरतर्षभ गुणैकदेशवचनंशक्यंपारायणंनतु ३४ निषादाऊचुः
दर्शनंकथनंचैवसहास्माभिःकृतंमुने सतांसप्तपदंमित्रंप्रसादंनःकुरुप्रभो ३५ हवींषिसर्वाणियथाह्युपभुंक्तेहुताशनः एवंत्वमपिधर्मा
त्मन्पुरुषाग्निःप्रतापवान् ३६ प्रसादयामहेविद्वन्भवंतंप्रणतावयम् अनुग्रहार्थमस्माकमियंगौःप्रतिगृह्यताम् ३७ च्यवनउवाच
कृपणस्यचयच्चक्षुर्मुनेराशीविषस्यच नरंसमूलंदहतिकक्षमग्निरिवज्वलन् ३८ प्रतिगृह्णामिवोधेनुंकैवर्तामुक्तकिल्बिषाः दिवंग-
च्छतवैक्षिप्रंमत्स्यैःसहजलोद्भवैः ३९ भीष्मउवाच ततस्तस्यप्रभावात्तेमहर्षेर्भावितात्मनः निषादास्तेनवाक्येनसहमत्स्यैर्दिवं
ययुः ४० ततःसराजानहुषोविस्मितःप्रेक्ष्यधीवरान् आरोहमाणांस्त्रिदिवंमत्स्यांश्चभरतर्षभ ४१ ततस्तौगविजश्चैवच्यवनश्चभृगू
द्वहः वराभ्यामनुरूपाभ्यांछंदयामासतुर्नृपम् ४२ ततोराजामहावीर्योनहुषःपृथिवीपतिः परमित्यब्रवीत्प्रीतस्तदाभरतसत्तम ४३
ततोजग्राहधर्मेसस्थितिमिंद्रनिभोनृपः तथेतिचोदितःप्रीतस्तावृषीप्रत्यपूजयत् ४४ समाप्तदीक्षश्च्यवनस्ततोगच्छत्स्वमाश्रमम् गवि
जश्चमहातेजाःस्वमाश्रमपदंययौ ४५ निषादाश्चदिवंजग्मुस्तेचमत्स्याजनाधिप नहुषोपिवरंलब्ध्वाप्रविवेशस्वकंपुरम् ४६ एतत्तेकथि
तंतातयन्मांत्वंपरिपृच्छसि दर्शनेयादृशःस्नेहःसंवासेवायुधिष्ठिर ४७ महाभाग्यंगवांचैवतथाधर्मविनिश्चयम् किंभूयःकथ्यतांवीर
किंतेहृदिविवक्षितम् ४८

४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ७ ७ ७ ७

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांएकपंचाशत्तमोऽध्यायः ५१ ७ : भगार्यामेइत्यादिग्रंथस्यकुशिकवत् ब्राह्मणभक्तिमतोवंशेद्विब्रा-

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेच्यवनोपाख्यानेएकपंचाशत्तमोऽध्यायः ५१ युधिष्ठिरउवाच संशयोमेमहाप्राज्ञ
स्तुमहान्सागरोपमः तंमेशृणुमहाबाहोश्रुत्वाव्याख्यातुमर्हसि १ कौतूहलंमेसुमहज्जामदग्न्यंप्रतिप्रभो रामंधर्मभृतांश्रेष्ठंतन्मेव्याख्यातु
मर्हसि २ कथमेषसमुत्पन्नोरामःसत्यपराक्रमः कथंब्रह्मर्षिवंशोयंक्षत्रधर्माव्यजायत ३ तदस्यसंभवंराजन्निखिलेनानुकीर्त्तय कौशि
काच्चकथंवंशात्क्षत्राद्वैब्राह्मणोभवेत् ४ अहोप्रभावःसुमहानासीद्वैसुमहात्मनः रामस्यचनरव्याघ्रविश्वामित्रस्यचैवहि ५ कथंपु
त्रानतिक्रम्यतेषांनप्तृष्वथाभवत् एषदोषःसुतान्हित्वातन्मेव्याख्यातुमर्हसि ६ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपु
रातनम् च्यवनस्यचसंवादंकुशिकस्यचभारत ७ एतंदोषंपुरादृष्ट्वाभार्गवश्च्यवनस्तदा आगामिनंमहाबुद्धिःस्ववंशेमुनिसत्तमः ८
निश्चित्यमनसासर्वंगुणदोषंबलाबलम् दग्धुकामःकुलंसर्वंकुशिकानांतपोधनः ९ च्यवनःसमनुप्राप्यकुशिकंवाक्यमब्रवीत् वस्तु
मिच्छासमुत्पन्नात्वयासहममानघ १० कुशिकउवाच भगवन्सर्वधर्मोयंपंडितैरिहधार्यते प्रदानकालेकन्यानामुच्यतेचसदा-
बुधैः ११ यत्तुतावदतिक्रांतंधर्मद्वारंतपोधनम् तत्कार्यंप्रकरिष्यामितदनुज्ञातुमर्हसि १२ भीष्मउवाच अथासनमुपादायच्य
वनस्यमहामुनेः कुशिकोभार्ययासार्द्धमाजगामयतोमुनिः १३ प्रगृह्यराजाभृंगारंपाद्यमस्मैन्यवेदयत् कारयामाससर्वाश्चक्रिया
स्तस्यमहात्मनः १४ ततःसराजाच्यवनंमधुपर्कंयथाविधि ग्राहयामासचाव्यग्रोमहात्मानियतव्रतः १५ सत्कृत्यततथाविप्रमिदंपुनर-
थाब्रवीत् भगवन्परवंतौस्वोब्रूहिकिंकरवावहे १६ यदिराज्यंयदिधनंयदिगाःसंशितव्रत यज्ञदानानिचतथाब्रूहिसर्वंददामिते १७
इदंगृहमिदंराज्यमिदंधर्मासनंचते राजात्वमसिशाध्युर्वीमहंतुपरवांस्त्वयि १८ एवमुक्तेततोवाक्येच्यवनोभार्गवस्तदा कुशिकंप्रत्यु
वाचेदंमुदापरमयायुतः १९ नराज्यंकामयेराजन्नधनंनचयोषितः नचगानचैवदेशान्नयज्ञंश्रूयतामिदम् २० नियमंकिंचिदारप्स्ये-
युवयोर्यदिरोचते परिचर्योस्मियत्ताभ्यांयुवाभ्यामविशंकया २१ एवमुक्तेतदातेनदंपतीतौजहर्षतुः प्रत्यब्रूतांचतमृषिमेवमस्त्विति-
भारत २२ अथतंकुशिकोहृष्टःप्रावेशयदनुत्तमम् गृहोद्देशंततस्तस्यदर्शनीयमदर्शयत् २३ इयंशय्याभगवतोयथाकाममिहोष्यतां
प्रयतिष्यावहेप्रीतिमाहर्तुंतेतपोधन २४ अथसूर्योतिचक्रामतेषांसंवदतांतथा अथर्षिश्चोदयामासपानमन्नंतथैवच २५

ह्मणाउत्पद्यंतइति

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ मुनिश्रेष्ठःच्यवनः तावेतौस्त्रीपुरुषौ एषएषाचएतौ
३७ ३८ ३९इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांद्विपंचाशत्तमोऽध्यायः ५२ ७ तस्मिन् १ २ ३ ४ तौकुशिकस्तस्यपत्नीच

तमपृच्छत्ततोराजाकुशिकःप्रणतस्तदा किमन्नंजातमिष्टंतेकिमुपस्थापयाम्यहम् २६ ततःसपरयाप्रीत्याप्रत्युवाचनराधिपम् औप
पत्तिकमाहारंप्रयच्छस्वेतिभारत २७ तद्वचःपूजयित्वातुतथेत्याहसपार्थिवः यथोपपन्नमाहारंतस्मैप्रादाज्जनाधिप २८ ततःसभु
क्त्वाभगवान्दंपतीप्राहधर्मवित् स्वप्तुमिच्छाम्यहंनिद्राबाधतेमामितिप्रभो २९ ततःशय्यागृहंप्राप्यभगवानृषिसत्तमः संविवेशनरे-
शस्तुसपत्नीकःस्थितोभवत् ३० नप्रबोध्योस्मिसंसुप्तइत्युवाचाथभार्गवः संवाहितव्यौमेपादौजागृतव्यंचतेनिशम् ३१ अविशंक
स्तुकुशिकस्तथेत्येवाहधर्मवित् नप्रबोधयतांतौचदंपतीरजनीक्षये ३२ यथादेशंमहर्षेस्तुशुश्रूषापरमौतदा बभूवतुर्महाराजप्र
यतावथदंपती ३३ ततःसभगवान्विप्रःसमादिश्यनराधिपम् सुष्वापैकेनपार्श्वेनदिवसानेकविंशतिम् ३४ सतुराजानिराहारःस
भार्यःकुरुनंदन पर्युपासततंहृष्टश्च्यवनाराधनेरतः ३५ भार्गवस्तुसमुत्तस्थौस्वयमेवतपोधनः अकिंचिदुक्त्वातुगृहान्निश्चक्राममम
हातपाः ३६ तमन्वगच्छतांतौचक्षुधितौश्रमकर्शितौ भार्यापतीमुनिश्रेष्ठस्तावेतौनावलोकयन् ३७ तयोस्तुप्रेक्षतोरेवभार्गवाणां
कुलोद्वहः अंतर्हितोभूद्राजेंद्रततोराजापतत्क्षितौ ३८ समुहूर्तंसमाश्वास्यसहदेव्यामहाद्युतिः पुनरन्वेषणेयत्नमकारोत्परमंतदा
३९ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेच्यवनकुशिकसंवादेद्विपंचाशत्तमोऽध्यायः ५२ युधिष्ठिरउवाच तस्मि
न्नंतर्हितेविप्रेराजाकिमकरोत्तदा भार्याचास्यमहाभागातन्मेब्रूहिपितामह १ भीष्मउवाच अदृष्ट्वासमहीपालस्तमृषिंसह
भार्यया परिश्रांतोनिववृतेव्रीडितोनष्टचेतनः २ सप्रविश्यपुरींदीनोनाभ्यभाषतकिंचन तदेवचिंतयामासच्यवनस्यविचेष्टितम्
३ अथशून्येनमनसाप्रविश्यस्वगृहंनृपः ददर्शशयनेतस्मिन्शयानंभृगुनंदनम् विस्मितौतमृषिंदृष्ट्वातदाश्चर्यंविचिंत्यच ४ द-
र्शनात्तस्यतुतदाविश्रांतौसंबभूवतुः यथास्थानंचतौस्थित्वाभूयस्तंसंववाहतुः ५ अथापरेणपार्श्वेनसुष्वापसमहामुनिः तेनैवचस
कालेनप्रत्यबुध्यतवीर्यवान् ६ नचतौचक्रतुःकिंचिद्विकारंभयशंकितौ प्रतिबुद्धस्तुसमुनिस्तौप्रोवाचविशांपते ७ तैलाभ्यंगो-
दीयतांमेस्नास्येहमितिभारत तौतथेतिप्रतिश्रुत्यक्षुधितौश्रमकर्शितौ ८

तेनैवचसकालेनेतितेनैवएकविंशत्याकालेन सच्यवनःप्रत्यबुध्यत ६ ७ ८ ७ ७ ७ ७ ७ ७

शतपाकेनतैलेनेति साधितदुग्धादिसौरभ्यद्रव्ययुक्तेनसंख्याविशिष्टेन क्वाथेननारायणादितैलंसिध्यतिपुनरपि तावताद्रव्येणतदेवतैलंत्यक्ष्यतिएवंक्रमेण
शतपाकःतैलस्यविशेषणं ९ १० स्नानशालांस्नानगृहं ११ असत्कृत्यहेयंकृत्वा १२ १३ दर्शयामासकुशिकंआत्मानमितिशेषः १४ १५

शतेपाकेनतैलेनमहार्हेणोपतस्थतुः ततःसुखासीनमृषिंवाग्यतौसंववाहतुः ९ नचपर्याप्तमित्याहभार्गवःसुमहातपाः यदातौनिर्वि-
कारौतौलक्षयामासभार्गवः १० ततउत्थायसहसास्नानशालांविवेशह क्लृप्तमेवतुतत्रासीत्स्नानीयंपार्थिवोचितम् ११ असत्कृत्य-
चतत्सर्वंतत्रैवान्तरधीयत समुनिःपुनरेवाथनृपतेःपश्यतस्तदा १२ नासूयांचक्रतुस्तौचदंपतीभरतर्षभ अथस्नातःसभगवान्सिंहा
सनगतःप्रभुः १३ दर्शयामासकुशिकंसभार्यंकुरुनंदन संहृष्टवदनोराजासभार्यःकुशिकोमुनिम् १४ सिद्धमन्नमितिप्रह्वोनिर्विका
रोन्यवेदयत् आनीयतामितिमुनिस्तंचोवाचनराधिपम् १५ सराजासमुपाजह्रेतदन्नंसहभार्यया मांसप्रकारान्विविधान्शाकानि
विविधानिच १६ वेशवारविकारांश्चपानकानिलघूनिच रसालापूपकांश्चित्रान्मोदकानथखाण्डवान् १७ रसान्नानाप्रकारांश्चवन्यं
चमुनिभोजनम् फलानिचविचित्राणिराजभोज्यानिभूरिशः १८ बदरेङ्गुदकाश्मर्यभल्लातकफलानिच गृहस्थानांचयद्भोज्यय
च्चापिवनवासिनाम् १९ सर्वमाहारयामासराजाशापभयात्ततः अथसर्वमुपन्यस्तमग्रतश्च्यवनस्यतत् २० ततःसर्वंसमानीय
तच्चशय्यासनंमुनिः वस्त्रैःशुभैरवच्छाद्यभोजनोपस्करैःसह २१ सर्वमादीपयामासच्यवनोभृगुनंदनः नचतौचक्रतुःक्रोधं
दंपतीसुमहामती २२ तयोःसंप्रेक्ष्यतोरेवपुनरन्तर्हितोभवत् तथैवचसराजर्षिस्तस्थौतांरजनींतदा २३ सभार्योभार्गवःश्री
मान्नचकोपंसमाविशत् नित्यसंस्कृतमन्नंतुविविधंराजवेश्मनि २४ शयनानिचमुख्यानिपरिषेकाश्चपुष्कलाः वस्त्रंचविविधाकारमभ
वत्समुपार्जितम् २५ नशशाकततोद्रष्टुमंतरंच्यवनस्तदा पुनरेवचविप्रर्षिःप्रोवाचकुशिकंनृपम् २६ सभार्योमांरथेनाशुवहयत्रब्रवी
म्यहम् तथेतिचप्राहनृपोनिर्विशंकस्तपोधनम् २७ क्रीडारथोस्तुभगवन्नुतसांग्रामिकोरथः इत्युक्तःसमुनीराज्ञातेनहृष्टेनतद्वचः २८
च्यवनःप्रत्युवाचेदंहृष्टःपरपुरंजयम् सज्जीकुरुरथंक्षिप्रंयस्तेसांग्रामिकोरथः २९ सायुधःसपताकश्चशक्तीकनकयष्टिमान् किं-
किणीस्वननिर्घोषोयुक्तस्तोरणकल्पनैः ३० जाम्बूनदनिबद्धश्चपरमेषुशतान्वितः ततःसतंतथेत्युक्त्वाकल्पयित्वामहारथम् ३१

१६ वेशवारोवेशारीतिप्रसिद्धिः १७ १८ १९ २० २१ आदीपयामासदाहयामास २२ संप्रेक्ष्यतोःसंप्रेक्ष्यमाणयोः २३ २४ प
रिषेकाःपरिषेचनपात्रविशेषाः २५ २६ २७ सांग्रामिकःसंग्रामोपयुक्तः २८ २९ ३० ३१ ७ ७ ७ ७ ७ ७

३२ ३३ ३४ सुसुखं अतिशायितं सुखं ३५ वसु धनं ३६ ३७ युग्यं योग्यं अजाच अविश्च अजाविकं अविर्मेषः ३८ कृताकृतं घटिताघटितं कनकं अ-
न्वगच्छंत अनुगतवंतः ३९ प्रचोदितौ नुन्नौ ४० कटे कटिप्रदेशे ४१ क्षतोद्भवं रक्तं स्रवंतावित्यन्वयः ४२ पौरवर्गः पुरनिवासिजनः ४३ ४४ ४५

भार्यां वामे धुरि ह्युदाचात्मानं दक्षिणे तथा त्रिदंडं वज्रसूच्यग्रं प्रतोदं तत्र चादधत् ३२ सर्वमेतत्तथा दत्वा नृपो वाक्यमथाब्रवीत् भगवन्क्व रथो
यातु ब्रवीतु भृगुनंदन ३३ यत्र वक्ष्यसि विप्रर्षे तत्र यास्यति ते रथः एवमुक्तस्तु भगवान्प्रत्युवाचाथ तं नृपम् ३४ इतः प्रभृति यातव्यं पदकं पदकं
शनैः श्रमो मम यथा न स्यात्तथा मच्छंदचारिणौ सुसुखं चैव वोढव्यो जनः सर्वश्च पश्यतु ३५ नोत्सार्याः पथिकाः केचित्तेभ्यो दास्ये वसु ह्य-
हम् ब्राह्मणेभ्यश्च ये कामानर्थयिष्यंति मां पथि ३६ सर्वान्दास्याम्यशेषेण धनं रत्नानि चैव हि क्रियतां निखिलेनैतन्माविचारय पार्थिव ३७
तस्यैतद्वचनं श्रुत्वा राजभृत्यांस्तथाब्रवीत् यद्यद्ब्रूयान्मुनिस्तत्तत्सर्वं देयमशंकितैः ततो रत्नान्यनेकानि स्त्रियो युग्यमजाविकम् ३८ कृताकृ-
तं च कनकं गजेंद्राश्चाचलोपमाः अन्वगच्छंत तमृषिं राजामात्याश्च सर्वशः ३९ हाहाभूतं च तत्सर्वमासीन्नगरमार्तवत् तौ तीक्ष्णाग्रेण सहसा
प्रतोदेन प्रचोदितौ ४० पृष्ठे विद्धौ कटे चैव निर्विकारौ तमूहतुः वेपमानौ निराहारौ पंचाशद्रात्रकर्शितौ ४१ कथंचिदूहतुर्वीरौ दंपती तं रथ-
ोत्तमम् बहुशो भृशविद्धौ तौ स्रवंतौ च क्षतोद्भवम् ४२ ददृशाते महाराज पुष्पिताविव किंशुकौ तौ दृष्ट्वा पौरवर्गस्तु भृशं शोकसमाकुलः
४३ अभिशापभयत्रस्तो न च किंचिदुवाच ह द्वंद्वशश्चाब्रुवन्सर्वे पश्यध्वं तपसो बलम् ४४ क्रुद्धा अपि मुनिश्रेष्ठं वीक्षितुं नैव शक्नुमः अ-
हो भगवतो वीर्यं महर्षेर्भावितात्मनः ४५ राज्ञश्चापि सभार्यस्य धैर्यं पश्यत यादृशम् श्रांतावपि हि कृच्छ्रेण रथमेनं समूहतुः ४६ न चैत-
योर्विकारं वै ददर्श भृगुनंदनः भीष्म उवाच ततः स निर्विकारौ तु दृष्ट्वा भृगुकुलोद्वहः ४७ वसु विश्राणयामास यथा वैश्रवणस्त-
था तत्रापि राजा प्रीतात्मा यथादिष्टमथाकरोत् ४८ ततोऽस्य भगवान्प्रीतो बभूव मुनिसत्तमः अवतीर्य रथश्रेष्ठाद्दंपती तौ मुमोच ह ४९
विमोच्य चैतौ विधिवत्ततो वाक्यमुवाच ह स्निग्धगंभीरया वाचा भार्गवः सुप्रसन्नया ५० ददामि वां वरं श्रेष्ठं तद्ब्रूतामिति भारत सुकुमारौ
च तौ विद्धौ कराभ्यां मुनिसत्तमः ५१ पस्पर्शामृतकल्पाभ्यां स्नेहाद्भरतसत्तम अथाब्रवीन्नृपो वाक्यं श्रमो नास्त्यावयोरिह ५२ विश्रांतौ
च प्रभावात्ते ऊचतुस्तौ तु भार्गवम् अथ तौ भगवान्प्राह प्रहृष्टश्च्यवनस्तदा ५३ न वृथा व्याहृतं पूर्वं यन्मया तद्भविष्यति रमणीयः समुद्दे-
शो गंगातीरमिदं शुभम् ५४ किंचित्कालं व्रतपरो निवत्स्यामीह पार्थिव गम्यतां स्वपुरं पुत्र विश्रांतः पुनरेष्यसि ५५

४६ ४७ वसु धनं विश्राणयामास दापयामास ४८ ४९ वाचा सुप्रसन्नया इत्यन्वय ५० वां युवाभ्यां ५१ ५२ ५३ ५४ ५५ ५६

इहस्थंमांसभार्यस्त्वंद्रष्टासिश्वोनराधिप नचमन्युस्त्वयाकार्यःश्रेयस्तेसमुपस्थितम् ५६ यत्कांक्षितंत्वदिस्थंतेतत्सर्वंहिभविष्यति इत्येव
मुक्तःकुशिकःप्रहृष्टेनांतरात्मना ५७ प्रोवाचमुनिशार्दूलमिदंवचनमर्थवत् नमेमन्युर्महाभागपूतोस्मिभगवंस्त्वया ५८ संवृत्तौ
यौवनस्थौस्वोवपुष्मंतौबलान्वितौ प्रतोदेनव्रणायेमेसभार्यस्यत्वयाकृता: ५९ तान्नपश्यामिगात्रेषुस्वस्थोस्मिसहभार्यया इमांचदे
वींपश्यामिवपुषाप्सरसोपमाम् ६० श्रियापरमयायुक्तांतथादृष्टपुरामया तवप्रसादसंवृत्तमिदंसर्वंमहामुने ६१ नैतच्चित्रंतुभगव
न्स्त्वयिसत्यपराक्रम इत्युक्तःप्रत्युवाचैनंकुशिकंच्यवनस्तदा ६२ आगच्छेथाःसभार्यश्चत्वमिहेतिनराधिप इत्युक्तःसमनुज्ञातोराज
र्षिरभिवाद्यतम् ६३ प्रययौवपुषायुक्तोनगरंदेवराजवत् ततएनमुपाजग्मुरमात्याःसपुरोहिताः ६४ बलस्थागणिकायुक्ताःसर्वाः
प्रकृतयस्तथा तैर्वृतःकुशिकोराजाश्रियापरमयाज्वलन् ६५ प्रविवेशपुरंहृष्टःपूज्यमानोथबंदिभिः ततःप्रविश्यनगरंकृत्वापूर्वाह्णि
कीःक्रियाः भुक्त्वासभार्योरजनीमुवाससमहाद्युतिः ६६ ततस्तुतौनवमभिवीक्ष्ययौवनंपरस्परंविगतरुजाविवामरौ ननंदतुःशय-
नगतौवपुर्धरौश्रियायुतौद्विजवरदत्तयातदा ६७ अथाप्यृषिर्भृगुकुलकीर्तिवर्द्धनस्तपोधनोवनमभिराममृद्धिमत् मनीषयाबहुवि
धरत्नभूषितंससर्जयन्नपुरिशतक्रतोरपि ६८ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेच्यवनकुशिकसंवादेत्रिपंचाशत्त
मोऽध्यायः ५३ भीष्मउवाच ततःसराजारात्र्यंतेप्रतिबुद्धोमहामनाः कृतपूर्वाह्णिकःप्रायात्सभार्यस्तद्वनंप्रति १ ततोदद-
र्शनृपतिःप्रासादंसर्वकांचनम् मणिस्तंभसहस्राढ्यंगंधर्वनगरोपमम् तत्रदिव्यानभिप्रायान्ददर्शकुशिकस्तदा २ पर्वतान्रूप्य-
सानूंश्चनलिनीश्चसपंकजाः चित्रशालाश्चविविधास्तोरणानिचभारत शाड्वलोपचितांभूमिंयथाकांचनकुट्टिमाम् ३ सहकारान्प्र
फुल्लांश्चकेतकोद्दालकान्धवान् अशोकान्सहकुंदांश्चफुल्लांश्चैवातिमुक्तकान् ४ चंपकांस्तिलकान्भव्यान्पनसान्वंजुलानपि पुष्पि
तान्कर्णिकारांश्चतत्रतत्रददर्शह ५ श्यामान्वारणपुष्पांश्चतथाष्टपदिकालताः तत्रतत्रपरिक्लृप्तादादर्शसमहीपतिः ६ रम्यान्पद्मोत्प
लधरान्सर्वर्तुकुसुमांस्तथा विमानप्रतिमांश्चापिप्रासादाञ्छैलसन्निभान् ७ शीतलानिचतोयानिक्वचिदुष्णानिभारत आसनानिवि
चित्राणिशयनप्रवराणिच ८ पर्यंकान्रत्नसौवर्णान्परार्ध्यास्तरणावृतान् भक्ष्यंभोज्यमनंतंचतत्रतत्रोपकल्पितम् ९

वाणीवादान् वीणावादानितिन्यपाठः १० ११ १२ १३ १४ अचिंतयत् कुशिक इतिशेषः १५ १६ १७ १८ १९ २० २१

वाणीवादांश्छुकांश्चैव सारिकांश्च मृगराजकान् कोकिलान्शतपत्रांश्च ससकोयष्टिककुक्कुमान् १० मयूरान्कुक्कुटांश्चापि दात्यूहान्जीवजीव
कान् चकोरान्वानरान्हंसान्सारसांश्चक्रसाह्वयान् ११ समंततः प्रमुदितान्ददर्श सुमनोहरान् क्वचिदप्सरसां संघान्गंधर्वाणां च पार्थि
व १२ कांताभिरपरांस्तत्र परिष्वक्तान्ददर्श ह नददर्श च तान्भूयो ददर्श च पुनर्नृपः १३ गीतध्वनिं सुमधुरं तथैवाध्यापनध्वनिम् हंसा-
न्सुमधुरांश्चापि तत्र शुश्राव पार्थिवः १४ तं दृष्ट्वात्यद्भुतं राजा मनसाचिंतयत्तदा स्वप्नोऽयं चित्तविभ्रंशः उताहो सत्यमेव तु १५ अहो सह
शरीरेण प्राप्तोस्मि परमां गतिम् उत्तरान्वा कुरून्पुण्यानथवाप्यमरावतीम् १६ किंचेदं महदाश्चर्यं संपश्यामीत्यचिंतयत् एवं संचिंत-
यन्नेव ददर्श मुनिपुंगवम् तस्मिन्विमाने सौवर्णे मणिस्तंभसमाकुले महार्हे शयने दिव्ये शयानं भृगुनंदनम् १८ तमभ्ययात्प्रहर्षेण
नरेंद्रः सह भार्यया अंतर्हितस्ततो भूयश्च्यवनः शयनं च तत् १९ ततोन्यस्मिन्वनोद्देशे पुनरेव ददर्श तम् कौश्यां बृस्यां समासीनं ज
पमानं महाव्रतम् २० एवं योगबलाद्विप्रो मोहयामास पार्थिवम् क्षणेन तद्वनं चैव ते चैवाप्सरसां गणाः २१ गंधर्वाः पादपाश्चैव सर्वमंत
रधीयत निःशब्दमभवच्चापि गंगाकूलं पुनर्नृप २२ कुशवल्मीकभूयिष्ठं बभूव च यथा पुरा ततः स राजा कुशिकः सभार्यस्तेन कर्मणा
२३ विस्मयं परमं प्राप्तस्तद्दृष्ट्वा महदद्भुतम् ततः प्रोवाच कुशिको भार्यां हर्षसमन्वितः २४ पश्य भद्रे यथा भावाश्चित्रा दृष्टाः सुदुर्लभाः
प्रसादाद्भृगुमुख्यस्य किमन्यत्र तपोबलात् २५ तपसा तदवाप्यं हि यत्तु शक्यं मनोरथैः त्रैलोक्यराज्यादपि हि तप एव विशिष्यते २६
तपसा हि सुतप्तेन शक्यो मोक्षस्तपोबलात् अहो प्रभावो ब्रह्मर्षेश्च्यवनस्य महात्मनः २७ इच्छयैष तपोवीर्यादन्याँल्लोकान्सृजेदपि
ब्राह्मणा एव जायेरन्पुण्यवाग्बुद्धिकर्मणः २८ उत्सहेदिह कृत्वैव कोन्यो वै च्यवनादृते ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभं नरैः २९
ब्राह्मण्यस्य प्रभावाद्धि रथे युक्तौ स्वधुर्यवत् इत्येवं चिंतयानः स विदितश्च्यवनस्य वै ३० संप्रेक्ष्योवाच नृपतिं क्षिप्रमागम्यतामिति इत्यु
क्तः सह भार्यस्तु सोभ्यगच्छन्महामुनिम् ३१ शिरसा वंदनीयं तमवंदत च पार्थिवः तस्याशिषः प्रयुज्याथ स मुनिस्तं नराधिपम् निषीदे
त्यब्रवीद्धीमान्सांत्वयन्पुरुषर्षभः ३२ ततः प्रकृतिमापन्नो भार्गवो नृपते नृपम् उवाच श्लक्ष्णया वाचा तर्पयन्निव भारत ३३ राजन्स
म्यग्जितानीह पंच पंच स्वयं त्वया मनःषष्ठानींद्रियाणि कृच्छ्रान्मुक्तोसि तेन वै ३४

२२ २३ २४ २५ २६ २७ २८ २९ ३०
३१ ३२ प्रकृतिं स्वभावं ३३ पंच कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थाः पंच ज्ञानेंद्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि मनो [illegible] ३४ [illegible]

वृजिनंपानं ३५ ३६ अग्निमध्यगतेनसहेत्यन्वयः ३७ ३८ ३९ ४० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांचतुःपंचाशत्तमोऽध्यायः ५४ १ कुशिकेनसभार्येणयद्यद्दृष्टमनुभूतंचतत्कारणंश्रोतुं तदुपन्यासेनउपक्रम्यते यदिप्रीतोसीति २ ३ ४ ५ ६ ७

सम्यगाराधितःपुत्रत्वयाप्रवदतांवर नहितेवृजिनंकिंचित्सुसूक्ष्ममपिविद्यते ३५ अनुजानीहिमांराजन्गमिष्यामियथागतम् प्रीतोस्मि तवराजेंद्रवरश्चप्रतिगृह्यताम् ३६ कुशिकउवाच अग्निमध्येगतेनेवभगवन्सन्निधौमया वर्तितंभृगुशार्दूलयन्नदग्धोस्मितद्बहु ३७ एषएववरोमुख्यःप्राप्तोमेभृगुनंदन यत्प्रीतोसिमयाब्रह्मन्कुलंत्रातंचमेनघ ३८ एषमेनुग्रहोविप्रजीवितेचप्रयोजनम् एतद्राज्यफलंचैवतपसश्चफलंमम ३९ यदित्वप्रीतिमान्विप्रमयिवैभृगुनंदन अस्तिमेसंशयःकश्चित्तन्मेव्याख्यातुमर्हसि ४० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेच्यवनकुशिकसंवादोनामचतुःपंचाशत्तमोऽध्यायः ५४ च्यवनउवाच वरश्चगृह्यतांमत्तोयश्चतेसंशयोहृदि तंप्रब्रूहिनरश्रेष्ठसर्वंसंपादयामिते १ कुशिकउवाच यदिप्रीतोसिभगवंस्ततोमेवदभार्गव कारणंश्रोतुमिच्छामिमद्गृहेवासकारितम् २ शयनंचैकपार्श्वेनदिवसानेकविंशतिम् अकिंचिदुक्त्वागमनंबहिश्चमुनिपुंगव ३ अंतर्धानमकस्माच्चपुनरेवचदर्शनम् पुनश्चशयनंविप्रदिवसानेकविंशतिम् ४ तैलाभ्यक्तस्यगमनंभोजनंचगृहेमम समुपानीयविविधंयद्दग्धंजातवेदसा ५ निर्याणंचरथेनाशुसहसायत्कृतंत्वया धनानांचविसर्गस्यवनस्यापिचदर्शनात् ६ प्रासादानांबहूनांचकांचनानांमहामुने मणिविद्रुमपादानांपर्यंकाणांचदर्शनम् ७ पुनश्चादर्शनंतस्यश्रोतुमिच्छामिकारणम् अतीवह्यत्रमुह्यामिचिंतयानोभृगूद्वह ८ नचैवात्राधिगच्छामिसर्वस्यास्यविनिश्चयम् एतदिच्छामिकार्त्स्न्येनसत्यंश्रोतुंतपोधन ९ च्यवनउवाच शृणुसर्वमशेषेणयदिदंयेनहेतुना नहिशक्यंमनाख्यातुमेवंपृष्टेनपार्थिव १० पितामहस्यवदतःपुरादेवसमागमे श्रुतवानस्मियद्राजंस्तन्मेनिगदतःशृणु ११ ब्रह्मक्षत्रविरोधेनभविताकुलसंकरः पौत्रस्तेभविताराजंस्तेजोवीर्यसमन्वितः १२ ततस्तेकुलनाशार्थमहंत्वांसमुपागतः चिकीर्षन्कुशिकोच्छेदंसंदिधक्षुःकुलंतव १३ ततोहमागम्यपुरेत्वामवोचंमहीपते नियमंकंचिदारप्स्येशुश्रूषाक्रियतामिति १४ नचतेदुष्कृतंकिंचिदहमासादयंगृहे तेनजीवसिराजर्षेनभवेयास्त्वमन्यथा १५ एवंबुद्धिंसमास्थायदिवसानेकविंशतिम् सुप्तोस्मियदिमांकश्चिद्बोधयेदितिपार्थिव १६

८ ९ १० ११ ब्रह्मेति ब्रह्मक्षत्रविरोधेनब्राह्मणक्षत्रयोर्नित्यंवैरभावेनसंकरोवर्णादिसांकर्यं भविताभविष्यतीतिज्ञात्वाअहंत्वांसमुपागतइतिपरेणान्वयः १२ १३ १४ १५ एवंबुद्धिंसमास्थायेतिंकश्चिन्माबोधयेदितीमांबुद्धिंआस्थायएकविंशतिदिवसान्सुप्तो

स्मीतिवाक्यार्थः १६

१७ १८ १९ वायुवायक्षुधाक्षोभेणमयाकर्शितौ तनूकृतौ तेतवंमन्युरभूत् २० २१ २२ २३ २४ २५ २६ २७ यास्पृहाआसी
दित्यन्वयः २८ २९ ३० कुशिकात्कौशिकोद्विजः एषकामस्तवभविष्यति तृतीयंपुरुषंतुभ्यंब्राह्मणत्वंगमिष्यति ब्राह्मणत्वकर्तृयंपुरुषंप्राप्यब्राह्मण

यदात्वयासभार्येणसंसुप्तोनप्रबोधितः अहंतदैवतेप्रीतोमनसाराजसत्तम १७ उत्थायचास्मिनिष्क्रांतोयदिमांत्वंमहीपते पृच्छेःक्वयास्य
सीत्येवंशापेयंत्वामितिप्रभो १८ अंतर्हितःपुनश्चास्मिपुनरेवचतेगृहे योगमास्थायसंसुप्तोदिवसानेकविंशतिम् १९ क्षुधितोमामसूये
थाश्रमाद्वेतिनराधिप एवंबुद्धिंसमास्थायकर्षितोवांक्षुधामया २० नचतेभूत्सुसूक्ष्मोपिमन्युर्मनसिपार्थिव सभार्यस्यनरश्रेष्ठतेनतेप्री
तिमानहम् २१ भोजनंचसमानाय्ययत्तदादीपितंमया क्रुद्धोयायदिमात्सर्यादितितन्मर्षितंचमे २२ ततोहंरथमारुह्यत्वामवोचंनराधि
प सभार्योमांवहस्वेतितच्चत्वंकृतवांस्तथा २३ अविशंकोनरपतेप्रीतोहंचापितेनह धनोत्सर्गेपिचकृतेनत्वांक्रोधःप्रधर्षयेत् २४ त
तःप्रीतेनतेराजन्पुनरेतत्कृतंतव . सभार्यस्यवनंभूयस्तद्विद्धिमनुजाधिप २५ प्रीत्यर्थंतवचैतन्मेस्वर्गसंदर्शनंकृतम् यत्तेवनेस्मिन
नृपतेदृष्टंदिव्यंनिदर्शनम् २६ स्वर्गोद्देशस्त्वयाराजन्सशरीरेणपार्थिव मुहूर्तमनुभूतोसौसभार्येणनृपोत्तम २७ निदर्शनार्थंतपसोध
र्मस्यचनराधिप तत्रयासीत्स्पृहाराजंस्तच्चापिविदितंमया २८ ब्राह्मण्यंकांक्षसेहित्वंतपश्चपृथिवीपते अवमन्यनरेंद्रत्वंदेवेंद्रत्वंच-
पार्थिव २९ एवमेतद्यथात्थत्वंब्राह्मण्यंतातदुर्लभम् ब्राह्मणेसतिचर्षित्वमृषित्वेचतपस्विता ३० भविष्यत्येपतेकामःकुशिकात्कौ
शिकोद्विजः तृतीयंपुरुषंतुभ्यंब्राह्मणत्वंगमिष्यति ३१ वंशस्तेपार्थिवश्रेष्ठभृगूणामेवतेजसा पौत्रस्तेभविताविप्रतपस्वीपावकद्युतिः
३२ यःसदेवमनुष्याणांभयमुत्पादयिष्यति त्रयाणामेवलोकानांसत्यमेतद्ब्रवीमिते ३३ वरंगृहाणराजर्षेयत्तेमनसिवर्तते तीर्थयां
त्रांगमिष्यामिपुराकालोभिवर्तते ३४ कुशिकउवाच एषएववरोमेद्ययस्त्वंप्रीतोमहामुने भवत्वेतद्यथात्थत्वंभवेत्पौत्रोमम
मानघ ३५ ब्राह्मण्यंमेकुलस्यास्तुभगवन्नेषमेवरः पुनश्चाख्यातुमिच्छामिभगवन्विस्तरेणवै ३६ कथमेष्यतिविप्रत्वंकुलंमेभृगुनं
दन कश्चासौभविताबंधुर्ममकश्चापिसंमतः ३७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेच्यवनकुशिकसंवादेपंचपंचाश
त्तमोऽध्यायः ५५ . च्यवनउवाच . अवश्यंकथनीयमेतदेतन्नरपुंगव यदर्थंत्वाहमुच्छेत्तुंसंप्राप्तोमनुजाधिप १

त्वमितिचपाठः तुभ्यंतवतृतीयंपुरुषंप्राप्यब्रा
ह्मणत्वंगमिष्यति . प्राप्स्यतीतिभावः कुशिकःगाधिर्द्वितीयःविश्वामित्रस्तृतीयः ३१ ३२ ३३ तीर्थयात्रांतीर्थयात्रांगमिष्यामितस्यायात्रायाःपुरापूर्वंकालोतिवर्तते-
अतिक्रांतोभवति पराक्रम्यमआगमिष्यामितद्गमनकालेलंघितोभवतीतिवा ३४ अद्यदिवसे ३५ ३६ ३७ इतिआनुशा०टीकायांपंचपंचाशत्तमोऽध्यायः ५५ त्वांत्वाउ
च्छेत्तुंअहमागतः क्षत्रियस्यवैरभावादितिभावः १

केरभावंस्पर्श्यति भृगूणांक्षत्रियायाज्येति दैवयुक्तेनदैवनियोजितेन २ ३ ततइति उत्पत्स्यतेऊर्वइतियोजना सऊर्वः ४
५ ६ पुत्रंतस्येति तस्यऊर्वस्य पुत्रंऋचीकंसम्यक्धनुर्वेदउपस्थास्यतेउपस्थानंकरिष्यति ७ सत्विति सऋचीकः तंधनुर्वेदंप्रतिगृह्यपुत्रेजमदग्नौ
संक्रामयिष्यति ८ ९ तवकुलात्जमदग्निःकन्यामधिगमिष्यतिप्राप्स्यति यदर्थंतदाह उद्भावनेति भवतोवंशस्यउद्भावनार्थंउत्कर्षार्थंपुत्रमुत्पादयिष्यति

भृगूणांक्षत्रियायाज्यानित्यमेतज्जनाधिप तेचभेदंगमिष्यंतिदैवयुक्तेनहेतुना २ क्षत्रियाश्चभृगून्सर्वान्वधिष्यंतिनराधिप आगर्भादनु
कृंतंतोदैवदंडनिपीडिताः ३ ततउत्पत्स्यतेस्माकंकुलेगोत्रविवर्धनः ऊर्वोनाममहातेजाज्वलनार्कसमद्युतिः ४ सत्रैलोक्यविनाशाय
कोपाग्निंजनयिष्यति महींसपर्वतवनांयःकरिष्यतिभस्मसात् ५ कंचित्कालंतुवह्निंचसएवंशमयिष्यति समुद्रेवडवावक्त्रेप्रक्षिप्य
मुनिसत्तमः ६ पुत्रंतस्यमहाराजऋचीकंभृगुनंदनम् साक्षात्कृत्स्नोधनुर्वेदःसमुपस्थास्यतेनघ ७ क्षत्रियाणामभावायदैवयु-
क्तेनहेतुना सतुतंप्रतिगृह्यैवपुत्रेसंक्रामयिष्यति ८ जमदग्नौमहाभागेतपसाभावितात्मनि सचापिभृगुशार्दूलस्तंवेदंधारयि-
ष्यति ९ कुलात्तुतवधर्मात्मन्कन्यांसोधिगमिष्यति उद्भावनार्थंभवतोवंशस्यभरतर्षभ १० गाधेर्दुहितरंप्राप्यपौत्रींतवमहातपाः
ब्राह्मणंक्षत्रधर्माणंपुत्रमुत्पादयिष्यति ११ क्षत्रियंविप्रकर्माणंबृहस्पतिमिवौजसा विश्वामित्रंतवकुलेगाधेःपुत्रंसुधार्मिकम् १२
तपसामहतायुक्तंप्रदास्यतिमहाद्युते स्त्रियौतुकारणंतत्रपरिवर्त्तेभविष्यतः १३ पितामहनियोगाद्वैनान्यथैतद्भविष्यति तृतीयेपु
रुषेतुभ्यंब्राह्मणत्वमुपैष्यति भवितात्वंचसंबंधीभृगूणांभावितात्मनाम् १४ भीष्मउवाच कुशिकस्तुमुनेर्वाक्यंच्यवनस्य
महात्मनः श्रुत्वाहृष्टोभवद्राजावाक्यंचेदमुवाचह १५ एवमस्त्विितिधर्मात्मातदाभरतसत्तम च्यवनस्तुमहातेजाःपुनरेवनराधि
पम् १६ वरार्थंचोदयामासतमुवाचसपार्थिवः बाढमेवंकरिष्यामिकामंत्वत्तोमहामुने १७ ब्रह्मभूतंकुलंमेस्तुधर्मेचास्यमनोभ
वेत् १८ एवमुक्तस्तथेत्येवंप्रत्युक्त्वाच्यवनोमुनिः अभ्यनुज्ञायनृपतिंतीर्थयात्रांययौतदा १९ एतत्तेकथितंसर्वमशेषेणमयानृप
भृगूणांकुशिकानांचअभिसंबंधकारणम् २० यथोक्तमृषिणाचापितदातदभवन्नृप जन्मरामस्यचमुनेर्विश्वामित्रस्यचैवहि २१
इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेच्यवनकुशिकसंवादेषट्पंचाशत्तमोऽध्यायः ५६

ऋचीकमितिपूर्वपदस्थेनसहान्वयः
१० ११ १२ स्त्रियौऋचिकस्यस्त्रीगाधेःस्त्रीचमुनेश्च्यवनस्यइत्यन्वयः १३ १४ १५ १६ १७ १८
१९ २० २१ इतिश्रीमन्महाभारतेआनुशासनिकेपर्वणिटीकायांषट्पंचाशत्तमोऽध्यायः ५६ ६७ ६७ ६७ ६७

पार्थिवसंघातैः पार्थिवसमूहैः १ २ ३ ४ ५ शरीरंउग्रेणतपसायोक्तुंयोजतुमिच्छामीत्यन्वयः ५ परीक्ष्येतियुधिष्ठिरंबुध्यानिपुणंनिष्णातमितिपरीक्ष्यभीष्मो-
भाषत ६ प्रेत्यभावेपरलोकेज्ञानंपरोक्षज्ञानं दीक्षायाःफलेनसहान्वयः ७ ८ ९ १० ११ १२ शाकदीक्षाभिः शाकाहारव्रतैः १३ १४ १५

युधिष्ठिरउवाच श्रुत्वामीवनिशाम्यद्यचिंतयानःपुनःपुनः हीनांपार्थिवसंघातैःश्रीमद्भिःपृथिवीमिमाम् १ प्राप्यराज्यानिशतशोमहींजित्वा
चभारत कोटिशःपुरुषान्हत्वापरितप्येपितामहः २ कानुतासांवरस्त्रीणामवस्थाभविष्यति याहीनापतिभिःपुत्रैर्मातुलैर्भ्रातृभिस्तथा ३
वयंहितान्कुरून्हत्वाज्ञातींश्चसुहृदोपिवा अवाक्छीर्षाःपतिष्यामोनरकेनात्रसंशयः ४ शरीरंयोक्तुमिच्छामितपसोग्रेणभारत उपदिष्ट-
मिहेच्छामितत्त्वतोहंविशांपते ५ वैशंपायनउवाच युधिष्ठिरस्यतद्वाक्यंश्रुत्वाभीष्मोमहामनाः परीक्ष्यनिपुणंबुध्यायुधिष्ठिरम
भाषत ६ रहस्यमद्भुतंचैवशृणुवक्ष्यामियत्त्वयि यागतिःप्राप्यतेयेनप्रेत्यभावेविशांपते ७ तपसाप्राप्यतेस्वर्गस्तपसाप्राप्यतेयशः
आयुःप्रकर्षोभोगाश्चलभ्यंतेतपसाविभो ८ ज्ञानविज्ञानमारोग्यंरूपंसंपत्तथैवच सौभाग्यंचैवतपसाप्राप्यतेभरतर्षभ ९ धनंप्राप्नो
तितपसामौनेनाज्ञांप्रयच्छति उपभोगस्तुदानेनब्रह्मचर्येणजीवितम् १० अहिंसायाःफलरूपंदीक्षायाजन्मवैकुले फलमूलाशिनांराज्यंस्वर्ग
पर्णाशिनांभवेत् ११ पयोभक्षोदिवंयातिदानेनद्रविणाधिकः गुरुशुश्रूषयाविद्यानित्यश्राद्धेनसंततिः १२ गवाढ्यःशाकदीक्षाभिःस्वर्गमाहुस्तृ
णाशिनाम् स्त्रियस्त्रिषवणंस्नात्वावायुंपीत्वाक्रतुंलभेत् १३ नित्यस्नायीभवेद्दक्षःसंध्येतुद्वेजपन्द्विजः मरुंसाधयतोराज्यंनाकपृष्ठमनाश
के १४ स्थंडिलेशयमानानांगृहाणिशयनानिच चीरवल्कलवासोभिर्वासांस्याभरणानिच १५ शय्यासनानियानानियोगयुक्तेतपोधने
अग्निप्रवेशेनियतंब्रह्मलोकेमहीयते १६ रसानांप्रतिसंहारात्सौभाग्यमिहविंदति आमिषप्रतिसंहारात्प्रजान्यायुष्मतीभवेत् १७ उदवासं
वसेद्यस्तुसनराधिपतिर्भवेत् सत्यवादीनरश्रेष्ठदैवतैःसहमोदते १८ कीर्तिर्भवतिदानेनतथारोग्यमहिंसया द्विजशुश्रूषयाराज्यंद्विज-
त्वंचापिपुष्कलम् १९ पानीयस्यप्रदानेनकीर्तिर्भवतिशाश्वती अन्नस्यतुप्रदानेनदृश्यतेकामभोगता २० सांत्वदःसर्वभूतानांसर्वशो
कैर्विमुच्यते देवशुश्रूषयाराज्यंदिव्यंरूपंनियच्छति २१ दीपालोकप्रदानेनचक्षुष्मान्भवतेनरः प्रेक्षणीयप्रदानेनस्मृतिंमेधांचविंदति २२
गंधमाल्यप्रदानेनकीर्तिर्भवतिपुष्कला केशश्मश्रुधारयतामग्र्याभवतिसंततिः २३

रसानांरसयुक्तद्रव्याणांप्रतिसंहाराद्वर्जनात् आमिषंलोभ्यंवस्तु १७ १८ देवशुश्रूषयाराज्यंदिव्यरूपंनियच्छतिद्विजत्वंचापिपुष्कलमितिपाठेप्राप्नोतीतिशे
षः १९ २० २१ प्रकर्षेणईक्ष्यते तत्प्रेक्षणीयमितिद्रव्यं २२ २३

वीरस्थानात् योगिस्थानात् २४ ब्रह्मदेयाब्राह्मणविवाहेनदेयाकन्या २५ २६ २७ २८ २९ धेनुंतिलानामितियावतावस्त्रेणहत्वाधेनुराच्छादिताभ-
वति तद्वस्त्रपूरिततिलास्तिलधेनुरितिपरिभाषा मानवंगवादानंतारयते इतिपरेणान्वयः ३० ३१ ३२ नैवेशिकंगृहम् ३३ ततोविशिष्टंकनकंसन्कृतंसु

उपवासंचदीक्षांचअभिषेकंचपार्थिव कृत्वाद्वादशवर्षाणिवीरस्थानाद्विशिष्यते २४ दासीदासमलंकारान्क्षेत्राणिचगृहाणिच ब्रह्मदेयांसु
तांदत्वाप्राप्नोतिमनुजर्षभ २५ क्रतुभिश्चोपवासैश्चत्रिदिवंयातिभारत लभतेचशिवंज्ञानंफलपुष्पप्रदोनरः २६ सुवर्णशृंगैस्तुविराजि
तानांगवांसहस्रस्यनरःप्रदानात् प्राप्नोतिपुण्यंदिविदेवलोकमित्येवमाहुर्दिविदेवसंघाः २७ प्रयच्छतेयःकपिलांसवत्सांकांस्योपदोहांकन
काग्रशृंगीम् तैस्तैर्गुणैःकामदुहास्यभूत्वानरंप्रदातारमुपैतिसागौः २८ यावंतिरोमाणिभवंतिधेन्वास्तावत्कालंप्राप्यसगोप्रदानात् पुत्रां
श्चपौत्रांश्चकुलंचसर्वमासप्तमंतारयतेपरत्र २९ सदक्षिणांकांचनचारुशृंगींकांस्योपदोहांद्रविणोत्तरीयाम् धेनुंतिलानांददतोद्विजायलो-
कावसूनांसुलभाभवंति ३० स्वकर्मभिर्मानवंसंनिरुद्धंतीव्रांधकारेनरकेपतंतं महार्णवेनौरिववायुयुक्तादानंगवांतारयतेपरत्र ३१ योब्र-
ह्मदेयांतुददातिकन्यांभूमिप्रदानंचकरोतिविप्रे ददातिचान्नंविधिवच्चयश्चसलोकमाप्नोतिपुरंदरस्य ३२ नैवेशिकंसर्वगुणोपपन्नंददातिवै
यस्तुनरोद्विजाय स्वाध्यायचारित्र्यगुणान्वितायतस्यापिलोकाःकुरुषूत्तरेषु ३३ धुर्यप्रदानेनगवांतथावैलोकानवाप्नोतिनरोवसूनाम्
स्वर्गायचाहुस्तुहिरण्यदानंततोविशिष्टंकनकप्रदानम् ३४ छत्रप्रदानेनगृहंवरिष्ठंयानंतथोपानहसंप्रदाने वस्त्रप्रदानेनफलंस्वरूपंगं
धप्रदानात्सुरभिर्नरःस्यात् ३५ पुष्पोपगंवाथफलोपगंवायःपादपंस्पर्शयतेद्विजाय सस्त्रीकमृद्धंबहुरत्नपूर्णंलभत्ययत्नोपगतंगृहंवै ३६
भक्ष्यान्नपानीयरसंप्रदातासर्वान्समाप्नोतिरसान्प्रकामम् प्रतिश्रयाच्छादनसंप्रदाताप्राप्नोतितान्येवनसंशयोत्र ३७ स्रग्धूपगंधाननुले-
पनानिस्नानानिमाल्यानिचमानवोयः दद्याद्द्विजेभ्यःसभवेदरोगस्तथाभिरूपश्चनरेंद्रलोके ३८ बीजैरशून्यंशयनैरुपेतंदद्याद्गृहंयःपुरु
षोद्विजाय पुण्याभिरामंबहुरत्नपूर्णंलभत्यधिष्ठानवरंसराजन् ३९ सुगंधचित्रास्तरणोपधानंदद्यान्नरोयःशयनंद्विजाय रूपान्वितांप
क्षवतींमनोज्ञांभार्यामयत्नोपगतांलभेत्सः ४० पितामहस्यानवरोवीरशायीभवेन्नरः नाधिकंविद्यतेयस्मादित्याहुःपरमर्षयः ४१ वैशं
पायनउवाच तस्यतद्वचनंश्रुत्वाप्रीतात्माकुरुनंदनः नाश्रमेरोचयद्वासंवीरमार्गाभिकांक्षया ४२ ततोयुधिष्ठिरःप्राहपांडवान्पुरुषर्षभ
पितामहस्ययद्वाक्यंतद्वोरोचत्विातिप्रभुः ४३ ततस्तुपांडवाःसर्वेद्रौपदीचयशस्विनी युधिष्ठिरस्यतद्वाक्यंबाढमित्यभ्यपूजयन् ४४

वर्णं हिरण्यंरजतं-
वा ३४ हिरण्यंसुवर्णं गवांधुर्यप्रदानेनइत्यन्वयः धुर्यं श्रेष्ठं ३५ पुष्पोपगंफलोपगं पादपमित्यन्वयः ३६ ३७ ३८ ३९ ४० अनवरोअन्यूनः ४१ ४२ ४३ वोयुष्माकंपितामहस्य
वाक्यंरोचतरुचिविषयीभवत बाढमित्यभ्यपूजयन् ...

इतिश्रीमहाभारते आनुशासनिकेपर्वणिटीकायांसप्तपंचाशत्तमोऽध्यायः ५७ १ यस्यांभूमौ आरामतडागानांचकर्तव्यतातांभूमिमाह सुप्रदर्शेति शुभदर्शनीयाभूमिरितिपरेणान्वयः सुप्रदृश्याबलवतीतिपाठः अर्थाद्बलवतीयाभूमिस्तस्यां आरामस्यातिसंभवात् २ ३ ४ ५ ६ चतुर्विधानांजरायुजो-

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेसप्तपंचाशत्तमोऽध्यायः ५७ युधिष्ठिरउवाच आरामाणांतडागानांयत्फलंकुरुपुंगव तदहंश्रोतुमिच्छामित्वत्तोद्यभरतर्षभ १ भीष्मउवाच सुप्रदर्शाबलवतीचित्राधातुविभूषिता उपेतासर्वभूतैश्चश्रेष्ठाभूमिरिहोच्यते २ तस्याःक्षेत्रविशेषाश्चतडागानांचबंधनम् औदकानिचसर्वाणिप्रवक्ष्याम्यनुपूर्वशः ३ तडागानांचवक्ष्यामिकृतानांचापियेगुणाः त्रिषुलोकेषुसर्वत्रपूजनीयस्तडागवान् ४ अथवामित्रसदनंमैत्रंमित्रविवर्द्धनम् कीर्तिसंजननंश्रेष्ठंतडागानांनिवेशनम् ५ धर्मस्यार्थस्यकामस्यफलमाहुर्मनीषिणः तडागसुकृतंदेशेक्षेत्रमेकंमहाश्रयम् ६ चतुर्विधानांभूतानांतडागमुपलक्षयेत् तडागानिचसर्वाणिदिशंतिश्रियमुत्तमाम् ७ देवामनुष्यगंधर्वाःपितरोरगराक्षसाः स्थावराणिचभूतानिसंश्रयंतिजलाशयम् ८ तस्मात्तांस्तेप्रवक्ष्यामितडागेयेगुणाःस्मृताः याचतत्रफलावाप्तिर्ऋषिभिःसमुदाहृता ९ वर्षाकालेतडागेतुसलिलंयस्यतिष्ठति अग्निहोत्रफलंतस्यफलमाहुर्मनीषिणः १० शरत्कालेतुसलिलंतडागेयस्यतिष्ठति गोसहस्रस्यसप्रेत्यलभतेफलमुत्तमम् ११ हेमंतकालेसलिलंतडागेयस्यतिष्ठति सवैबहुसुवर्णस्ययज्ञस्यलभतेफलम् १२ यस्यवैशैशिरेकालेतडागेसलिलंभवेत् तस्याग्निष्टोमयज्ञस्यफलमाहुर्मनीषिणः १३ तडागसुकृतंतस्यवसंतेतुमहाश्रयम् अतिरात्रस्ययज्ञस्यफलंससमुपाश्नुते १४ निदाघकालेपानीयंतडागेयस्यतिष्ठति वाजिमेधफलंतस्यफलंवैमुनयोविदुः १५ सकुलंतारयेत्सर्वंयस्यखातेजलाशये गावःपिबंतिसलिलंसाधवश्चनराःसदा १६ तडागेयस्यगावस्तुपिबंतितृषिताजलम् मृगपक्षिमनुष्याश्चसोऽश्वमेधफलंलभेत् १७ यत्पिबंतिजलंतत्रस्नायंतेविश्रमंतिच तडागेयस्यतत्सर्वंप्रेत्यानंत्यायकल्पते १८ दुर्लभंसलिलंतातविशेषेणपरत्रवै पानीयस्यप्रदानेनप्रीतिर्भवतिशाश्वती १९ तिलान्दत्तपानीयंदीपान्दत्तजाग्रत ज्ञातिभिःसहमोदध्वमेतत्प्रेत्यसुदुर्लभम् २० सर्वदानैर्गुरुतरंसर्वदानैर्विशिष्यते पानीयंनरशार्दूलतस्माद्दातव्यमेवहि २१ एवमेतत्तडागस्यकीर्तितंफलमुत्तमम् अतऊर्ध्वंप्रवक्ष्यामिवृक्षाणामवरोपणम् २२ स्थावराणांचभूतानांजातयःषट्प्रकीर्तिताः वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः २३

ण्डजस्वेदजानांभूतानांप्राणिनांतान्तडागान् ७ ८ यावत्तत्रफलावाप्तिः याचतत्रफलावाप्तिरितिचपाठः ९ ऋतुनाम्नोद्भेरवनफलंकथयति वर्षाकाले-त्यादिः सम्यक्जलाशयखननाशक्तौहेतुनिर्देशोबोध्यः १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ षट्जातीनाह वृक्षगुल्मलतेति वल्लीसारवतीलता विशेषा २३ ५७

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांअष्टपंचाशत्तमोऽध्यायः ५८ या-
नीमानिबहिर्वेद्यांतीर्थेदानानिकथितानि तेभ्योविशिष्टंकिंदानमित्यादिप्रश्नः १ २ ३ व्यसनेवाप्यनुग्रहइतिपाठः व्यसनेपरमसंकटेदत्तंदानमित्यन्वयः ४

एताजात्यस्तुवृक्षाणांतेषांरूपेगुणास्त्विति कीर्तिश्चमानुषेलोकेप्रेत्यचैवफलंशुभम् २४ लभतेनामलोकेचपितृभिश्चमहीयते देवलोकेग
तस्यापिनामतस्यननश्यति २५ अतीतानागतेचोभेपितृवंशेचभारत तारयेद्वृक्षरोपीचतस्माद्वृक्षांश्चरोपयेत् २६ तस्यपुत्राभवंत्येतेपाद
पानात्रसंशयः परलोकगतःस्वर्गंलोकांश्चाप्नोतिसोऽव्ययान् २७ पुष्पैःसुरगणान्वृक्षाःफलैश्चापितथापितॄन् छाययाचातिथिंतातपूजयं
तिमहीरुहः २८ किन्नरोरगरक्षांसिदेवगंधर्वमानवाः तथाऋषिगणाश्चैवसंश्रयंतिमहीरुहान् २९ पुष्पिताःफलवंतश्चतर्पयंतीहमा
नवान् वृक्षदंपुत्रवत्वृक्षास्तारयंतिपरत्रतु ३० तस्मात्तडागेतत्वृक्षारोप्याःश्रेयोर्थिनासदा पुत्रवत्परिपाल्याश्चपुत्रास्तेधर्मतःस्मृताः
३१ तडागकृद्वृक्षरोपीइष्टयज्ञश्चयोद्विजः एतेस्वर्गेमहीयंतेयेचान्येसत्यवादिनः ३२ तस्मात्तडागंकुर्वीतआरामांश्चैवरोपयेत् यजेच्च
विविधैर्यज्ञैःसत्यंचसततंवदेत् ३३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेआरामतडागवर्णनंनाम अष्टपंचाशत्तमोऽध्या
यः ५८ युधिष्ठिरउवाच यानीमानिबहिर्वेद्यांदानानिपरिचक्षते तेभ्योविशिष्टंकिंदानंमतंतेकुरुपुंगव १ कौतूहलंहिपरमंत
त्रमेविद्यतेप्रभो दातारंदत्तमन्वेतियद्दानंप्रतिचक्ष्वमे २ भीष्मउवाच अभयंसर्वभूतेभ्योव्यसनेचाप्यनुग्रहः यच्चाभिलषितंदद्या
त्तृषितायाभियाचते ३ दत्तमन्येतयद्दत्वातद्दानंश्रेष्ठमुच्यते दत्तंदातारमन्वेतियद्दानंभरतर्षभ ४ हिरण्यदानंगोदानंपृथिवीदानमेवच एता
निवैपवित्राणितारयंत्यपिदुष्कृतम् ५ एतानिपुरुषव्याघ्रसाधुभ्योदेहिनित्यदा दानानिहिनरंपापान्मोक्षयंतिनसंशयः ६ यद्यदिष्टतमंलो-
केयच्चास्यदयितंगृहे तत्तद्गुणवतेदेयंतदेवाक्षयमिच्छता ७ प्रियाणिलभतेनित्यंप्रियदःप्रियकृत्तथा प्रियोभवतिभूतानामिहचैवपरत्रच
८ याचमानमभिमानादनासक्तमकिंचनम् योनार्चतियथाशक्तिमनृशंसोयुधिष्ठिर ९ अमित्रमपिचेद्दीनंशरणैषिणमागतम् व्यस
नेयोनुगृण्हातिसवैपुरुषसत्तमः १० कृशायहृतवित्तायवृत्तिक्षीणायसीदते अपहन्यात्क्षुधांयस्तुनतेनपुरुषःसमः ११ क्रियानियमिता-
न्साधून्पुत्रदारैश्चकर्षितान् अयाचमानान्कौंतेयसर्वोपायैर्निमंत्रयेत् १२ आशिषंयेनदेवेषुनचमर्त्येषुकुर्वते अर्हंतोनित्यसंतुष्टास्त-
थालब्धोपजीविनः १३

५ ६ ७ ८ याचमानंजनं अभिमानादहंकाराद्योनार्चतीत्यन्वयः ९ १० हृतवित्तायहृतधनाय ११ १२ आ
शिषमभिलाषंदेवेषुमर्त्येषुचयेनकुर्वतेतेअर्हंतोनित्यसत्वस्थाः १३ ५९ ५९ ५९ ५९ ५९ ५९ ५९ ५९ ५९

युक्तैरुपयुक्तैः १४ आवसथैर्यज्ञावभृथनलैः शाखाविशेषैर्वा १५ १६ विद्यास्नाताः ज्ञानशौचाः व्रतस्नाताः चांद्रायणप्राजापत्यादिव्रतशौचाः केचित्तु वि-
द्यास्नाताः प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि वा ग्रहणांतं वा बुध्यतिशयादल्पेन गुरुनिरपेक्षोच्चारणक्षमाध्ययनेन ग्रहणांतं वा एवं वेदं समाप्य गुरुनिरपेक्षोच्चारणक्षम
तां संपाद्य पश्चादंगैर्व्याकरणादिभिरुपांगैस्तदा काव्यादिभिस्तज्ज्ञानं संपाद्य पश्चात्तत्राक्षरनिरपेक्षोच्चारणपर्यंतं मधुमांसादिवर्जनं विचारकाले च तद्वर्ज्जनं ब्रह्मच
र्यं चोभयत्राविशिष्टं एवं विद्यां संपाद्य पश्चात् स्नायात् तत्र गुरुरेनं आहूय दिव्यैर्गंधजलैर्दिव्याभिरोषधिभिर्मंत्रपुरस्सरं स्नापयित्वा पुष्पालंकारपरिष्कृतं गवादिनार्घदा
नं कृत्वा शय्यायामुपवेश्य प्रतिष्ठापयेत् आशिषश्च दद्यात् वेदाः प्रतिभांतु सत्यसंकल्पता स्तु सर्वाः सिद्धयः स्फुरंतु ब्रह्मप्रजाविवर्द्धतां इत्यादिरूपा गिरिशा गिव्यवस्थाप

आशीविषसमेभ्यश्च तेभ्यो रक्षस्व भारत तान्युक्तैरुपजिज्ञास्य तथा द्विजवरोत्तमान् १४ कृतैरावसथैर्नित्यं सप्रेष्यैः सपरिच्छदैः निमंत्रयेथाः
कौरव्य सर्वकामसुखावहैः १५ यदि ते प्रतिगृह्णीयुः श्रद्धापूतं युधिष्ठिर कार्यमित्येव मन्वाना धार्मिकाः पुण्यकर्मिणः १६ विद्यास्नाता व्रत
स्नाताश्च ते ह्यनपाश्रित्यजीविनः गूढस्वाध्यायतपसो ब्राह्मणाः संशितव्रताः १७ तेषु शुद्धेषु दांतेषु स्वदारपरितोषिषु यत्करिष्यसि कल्याणं तत्ते
लोके युधांपते १८ यथाग्निहोत्रं सुहुतं सायंप्रातर्द्विजातिना तथा दत्तं द्विजातिभ्यो भवत्यथ यतात्मसु १९ एष ते विततो यज्ञः श्रद्धापूतः
सदक्षिणः विशिष्टः सर्वयज्ञेभ्यो ददतस्तात वर्त्तताम् २० निवापो दानसलिलस्तादृशेषु युधिष्ठिर निवसन्पूजयंश्चैव तेष्वानृण्यं नियच्छति
२१ य एवैनं न कुप्यंते न लुभ्यंति तृणेष्वपि त एव नः पूज्यतमा ये चापि प्रियवादिनः २२ एते न बहु मन्यंते न प्रवर्त्तंति चापरे पुत्रवत्परिपाल्यास्ते न
मस्तेभ्यस्तथाभयम् २३ ऋत्विक्पुरोहिताचार्या मृदुब्रह्मधरा हि ते क्षात्रेणापि हि संसृष्टं तेजः शाम्यति वै द्विजे २४

नात उपचिता आशिषः प्रयच्छंति
तदाशीर्दानांतं कार्यं विद्यास्नानं तद्युक्ता विद्यास्नाताः व्रतानि गायत्र्यादीनि वेदाध्ययनकाले यानि क्रियंते अश्वमेधो ब्राह्मणपाठे अश्वमेधा सदाचारादयः प्रतिकांडं
अध्यापने उक्ता निर्वाहो पहृतवेदाध्ययनार्थाः इत्यर्थः १७ १८ १९ २० निवापः पितृदानस्थानं दानसलिलः सर्वदानार्थं जलं दानस्वच्छो वा हे युधिष्ठि
र तादृशेषु जनेषु मध्ये त्वमेको भवेति शेषः २१ दम्भस्य शमनमाह न तेन कुप्यंति तृणेष्वपीति तृणक्लेशाभावः यद्वा तदा स्कनगं द्रव्यांतरेष्वपीति भावः नोऽस्माकं येज
नानोऽस्मान्मान्यानिति कृत्वा न मानतां कुर्वंति अपरे ब्रह्मवर्ज्जयंति लोभादिना च वर्त्तंते ते पुत्रवत्परिपाल्यास्तेभ्यो नमः यतस्तद्भयं अस्य कर्तव्यमिति वेति शेषः २२
२३. ब्राह्मणस्य महात्म्यमाह क्षात्रेणापि हीति क्षात्रेण क्षत्रियेण असृष्टं उपार्ज्जितं तेजः सामर्थ्यं बलं तत् द्विजे शाम्यति शांतं भवति ब्रह्मतेजो बलं बलमित्युक्त
त्वात् तेजः शाम्यति वै द्विजे इति पाठः २४ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

अस्तिमेइतिमेममअस्तिधनादिकमितिशेषः अलंबलवानस्मिराजास्मीति कृत्वाब्राह्मणान् वासोभिरशनेनभोजनेनयाचयंश्च्छोः भोजयेरेव माङ्योगेअडभावः ई-
त्यंचार्थे २५ २६ यथोत्साह उत्साहमनतिक्रम्य त्वमिलल्लतुविलसंतु ब्राह्मणाइतिपूर्वेणान्वयः २७ अक्षयःप्रसादोयेषांविप्राणांअक्षयप्रसादानाम् अ
वक्षेप्तुंनिक्षेप्तुंदातुमित्यर्थः २८ २९ यदिनोइति यदिनोऽस्मान्ब्राह्मणाःअपूजिताःक्षत्रियेस्थितंदारुणंनिष्ठुरंप्रजानामपालनंपश्यंतस्त्यजेयुस्तदातेषांक्षत्रियाणां-
जीवितेनकोर्थः किंप्रयोजनमितिपरस्यजीवितेनार्थइत्यनेनसहान्वयः ३० किंचवेदयज्ञलोकरहितानांब्राह्मणाश्रयंविनाजीवितेननार्थइत्याह अवेदानामिति ब्रा-

अस्तिमेबलवानस्मिराजास्मीतियुधिष्ठिर ब्राह्मणान्याचपर्यश्चवासोभिरशनेनच २५ यच्छोभार्थंबलार्थंवावित्तमस्तितवानघ तेननतेब्रा
ह्मणाःपूज्याःस्वधर्ममनुतिष्ठता २६ नमस्कार्यास्तथाविप्रावर्त्तमानायथातथम् यथासुखंयथोत्साहंलल्लतुलयिपुत्रवत् २७ कोह्यक्षय
प्रसादानांसुहृदामल्पतोषिणाम् वृत्तिमर्हत्यवक्षेप्तुंत्वदन्यःकुरुसत्तम २८ यथापत्याश्रयोधर्मःस्त्रीणांलोकेसनातनः सदैवसागतिर्ना
न्यातथास्माकंद्विजातयः २९ यदिनोब्राह्मणास्तातसंत्यजेयुरपूजिताः पश्यंतोदारुणंकर्मसततंक्षत्रियेस्थितम् ३० अवेदानामयज्ञाना-
मलोकानामवर्त्तिनाम् कस्तेषांजीवितेनार्थस्त्वांविनाब्राह्मणाश्रयम् ३१ अत्रतेवर्त्तयिष्यामियथाधर्मःसनातनम् राजन्योब्राह्मणान्राज
न्पुरापरिचचारह ३२ वैश्योराजन्यमित्येवशूद्रोवैश्यमितिश्रुतिः दूराच्छूद्रेणोपचर्योब्राह्मणोग्निरिवज्वलन् ३३ संस्पर्शपरिचर्यस्तुवै
श्येनक्षत्रियेणच मृदुभावान्सत्यशीलान्सत्यधर्मानुपालनान् ३४ आशीविषानिवक्रुद्धांस्तानुपाचरतद्विजान् अपरेषांपरेषांचप
रेभ्यःश्चापियेपरे ३५ क्षत्रियाणांप्रतपतांतेजसाचबलेनच ब्राह्मणेष्वेवशाम्यंतितेजांसिचतपांसिच ३६ नमेपिताप्रियतरोनत्वंतात
तथाप्रियः नमेपितुःपितताराजन्नचात्मानचजीवितम् ३७ त्वत्तश्चमेप्रियतरःपृथिव्यांनास्तिकश्चन त्वत्तोपिमेप्रियतराब्राह्मणाभरत
र्षभ ३८ ब्रवीमिसत्यमेतच्चयथाहंपांडुनंदन तेनसत्येनगच्छेयंलोकान्यत्रचशांतनुः ३९ पश्येयंचसतांलोकाञ्छुचीन्ब्रह्मपुरस्कृ
तान् तत्रमेतातगंतव्यमन्हायचचिरायच ४० सोहमेतादृशाँल्लोकान्दृष्ट्वाभरतसत्तम यन्मेकृतंब्राह्मणेषुनतप्येतेनपार्थिव ४१
इतिश्रीम०आनु०दानधर्मेएकोनषष्टितमोऽध्यायः ५९ युधिष्ठिरउवाच यौचस्यातांचरणेनोपपन्नौयौविद्ययासदृशौजन्मनाच ता
भ्यांदानंकतमस्मैविशिष्टमयाचमानायचयाचतेच १

ह्मणाएवामीषांनिस्तारभूताइतिभावः ३१ योवर्णोयंपरिचरतितद्वाहराजन्योब्रह्मणानिति ३२
३३ प्रकीर्णकधर्ममाह संस्पर्शपरिचर्यस्त्वित्यारभ्याध्यायसमाप्तिंयावत् संस्पर्शेनपादसंमार्जनादिनापरिचर्यायस्यब्राह्मणस्यसंस्पर्शपरिचर्योवैश्येनक्षत्रियेणचे
ति ३४ ३५ ३६ ३७ ३८ अन्हायझटिति ३९ ४० ४१ इतिश्री०आनुशासनिकेपर्वणिटीकायांएकोनषष्टितमोऽध्यायः ५९ योब्राह्मणोचरणेनवेद

शाखया प्रथमद्वितीयतृतीयमीमांसाध्यायपदेन वा उपपन्नो स्यातां सोचविद्यया जन्मना च सदृशौ स्यातां ताभ्यां तयोर्मध्ये कतमस्मै दानं विशिष्टमिति प्रश्नः याचतो
याचमानात् सकाशात् अयाचते दानं श्रेष्ठमाहुः १ प्रश्ने आचारक्षमादितारतम्येन पात्रं बोध्यं २ धृतिर्धर्मः अनर्थना अप्रार्थना ३ याचकस्य निंदामाह
याच्यमाहुरिति निंदामाह अनीशस्य कृपणस्य मध्ये याच्यं अभिहारं निंद्यमित्याहुः आचारहीनः क्लीबश्च नित्यं याचनकस्तथा कृषिर्जीवाश्चापदीच पङ्क्तिर्निंदित एव च ग
ते वर्जनीयाः यतो याच्यं अभिहारं अभिसर्वतो भावेन हरति महत्त्वादिकमित्यभिहारस्तदिति ४ याचमानस्य मरणमेवाह म्रियते याचमान इति ५ ६ यदीति

भीष्म उवाच श्रेयो वै याचतः पार्थ दानमाहुरयाचते अर्हत्तमो वै धृतिमान्कृपणादधृतात्मनः २ क्षत्रियो रक्षणधृतिर्ब्राह्मणोऽनर्थ
नाधृतिः ब्राह्मणो धृतिमान्विद्वान्देवान्प्रीणाति तुष्टिमान् ३ याच्यमाहुरनीशस्य अभिहारं च भारत उद्वेजयन्ति याचन्ति सदा भूतानि दस्यु
वत् ४ म्रियते याचमानो वै न जातु म्रियते ददत् ददत्संजीवयत्येनमात्मानं च युधिष्ठिर ५ आनृशंस्यं परो धर्मो याचते यत्प्रदीयते अया
चतः सीदमानान्सर्वोपायैर्निमन्त्रयेत ६ यदि वै तादृशा राष्ट्रान्वसेयुस्ते द्विजोत्तमाः भस्मच्छन्नानिवाग्नींस्तान्बुध्येथास्त्वं प्रयत्नतः ७
तपसा दीप्यमानास्ते दहेयुः पृथिवीमपि अपूज्यमानाः कौरव्य पूजार्हास्तु तथाविधाः ८ पूज्या हि ज्ञानविज्ञानतपोयोगसमन्विताः तेभ्यः
पूजां प्रयुञ्जीथा ब्राह्मणेभ्यः परंतप ९ ददद्बहुविधान्दायानुपागच्छन्नयाचताम् यदग्निहोत्रे सुहुते सायंप्रातर्भवेत्फलम् १० वि
द्यावेदव्रतवति तद्दानफलमुच्यते विद्यावेदव्रतस्नातानव्यपाश्रयजीविनः ११

तादृशाः अयाचमाना अथ च गूढा यस्माद्वा द्विजोत्तमा राष्ट्रं प्रतिवसेयुः वसतिं कुर्युस्तान् भस्मच्छन्नानग्नीनिव बुध्येथाः आपाततस्तेषां तेजो न ज्ञायते परिणामे भस्म-
सात्कुर्वन्तीति भावः अतः परं ब्राह्मणस्याध्यायसमाप्तिं यावत्स्पष्टं कथयन्ति ७ तपसा दीप्यमाना इत्यादि तेभ्यो ब्राह्मणेभ्यः पूजां प्रयुञ्जीथा इत्यन्वयः प्रयुञ्जेथा इ
ति च पाठः ८ ९ ददद्बहुविधानीति अयाचतां ब्राह्मणानां उपसमीपे आगच्छत बहुविधान् दायान् द्रव्यादीन् ददत् पुमान् सुहुते विधिवद्धुते अग्निहोत्रे यत्फलं भवे
त् १० विद्यावेदव्रतवति स्नातेन तेन दानफलं हवनदानफलं उच्यते प्राप्नोतीत्यर्थः तद्दानफलमित्यत्र दानपदं यागपरं ज्ञेयम् ११ ७ ७ ७ ७

क्लृप्तैरावसथैरिति कृतावभृथस्नानैर्जलैः हृद्यैः प्रीतैः प्रेष्यैः कर्मकारिभिर्जनैश्च दासभूतैर्निमंत्रयेथाः इत्यन्वयः केचित्तु क्लृप्तैरावसथैरिति काष्ठमात्रक्लृप्तैस्तृणकृतैः अ
पक्वेष्टकाचितैर्वा केचित्तु हृद्यैरनेन पक्वेष्टकापाषाणाचितैः सुधाधवलितैर्नानाविधदांतराजतसौवर्णप्रवालमणिगवाक्षैः नानाविधचित्रयुक्तैः ध्वजपताकासुवर्ण-
कलशाद्यन्वितैरितिव्यज्यते नानाविधदासदासीयुक्तैः सपरिच्छदैः सकलगृहोपकरणवद्भिः १२ एवंसर्वोपस्करयुक्तानिवेश्मानिसंपाद्य पूर्वोक्तगुणान्ब्राह्मणान् तत्प्र
तिग्रहार्थं आकारयेथा एवंविधानिवेश्मानिदास्येतत्र त्वंमे प्रतिगृह्णीता भवेतिनितेषां वेश्मानिविनयपुरस्सरंगत्वा प्रार्थयेथा इत्यर्थः अन्यैश्च ग्रामपुरादिकामैरन्यर्थः द्विजो
त्तमानितिसर्वस्वदानयोग्यतां सूचयति अर्पिते इति निमंत्रिता ब्राह्मणाः श्रद्धोपेतं श्रद्धयाउपयुक्तं निमंत्रणं गृण्हीयुः १३ एतेच ब्राह्मणादीनाइत्याह एवंनिमं-

गृहस्वाध्यायतपसो ब्राह्मणान्संशितव्रतान् क्लृप्तैरावसथैर्हृद्यैः सप्रेष्यैः सपरिच्छदैः १२ निमंत्रयेथाः कौरव्य कामैश्चान्यैर्द्विजोत्तमान्
अर्पिते प्रतिगृण्हीयुः श्रद्धोपेतं युधिष्ठिर १३ कार्यमित्येव मन्वाना धर्मज्ञाः सूक्ष्मदर्शिनः अर्पिते ब्राह्मणा भुक्त्वा गताः सोद्धरणा गृहान् १४
येषां दाराः प्रतीक्षंते पर्जन्यमिव कर्षकाः अन्नानि प्रातःसवने नियताः ब्रह्मचारिणः १५ ब्राह्मणास्तात भुंजानास्त्रेताग्निं प्रीणयंत्युत
माध्यंदिनं ते सवनं ददतस्तात वर्त्ततां १६ गोहिरण्यानि वासांसि तेनेंद्रः प्रीयतां तव तृतीयसवनं तेवै वैश्वदेवं युधिष्ठिर १७ यद्दे-
वेभ्यः पितृभ्यश्च विप्रेभ्यश्च प्रयच्छसि अहिंसा सर्वभूतेभ्यः संविभागश्च भागशः १८ दमस्त्यागो धृतिः सत्यं भवत्यवभृथाय ते ए
षते विततो यज्ञः श्रद्धापूतः सदक्षिणः १९ विशिष्टः सर्वयज्ञानां नित्यं ताते प्रवर्त्ततां २० इतिश्रीमहाभारते आनुशासनिके पर्वणि
दानधर्मे षष्टितमोऽध्यायः ६०

ऋणग्रहणं कार्यं कर्तुयोग्यमितिमन्वाना ब्राह्मणा भुक्त्वा सोद्धरणा उद्धृतं धरणं शास्त्रीयपरिमितं षोडशमाषरौ
प्यं येषां ब्राह्मणानां ते सोद्धरणा उद्धरणसहिताः गृहानुगताः प्राप्ताः भवेयुः एतं निमंत्रणमात्रं मन्वाना इतिभावः तथाचमनुः द्वे कृष्णले समधृते विज्ञेयो रूप्यमाष-
कः ते षोडश स्याद्धरणं पुराणश्चैवराजत इति कृष्णला रक्तिकेति प्रसिद्धं सोद्धरणान् गृहान् इतिचपाठः क्वचित् गृहस्यविशेषणं सोद्धरणं गृहे षोडशमाषकरौप्याभावे
इतिचभावः १४ येषां दारा इति प्रतीक्षंते अतिथिभोजनमितिशेषः १५ तेतव माध्यंदिनं सवनं स्नानं १६ गोहिरण्यादिदानं ददतस्तव वर्त्ततां मध्यान्हसमयस्य मानुषेप्र
शस्तत्वं तथाचोक्तं पूर्वाण्हो वै देवानां मध्यंदिनो मनुष्याणामपराण्हः पितृणामिति मध्यंदिनमितिक्वचित्पाठः श्रुतौ तृतीयं स्नानं वर्त्ततामित्यनेन सहान्वयः प्रयच्छसी
त्यनेन वैश्वदेवस्यान्वयः १७ १८ एषदमत्यागादियोगः सर्वयज्ञानां विशिष्टः प्रवर्त्ततां १९ २० इति आनुशासनिके पर्वणि टीकायां षष्टितमोऽध्यायः ६० ७९

पुनर्युधिष्ठिरः दानयज्ञादिकंपृच्छति दानंयज्ञक्रियाचेतिप्रेत्यपरलोके ज्यायःश्रेष्ठम् १ २ अंतर्वेद्यांवेदिकामध्ये ३ रौद्रंउग्रं तस्यक्षत्रियस्यवैतानिकं
श्रौतम् ४ राज्ञांक्षत्रियाणांप्रतिगृण्हीयुर्ब्राह्मणाइतिशेषः क्षत्रियस्येतिपूरणीयं.५ ६ मैत्रान्दयावतः शीलंविनयानुगतं साधुचेष्टंशीलमुच्यते ७ तेब्राह्मणा
स्तेनवनकरिष्यंतिप्रतिग्रहमितिशेषः तर्हिप्रतिग्रहाभावेनेतवकृतंकृतंभविष्यतीत्यन्वयः ततःकृतकृतोसत्यर्थंयज्ञान्साधय यज्ञविशेषणंस्वाद्वन्नानिति स्वादु
स्वाद्यंअन्नंअदनीयंयेषांतेतान्प्रजावतः ८ संतर्पितान्युक्तान्बहुकारिणःबहुपोष्यान्इष्टमितिदानेयज्ञादिकमंतर्भवति याज्ञिकेभ्योदत्तंचेत्तत्कृतस्ययज्ञस्यषष्ठां
शः तवापिभविष्यतिइतिनयज्ञार्थमल्पकःकोभूरित्यर्थः ९ १० धर्मान्पंचप्रतिथिसंमेतएवभोक्ष्येइत्यादीन्येसंतःसंवर्धयंतितेसर्वस्वैर्भर्तव्याराज्ञातस्यराज्ञस्तेमंतु

युधिष्ठिरउवाच दानयज्ञक्रियाचेहकिंस्वित्प्रेत्यमहाफलम् कस्यज्यायःफलंप्रोक्तंकीदृशेभ्यःकथंकदा १ एतदिच्छामिविज्ञातुंयाथात
थ्येनभारत विद्वन्जिज्ञासमानायदानधर्मान्प्रचक्ष्वमे २ अंतर्वेद्यांचयद्दत्तंश्रद्धयाचानृशंस्यतः किंस्विन्निःश्रेयसंताततन्मेब्रूहिपितामह ३
भीष्मउवाच रौद्रंकर्मक्षत्रियस्यसततंतातवर्त्तते तस्यवैतानिकंकर्मदानंचैवेहपावनम् ४ नतेपापकृतांराज्ञांप्रतिगृण्हंतिसाधवः ए
तस्मात्कारणाद्यज्ञैर्यजेद्राजाप्तदक्षिणैः ५ अथचेत्प्रतिगृण्हीयुर्दद्यादहरहर्नृपः श्रद्धामास्थायपरमांपावनंह्येतदुत्तमम् ६ ब्राह्मणांस्तर्प
यन्द्रव्यैस्ततोयज्ञेयतव्रतः मैत्रान्साधून्वेदविदःशीलवृत्ततपोन्वितान् ७ यत्तेतेनकरिष्यंतिकृतंतेनभविष्यति यज्ञान्साधयसाधुभ्यःस्वाद्व
न्नान्दक्षिणावतः ८ इष्टंदत्तंचमन्येथाआत्मानंदानकर्मणा पूजयेथायायजूकांस्तवाप्यंशोभवेद्यथा ९ प्रजावतोभरेथाश्चब्राह्मणान्बहु
कारिणः प्रजावांस्तेनभवतियथाजनयितातथा.१० यावतःसाधुधर्मान्वैसंतःसंवर्द्धयंत्युत सर्वस्वैश्चापिभर्त्तव्यानरायेबहुकारिणः ११
समृद्धःसंप्रयच्छत्वंब्राह्मणेभ्योयुधिष्ठिर धेनूरनडुहोन्नानिच्छत्रंवासांस्युपानहौ १२ आज्यानियजमानेभ्यस्तथान्नानिचभारत
अश्ववंतिचयानानिवेश्मानिशयनानिच एतेदेयाव्युष्टिमंतोलघूपायाश्चभारत १३ अजुगुप्सांश्चविज्ञायब्राह्मणान्वृत्तिकर्षितान्
उपच्छन्नंप्रकाशंवावृत्त्यातान्प्रतिपालयेत् १४ राजसूयाश्वमेधाभ्यांश्रेयस्तत्क्षत्रियान्प्रति एवंपापैर्विनिर्मुक्तस्त्वंपूतःस्वर्गमाप्स्यसि १५.

राज्ञः बहुकारिणःअत्यंतंउपकर्त्तारोभवंति ११ समृद्धःसंपन्नैश्वर्यः देयद्रव्याण्याह धेनूरित्यादि. १२ एतेधेन्वादयः व्युष्टिमंतःफलवंतः व्युष्टिःफलम् १३
उपच्छन्नमप्रकाशम् १४ १५ श्रीगोपालोविजयते

ब्रह्मभूयस्त्वंब्रह्मत्वं १६ वृत्तिंजीविकाम् १७ अलब्धस्यलाभोयोगः योगस्यपरिरक्षणंक्षेम ब्राह्मणेष्वक्तानिष्ठत् मात्तनेभ्योप्रतिपालनंनेनेव तेभ्यस्तेषामित्यर्थे
तेषांब्राह्मणानांप्रतिपालनंमामास्त्वित्यन्वयः १८ अर्थवान्ब्राह्मणउन्मादीस्यादित्याह अनर्थइति १९ २० यइतिसार्द्धेनापालयिनृराज्ञोनिंदामाह यौराजा
रक्षिभ्यः संग्रहपरेभ्योधनंदत्वायज्ञेयज्ञार्थंधनमानयध्वमितिब्रुवन्राष्ट्रंविलुंपतियज्वेति यच्चासौनृदूनिभिः भीतंभययुक्तंयथास्यात्तथादत्तं आदायप्रजाभ्यइतिशेषः
दारुणंयथास्यात्तथायजेत् अस्यराज्ञः यजनंप्रशंसंति २१ क्षत्रियस्यकर्त्तव्यविधिमाह अपीडिताइत्यादि २२ यदानपरीति यदापरिनिषिच्येतयदानपरिषिच्येत

संचयित्वापुनःकोशंयद्राष्ट्रंपालयिष्यसि तेनत्वंब्रह्मभूयस्त्वमवाप्स्यसिधनानिच १६ आत्मनश्चपरेषांचवृत्तिंसंरक्षभारत पुत्रव-
च्चापिभृत्यान्स्वान्प्रजाश्चपरिपालय १७ योगःक्षेमश्चतेनित्यंब्राह्मणेष्वस्तुभारत तदर्थंजीवितंतेस्तुमातेभ्योप्रतिपालनम् १८ अन
र्थोब्राह्मणस्यैषयद्वित्तनिचयोमहान् श्रियात्वभीक्ष्णंसंवासोदर्पयेत्संप्रमोहयेत् १९ ब्राह्मणेषुप्रमूढेषुधर्मोविप्रणशेद्ध्रुवम् धर्मप्र
णाशेभूतानामभावःस्यान्नसंशयः २० योरक्षिभ्यःसंप्रदायराजाराष्ट्रंविलुंपति यज्ञेराष्ट्राद्धनंतस्मादानयध्वमितिब्रुवन् यच्चादायत
दाज्ञप्तंभीतंदत्तंसुदारुणम् २१ यजेद्राजानतंयज्ञंप्रशंसंत्यस्यसाधवः अपीडिताःसुसंवृद्धायेददत्यनुकूलतः २२ तादृशेनाप्युपायेन
यष्टव्यंनित्यमादृतैः यदापरिनिषिच्येतनिहितेवैयथाविधि २३ तदाराजामहायज्ञैर्यजेतबहुदक्षिणैः वृद्धबालधनंरक्ष्यमंधस्यकृपण
स्यच २४ नखातपूर्वंकुर्वीतनरुदंतीधनंहरेत् हृतंकृपणवित्तंहिराष्ट्रंहंतिनृपश्रियम् २५ दद्याच्चमहतोभोगान्क्षुद्भयंप्रणुदेत्सता
म् येषांस्वादूनिभोज्यानिसमवेक्ष्यंतिबालकाः २६ नाश्नंतिविधिवत्तानिकिंनुपापतरंततः यदितेतादृशोराष्ट्रेविद्वान्सीदेत्क्षुधाद्विज
भ्रूणहत्यांचगच्छेथाःकृत्वापापमिवोत्तमम् २७ धिक्तस्यजीवितंराज्ञोराष्ट्रेयस्यावसीदति द्विजोन्योवामनुष्योपिशिबिराहवचोयथा
२८

इतिचपाठः निहितः प्रजानांहितोऽनुकूलोराजाप्रजाभिर्धनैर्नेषिच्येतनाभिषिच्येत २३ वृद्धबालधनंरक्ष्यमंधस्यकृपणस्यचेतिसमासप्रविष्टं धनप
दंबहिष्कृत्यान्वयोजनीयंतेनांधस्यकृपणस्यसहायहीनस्यदरिद्रस्यचेतिधनंरक्ष्यमित्यन्वयः २४ नखातपूर्वंउन्मूलनस्यकिमपिनकुर्वीतसुतःस्त्रीपालनीयातत्रापि
दीननयारुदंतीतस्याधनंहरेत् हृतंकृपणवित्तंहिराष्ट्रंहंतिनृपश्रियं हृतंकृपणवृत्तंहीतिक्वचित्पाठः कृपणवित्तंकदर्यस्यवित्तंहृतंबलान्नीतंसत्राष्ट्रंहंतिनृपश्रि
यंहंति नृपेतिसंबोधनपदंवाकृपणवृत्तंकदर्यवृत्तंचेष्टितंराज्ञाकृतमंआचरितंसत्राष्ट्रंहंति २५ येषांस्वादूनीतियेषांबालकाः स्वादूनिभोज्यानिसमवेक्ष्यंति
तेषांक्षुद्भयंप्रणुदेत्खंडयेत् द्रव्यस्वामीत्यन्वयः २६ यदितेइतितेतव २७ २८ ७ ७ ७ ७ ७

यस्य राज्ञो विषये देशे स्नातको ब्रह्मचारी एति आगच्छति अथ च क्षुधा हेतुभूतया वा संसीदति तस्य राज्ञो राष्ट्रं अवृद्धिं वृद्ध्यभावं विंदते लभते राष्ट्रं विशिनष्टि सहराजकं राज
समूहेन सह एतीति आसम्यक्प्रकारेण एतीति अनिवृष्टिरनावृष्टिरित्यादि शब्दिर्यत्र तथा एवं राष्ट्रं सत् अवृद्धिं विंदते लभत इति २९ राष्ट्रस्यापालने राज्ञो मरणरू
पत्वमाह क्रोशंत्य इत्यारभ्य चतुर्थमतमस्माकमिति पर्यंतं ३० ३१ ३२ ३३ ३४ ३५ त्वान्वाम् ३६ इति आनुशासनिके पर्वणि टीकायामेकषष्टित

यस्य स्म विषये राज्ञः स्नातकः सीदति क्षुधा अवृद्धिमेति तद्राष्ट्रं विंदते सहराजकम् २९ क्रोशंत्यो यस्य वै राष्ट्राद्ध्रियंते तरसा स्त्रियः क्रोश
तां पतिपुत्राणां मृतोसौ न च जीवति ३० अरक्षितारं हर्त्तारं विलोप्तारमनायकम् तं वै राजकलिं हन्युः प्रजाः सन्नह्य निर्घृणम् ३१ अहं
वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः स संहत्य निहंतव्यः श्वेव सोन्माद आतुरः ३२ पापं कुर्वंति यत्किंचित्प्रजा राज्ञा ह्यरक्षिताः चतुर्थं तस्य
पापस्य राजा विंदति भारत ३३ अथाहुः सर्वमेवेति भूयोर्धमिति निश्चयः चतुर्थं मतमस्माकं मनोः श्रुत्वानुशासनम् ३४ शुभं वा यच्च कुर्वं
ति प्रजा राज्ञा सुरक्षिताः चतुर्थं तस्य पुण्यस्य राजा चाप्नोति भारत ३५ जीवंतं त्वानुजीवंतु प्रजाः सर्वा युधिष्ठिर पर्जन्यमिव भूतानि महाद्रुम
मिवांडजाः ३६ कुबेरमिव रक्षांसि शतक्रतुमिवामराः ज्ञातयस्त्वानुजीवंतु सुहृदश्च परंतप ३७ इति श्रीमहाभारते आनुशासनिके प
र्वणि दानधर्मे एकषष्टितमोऽध्यायः ६१ युधिष्ठिर उवाच इदं देयमिदं देयमितीयं श्रुतिरादरात् बहुदेयाश्च राजानः किंस्विद्दानम
नुत्तमम् १ भीष्म उवाच अतिदानानि सर्वाणि पृथिवीदानमुच्यते अचला ह्यक्षया भूमिर्दोग्ध्री कामानिवोत्तमान् २ दोग्ध्री वासां
सि रत्नानि पशून्व्रीहियवांस्तथा भूमिदः सर्वभूतेषु शाश्वतीरेधते समाः ३ यावद्भूमेरायुरिह तावद्भूमिद एधते न भूमिदानादस्तीह परं किं
चिद्युधिष्ठिर ४ अप्यल्पं प्रददुः सर्वे पृथिव्या इति नः श्रुतम् भूमिमेव ददुः सर्वे भूमिं ते भुंजते जनाः ५ स्वकर्मैवोपजीवंति नरा इह परत्र च
भूमिर्भूतिर्महादेवी दातारं कुरुते प्रियम् ६ य एतां दक्षिणां दद्यादक्षयां राजसत्तम पुनर्नरत्वं संप्राप्य भवेत्स पृथिवीपतिः ७ यथा दानं त
था भोग इति धर्मेषु निश्चयः संग्रामे वा तनुं जह्याद्दद्याद्वा पृथिवीमिमाम् ८ इत्येतत्क्षत्रबंधूनां वदंति परमाश्रियम् पुनाति दत्ता पृथिवी दा
तारमिति शुश्रुम ९

मोऽध्यायः ६१ इदं देयमिति राजानः क्षत्रियाश्च बहुदेया बहुधनं देयं येषां ते १ अतीति सर्वाणि दानानि अतिक्रम्य पृथिवीदानमती
त्युच्यते शास्त्रेणेति शेषः २ शाश्वतीः समाः अनेकवर्षाणीत्यन्वयः ३ ४ ५ भूमेः प्रशंसामाह भूमिर्भूतिरिति ६ य एतामिति एतां भूमिमुद्दिश्य दक्षिणां तत्त
त्परिमितसुवर्णं दद्यात् भूमिदस्तेन दक्षिणा देयेत्याह य एतामिति एतां भूमिं दक्षिणां दक्षिणाभूतां दद्यादिति कश्चित् ७ ८ ९

इत्येतदारभ्य ग्रंथेत्यंतस्य श्लोकत्रयस्य तात्पर्यम् क्षत्रबंधूनां क्षत्रियाणां राज्ञां सैव भूमिर्दानादिना पापापनोदिका नान्यद्दानादिकं पृथिवीदानसमं पावनं परमं पवित्रंच १० शर्वनेदृष्टांतः जननीयथेति ११ प्रियमुत्कृष्टं भूमिदानमित्यनेन पृथिव्या नाम प्रियदत्तेति कथयति नामास्याः प्रियदत्तेति १२ १३ १४ ह्रीनत्वौपक्षत्यर्थं गमयतः नचापात्रे दानमिति शेषः अफलपतिना भूपतीतरेण कथंचन लब्धापि भूमिर्नाधिष्ठेया किंतु भूपतिनैवेति तथा दत्तदानेन दत्तदेशेन नवाचरेत्संसंचरेत् न गूहेत् क्षितिपाले नागूहेत् अंतर्धानं न कुर्यात् भूमिदानं दानांतरवत् अप्रख्यापनीयमिति तात्पर्यम् १५ १६ १७ १८ गोचर्ममात्रेणेति दशहस्तेन दं-

अपि पापसमाचारं ब्रह्मघ्नमपि चानृतम् सैव पापं प्लावयति सैव पापात्प्रमोचयेत् १० अपि पापकृतां राज्ञां प्रतिगृण्हंति साधवः पृथि
वीं नान्यदिच्छंति पावनं जननी यथा ११ नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम् दानं वाप्यथ वादानं नामास्याः प्रथमं प्रियम् १२
य एतां विदुषे दद्यात्पृथिवीं पृथिवीपतिः पृथिव्यामेतदिष्टं स राजा राज्यमितो व्रजेत् १३ पुनश्चासौ जनं प्राप्य राजवत्स्यान्न संशयः
तस्मात्प्राप्यैव पृथिवीं दद्याद्विप्राय पार्थिवः १४ नाभूमिपतिना भूमिरधिष्ठेया कथंचन न चापात्रेण वा ग्राह्या दत्तदानेन वाचरेत् १५
ये चान्ये भूमिमिच्छेयुः कुर्युरेवं न संशयः यः साधोर्भूमिमादत्ते न भूमिं विंदते तु सः १६ भूमिं दत्वा तु साधुभ्यो विंदते भूमिमुत्तमाम्
प्रेत्य चेह च धर्मात्मा संप्राप्नोति महद्यशः १७ यस्य विप्रास्तु शंसंति साधोर्भूमिं सदैव हि न तस्य शत्रवो राजन् प्रशंसंति वसुंधराम्
१८ यत्किंचित्पुरुषः पापं कुरुते वृत्तिकर्षितः अपि गोचर्ममात्रेण भूमिदानेन पूयते १९ येपि संकीर्णकर्माणो राजानो रौद्रकर्मिणः
तेभ्यः पवित्रमाख्येयं भूमिदानमनुत्तमम् २० अल्पांतरमिदं शश्वत्पुराणा मेनिरे जनाः यो यजेताश्वमेधेन दद्याद्वा साधवे महीम्
२१ अपि चेत्सुकृतं कृत्वा शंकेरन्नपि पंडिताः अशक्यमेकमेवैतद्भूमिदानमनुत्तमम् २२ सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च
सर्वमेतन्महाप्राज्ञो ददाति वसुधां ददत् २३ तपो यज्ञः श्रुतं शीलमलोभः सत्यसंधता गुरुदैवतपूजा च एतावर्तंति भूमिदम् २४
भर्तृनिःश्रेयसे युक्तास्त्यक्तात्मानो रणे हताः ब्रह्मलोकगताः सिद्धा नातिक्रामंति भूमिदम् २५ यथा जनित्री स्वपुत्रं क्षीरेण भरते स
दा अनुगृण्हाति दातारं तथा सर्वरसैर्मही २६

डेन त्रिंशद्दंडनिपातनम् पार्श्वतो दंडमानेन गोचर्म परिचक्षते वृषएकः शतं गावो यस्यां भूमौ-
हि शेरते गोचर्ममात्रा सा भूमिरुच्यतेऽर्थविशारदैः १९ २० अल्पांतरं सदृशं विदुः पुराणाः ज्ञानिनः २१ अन्यद्वा सुकृतं शोभनं कर्म महीं साधवे दद्यादस्मद्विधो जन इति पंडिताः २२ पंडिताः विचारका न शंकेरन् नानाविधं सत्कर्म कृत्वापि साधवे महीं दद्यादिति निश्चितं कुर्युरिति भावः २३ २४ भरते पुष्णाति दुधाञ् धारणपोषणयोः २५ २६

किंकरो दंडः किंकर इति दंडस्य नाम २७ २८ वृत्तिकरीं जीवननिर्वाहिकां बहुभ्यो दीयते यत्र हूयते प्राणिनो बहु होना... बहवो यत्र तत्सत्रमभिधीयते एवंच सर्वर्द्धते यस्य स सत्री २९ ३० उदीर्णं उत्कृष्टं दत्वेत्यनेन संबंधः ३१ नित्यनिवृत्तिपरो यो ब्राह्मणः स प्रतिगृहीतकर्त्तव्य इत्याह ब्राह्मणं वृत्तिसंपन्नमिति ... वृत्तिर्यजनयाजनादि एतस्य प्रतिग्रहे पंचीकृते धर्मलोपान्नरकापत्तिरिति भावः ३२ ३३ या भूमिर्गीता गाथाः ३४ ३५ व्याहृतिं व्याहरणम् ३६ ३७

मृत्युर्वै किंकरो दंडस्तमो वन्हिः सुदारुणः घोराश्च दारुणाः पाशा नोपसर्पंति भूमिदम् २७ पितॄंश्च पितृलोकस्थान्देवलोके च देवताः संतर्पयति शांतात्मा यो ददाति वसुंधराम् २८ कृशाय म्रियमाणाय वृत्तिग्लानाय सीदते भूमिं वृत्तिकरीं दत्वा सत्री भवति मानवः २९ यथा धावति गौर्वत्सं स्रवंती वत्सला पयः एवमेव महाभाग भूमिर्भवति भूमिदम् ३० हलकृष्टां महीं दत्वा सबीजां सफलामपि उदीर्णां वापि शरणं यथा भवति कामदः ३१ ब्राह्मणं वृत्तिसंपन्नमाहिताग्निं शुचिव्रतम् नरः प्रतिग्राह्य महीं न याति परमापदम् ३२ यथा चंद्रमसो वृद्धिरहन्यहनि जायते तथा भूमिकृतं दानं सस्ये सस्ये विवर्द्धते ३३ अत्र गाथा भूमिगीताः कीर्तयंति पुराविदः याः श्रुत्वा जामदग्न्येन दत्ता भूः काश्यपाय वै ३४ मामेवादत्त मां दत्त मां दत्वा मामवाप्स्यथ अस्मिंल्लोके परे चैव तद्दत्तं जायते पुनः ३५ य इमां व्याहृतिं वेद ब्राह्मणो वेदसंमिताम् श्राद्धस्य क्रियमाणस्य ब्रह्मभूयं स गच्छति ३६ कृत्यानामभिशस्तानामरिष्टशमनं महत् प्रायश्चित्तं महीं दत्वा पुनात्युभयतो दश ३७ पुनाति य इदं वेद वेद चाहं तथैव च प्रकृतिः सर्वभूतानां भूमिर्वै शाश्वती मता ३८ अभिषिच्यैव नृपतिं श्रावयेदिममागमम् यथा श्रुत्वा महीं दद्यान्नादद्यात्साधुतश्च ताम् ३९ सोऽयं कृत्स्नो ब्राह्मणार्थो राजार्थश्चाप्यसंशयः राजा हि धर्मकुशलः प्रथमं भूतिलक्षणम् ४० अथ येषामधर्मज्ञो राजा भवति नास्तिकः न ते सुखं प्रबुध्यंति न सुखं प्रस्वपंति च ४१ सदा भवंति चोद्विग्नास्तस्य दुश्चरितैर्नराः योगक्षेमा हि बहवो राष्ट्रं नास्याविशंति तत् ४२ अथ येषां पुनः प्राज्ञो राजा भवति धार्मिकः सुखं ते प्रतिबुध्यंते सुसुखं प्रस्वपंति च ४३ तस्य राज्ञः शुभै राज्यैः कर्मभिर्निर्वृता नराः योगक्षेमेण वृष्ट्या च विवर्धंते स्वकर्मभिः ४४ स कुलीनः स पुरुषः स बंधुः स च पुण्यकृत् स दाता स च विक्रांतो यो ददाति वसुंधराम् ४५ आदित्या इव दीप्यंते तेजसा भुवि मानवाः ददति वसुधां स्फीतां ये वेदविदुषि द्विजे ४६ यथा सस्यानि रोहंति प्रकीर्णानि महीतले तथा कामाः प्ररोहंति भूमिदानसमार्जिताः ४७

३८ ३९ ४० ४१ ४२ ४३ तस्य राज्ञः योगक्षेमा कर्त्तारः ४४ ४५ ४६ ४७

४८ चतुर्विधाःजरायुजस्वेदजोद्भिज्जाः ४९ भूतंजलंतेजोवाय्वाकाशं ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ एकादशपुरुषानितिशे

आदित्योवरुणोविष्णुर्ब्रह्मासोमोहुताशनः शूलपाणिश्चभगवान्प्रतिनंदंतिभूमिदम् ४८ भूमौजायंतिपुरुषाभूमौनिष्ठांव्र-
जंतिच चतुर्विधोहिलोकोयंयोयंभूमिगुणात्मकः ४९ एषामातापिताचैवजगतःपृथिवीपते नानयासदृशंभूतंकिंचिदस्तिज-
नाधिप ५० अत्राप्युदाहरंतीममितिहासंपुरातनम् बृहस्पतेश्चसंवादमिंद्रस्यचयुधिष्ठिर ५१ इष्ट्वाक्रतुशतेनाथमहताद-
क्षिणावता मघवावाग्विदांश्रेष्ठंपप्रच्छेदंबृहस्पतिम् ५२ मघवोवाच भगवन्केनदानेनस्वर्गतःसुखमेधते यदक्षयंमहा-
र्घंचतद्ब्रूहिवदतांवर ५३ भीष्मउवाच इत्युक्तःसशक्रेण ततोदेवपुरोहितः बृहस्पतिर्बृहत्तेजाःप्रत्युवाचशतक्रतुम् ५४ बृह
स्पतिरुवाच सुवर्णदानंगोदानंभूमिदानंचवृत्रहन् दददेतान्महाप्राज्ञःसर्वपापैःप्रमुच्यते ५५ नभूमिदानाद्देवेंद्रपरंकिंचिदितिप्र-
भो विशिष्टमितिमन्यामियथाप्राहुर्मनीषिणः ५६ येशूरानिहतायुद्धेस्वर्यातारणगृद्धिनः सर्वेतेविबुधश्रेष्ठनातिक्रामंतिभूमिदम् ५७
भर्तुर्निःश्रेयसेयुक्तास्त्यक्तात्मानोरणेहताः ब्रह्मलोकगतायुक्तानातिक्रामंतिभूमिदम् ५८ पंचपूर्वाहिपुरुषाषडन्येवसुधांगताः एका
दशददद्भूमिंपरित्रातीहमानवः ५९ रत्नोपकीर्णांवसुधांयोददातिपुरंदर समुक्तःसर्वकलुषैःस्वर्गलोकेमहीयते ६० महींस्फीतांददद्रा-
जन्सर्वकामगुणान्विताम् राजाधिराजोभवतितद्धिदानमनुत्तमम् ६१ सर्वकामसमायुक्तांकाश्यपींयःप्रयच्छति सर्वभूतानिमन्यंते
मांददातिचवासव ६२ सर्वकामदुघांधेनुंसर्वकामगुणान्विताम् ददातियःसहस्राक्षसस्वर्गंयातिमानवः ६३ मधुसर्पिःप्रवाहिण्यःप-
योदधिवहास्तथा सरितस्तर्पयंतीहसुरेंद्रवसुधाप्रदम् ६४ भूमिप्रदानान्नृपतिर्मुच्यतेसर्वकिल्बिषात् नहिभूमिप्रदानेनदानमन्यद्वि
शिष्यते ६५ ददातियःसमुद्रांतांपृथिवींशस्त्रनिर्जिताम् तंजनाःकथयंतीहयावद्भवतिगौरियम् ६६ पुण्यामृद्धिरसांभूमिंयोददाति
पुरंदर नतस्यलोकाःक्षीयंतेभूमिदानगुणान्विताः ६७ सर्वदापार्थिवेनेहसततंभूतिमिच्छता भूर्देयाविधिवच्छक्रपात्रेसुखमभीप्सु
ना ६८ अपिकृत्वानरःपापंभूमिंदत्वाद्विजातये समुत्सृजतितत्पापंजीर्णांत्वचमिवोरगः ६९

षः ५९ ६० ६१ काश्यपींपृथ्वीम् ६२ ६३
६४ ६५ गौरियमितिगौःपृथिवीयावद्भवतिस्थैर्येणतिष्ठतितावद्भूमिदानारंस्थिरत्वंकथयंतीति ६६ ६७ ६८ ६९ ७० ७१ ७२

७० स्रोतांसिनद्यादि ७१ ७२ ७३ दाताभूमिदाता दशपुरुषानतुगृण्हातिनारयति तथादातारंक्षिपन्कथंभूमिंददासिसमाददेनिवदन्दशपुरुषान्नं
तीतिपातयति ७४ प्रतिश्रुत्यांगीकृत्य ७५ ७६ इतरेषांक्षत्रियादीनां ७७ स्पर्शितांदत्तांभूमिंनाछिंद्यात्नापहरेत् ७८ ७९ ८० ८१ ८२ ८३

सागरान्सरितःशैलान्काननानिचसर्वशः सर्वमेतन्नरःशक्रददातिवसुधांददत् ७० तडागान्युदपानानिस्रोतांसिचसरांसिच
स्नेहान्सर्वरसांश्चैवददातिवसुधांददत् ७१ ओषधीर्वीर्यसंपन्नानगान्पुष्पफलान्वितान् काननोपलशैलांश्चददातिवसुधांददत् ७२
अग्निष्टोमप्रभृतिभिरिष्ट्वाचस्वाप्तदक्षिणैः नतत्फलमवाप्नोतिभूमिदानाद्यदश्नुते ७३ दाता दशानुगृण्हाति दशहंतितथाक्षिपन् पूर्व
दत्तांहरन्भूमिंनरकायोपगच्छति ७४ नददातिप्रतिश्रुत्यदत्वापिचहरेत्तुयः सबद्धोवारुणैःपाशैस्तप्यतेमृत्युशासनात् ७५ आहिता
ग्निंसदायज्ञंकृशवृत्तिंप्रियातिथिम् येभजंतिद्विजश्रेष्ठंनोपसर्पंतितेयमम् ७६ ब्राह्मणेष्वनृणीभूतःपार्थिवःस्यात्पुरंदर इतरेषांतुव
र्णानांतारयेत्कृशदुर्बलान् ७७ नाच्छिंद्यात्स्पर्शितांभूमिंपरेणत्रिदशाधिप ब्राह्मणस्यसुरश्रेष्ठकृशवृत्तेःकदाचन ७८ यथाश्रुपति
तंतेषांदीनानामवसीदताम् ब्राह्मणानांहृतेक्षेत्रेहन्यात्रिपुरुषंकुलम् ७९ भूमिपालंच्युतंराष्ट्राद्यस्तुसंस्थापयेन्नरः तस्यवासःस
हस्राक्षनाकपृष्ठेमहीयते ८० इक्षुभिःसहितांभूमिंयवगोधूमशालिनीम् गोश्ववाहनपूर्णांवाबाहुवीर्यादुपार्जिताम् ८१ निधिगर्भां
ददद्भूमिंसर्वरत्नपरिच्छदाम् अक्षयाँल्लभतेलोकान्भूमिसत्रंहितस्यतत् ८२ विधूयकलुषंसर्वंविरजाःसंमतःसताम् लोकेमही
यतेसद्भिर्योददातिवसुंधराम् ८३ यथाप्सुपतितःशक्रतैलबिंदुर्विसर्पति तथाभूमिकृतंदानंसस्येसस्येविवर्धते ८४ येरणाग्रेमहीपा
लाःशूराःसंमितिशोभनाः वध्यंतेभिमुखाःशक्रब्रह्मलोकंव्रजंतिते ८५ नृत्यगीतपरानार्योदिव्यमाल्यविभूषिताः उपतिष्ठंतिदेवेंद्रतथा
भूमिप्रदंदिवि ८६ मोदतेचसुखंस्वर्गेदेवगंधर्वपूजितः योददातिमहींसम्यग्विधिनेहद्विजातये ८७ शतमप्सरसश्चैवदिव्यमाल्यवि
भूषिताः उपतिष्ठंतिदेवेंद्रब्रह्मलोकेधरापदम् ८८ उपतिष्ठंतिपुण्यानिसदाभूमिप्रदंनरम् शंखभद्रासनंछत्रंवरस्थानवराहनम्
८९ भूमिप्रदानात्पुण्याणिहिरण्यनिचयास्तथा आज्ञासदाप्रतिहतानयशब्दावसूनिच ९० भूमिदानस्यपुण्यानिफलंस्वर्गःपुरं
दर. हिरण्यपुष्पाश्चौषध्यःकुशकांचनशाड्वलाः ९१

विसर्पतिप्रसरति ८४ समितिसंग्रामेशोभनाः समितिसंग्रामे ८५ उपतिष्ठंतिभजंति भूमिप्रदंनरं ८६
८८ पुण्यानिशंखभद्रासनादयउपतिष्ठंतीत्यन्वयः ८९ आज्ञा अप्रतिहता अप्रतिबंधिता ९० भूमिदानस्यस्वर्गोयथाफलंतथाहिरण्यपुष्पाश्चौषध्योभवं
तीतिभूमिदानं ९१

९२ आंगिरसःबृहस्पतये ९३ श्राद्धकरणसमये भूमिदानश्रवणफलमाह यइदंश्रावयेच्छ्राद्धेइति ९४ ९५ ९६ इति आनुशासनिके पर्वणि टीकायां

अमृतत्वमवाप्नोति पुरुषो ददत् नास्ति भूमिसमंदानं नास्ति मातृसमो गुरुः नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः ९२
एतदांगिरसाच्छ्रुत्वा वासवो वसुधामिमाम् वसुरत्नसमाकीर्णां ददावांगिरसे तदा ९३ यइदं श्रावयेच्छ्राद्धे भूमिदानस्य संभवम् नतस्य
रक्षसां भागो नासुराणां भवत्युत ९४ अक्षयंच भवेद्दत्तं पितृभ्यस्तन्न संशयः तस्माच्छ्राद्धेष्विदं विद्वान्भुंजतः श्रावयेद्द्विजान् ९५ इत्येत
त्सर्वदानानां श्रेष्ठमुक्तं तवानघ मया भरतशार्दूल किंभूयः श्रोतुमिच्छसि ९६ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे इंद्र
बृहस्पतिसंवादे द्विषष्टितमोऽध्यायः ६२ युधिष्ठिरउवाच कानि दानानि लोकेस्मिन्दातुकामो महीपतिः गुणाधिकेभ्यो विप्रेभ्यो द-
द्याद्भरतसत्तम १ केनतुष्यंति तेसद्यः किंतुष्टाः प्रदिशंतिच शंसमेतन्महाबाहो फलंपुण्यकृतं महत् २ दत्तंकिंफलवद्राजन्निहलोके प
रत्रच भवतः श्रोतुमिच्छामि तन्मे विस्तरतो वद ३ भीष्मउवाच इममर्थं पुरापृष्टो नारदो देवदर्शनः यदुक्तवानसौ वाक्यं तन्मे निग
दतः शृणु ४ नारदउवाच अन्नमेव प्रशंसंति देवाऋषिगणास्तथा लोकतंत्रंहि संज्ञाश्च सर्वमन्ने प्रतिष्ठितम् ५ अन्नेन सदृशंदानं
नभूतं नभविष्यति तस्मादन्नं विशेषेण दातुमिच्छंति मानवाः ६ अन्नमूर्जस्करं लोके प्राणाश्चान्ने प्रतिष्ठिताः अन्नेन धार्यते सर्वं विश्वंजग
दिदंप्रभो ७ अन्नाद्गृहस्थालोकेस्मिन्भिक्षवस्तापसास्तथा अन्नाद्भवंति वैप्राणाः प्रत्यक्षं नात्र संशयः ८ कुटुंबिने सीदते च ब्राह्मणाय
महात्मने दातव्यं भिक्षवेचान्नमात्मनो भूतिमिच्छता ९ ब्राह्मणायाभिरूपाय योदद्यादन्नमर्थिने विदधातिनिधिं श्रेष्ठं पारलौकिकमात्म
नः १० श्रांतमध्वनिवर्त्तंतं वृद्धमर्हमुपस्थितम् अर्चयेद्भूतिमन्विच्छन्गृहस्थो गृहमागतम् ११ क्रोधमुत्पतितंहित्वा सुशीलो वीतमत्सरः
अन्नदः प्राप्नुते राजन्दिविचेह च यत्सुखम् १२ नावमन्येदभिगतं नप्रणुद्यात्कदाचन अपिश्वपाकेशुनिवा नदानं विप्रणश्यति १३ योदद्या
दपरिक्लिष्टमन्नमध्वनिवर्त्तते श्रांतायादृष्टपूर्वाय समहद्धर्ममाप्नुयात् १४ पितॄन्देवानृषीन्विप्रानतिथींश्च जनाधिप योनरः प्रीणयत्यन्ने
स्तस्य पुण्यफलं महत् १५ कृत्वातिपातकं कर्म योदद्यादन्नमर्थिने ब्राह्मणाय विशेषेण नसपापेन मुह्यते १६ ब्राह्मणेष्वक्षयंदानमन्नंशू
द्रेमहाफलम् अन्नदानंहि शूद्रेच ब्राह्मणस्य विशिष्यते १७

द्विषष्टितमोऽध्यायः ६२ गुणाधिकाविप्राः १ शंसकथय मेमह्यं २ ३ ४ लोकतंत्रंलोकया
त्राम् ५ ६ ७ ८ ९ १० ११ १२ १३ अपरिक्लिष्टंपूतिदुर्गंधादिरहितमन्नं वर्त्तनेवर्त्तमानाय वृतुधातुः परस्मैपदी चुरादिर्णिचोविकल्पः १४ १५ १६ १७ ७

चरणंशाखांचरणादि ब्राह्मणेनमासपक्षांतेवागतेनातिथिनाभिक्षितः सन्यासिनायाचितः प्रत्यहं अतिथिनायाचितः यद्वाभिक्षितः सन्यासिनायाचितः सामान्येनार्थि
नागृहस्थेनान्नंदद्यात यद्वाभिक्षासंज्ञानास्थेनितारकादित्यादिवत् भिक्षितोभिक्षुकः . ब्राह्मणेनयाचितः सन् अन्नंदद्यात् भिक्षुकान्नदानेन प्रार्थनामात्रेणान्नंदद्यात् अन्ना-
त्रकेतव्यंकर्त्तव्यमितिभावः १८. १९. २० २१ प्रश्ननाग्रभुक्प्रसृतपाकंगृहेयद्गृहं भिमायमधिगच्छतीत्यन्वयः २२ महाभागेकुलेजन्मप्राप्तः २३

नपृच्छेद्गोत्रचरणंस्वाध्यायंदेशमेवच भिक्षितोब्राह्मणेनेहदद्यादन्नंप्रयाचितः १८ अन्नदस्यान्नवृक्षाश्वसर्वकामफलप्रदाः भवंति-
चेहचामुत्रनृपतेनात्रसंशयः १९ आशंसंतेहिपितरःसुवृष्टिमिवकर्षकाः अस्माकमपिपुत्रोवापौत्रोवान्नंप्रदास्यति २० ब्राह्मणोहिमहद्
भूतस्वयंदेहीतियाचति अकामोवासकामोवादत्वापुण्यमवाप्नुयात् २१ ब्राह्मणःसर्वभूतानामतिथिःप्रसृताग्रभुक् विप्रायमधिगच्छ
तिभिक्षमाणागृहंसदा २२ सत्कृताश्चनिवर्त्ततेतदतीवप्रवर्धते महाभागेकुलेप्रत्यजन्मचाप्नोतिभारत २३ दत्वात्वन्नंनरोलोकेयथा-
स्थानमनुत्तमम् नित्यमिष्टान्नदायीतुस्वर्गेवसतिसत्कृतः २४ अन्नंप्राणानराणांहिसर्वमन्नेप्रतिष्ठितम् अन्नदःपशुमान्पुत्रीधनवान्भोग
वानपि २५ प्राणवांश्चापिभवतिरूपवांश्चतथानृप अन्नदःप्राणदोलोकेसर्वदःप्रोच्यतेतुसः २६ अन्नंहिदत्वातिथयेब्राह्मणाययथा-
विधि प्रदातासुखमाप्नोतिदैवतैश्चापिपूज्यते २७ ब्राह्मणोहिमहद्भूतंक्षेत्रभूतंयुधिष्ठिर उप्यतेयत्रयद्बीजंतद्धिपुण्यफलंमहत् २८
प्रत्यक्षंप्रीतिजननंभोक्तुर्दातुर्भवत्युत सर्वाण्यन्यानिदानानिपरोक्षफलवन्त्युत २९ अन्नाद्धिप्रसवंयातिरतिरन्नाद्धिभारत धर्मार्थावन्न
तोविद्धिरोगनाशंतथान्नतः ३० अन्नंह्यमृतमित्याहपुराकल्पेप्रजापतिः अन्नंभुवंदिवंखंचसर्वमन्नेप्रतिष्ठितम् ३१ अन्नप्रणाशेभि
द्यंतेशरीरेपंचधातवः बलंबलवतोपीहप्रणश्यत्यन्नहानितः ३२ आवाहाश्चविवाहाश्चयज्ञाश्चान्नमृतेतथा निवर्त्ततेनरश्रेष्ठब्रह्मचा
त्रप्रलीयते ३३ अन्नतःसर्वमेतद्धियत्किंचित्स्थाणुजंगमम् त्रिषुलोकेषुधर्मार्थमन्नंदेयमतोबुधैः ३४ अन्नदस्यमनुष्यस्यबलमोजोय
शांसिच कीर्तिश्चवर्द्धतेशश्वत्त्रिषुलोकेषुपार्थिव ३५ मेघेषूर्ध्वंसन्निधत्तेप्राणानांपवनःपतिः तच्चमेघगतंवारिशक्रोवर्षतिभारत ३६
आदत्तेचरसान्भौमानादित्यःस्वगभस्तिभिः वायुरादित्यतस्तांश्चरसान्देवःप्रवर्षति ३७

२४ २५ २६ २७ २८ २९ ३० ३१ पंचधातवः पंचभूतानि
॥ अन्नहानितः ३२ अन्नत्यागात् आवाहाः कर्माणि विवाहाः उपयमाः तथायज्ञाश्च अन्नकृते अन्नंविनानिवर्त्तंते ब्रह्मवेदः ३३ स्थाणुःस्थावरं स्थाणुजंगममिति
समाहारेद्वंद्वेकत्वंनपुंसकत्वंच ३४ बलंशरीरसामर्थ्यं ३५ ओजस्तेजः अन्नादेवसर्वंभवतीति अन्नस्यपूर्वप्रसंगमाह मेघेषूर्ध्वंसन्निधत्तेइतिपवनोवायुरूर्ध्वंसन्नि
धत्तेगच्छति पवनस्यविशेषणं प्राणानांपतिःरक्षकः तथाचवायुनाप्रेरितोमेघस्तद्गतंवारिजलंशक्रोवर्षतीत्यन्वयः ३६ स्वगभस्तिभिःस्वकीयैःकिरणैः ३७ ६. ७.

३८ ३९ ४० ४१ प्राणान्ददातीति गृहमभ्यागताय याचकाय योन्नं दद्यात् स भूतानां प्राणान् तेजश्च ददाति ४२ आदां दत्तवान् गतज्वरो गतानुतापः ४३
४४ अन्नदानां जलानामित्रिशेषः लोकादीन्शृणु इत्यादि प्रतिपादयति अध्यायसमाप्तिर्यावत् ४५ ४६ ४७ ४८ ४९ ५० प्रासादाः पांडुराभ्राभाः
शङ्खमेघसदृशाः ५१ ५२ इति श्रीमहाभारते आनुशासनिके पर्वणि टीकायां त्रिषष्टितमोऽध्यायः ६३ १ नक्षत्रयोगेन्नदानविधौ नारदेन सह देव-

तद्यदा मेघनो वारि पतितं भवति क्षितौ । तदा वसुमती देवी स्निग्धा भवति भारत ३८ ततः सस्यानि रोहन्ति येन वर्त्तयते जगत् मांसमेदोस्थि
शुक्राणां प्रादुर्भावस्ततः पुनः ३९ संभवति ततः शुक्रात्प्राणिनः पृथिवीपते अग्नीषोमौ हि तच्छुक्रं सृजतः पुष्यतश्च ह ४० एवमन्ना-
द्धि सूर्यश्च पवनः शुक्रमेव च एक एव स्मृतो राशिस्ततो भूतानि जज्ञिरे ४१ प्राणान्ददाति भूतानां तेजश्च भरतर्षभ गृहमभ्यागताया
यर्थो दद्यादन्नमर्थिने ४२ भीष्म उवाच नारदेनैवमुक्तोहमदामन्नं सदा नृप अनसूयुस्त्वमप्यन्नं तस्माद्देहि गतज्वरः ४३
दत्त्वान्नं विधिवद्राजन्विप्रेभ्यस्त्वमिति प्रभो यथावदनुरूपेभ्यस्ततः स्वर्गमवाप्स्यसि ४४ अन्नदानां हि ये लोकास्तांस्त्वं शृणु जनाधि
प भुवनानि प्रकाशन्ते दिवि तेषां महात्मनाम् ४५ तारासंस्थानि रूपाणि नानास्तंभान्वितानि च चंद्रमंडलशुभ्राणि किंकिणीजालवंति च ४६
तरुणादित्यवर्णानि स्थावराणि चराणि च अनेकशतभौमानि सान्तर्जलचराणि च ४७ वैदूर्यार्कप्रकाशानि रौप्यरुक्ममयानि च सर्वकामफ
लाश्चापि वृक्षा भवनसंस्थिताः ४८ वाप्यो वीथ्यः सभाः कूपा दीर्घिकाश्चैव सर्वशः घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ४९ भक्ष्य
भोज्यमयाः शैला वासांस्याभरणानि च क्षीरं स्रवन्ति सरितस्तथा चैवान्नपर्वताः ५० प्रासादाः पाण्डुराभ्राभाः शय्याश्च कांचनोज्ज्वलाः ता
न्यन्नदाः प्रपद्यन्ते तस्मादन्नप्रदो भव ५१ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे दानधर्मार्थकथने त्रिषष्टितमोऽध्यायः ६३
युधिष्ठिर उवाच । श्रुतं मे भवतो वाक्यमन्नदानस्य यो विधिः नक्षत्रयोगस्येदानीं दानकल्पं ब्रवीहि मे १ भीष्म उवाच अत्राप्युदा
हरन्तीममितिहासं पुरातनम् देवक्याश्चैव संवादं महर्षेर्नारदस्य च २ द्वारकामनुसंप्राप्तं नारदं देवदर्शनम् पप्रच्छैदं वचः प्रश्नं देवकी धर्म
दर्शनम् ३ तस्याः संपृच्छमानाया देवर्षिर्नारदस्ततः आचष्ट विधिवत्सर्वं तच्छृणुष्व विशांपते ४ नारद उवाच कृत्तिकासु महाभा
गे पायसेन ससर्पिषा संतर्प्य ब्राह्मणान्साधून्लोकानाप्नोत्यनुत्तमान् ५ रोहिण्यां प्रथितैर्मार्गैर्मांसैरन्नेन सर्पिषा पयोन्नपानं दातव्य
मनृणार्थं द्विजातये ६ ।
कीसंवादं कथयति अत्रेति २ द्वारकामनुप्राप्तं देवर्षिं नारदं इदं वक्ष्यमाणं वचः प्रश्नं प्रश्नभूतं वचः पप्रच्छ प्रत्युत्तरमाकांक्षमाणा उवा
चेत्यर्थः नारदस्य स्वरूपयोग्यत्वसूचकं विशेषणमाह धर्मदर्शनमिति ३ ४ ५ मार्गैर्मांसैर्मृगमांसैः ६ ७ ७ ७ ७

दोग्ध्रींदत्वासवत्सांतुनक्षत्रेसोमदैवते गच्छंतिमानुषाल्लोकात्स्वर्गलोकमनुत्तमम् ७ आर्द्रायांकृसरंदत्वातिलमिश्रमुपोषितः नरस्तर
तिदुर्गाणिक्षुरधारांश्चपर्वतान् ८ पूपान्पुनर्वसौदत्वातथैवान्नानिशोभने तेजस्वीरूपसंपन्नोबह्वन्नोजायतेकुले ९ पुष्येणकनकंद
त्वाकृतंवाकृतमेवच अनालोकेषुलोकेषुसोमवत्ससविराजते १० आश्लेषायांतुयोरूप्यमृषभंवाप्रयच्छति ससर्वभयनिर्मुक्तःसंभवाना-
धितिष्ठति ११ मघासुतिलपूर्णानिवर्द्धमानानिमानवः प्रदायपुत्रपशुमानिहप्रेत्यचमोदते १२ फल्गुनीपूर्वसमयेब्राह्मणानामुपोषितः
भक्ष्यान्फाणितसंयुक्तान्दत्वासौभाग्यमृच्छति १३ घृतक्षीरसमायुक्तंविधिवत्षष्टिकौदनम् उत्तराविषयेदत्वास्वर्गलोकेमहीयते १४ य
द्यत्प्रदीयतेदानमुत्तराविषयेनरैः महाफलमनंतंतद्भवतीतिविनिश्चयः १५ हस्तेहस्तिरथंदत्वाचतुर्युक्तमुपोषितः प्राप्नोतिपरमाल्लोका
न्पुण्यकामसमन्वितान् १६ चित्रायामृषभंदत्वापुण्यगंधांश्चभारत चरत्यप्सरसांलोकेरमतेनंदनेतथा १७ स्वात्यामथधनंदत्वाय-
दिष्टतममात्मनः प्राप्नोतिलोकान्सशुभानिहचैवमहद्यशः १८ विशाखायामनड्वाहंधेनुंदत्वाचदुग्धदाम् सप्रासंगंचशकटंसधान्यंवस्त्र
संयुतम् १९ पितृन्देवांश्चप्रीणातिप्रेत्यचानंत्यमश्नुते नचदुर्गाण्यवाप्नोतिस्वर्गलोकंचगच्छति २० दत्वायथोक्तंविप्रेभ्योवृत्तिमिष्टांस
विंदति नरकादींश्चसंक्लेशान्नाप्नोतीतिविनिश्चयः २१ अनुराधासुप्रावारंवरान्नंसमुपोषितः दत्वायुगशतंचापिनरःस्वर्गेमहीयते २२
कालशाकंतुविप्रेभ्योदत्वामर्त्यःसमूलकम् ज्येष्ठायामृद्धिमिष्टांवैगतिमिष्टांसगच्छति २३ मूलेमूलफलंदत्वाब्राह्मणेभ्यःसमाहितः
पितृन्प्रीणयतेचापिगतिमिष्टांचगच्छति २४ अथपूर्वास्वाषाढासुदधिपात्राण्युपोषितः कुलवृत्तोपसंपन्नेब्राह्मणेवेदपारगे २५ पु
रुषोजायतेप्रेत्यकुलेसुबहुगोधने उदमंथंससर्पिष्कंप्रभूतमधिफाणितम् २६ दत्वोत्तरास्वाषाढासुसर्वकामानवाप्नुयात् दुग्धंत्वभि
जितेयोगेदत्वामधुघृतप्लुतम् धर्मनित्योमनीषिभ्यःस्वर्गलोकेमहीयते २७ श्रवणेकंबलंदत्वावस्त्रांतरितमेववा श्वेतेनयातियानेन
स्वर्गलोकानसंवृतान् २८ गोप्रयुक्तंधनिष्ठासुयानंदत्वासमाहितः वस्त्ररशिधनंसद्यःप्रेत्यराज्यंप्रपद्यते २९ गंधान्शतभिषायोगेद
त्वासागरुचंदनान् प्राप्नोत्यप्सरसांसंघान्प्रेत्यगंधांश्चशाश्वतान्. ३० पूर्वाभाद्रपदायोगेराजमाषान्प्रदायतु सर्वभक्षफलोपेतःसवै-
प्रेत्यसुखीभवेत् ३१ औरभ्रमुत्तरायोगेयस्तुमांसंप्रयच्छति सपितॄन्प्रीणयतिवैप्रेत्यचानंत्यमश्नुते ३२

३३ ३४ ३५ ३६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांचतुःषष्टितमोऽध्यायः ६४ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

कांस्योपदोहनांधेनुंरेवत्यांयःप्रयच्छति सावेत्यकामानादायदातारमुपतिष्ठति ३३ रथमश्वसमायुक्तंदत्वाश्विन्यांनरोत्तमः हस्त्यश्वर-
थसंपन्नेवर्चस्वीजायतेकुले ३४ भरणीषुद्विजातिभ्यस्तिलधेनुंप्रदस्यवै गाःसुप्रभूताःप्राप्नोतिनरःप्रेत्ययशस्तथा ३५ भीष्मउवाच
इत्येषलक्षणोद्देशःप्रोक्तोनक्षत्रयोगतः देवक्यानारदेनेहसास्नुषाभ्योब्रवीदिदम् ३६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानध
र्मेनक्षत्रयोगदाननामचतुःषष्टितमोऽध्यायः ६४ भीष्मउवाच सर्वान्कामान्प्रयच्छन्तियेप्रयच्छन्तिकांचनम् इत्येवंभगवान्न-
त्रिःपितामहसुतोब्रवीत् १ पवित्रमथचायुष्यंपितृणामक्षयंचतत् सुवर्णंमनुजेंद्रेणहरिश्चंद्रेणकीर्त्तितम् २ पानीयपरमंदानंदाना-
नांमनुरब्रवीत् तस्मात्कूपांश्चवापीश्चतडागानिचखानयेत् ३ अर्द्धंपापस्यहरतिपुरुषस्येहकर्मणः कूपःप्रवृत्तपानीयःसुप्रवृत्तश्चनित्य
शः ४ सर्वंतारयतेवंशंयस्यखातेजलाशये गावःपिबन्तिविप्राश्चसाधवश्चनराःसदा ५ निदाघकालेपानीयंयस्यतिष्ठत्यवारितम्
सदुर्गंविषमंकृत्स्नंनकदाचिदवाप्नुते ६ बृहस्पतेर्भगवतःपूष्णश्चैवभगस्यच अश्विनोश्चैववन्हेश्चप्रीतिर्भवतिसर्पिषा ७ परमंभे
षजंह्येतद्यज्ञानामेतदुत्तमम् रसानामुत्तमंचैतत्फलानांचैतदुत्तमम् ८ फलकामोयशस्कामःपुष्टिकामश्चनित्यदा घृतंदद्याद्द्विजा
तिभ्यःपुरुषःशुचिरात्मवान् ९ घृतंमासेआश्वयुजिविप्रेभ्योयःप्रयच्छति तस्मैप्रयच्छतोरूपंप्रीतौदेवाविहाश्विनौ १० पायसंसर्पिषा
मिश्रंद्विजेभ्योयःप्रयच्छति गृहंतस्यनरक्षांसिधर्षयंतिकदाचन ११ पिपासयानम्रियतेसोपच्छदश्चजायते नप्राप्नुयाच्चव्यसनंकर
कान्यःप्रयच्छति १२ प्रयतोब्राह्मणाग्रेभ्यःश्रद्धयापरयायुतः उपस्पर्शनषड्भागंलभतेपुरुषःसदा १३ यःसाधनार्थंकाष्ठानिब्रा-
ह्मणेभ्यःप्रयच्छति प्रतापनार्थंराजेंद्रवृत्तवद्भ्यःसदानरः १४ सिध्यंत्यर्थाःसदातस्यकार्याणिविविधानिच उपर्युपरिशत्रूणांवपुषा
दीप्यतेचसः १५ भगवांश्चापिसंप्रीतोवन्हिर्भवतिनित्यशः नतंत्यजंतिपशवःसंग्रामेचजयत्यपि १६ पुत्राञ्छ्रियंचलभतेयश्छत्रंसं
प्रयच्छति नचक्षुर्व्याधिंलभतेउपभोगमथाश्नुते १७ निदाघकालेवर्षेवायश्छत्रंसंप्रयच्छति नास्यकश्चिन्मनोदाहःकदाचिदपिजा
यते १८ कृच्छ्रात्सविषमाच्चैवक्षिप्रंमोक्षमवाप्नुते प्रदानंसर्वदानानांशकटस्यविशांपते एवमाहमहाभागःशांडिल्योभगवानृषिः
१९ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपंचषष्टितमोऽध्यायः ६५

सोपच्छदःसोपकरणः करकान्पात्रविशेषान् १२ उपस्पर्शनंदानं १३ १४ १५ १६ १७ १८ १९ इतिआनुशासनिकेपर्वणिटीकायांपंचषष्टितमोऽध्यायः ६५

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० इमाहिमवत्सान्निहित २१

युधिष्ठिरउवाच दह्यमानायविप्राययः प्रयच्छत्युपानहौ यत्फलंतस्यभवतितन्मेब्रूहिपितामह १ भीष्मउवाच उपानहौप्रय-
च्छेद्योब्राह्मणेभ्यःसमाहितः मर्दतेकंटकान्सर्वान्विषमान्निस्तरत्यपि २ सशत्रूणामुपरिचसंतिष्ठतियुधिष्ठिर यानंचाश्वतरीयुक्तंत
स्यशुभ्रंविशांपते ३ उपतिष्ठतिकौंतेयरौप्यकांचनभूषितम् शकटंदम्यसंयुक्तंदत्तंभवतिचैवहि ४ युधिष्ठिरउवाच यत्फलंति
लदानेचभूमिदानेचकीर्तितम् गोदानेचान्नदानेचभूयस्तद्ब्रूहिकौरव ५ भीष्मउवाच शृणुष्वममकौंतेयतिलदानस्ययत्फलम्
निशम्यचयथान्यायंप्रयच्छकुरुसत्तम ६ पितॄणांपरमंभोज्यंतिलाःसृष्टाःस्वयंभुवा तिलदानेनवैतस्मात्पितृपक्षःप्रमोदते ७ माघमा-
सेतिलान्यस्तुब्राह्मणेभ्यःप्रयच्छति सर्वसत्वसमाकीर्णंनरकंसनपश्यति ८ सर्वसत्रैश्चयजतेयस्तिलैर्यजतेपितॄन् नचाकामेन-
दातव्यंतिलश्राद्धंकदाचन ९ महर्षेःकश्यपस्यैतेगात्रेभ्यःप्रसृतास्तिलाः ततोदिव्यंगताभावंप्रदानेषुतिलाःप्रभो १० पौष्टिकारू
पकाश्चैवतथापापविनाशनाः तस्मात्सर्वप्रदानेभ्यस्तिलदानंविशिष्यते ११ आपस्तंबश्चमेधावीशंखश्चलिखितस्तथा महर्षिर्गौतमश्चापितिल
दानैर्दिवंगताः १२ तिलहोमरताविप्राःसर्वेसंयतमैथुनाः समागव्येनहविषाप्रवृत्तिषुचसंस्थिताः १३ सर्वेषामितिदानानांतिलदानंविशिष्य
ते अक्षयंसर्वदानानांतिलदानमिहोच्यते १४ उच्छिन्नेतुपुराहव्येकुशिकर्षिःपरंतपः तिलैरग्नित्रयंहुत्वाप्राप्तवान्गतिमुत्तमाम् १५ इ
तिप्रोक्तंकुरुश्रेष्ठतिलदानमनुत्तमम् विधानंयेनविधिनातिलानामिहशस्यते १६ अतऊर्ध्वंनिबोधेदंदेवानांयष्टुमिच्छताम् समागमंम-
हाराजब्राह्मणावैस्वयंभुवा १७ देवाःसमेत्यब्रह्माणंभूमिभागेयियक्षवः शुभंदेशमयाचंतयजेमइतिपार्थिव १८ देवाऊचुः
भगवंस्त्वंप्रभुर्भूमेःसर्वस्यत्रिदिवस्यच प्रभुर्भवतितस्मात्त्वंसमनुज्ञातुमर्हसि १९ ब्रह्मोवाच ददामिमेदिनीभागंभवद्भ्योहंसुरर्ष
भाः यस्मिन्देशेकरिष्यध्वंयज्ञान्काश्यपनंदनाः २० देवाऊचुः भगवन्कृतकार्याःस्मयक्ष्महेस्वाप्तदक्षिणैः इमंतुदेशंमुनयःपर्युपास
तिनित्यदा २१ ततोगस्त्यश्चकण्वश्चभृगुरत्रिर्वृषाकपिः असितोदेवलश्चैवदेवयज्ञमुपागमन् २२ ततोदेवामहात्मानईजिरेयज्ञमच्युतं
तथासमापयामासुर्यथाकालंसुरर्षभाः २३ तइष्टयज्ञास्त्रिदशाहिमवत्यचलोत्तमे षष्ठमंशंक्रतोस्तस्यभूमिदानंप्रचक्रिरे २४ प्रादेश
मात्रंभूमेस्तुयोदद्यादनुपस्कृतम् नसीदतिसकृच्छ्रेषुनचदुर्गाण्यवाप्नुते २५ शीतवातातपसहांगृहभूमिंसुसंस्कृताम् प्रदायसुरलोक
स्थःपुण्यांतेपिनचाल्यते २६

२२ २३ हिमवतिहिमवत्समीपे कुरुक्षेत्रे येषां कुरुक्षेत्रवेदिगर्भादिनिश्रुते गंगाद्वारे वा २४ २५ २६ २७ २७

२७ प्रधानंलोकंब्रह्मलोकं २८ २९ ३० ३१ तद्भूमिपरकीयांभूमिंवायोनिर्वपेत्पितृभिःपितृभ्योदद्यात् तच्छ्राद्धंतद्भूमिदानाग्ख्यकर्मचउभयंनिहन्यतेन्ट-

मुदितोवसतिप्राज्ञःशक्रेणसहपार्थिव प्रतिश्रयप्रदानाच्चसोपिस्वर्गेमहीयते २७ अध्यापककुलेजातःश्रोत्रियोनियतेंद्रियः गृहेयस्यव
सेत्तुष्टःप्रधानंलोकमश्नुते २८ तथागवार्थेशरणंशीतवर्षसहंदृढम् आसप्तमंतारयतिकुलंभरतसत्तम २९ क्षेत्रभूमिंददल्लोकेशुभां
श्रियमवाप्नुयात् रत्नभूमिंप्रदद्यात्तुकुलवंशंप्रवर्द्धयेत् ३० नचोरवरांननिर्दग्धांमहींदद्यात्कथंचन नश्मशानपरीतांचनचपापनिषेवि
ताम् ३१ पारक्येभूमिदेशेतुपितॄणांनिर्वपेत्तुयः तद्भूमिंवापिपितृभिःश्राद्धकर्मविहन्यते ३२ तस्मात्क्रीत्वामहींदद्यात्स्वल्पामपिविच-
क्षणः पिंडःपितृभ्योदत्तोवैतस्यांभवतिशाश्वतः ३३ अटवीपर्वताश्चैवनद्यस्तीर्थानियानिच सर्वाण्यस्वामिकान्याहुर्नहितत्रपरिग्रहः ३४
इत्येतद्भूमिदानस्यफलमुक्तंविशांपते अतःपरंतुगोदानंकीर्त्तयिष्यामितेनघ ३५ गावोधिकास्तपस्विभ्योयस्मात्सर्वेभ्यएवच तस्मा-
न्महेश्वरोदेवस्तपेनाभिःसहास्थितः ३६ ब्राह्मलोकेवसंत्येताःसोमेनसहभारत यांतांब्रह्मर्षयःसिद्धाःप्रार्थयंतिपरांगतिम् ३७ पयसा
हविषादध्नाशकृताचाथचर्मणा अस्थिभिश्चोपकुर्वंतिशृंगैर्वाल्यैश्चभारत ३८ नासांशीतातपौस्यातांसदैताःकर्मकुर्वते नवर्षंविषयं
वापिदुःखमासांभवत्युत ३९ ब्राह्मणैःसहितायांतितस्मात्पारमकंपदम् एवंगोब्राह्मणंतस्मात्प्रवदंतिमनीषिणः ४० रंतिदेवस्ययज्ञेताः
पशुत्वेनोपकल्पिताः अतश्चर्मण्वतीराजन्गोचर्मभ्यःप्रवर्त्तिता ४१ पशुत्वाच्चविनिर्मुक्ताःप्रदानायोपकल्पिताः ताइमाविप्रमुख्येभ्यो
योदर्दातिमहीपते ४२ निस्तरेदापदंकृच्छ्रांविषमस्थोपिपार्थिव गवांसहस्रदःप्रेत्यनरकंनप्रपद्यते ४३ सर्वत्रविजयंचापिलभतेमनुजा
धिप अमृतंवैगवांक्षीरमित्याहत्रिदशाधिपः ४४ तस्माद्ददातियोधेनुममृतंसंप्रयच्छति अग्नीनामव्ययंत्वेतद्धौम्यंवेदविदोविदुः ४५
तस्माद्ददातियोधेनुंसहौम्यंसंप्रयच्छति स्वर्गोवैमूर्त्तिमानेषवृषभंयोगवांपतिम् विप्रेगुणयुतेदद्यात्सवैस्वर्गेमहीयते ४६ प्राणा
वैप्राणिनामेतेप्रोच्यंतेभरतर्षभ तस्माद्ददातियोधेनुंप्राणानेषप्रयच्छति ४७ गावःशरण्याभूतानामितिवेदविदोविदुः तस्माद्ददातियो
धेनुंशरणंसंप्रयच्छति ४८ नवधार्थंप्रदातव्यानकीनाशेननास्तिके गोजीवनेनदातव्यातथागौर्भरतर्षभ ४९ ददत्सतादृशानांवैन
रोगांपापकर्मणाम् अक्षयंनरकंयातीत्येवमाहुर्महर्षयः ५० नकृशांनापवत्सांवावंध्यांरोगान्वितांतथा नव्यंगांनपरिश्रांतांदद्या
द्गांब्राह्मणायवै ५१ दशगोसहस्रदोहिशक्रेणसहमोदते अक्षयाँल्लभतेलोकान्नरःशतसहस्रशः ५२

स्यात्भवति ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२

५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांषट्षष्टितमोऽध्यायः ६६

इत्येतद्गोप्रदानंचतिलदानंचकीर्तितं तथाभूमिप्रदानंचशृणुचान्नेचभारत ५३ अन्नदानप्रदानंहिकौंतेयपरिचक्षते अन्नस्यहिप्रदा
नेनरंतिदेवोदिवंगतः ५४ स्नातायक्षुधितायान्नंयःप्रयच्छतिभूमिप स्वायंभुवमहत्स्थानंसगच्छतिनराधिप ५५ नहिरण्यैर्नवासो-
भिर्नान्यद्दानेनभारत प्राप्नुवंतिनराःश्रेयोयथाह्यन्नप्रदाःप्रभो ५६ अन्नंवैप्रथमंद्रव्यमन्नंश्रीश्चपरामता अन्नात्प्राणःप्रभवतितेजो
वीर्यंबलंतदा ५७ सद्योददातियश्चान्नंसदैकाग्रमनानरः नसदुर्गाण्यवाप्नोतीत्येवमाहपराशरः ५८ अर्चयित्वायथान्यायंदेवेभ्यो
न्नंनिवेदयेत् यदन्नाहिनराराजंस्तदन्नास्तस्यदेवताः ५९ कौमुदेशुक्लपक्षेतुयोन्नदानंकरोत्युत ससंतरतिदुर्गाणिप्रेत्यचानंत्यमश्नुते
६० अभुक्त्वातिथयेचान्नंप्रयच्छेद्यःसमाहितः सवैब्रह्मविदांलोकान्प्राप्नुयाद्भरतर्षभ ६१ सुकृच्छ्रामापदंप्राप्तश्चान्नदःपुरुषस्तरे
त् पापंतरतिचैवेहदुष्कृतंचापकर्षति ६२ इत्येतदन्नदानस्यतिलदानस्यचैवह भूमिदानस्यचफलंगोदानस्यचकीर्तितम् ६३ इ
तिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेषट्षष्टितमोऽध्यायः ६६ युधिष्ठिरउवाच श्रुतंदानफलंतातयत्त्वयापरिकी
र्तितम् अन्नदानंविशेषेणप्रशस्तमिहभारत १ पानीयदानमेवैतत्कथंचेहमहाफलम् इत्येतच्छ्रोतुमिच्छामिविस्तरेणपितामह
२ भीष्मउवाच हंततेवर्तयिष्यामियथावद्भरतर्षभ गदतस्तन्ममाद्येहशृणुसत्यपराक्रम ३ पानीयदानात्प्रभृतिसर्वंवक्ष्यामि
तेनघ यदन्नंयच्चपानीयंसंप्रदायाश्नुतेनरः ४ नतस्मात्परमंदानंकिंचिदस्तीतिमेमनः अन्नात्प्राणभृतस्तातप्रवर्तंतेहिसर्वशः ५ तस्मा
दन्नंपरंलोकेसर्वलोकेषुकथ्यते अन्नाद्बलंचतेजश्चप्राणिनांवर्धतेसदा ६ अन्नदानमतस्तस्माच्छ्रेष्ठमाहप्रजापतिः सावित्र्यात्यपिकौंते
यश्रुतंतेवचनंशुभम् ७ यतश्चयद्यथाचैवदेवसत्रेमहामते अन्नेदत्तेनरेणेहप्राणादत्ताभवंत्युत ८ प्राणदानाद्धिपरमंनदानमिहविद्य
ते श्रुतंहितेमहाबाहोलोमशस्यापितद्वचः ९ प्राणान्दत्वाकपोतायप्राप्तंशिबिनापुरा तांगतिंलभतेदत्वाद्विजस्यान्नंविशांपते १० त
स्माद्विशिष्टांगच्छंतिप्राणदाइतिनःश्रुतम् अन्नंचापिप्रभवतिपानीयात्कुरुसत्तम नीरजातेनहिविनानकिंचित्संप्रवर्तते ११ नीरजातश्च
भगवान्सोमोग्रहगणेश्वरः अमृतंचसुधाचैवसुधाचैवामृतंतथा १२ अन्नौषध्योमहाराजवीरुधश्चजलोद्भवाः यतःप्राणभृतांप्राणाः
संभवंतिविशांपते १३ देवानाममृतंत्वन्नंनागानांचसुधातथा पितृणांचस्वधाप्रोक्तापशूनांचापिवीरुधः १४

१ २ ३ ४ ५ ६ ७ ८ ९ १० नीरजातेनजन्मोद्भवेनधान्यादिना ११ १२ १३ १४ ६७ ६७ ६७ ६७

१५ १६ १७ १८ १९ इतिआनुशासनिकेपर्वणिटीकायांसप्तषष्टितमोऽध्यायः ६७ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ इहयमलोके १२ कालस्यवि

अन्नमेवमनुष्याणांप्राणानाहुर्मनीषिणः तच्चसर्वंनरव्याघ्रपानीयात्संप्रवर्त्तते १५ तस्मात्पानीयदानाद्धिनपरंविद्यतेक्वचित् तच्चदद्यान्न
रोनित्यंयदीच्छेद्भूतिमात्मनः १६ धन्यंयशस्यमायुष्यंजलदानमिहोच्यते शत्रूंश्चाप्यधिकौन्तेयसदातिष्ठतितोयदः १७ सर्वकामानवाप्नो
तिकीर्त्तिंचैवहिशाश्वतीम् प्रेत्यचानंत्यमश्नातिपापेभ्यश्चप्रमुच्यते १८ तोयदोमनुजव्याघ्रस्वर्गंगत्वामहाद्युते अक्षयान्समवाप्नोतिलो
कानित्यब्रवीन्मनुः १९ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेसप्तषष्टितमोऽध्यायः ६७ युधिष्ठिरउवाच तिला-
नांकीदृशंदानमथदीपस्यचैवहि अन्नानांवाससांचैवभूयएवब्रवीहिमे १ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् ब्रा
ह्मणस्यचसंवादंयमस्यचयुधिष्ठिर २ मध्यदेशेमहान्ग्रामोब्राह्मणानांबभूवह गंगायमुनयोर्मध्येयामुनस्यगिरेरधः ३ पर्णशालेतिवि
ख्यातोरमणीयोनराधिप विद्वांसस्तत्रभूयिष्ठाब्राह्मणाश्चावसंस्तथा ४ अथप्राहयमःकंचित्पुरुषंकृष्णवाससम् रक्ताक्षमूर्ध्वरोमाणं
काकजंघाक्षिनासिकम् ५ गच्छत्वंब्राह्मणग्रामंततोगत्वातमानय अगस्त्यंगोत्रतश्चापिनामतश्चापिशर्मिणम् ६ शमेनिविष्टंविद्वां
समध्यापकमनाहृतम् माचान्यमानयेथास्त्वंसगोत्रंतस्यपार्श्वतः ७ सहितादृग्गुणस्तेनतुल्योध्ययनजन्मना अपत्येषुतथावृत्तेःस
मस्तेनैवधीमता ८ तमानययथोद्दिष्टंपूजाकार्याहितस्यवै सगत्वाप्रतिकूलंतच्चकारयमशासनम् ९ तमाक्रम्यानयामासप्रतिषिद्धो-
यमेनयः तस्मैयमःसमुत्थायपूजांकृत्वाचवीर्यवान् १० प्रोवाचनीयतामेषसोन्यआनीयतामिति एवमुक्तेतुवचनेधर्मराजेनसद्विजः
११ उवाचधर्मराजानंनिर्विण्णोध्ययनेनवै योमेकालोभवेच्छेषस्तंवसेयमिहाच्युत १२ यमउवाच नाहंकालस्यविहितंप्रा-
प्नोमीहकथंचन योहिधर्मंचरतिवैतंतुजानामिकेवलम् १३ गच्छविप्रत्वमद्यैवआलयंस्वंमहाद्युते ब्रूहिसर्वंयथासर्वंकरवाणिकिम
च्युत १४ ब्राह्मणउवाच यत्तत्रकृत्वासुमहत्पुण्यंस्यात्तद्ब्रवीहिमे सर्वस्यहिप्रमाणंत्वंत्रैलोक्यस्यापिसत्तमः १५ यमउवाच
शृणुतत्त्वेनविप्रर्षेप्रदानविधिमुत्तमम् तिलाःपरमकंदानंपुण्यंचैवेहशाश्वतम् १६ तिलाश्चसंप्रदातव्यायथाशक्तिद्विजर्षभ नित्यदा-
नात्सर्वकामांस्तिलानिर्वर्त्तयन्त्युत १७ तिलान्श्राद्धेप्रशंसंतिदानमेतद्ध्यनुत्तमम् तान्प्रयच्छस्वविप्रेभ्योविधिदृष्टेनकर्मणा १८ वै-
शाख्यांपौर्णिमास्यांतुतिलान्दद्याद्द्विजातिषु तिलाभक्षयितव्याश्चसदात्वालंभनंचतैः १९

हितंआयुःप्रमाणंनप्राप्नोमिनजानामिकालेनप्रवर्त्तितं
त्वामिहस्थापयितुंनशक्नोमीत्यर्थः १३ ब्रूहिपृच्छ १४ १५ १६ निवर्त्तयंतिसाधयंति १७ १८ आलंभनंसर्वतःस्पर्शनंउद्वर्त्तनमित्यर्थः १९ ६८

२० २१ २२ २३ २४ २५ २६ २७ २८ रत्नेतितस्मैरत्नदानंकर्तव्यंयस्तान्तान्विक्रीययजनंकरोतिएतद्धितस्याभयंकरंप्रतिग्रहविक्रयज

कार्यंसततमिच्छद्भिःश्रेयःसर्वात्मनागृहे तथान्नंसर्वदादेयं पेयाश्चैवनसंशयः २० पुष्करिण्यस्तडागानिकूपांश्चैवात्रमानवैः एतत्सु
दुर्लभतरमिहलोकेद्विजोत्तम २१ आपोनित्यंप्रदेयास्तेपुण्यंह्येतदनुत्तमम् प्रपाश्चकार्यादानार्थंनित्यंतेद्विजसत्तम भुक्तेप्यन्नंप्रदे
यंतुपानीयंवैविशेषतः २२ भीष्मउवाच रत्नंक्रेसततद्भूतेनयमदूतेनवैगृहान् नीतश्चकारयामाससर्वंतद्यमशासनम् २३
नीत्वातंयमदूतोपिगृहीत्वाशर्मिणंतदा ययौसधर्मराजायन्यवेदयतचापितम् २४ तंधर्मराजोधर्मज्ञःपूजयित्वाप्रतापवान् कृत्वा
चसंविदंतेनविससर्जयथागतम् २५ तस्यापिचयमःसर्वमुपदेशंचकारह प्रेत्यैत्यचततःसर्वंचकारोक्तंयमेनतत् २६ तथाप्रशं
सतेदीपान्यमःपितृहितेप्सया तस्माद्दीपप्रदोनित्यंसंतारयतिवैपितॄन् २७ दातव्याःसततंदीपास्तस्माद्भरतसत्तम देवतानांपि
तॄणांचैवचक्षुष्यंचात्मनाविभो २८ रत्नदानंचसुमहत्पुण्यमुक्तंजनाधिप यस्तान्विक्रीययजतेब्राह्मणोह्यभयंकरम् २९ यद्वैददा
तिविप्रेभ्योब्राह्मणःप्रतिगृह्यवै उभयोःस्यात्तदक्षय्यंदातुरादातुरेवच ३० योददातिस्थितःस्थित्यातादृशायप्रतिग्रहम् उभयोरक्ष
यंधर्मंतंमनुःप्राहधर्मवित् ३१ वाससांसंप्रदानेनस्वदारनिरतोनरः सुवस्त्रश्चसुवेषश्चभवतीत्यनुशुश्रुम ३२ गावःसुवर्णंचतथाति
लाश्चैवानुवर्णिताः बहुशःपुरुषव्याघ्रवेदप्रामाण्यदर्शनात् ३३ विवाहांश्चैवकुर्वीतपुत्रानुत्पादयेतच पुत्रलाभोहिकौरव्यसर्वला
भाद्विशिष्यते ३४ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेअष्टषष्टितमोऽध्यायः ६८ युधिष्ठिरउवाच भूयएव
कुरुश्रेष्ठदानानांविधिमुत्तमम् कथयस्वमहाप्राज्ञभूमिदानंविशेषतः १ पृथिवींक्षत्रियोदद्याद्ब्राह्मणायेष्टिकर्मिणे विधिवत्प्रतिगृह्णी
यान्नत्वन्योदातुमर्हति २ सर्ववर्णैस्तुयच्छक्यंप्रदातुंफलकाङ्क्षिभिः वेदेवायत्समाख्यातंतन्मेव्याख्यातुमर्हसि ३ भीष्मउवाच तु
ल्यनामानिदेयानित्रीणितुल्यफलानिच सर्वकामफलानीहगावःपृथ्वीसरस्वती ४ योब्रूयाच्चापिशिष्यायधर्म्यांब्राह्मींसरस्वतीम् पृथि
वीगोप्रदानाभ्यांतुल्यंसफलमश्नुते ५ तथैवगाःप्रशंसंतिनतुदेयंततःपरम् संनिकृष्टफलास्ताहिलघ्वर्थाश्चयुधिष्ठिर ६ मातरःसर्व
भूतानांगावःसर्वसुखप्रदाः वृद्धिमाकाङ्क्षतानित्यंगावःकार्याःप्रदक्षिणाः ७

दीपेष्व २९ ३० ३१ ३२ ३३ ३४ इतिआनुशासनिकेपर्वणिटीका
यामष्टषष्टितमोऽध्यायः ६८ १इष्टिकर्मिणेयाजकाय २ ३ तुल्यनामानिगोशब्दवाच्यानि ४ ५ देयदानमोक्षम् परम्परम् ६ ७

२८ २९ ३० ३१ ३२ ३३ इति आनुशासनिके पर्वणि टीकायां सप्ततितमोऽध्यायः ७० १ २ ३ ४ अभिभोजनं भोजनसामग्रिकं शाकादि ५

त्वयातारितोस्मियद्यकिमन्यत्रतपोबलात् अनुजानीहिमांकृष्णगच्छेयंदिवमद्यवै २८ अनुज्ञातःसकृष्णेननमस्कृत्यजनार्दनं दिव्यमास्था
यपंथानंययौदिवमरिंदमः २९ ततस्तस्मिन्दिवंयातेनृगेभरतसत्तम वासुदेवइमंश्लोकंजगादकुरुनंदन ३० ब्राह्मणस्वंनहर्तव्यंपुरुषेण-
विजानता ब्राह्मणस्वंहृतंहंतिनृगंब्राह्मणगौरिव ३१ सतांसमागमःसद्भिर्नाफलःपार्थविद्यते विमुक्तंनरकात्पश्यनृगंसाधुसमागमात् ३२
प्रसादःफलवत्तत्रद्रोहस्तत्रतथाफलः अपचारंगवांतस्माद्वर्जयेतयुधिष्ठिर ३३ इतिश्रीम० आनुशासनिकेप० दानधर्मेनृगोपाख्याने
सप्ततितमोऽध्यायः ७० युधिष्ठिरउवाच दत्तानांफलसंप्राप्तिंगवांप्रब्रूहिमेनघ विस्तरेणमहाबाहोनहितृप्यामिकथ्यताम् १ भी
ष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् ऋषेरुद्दालकेर्वाक्यंनाचिकेतस्यचोभयोः २ ऋषिरुद्दालकिर्दीक्षामुपगम्यततःसुतम्
त्वंमामुपचरस्वेतिनाचिकेतमभाषत ३ समाप्तेनियमेतस्मिन्महर्षिःपुत्रमब्रवीत् उपस्पर्शनसक्तस्यस्वाध्यायाभिरतस्यच ४ इध्मादर्भाःसु
मनसःकलशश्चाभिभोजनम् विस्मृतंमेतदादायनदीतीरादिहाव्रज ५ गत्वानवाप्यतत्सर्वंनदीवेगसमाप्लुतम् नपश्यामितदित्येवंपितरंसो
ऽब्रवीन्मुनिः ६ क्षुत्पिपासाश्रमाविष्टोमुनिरुद्दालकिस्तदा यमंपश्येतितंपुत्रमशपत्समहातपाः ७ तथासपित्राभिहतोवाग्वज्रेणकृतांजलिः
प्रसीदेतिब्रुवन्नेवगतसत्त्वोपतद्भुवि ८ नाचिकेतंपितादृष्ट्वापतितंदुःखमूर्च्छितः किंमयाकृतमित्युक्त्वानिपपातमहीतले ९ तस्यदुःखपरीत
स्यस्वंपुत्रमनुशोचतः व्यतीतंतदहःशेषंसाचोग्रातत्रशर्वरी १० पित्र्येणाश्रुप्रपातेननाचिकेतःकुरूद्वह प्रास्पंदच्छयनेकौश्येवृष्ट्यासस्य
मिवाप्लुतम् ११ सपर्यपृच्छत्तंपुत्रंक्षीणंपर्यागतंपुनः दिव्यैर्गंधैःसमादिग्धंक्षीणस्वप्नमिवोत्थितम् १२ अपिपुत्रजितालोकाःशुभास्तेस्वेन
कर्मणा दिष्ट्याचासिपुनःप्राप्तोनहितेमानुषंवपुः १३ प्रत्यक्षदर्शीसर्वस्यपित्रापृष्टोमहात्मना सतांवार्तांपितुर्मध्येमहर्षीणांन्यवेदयत्
१४ कुर्वन्भवच्छासनमाशुयातोह्यहंविशालांरुचिरप्रभावां तत्रस्थितंधर्मराजमपश्यंसहस्रशोयोजनहेमभासं १५ दृष्ट्वैवमामभिमुखमा
पतंतंदेहीतिसह्यासनमादिदेश वैवस्वतोर्घ्यादिभिरर्हणैश्चभवत्कृतेपूजयामासमांसः १६ ततस्त्वहंतंशनकैरवोचंवृतःसदस्यैरभिपूज्य
मानः प्राप्तोस्मितेविषयंधर्मराजलोकानर्हेयानहंतान्विधत्स्व १७ यमोब्रवीन्मांनमृतोसिसौम्ययमंपश्येत्याहसत्वांतपस्वी पिताप्रदीप्ता-
ग्निसमानतेजाननतच्छक्यमनृतंविप्रकर्तुम् १८

६ ७ गतसत्त्वोमृतः ८ ९ १० सस्यंशुष्यमाणम् ११ १२ १३ १४ योजनेतिलुप्ततृतीयांतंपदंयोजनैःसहस्रशःसंमितामिति १५ १६ १७ १८

१९ २० २१ २२ अनेकशतानि भौमानि उपर्युपरि भूमिसमुदायेषु तानि प्रासादमंडलानि २३ २४ २५ २६ २७ २८ २९ गवांतरं अन्योन्यतारतम्यं ३० कृच्छ्रोत्सृष्टाः संकटात् निरोधान्मुक्ताः पोषणार्थं दरिद्रागारादागताः तादृशीनां पालनं प्रशस्ततरमित्यर्थः ३१ तिस्र इति त्र्यहं अन्नाहारो भूमिशायी भूत्वा चतुर्थदिनमारभ्य अहं एकैकां गां दत्वा गोरसैर्वृत्तिं कुर्यात् एवं अनपूर्वकं गोत्रयं ददतः उक्तं वक्ष्यमाणं च फलं भवतीत्यर्थः ३२ ३३ ३४ वृद्धे ग्लाने-

दृष्टस्तेहं प्रतिगच्छ स्वतात शोचत्यसौ तव देहस्य कर्ता दद्यानि किंचापि मनःप्रणीतं प्रियातिथेस्तव कामान्वृणीष्व १९ नेनैवमुक्तस्तमहं प्रत्यवोचं
प्राप्तोस्मि ते विषयं दुर्निवर्त्यं इच्छाम्यहं पुण्यकृतां समृद्धान्लोकांस्तेहं यदि द्रष्टुं वरार्हः २० यानं समारोप्य तु मां स देवो वाहैर्युक्तं सुप्रभं भानु
मत्तत् संदर्शयामास तदात्मलोकान्सर्वांस्तदा पुण्यकृतां द्विजेंद्र २१ अपश्यं तत्र वेश्मानि तैजसानि महात्मनाम् नानासंस्थानरूपाणि-
सर्वरत्नमयानि च २२ चंद्रमंडलशुभ्राणि किंकिणीजालवंति च अनेकशतभौमानि सांतर्जलवनानि च २३ वैदूर्यार्कप्रकाशानि रूप्य
रुक्ममयानि च तरुणादित्यवर्णानि स्थावराणि चराणि च २४ भक्ष्यभोज्यमयान्शैलान्वासांसि शयनानि च सर्वकामफलांश्चैव वृक्षान्भ
वनसंस्थितान् २५ नद्यो वीथ्यः सभा वाप्यो दीर्घिकाश्चैव सर्वशः घोषवंति च यानानि युक्तान्यथ सहस्रशः २६ क्षीरस्रवा वै सरितो गिरींश्च
सर्पिस्तथा विमलं चापि तोयम् वैवस्वतस्यानुमतांश्च देशानदृष्टपूर्वान्सुबहूनपश्यम् २७ सर्वान्दृष्ट्वा तदहं धर्मराजमवोचं वै प्रभविष्णुं पु
राणम् क्षीरस्यैताः सर्पिषश्चैव नद्यः शश्वत्स्रोताः कस्य भोज्याः प्रदिष्टाः २८ यमोब्रवीद्विद्धि भोज्यास्त्वमेता ये दातारः साधवो गोरसानाम्
अन्ये लोकाः शाश्वता वीतशोकाः समाकीर्णा गोप्रदाने रतानाम् २९ न त्वेवासां दानमात्रं प्रशस्तं पात्रं कालो गोविशेषो विधिश्च ज्ञात्वा देया वि
प्र गवांतरं हि दुःखं ज्ञातुं पावकादित्यभूतम् ३० स्वाध्यायवान्योतिमात्रं तपस्वी वितानस्थो ब्राह्मणः पात्रमासाम् कृच्छ्रोत्सृष्टाः पोषणाभ्या
गताश्च द्वारैरेतैर्गोविशेषाः प्रशस्ताः ३१ तिस्रो रात्र्यस्त्वद्भिरुपोष्य भूमौ तृप्ता गावस्तर्पितेभ्यः प्रदेयाः वत्सैः प्रीताः सुप्रजाः सोपचारास्त्र्यहं द
त्वा गोरसैर्वर्तितव्यं ३२ दत्वा धेनुं सुव्रतां कांस्यदोहां कल्याणवत्सामपलायिनीं च यावंति रोमाणि भवंति तस्यास्तावद्वर्षाण्यश्नुते स्वर्गलो
कम् ३३ तथानड्वाहं ब्राह्मणेभ्यः प्रदाय दांतं धुर्यं बलवंतं युवानम् कुलानुजीव्यं वीर्यवंतं बृहंतं भुंक्ते लोकान्संमितान्धेनुदस्य ३४ गोषु क्षां
तं गोशरण्यं कृतज्ञं वृत्तिग्लानं तादृशं पात्रमाहुः वृद्धे ग्लाने संभ्रमे वा महार्थे कृष्यर्थं वा होम्यहेतोः प्रसूत्याम् ३५ गुर्वर्थं वा बालपुष्ट्याभिषं-
गां गां वै दातुं देशकालौ विशिष्टौ अंतर्ज्ञाताः सक्रयज्ञानलब्धाः प्राणक्रीता निर्जिता यौतकाश्च ३६

रोगिणि पथ्यार्थं अनार्यं सक्रमं दुर्भिक्षे महार्थे यज्ञाद्यर्थे च प्रसूत्यां पु
त्रजन्मनि ३५ बालपुष्ट्याभिप्रायेण गां अतः बद्धग्धाः शांतेत्यादिगुणवत्त्वेन ज्ञाताः क्रयलब्धाः प्राणव्ययेन क्रीता यौतकाः पाणिग्रहणादिकाले श्वशुरादिभ्यः प्राप्ताः ३६ ७

३७ ३८ ३९ ४० ४१ ४२ क्रतुःगोदानरूपः ४३ ४४ ४५ ४६ ४७ ४८ प्रापणीयंगोःआहारादि ४९ गोभ्युक्तरथशकटादि ५०
५१ हार्दंहृदस्थंपक्षपातकंडुयनादिकंकर्तुंनर्त्तनानुसरति ५२ ५३ गवांसूर्यरश्मिसाम्याद्धोदःसूर्यइत्याह प्रास्यानि ५४ विधिंगुर्वाराधनपरंवि

नाचिकेतउवाच श्रुत्वावैवस्वतवचस्तमहंपुनरब्रुवम् अभावेगोप्रदातृणांकथंलोकान्हिगच्छति ३७ ततोऽब्रवीद्यमोधीमान्गोप्रदान-
परांगतिम् गोप्रदानानुकल्पंतुगामृतेसंतिगोप्रदाः ३८ अलाभेयोगवांदद्याद्घृतधेनुंयतव्रतः तस्यैताघृतवाहिन्यःक्षरंतेवत्सलाइव ३९
घृतालाभेतुयोदद्यात्तिलधेनुंयतव्रतः सदुर्गात्तारितोधेन्वाक्षीरनद्यांप्रमोदते ४० तिलालाभेतुयोदद्याज्जलधेनुंयतव्रतः सकामप्रव
हांशीतांनदींमेतामुपाश्नुते ४१ एवमेतानिमेतत्रधर्मराजोन्यदर्शयत् दृष्ट्वाचपरमंहर्षमवापमहमच्युत ४२ निवेदयेचाहमिमंप्रियंते
क्रतुर्महानल्पधनप्रचारः प्राप्तोमयातातसमत्प्रसूतःप्रपत्स्यतेवेदविधिप्रवृत्तः ४३ शापोह्ययंभवतोनुग्रहायप्राप्तोमयायत्रदृष्टोयमो-
वै दानव्युष्टिंतत्रदृष्ट्वामहात्मन्निःसंदिग्धान्दानधर्मांश्चरिष्ये ४४ इदंचमामब्रवीद्धर्मराजःपुनःपुनःसंप्रहृष्टोमहर्षे दानेनयःप्रयतोभूत्स
दैवविशेषतोगोप्रदानंचकुर्यात् ४५ शुद्धोह्ययंनावमन्यस्वधर्मान्पात्रेदेयंदेशकालोपपन्ने तस्माद्गावस्तेनित्यमेवप्रदेयामाभूच्चतेसं
शयःकश्चिदत्र ४६ एताःपुराह्यददन्नित्यमेवशांतात्मानोदानपथेनिविष्टाः तपांस्युग्राण्यप्रतिशंकमानास्तेवैदानंप्रददुश्चैवशक्त्या ४७
काले‍चशक्त्यामत्सरंवर्जयित्वाशुद्धात्मानःश्रद्धिनःपुण्यशीलाः दत्वागावैलोकममुंप्रपन्नादेदीप्यंतेपुण्यशीलास्तुनाके ४८ एतद्दानं
न्यायलब्धंद्विजेभ्यःपात्रेदत्तंप्रापणीयंपरीक्ष्य काम्याष्टम्यांवर्त्तितव्यंदशाहंरसैर्गवांशकृतावाप्रस्नवैर्वा ४९ वेदव्रतीस्याद्वृषभप्रदाने
वेदावाप्तिर्गोयुगस्यप्रदाने तीर्थावाप्तिर्गोप्रयुक्तप्रदानेपापोत्सर्गःकपिलायाःप्रदाने ५० गामप्येकांकपिलांसंप्रदायन्यायोपेतांकलुषा-
द्विप्रमुच्येत् गवांरसात्परमंनास्तिकिंचिद्गवांप्रदानंसुमहद्वदंति ५१ गावोलोकान्तारयंतिक्षरंत्योगावश्चान्नंसंजनयंतिलोके यस्तं-
जानन्नगवांहार्दमेतिसवैगंतानिरयंपापचेताः ५२ यस्तद्दत्तंगोसहस्रंशतंवादशार्द्धंवादशवासाधुवत्सम् अप्येकांवैसाधवेब्राह्म-
णायसास्यामुष्मिन्पुण्यतीर्थानदीवै ५३ प्राप्त्यापुष्ट्यालोकसंरक्षणेनगावस्तुल्याःसूर्यपादैःपृथिव्याम् शब्दश्चैकःसंनतिश्चोपभोगाः
तस्माद्गोदःसूर्यइवाबभाति ५४ गुरुंशिष्योवरयेद्गोप्रदानेसवैगंतानियतंस्वर्गमेव विधिज्ञानांसुमहान्धर्मएषोविधिंह्याद्यंविधयःसं
विशंति ५५ इदंदानंन्यायलब्धंद्विजेभ्यःपात्रेदत्वाप्रापयेथाःपरीक्ष्य त्वय्याशंसत्यमरामानवाश्चवयंचापिप्रसृतेपुण्यशीले ५६

धयोज्ञानविधयःसंविशंतीतिपुण्यसुक्तं ५५ द्विजेभ्यस्त्रैवर्णिकेभ्योन्यायलब्धंदत्वासमर्प्यप्रापयेथाः नतुपोषणमात्रार्थंप्रापयेथाइत्यर्थः ५६ ७ ७

५७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांएकसप्ततितमोऽध्यायः ७१ १ २ ३ ४ ५ फल्यंपश्यामि ६ ७ कोगुणः गत्वाकिंस्वित्पर
मः कालस्याऽपराकाष्ठेत्यर्थः ८ ९ १० ११ १२ इतिश्रीआनुशासनिकेपर्वणिटीकायांद्विसप्ततितमोऽध्यायः ७२ १ २ शरीरन्या-

इत्युक्तोऽहंधर्मराजंहिजर्षेधर्मात्मानंशिरसाभिप्रणम्य । अनुज्ञातस्तेनवैवस्वतेनप्रत्यागमंभगवत्पादमूलम् ५७ इतिश्रीमहाभारते-
आनुशासनिकेपर्वणिदानधर्मेयमवाक्यंनामएकसप्ततितमोऽध्यायः ७१ युधिष्ठिरउवाच उक्तंतेगोप्रदानंवैनाचिकेतमृषिंप्रति मा
हात्म्यमपिचैवोक्तमुद्देशेनगवांप्रभो १ नृगेणचमहद्दुःखमनुभूतमहात्मना एकापराधादज्ञानात्पितामहमहामते २ द्वारवत्यांयथा
चासौनिर्विशन्त्यांसमुद्धृतः मोक्षहेतुरभूत्कृष्णस्तदप्यवधृतंमया ३ किंत्वस्तिममसंदेहोगवांलोकंप्रतिप्रभो तत्त्वतःश्रोतुमिच्छा-
मिगोदायत्रवसंत्युत ४ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् यथापृच्छत्पद्मयोनिमेतदेवशतक्रतुः ५ शक्र
उवाच स्वर्लोकवासिनांलक्ष्मीमभिभूयस्वयाऽर्चिषा गोलोकवासिनःपश्येव्रजतःसंशयोऽत्रमे ६ कीदृशाभगवंल्लोकागवांतद्ब्रूहिमेन
घ यानावसंतिदातारएतदिच्छामिवेदितुम् ७ कीदृशाःकिंफलाःकिंस्वित्परमस्तत्रकोगुणः कथंचपुरुषास्तत्रगच्छंतिविगतज्वराः ८
कियत्कालंप्रदानस्यदाताचफलमश्नुते कथंबहुविधंदानंस्यादल्पमपिवाकथम् ९ बह्वीनांकीदृशंदानमल्पानांवापिकीदृशम् अद-
त्वागोप्रदाःसंतिकेनवातच्चशंसमे १० कथंवाबहुदातास्यादल्पदत्रासमःप्रभो अल्पप्रदाताबहुदःकथंस्विदिहस्यादिहेश्वर ११ कीदृ
शीदक्षिणाचैवगोप्रदानेविशिष्यते एतत्तथ्येनभगवन्ममशंसितुमर्हसि १२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेगोप्र
दानिकेद्विसप्ततितमोऽध्यायः ७२ पितामहउवाच योयंप्रश्नस्त्वयापृष्टोगोप्रदानादिकारितः नान्यःप्रष्टास्तिलोकेस्मिंस्त्वत्तोन्यो
हिशतक्रतो १ संतिनानाविधालोकायांस्त्वंशक्रनपश्यसि पश्यामियानहंलोकानेकपत्न्यश्चयाःस्त्रियः २ कर्मभिश्चापिसुशुभैःसुव्र
ताऋषयस्तथा सशरीराहितान्यांतिब्राह्मणाःशुभबुद्धयः ३ शरीरन्यासमोक्षेणमनसानिर्मलेनच स्वप्नभूतांश्चतांल्लोकान्पश्यंती
हापिसुव्रताः ४ तेतुलोकाःसहस्राक्षशृणुयादृग्गुणान्विताः नतत्रक्रमतेकालोनजरानचपावकः ५ तथानास्त्यशुभंकिंचिन्नव्याधि
स्तत्रनक्लमः यद्यच्चगावोमनसातस्मिन्वाञ्छंतिवासव ६ तत्सर्वंप्राप्नुवंतिस्ममममत्यक्षदर्शनात् कामगाःकामचारिण्यःकामान्का
मांश्चभुंजते ७ वाप्यःसरांसिसरितोविविधानिवनानिच गृहाणिपर्वताश्चैवयावद्द्रव्यंचकिंचन ८

न्यासःसमाधिकालेमोक्षःमरणेनिर्मलेनमनसायोगिन्यांन्यासोमोक्षेन्चेतांल्लोकान्पश्यन्ति ४ ५ ६ ७ ८ ६७ ६७ ६७ ६७

९ १० ११ १२ १३ १४ नैःकृतिकः वंचकः शठः समर्थोपिदाग्निद्यभाषी १५ १६ १७ १८ २० गुरूणांद्विजानांवापराधंसहतेइतिगुरु

मनोज्ञंसर्वभूतेभ्यःसवैतत्रप्रदृश्यते ईदृशाद्विपुलाल्लोकान्नाप्नुयात्त्रिलोककृत्तथाविधः ९ नत्रसर्वसहाःक्षान्तावत्सलागुरुवर्त्तिनः अहंकार
विरहितायांतिशक्रनरोत्तमाः १० यःसर्वमांसानिनभक्षयीतपुमान्सदाभावितोधर्मयुक्तः मातापित्रोरर्चितासत्ययुक्तःशुश्रूषिताब्राह्म
णानामनिंद्यः ११ अक्रोधनोगोषुतथाद्विजेषुधर्मेरतागुरुशुश्रूषकश्च यावज्जीवंसत्यवृत्तेरतश्चदानेरतोयःक्षमीचापराधे १२ मृदु
र्दान्तोदेवपरायणश्चसर्वातिथिश्चापितथादयावान् ईदृग्गुणोमानवःसंप्रयातिलोकंगवांशाश्वतंचापिशक्र १३ नपारदारान्पश्यतिलो
कमेतंनवैगुरुघ्नोनमृषासंप्रलापी सदाप्रवादीब्राह्मणेष्वात्तवैरोदोषैरेतैर्यश्चयुक्तोदुरात्मा १४ नमित्रध्रुङ्नैकृतिकःकृतघ्नःशठोनृजु-
र्धर्मविद्वेषकश्च नब्रह्महामनसापिप्रपश्येद्गवांलोकंपुण्यकृतांनिवासम् १५ एतत्तेसर्वमाख्यातंनिपुणेनसुरेश्वरः गोप्रदानरतानांतु
फलंशृणुशतक्रतो १६ दायाद्यलब्धैरर्थैर्योगाःक्रीत्वासंप्रयच्छति धर्मार्जिताधनैःक्रीतान्सलोकानाप्नुतेऽक्षयान् १७ योवैद्यूतेधनं-
जित्वागाःक्रीत्वासंप्रयच्छति सदिव्यमयुतंशक्रवर्षाणांफलमश्नुते १८ दायाद्यायस्यवैगावोन्यायपूर्वैरुपार्जिताः प्रदद्यात्ताःप्रदातृ
णांसंभवंत्यपिचध्रुवाः १९ प्रतिगृह्यतुयोदद्याद्गाःसंशुद्धेनचेतसा तस्यापीहाक्षयाँल्लोकान्ध्रुवान्विद्धिशचीपते २० जन्मप्रभृतिसत्यं
चयोब्रूयान्नियतेन्द्रियः गुरुद्विजसहःक्षान्तस्तस्यगोभिःसमागतिः २१ नजातुब्राह्मणोवाच्योयदवाच्यंशचीपते मनसागोषुनद्रुह्ये
द्गोवृत्तिर्गोनुकंपकः २२ सत्येधर्मेचनिरतस्तस्यशक्रफलंशृणु गोसहस्रेणसंमितातस्यधेनुर्भवत्युत २३ क्षत्रियस्यगुणैरेतैरपितुल्य
फलंशृणु तस्यापिद्विजतुल्यागौर्भवतीतिविनिश्चयः २४ वैश्यस्यैतेयदिगुणास्तस्यपंचाशतंभवेत् शूद्रस्यापिविनीतस्यचतुर्भाग-
फलंस्मृतम् २५ एतच्चैनंयोनुतिष्ठेतयुक्तःसत्येरतोगुरुशुश्रूषयाच दक्षःक्षान्तोदेवतार्यीप्रशान्तःशुचिर्बुद्धोधर्मशीलोनहंवाक् २६
महत्फलंप्राप्यतेसद्विजायदत्वादोग्ध्रींविधिनानेनधेनुम् नित्यंदद्यादेकभक्तःसदाचसत्येस्थितोगुरुशुश्रूषिताच २७ वेदाध्यायीगोषु
गोभक्तिमांश्चनित्यंदत्त्वायोभिनंदेतगाश्च आजातितोयश्चगवांनमेतइदंफलंशक्रनिबोधतस्य २८ यत्स्यादिष्ट्वाराजसूयेफलंतुय-
त्स्यादिष्ट्वाबहुनाकांचनेन एतत्तुल्यंफलमप्याहुरग्र्यंसर्वेसंतस्त्वृषयोयेचसिद्धाः २९ योऽग्रभक्तंकिंचिदप्राश्यदद्याद्गोभ्योनित्यंगोव्र-
तीसत्यवादी शान्तोलुब्धोगोसहस्रस्यपुण्यंसंवत्सरेणाप्नुयात्सत्यशीलः ३० यदेकभक्तमश्नीयाद्दद्यादेकंगवांचयत् दशवर्षाण्यनंता
निगोव्रतीगोनुकंपकः ३१

द्विजसहः २१ वासादेरनुकल्पकःसंपादकःगोनुकंपकः २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१

एकेनैव च भक्तेन यः क्रीत्वा गां प्रयच्छति यावन्ति तस्या रोमाणि संभवन्ति शतक्रतो ३२ तावत्स दानात्स गवां फलमाप्नोति शाश्वतम् ब्रा
ह्मणस्य फलं हीदं क्षत्रियस्य तु वै शृणु ३३ पञ्चवार्षिकमेवं तु क्षत्रियस्य फलं स्मृतम् ततोऽर्धेन तु वैश्यस्य शूद्रे वैश्यार्धतः स्मृतम् ३४
यश्चात्मविक्रयं कृत्वा गाः क्रीत्वा संप्रयच्छति यावत्संदर्शयेद्गा वै स तावत्फलमश्नुते ३५ रोमाणि रोम्णि महाभाग लोकाश्चास्थाक्षयाः
स्मृताः संग्रामेष्वर्जयित्वा तु यो वै गाः संप्रयच्छति आत्मविक्रयतुल्यास्ताः शाश्वता विद्धि कौशिक ३६ अभावे यो गवां दद्यात्तिलधेनुं यत
व्रतः दुर्गात्स तारितो धेन्वा क्षीरनद्यां प्रमोदते ३७ न त्वेवासां दानमात्रं प्रशस्तं पात्रं कालो गोविशेषो विधिश्च कालज्ञानं विप्र गवां तर
हि दुःखं ज्ञातुं पावकादित्यभूतम् ३८ स्वाध्यायाढ्यं शुद्धयोनिं प्रशान्तं वैतानस्थं पापभीरुं बहुज्ञम् गोषु क्षान्तं नातितीक्ष्णं शरण्यं वृत्ति
ग्लानं तादृशं पात्रमाहुः ३९ वृत्तिग्लाने सीदति चातिमात्रं कृष्यर्थं वा होम्यहेतोः प्रसूतेः गुर्वर्थं वा बालसंवृद्धये वा धेनुं दद्याद्देशकाले वि
शिष्टे ४० अन्तर्ज्ञाताः सक्रयज्ञानलब्धाः प्राणैः क्रीतास्तेजसा यौतकाश्च कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च द्वारैरेतैर्गोविशेषाः प्रशस्ताः
४१ बलान्विताः शीलवयोपपन्नाः सर्वाः प्रशंसन्ति सुगन्धवत्यः यथा हि गङ्गा सरितां वरिष्ठा तथार्जुनीनां कपिला वरिष्ठा ४२ तिस्रो रात्री-
स्त्वद्भिरुपोष्य भूमौ तृप्ता गावस्तर्पितेभ्यः प्रदेयाः वत्सैः पुष्टैः क्षीरपैः सुप्रचारास्त्र्यहं दत्त्वा गोरसैर्वर्तितव्यम् ४३ दत्त्वा धेनुं सुव्रतां सा
धुदोह्यां कल्याणवत्सामपलायिनीं च यावन्ति रोमाणि भवन्ति तस्यास्तावन्ति वर्षाणि भवन्त्यमुत्र ४४ तथानड्वाहं ब्राह्मणाय प्रदाय धुर्यं
युवानं बलिनं विनीतम् हलस्य वोढारमनन्तवीर्यं प्राप्नोति लोकान्दशधेनुदस्य ४५ कान्तारे ब्राह्मणान्गाश्च यः परित्राति कौशिक क्ष
णेन विप्रमुच्येत तस्य पुण्यफलं शृणु ४६ अश्वमेधक्रतोस्तुल्यं फलं भवति शाश्वतम् मृत्युकाले सहस्राक्ष यां वृत्तिमनुकाङ्क्षते ४७ लो
कान्बहुविधान्दिव्यान्यच्चास्य हृदि वर्तते तत्सर्वं समवाप्नोति कर्मणैतेन मानवः ४८ गोभिश्च समनुज्ञातः सर्वत्र च महीयते यस्त्वेते
नैव कल्पेन गा वनेष्वनुगच्छति ४९ तृणगोमयपर्णाशी निस्पृहो नियतः शुचिः अकामं तेन वस्तव्यं मुदितेन शतक्रतो ५० मम लो
के सुरैः सार्धं लोके यत्रापि चेच्छति ५१ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे त्रिसप्ततितमोऽध्यायः ७३

१ २ विक्रयार्थं योनिसुंज्यादिनिशेषः ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ इति आनुशासनिके पर्व

इंद्र उवाच जानन्यो गामपहरेद्विक्रीयाद्वार्थकारणात् एतद्विज्ञातुमिच्छामि कानुतस्य गतिर्भवेत् १ पितामह उवाच भक्ष्यार्थं विक्रियार्थं वा ये पहारं हि कुर्वते दानार्थं ब्राह्मणार्थाय तत्रेदं श्रूयतां फलम् २ विक्रियार्थं हि यो हिंस्याद्भक्षयेद्वा निरंकुशः घातयानं हि पुरुषं ये तु मन्येयुरर्थिनः ३ घातकः खादको वापि तथा यश्चानुमन्यते यावंति तस्या रोमाणि तावद्वर्षाणि मज्जति ४ ये दोषा यादृशाश्चैव द्विज यज्ञोपघातके विक्रये चापहारे च ते दोषा वै स्मृताः प्रभो ५ अपहृत्य तु यो गां वै ब्राह्मणाय प्रयच्छति यावद्दानफलं तस्यास्तावन्निरयमृच्छति ६ सुवर्णं दक्षिणामाहुर्गोप्रदाने महाद्युते सुवर्णं परमित्युक्तं दक्षिणार्थमसंशयम् ७ गोप्रदानं तारयते सप्त पूर्वांस्तथा परान् सुवर्णं दक्षिणां कृत्वा तावद्द्विगुणमुच्यते ८ सुवर्णं परमं दानं सुवर्णं दक्षिणा परा सुवर्णं पावनं शक्र पावनानां परं स्मृतम् ९ कुलानां पावनं प्राहुर्जातरूपं शतक्रतो एषा मे दक्षिणा प्रोक्ता समासेन महाद्युते १० भीष्म उवाच एतत्पितामहेनोक्तमिंद्राय भरतर्षभ इंद्रो दशरथायाह रामायाह पिता यथा ११ राघवोपि प्रियभ्रात्रे लक्ष्मणाय यशस्विने ऋषिभ्यो लक्ष्मणेनोक्तमरण्ये वसता प्रभो १२ पारंपर्यागतं चेदमृषयः संशितव्रताः दुर्धरं धारयामासू राजानश्चैव धार्मिकाः १३ उपाध्यायेन गदितं मम चेदं युधिष्ठिर य इदं ब्राह्मणो नित्यं वदेद्ब्राह्मणसंसदि १४ यज्ञेषु गोप्रदानेषु द्वयोरपि समागमे तस्य लोकाः किलाक्षय्या दैवतैः सह नित्यदा १५ इति ब्रह्मा स भगवानुवाच परमेश्वरः १६ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे गोलोकप्रश्ने चतुःसप्ततितमोऽध्यायः ७४ युधिष्ठिर उवाच विश्रंभितोहं भवता धर्मान्प्रवदता विभो प्रवक्ष्यामि तु संदेहं तन्मे ब्रूहि पितामह १ व्रतानां किं फलं प्रोक्तं कीदृशं वा महाद्युते नियमानां फलं किं च स्वधीतस्य च किं फलम् २ दत्तस्येह फलं किं च वेदानां धारणे च किम् अध्यापने फलं किं च सर्वमिच्छामि वेदितुम् ३ अप्रतिग्राहके किं च फलं लोके पितामह तस्य किं च फलं दृष्टं श्रुतं यस्तु प्रयच्छति ४ स्वकर्मनिरतानां च शूराणां चापि किं फलम् शौचे च किं फलं प्रोक्तं ब्रह्मचर्ये च किं फलम् ५ पितृशुश्रूषणे किं च मातृशुश्रूषणे तथा आचार्यगुरुशुश्रूषास्वनुक्रोशानुकंपने ६ एतत्सर्वमशेषेण पितामह यथातथम् वेत्तुमिच्छामि धर्मज्ञ परं कौतूहलं हि मे ७ भीष्म उवाच यो व्रतं वै यथोद्दिष्टं तथा संप्रतिपद्यते अखंडं सम्यगारभ्य तस्य लोकाः सनातनाः ८

णिटीकायां चतुःसप्ततितमोऽध्यायः ७४ १ २ ३ ४ ५ अनुक्रोशः परदुःखेन दुःखितत्वं अनुकंपा तत्प्रतीकारकरणं ६ व्रतं एकभक्तादिनिय

नियमानांफलंराजन्प्रत्यक्षमिहदृश्यते नियमानांक्रतूनांच त्वयावाप्तमिदंफलम् ९ स्वधीतस्यापिचफलंदृश्यतेमुत्रचेहच इह
लोकेथवानित्यंब्रह्मलोकेचमोदते १० दमस्यतुफलंराजन्छृणुत्वंविस्तरेणमे दांताःसर्वत्रसुखिनोदांताःसर्वत्रनिर्वृताः ११ स्वर्गेय-
थाभिप्रायंदतेनपुसाविक्रमेणच यत्रेच्छागामिनोदांताःसर्वशत्रुनिषूदनाः १२ प्रार्थयंतिचयद्दांतालभंतेतन्नसंशयः युज्यंतेसर्वकामैर्हिदां
ताःसर्वत्रपांडव १३ दानैर्यज्ञैश्चविविधैस्तथादांताःक्षमान्विताः दानाद्दमोविशिष्टोहिददन्किंचिद्द्विजातये १४ दाताकुप्यतिनोदांतस्त
स्माद्दानात्परंदमः यस्त्वदद्यादकुप्यन्हितस्यलोकाःसनातनाः १५ क्रोधोहंतिहियद्दानंतस्माद्दानात्परंदमः अदृश्यानिमहाराजस्थाना
न्ययुतशोदिवि १६ ऋषीणांसर्वलोकेषुयानितेयांतिदेवताः दमेनयानिनृपतेगच्छंतिपरमर्षयः १७ कामयानामहत्स्थानंतस्माद्दाना
त्परंदमः अध्यापकःपरिक्लेशादक्षयंफलमश्नुते १८ विधिवत्पावकंहुत्वाब्रह्मलोकेनराधिप अधीत्यापिहियोवेदान्न्यायविद्भ्यःप्र
यच्छति १९ गुरुकर्मप्रशंसीतुसोपिस्वर्गेमहीयते क्षत्रियोध्ययनेयुक्तोयजनेदानकर्मणि युद्धेयश्चपरित्रातासोपिस्वर्गेमहीयते २०
वैश्यःस्वकर्मनिरतःप्रदानाल्लभतेमहत् शूद्रःस्वकर्मनिरतःस्वर्गंशुश्रूषयार्च्छति २१ शूराबहुविधाःप्रोक्तास्तेषामर्थांस्तुमेशृणु शूरा
न्वयानांनिर्दिष्टंफलंशूरस्यचैवहि २२ यज्ञशूरादमेशूराःसत्यशूरास्तथापरे युद्धशूरास्तथैवोक्तादानशूराश्चमानवाः २३ सांख्यशू
राश्चबहवोयोगशूरास्तथापरे अरण्येगृहवासेचत्यागेशूरास्तथापरे २४ आर्जवेचतथाशूराःशमेवर्त्तंतिमानवाः २५ तैस्तैश्चनि
यमैःशूराबहवःसंतिचापरे वेदाध्ययनशूराश्चशूराश्चाध्यापनेरताः २६ गुरुशुश्रूषयाशूराःपितृशुश्रूषयापरे मातृशुश्रूषयाशू
राःभैक्ष्यशूरास्तथापरे २७ अरण्येगृहवासेचशूराश्चातिथिपूजने सर्वेयांतिपराँल्लोकान्स्वकर्मफलनिर्जितान् २८ धारणंस
र्ववेदानांसर्वतीर्थावगाहनम् सत्यंचब्रुवतोनित्यंसमंवास्यान्नवासमम् २९ अश्वमेधसहस्रंचसत्यंचतुलयाधृतम् अश्वमेधस
हस्राद्धिसत्यमेवविशिष्यते ३० सत्येनसूर्यस्तपतिसत्येनाग्निःप्रदीप्यते सत्येनमरुतोवांतिसर्वंसत्येप्रतिष्ठितम् ३१ सत्येनदेवान्प्री
णयंतेपितरोब्राह्मणास्तथा सत्यमाहुःपरोधर्मस्तस्मात्सत्यंनलंघयेत् ३२ मुनयःसत्यनिरतामुनयःसत्यविक्रमाः मुनयःसत्यशपथा
स्तस्मात्सत्यंविशिष्यते ३३

३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ इतिपंचसप्ततितमोऽध्यायः ७५ १ २ विधिंउत्सन्यादिकं ३ ४ स्वकालमितिपाठेस्वकालंस्वस्यमृत्यु
आकस्मिकंज्ञात्वारोहिणींलोहितवर्णाम् ५ बहुलेइतिच्छेदः ६ दिवंस्वर्गंशर्मण्ऐहिकंसुखंप्रपद्यच्छत्विति शेषः जगतीगौः पशवोजगतीतिश्रुतेः एवमनेनमंत्रेणागोष्ठं
प्रपद्यगत्वामौनेनतत्रवासंकृत्वाद्वितीयेऽन्हिगोप्रदानकालएववाचंविसृजेत् इदंगोप्रदानस्यपूर्वांगंव्रतं ७ समसख्यः समानस्वभावः समव्रतः भूतलशायित्वात् दंशा

सत्यवंतःस्वर्गलोकेमोदंतेभरतर्षभ दमःसत्यफलावाप्तिरुक्तासर्वात्मनामया ३४ असंशयंविनीतात्मासर्वैस्वर्गेमहीयते ब्रह्मच
र्यस्यचगुणंशृणुत्वंवसुधाधिप ३५ आजन्ममरणाद्यस्तुब्रह्मचारीभवेदिह नतस्यकिंचिदप्राप्यमितिविद्धिनराधिप ३६ बह्व्यःको-
ट्यस्त्वृषीणांतुब्रह्मलोकेवसंत्युत सत्येरतानांसततंदांतानामूर्ध्वरेतसाम् ३७ ब्रह्मचर्यंदहेद्राजन्सर्वपापान्युपासितम् ब्राह्मणेन
विशेषेणब्राह्मणोह्यग्निरुच्यते ३८ प्रत्यक्षंहितथाह्येतद्ब्राह्मणेषुतपस्विषु बिभेतिहियथाशक्रोब्रह्मचारीप्रधर्षितः ३९ तद्ब्रह्मच
र्यस्यफलमृषीणामिहदृश्यते मातापित्रोःपूजनेयोधर्मस्तमपिमेशृणु ४० शुश्रूषतेयःपितरंनचासूयेत्कदाचन मातरंभ्रातरंवापिगुरु
माचार्यमेवच ४१ तस्यराजन्फलंविद्धिस्वर्लोकेस्थानमर्चितम् नचपश्येतनरकंगुरुशुश्रूषयात्मवान् ४२ इतिश्रीमहाभारतेआनु
शासनिकेपर्वणिदानधर्मेगोलोकप्रश्नोनामपंचसप्ततितमोऽध्यायः ७५ युधिष्ठिरउवाच विधिंगवांपरंश्रोतुमिच्छामिनृपतत्त्वतः
येनतांच्छाश्वतांल्लोकानर्थिनांप्राप्नुयादिह १ भीष्मउवाच नगोदानात्परंकिंचिद्विद्यतेवसुधाधिप गौर्हिन्यायागतादत्तासद्यस्ता
रयतेकुलम् २ सतामर्थेसम्यगुत्पादितोयःसवैक्लृप्तःसम्यगाभ्यःप्रजाभ्यः तस्मात्पूर्वंह्यादिकालप्रवृत्तंगोदानार्थंशृणुराजन्विधिंमे ३
पुरागोषूपनीतासुगोषुसंदिग्धदर्शिना मांधात्राप्रकृतंप्रश्नंबृहस्पतिरभाषत ४ द्विजातिमतिसत्कृत्यश्वःकालमभिवेद्यच गोदाना
र्थेप्रयुंजीतरोहिणींनियतव्रतः ५ आह्वानंचप्रयुंजीतसमंगेबहुलेतिच प्रविश्यचगवांमध्यमिमांश्रुतिमुदाहरेत् ६ गौर्मेमाताऋषभः
पितामेदिवंशर्मजगतीमेप्रतिष्ठा प्रपद्यैवंशर्वरीमुष्यगोषुपुनर्वाणीमुत्सृजेद्गोप्रदाने ७ सतामेकांनिशांगोभिःसमसख्यःसमव्रतः
ऐकात्म्यगमनात्सद्यःकलुषाद्विप्रमुच्यते ८ उत्सृष्टवृषवत्साहिप्रदेयासूर्यदर्शने त्रिदिवंप्रतिपत्तव्यमर्थवादाशिषस्तव ९

द्यनिवारकत्वादिगुणयुक्तत्वाच्च ८ उत्सृष्टवृषवत्सोवृषवत्सोमयासार्द्धंसातथावृषवत्सेतिगौडाः त्वयादातव्याप्रदेयात्रिदिवंचप्रतिपत्तव्यंगंतव्यं अर्थवादमंत्रोक्ताआ
शिषस्तवभविष्यंतीतियोज्यम् ९

आशिषमेवाह ऊर्ज्जस्विन्यइति ऊर्जस्तु कार्त्तिकोत्साहबलेषु प्राणनेष्वपीतिमेदिनी उत्साहवत्योवाऊर्जस्विन्यः ऊर्जमेधाः उपगतप्रज्ञाः यज्ञेअमृतस्यतत्साधनस्य हवि-
षागर्भइवगर्भः क्षेत्रभूता क्षितेः ऐश्वर्यस्यरोहः शाश्वतः क्षितेः प्रवहः प्रवाहरूपश्च १० ११ अनुक्ताः मंत्रद्वयेनोक्ता अनुक्ताश्च आशिषः संतुमे गोपोत्सर्गे रोगोप
तापापनये शोषायक्ष्मणि शोषणेइतिमेदिनी क्षयरोगादिनिवृत्तौ देहमोक्षेच कर्मभिः पंचगव्यादिभिः सेविताः सत्यः सरस्वत्योनद्यइवश्रेयसेसंप्रवृत्ताः १२ येतिग-
वांस्वस्यचाभेदेनगोदानात् आत्मदानफललभ्यमित्यर्थ मनश्च्युताः दातुर्ममत्वाभिमानात् च्युता मनएव उपपन्नाः मदीयममतास्पदीभूताः संधुक्षध्वं दाताऽरंस
चइष्टैर्भोगैः प्रकाशयध्वं १३ एवमिति अयंश्लोकः दातृप्रतिगृहीतृभ्यांक्रमेणार्द्धशः पठनीयइत्यर्थः १४ गोप्रदानीति अर्घ्यं वस्त्रवसुप्रदोपिगोप्रदानीतिवक्त-
व्यमितियोजना योगोः प्रतिनिधित्वेन अर्घ्यंवस्त्रंसुवर्णवाप्रयच्छतिसोपिगोप्रदाताभवतीति अर्घ्यं अर्घोव्यवहारिकगोमूल्यंवस्त्रमपि आधान प्रकरणे बोधायने-

ऊर्जस्विन्योऊर्जमेधाश्चयज्ञेगर्भोमृतस्यजगतोस्यप्रतिष्ठा क्षितेरोहः प्रवहःशश्वदेव प्राजापत्याः सर्वमित्यर्थवादाः १० गावोममैनः प्र
णुदन्तु सौर्यास्तथासोम्याः स्वर्गयानायसन्तु आत्मानंमेमातृवच्चाश्रयन्तु तथानुक्ताः सन्तु सर्वाशिषोमे ११ शेषोत्सर्गे कर्मभिर्देहमोक्षे सर-
स्वत्यः श्रेयसेसंप्रवृत्ताः यूयंनित्यंसर्वपुण्योपवाह्यांदिशध्वंमेगतिमिष्टां प्रसन्नाम् १२ यावैयूयंसोहमद्यैवभावोयुष्मान्दत्वाचाहमा
त्मप्रदाता मनश्च्युतामनएवोपपन्नाः संधुक्षध्वंसौम्यरूपोग्ररूपाः १३ एवंतस्याग्रे पूर्वमर्धंवदेत्तगवांदाताविधिवत्पूर्वदृष्टः प्रतिब्रूया
च्छेषमर्धंद्विजातिः प्रतिगृह्णन्वैगोप्रदानेविधिज्ञः १४ गोप्रदानेतिवक्तव्यमर्घ्यंवस्त्रवसुप्रदः ऊर्ध्वास्या भवितव्याचवैष्णवीतिचचो
दयेत् . १५ नामसंकीर्तयेत्तस्यायथासंख्योत्तरंसवै फलंषट्त्रिंशदष्टौचसहस्राणिचविंशतिः १६ एवमेतानगुणान्विद्याद्गवादीनाय
थाक्रमम् . गोप्रदातासमाप्नोतिसमस्तानष्टमेक्रमे १७ गोदःशीलीनिर्भयश्चार्घदातानस्याद्दुःखीवसुदाताचकामम् उपस्योढाभारते
यश्चविद्वान्विख्यातास्तेवैष्णवाश्चन्द्रलोकाः १८

नगोप्रतिनिधित्वेन उक्तःयावंतीगावःस्युस्तावतीर्वासमस्तिनावत धनंवादद्यात् इति सुवर्णंतु गोर्मूल्यं मात्रांनविद्यत
इतिस्मृतेरपरिमितं अर्घादिकंयावच्छक्तिदेयंतत्र अर्घ्यगोप्रदाने इमांऊर्ध्वस्यातुभ्यमहंसंप्रददे त्वंगृहाण इतिचोदयेत वस्त्रधेनुर्भवितव्याइतिपादे भवितव्यावसुधा
धेनुर्वैष्णवीतिकीर्त्तयेदित्यर्थः १५ १६ गवादीनांगोप्रतिनिधीनांएतत्फलं प्रत्यक्षगोदानेसोप्रतिगृहीतुःगृहगच्छंत्या अष्टमेपदे भवतिकिमुतदूरगमनेनदायवाल्प
कांतिथ्याग्निहोत्रादीनांचिरकालनिर्वाहदर्शनभावः १७ गोदइतिशीलवान् अर्घदातानिर्भयइतिसंबंधः निकृष्टत्वात्तस्यदातुःफलंनोक्तं एवंत्रयाणामैहिकफलमुक्त्वाआ
मुष्मिकफलमाह उपस्योढेतिउपस्यप्रातःस्नानादिकर्मउढ आश्रयेः उपस्योढासविज्ञेयोअस्यदेयायुतस्तुय. भारतेविद्वान भारतवेत्ता वैष्णवाः विष्णुभक्ताः चं

द्रवत् लोकआ...कोयेपाण्यविख्याताः कथितान्इति...ता नयोपिवेष्णवाः विष्णुदत्ताश्चंद्रवत अमृतस्यवाःलोकाः विदांप्रद्यंतेऽस्मिन्नाविहान् १८ १९
देवव्रतीब्रह्मचारीसूर्यमंडलभेत्ता २० एकसंस्थान एकाकृतानगजग्रामादिसर्वदानतुल्यं एकधेनुदानंकिमुतबह्वीरहव्यादिमत्योदेयाः तामांताभ्योधिकमितिशे

गावैदत्त्वागोव्रतीस्यात्त्रिरात्रंनिशांचैकांसंवसेत्तेनताभिः काम्याष्टम्यांवर्त्तितव्यंत्रिरात्रंरसैर्वागोशकृताप्रस्नवैर्वा १९ देवव्रतीस्याद्वृषभ
प्रदानेवेदावाप्तिर्गोयुगस्यप्रदाने तथागवांविधिमासाद्ययज्वालोकानग्र्यान्विंदते नाविधिज्ञः २० कामान्सर्वान्पार्थिवानेकसंस्थान्यो
वैदद्यात्कामदुघांचधेनुम् सम्यक्ताःस्युर्हव्यकव्यौघवत्यस्तासामुक्ष्णांज्यायसांसंप्रदानम् २१ नचाशिष्यायाव्रतायोपकुर्यान्नाश्रद्दधाना-
यनवक्रबुद्धये गुह्योह्ययंसर्वलोकस्यधर्मोनेमंधर्मंयत्रतत्रप्रजल्पेत् २२ संतिलोकेश्रद्दधानामनुष्याःसंतिक्षुद्राराक्षसामानुषेषु
एषामेतद्दीयमानंह्यनिष्टंयेनास्तिक्यंचाश्रयंतेल्पपुण्याः २३ बार्हस्पत्यंवाक्यमेतन्निशम्ययेराजानोगोप्रदानानिदत्त्वा लोकान्प्राप्ताः
पुण्यशीलाःप्रवृत्तास्तान्मेराजन्कीर्त्यमानान्निबोध २४ उशीनरोविश्वगश्वोनृगश्चभगीरथोविश्रुतोयौवनाश्वः मांधातावैमुचुकुंदश्च
राजाभूरिद्युम्नोनैषधःसोमकश्च २५ पुरूरवाभरतश्चक्रवर्त्तीयस्यान्ववायेभारताःसर्वएव तथावीरोदाशरथिश्चरामोयेचाप्यन्ये
विश्रुताःकीर्त्तिमंतः २६ तथाराजापृथुकर्मादिलीपोदिवंप्राप्तोगोप्रदानैर्विधिज्ञः यज्ञैर्दानैस्तपसाराजधर्मैर्मांधाताभूद्गोप्रदानैश्चयु-
क्तः २७ तस्मात्पार्थत्वमपीमांमयोक्तांबार्हस्पतींभारतींधारयस्व द्विजाग्र्येभ्यःसंप्रयच्छस्वप्रीतोगाःपुण्यावैप्राप्यराज्यंकुरूणाम् २८
वैशंपायनउवाच तथासर्वंकृतवान्धर्मराजोभीष्मेणोक्तोविधिवद्गोप्रदाने समाधातुर्वेददेवोपदिष्टंसम्यग्धर्मंधारयामाससराजा
२९ इतिनृपसततंगवांप्रदानेयवशकलान्सहगोमयैःपिबानः क्षितितलशयनःशिखीयतात्मा वृषइवराज वृषस्तदाबभूव ३०
नरपतिरभवत्सदैवताभ्यःप्रयतमनास्त्वभिसंस्तुवंश्चताःस्म नृपतिधुरिचगामयुक्तभूयस्तुरगवरैरगमच्चयत्रतत्र ३१ इतिश्रीम-
हाभारतेआनुशासनिकेपर्वणिदानधर्मेषट्सप्ततितमोऽध्यायः ७६ वैशंपायनउवाच ततोयुधिष्ठिरोराजाभूयःशांतनवं
नृपम् गोदानविस्तरंधीमान्पप्रच्छविनयान्वितः १ युधिष्ठिरउवाच गोप्रदानगुणान्सम्यक्पुनर्मेब्रूहिभारत नहितृ-
प्याम्यहंवीरशृण्वानोमृतमीदृशम् २ वैशंपायनउवाच इत्युक्तोधर्मराजेनतदाशांतनवोनृपः सम्यगाहगुणांस्तस्मैगो-
प्रदानस्यकेवलान् ३ भीष्मउवाच वत्सलांगुणसंपन्नांतरुणींवस्त्रसंयुताम् दत्त्वेदृशींगांविप्रायसर्वपापैःप्रमुच्यते ४

षः उक्ष्णांत्र्यवराणां २१ उपकुर्यात् एतत्कथनेनः २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ इतिआनु०टी०षट्सप्ततितमोऽध्यायः ७६
१ २ ३ ४ ७७

असूर्यानामतेलोकागांदत्वाताम्नयच्छति पीतोदकांजग्धतृणांनष्टक्षीरांनिरिंद्रियाम् ५ जरारोगोपसंपन्नांजीर्णांवापीमिवाजलाम् दत्वात
मःप्रविशतिद्विजंक्लेशेनयोजयेत् ६ रुष्टादुष्टाव्याधितादुर्बलावानोदातव्यायाश्चमूल्यैरदत्तैः क्लेशैर्विप्रंयोफलैःसंयुनक्तितस्यावीर्याश्चाफला
श्चैवलोकाः ७ बलान्विताःशीलवयोपपन्नाःसर्वेप्रशंसंतिसुगंधवत्यः यथाहिगंगासरितांवरिष्ठातथार्जुनीनांकपिलावरिष्ठा ८ यु
धिष्ठिरउवाच • कस्मात्समानेबहुलाप्रदानेसद्भिःप्रशस्तंकपिलाप्रदानम् विशेषमिच्छामिमहाप्रभावंश्रोतुंसमर्थोस्मिभवान्प्रवक्तुम् ९
भीष्मउवाच. वृद्धानाम्ब्रुवतांतातश्रुतमेयत्पुरातनम् वक्ष्यामितदशेषेणरोहिण्योनिर्मितायथा १० प्रजाःसृजेतिचादिष्टःपूर्वंदक्षःस्व
यंभुवा. .असृजद्वृत्तिमेवाग्रेप्रजानांहितकाम्यया ११ यथाह्यमृतमाश्रित्यवर्त्तंतेसर्वदेवताः तथावृत्तिंसमाश्रित्यवर्त्तयंति प्रजाविभो
१२ अचरेभ्यश्चभूतेभ्यश्चराःश्रेष्ठाःसदानराः ब्राह्मणाश्चततःश्रेष्ठास्तेषुयज्ञाःप्रतिष्ठिताः १३ यज्ञैरवाप्यतेसोमःसचगोषुप्रतिष्ठितः त-
तोदेवाःप्रमोदंतेपूर्वंवृत्तिस्ततःप्रजाः १४ प्रजातान्येवभूतानिप्राक्रोशन्वृत्तिकांक्षया वृत्तिदंचान्वपद्यंततृषिताःपितृमातृवत् १५ इतीदंमनसा
गत्वाप्रजासर्गार्थमात्मनः प्रजापतिस्तुभगवानमृतंप्रापिबत्तदा १६ सगतस्तस्यतृप्तिंतुगंधंसुरभिमुद्गिरन् ददर्शोद्गारसंवृत्तांसुरभिं
मुखजांसुताम् १७ सासृजत्सौरभेयीस्तुसुरभिंलोकमातृकाः, सुवर्णवर्णाःकपिलाःप्रजानांवृत्तिधेनवः १८ तासाममृतवर्णानांक्षरंती
नांसमंततः बभूवामृतजःफेनःस्रवंतीनामिवोर्मिजः १९ सवत्समुखविभ्रष्टोभवस्यभुवितिष्ठतः शिरस्यवापतत्क्रुद्धःसतदैक्षतचप्रभुः २०
ललाटप्रभवेणाक्ष्णारोहिणीःप्रदहन्निव तत्तेजस्तुततोरौद्रंकपिलास्ताविशांपते २१ नानावर्णत्वमनयन्मेघानिवदिवाकरः यास्तुतस्मादप
क्रम्यसोममेवाभिसंश्रिताः २२ यथोत्पन्नाःस्ववर्णास्थास्तानीताश्चान्यवर्णताम् अथक्रुद्धंमहादेवंप्रजापतिरभाषत २३ अमृतेनावसिक्त-
स्त्वंनोच्छिष्टंविद्यतेगवाम् यथाह्यमृतमादायसोमोविस्यंदतेपुनः २४ तथाक्षीरंक्षरंत्येतारोहिण्योमृतसंभवम् नदुष्यत्यनिलोनाग्निर्नसुव
र्णंनचोदधिः २५ नामृतेनामृतंपीतंवत्सपीतानवत्सला इमाँल्लोकान्भरिष्यंतिहविषाप्रस्नवेणच २६ आसामैश्वर्यमिच्छंतिसर्वेमृतम-
यंशुभम् वृषभंचददौतस्मैसहगोभिःप्रजापतिः २७ प्रसादयामासमनस्तेनरुद्रस्यभारत प्रीतश्चापिमहादेवश्चकारवृषभंतदा २८
ध्वजंचवाहनंचैवतस्मात्सवृषभध्वजः ततोदेवैर्महादेवस्तदापशुपतिःकृतः ईश्वरःसगवांमध्येवृषभांकःप्रकीर्त्तितः २९

एवमव्यग्रवर्णानांकपिलानांमहौजसाम् प्रदानेप्रथमःकल्पःसर्वासामेवकीर्त्तितः ३० लोकज्येष्ठाल्लोकवृत्तिप्रवृत्तारुद्रोपेताःसोमविष्यंदभूताः
सौम्याःपुण्याःकामदाःप्राणदाश्चगावेदत्वासर्वकामप्रदःस्यात् ३१ इमंगवांप्रभवविधानमुत्तमंपठन्सदाशुचिरपिमंगलप्रियः विमुच्यतेक
लिकलुषेणमानवःश्रियंसुतान्धनपशूनाप्नुयात्सदा ३२ हव्यंकव्यंतर्पणंशांतिकर्मयानंवासोवृद्धबालस्यतुष्टिः गतान्सर्वान्गोप्रदानेगुणा
न्वैदातराजन्नाप्नुयाद्वैसदैव ३३ वैशंपायनउवाच पितामहस्याथनिशम्यवाक्यंराजासहभ्रातृभिराजमीढः सुवर्णवर्णानडु-
हस्तथागाःपार्थोददौब्राह्मणसत्तमेभ्यः ३४ तथैवतेभ्योपिददौद्विजेभ्योगवांसहस्राणिशतानिचैव यज्ञान्समुद्दिश्यचदक्षिणार्थेलोका
न्विजेतुंपरमांचकीर्त्तिम् ३५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेसप्तसप्ततितमोऽध्यायः ७७ भीष्मउवाच ए
तस्मिन्नेवकालेतुवसिष्ठमृषिसत्तमम् इक्ष्वाकुवंशजोराजासौदासोवदतांवरः १ सर्वलोकचरंसिद्धंब्रह्मकोशंसनातनम् पुरोहितमभि
प्रष्टुमभिवाद्योपचक्रमे २ सौदासउवाच त्रैलोक्येभगवन्किंस्वित्पवित्रंकथ्यतेनघ यत्कीर्तयन्सदामर्त्यःप्राप्नुयात्पुण्यमुत्तमम् ३
भीष्मउवाच तस्मैप्रोवाचवचनंप्रणतायहितंतदा गवामुपनिषद्विद्वान्नमस्कृत्यगवांशुचिः ४ गावःसुरभिगंधिन्यस्तथागुग्गुलगं
धयः गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत् ५ गावोभूतंचभव्यंचगावःपुष्टिःसनातनी गावोलक्ष्म्यास्तथामूलंगोषुदत्तंनपश्य-
ति ६ अन्नंहिपरमंगावोदेवानांपरमंहविः स्वाहाकारवषट्कारौगोषुनित्यंप्रतिष्ठितौ ७ गावोयज्ञस्यहिफलंगोषुयज्ञाःप्रतिष्ठिताः
गावोभविष्यंभूतंचगोषुयज्ञाःप्रतिष्ठिताः ८ सायंप्रातश्चसततंहोमकालेमहाद्युते गावोददतिवैहोम्यमृषिभ्यःपुरुषर्षभ ९ यानि
कानिचदुर्गाणिदुष्कृतानिकृतानिच तरंतिचैवपाप्मानंधेनुंयेददतिप्रभो १० एकांचदशगुर्दद्याद्दशदद्याच्चगोशती शतंसहस्रगुर्दद्या
त्सर्वेतुल्यफलाहिते ११ अनाहिताग्निःशतगुरयज्वाचसहस्रगुः समृद्धोयश्चकीनाशोनार्घमर्हंतितेत्रयः १२ कपिलांयेप्रयच्छंति-
सवत्सांकांस्यदोहनाम् सुव्रतांवस्त्रसंवीतामुभौलोकौजयंतिते १३ युवानमिंद्रियोपेतंशतेनशतयूथपम् गवेंद्रंब्राह्मणेंद्रायभूरिशृं
गमलंकृतम् १४ वृषभंयेप्रयच्छंतिश्रोत्रियायपरंतप ऐश्वर्यंतेधिगच्छंतिजायमानाःपुनःपुनः १५ नाकीर्त्तयित्वागाःसुप्यात्तासांसं
स्मृत्यचोत्पतेत् सायंप्रातर्नमस्येच्चगास्ततःपुष्टिमाप्नुयात् १६ गवांमूत्रपुरीषस्यनोद्विजेतकथंचन नचासांमांसमश्नीयाद्गवांपुष्टिंतथा
प्नुयात् १७

१८ १९ गोसमृद्धिकरंकर्मव्रतपूर्वकमाहसार्द्रेति चर्मणिगोरेवसार्द्रेप्रोक्षणेनार्द्रीकृतेउपविश्येतिशेषः भूमावितिकाम्यनिवृत्तिः २० जुहुयाद्धोमन्येति अपहृष्यतेगोमा
नग्निमानुअश्विवितिमंत्रोगोमती २१ २२ २३ २४ २५ इतिआनुशासनिकेपर्वणिटीकायाअष्टसप्ततितमोऽध्यायः ७८ १ २ ३ ४ ५ ६

गाश्चसंकीर्त्तयेन्नित्यंनावमन्येततास्तथा अनिष्टंस्वप्नमालक्ष्यगांनरःसंप्रकीर्त्तयेत १८ गोमयेनसदास्नायात्करीषेचापिसंविशेत श्लेष्ममू
त्रपुरीषाणिप्रतिघातंचवर्जयेत् १९ सार्द्रेचर्मणिभुंजीतनिरीक्षेद्वारुणींदिशम वाग्यतःसर्पिषाभूमौगवांपुष्टिंसदाश्नुते २० घृतेनजुहु-
यादग्निंघृतेनस्वस्तिवाचयेत् घृतंदद्याद्घृतंप्राशेद्गवांपुष्टिंसदाश्नुते २१ गोमत्याविद्ययाधेनुंतिलानामभिमन्त्र्ययः सर्वरत्नमयींदद्यान्नस
शोचेत्कृताकृते २२ गावोमामुपतिष्ठंतुहेमशृंग्यःपयोमुचः सुरभ्यःसौरभेय्यश्चसरितःसागरंयथा २३ गावःपश्यंत्वहंनित्यंगावःपश्यंतु
मांसदा गावोस्माकंवयंतासांयतोगावस्ततोवयम् २४ एवंरात्रौदिवाचापिसमेषुविषमेषुच महाभयेषुचनरःकीर्त्तयन्मुच्यतेभयात् २५
इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेगोप्रदानिकेअष्टसप्ततितमोऽध्यायः ७८ वसिष्ठउवाच शतंवर्षसहस्राणांतप-
स्तप्तंसुदुष्करम् गोभिःपूर्वविसृष्टाभिर्गच्छेमश्रेष्ठतामिति १ लोकेस्मिन्दक्षिणानांचसर्वासांवयमुत्तमाः भवेमनचलिप्येमदोषेणेति
परंतप २ अस्मत्पुरीषस्नानेनजनःपूयेतसर्वदा शकृताचपवित्रार्थंकुर्वीरन्देवमानुषाः ३ तथासर्वाणिभूतानिस्थावराणिचराणिच
प्रदातारश्चलोकान्नोगच्छेयुरितिमानद ४ ताभ्योवरंददौब्रह्मातपसोंतेस्वयंप्रभुः एवंभवत्वितिप्रभुर्लोकांस्तारयतेतिच ५ उत्तस्थुःसि-
द्धकामास्ताभूतभव्यस्यमातरः प्रातर्नमस्यास्तागावस्ततःपुष्टिमवाप्नुयात ६ तपसोंतेमहाराजगावोलोकपरायणाः तस्माद्गावोमहा
भागाःपवित्रंपरमुच्यते ७ तथैवसर्वभूतानांसमतिष्ठंतमूर्द्धनि समानवत्सांकपिलांधेनुंदत्वापयस्विनीम सुव्रतावस्त्रसंवीताब्रह्म
लोकेमहीयते ८ लोहितांतुल्यवत्सांतुधेनुंदत्वापयस्विनीम् सुव्रतावस्त्रसंवीतासूर्यलोकेमहीयते ९ समानवत्सांशबलांधेनुंदत्वा
पयस्विनीम सुव्रतावस्त्रसंवीतासोमलोकेमहीयते १० समानवत्सांशबलांधेनुंदत्वापयस्विनीम् सुव्रतावस्त्रसंवीतामिंद्रलोकेम-
हीयते ११ समानवत्सांकृष्णांतुधेनुंदत्वापयस्विनीम सुव्रतावस्त्रसंवीताग्निलोकेमहीयते १२ समानवत्सांधूम्रांतुधेनुंदत्वापय
स्विनीम सुव्रतावस्त्रसंवीतायाम्यलोकेमहीयते १३ अपांफेनसवर्णांतुसवत्सांकांस्यदोहनाम् प्रदायवस्त्रसंवीतावारुणंलोकमा
प्नुते १४ वातरेणुसवर्णांतुसवत्सांकांस्यदोहनाम प्रदायवस्त्रसंवीतावायुलोकेमहीयते १५ हिरण्यवर्णांपिंगाक्षींसवत्सांकांस्य-
दोहनाम प्रदायवस्त्रसंवीताकौबेरलोकमश्नुते १६
लोकपरायणागावःसर्वभूतगतिशेषः ७ ८ ९ १० ११ १२ १३ १४ १५ १६ ७९

१७ इतिकंठंप्रलंबगलकंबलां १८ १९ २० वैराटंबृहत्पृष्टंयस्यरंटतिकंदत्यनेनेतिगुटंक्षतंविगतंराटंस्वार्थेतद्धितः २१ २२ २३ २४ २५ २६

पलालधूम्रवर्णांतुसवत्सांकांस्यदोहनाम् प्रदायवस्त्रसंवीतांपितृलोकेमहीयते १७ सवत्सांपीवरींदत्वादृतिकंठामलंकृताम् वैश्वदेवमसं
बाधस्थानंश्रेष्ठंप्रपद्यते १८ समानवत्सांगौरींतुधेनुंदत्वापयस्विनीम् सुव्रतांवस्त्रसंवीतांवसूनांलोकमाप्नुयात् १९ पांडुकंबलवर्णाभां
सवत्सांकांस्यदोहनाम् प्रदायवस्त्रसंवीतांसाध्यानांलोकमाप्नुते २० वैराटपृष्ठमुक्षाणंसर्वरत्नैरलंकृतम् प्रददन्मरुतांलोकान्सराजन्
प्रतिपद्यते २१ वयोपपन्नंलीलांगंसर्वरत्नसमन्वितम् गंधर्वाप्सरसांलोकान्दत्वाप्राप्नोतिमानवः २२ दृतिकंठमनड्वाहंसर्वरत्नैरलंकृ
तम् दत्वाप्रजापतेर्लोकान्विशोकःप्रतिपद्यते २३ गोप्रदानरतोयातिभित्वाजलदसंचयान् विमानेनार्कवर्णेनदिविराजन्विराजते २४
तंचारुवेषाःसुश्रोण्यःसहस्रंसुरयोषितः रमयंतिनरश्रेष्ठगोप्रदानरतंनरम् २५ वीणानांवल्लकीनांचनूपुराणांचशिंजितैः हासैश्चहरिणा
क्षीणांसुप्तःसप्रतिबोध्यते २६ यावंतिरोमाणिभवंतिधेन्वास्तावंतिवर्षाणिमहीयतेसः स्वर्गच्युतश्चापिततोनृलोकेप्रसूयतेवैविपुलेगृहे-
षु २७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेगोप्रदानिकेएकोनाशीतितमोऽध्यायः ७९ वसिष्ठउवाच घृतक्षीरप्रदा
गावोघृतयोन्योघृतोद्भवाः घृतनद्योघृतावर्तास्तामेसंतुसदागृहे १ घृतंमेहृदयेनित्यंघृतंनाभ्यांप्रतिष्ठितं घृतंसर्वेषुगात्रेषुघृतंमेमन
सिस्थितम् २ गावोममाग्रतोनित्यंगावःपृष्ठतएवच गावोमेसर्वतश्चैवगवांमध्येवसाम्यहम् ३ इत्याचम्यजपेत्सायंप्रातश्चपुरुषःसदा
यदन्हांकुरुतेपापंतस्मात्सपरिमुच्यते ४ प्रासादायत्रसौवर्णावसोर्धाराचयत्रसा गंधर्वाप्सरसोयत्रतत्रयांतिसहस्रदाः ५ नवनीतपं
काःक्षीरोदादधिशैवलसंकुलाः वहंतियत्रवैनद्यस्तत्रयांतिसहस्रदाः ६ गवांशतसहस्रंतुयःप्रयच्छेद्यथाविधि परांवृद्धिमवाप्याथस्व
र्गलोकेमहीयते ७ दशचोभयतःपुत्रोमातापित्रोःपितामहान् दधातिसुकृतांल्लोकान्पुनातिचकुलंनरः ८ धेन्वाःप्रमाणेनसमप्रमाणां
धेनुंतिलानामपिचप्रदाय पानीयदाताचयमस्यलोकेनयातनांकाचिदुपैतितत्र ९ पवित्रमग्र्यंजगतःप्रतिष्ठादिवौकसांमातरोथाप्रमेयाः
अन्वालभेद्दक्षिणतोव्रजेच्चदद्याच्चपात्रेप्रसमीक्ष्यकालम् १० धेनुंसवत्सांकपिलांभूरिशृंगींकांस्योपदोहांवसनोत्तरीयाम् प्रदायतांगा
हतिदुर्विगाह्यांयाम्यांसभांवीतभयोमनुष्यः ११ सुरूपाबहुरूपाश्चविश्वरूपाश्चमातरः गावोमामुपतिष्ठंतामितिनित्यंप्रकीर्तयेत् १२
नातःपुण्यतरंदानंनातःपुण्यतरंफलम् नातोविशिष्टंलोकेषुभूतंभवितुमर्हति १३

२७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायामे-
कोनाशीतितमोऽध्यायः ७९ घृतयोन्यःघृतयोनयः १ २ ३ ४ वसोर्धारामंदाकिनी ५ ६ ७ ८ पानीयदाताजलधेनुदाता ९ १० ११ १२ १३

१४ १५ १६ भूमिदःसौदासोनामराजा १७ इतिआनुशासनिकेपर्वणिटीकायांअशीतितमोऽध्यायः ८० पवित्राणांशिष्टंउत्कृष्टमन्यत् १ २ ३ ४ ५

त्वचालोम्नाथशृंगैर्वावालैःक्षीरेणमेदसा यज्ञंवहतिसंभूयकिमस्त्यभ्यधिकंततः १४ ययासर्वमिदंव्याप्तंजगत्स्थावरजंगमम् तांधेनुंशिरसावंदेभूतभव्यस्यमातरम् १५ गुणवचनसमुच्चयैकदेशोनृवरमयैषगवांप्रकीर्तितस्ते नचपरमिहदानमस्तिगोभ्योभवतिनचापिपरायणंतथान्यत् १६ भीष्मउवाच वरमिदमितिभूमिदोविचिन्त्यप्रवरमृषेर्वचनंततोमहात्मा व्यसृजतनियतात्मवान्द्विजेभ्यःसुबहुचगोधनमाप्तवांश्चलोकान् १७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेगोप्रदानिकेऽशीतितमोऽध्यायः ८० युधिष्ठिरउवाच पवित्राणांपवित्रंयच्छिष्टंलोकेचयद्भवेत् पावनंपरमंचैवतन्मेब्रूहिपितामह १ भीष्मउवाच गावोमहार्थाःपुण्याश्चतारयंतिचमानवान् धारयंतिप्रजाश्चेमाहविषापयसातथा २ नहिपुण्यतमंकिंचिद्गोभ्योभरतसत्तम एताःपुण्याःपवित्राश्चत्रिषुलोकेषुसत्तमाः ३ देवानामुपरिष्टाच्चगावःप्रतिवसंतिवै दत्वाचैतास्तारयतेयांतिस्वर्गंमनीषिणः ४ मांधातायौवनाश्वश्चययातिर्नहुषस्तथा गावोददंतःसततंसहस्रशतसंमिताः ५ गताःपरमकंस्थानंदेवैरपिसुदुर्लभम् अपिचात्रपुरागीतंकथयिष्यामितेऽनघ ६ ऋषीणामुत्तमंधीमान्कृष्णद्वैपायनंशुकः अभिवाद्याह्निकंकृत्वाशुचिःप्रयतमानसः ७ पितरंपरिपप्रच्छदृष्टलोकपरावरम् कोयज्ञःसर्वयज्ञानांवरिष्ठउपलक्ष्यते ८ किंचकृत्वापरंस्थानंप्राप्नुवंतिमनीषिणः केनदेवाःपवित्रेणस्वर्गमश्नंतिवाविभो ९ किंचयज्ञस्ययज्ञत्वंक्वचयज्ञःप्रतिष्ठितः देवानामुत्तमंकिंचकिंचसत्रमितःपरम् १० पवित्राणांपवित्रंचयत्तद्ब्रूहिपितर्मम एतच्छ्रुत्वातुवचनंव्यासःपरमधर्मवित् पुत्रायाकथयत्सर्वंतत्त्वेनभरतर्षभ ११ व्यासउवाच गावःप्रतिष्ठाभूतानांतथागावःपरायणम् गावःपुण्याःपवित्राश्चगोधनंपावनंतथा १२ पूर्वमासन्नशृंगावैगावइत्यनुशुश्रुम शृंगार्थेसमुपासंतताःकिलप्रभुमव्ययम् १३ ततोब्रह्मातुगाःप्रायमुपविष्टाःसमीक्ष्यह ईप्सितंप्रददौताभ्योगोभ्यःप्रत्येकशःप्रभुः १४ तासांशृंगाण्यजायंतयस्यायाद्दृङ्मनोगतम् नानावर्णाःशृंगवंत्यस्ताव्यरोचंतपुत्रक १५ ब्रह्मणावरदत्तास्ताहव्यकव्यप्रदाःशुभाः पुण्याःपवित्राःसुभगादिव्यसंस्थानलक्षणाः १६ गावस्तेजोमहद्दिव्यंगवांदानंप्रशस्यते येचैनाःसंप्रयच्छंतिसाधवोवीतमत्सराः १७ तेवैसुकृतिनःप्रोक्ताःसर्वदानप्रदाश्चते गवांलोकंतथापुण्यमाप्नुवंतिचतेऽनघ १८ यत्रवृक्षामधुफलादिव्यपुष्पफलोपगाः पुष्पाणिचसुगंधीनिदिव्यानिद्विजसत्तम १९ सर्वामणिमयीभूमिःसर्वकांचनवालुका सर्वर्तुसुखसंस्पर्शानिष्पंकानिरजाःशुभाः २०

पुरागीतंपौराणीकथा ६ आह्निकंकृत्वा कृताह्निकः ७ ८ ९ १० ११ १२ असंनशृंगाइत्यत्रशृंगशब्दस्योपलक्षणं गावोवैमनसामतृशाः शृंगाणिशिरसाअस्यासा-
दृशमेमामिशाप्ता शृंगाण्यजायंतेइतिश्रुतेः १३ १४ १५ १६ १७ १८ १९ २०

२१ २२ २३ उद्भूतपुलिनाः अंकुरिततीराः २४ २५ २६ नगाः वृक्षाः पंत्ररथाः पक्षिणः २७ २८ २९ ३० नाममात्रजपेदितिसबंधः युगंधराः मासादियुगंधारयंतिताः

रक्तोत्पलवनैश्चैवमणिखंडैर्हिरण्मयैः तरुणादित्यसंकाशैर्भांतितत्रजलाशयाः २१ महार्हमणिपत्रैश्चकांचनप्रभकेसरैः नीलोत्पलविमिश्रैश्च
सरोभिर्बहुपंकजैः २२ करवीरवनैःफुल्लैःसहस्रावर्तसंवृतैः संतानकवनैःफुल्लैर्वृक्षैश्चसमलंकृताः २३ निर्मलाभिश्चमुक्ताभिर्मणिभि-
श्चमहाप्रभैः उद्भूतपुलिनास्तत्रजातरूपैश्चनिम्नगाः २४ सर्वरत्नमयैश्चित्रैरवगाढाद्रुमोत्तमैः जातरूपमयैश्चान्यैर्हुताशनसमप्रभैः
२५ सौवर्णागिरयस्तत्रमणिरत्नशिलोच्चयाः सर्वरत्नमयैर्भांतिशृंगैश्चारुभिरुच्छ्रितैः २६ नित्यपुष्पफलास्तत्रनगाःपत्ररथाकुलाः दिव्य
गंधरसैःपुष्पैःफलैश्चभरतर्षभ २७ रमंतेपुण्यकर्माणस्तत्रनित्ययुधिष्ठिर सर्वकामसमृद्धार्थानिःशोकागतमन्यवः २८ विमानेषुविचि
त्रेषुरमणीयेषुभारत मोदंतेपुण्यकर्माणोविहरंतोयशस्विनः २९ उपक्रीडंतितान्राजन्शुभाश्चाप्सरसांगणाः एतान्लोकानवाप्नोति
गांदत्वावैयुधिष्ठिर ३० येषामधिपतिःपूषामारुतोबलवान्बली ऐश्वर्येवरुणोराजानाममात्रयुगंधराः ३१ सुरूपाबहुरूपाश्चविश्वरू
पाश्चमातरः प्राजापत्यमितिब्रह्मन्जपेन्नित्ययतव्रतः ३२ गाश्चशुश्रूषतेयश्चसमन्वेतिचसर्वशः तस्मैतुष्टाःप्रयच्छंतिवरानपिसुदुर्लभा
न् ३३ द्रुह्येन्नमनसावापिगोषुनित्यंसुखप्रदः अर्चयेतसदाचैवनमस्कारैश्चपूजयेत् ३४ दांतःप्रीतमनानित्यंगवांव्युष्टिंतथाश्नुते त्र्य
हमुष्णंपिबेन्मूत्रंत्र्यहमुष्णंपिबेत्पयः ३५ गवामुष्णंपयःपीत्वात्र्यहमुष्णंघृतंपिबेत् त्र्यहमुष्णंघृतंपीत्वावायुभक्षोभवेत्त्र्यहम् ३६ येन
देवाःपवित्रेणभुंजतेलोकमुत्तमम् यत्पवित्रंपवित्राणांतद्धृतंशिरसावहेत् ३७ घृतेनजुहुयादग्निंघृतेनस्वस्तिवाचयेत् घृतंप्राशेद्धृतं
दद्याद्गवांपुष्टिंतथाश्नुते ३८ निर्हृतैश्चयवैर्गोभिर्मासंप्रश्रितयावकः ब्रह्महत्यासमंपापंसर्वमेतेनशुध्यते ३९ पराभवाच्चदै
त्यानांदेवैःशौचमिदंकृतम् तेदेवत्वमपिप्राप्ताःसंसिद्धाश्चमहाबलाः ४० गावःपवित्राःपुण्याश्चपावनंपरमंमहत् ताश्चद
त्वाद्विजातिभ्योनरःस्वर्गमुपाश्नुते ४१ गवांमध्येशुचिर्भूत्वागोमतींमनसाजपेत् पूताभिरद्भिराचम्यशुचिर्भवतिनिर्मलः ४२
अग्निमध्येगवांमध्येब्राह्मणानांचसंसदि विद्यावेदव्रतस्नाताब्राह्मणाःपुण्यकर्मिणः ४३ अध्यापयेरन्शिष्यान्वैगोमतींयज्ञसं-
मिताम् त्रिरात्रोपोषितोभूत्वागोमतींलभतेवरम् ४४ पुत्रकामश्चलभतेपुत्रंधनमथापिवा पतिकामाचभर्तारंसर्वकामांश्चमानवः गा
वस्तुष्टाःप्रयच्छंतिसेविताःवैनसंशयः ४५ एवमेतामहाभागायज्ञियाःसर्वकामदाः रोहिण्यइतिजानीहिनैताभ्योविद्यतेपरम् ४६

३१ प्राजापत्यंप्रजापतिनोक्तं ३२ ३३ ३४ ३५ ३६ ३७ जुहुयात्पूर्वोक्तगोमत्याः ३८ निर्हृतैःगोमयनिर्गतैः ३९ ४० ४१ ४२ ४३ गोमतींगोमत्याकृत्वाप्रकाशितमर्थंवरंलभते

इत्युक्तः स महातेजाः शुकः पित्रा महात्मना पूजयामास गां नित्यं तस्मात्त्वमपि पूजय ४७ इति श्रीमहाभारते आनुशासनिके पर्वणि
दानधर्मे गोप्रदानिके एकाशीतितमोऽध्यायः ८१ युधिष्ठिर उवाच मया गवां पुरीषं वै श्रिया जुष्टमिति श्रुतम् एतदिच्छाम्यहं श्रोतुं
संशयोऽत्र पितामह १ भीष्म उवाच अत्राप्युदाहरन्तीममितिहासं पुरातनम् गोभिर्नृपेह संवादं श्रिया भरतसत्तम २ श्रीः कृत्वे
ह वपुः कान्तं गोमध्येषु विवेश ह गावोऽथ विस्मितास्तस्या दृष्ट्वा रूपस्य संपदम् ३ गाव ऊचुः कासि देवि कुतो वा त्वं रूपेणाप्रतिमा भुवि
विस्मिताः स्म महाभागे तव रूपस्य संपदा ४ इच्छाम त्वां वयं ज्ञातुं का त्वं क्व च गमिष्यसि तत्त्वेन वरवर्णाभे सर्वमेतद्ब्रवीहि नः ५ श्रीरु
वाच लोककान्तास्मि भद्रं वः श्रीर्नामाहं परिश्रुता मया दैत्याः परित्यक्ता विनष्टाः शाश्वतीः समाः ६ मयाभिपन्ना देवाश्च मोदन्ते शाश्वतीः
समाः इन्द्रो विवस्वान्सोमश्च विष्णुरापोऽग्निरेव च ७ मयाभिपन्नाः सिध्यन्ते ऋषयो देवतास्तथा यान्नाविशाम्यहं गावस्ते विनश्यन्ति सर्वशः
८ धर्मश्चार्थश्च कामश्च मया जुष्टाः सुखान्विताः एवंप्रभावां मां गावो विजानीत सुखप्रदाः ९ इच्छामि चापि युष्मासु वस्तुं सर्वासु नित्यदा आ
गत्य प्रार्थये युष्माञ्श्रीजुष्टा भवताथ वै १० गाव ऊचुः अध्रुवां चपलां च त्वां सामान्यां बहुभिः सह न त्वामिच्छाम भद्रं ते गम्यतां यत्र
रस्यसे ११ वपुष्मत्यो वयं सर्वाः किमस्माकं त्वयाद्य वै यथेष्टं गम्यतां तत्र कृतकार्या वयं त्वया १२ श्रीरुवाच किमेतद्वः क्षमं गावो यन्मां
नेहाभिनन्दथ न मां संप्रतिगृह्णीध्वं कस्माद्वै दुर्लभां सतीम् १३ सत्यं च लोकवादोऽयं लोके चरति सुव्रताः स्वयं प्राप्ते परिभवो भवतीति विनि
श्चयः १४ महदुग्रं तपः कृत्वा मां निषेवन्ति मानवाः देवदानवगन्धर्वाः पिशाचोरगराक्षसाः १५ प्रभाव एष वो गावः प्रतिगृह्णीत मामिह नाव
मन्यास्म्यहं सौम्यास्त्रैलोक्ये सचराचरे १६ गाव ऊचुः नावमन्यामहे देवि न त्वां परिभवामहे अध्रुवा चलचित्तासि ततस्त्वां वर्जयामहे
१७ बहुना च किमुक्तेन गम्यतां यत्र वाञ्छसि वपुष्मत्यो वयं सर्वाः किमस्माकं त्वयानघे १८ श्रीरुवाच अवज्ञाता भविष्यामि सर्वलो
कस्य मानदाः प्रत्याख्यानेन युष्माकं प्रसादः क्रियतां मम १९ महाभागा भवत्यो वै शरण्याः शरणागताम् परित्रायत मां नित्यं भजमाना
मनिन्दिताम् २० माननामहमिच्छामि भवत्यः सततं शिवाः अप्येकाङ्गे तु वो वस्तुमिच्छामि च सुकुत्सिते २१

नचोस्तिकुत्सितंकिंचिदंगेष्वालक्ष्यतेनघाः पुण्याःपवित्राःसुभगाःममादेशंप्रयच्छथ २२ वसेयंयत्रचोदेहेतन्मेव्याख्यातुमर्हथ एव
मुक्तास्ततोगावःशुभाःकरुणवत्सलाः संमंत्र्यसहिताःसर्वाःश्रियमूचुर्नराधिप २३ अवश्यंमाननाकार्यातवास्माभिर्यशस्विनि शकृन्मू
त्रेनिवसत्वंपुण्यमेतद्धिनःशुभे २४ श्रीरुवाच दिष्ट्याप्रसादोयुष्माभिःकृतोमेनुग्रहात्मकः एवंभवतुभद्रंवःपूजितास्मिसुखप्र-
दाः २५ एवंकृत्वातुसमयंश्रीर्गोभिःसहभारत पश्यंतीनांततस्तासांतत्रैवांतरधीयत २६ एवंगोशकृतःपुत्रमहात्म्यंतेनुवर्णितम् माहा
त्म्यंचगवांभूयःश्रूयतांगदतोमम २७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेश्रीगोसंवादोनामद्व्यशीतितमोऽध्यायः
८२ भीष्मउवाच येचगांसंप्रयच्छंतिहुतशिष्टाशिनश्चये तेषांसत्राणियज्ञाश्चनित्यमेवयुधिष्ठिर १ ऋतेदधिघृतेनेहनयज्ञःसंप्र
वर्तते तेनयज्ञस्ययज्ञत्वमतोमूलंचकथ्यते २ दानानामपिसर्वेषांगवांदानंप्रशस्यते गावःश्रेष्ठाःपवित्राश्चपावनंह्येतदुत्तमम् ३ पुष्ट्य
र्थमेताःसेवेतशांत्यर्थमपिचैवह पयोदधिघृतंचासांसर्वपापप्रमोचनम् ४ गावस्तेजःपरंप्रोक्तमिहलोकेपरत्रच नगोभ्यःपरमंकिंचित्प
वित्रंभरतर्षभ ५ अत्राप्युदाहरंतीममितिहासंपुरातनम् पितामहस्यसंवादमिंद्रस्यचयुधिष्ठिर ६ पराभूतेषुदैत्येषुशक्रेत्रिभुवनेश्व
रः प्रजाःसमुदिताःसर्वाःसत्यधर्मपरायणः ७ अथर्षयःसगंधर्वाःकिन्नरोरगराक्षसाः देवासुरसुपर्णाश्चप्रजानांपतयस्तथा ८ पर्युपा
संतकौंतेयकदाचिद्वैपितामहम् नारदःपर्वतश्चैवविश्वावसुर्हहाहुहूः ९ दिव्यतानेषुगायंतःपर्युपासंततंप्रभुम् तत्रदिव्यानिपुष्पाणि
प्रावहत्पवनस्तथा १० आजह्रुर्ऋतवश्चापिसुगंधीनिपृथक्पृथक् तस्मिन्देवसमावायेसर्वभूतसमागमे ११ दिव्यवादित्रसंघुष्टेदिव्य
स्त्रीचारणावृते इंद्रःपप्रच्छदेवेशमभिवाद्यप्रणम्यच १२ देवानांभगवन्कस्माल्लोकेशानांपितामह उपरिष्टाद्गवांलोकएतदिच्छामि
वेदितुम् १३ किंतपोब्रह्मचर्यंवागोभिःकृतमिहेश्वर देवानामुपरिष्टाच्चवसंत्यरजसःसुखम् १४ ततःप्रोवाचब्रह्मातंशक्रंबलनिषू-
दनम् अवज्ञातास्त्वयानित्यंगावोबलनिषूदन १५ तेनत्वमासांमाहात्म्यंनवेत्सिशृणुयत्प्रभो गवांप्रभावपरमंमाहात्म्यंचसुरर्षभ १६ य
ज्ञांगंकथितागावोयज्ञएवचवासव एताभिश्चविनायज्ञोनवर्त्तेतकथंचन १७ धारयंतिप्रजाश्चैवपयसाहविषातथा एतासांतनयाश्चापि
कृषियोगमुपासते १८

१९ २० वासवाकूटवाहिन्यः अमायाव्यंवहरिण्यः २१ निवासार्थंकृतंनिवासकृतम् २२ २३ २४ २५ २६ २७ २८ २९ ३०
३१ ३२ ३३ ३४ ३५ ३६ त्रयाणामुपरिष्टात् ब्रह्मलोकेइत्यर्थः ततःपरस्यतपःफलस्याभावात् तत्रैवचगोलोकःश्रूयते तायोयास्त्वन्यभ्यासिग
मध्येयत्रगावोभूरिशृंगाआयासः अत्राहतदुरुगायस्यविष्णोःपरमंपदमवभातिभूरीतिताावांयुवयोरिंद्राविष्ण्वोःनरनारायणयोःप्रसादाद्यास्तूनिस्थानानिउश्मसि

जनयंतिचधान्यानिबीजानिविविधानिच ततोयज्ञाःप्रवर्त्तंतेहव्यंकव्यंचसर्वशः १९ पयोदधिघृतंचैवपुण्याश्चैताःसुराधिप वहंतिविवि-
धान्भारान्क्षुत्तृष्णापरिपीडिताः २० मुनींश्चधारयंतीहप्रजाश्चैवापिकर्मणा वासवाकूटवाहिन्यःकर्मणासुकृतेनच २१ उपरिष्टात्ततो-
स्माकंवसंत्येताःसदैवहि एवंतेकारणंशक्रनिवासकृतमद्यवै २२ गवांदेवोपरिष्टाद्धिसमाख्यातंशतक्रतो एताहिवरदत्ताश्चवरदाश्चापि
वासव २३ सुरभ्यःपुण्यकर्मिण्यःपावनाःशुभलक्षणाः यदर्थंगागताश्चैवसुरभ्यःसुरसत्तम २४ तच्चमेशृणुकार्त्स्न्येनवदतोवलसूदन
पुरादेवयुगेतातदेवेंद्रेषुमहात्मसु २५ त्रीँल्लोकाननुशासत्सुविष्णौगर्भत्वमागते अदित्यास्तप्यमानायास्तपोघोरंसुदुश्चरम् २६ पुत्रार्थं
ममरश्रेष्ठपादेनैकेननित्यदा तांतुदृष्ट्वामहादेवींतप्यमानांमहत्तपः २७ दक्षस्यदुहितादेवीसुरभीनामनामतः अतप्यततपोघोरंहृष्टा
धर्मपरायणा २८ कैलासशिखरेरम्येदेवगंधर्वसेविते व्यतिष्ठदेकपादेनपरमंयोगमास्थिता २९ दशवर्षसहस्राणिदशवर्षशतानिच
संतप्तास्तपसातस्यादेवाःसर्षिमहोरगाः ३० तत्रगत्वामयासार्द्धंपर्युपासंततांशुभाम् अथाहमब्रुवंतत्रदेवींतांतपसान्विताम् ३१ किम
र्थंतप्यसेदेवितपोघोरमनिंदिते प्रीतस्तेहंमहाभागेतपसानेनशोभने ३२ वरयस्ववरंदेविदातास्मीतिपुरंदर ३३ सुरभ्युवाच व
रेणभगवन्मह्यंकृतंलोकपितामह एषएववरोमेद्ययत्प्रीतोसिममानघ ३४ ब्रह्मोवाच तामेवंब्रुवतींदेवींसुरभींत्रिदशेश्वर
प्रत्यब्रुवंयद्देवेंद्रतन्निबोधशचीपते ३५ अलोभकाम्ययादेवितपसाचशुभानने प्रसन्नोहंवरंतस्माद्मरत्वंददामिते ३६ त्रया
णामपिलोकानामुपरिष्टान्निवत्स्यसि मत्प्रसादाच्चविख्यातोगोलोकःसंभविष्यति ३७ मानुषेषुचकुर्वाणाःप्रजाःकर्मशुभास्तव नि
वत्स्यंतिमहाभागेसर्वादुहितरस्तवते ३८

कामयामहेगमध्यैगंतुंयत्रयेषुस्थानेषुगावःभूरिशृंगा अन्यंतमानवाः अत्रअस्मिन्गोलोकेअहएवतत्
मिदंउरुगायस्यविष्णोःकामपूरकस्यपरमंपदंसर्वोत्कृष्टंस्थानंअवभाति अल्पमिवभाति भूरि अत्यंतंसर्वेभ्योलोकेभ्यउपरिलोकइतिसिद्धं अन्यथाचतुर्थी
महर्लोकएवाभ्येतिनिन्चतस्यंपरमंपदत्वमस्तीतिमंत्रानुसारागद्ब्रह्मलोकएवगावःसंतीतिज्ञेयम ३७ ३८ ७ ७ ७ ७

मनसाचिंतिताभोगास्त्वयावैदिव्यमानुषाः यच्चसर्वसुखंदेवितत्तेसंपत्स्यतेशुभे ३९ तस्यालोकाःसहस्राक्षसर्वकामसमन्विताः नत
त्रक्रमतेमृत्युर्नजरानचपावकः ४० नदैवंनाशुभंकिंचिद्विद्यतेतत्रवासव तत्रदिव्यान्यरण्यानिदिव्यानिभवनानिच ४१ विमानानिसु
युक्तानिकामगानिचवासव ब्रह्मचर्येणतपसासत्येनचदमेनच ४२ दानैश्चविविधैःपुण्यैस्तथातीर्थानुसेवनात् तपसामहताचैवसु
कृतेनचकर्मणा ४३ शक्यःसमासादयितुंगोलोकःपुष्करेक्षण एतत्तेसर्वमाख्यातंमयाशक्रानुपृच्छते ४४ नतेपरिभवःकार्योगवामसु
रसूदन ४५ भीष्मउवाच एतच्छ्रुत्वासहस्राक्षःपूजयामासनित्यदा गाश्चक्रेबहुमानञ्चतासुनित्यंयुधिष्ठिर ४६ एतत्तेसर्वमाख्या
तंपावनंचमहाद्युते पवित्रंपरमंचापिगवांमाहात्म्यमुत्तमम् ४७ कीर्तितंपुरुषव्याघ्रसर्वपापविमोचनम् यइदंकथयेन्नित्यंब्राह्मणेभ्यः
समाहितः ४८ हव्यकव्येषुयज्ञेषुपितृकार्येषुचैवह सर्वकामिकमक्षय्यंपितॄंस्तस्योपतिष्ठते ४९ गोषुभक्तश्चलभतेयद्यदिच्छतिमानवः
स्त्रियोपिभक्तायागोषुताश्चकाममवाप्नुयुः ५० पुत्रार्थीलभतेपुत्रंकन्यार्थीतामवाप्नुयात् धनार्थीलभतेवित्तंधर्मार्थीधर्ममाप्नुयात् ५१
विद्यार्थीचाप्नुयाद्विद्यांसुखार्थीप्राप्नुयात्सुखम् नकिंचिद्दुर्लभंचैवगवांभक्तस्यभारत ५२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणि
दानधर्मेत्र्यशीतितमोऽध्यायः ८३ युधिष्ठिरउवाच उक्तंपितामहेनेदंगवांदानमनुत्तमम् विशेषेणनरेंद्राणामिहधर्ममवेक्षता
म् १ राज्यंहिसततंदुःखंदुर्धरंचाकृतात्मभिः भूयिष्ठंचनरेंद्राणांविद्यतेनशुभागतिः २ पूयंतेतत्रनियतंप्रयच्छंतोवसुंधराम् सर्वेच
कथिताधर्मास्त्वयामेकुरुनंदन ३ एवमेवगवामुक्तंप्रदानंतेनृगेणह ऋषिणानाचिकेतेनपूर्वमेवनिदर्शितम् ४ वेदोपनिषदश्चैव
सर्वकर्मसुदक्षिणाः सर्वक्रतुषुचोद्दिष्टंभूमिर्गावोथकांचनम् ५ तत्रश्रुतिस्तुपरमासुवर्णंदक्षिणेतिवै एतदिच्छाम्यहंश्रोतुंपिताम
हयथातथम् ६ किंसुवर्णंकथंजातंकस्मिन्कालेकिमात्मकम् किंदैवंकिंफलंचैवकस्माच्चपरमुच्यते ७ कस्माद्दानंसुवर्णस्यपूजयंति
मनीषिणः कस्माच्चदक्षिणार्थंतद्यज्ञकर्मसुशस्यते ८ कस्माच्चपावनंश्रेष्ठंभूमेर्गोभ्यश्चकांचनम् परमंदक्षिणार्थेचतद्ब्रवीहिपिता
मह ९ भीष्मउवाच शृणुराजन्नवहितोबहुकारणविस्तरम् जातरूपसमुत्पत्तिमनुभूतंचयन्मया १०

पितामममहातेजाः शांतनुर्निधनंगतः तस्यदित्सुरहंश्राद्धंगंगाद्वारमुपागमम् ११ तत्रागम्यपितुःपुत्रश्राद्धकर्मसमारभम् मातामेजान्ह
वीचात्रसाहाय्यमकरोत्तदा १२ ततोग्रतस्ततःसिद्धानुपवेश्यबहून्नृपान् तोयप्रदानात्प्रभृतिकार्याण्यहमथारभम् १३ तत्समाप्य
यथोद्दिष्टंपूर्वकर्मसमाहितः दातुंनिर्वपणंसम्यग्यथावदहमारभम् १४ ततस्तंदर्भविन्यासंभित्त्वासुरुचिरांगदः प्रलंबाभरणोबाहुरु
द्तिष्ठद्विशांपते १५ तमुत्थितमहंदृष्ट्वापरंविस्मयमागमम् प्रतिगृह्णातिसाक्षान्मेपितेतिभरतर्षभ १६ ततोमेपुनरेवासीत्संज्ञासंचि
त्यशास्त्रतः नायंवेदेषुविहितोविधिर्हस्तइतिप्रभो १७ पिंडोदेयोनरेणेहततोमतिरभून्मम साक्षान्नेहमनुष्यस्यपिंडंहिपितरःक्वचि
त् १८ गृण्हन्तिविहितंचेत्थंपिंडोदेयःकुशेष्विति ततोहंतदनादृत्यपितुर्हस्तनिदर्शनम् १९ शास्त्रप्रामाण्यसूक्ष्मंतुविधिंपिंडस्यसंस्म
रन् ततोदर्भेषुतत्सर्वमददंभरतर्षभ २० शास्त्रमार्गानुसारेणतद्विद्धिमनुजर्षभ ततःसोंतर्हितोबाहुःपितुर्ममजनाधिप २१ ततो
मांदर्शयामासुःस्वप्नांतेपितरस्तथा प्रीयमाणास्तुमामूचुःप्रीताःस्मभरतर्षभ २२ विज्ञानेनतवानेनयन्नमुह्यसिधर्मतः त्वयाहिकु
र्वताशास्त्रंप्रमाणमिहपार्थिव २३ आत्माधर्मःश्रुतंवेदाःपितरश्चर्षिभिःसह साक्षात्पितामहोब्रह्मागुरवोथप्रजापतिः २४ प्रमाणमुप
नीतावैस्थिताश्चनविचालिताः तदिदंसम्यगारब्धंत्वयाद्यभरतर्षभ २५ किंतुभूमेर्गवांचार्थेसुवर्णंदीयतामिति एवंवयंचधर्मज्ञसर्वे
चास्मत्पितामहाः २६ पावितावैभविष्यंतिपावनंहिपरंहितत् दशपूर्वान्दशैवान्यांस्तथासंतारयन्तिते २७ सुवर्णंयेप्रयच्छंतिएवंम
त्पितरोब्रुवन् ततोहंविस्मितोराजन्प्रतिबुद्धोविशांपते २८ सुवर्णदानेकरवंमतिंचभरतर्षभ इतिहासमिमंचापिशृणुराजन्पुरातन
म् २९ जामदग्न्यंप्रतिविभोधन्यमायुष्यमेवच जामदग्न्येनरामेणतीव्ररोषान्वितेनवै ३० त्रिःसप्तकृत्वःपृथिवीकृतानिःक्षत्रियापुरा
ततोजित्वामहींकृत्स्नांरामोराजीवलोचनः ३१ आजहारक्रतुंवीरोब्रह्मक्षत्रेणपूजितम् वाजिमेधंमहाराजसर्वकामसमन्वितम् ३२ पावनम्
वैभूतानांतेजोद्युतिविवर्धनम् विपाप्माचभवात्तोत्रतेनक्रतुफलेनच ३३ नैवात्मनोथलघुतांजामदग्न्योध्यगच्छत सतुक्रतुवरेणेष्ट्वा
महतादक्षिणावता ३४ पप्रच्छागमसंपन्नान्नृषीन्देवांश्चभार्गव पावनंयत्परंनृणामुग्रेकर्मणिवर्ततां ३५ तदुच्यतांमहाभागाइतिजातघृ
णोब्रवीत् इत्युक्तावेदशास्त्रज्ञास्तमूचुस्तेमहर्षयः ३६ रामविप्राःसत्क्रियंतांवेदप्रामाण्यदर्शनात् भूयश्चविप्रर्षिगणाःप्रष्टव्याःपावनंप्रति ३७ तेय
त्ब्रूयुर्महाप्राज्ञस्तच्चैवसमुदाचर ततोवसिष्ठंदेवर्षिमगस्त्यमथकाश्यपं ३८ तमेवार्थंमहातेजाःपप्रच्छभृगुनंदनः जातामतिर्मेविप्रेन्द्राःकथंपू
येयमित्युत ३९

४० ४१ ४२ ४३ ४४ ४५ ४६ अजइति अजादीनामग्न्यादिरूपत्वात्तद्दानंतल्लोकप्रदम् ४७ असुरराक्षसपदाभ्यामपितल्लोकःवराहाश्चनिर्ऋतिःअ
स्यदानंअल्पफलंइडागावोभूतिरूपाइतितद्दानंमहाफलंइडेतिइडावानयज्ञः ४८ जगदितिसुवर्णदानमनुल्यमितिभावः ४९ ५० ५१ ५२

केनवाकर्मयोगेनप्रदानेनेहकेनवा यदिवोनुग्रहकृताबुद्धिर्मांप्रतिसत्तमाः प्रब्रूतपावनंकिंमेभवेदितितपोधनाः ४० ऋषयऊचुः
गाश्चभूमिंचवित्तंचदत्त्वेहभृगुनंदन पापकृत्पूयतेमर्त्यइतिभार्गवशुश्रुम ४१ अन्यद्दानंतुविप्रर्षेश्रूयतांपावनंमहत् दिव्यमत्यद्भु
तंकारमपत्यंजातवेदसः ४२ दग्ध्वालोकान्पुरावीर्यात्संभूतमिहशुश्रुमः सुवर्णमितिविख्यातंतद्ददन्सिद्धिमेष्यसि ४३ ततोब्रवी
द्वसिष्ठस्तुभगवान्संशितव्रतः शृणुरामयथोत्पन्नंसुवर्णमनलप्रभम् ४४ फलंदास्यतितेयत्तुदानंपरमिहोच्यते सुवर्णंयच्चय
स्माच्चयश्चगुणवत्तमम् ४५ तन्निबोधमहाबाहोसर्वंनिगदतोमम अग्नीषोमात्मकमिदंसुवर्णंविद्धिनिश्चयम् ४६ अजोग्नि
र्वरुणोमेषःसूर्योश्वइतिदर्शनम् कुंजराश्चमृगानागामहिषाश्चासुराइति ४७ कुक्कुटाश्चवराहाश्चराक्षसाभृगुनंदन इडागावः
पयःसोमोभूमिरित्यवचःस्मृतिः ४८ जगत्सर्वंचनिर्मथ्यतेजोराशिःसमुत्थितः सुवर्णमेभ्योविप्रर्षेरत्नंपरममुत्तमम् ४९ एतस्मात्कारणाद्दे
वागंधर्वोरगराक्षसाः मनुष्याश्चपिशाचाश्चप्रयताधारयंतितत् ५० मुकुटैरंगदयुतैरलंकारैःपृथग्विधैः सुवर्णविकृतैस्तत्रविराजंतेभृगूत्त
मं ५१ तस्मात्सर्वपवित्रेभ्यःपवित्रंपरमंस्मृतम् भूमेर्गोभ्योथरत्नेभ्यस्तद्विद्धिमनुजर्षभ ५२ पृथिवींगाश्चदत्त्वेहयच्चान्यदपिकिंचन वि
शिष्यतेसुवर्णस्यदानंपरमकंविभो ५३ अक्षयंपावनंचैवसुवर्णममरद्युते प्रयच्छद्विजमुख्येभ्यःपावनंह्येतदुत्तमम् ५४ सुवर्णमेव
सर्वासुदक्षिणासुविधीयते सुवर्णंयेप्रयच्छंतिसर्वदास्तेभवंत्युत ५५ देवतास्तेप्रयच्छंतियेसुवर्णंददत्यथ अग्निर्हिदेवताःसर्वाःसुव
र्णंचतदात्मकम् ५६ तस्मात्सुवर्णंददतादत्ताःसर्वास्मदेवताः भवंतिपुरुषव्याघ्रनन्यतःपरमंविदुः ५७ भूयएवचमाहात्म्यंसुवर्णस्यनि-
बोधमे गदतोममविप्रर्षेसर्वशस्त्रभृतांवर ५८ मयाश्रुतमिदंपूर्वंपुराणेभृगुनंदन प्रजापतेःकथयतोयथान्यायंतुतस्यवै ५९ शूलपा
णेर्भगवतोरुद्रस्यचमहात्मनः गिरौहिमवतिश्रेष्ठेतदाभृगुकुलोद्वह ६० देव्याविवाहेनिर्वृत्तेरुद्राण्याभृगुनंदन समागमेभगवतोदेव्या
सहमहात्मनः ६१ ततःसर्वेसमुद्विग्नादेवारुद्रमुपागमन् तेमहादेवमासीनंदेवींचवरदामुमाम् ६२ प्रसाद्यशिरसासर्वेरुद्रमूचुर्भृगू-
द्वह अयंसमागमोदेवोदेव्यासहतवानघ ६३ तपस्विनस्तपस्विन्यातेजस्विन्यातितेजसः अमोघतेजास्त्वंदेवदेवीचेयमुमातथा ६४
अपत्यंयुवयोर्देवबलवद्भविताविभो तन्नूनंत्रिषुलोकेषुनकिंचिच्छेषयिष्यति ६५
५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५

तदेभ्यःप्रणतेभ्यस्त्वंदेवेभ्यःपृथुलोचन वरंप्रयच्छलोकेशत्रैलोक्यहितकाम्यया ६६ अपत्यार्थंनिगृण्हीष्वतेजःपरमकंविभो त्रैलोक्यसा
रौहियुवांलोकंसंतापयिष्यथ ६७ तदपत्यंहियुवयोर्देवानभिभवेत्प्रभुम् नहितेपृथिवीदेवनचद्यौर्नदिवंविभो ६८ नेदंधारयितुंशक्ताःस
मस्ताइतिमेमतिः तेजःप्रभावनिर्दग्धंतस्मात्सर्वमिदंजगत् ६९ तस्मात्प्रसादंभगवन्कर्तुमर्हसिनःप्रभो नदेव्यांसंभवेत्पुत्रोभवतःसुरस
त्तम धैर्यादेवनिगृण्हीष्वतेजोज्वलितमुत्तमम् ७० इतितेषांकथयतांभगवान्वृषभध्वजः एवमस्त्वितिदेवांस्तान्विप्रर्षेप्रत्यभाषत ७१
इत्युक्त्वाचोर्ध्वमनयद्रेतोवृषभवाहनः ऊर्ध्वरेताःसमभवत्ततःप्रभृतिचापिसः ७२ रुद्राणीतुततःक्रुद्धाप्रजोच्छेदेतदाकृते देवानथाब्रवी
त्तत्रस्त्रीभावात्परुषंवचः ७३ यस्मादपत्यकामोवैभर्तामेविनिवर्तितः तस्मात्सर्वेसुरायूयमनपत्याभविष्यथ ७४ प्रजोच्छेदोममकृतोय
स्माद्युष्माभिरद्यवै तस्मात्प्रजावःखगमाःसर्वेषांनभविष्यति ७५ पावकस्तुनतत्रासीच्छापकालेभृगूद्वह देवादेव्यास्तथाशापादनपत्या
स्ततोऽभवन् ७६ रुद्रस्तुतेजोऽप्रतिमंधारयामासवैतदा प्रस्कन्नंतुततस्तस्मात्किंचित्तत्रापतद्भुवि ७७ उत्पपाततदावह्नौववृधेचाद्भुतोप-
मम् तेजस्तेजसिसंयुक्तमात्मयोनित्वमागतम् ७८ एतस्मिन्नेवकालेतुदेवाःशक्रपुरोगमाः असुरस्तारकोनामतेनसंतापिताभृशम्
७९ आदित्यावसवोरुद्रामरुतोऽथाश्विनावपि साध्याश्चसर्वेसंत्रस्तादैतेयस्यपराक्रमात् ८० स्थानानिदेवतानांहिविमानानिपुराणिच ऋ
षीणांचाश्रमाश्चैवबभूवुरसुरैर्हृताः ८१ तेदीनमनसःसर्वेदेवाश्चऋषयश्चये प्रजग्मुःशरणंदेवंब्रह्माणमजरंविभुम् ८२ इतिश्री-
महाभारतेआनुशासनिकेपर्वणिदानधर्मेसुवर्णोत्पत्तिर्नामचतुरशीतितमोऽध्यायः ८४ देवाऊचुः असुरस्तारकोनामत्वयादत्तवरःप्र
भो सुरानृषींश्चक्लिश्नातिवधस्तस्यविधीयताम् १ तस्माद्भयंसमुत्पन्नमस्माकंवैपितामह परित्रायस्वनोदेवनह्यन्यागतिरस्तिनः २ ब्रह्मोवा
च समोऽहंसर्वभूतानामधर्मंनेहरोचये हन्यतांतारकःक्षिप्रंसुरर्षिगणबाधिता ३ वेदाधर्माश्चनोच्छेदंगच्छेयुःसुरसत्तमाः विहितंपूर्व-
मेवात्रमयावैव्येतुवोज्वरः ४ देवाऊचुः वरदानाद्भगवतोदैतेयोबलगर्वितः देवैर्नशक्यतेहन्तुंसकथंप्रशमंव्रजेत् ५ सहिनैवस्मदेवा
नासुराणांनरक्षसाम् वध्यःस्यामितिजग्राहवरंत्वत्तःपितामह ६ देवाश्चशप्तारुद्राण्याप्रजोच्छेदेपुराकृते नभविष्यतिवोऽपत्यमिति
सर्वेजगत्पते ७ ब्रह्मोवाच हुताशनोनतत्रासीच्छापकालेसुरोत्तमाः सउत्पादयिताऽपत्यंवधायत्रिदशद्विषाम् ८ तद्वैसर्वानतिक्रम्य
देवदानवराक्षसान् मानुषानथगन्धर्वान्नागानथचपक्षिणः ९

१० ११ १२ नष्टः अदर्शनंगतः १३ १४ ननुसर्वेसुराइत्युद्दिश्यदेव्याःशापात्कथंवन्ह्नेर्नशापःसतत्रनासीदितिचेत्ततेजेत्यतआह नहीतिवन्ह्नेर्बहुतेजस्वित्वान्नशापो
दृश्यतेतिभावः १५ कामःकाम्यमानोवन्हिःसंकल्पःअपत्यविषयस्तदर्थंअभिरुचिःसर्वतोरोचमानोभवत्अस्तु १६ १७ १८ १९ २० २१ नष्टंअदर्शनंगतंआत्मनि

अस्त्रेणामोघपातेनशक्त्यातंघातयिष्यति यतोवोभयमुत्पन्नंयेचान्येसुरशत्रवः १० सनातनोहिसंकल्पःकामइत्यभिधीयते रुद्रस्यते
जःप्रस्कन्नमग्नौनिपतितंचयत् ११ तत्तेजोऽग्निर्महद्भूतंद्वितीयमितिपावकम् वधार्थंदेवशत्रूणांगंगायांजनयिष्यति १२ सतुनावापत्तं
शापंनष्टःसुहुतभुक्तदा तस्माद्वोभयहृद्देवाःसमुत्पत्स्यतिपावकिः १३ अन्विष्यतांवैज्वलनस्तथाचाद्यनियुज्यताम् तारकस्यवधो
पायःकथितोवैमयानघाः १४ नहितेजस्विनांशापास्तेजःसुप्रभवंतिवै बलान्यतिबलंप्राप्यदुर्बलानिभवंतिवै १५ हन्यादवध्यान्वरदा-
नपिचैवतपस्विनः संकल्पाभिरुचिःकामःसनातनतमोभवत् १६ जगत्पतिरनिर्देश्यःसर्वगःसर्वभावनः हृच्छयःसर्वभूतानांज्येष्ठो-
रुद्रादपिप्रभुः १७ अन्विष्यतांसतुक्षिप्रंतेजोराशिर्हुताशनः सवोमनोगतंकामंदेवःसंपादयिष्यति १८ एतद्वाक्यमुपश्रुत्यततोदेवाम
हात्मनः जग्मुःसंसिद्धसंकल्पाःपर्येषंतोविभावसुम् १९ ततस्त्रैलोक्यमृषयोव्यचिन्वंतसुरैःसह काङ्क्षंतोदर्शनंवन्हेःसर्वेतद्गतमा
नसाः २० परेणतपसायुक्ताःश्रीमंतोलोकविश्रुताः लोकाननुचरन्सिद्धाःसर्वएवभृगूत्तम २१ नष्टमात्मनिसंलीनंनाभिजग्मुर्हु
ताशनम् ततःसंजातसंत्रासाअग्निदर्शनलालसाः २२ जलेचरःक्लांतमनास्तेजसाग्नेःप्रदीपितः उवाचदेवान्मंडूकोरसातलत-
लोत्थितः २३ रसातलतलेदेवावसत्यग्निरितिप्रभो संतापादिहसंप्राप्तःपावकप्रभवादहम् २४ससंसुप्तोजलेदेवाभगवान्हव्यवा
हनः अपःसंसृज्यतेजोभिस्तेनसंतापितावयम् २५ तस्यदर्शनमिष्टंवोयदिदेवाविभावसोः तत्रैवमधिगच्छध्वंकार्यंवोयदिवन्हि-
ना २६ गम्यतांसाधयिष्यामोवयंह्यग्निभयात्सुराः एतावदुक्त्वामंडूकस्त्वरितोजलमाविशत् २७ हुताशनस्तुबुबुधेमंडूकस्य-
चपैशुनम् शशापसतमासाद्यनरसान्वेत्स्यसीतिवै २८ तंवैसंयुज्यशापेनमंडूकंत्वरितोययौ अन्यत्रवासायविभुर्नचात्मानम
दर्शयत् २९ देवास्त्वनुग्रहंचक्रुर्मंडूकानांभृगूत्तम यत्तच्छृणुमहाबाहोगदतोमेमसर्वशः ३० देवाऊचुः अग्निशापादजि
ह्वापिरसज्ञानबहिष्कृताः सरस्वतींबहुविधांयूयमुच्चारयिष्यथ ३१ बिलवासगतांश्चैवनिराहारानचेतसः गतासूनपिसंशुष्कान्
भूमिःसंतारयिष्यति ३२ तमोघनायामपिवैनिशायांविचरिष्यथ इत्युक्त्वातांस्ततोदेवाःपुनरेवमहीमिमाम् ३३

जलेजलस्यतेजोभविष्यतीत्यर्थः२२ २३ २४ २५ २६ २७ नरसानितिरसनेंद्रियहीनोभविष्यतीत्यर्थः २८ २९ ३० अजिह्वाअपीतिच्छेदः ३१ ३२ ३३

परीप्सुर्ज्वलनस्यार्थे नचाविंदन् हुताशनम् अथतान्द्विरदः कश्चित्सुरेंद्रद्विरदोपमः ३४ अश्वत्थस्थोऽग्निरित्येवमाह देवान्भृगूद्वह
शशाप ज्वलनः सर्वान्द्विरदान् क्रोधमूर्च्छितः ३५ प्रतीपा भवतां जिह्वा भवित्रीति भृगूद्वह इत्युक्त्वा निःसृतोऽश्वत्थादग्निर्वारणसू
चितः प्रविवेश शमीगर्भमथवन्हिः सुषुप्सया ३६ अनुग्रहं तु नागानां यंचक्रुः शृणु तं प्रभो देवा भृगुकुलश्रेष्ठ प्रीत्या सत्यपराक्रमाः ३७
देवा ऊचुः प्रतीपया जिह्वयापि सर्वाहारं करिष्यथ वाचं चोच्चारयिष्यध्वमुच्चैरव्यंजिताक्षराम् ३८ इत्युक्त्वा पुनरेवाग्निमनुसस्रुर्दि
वौकसः अश्वत्थान्निःसृतश्चाग्निः शमीगर्भमुपाविशत् ३९ शुकेन ख्यापितो विप्र तं देवाः समुपाद्रवन् शशाप शुकमग्निस्तु वाग्विहीनो
भविष्यसि ४० जिह्वां चावर्तयामास तस्यापि हुतभुक् तदा दृष्ट्वा तु ज्वलनं देवाः शुकमूचुर्दयान्विताः ४१ भविता नत्वमत्यंतं शुकत्वे नष्टवागि
ति आवृत्तजिह्वस्य सतो वाक्यं कांतं भविष्यति ४२ बालस्येव प्रवृद्धस्य कलमव्यक्तमद्भुतम् इत्युक्त्वा तं शमीगर्भे वन्हिमालक्ष्य देवताः ४३
तदेवायतनं चक्रुः पुण्यं सर्वक्रियास्वपि ततः प्रभृति चाप्यग्निः शमीगर्भेषु दृश्यते ४४ उत्पादने तथोपायमभिजग्मुश्च मानवाः आपो रसा
तलं यास्तु संस्पृष्टाश्चित्रभानुना ४५ ताः पर्वतप्रस्रवणैरूष्मां मुंचंति भार्गव पावकेनाधिशयता संतप्तास्तस्य तेजसा ४६ अथाग्निर्देवता दृ
ष्ट्वा बभूव व्यथितस्तदा किमागमनमित्येवं तानपृच्छत पावकः ४७ तमूचुर्विबुधाः सर्वे ते चैव परमर्षयः त्वां नियोक्ष्यामहे कार्ये तद्भवान्कर्तु
मर्हति ४८ कृते च तस्मिन्भविता तवापि सुमहान्गुणः ४९ अग्निरुवाच ब्रूत यद्भवतां कार्यं कर्तास्मि तदहं सुराः भवतां तु नियोज्यो
ऽस्मि मा वोऽत्रास्तु विचारणा ५० देवा ऊचुः असुरस्तारको नाम ब्रह्मणो वरदर्पितः अस्मान्प्रबाधते वीर्याद्वधस्तस्य विधीयताम् ५१ इ
मान्देवगणांस्तात प्रजापतिगणांस्तथा ऋषींश्चापि महाभाग परित्रायस्व पावक ५२ अपत्यं तेजसा युक्तं प्रवीरं जनय प्रभो यद्भयं नोऽसुरा
त्तस्मान्नाशयेद्धव्यवाहन ५३ शप्तानां नो महादेव्या नान्यदस्ति परायणम् अन्यत्र भवतो वीर्यं तस्मात्त्रायस्व नः प्रभो ५४ इत्युक्तः स तथेत्यु
क्त्वा भगवान्हव्यवाहनः जगामाथ दुराधर्षो गंगां भागीरथीं प्रति ५५ तया चाप्यभवन्मिश्रो गर्भश्चास्याभवत्तदा ववृधे स तदा गर्भः कक्षे कृ
ष्णागतिर्यथा ५६ तेजसा तस्य देवस्य गंगा विह्वलचेतना संतापमगमत्तीव्रं सा सोढुं न शशाक ह ५७

५८ ५९ भवुद्धिपतितेनेनअकस्माज्जातेन ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ रुद्रस्य अग्नेस्तेजः तेनप्रधर्षिता रुद्रोवागपयदग्नि

आहितेज्वलनेनाथगर्भेतेजःसमन्विते गंगायामसुरःकश्चिद्वैरवंनादमानदत् ५८ अबुद्धिपतितेनाथनादेनविपुलेनसा विव
स्तोद्भ्रांतनयनागंगाविह्वललोचना ५९ विसंज्ञानाशकद्गर्भवोढुमात्मानमेवच सातुतेजःपरीतांगीकंपयंतीवजान्हवी ६० उवाचज्व
लनंविभतदागर्भवलोन्मुता नेनाशक्तास्मिभगवंस्तेजसोस्यविधारणे ६१ विमूढास्मिकृतानेननमेस्वास्थ्यंयथापुरा विह्वलाचास्मि
भगवंश्चेतोनष्टंचमेनघ ६२ धारणेनास्यशक्ताहंगर्भस्यतपतांवर उत्स्रक्ष्येहमिमंदुःखान्नतुकामात्कथंचन ६३ नतेजसोस्तिसंस्प
र्शोममदेवविभावसो आपदर्थेहिसंबंधःसुसूक्ष्मोपिमहाद्युते ६४ यदत्रगुणसंपन्नमितरद्वाहुताशनः त्वय्येवतदहंमन्येधर्माधर्मौ
चकेवलौ ६५ तामुवाचततोवन्हिर्धार्यतांधार्यतामिति गर्भोमत्तेजसायुक्तोमहागुणफलोदयः ६६ शक्ताह्यसिमहीकृत्स्नांवोढुंधारयि
तुंतथा नहितेकिंचिदप्राप्यमन्यतोधारणादृते ६७ सावन्हिनावार्यमाणादेवैरपिसरिद्वरा समुत्ससर्जतंगर्भंमेरौगिरिवरेतदा ६८ स
मर्थाधारणेचापिरुद्रतेजःप्रधर्षिता नाशकत्सातदागर्भंसंधारयितुमोजसा ६९ सासमुत्सृज्यतंदुःखाद्दीप्तवैश्वानरप्रभम् दर्शयामास
चाग्निस्तंतदागंगांभृगूद्वह ७० पप्रच्छसरितांश्रेष्ठांकच्चिद्गर्भःसुखोदयः कीदृग्वर्णोपिवादेविकीदृग्रूपश्चदृश्यते तेजसाकेनवा
युक्तःसर्वमेतद्ब्रवीहिमे ७१ गंगोवाच जातरूपःसगर्भोवैतेजसात्वमिवानघ सुवर्णोविमलोदीप्तःपर्वतंचावभासयत् ७२ प
द्मोत्पलविमिश्राणांह्रदानामिवशीतलः गंधोस्यमकरंदानांतुल्योवैतपतांवर ७३ तेजसातस्यगर्भस्यभास्करस्येवरश्मिभिः यद्द्रव्यं
परिसंस्पृष्टंपृथिव्यांपर्वतेषुच ७४ तत्सर्वंकांचनीभूतंसमंतात्प्रत्यदृश्यत पर्यधावतशैलांश्चनदीःप्रस्रवणानिच ७५ व्यदीपयत्ते
जसाचत्रैलोक्यंसचराचरम् एवंरूपःसभगवान्पुत्रस्तेहव्यवाहन सूर्यवैश्वानरसमःकांत्यासोमइवापरः ७६ एवमुक्त्वातुसादेवी
तत्रैवांतरधीयत पावकश्चापितेजस्वीकृत्वाकार्यंदिवौकसाम् ७७ जगामदेशंततोदेशंतदाभार्गवनंदन एतैःकर्मगुणैर्लोकेनाम्नाग्निः
परिगीयते ७८ हिरण्यरेताइतिवैऋषिभिर्विबुधैस्तथा पृथिवीचतदादेवीख्यातावसुमतीतिवै ७९ सतुगर्भोमहातेजागांगेयःपा
वकोद्भवः दिव्यंशरवणंप्राप्यववृधेद्भुतदर्शनः ८० ददृशुःकृत्तिकास्तंतुबालार्कसदृशद्युति पुत्रंवैताश्चतंबालंपुपुषुःस्तन्यविस्रवैः ८१

रितिश्रुतेः ६९ ७० ७१ ७२ कदंबानांकदंबपुष्पाणाम् ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० ८१ ७ ७

८२ ८३ ८४ ८५ ८६ ८७ ८८ देवस्यमहतइतिरुद्रस्येत्यर्थः ८९ ९० ९१ ९२ ९३ ९४ ९५ ९६ ९७

ततःसकार्त्तिकेयत्वमवापपरमद्युतिः स्कन्नत्वात्स्कन्दतांचापिगुहावासाद्गुहोऽभवत् ८२ एवंसुवर्णमुत्पन्नमपत्यंजातवेदसः तत्र
जाम्बूनदमर्थ्यद्देवानामपिभूषणम् ८३ ततःप्रभृतिचाप्येतज्जातरूपमुदाहृतम् रत्नानामुत्तमंरत्नंभूषणानांतथैवच ८४ पवित्रं
चपवित्राणांमङ्गलानांचमङ्गलम् यत्सुवर्णंसभगवानग्निरीशःप्रजापतिः ८५ पवित्राणांपवित्रंहिकनकंद्विजसत्तमाः अग्नीषोमात्म
कंचैवजातरूपमुदाहृतम् ८६ वसिष्ठउवाच अपिचेदंपुरारामश्रुतंमेब्रह्मदर्शनम् पितामहस्ययद्वृत्तंब्रह्मणःपरमात्मनः ८७
देवस्यमहतस्तातवारुणींबिभ्रतस्तनुम् ऐश्वर्येवारुणेरामरुद्रस्येशस्यवैप्रभो ८८ आजग्मुर्मुनयःसर्वेदेवाश्चाग्निपुरोगमाः यज्ञा
ङ्गानिचसर्वाणिवषट्कारश्चमूर्तिमान् ८९ मूर्तिमन्तिचसामानियजूंषिचसहस्रशः ऋग्वेदश्चागमत्तत्रपदक्रमविभूषितः ९० ल
क्षणानिस्वरास्तोभानिरुक्तंसुरपङ्क्तयः ओङ्कारश्चावसन्नेत्रेनिग्रहप्रग्रहौतथा ९१ वेदाश्चसोपनिषदोविद्यासावित्र्यथापिच भूतंभ
व्यंभविष्यंचदधारभगवाञ्छिवः ९२ संजुहावात्मनात्मानंस्वयमेवतदाप्रभो यज्ञंचशोभयामासबहुरूपंपिनाकधृक् ९३ द्यौर्नभः
पृथिवीखंचतथाचैवैषभूपतिः सर्वविद्येश्वरःश्रीमानेषचापिविभावसुः ९४ एषब्रह्माशिवोरुद्रोवरुणोग्निःप्रजापतिः कीर्त्यतेभगवा
न्देवःसर्वभूतपतिःशिवः ९५ तस्ययज्ञःपशुपतेस्तपःक्रतवएवच दीक्षादीप्तव्रतादेवीदिशश्चसदिगीश्वराः ९६ देवपत्न्यश्चकन्याश्च
देवानांचैवमातरः आजग्मुःसहितास्तत्रतदाभृगुकुलोद्वह ९७ यज्ञंपशुपतेःप्रीतावरुणस्यमहात्मनः स्वयम्भुवस्तुताद्दृष्ट्वारेतःस
मपतद्भुवि ९८ तस्यशुक्रस्यविस्पंदात्पांसून्संगृह्यभूमितः प्रास्यत्पूषाकराभ्यांवैतस्मिन्नेवहुताशने ९९ ततस्तस्मिन्संप्रवृत्ते
सत्रेज्वलितपावके ब्रह्मणोहूयमानेचप्रादुर्भावोबभूवह १०० स्कन्नमात्रंचतच्छुक्रंस्रुवेणपरिगृह्यसः आज्यवन्मन्त्रवच्चापिसोजुहो
द्भृगुनंदन १०१ ततःसजनयामासभूतग्रामंचवीर्यवान् तस्यतत्तेजसस्तस्माज्जज्ञेलोकेषुतैजसम् १०२

९८ विस्पंदात्कथा ततात्रिः पतितात्रिरेनः कणिकाभि सहपांसून्संगृह्य ९९ प्रादुर्भावश्चरमधातु १०० १०१ भूतग्रामंचतुर्विधंतत्तेजसात
स्यत्रिगुणमयस्यतेजसः सर्वबीयस्तेजोंशः रजोगुणस्यात्तैजसंप्रवृत्तिधर्मजगमंभवति १०२ ७ ७ ७ ७ ७

तमसः तमोंशात्तामसंस्थावरंसत्वांशस्तुभयमनानुगतउभयेषुसात्विकानामावानाधर्मह्नेतुवादीनांदर्शनात्तस्य इतिसमलगुणस्तेजसः प्रकाशरूपायाबुद्धेःस्वरूप
मित्यर्थः बुद्धेस्तेजस्त्वंप्रकाशकत्वसाम्यात्मनोज्योतिरितिमंत्रलिंगाच्चतस्यधीसत्वस्यच आकाशं आकाशादिकृत्स्नंविश्वंस्वरूपेणाद्विविधसत्वात्मकंतदात्मनापरिण
मतइतिभावः ३ तस्मात्सर्वेषुतमोमयेषुजडेषुशरीरेषुसत्वंप्रकाशः उत्तमंतेजः धर्मप्रवृत्तिश्चतस्माद्धन्हौहुतात्प्रजापतेःशुक्राज्जज्ञिरेइत्यर्थः ४ प्रसवजैःकारण

तमसस्तामसाभावाव्यापिसत्वंततोभयम् सगुणस्तेजसोनित्यस्तस्यचाकाशमेवच ३ सर्वभूतेषुचतथासत्वंतेजस्तथोत्तमम् शु
क्रे हुतेऽग्नौतस्मिंस्तुप्रादुरासंस्त्रयःप्रभो ४ पुरुषावपुषायुक्ताःस्वैःस्वैःप्रसवजैर्गुणैः भृगित्येव भृगुः पूर्वमंगारेभ्योगिराभवत् ५ अं
गारसंश्रयाच्चैवकविरित्यपरोऽभवत् सहज्वालाभिरुत्पन्नोभृगुस्तस्माद्भृगुःस्मृतः ६ मरीचिभ्योमरीचिस्तुमारीचःकश्यपोह्यभूत्
अंगारेभ्योगिरास्तातवालखिल्याःकुशोच्चयात् ७ अत्रैवात्रेतिचविभोजातमत्रिंवदंत्यपि तथाभस्मव्यपोहेभ्योब्रह्मर्षिगणसंमताः
८ वैखानसाःसमुत्पन्नास्तपःश्रुतगुणेप्सवः अश्रुतोस्यसमुत्पन्नावश्विनौरूपसंमतौ ९ शेषाःप्रजानांपतयःस्रोतोभ्यस्तस्यजज्ञिरे ऋष
योरोमकूपेभ्यःस्वेदाच्छंदोबलान्मनः १० एतस्मात्कारणादाहुरग्निःसर्वास्तुदेवताः ऋषयःश्रुतसंपन्नावेदप्रामाण्यदर्शनात् ११ यानिदा
रूणिनिर्यासास्तेमासाःपक्षसंज्ञिताः अहोरात्रामुहूर्ताश्चपित्तंज्योतिश्चवारुणम् १२ रौद्रंलोहितमित्याहुर्लोहितात्कनकंस्मृतम् तन्मै
त्रमितिविज्ञेयंधूमाच्चवसवःस्मृताः १३ अर्चिषोयाश्चतेरुद्रास्तथादित्यामहाप्रभाः उद्दिष्टास्तेतथांगारायेधिष्ण्येषुदिविस्थिताः १४ आ
दिकर्तान्स्लोकस्यतत्परंब्रह्मतत्ध्रुवम् सर्वकामदमित्याहुस्तद्रहस्यमुवाचह १५ ततोऽब्रवीन्महादेवोवरुणःपवनात्मकः ममसत्रमिदं
दिव्यमहंगृहपतिस्त्विह १६ त्रीणिपूर्वाण्यपत्यानिममतानिनसंशयः इतिजानीतखगमाममयज्ञफलंहितत् १७ अग्निरुवाच
मदंगेभ्यःप्रसूतानिमदाश्रयकृतानिच ममैवतान्यपत्यानिवरुणोह्यवशात्मकः १८

जैर्गुणैः तानेवाह भृग्विति भृज्जतिपाचयतीति भृक्ज्वालासाक्षाज्ज्वालाइत्येव भृगुरितिनाम ५ अंगाराश्रिता अल्पज्वालानिर्धूमाःताभ्यः कविरभूत भृ
गितिव्याचष्टेसहेति ६ ७ अत्रैवकुशोच्चये अत्र अत्रेवेतिसंबंधः व्यपोहेभ्यःसमूहेभ्यः ८ अश्रुतः अश्रुसकाशात् ९ स्रोतोभ्यः स्रोतादींद्रियेभ्यः ब
लात् १० एतस्मादग्निलात् ११ निर्यासादारुगतालाक्षादयोवृक्षरसाः १२ १३ दिविस्थिताः ग्रहतारादयः धिष्ण्येषुस्थानेषु १३ १४ १५ १६
त्रीणिभृग्वंगिरःकविसंज्ञानि १७ अवशः आत्मानित्तंयस्यसः अवशात्मकः प्रांतइत्यर्थः १८ ७ ७ ७ ७ ७

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ कवेःपुत्रावारुणाइत्यनेनस्वीयभागोपिकविर्ब्रह्मणावरुणा-

अथाब्रवील्लोकगुरुर्ब्रह्मा लोकपितामहः ममैवतान्यपत्यानि ममयज्ञोहुतंहितत् १९ अहंकर्ताहिमस्यास्यहोताशक्रस्यचैवह यस्यबी
जफलंतस्यशक्रश्चैतत्कारणंमतं २० ततोऽब्रुवन्देवगणाःपितामहमुपेत्यवै कृताञ्जलिपुटाःसर्वेशिरोभिरभिवंद्यच २१ वयंचभगवन्सर्वे
जगच्चसचराचरम् तवैवप्रसवाःसर्वेतस्मादग्निर्विभावसुः २२ वरुणश्चेश्वरोदेवोलभतांकाममीप्सितं निसर्गाद्ब्रह्मणश्चापि
वरुणोयादसांपतिः २३ जग्राहवैभृगुंपूर्वमपत्यंसूर्यवर्चसम् ईश्वरोंगिरसंचाग्निरपत्यार्थमकल्पयत् २४ पितामहस्त्वपत्यंवैकविंजग्रा
हतत्त्ववित् तदास्मवारुणःख्यातोभृगुःप्रसवकर्मकृत् २५ आग्नेयस्त्वंगिराःश्रीमान्कविर्ब्राह्मोमहायशाः भार्गवांगिरसौलोकेलोकसं-
तानलक्षणौ २६ एतेहिप्रसवाःसर्वेप्रजानांपतयस्त्रयः सर्वंसंतानमेतेषामिदमित्युपधारय २७ भृगोस्तुपुत्राःसप्तासन्सर्वेतुल्या
भृगोर्गुणैः च्यवनोवज्रशीर्षश्चशुचिरौर्वस्तथैवच २८ शुक्रोवरेण्यश्चविभुःसवनश्चेतिसप्तते भार्गवावारुणाःसर्वेयेषांवंशेभवा
नपि २९ अष्टौचांगिरसःपुत्रावारुणास्तेप्युदाहृताः बृहस्पतिरुतथ्यश्चपयस्यःशांतिरेवच ३० घोरोविरूपःसंवर्तःसुधन्वाचाष्टमः
स्मृतः एतेऽष्टौवह्निजाःसर्वेज्ञाननिष्ठानिरामयाः ३१ ब्रह्मणस्तुकवेःपुत्रावारुणास्तेप्युदाहृताः अष्टौप्रसवजैर्युक्तागुणैर्ब्रह्मविदःशु
भाः ३२ कविःकाव्यश्चधृष्णुश्चबुद्धिमानुशनास्तथा भृगुश्चविरजाश्चैवकाशीचोग्रश्चधर्मवित् ३३ अष्टौकविसुतास्त्वेतेसर्वमेभि
र्जगत्ततम् प्रजापतयएतेहिप्रजायैरिमाःप्रजाः ३४ एवमंगिरसश्चैवकवेश्चप्रसवान्वयैः भृगोश्चभृगुशार्दूलवंशजैःसततंजग-
त् ३५ वरुणश्चादितोविप्रजग्राहप्रभुरीश्वरः कविंतातभृगुंचापितस्मात्तौवारुणौस्मृतौ ३६ जग्राहांगिरसंदेवशिखीतस्माद्धुताश-
नः तस्मादंगिरसाज्ञेयाःसर्वएवतदन्वयाः ३७ ब्रह्मापितामहःपूर्वंदेवताभिःप्रसादितः इमेनःसंतरिष्यंतिप्रजाभिर्जगतीश्वराः ३८
सर्वेप्रजानांपतयःसर्वेचातितपस्विनः त्वत्प्रसादादिमंलोकंतारयिष्यंतिसांप्रतम् ३९ तथैववंशकर्तारस्तवतेजोविवर्धनाः भवेयुर्वेदवि
दुषःसर्वेचक्रतिनस्तथा ४० देवपक्षचराःसौम्याःप्राजापत्यामहर्षयः आप्नुवंतितपश्चैवब्रह्मचर्यंपरंतथा ४१ सर्वेहिवयमेतेचतवैव
प्रसवाःप्रभो देवानांब्राह्मणानांचत्वंहिकर्तापितामह ४२

यसमर्पितइत्युक्तेयं ३२ ३३ ३४ ३५ ३६ ३७ न अस्मान्संतरिष्यंतिसंतारयिष्यंति ३८ ३९ विदुषःविद्वांस ४० ४१ ४२ ४३

क्षमयाम वउत्कर्षायं अन्योन्याभिभावनं पितामह इत्यर्थः ४३ ते अनेन क्षमापना आदिनिधने उत्पत्तिप्रलययोरंतराले ४४ ४५ देवश्रेष्ठस्य रुद्रस्य ४६ धा
रणानिश्चयः ४७ वेदश्रुतिर्निर्गतिः अग्न्यावनुगते तग आहुतिं हिरण्य उत्तरं जुहुयादिति कल्पकारेणदर्शिता ४८ वल्मीकवपायाः सान्नाय्यमिति दधिपयसोः सहहोम उ-
क्तः व्रीहियवपाण्यजकर्णादौ निवाप्सुकाष्ठेष्वित्येतानि श्रुतौ दृश्यंते ४९ शकटो वीनिः श्रुत्यंतरात् ज्ञेया परस्वतीर्थादिरप्सु ५० ५१ ५२ राजराज्येन कुबेरत्वेन ५३

मरीचमादितः कृत्वा सर्वेचैवाथ भार्गवाः अपत्यानीति संप्रेक्ष्य क्षमयामपितामह ४३ ते त्वनेनैव रूपेण प्रजनिष्यंति वै प्रजाः स्थापयिष्यं
तिचात्मानं युगादि निधने तथा ४४ इत्युक्तः स तदा तैस्तु ब्रह्मा लोकपितामहः तथेत्येवाब्रवीत्प्रीतस्ते पि जग्मुर्यथागतम् ४५ एवमेत
त्पुरा वृत्तं तस्य यज्ञे महात्मनः देवश्रेष्ठस्य लोकादौ वारुणीं बिभ्रतस्तनुम् ४६ अग्निर्ब्रह्मा पशुपतिः शर्वो रुद्रः प्रजापतिः अग्नेरपत्य-
मेतद्वै सुवर्णमिति धारणा ४७ अग्न्यभावे च कुरुते वन्हिस्थानेषु कांचनम् जामदग्न्य प्रमाणज्ञो वेदश्रुतिनिदर्शनात् ४८ कुशस्तंबे
जुहोत्यग्निं सुवर्णे तत्र च स्थिते वल्मीकस्य वपायां च कर्णे वाजस्य दक्षिणे ४९ शकटोर्व्यां परस्याप्सु ब्राह्मणस्य करे तथा हुते प्रीतिकरी
मृद्धिः भगवांस्तत्र मन्यते ५० तस्मादग्निपराः सर्वे देवता इति शुश्रुम ब्रह्मणो हि प्रभूतोग्निरग्नेरपि च कांचनम् ५१ तस्माद्ये वै प्रयच्छ
ति सुवर्णं धर्मदर्शिनः देवतास्ते प्रयच्छंति समस्ता इति नः श्रुतम् ५२ तस्माच्च तपसो लोकान् गच्छतः परमां गतिम् स्वर्लोके राजराज्ये
न सोभिषिच्येत भार्गव ५३ आदित्योदय संप्राप्ते विधिमंत्रपुरस्कृतम् ददाति कांचनं यो वै दुःस्वप्नं प्रतिहंति सः ५४ ददात्युदितमात्रेय
स्तस्य पाप्मा विधूयते मध्यान्हे ददतो रुक्मं हंति पापमनागतम् ५५ ददाति पश्चिमां संध्यां यः सुवर्णं यतव्रतः ब्रह्मवाय्वग्निसोमानां सा
लोक्यमुपयाति सः ५६ सेंद्रेषु चैव लोकेषु प्रतिष्ठां विंदते शुभां इह लोके यशः प्राप्य शांतपाप्मा च मोदते ५७ ततः संपद्यतेन्येषु लोके-
ष्वप्रतिमः सदा अनावृत्तगतिश्चैव कामचारो भवत्युत ५८ न च क्षरति तेभ्यश्च यशश्चैवाप्नुते महत् सुवर्णमक्षयं दत्वा लोकांश्चा-
प्नोति पुष्कलान् ५९ यस्तु संजनयित्वाग्निमादित्योदयनं प्रति दद्याद्वै व्रतमुद्दिश्य सर्वकामान्समश्नुते ६० अग्निमित्येव तत्प्राहुः प्रदा
नं च सुखावहम् यथेष्टगुणसंवृत्तं प्रवर्त्तकमिति स्मृतम् ६१

५४ ५५ ५६ ५७ ५८ तेभ्यो लोकेभ्यो न च क्षरति ५९ अग्निं श्रौतं स्मार्त्तं जनयि-
त्वा भानः प्रादुष्कृत्य उदयकाले च दद्यात् ६० अग्निमिति अग्न्यादित्ययोः प्रादुर्भूतयोरंतराले सुवर्णदानं इष्टेन गुणेन भुवि दिवि प्रकाशमानेन रूपेण मया स्थेयमित्येवं
रूपेण गुणेन अंतरालकालेन च गुणेन संवृत्तं समानं जातं एतच्च गुणज्ञानप्रवर्त्तकं अग्निजत्वाद्धिरण्यमग्निः इति शब्दः प्रकारार्थः हिरण्यं पुरस्कृत्य सायमुद्धरेदिति सा
यमुद्धरणकालातिक्रमे सूर्यस्य हिरण्यपुरस्कारवचनात् हिरण्यं आदित्यत्वेनापि जानीयात् अतस्तयोरंतराले सुवर्णं ददत् तादृशमेव फलं प्राप्नोतीत्यर्थः ६१

एषेति यथा कार्त्तिकेयः सर्वदेवानामजेयं दैत्यं निहतवान् एवं तन्मोदरं सुवर्णमपि सर्वेषां धर्माणामजय्यं दुरितं नाशयति लोकं च नादृशं जयतीत्यर्थः १६२ ६३
६४ ६५ ६६ ६७ १६८ इति आनुशासनिके पर्वणि टीकायां पंचाशीतितमोऽध्यायः ८५ उक्ता इति श्रुतिर्वेदः लक्षणं ज्ञापकं येषां ते श्रुतिलक्षणा

एषा सुवर्णस्योत्पत्तिः कथिता ते मयानघ । कार्त्तिकेयस्य च विभो तद्विद्धि भृगुनंदन ६२ कार्त्तिकेयस्य च विभो कालेन महता तदा । देवैः सेना
पतित्वेन वृत्तः सैन्द्रैर्भृगूद्वह ६३ जघान तारकं चापि दैत्यमन्यांस्तथासुरान् । त्रिदशेन्द्राज्ञया ब्रह्मन् लोकानां हितकाम्यया ६४ सुवर्णदा
ने च मया कथितास्ते गुणा विभो । तस्मात्सुवर्णं विप्रेभ्यः प्रयच्छ ददतां वर ६५ भीष्म उवाच । इत्युक्तः स वसिष्ठेन जामदग्न्यः प्रता
पवान् । ददौ सुवर्णं विप्रेभ्यो व्यमुच्यत च किल्बिषात् ६६ एतत्ते सर्वमाख्यातं सुवर्णस्य महीपते । प्रदानस्य फलं चैव जन्म चास्य युधिष्ठि
र ६७ तस्मात्त्वमपि विप्रेभ्यः प्रयच्छ कनकं बहु । ददत्सुवर्णं नृपते किल्बिषाद्विप्रमोक्ष्यसि १६८ इति श्रीमहाभारते आनुशासनिके
पर्वणि दानधर्मे सुवर्णोत्पत्तिर्नाम पंचाशीतितमोऽध्यायः ८५ । युधिष्ठिर उवाच । उक्ताः पितामहेनेह सुवर्णस्य विधानतः । विस्तरे
ण प्रदानस्य ये गुणाः श्रुतिलक्षणाः १ यत्तु कारणमुत्पत्तेः सुवर्णस्य प्रकीर्त्तितम् । स कथं तारकः प्राप्तो निधनं तद्ब्रवीहि मे २ उक्तः स दैवता
नां हि अवध्य इति पार्थिव । कथं तस्याभवन्मृत्युर्विस्तरेण प्रकीर्त्तय ३ एतदिच्छाम्यहं श्रोतुं त्वत्तः कुरुकुलोद्वह । कार्त्स्न्येन तारकवधं प
रं कौतूहलं हि मे ४ भीष्म उवाच । विपन्नकृत्या राजेन्द्र देवता ऋषयस्तथा । कृत्तिकाश्चोदयामासुरपत्यभरणाय वै ५ न देवता
नां काचिद्धि समर्था जातवेदसः । एकापि शक्ता तं गर्भं संधारयितुमोजसा ६ षण्णां तासां ततः प्रीतः पावको गर्भधारणात् । स्वेन तेजोवि
सर्गेण वीर्येण परमेण च ७ ताः षट् कृत्तिका गर्भं पुपुषुर्जातवेदसः । षट्सु वर्त्मसु तेजोऽग्नेः सकलं निहितं प्रभो ८ ततस्ता वर्द्धमान-
स्य कुमारस्य महात्मनः । तेजसाभिपरीताङ्ग्यो न क्वचिच्छर्म लेभिरे ९ ततस्तेजःपरीताङ्ग्यः सर्वाः काल उपस्थिते । समं गर्भं सुषुविरे कृ
त्तिकास्ता नरर्षभ १० ततस्तं षडधिष्ठानं गर्भमेकत्वमागतम् । पृथिवी प्रतिजग्राह कार्त्तस्वरसमीपतः ११ स गर्भो दिव्यसंस्थानो दी
प्तिमान्पावकप्रभः । दिव्यं शरवणं प्राप्य ववृधे प्रियदर्शनः १२ ददृशुः कृत्तिकास्तं तु बालमर्कसमद्युतिम् । जातस्नेहाश्च सौहार्दा-
त्पुपुषुः स्तन्यविस्रवैः १३ अभवत्कार्त्तिकेयः स त्रैलोक्ये सचराचरे । स्कन्नत्वात्स्कन्दतां प्राप्तो गुहावासाद्गुहोऽभवत् १४

श्रुत्युक्ता इत्यर्थः १ २ ३ ४ विपन्नकृत्याः येषां ते गङ्गया गर्भस्य त्यक्तत्वेन निष्कार्याः ५ चोदयामासुरग्निर्यत्र देहं मुक्त्वा ते तं गर्भं धारयितुमित्यपरुध्यन्त पर्वाङ्गि
६ प्रीतः स्वाभिमतरूपेण तद्रेतः पीत्वा योषा गर्भे धृते सतीति शेषः ७ वर्त्मसु गर्भागमनमार्गेषु योनिष्वित्यर्थः ८ ९ १० ११ १२ १३ १४ ७ ५

१५ १६ देवेभ्यो अर्पणंयेस्तानिऋग्यजुःसामानिमूर्तिमंतिदेवार्पणानि. १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९

ततोदेवास्त्रयस्त्रिंशद्दिशश्चसदिगीश्वराः रुद्रोधाताचविष्णुश्चयमःपूषार्यमाभगः १५ अंशोमित्रश्चसाध्याश्चवासवोवसवोश्विनौ आ
पोवायुर्नभश्चंद्रोनक्षत्राणिग्रहारविः १६ पृथग्भूतानिचान्यानियानिदेवार्पणानिवै आजग्मुस्तेद्भुतंद्रष्टुंकुमारंज्वलनात्मजम् १७ ऋ
षयस्तुष्टुवुश्चैवगंधर्वाश्चजगुस्तथा षडाननंकुमारंतुद्विषडक्षंपडप्रियम् १८ पीनांसंद्वादशभुजंपावकादित्यवर्चसम् शयानंशरगु
ल्मस्थंदृष्ट्वादेवाःसहर्षिभिः १९ लेभिरेपरमंहर्षमेनिरेचासुरंहतम् ततोदेवाःप्रियाण्यस्यसर्वएवसमाहरन् २० क्रीडतःक्रीडनीया
निददुःपक्षिगणाश्चह सुपर्णोस्यददौपुत्रंमयूरंचित्रबर्हिणम् २१ राक्षसाश्चददुस्तस्मैवराहमहिषावुभौ कुक्कुटंचाग्निसंकाशंप्रद-
दौवरुणःस्वयम् २२ चंद्रमाःप्रददौमेषमादित्योरुचिरांप्रभाम् गवांमाताचगांदेवीददौशतसहस्रशः २३ छागमग्निर्गुणोपेतमिला
पुष्पफलंबहु सुधन्वाशकटंचैवरथंचामितकूबरम् २४ वरुणोवारुणान्दिव्यान्सगजान्प्रददौशुभान् सिंहान्सुरेंद्रोव्याघ्रांश्चद्विपा
नन्यांश्चपक्षिणः २५ श्वापदांश्चबहून्घोरान्छत्राणिविविधानिच राक्षसासुरसंघाश्चअनुजग्मुस्तमीश्वरम् २६ वर्धमानंतुतंदृ-
ष्ट्वाप्रार्थयामासतारकः उपायैर्बहुभिर्हंतुंनाशकच्चापितंविभुम् २७ सैनापत्येनतंदेवाःपूजयित्वागुहालयम् शशंसुर्विप्रकारंतंत
स्माद्तारककारितम् २८ सविवृद्धोमहावीर्योदेवसेनापतिःप्रभुः जघानामोघयाशक्त्यादानवंतारकंगुहः २९ तेनतस्मिन्कुमारेण
क्रीडताविहतेसुरे सुरेंद्रःस्थापितोराज्येदेवानांपुनरीश्वरः ३० ससेनापतिरेवाथबभौस्कंदःप्रतापवान् ईशोगोप्ताचदेवानांप्रिय
कृच्छंकरस्यच ३१ हिरण्यमूर्तिर्भगवानेषएवचपावकिः सदाकुमारोदेवानांसैनापत्यमवाप्तवान् ३२ तस्मात्सुवर्णंमंगल्यंरत्न
मक्षय्यमुत्तमम् सहजंकार्तिकेयस्यवन्हेर्जपरमंमतम् ३३ एवंरामायकौरव्यवसिष्ठोकथयत्पुरा तस्मात्सुवर्णदानायप्रयतस्वनरा
धिप ३४ रामःसुवर्णंदत्वाहिविमुक्तःसर्वकिल्बिषैः त्रिविष्टपेमहत्स्थानमवापासुलभंनरैः ३५ इतिश्रीमहाभारतेआनुशासनि
केपर्वणिदानधर्मेसुवर्णदाननामषडशीतितमोऽध्यायः ८६ युधिष्ठिरउवाच चातुर्वर्ण्यस्यधर्मात्मन्धर्माःप्रोक्तायथात्वया
तथैवमेश्राद्धविधिंकृत्स्नंप्रब्रूहिपार्थिव १ वैशंपायनउवाच युधिष्ठिरेणैवमुक्तोभीष्मःशांतनवस्तदा इमंश्राद्धविधिंकृत्स्नंवक्तुंसमुपच
क्रमे २ भीष्मउवाच शृणुष्वावहितोराजन्श्राद्धकर्मविधिंशुभम् धन्यंयशस्यंपुत्रीयंपितृयज्ञंपरंतप ३ देवासुरमनुष्याणांगंधर्वोरग
रक्षसाम् पिशाचकिन्नराणांचपूज्यावैपितरःसदा ४

३० ३१ ३२ ३३ ३४ ३५ इतिआनुशास०टीकायांषडशीतितमोऽध्यायः ८६ १ २ ३ ४

आदितः अमावास्यायांपश्चात्प्रतिपदियद्वास्वंडदर्शेपूर्वेर्द्धे इष्टिःपश्चात्पितृयज्ञः ५ अन्वाहार्यंकर्त्तव्यमपियस्माद्देवैनस्मात्प्रथमकल्पितः सामान्यविधिः सामावास्या
यांयदहश्चंद्रमसंनपश्यंतितदहरपराण्हे पिंडपितृयज्ञंकुरुतइतिविशेषविधिनाबाध्यतइति अन्वाहार्यत्वमपिपितृयज्ञस्यभवतीत्यर्थः ६ तिथीनां भतिथीनांचगु

पितॄन्पूर्व्यादितःपश्चाद्देवतास्तर्पयंतिवै तस्मात्तान्सर्वयत्नेनपुरुषःपूजयेत्सदा ५ अन्वाहार्यंमहाराजपितॄणांश्राद्धमुच्यते त
स्माद्विशेषविधिनाविधिःप्रथमकल्पितः ६ सर्वेष्वहःसुप्रीयंतेकृतेश्राद्धेपितामहाः प्रवक्ष्यामितुतेसर्वांस्तिथ्यातिथ्यगुणागुणा
न् ७ येष्वहःसुकृतैःश्राद्धैर्यत्फलंप्राप्यतेनघ तत्सर्वंकीर्त्तयिष्यामियथावत्तन्निबोधमे ८ पितॄनर्च्यप्रतिपदिप्राप्नुयात्स्वगृहेस्त्रि
यः अभिरूपप्रजायिन्योदर्शनीयाबहुप्रजाः ९ स्त्रियोद्वितीयांजायंतेतृतीयायांतुवाजिनः चतुर्थ्यांक्षुद्रपशवोभवंतिबहवोगृहे १०
पंचम्यांबहवःपुत्राजायंतेकुर्वतांनृप कुर्वाणास्तुनराःषष्ठ्यांभवंतिद्युतिभागिनः ११ कृषिभागीभवेच्छ्राद्धंकुर्वाणःसप्तमींनृप अ
ष्टम्यांतुप्रकुर्वाणोवाणिज्येलाभमाप्नुयात् १२ नवम्यांकुर्वतःश्राद्धंभवत्येकशफंबहु विवर्धंतेतुदशमींगावःश्राद्धानिकुर्वतः १३
कुप्यभागीभवेन्मर्त्यःकुर्वन्नेकादशींनृप ब्रह्मवर्चस्विनःपुत्राजायंतेतस्यवेश्मनि १४ द्वादश्यामीहमानस्यनित्यमेवप्रदृश्यते रज
तंबहुवित्तंचसुवर्णंचमनोरमम् १५ ज्ञातीनांतुभवेच्छ्रेष्ठःकुर्वन्श्राद्धंत्रयोदशीम् अवश्यंतुयुवानोस्यप्रमीयंतेनरागृहे १६ युद्धभा
गीभवेन्मर्त्यःकुर्वन्श्राद्धंचतुर्दशीम् अमावास्यांतुनिर्वापात्सर्वकामानवाप्नुयात् १७ कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्दशीम्
श्राद्धकर्मणितिथ्यस्तुप्रशस्तानतथेतराः १८ यथाचैवापरःपक्षःपूर्वपक्षाद्विशिष्यते तथाश्राद्धस्यपूर्वाण्हादपराण्होविशिष्यते १९
इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेश्राद्धकल्पेसप्ताशीतितमोऽध्यायः ८७ युधिष्ठिरउवाच किंस्विद्दत्तंपितृभ्यो
वैभवत्यक्षयमीश्वर किंहविश्चिररात्राय किमानंत्यायकल्पते १ भीष्मउवाच हवींषिश्राद्धकल्पेतुयानिश्राद्धविदोविदुः तानि
मेशृणुकाम्यानिफलंचैवयुधिष्ठिर २ तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलैस्तथा दत्तेनमासंप्रीयंतेश्राद्धेनपितरोनृप ३ वर्धमानतिल
श्राद्धमक्षयंमनुरब्रवीत् सर्वेष्वेवतुभोज्येषुतिलाःप्राधान्यतःस्मृताः ४ द्वौमासौतुभवेत्तृप्तिर्मत्स्यैःपितृगणस्यह त्रीन्मासानाविके
नाहुश्चतुर्मासंशशेनह ५

णानगुणांश्चप्रवक्ष्यामि ७ ८ ९ स्त्रिय द्वितीयां १० ११ १२ १३ कुप्यंताम्रपात्रादि १४ १५ चतुर्दश्यां
श्राद्धंनिंद्यमवश्यमिति १६ १७ दशम्यादौतिथिषट्के १८ १९ इतिआनुशासनिकेपर्वणिटीकायांसप्ताशीतितमोऽध्यायः ८७ १ २ ३ ४ ५

६ पृषतश्चित्रमृगः तदीयंपार्षतं रुरुः कृष्णमृगः तदीयंरौरवम् ७ ८ वार्ध्रीणसः वार्ध्रीणसो नामयस्य जलपानकाले कर्णौ जलं स्पृशतः पक्षिविशेषोजविशेषश्चेत्यन्ये ९ पितृक्ष
येमृततिथौ कालशाकंचुक्रादितिभाषयाप्रसिद्धंतत्सदृशोमेषवदित्यन्ये लौहं कांचनवृक्षजंपुष्पादिशाकं छागोप्यनंतंतत्फलमितिशेषः १० ११ १२ वीजितं

आजेनमासान्प्रीयंतेपंचैवपितरोनृप वाराहेणतुषण्मासान्सप्तवैश्याकुलेनतु ६ मासानष्टौपार्षतेनरौरवेणनवप्रभो गवयस्य
तुमांसेनतृप्तिःस्याद्दशमासिकी ७ मांसेनैकादशप्रीतिःपितृणांमाहिषेणतु गव्येनदत्तेश्राद्धेतुसंवत्सरमिहोच्यते ८ यथागव्यंत
थायुक्तंपायसंसर्पिषासह वार्ध्रीणसस्यमांसेनतृप्तिर्द्वादशवार्षिकी ९ आनंत्यायभवेद्दत्तंखड्गमांसंपितृक्षये कालशाकंचलौहं
चाप्यानंत्यंछागउच्यते १० गाथाश्चाप्यत्रगायंतिपितृगीतायुधिष्ठिर सनत्कुमारोभगवान्पुरामय्यभ्यभाषत ११ अपिनःस्वकुलेजाया
द्योनोदद्यात्त्रयोदशीम् मघासुसर्पिःसंयुक्तंपायसंदक्षिणायने १२ आजेनवापिलौहेनमघास्वेवयतव्रतः हस्तिच्छायासुविधिवत्क
र्णव्यजनवीजितम् १३ एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत् यत्रासौप्रथितोलोकेष्वक्षय्यकरणोवटः १४ आपोमूलंफलंमांसम
न्नंवापिपितृक्षये यत्किंचिन्मधुसंमिश्रंतदानंत्यायकल्पते १५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेश्राद्धकल्पेऽष्टा
शीतितमोऽध्यायः ८८ भीष्मउवाच यमस्तुयानिश्राद्धानिप्रोवाचशशबिंदवे तानिमेशृणुकाम्यानिनक्षत्रेषुपृथक्पृथक् १ श्रा
द्धंयःकृत्तिकायोगेकुर्वीतसततंनरः अग्नीनाधायसापत्योयजेतविगतज्वरः २ अपत्यकामोरोहिण्यांतेजस्कामोमृगोत्तमे क्रूरकर्मादद
च्छ्राद्धमार्द्रायांमानवोभवे ३ धनकामोभवेन्मर्त्यःकुर्वन्श्राद्धंपुनर्वसौ पुष्टिकामोथपुष्येणश्राद्धमीहेतमानवः ४ आश्लेषायांदद
च्छ्राद्धंधीरान्पुत्रान्प्रजायते ज्ञातीनांतुभवेच्छ्रेष्ठोमघासुश्राद्धमावपन् ५ फाल्गुनीषुददच्छ्राद्धंसुभगःश्राद्धदोभवेत् अपत्यभागुत्त
रासुहस्तेनफलभाग्भवेत् ६ चित्रायांतुददत्श्राद्धंलभेद्रूपवतःसुतान् स्वातियोगेपितृनर्च्यवाणिज्यमुपजीवति ७ बहुपुत्रोविशा
खासुपुत्रमीहन्भवेन्नरः अनुराधासुकुर्वाणोराजचक्रंप्रवर्तयेत् ८ आधिपत्यंव्रजेन्मर्त्योज्येष्ठायामपवर्जयन् नरःकुरुकुलश्रेष्ठश्र
द्धोदमपुरःसरः ९ मूलेत्वारोग्यमृच्छेतयशोदाषाढास्वथोत्तमम् उत्तरासुत्वषाढासुवीतशोकश्चरेन्महीम् १० श्राद्धंत्वभिजिताकुर्वन्भि
षक्सिद्धिमवाप्नुयात् श्रवणेषुददच्छ्राद्धंप्रेत्यगच्छेत्सतांगतिम् ११

पायसादिकंदद्यादितिपूर्वेणान्वयः १३ १४ १५ इतिश्रीमहा-
भारतेआनुशासनिकेपर्वणिटीकायांअष्टाशीतितमोऽध्यायः ८८ १ २ ३ ४ ५ फलभाक्द्रव्यार्थभाक् ६ ७ ८ ९ १० ११ छ

१२ १३ १४ १५ इति आनुशासनिके पर्वणि टीकायां एकोननवतितमोऽध्यायः ८९ १ २ देवता इति अभाग्यः देवतापूजनेषु अश्रद्धां न कुर्वन्तीत्यर्थः देवताः विप्रान् पूजयन्ति उपेत्य उपस्थाय दैवेभ्यो देवानुद्दिश्य सर्वेभ्यो विप्रेभ्यः ३ ४ पङ्क्तिदूषाः काणादयः अपाङ्क्तेयाः दुष्कर्माणः पङ्क्तियोग्याः ५ निराकृतिः अध्ययनादिशून्यः वार्धुषिकः वृद्ध्यर्थं धनप्रयोक्ता ६ कुण्डाशी भगभक्षः तैलिकः तत्कर्मकृत् ७ ८ पर्वकारः वेषान्तरधारी पर्वकृत् विप्रमहाय पस्म्यावेक्षणा-

गजच्छायां भार्गश्विनिश्चायां भवेत नियतं नरः नक्षत्रे वारुणे कुर्वन् विद्यांश्रेष्ठामवाप्नुयात् १२ पूर्वप्रोष्ठपदां कुर्वन् बहून्विन्दत्यजाविकान् उत्तरास्वभिकुर्वाणो विन्दते गाः सहस्रशः १३ बहुकुप्यकृतं वित्तं विन्दते रेवतीं श्रितः अश्विनीष्वश्वान्विन्दते भरणीष्वायुरुत्तमम् १४ इमं श्राद्धविधिं श्रुत्वा शशबिन्दुस्तथाकरोत् अक्लेशेनाजयच्चापि महीं सोऽनुशशास ह १५ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे श्राद्धकल्पे एकोननवतितमोऽध्यायः ८९ युधिष्ठिर उवाच कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं पितामह द्विजेभ्यः कुरुशार्दूल तन्मे व्याख्यातुमर्हसि १ भीष्म उवाच ब्राह्मणान्न परीक्षेत क्षत्रियो दानधर्मवित् दैवे कर्मणि पित्र्ये तु न्याय्यमाहुः परीक्षणम् २ देवताः पूजयन्तीह दैवेनैवेह तेजसा उपेत्य तस्माद्देवेभ्यः सर्वेभ्यो दापयेन्नरः ३ श्राद्धे त्वथ महाराज परीक्षेद्ब्राह्मणान्बुधः कुलशीलवयोरूपैर्विद्ययाभिजनेन च ४ तेषामन्ये पङ्क्तिदूषास्तथान्ये पङ्क्तिपावनाः अपाङ्क्तेयास्तु ये राजन् कीर्तयिष्यामि तान् शृणु ५ कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ग्रामप्रेष्यो वार्धुषिको गायनः सर्वविक्रयी ६ अगारदाही गरदः कुण्डाशी सोमविक्रयी सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः ७ पित्रा विवदमानश्च यस्य चोपपतिर्गृहे अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ८ पर्वकारश्च सूची च मित्रध्रुक् पारदारिकः अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च ९ श्वभिश्च यः परिक्रामेद्यः शुना दष्ट एव च परिवित्तिश्च यश्च स्याद्दुश्चर्मा गुरुतल्पगः १० कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ईदृशैर्ब्राह्मणैर्भुक्तमपाङ्क्तेयैर्युधिष्ठिर ११ रक्षांसि गच्छते हव्यमित्याहुर्ब्रह्मवादिनः श्राद्धं भुक्त्वा त्वधीयानो वृषलीतल्पगश्च यः १२ पुरीषे तस्य तं मासं पितरस्तस्य शेरते सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम् १३ नष्टं देवलके दत्तमप्रतिष्ठं च वार्धुषे यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् १४ भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ये तु धर्मव्यपेतेषु चारित्रापगतेषु च हव्यं कव्यं प्रयच्छन्ति तेषां तत्प्रेत्य नश्यति १५

तरेड इति मेदिनी सूची पिशुनः अव्रतानां शूद्राणां काण्डपृष्ठः शस्त्राजीवी ९ श्वभिः परिक्रामेत् मृगयां कुर्यात् १० कुशीलवः कुशीपालः तेन कर्षणं लक्ष्यते कृषीवलः लवः छेदनं तदुपजीवी काष्ठच्छेदनोपजीवी कुशी फाले इति मेदिनी ११ १२ तस्यैव पुरीषे तस्य पितरः शेरते न त्वन्यस्य पुरीषे १३ १४ १५ ६५

१६ १७ षष्टिशतंपुरुषानितिशेषः १८ १९ असुरेंद्रायबलये २० परिसृते आवृतदेशे २१ २२ २३ २४ २५ त्रिणाचिकेतः त्रिणाचिकेताख्यमंत्राध्ये
ता पंचन्गार्हपत्यादय आवसथ्यांता अग्नयोयस्य त्रिसुपर्णंचतुष्कपर्दासुंपतिः सुपेशाइतिबह्वृचानांमंत्रत्रयंवा ब्रह्ममेतुमामित्यादितैत्तिरीयप्रसिद्धंवा षडंगानिशि

ज्ञानपूर्वंतुयेतेभ्यः प्रयच्छंत्यल्पबुद्धयः पुरीषंभुंजतेतस्यपितरःप्रेत्यनिश्चयः १६ एतानीमान्विजानीयादपांक्तेयान्द्विजाधमान् शूद्रा
णामुपदेशंचयेकुर्वंत्यल्पचेतसः १७ षष्टिकाणःशतंषंढःश्वित्रीयावत्प्रपश्यति पंक्त्यांसमुपविष्टयातावद्दूषयतेनृप १८ यद्वेष्टितशिराभुं
क्तेयद्भुंक्तेदक्षिणामुखः सोपानत्कश्चयद्भुंक्तेसर्वंविद्यात्तदासुरम् १९ असूयताचयद्दत्तंयच्चश्रद्धाविवर्जितम् सर्वंतदसुरेंद्रायब्रह्माभाग
मकल्पयत् २० श्वानश्चपंक्तिदूषाश्चनावेक्षेरन्कथंचन तस्मात्परिसृतेदद्यात्तिलांश्चान्ववकीरयेत् २१ तिलैर्विरहितंश्राद्धंकृतंक्रोधव
शेनच यातुधानाःपिशाचाश्चविप्रलुंपंतितद्धविः २२ अपांक्तोयावतःपांक्तान्भुंजानाननुपश्यति तावत्फलाद्भ्रंशयतिदातारंतस्यबालिशम्
२३ इमेतुभरतश्रेष्ठविज्ञेयाःपंक्तिपावनाः येत्वतस्तान्प्रवक्ष्यामिपरीक्षस्वेहतान्द्विजान् २४ विद्यावेदव्रतस्नाताःब्राह्मणाःसर्वएवहि सदा
चारपराश्चैवविज्ञेयाःसर्वपावनाः २५ पांक्तेयांस्तुप्रवक्ष्यामिज्ञेयास्तेपंक्तिपावनाः त्रिणाचिकेतःपंचाग्निस्त्रिसुपर्णःषडंगवित् २६ ब्रह्म
देयानुसंतानश्छंदोगोज्येष्ठसामगः मातापित्रोर्यश्चवश्यःश्रोत्रियोदशपूरुषः २७ ऋतुकालाभिगामीचधर्मपत्नीषुयःसदा वेदविद्याव्र
तःस्नातोविप्रःपंक्तिंपुनात्युत २८ अथर्वशिरसोध्येताब्रह्मचारीयतव्रतः सत्यवादीधर्मशीलःस्वकर्मनिरतश्चयः २९ येचपुण्येषु
तीर्थेषुअभिषेककृतश्रमाः मखेषुचसमंत्रेषुभवंत्यवभृथप्लुताः ३० अक्रोधनाह्यचपलाःक्षांतादांताजितेंद्रियाः सर्वभूतहितायेच
श्राद्धेष्वेतान्निमंत्रयेत् ३१ एतेषुदत्तमक्षय्यमेतेवैपंक्तिपावनाः इमेपरेमहाभागाविज्ञेयाःपंक्तिपावनाः ३२ यतयोमोक्षधर्मज्ञायो
गाःसुचरितव्रताः येचेतिहासंप्रयताःश्रावयंतिद्विजोत्तमान् ३३ येचभाष्यविदःकेचिद्येचव्याकरणेरताः अधीयतेपुराणंयेधर्मशा
स्त्राण्यथापिच ३४ अधीत्यचयथान्यायंविधिवत्तस्यकारिणः उपपन्नोगुरुकुलेसत्यवादीसहस्रशः ३५ अग्र्याःसर्वेषुवेदेषुसर्वप्र
वचनेषुच यावदेतेप्रपश्यंतिपंक्त्यास्तावत्पुनंत्युत ३६ ततोहिपावनात्पंक्त्याःपंक्तिपावनउच्यते क्रोशात्सार्धतृतीयाच्चपावयेदेकएव
हि ३७

क्षादीनि २६ ब्रह्मदेयइति ब्रह्मवेदःपरविद्यावातद्देयंयेषांतेषामनुसंतानः तत्संतानजः स्वयंचब्रह्मविदध्यापकोवाब्रह्मदेयानुसं
तानः २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ७ ७ ७ ७

अयं ऋत्विक्कादिगुणहीनोपि पंक्तिपावन एवेत्याह अनृत्विगिति ऋत्विग्भिरभ्यनुज्ञात इति ऋत्विग्भिरभ्यनुज्ञेय एव स नत्वनृत्विक्त्वेनानुपाध्यायत्वेनोपेक्षणीयः यतः स पंक्त्या दुष्कृतं हरति अननुज्ञात इति पाठेभिमानवशादननुज्ञातोपीति ज्ञेयं ३८ ३९ ४० मित्रमेव प्रधानं न योग्यत्वादिकं येषु तानि मित्रेष्वपि योग्यता चेन्न तत्परित्यागे दोषाभाव इति भावः ४१ श्राद्धेन निमित्तेन संगतानि संख्यानि पिप्पलबंधनाद्वा कर्मफलोपनिबंधभूतात् स्वर्गात् च्यवते तत्र न गच्छतीत्यर्थः ४२ ४३

ब्रह्मदेयानुसंतान इति ब्रह्मविदो विदुः अनृत्विगनुपाध्यायः स चेदग्र्यासनं व्रजेत् ३८ ऋत्विग्भिरभ्यनुज्ञातः पंक्त्या हरति दुष्कृतम् अथ चेद्वेदवित्सर्वैः पंक्तिदोषैर्विवर्जितः ३९ न च स्यात्पतितो राजन्पंक्तिपावन एव सः तस्मात्सर्वप्रयत्नेन परीक्ष्यामन्त्रयेद्द्विजान् ४० स्वकर्मनिरतानन्यान्कुले जातान्बहुश्रुतान् यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ४१ न प्रीणाति पितॄन्देवान्स्वर्गं च न स गच्छति ४१ यश्च श्राद्धे कुरुते संगतानि न देवयानेन पथा स याति स वै मुक्तः पिप्पलं बंधनाद्वा स्वर्गाल्लोकाच्च्यवते श्राद्धमित्रः ४२ तस्मान्मित्रं श्राद्धकृन्नाद्रियेत दद्यान्मित्रेभ्यः संग्रहार्थं धनानि यं मन्यते नैव शत्रुं न मित्रं तं मध्यस्थं भोजयेद्धव्यकव्ये ४३ यथोषरे बीजमुप्तं न रोहेन्न चावप्ता प्राप्नुयाद्बीजभागम् एवं श्राद्धं भुक्तमनर्हमाणैर्न चेह नामुत्र फलं ददाति ४४ ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति तस्मै श्राद्धं न दातव्यं न हि भस्मनि हूयते ४५ संभोजनी नाम पिशाचदक्षिणा सा नैव देवान्न पितॄनुपैति इहैव सा भ्राम्यति हीनपुण्या शालान्तरे गौरिव नष्टवत्सा ४६ यथाग्नौ शान्ते घृतमाजुहोति तन्नैव देवान्न पितॄनुपैति तथा दत्तं नर्तने गायने च यां चानृते दक्षिणामावृणोति ४७ उभौ हिनस्ति न भुनक्ति चैषा या चानृते दक्षिणा दीयते वै आघातिनी गर्हितैषा पतन्ती तेषां प्रेतान्पातयेद्देवयानात् ४८ ऋषीणां समयं नित्यं ये चरन्ति युधिष्ठिर निश्चिताः सर्वधर्मज्ञास्तान्देवा ब्राह्मणान्विदुः ४९ स्वाध्यायनिष्ठा ऋषयो ज्ञाननिष्ठास्तथैव च तपोनिष्ठाश्च बोद्धव्याः कर्मनिष्ठाश्च भारत ५० कव्यानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भारत तत्र ये ब्राह्मणान्केचिन्न निन्दन्ति हि ते नराः ५१ ये तु निन्दन्ति जल्पेषु न तान्श्राद्धेषु भोजयेत् ब्राह्मणा निन्दिता राजन्हन्युस्त्रैपुरुषं कुलम् ५२ वैखानसानां वचनमृषीणां श्रूयते नृप दूरादेव परीक्षेत ब्राह्मणान्वेदपारगान् ५३ प्रियो वा यदि वा द्वेष्यस्तेषां तु श्राद्धमावपेत् यः सहस्रं सहस्राणां भोजयेदनृतान्नरः एकस्तान्मन्त्रवित्प्रीतः सर्वानर्हति भारत ५४ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे श्राद्धकल्पे नवतितमोऽध्यायः ९० युधिष्ठिर उवाच केन संकल्पितं श्राद्धं कस्मिन्काले किमात्मकम् भृग्वङ्गिरसिके काले मुनिना कतरेण वा १

४४ ४५ संभोजनीति अन्योन्यं दीयमाना या पिशाचदक्षिणा पिशाचाः स्वस्य भोजकाय भोजयन्ति न दत्त ४६ यां च दक्षिणां अनृते अपात्रे आवृणोति प्रयच्छति ४७ ४८ न भुनक्ति न पालयति अघातिनी हंत्री ४९ ५० ५१ ५२ ५३ ५४ ५५ इति आनुशा० टीकायां नवतितमोऽध्यायः ९० केन भृग्वङ्गिरसके यदा भृगवोऽङ्गिरसश्च वर्तन्ते नान्ये १ ६

श्राद्धानि श्राद्धेषु कानि कर्माणि वर्ज्यानि २ ३ ४ ५ ६ ७ कृत्वा उपकल्प्य उपहार्याणि मिष्टान्न कशिपूपप्रभृतीनि आदौ निशिरात्रे प्रभाते ८ विषये अत्यंत बंधकेशो
केविषये मनः संहृत्य शोकत्यक्तेत्यर्थः तस्य बुद्धिर्विस्तारगामिनी आसीत् इति संबंधः ९ १० ११ दक्षिणावर्तिकाः प्रदक्षिणावर्तिनाः बृसीः आसनानि १२ १३

कानिश्राद्धानिवर्ज्यानिकानिमूलफलानिच धान्यजात्यश्चकावर्ज्यास्तन्मेब्रूहिपितामह २ भीष्मउवाच यथाश्राद्धंसंप्रवृत्तंयस्मि
न्कालेसदात्मकम् येनसंकल्पितंचैवतन्मेशृणुजनाधिप ३ स्वायंभुवोऽत्रिःकौरव्यपरमर्षिःप्रतापवान् तस्यवंशेमहाराजदत्तात्रेय
इतिस्मृतः ४ दत्तात्रेयस्यपुत्रोऽभून्निमिर्नामतपोधनः निमेश्चाप्यभवत्पुत्रःश्रीमान्नामश्रियावृतः ५ पूर्णेवर्षसहस्रांतेसकृत्वादु
ष्करंतपः कालधर्मपरीतात्मानिधनंसमुपागतः ६ निमिस्तुकृत्वाशौचानिविधिदृष्टेनकर्मणा संतापमगमत्तीव्रंपुत्रशोकपरायणः
७ अथकृत्वोपहार्याणिचतुर्दश्यांमहामतिः तमेवगणयन्शोकंविरात्रेप्रत्यबुध्यत ८ तस्यासीत्प्रतिबुद्धस्यशोकेनव्यथितात्मनः
मनःसंहृत्यविषयेबुद्धिर्विस्तारगामिनी ९ ततःसंचिंतयामासश्राद्धकल्पंसमाहितः यानितस्यैवभोज्यानिमूलानिचफलानिच १०
उक्तानियानिचान्नानियानिचेष्टानितस्यह तानिसर्वाणिमनसाविनिश्चित्यतपोधनः ११ अमावास्यांमहाप्राज्ञोविप्रानानाय्यपूजि
तान् दक्षिणावर्तिकाःसर्वाबृसीःस्वयमथाकरोत् १२ सप्तविप्रांस्ततोभोज्ययुगपत्समुपानयत् ऋतेचलवणंभोज्यंश्यामाकान्नं
ददौप्रभुः १३ दक्षिणाग्रास्ततोदर्भाविष्टरेषुनिवेशिताः पादयोश्चैवविप्राणांयेत्वन्नमुपभुंजते १४ कृत्वाचदक्षिणाग्रान्वैदर्भान्
सुप्रयतःशुचिः प्रददौश्रीमतःपिंडान्नामगोत्रमुदाहरन् १५ तत्कृत्वासमुनिश्रेष्ठोधर्मसंकरमात्मनः पश्चात्तापेनमहतातप्यमानोऽभ्य
चिंतयत् १६ अकृतंमुनिभिःपूर्वंकिंमयेदमनुष्ठितम् कथंतुशापेननमांदहेयुर्ब्राह्मणाइति १७ ततःसंचिंतयामासवंशकर्तारमात्मनः ध्या
तमात्रस्तथाचात्रिराजगामतपोधनः १८ अथात्रिस्तंतथादृष्ट्वापुत्रशोकेनकर्षितम् भृशमाश्वासयामासवाग्भिरिष्टाभिरव्ययः १९ नि
मेसंकल्पितस्तेऽयंपितृयज्ञस्तपोधन मातेभूद्भीःपूर्वदृष्टोधर्मोऽयंब्रह्मणास्वयम् २० सोऽयंस्वयंभुविहितोधर्मःसंकल्पितस्त्वया ऋतेस्वयं
भुवःकोऽन्यःश्राद्धेयंविधिमाहरेत् २१ अथाख्यास्यामितेपुत्रश्राद्धेयंविधिमुत्तमम् स्वयंभुविहितंपुत्रतत्कुरुष्वनिबोधमे २२ कृत्वाग्नौ-
करणंपूर्वंमंत्रपूर्वंतपोधन ततोऽग्नयेथसोमायवरुणायचनित्यशः २३ विश्वेदेवाश्चयेनित्यंपितृभिःसहगोचराः तेभ्यःसंकल्पिताभा-
गाःस्वयमेवस्वयंभुवा २४ स्तोतव्याचेहपृथिवीनिवापस्येहधारिणी वैष्णवीकाश्यपीचेतितथैवेहाक्षयेतिच २५

१४ १५ श्रौतेपित्राद्युद्देशेनदृष्टोधर्मःलोकेपित्रोद्देशेनापिस्वेच्छयाकल्पितइतिसंकरः १६ १७ १८ १९ २० २१ २२ २३ २४ २५

२६ २७ तेप्रसिद्धाःपित्रादयःविमुच्यंते किल्बिषात् नरकादिरूपात् २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ पुलकाःअसंपूर्णतं-
डुलयुक्तधान्यानिहिंगुद्रव्येषुशाकादिसंस्कारकद्रव्येषुपलांडुलशुनंचशाकेषु ३८ सौभांजनादीन्वर्जयति सौभांजनंविषदिग्धपशोर्मांसइतिमेदिनी कृष्णंल

उदकानयनेचैवस्तोतव्योवरुणोविभुः ततोग्निश्चैवसोमश्चआप्याय्याविहतेनघ २६ देवास्तुपितरोनामनिर्मितायेस्वयंभुवा उष्णपायेम
हाभागास्तेषांभागःप्रकल्पितः २७ तेश्राद्धेनार्च्यमानावैविमुच्यंतेहकिल्बिषात् सप्तकःपितृवंशस्तुपूर्वंदृष्टःस्वयंभुवा २८ विश्वेचाग्नि
मुखादेवाःसंख्याताःपूर्वमेवते तेषांनामानिवक्ष्यामिभागार्हाणांमहात्मनाम् २९ बलधृतिर्विपाप्माचपुण्यकृत्पावनस्तथा पार्ष्णिक्षेमा-
समूहश्चदिव्यसानुस्तथैवच ३० विवस्वान्वीर्यवान्ह्रीमान्कीर्तिमान्कृतएवच जितात्मामुनिवीर्यश्चदीप्तरोमाभयंकरः ३१ अनुकर्मा
प्रतीतश्चप्रदातांशुमांस्तथा शैलाभःपरमक्रोधीधीरोष्णीभूपतिस्तथा ३२ स्रजोवज्रीवरीचैवविश्वेदेवाःसनातनाः विद्युद्वर्चाःसो-
मवर्चाःसूर्यश्रीश्चेतिनामतः ३३ सोमपःसूर्यसावित्रोदत्तात्मापुंडरीयकः उष्णीनाभोनभोदश्चविश्वायुर्दीप्तिरेवच ३४ चमूहरःसुरे-
शश्चव्योमारिःशंकरोभवः ईशःकर्ताकृतिर्दक्षोभुवनोदिव्यकर्मकृत् ३५ गणितःपंचवीर्यश्चआदित्योरश्मिवांस्तथा सप्तकृत्सोमवर्चा-
श्चविश्वकृत्कविरेवच ३६ अनुगोप्तासुगोप्ताचनप्ताचेश्वरएवच कीर्तितास्तेमहाभागाःकालस्यगतिगोचराः ३७ अश्राद्धेयानिधान्या
निकोद्रवाःपुलकास्तथा हिंगुद्रव्येषुशाकेषुपलांडुंलशुनंतथा ३८ सौभांजनःकोविदारस्तथागृंजनकादयः कूष्मांडजात्यलाबुंचकृष्णं
लवणमेवच ३९ ग्राम्यवाराहमांसंचयच्चैवाप्रोक्षितंभवेत् कृष्णाजाजीविडश्चैवशीतपाकीस्तथैवच अंकुराद्यास्तथावर्ज्याइहशृंगाट
कानिच ४० वर्जयेल्लवणंसर्वंतथाजंबूफलानिच अवक्षुतावरुदितंतथाश्राद्धेचवर्जयेत् ४१ निवापेहव्यकव्येवागर्हितंचसुदर्शनम्
पितरश्चहिदेवाश्चनाभिनंदंतितद्धविः ४२ चांडालश्वपचौवर्ज्यौनिवापेसमुपस्थिते काषायवासाःकुष्ठीवापतितोब्रह्महापिवा ४३ सं
कीर्णयोनिर्विप्रश्चसंबंधीपतितश्चयः वर्जनीयाबुधैरेतेनिवापेसमुपस्थिते ४४ इत्येवमुक्त्वाभगवान्स्ववंश्यंतमृषिंपुरा पितामहसभां
दिव्यांजगामाथिस्तपोधनः ४५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेश्राद्धकल्पेएकनवतितमोऽध्यायः ९१ ६७
भीष्मउवाच तथानिमौप्रवृत्तेतुसर्वएवमहर्षयः पितृयज्ञंतुकुर्वंतिविधिदृष्टेनकर्मणा १

वर्णमधनिडं ३९ कृष्णाजाजिःकृष्णजीरक विडःविडलवण शीतपाकीशाकविशेषः अंकुराद्यावंशांकुरादयः शृंगाटकाःशिंघाडाइतिप्रसिद्धः ४० ४१ सुदर्श
नंशाकविशेषः ४२ ४३ ४४ ४५ इतिआनुशासनिकेपर्वणिटीकायांएकनवतितमोऽध्यायः ९१ एवंश्राद्धोत्पत्तिमुक्त्वानदग्नभूतस्याग्नौकरणस्योत्पत्तिमाहतथेत्यादिना

१ ३ ४ ५ ६ ७ ८ ९ १० ११ निवसेदत्ते संप्रसारणाभावआर्ष औणादिकस्तन्प्रत्ययो वा १२ १३ १४
व्यंगिता त्रुटिता नोपतिष्ठेत तया निवापो न द्रष्टव्य इत्यर्थः तथा अन्यवंशजापि पापकार्थेन संग्राह्या १५ १६ १७ कल्माषेति चित्रवर्णबलीवर्दपुच्छमाश्रित्य तन

ऋषयो धर्मनित्यास्तु कृत्वा निवपनान्युत तर्पणं चाप्यकुर्वन्त तीर्थाम्भोभिर्यतव्रताः २ निवापैर्दीयमानैश्च चातुर्वर्ण्येन भारत तर्पिताः पि-
तरो देवास्तत्रान्नं जरयन्ति वै ३ अजीर्णेनाभिहन्यन्ते ते देवाः पितृभिः सह सोममेवाभ्यपद्यन्त तदान्नाभिपीडिताः ४ तेऽब्रुवन्सोममा
साद्य पितरोऽजीर्णपीडिताः निवापान्नेन पीड्यामः श्रेयो नोऽत्र विधीयताम् ५ तान्सोमः प्रत्युवाचाथ श्रेयश्चेदीप्सितं सुराः स्वयंभूसदनं यात
स वः श्रेयोऽभिधास्यति ६ ते सोमवचनाद्देवाः पितृभिः सह भारत मेरुशृङ्गे समासीनं पितामहमुपागमन् ७ पितर ऊचुः नि-
वापान्नेन भगवन्भृशं पीड्यामहे वयम् प्रसादं कुरु नो देव श्रेयो नः संविधीयताम् ८ इति तेषां वचः श्रुत्वा स्वयंभूरिदमब्रवीत् एष मे
पार्श्वतो वह्निर्युष्मच्छ्रेयोऽभिधास्यति ९ अग्निरुवाच सहितास्तात भोक्ष्यामो निवापे समुपस्थिते जरयिष्यथ चाप्यन्नं मया सा-
र्द्धं न संशयः १० एतच्छ्रुत्वा तु पितरस्ततस्ते विज्वराभवन् एतस्मात्कारणाच्चाग्नेः प्राक्तावद्दीयते नृप ११ निवप्ते चाग्निपूर्वे वै निवापे पु-
रुषर्षभ न ब्रह्मराक्षसास्तं वै निवापं धर्षयन्त्युत १२ रक्षांसि चापवर्तन्ते स्थिते देवे हुताशने पूर्वं पिण्डं पितुर्दद्यात्ततो दद्यात्पितामहे
१३ प्रपितामहाय च ततः एष श्राद्धविधिः स्मृतः ब्रूयात् श्राद्धे च सावित्रीं पिण्डे पिण्डे समाहितः १४ सोमायेति च वक्तव्यं तथा पितृमतेति
च रजस्वला च या नारी व्यंगिता कर्णयोश्च या निवापे नोपतिष्ठेत संग्राह्या नान्यवंशजा १५ जलं प्रतरमाणश्च कीर्तयेत पिताम
हान् नदीमासाद्य कुर्वीत पितॄणां पिण्डतर्पणम् १६ पूर्वं स्ववंशजानां तु कृत्वाद्भिस्तर्पणं पुनः सुहृत्संबन्धिवर्गाणां ततो दद्याज्जलाञ्ज-
लिम् १७ कल्माषगोयुगेनाथ युक्तेन तरतो जलम् पितरोऽभिलषन्ते वै नावं चाप्यधिरोहिताः १८ सदा नावि जलं तज्ज्ञाः प्रयच्छन्ति स-
माहिताः मासार्द्धे कृष्णपक्षस्य कुर्यान्निर्वपणानि वै १९ पुष्टिरायुस्तथा वीर्यं श्रीश्चैव पितृभक्तितः पितामहः पुलस्त्यश्च वसिष्ठः पुलहस्तथा
२०

दीतरंतः सकाशात् तत्पुच्छेन तर्पणं पितरोऽभिलषन्ते युक्तेन शकटेन १८ मासार्द्धे अमावास्यायां कृष्णपक्षस्येत्युक्ते नात्र शुक्लादिमासो विवक्षितः

२१ २२ २३ इतिआनुशासनिकेपर्वणिटीकायांद्विनवतितमोऽध्यायः ९२ द्विजातयइति दशाहादौव्रतोपेता ब्राह्मणाब्राह्मणकामस्ययजमानस्यार्थेयः दि भुंजते तेनान्नं स्वस्यव्रतलोपश्चागरीयान् उत ब्राह्मणस्यकामभंगोवेतिप्रश्नार्थः १ वेदोक्तंयागांगभूतंव्रतंतेनरहिताः कामकारणेच्छयाहेतुना भुंजानाः भोजनं कुर्वंतु नाम येतुव्रतोपेता भुंजंतेतेलुब्धव्रता भवंति तेषांव्रतलोपप्रायश्चित्तंव्रतपतीष्टिरूपं कर्तव्यंभवति इतरस्यत्वल्पमेव्रतवतोपिभुक्त्वाप्रायश्चित्तं कुर्वीरन् नतु श्राद्धलुप्ये रन्निति भावः २ तपस्विनः पात्रत्वमुक्तं तत्रतपसोरूपंपृच्छति यदिदमिति ३ आत्मतंत्रंशरीरस्वरूपं कुटुंबस्यसंवानदुपघाती ४ त्यागस्येति दानेन

अंगिराश्चक्रतुश्चैवकश्यपश्चमहानृषिः एतेकुरुकुलश्रेष्ठमहायोगेश्वराःस्मृताः २१ एतेचपितरोराजन्नेषश्राद्धविधिःपरः प्रेतास्तु
पिंडसंबंधान्मुच्यंतेतेनकर्मणा २२ इत्येषापुरुषश्रेष्ठश्राद्धोत्पत्तिर्यथागमम् व्याख्याता पूर्वनिर्दिष्टाद्दानंकार्यमतःपरम् २३ इति
श्रीमहाभारते आनुशासनिकेपर्वणिदानधर्मेश्राद्धकल्पेद्विनवतितमोऽध्यायः ९२ युधिष्ठिरउवाच द्विजातयोव्रतोपेताहविस्तेय
दि भुंजते अन्नंब्राह्मणकामायकथमेतत्पितामह १ भीष्मउवाच अवेदोक्तव्रताश्चैव भुंजानाः कार्यकारणे वेदोक्तेषु तु भुंजाना
व्रतलुब्धायुधिष्ठिर २ युधिष्ठिरउवाच यदिदंतपइत्याहुरुपवासंपृथग्जनाः तपस्यादेतदेवाहोतन्यद्वापिकिंभवेत् ३ भी
ष्मउवाच मासार्धमासोपवासाद्यत्तपोमन्यतेजनः आत्मतंत्रोपघातीयोनतपस्वीनधर्मवित् ४ त्यागस्यचापिसंपत्तिःशिष्यतेतपउ
त्तमम् सदोपवासीचभवेद्ब्रह्मचारीतथैवच ५ मुनिश्चस्यात्सदाविप्रोवेदांश्चैवसदाजपेत् कुटुंबिकोधर्मकामःसदास्वप्नश्चमानवः ६
अमांसाशीसदाचस्यात्पवित्रंचसदापठेत् ऋतवादीसदाचस्यान्नियतश्चसदाभवेत् ७ विघसाशीकथंचस्यात्सदाचैवातिथिप्रियः
अमृताशीसदाचस्यात्पवित्रीचसदाभवेत् ८ युधिष्ठिरउवाच कथंसदोपवासीस्याद्ब्रह्मचारीचपार्थिव विघसाशीकथंचस्यात्स
दाचैवातिथिप्रियः ९ भीष्मउवाच अंतरासायमाशंचप्रातराशंचयोनरः सदोपवासीभवतियोनभुंक्तेंतरापुनः १० भार्यांगच्छ
न्ब्रह्मचारीऋतौभवतिवैद्विजः ऋतवादीसदाचस्याद्दानशीलस्तुमानवः ११ अभक्षयन्वृथामांसममांसाशीभवत्युत दानंददत्पवि
त्रीस्यादस्वप्नश्चदिवास्वपन् १२ भृत्यातिथिषुयोभुंक्तेभुक्तवत्सुनरःसदा अमृतंकेवलंभुंक्तेइतिविद्धियुधिष्ठिर १३ अभुक्तवत्सुना
श्नातिब्राह्मणेषुतुयोनरः अभोजनेनतेनास्यजितःस्वर्गोभवत्युत १४

इजपश्चपरमंतपइतिश्लोकद्वयार्थः अस्वप्नः स्वधर्मेजागरूकः ५ ६
७ ८ ९ यथोक्तभोजनद्वयव्यतिरेकेणमध्येयोनभुंक्तेससदोपवासीस्यादित्याह अंतरेति १० ११ वृथायज्ञादिनिमित्तंविना १२ १३ १४ ७ ९३

१५ १६ १७ १८ गुणवति दातरि प्रतिगृहीतुरल्पोदोषः १९ २० २१ गंडेतिनामतः २२ उपशिक्षनं अर्जयंतः २३ २४ २५ दिष्टांतंमरणं २६

देवेभ्यश्चपितृभ्यश्चसंश्रितेभ्यस्तथैवच अवशिष्टानियोभुंक्तेतमाहुर्विघसाशिनम् १५ तेषांलोकाह्यपर्यंताः सदनेब्रह्मणःस्मृताः
उपस्थिताश्चाप्सरसोगंधर्वैश्चजनाधिप १६ देवतातिथिभिःसार्द्धंपितृभिश्चोपभुंजते रमंतेपुत्रपौत्रेणतेषांगतिरनुत्तमा १७ युधि
ष्ठिरउवाच ब्राह्मणेभ्यःप्रयच्छंतिदानानिविविधानिच दातृप्रतिगृहीत्रोर्वैकोविशेषःपितामह १८ भीष्मउवाच साधोर्यःप्र
तिगृण्हीयात्तथैवासाधुतोद्विजः गुणवत्यल्पदोषःस्यान्निर्गुणेतुनिमज्जति १९ अत्राप्युदाहरंतीममितिहासंपुरातनम् वृषादर्भेश्चसंवा
दंसप्तर्षीणांचभारत २० कश्यपोत्रिर्वसिष्ठश्चभरद्वाजोथगोतमः विश्वामित्रोजमदग्निःसाध्वीचैवाप्यरुंधती २१ सर्वेषामथतेषांतु
गंडाभूत्कर्मकारिका शूद्रःपशुसखश्चैवभर्त्ताचास्याबभूवह २२ तेचसर्वेतपस्यंतःपुराचेरुर्महीमिमाम् समाधिनोपशिक्षंतोब्रह्मलो
कंसनातनम् २३ अथाभवदनावृष्टिर्महतीकुरुनंदन कृच्छ्रप्राणोभवद्यत्रलोकोयंवैक्षुधान्वितः २४ कस्मिंश्चिच्चपुरायज्ञेशैब्येनशि
बिसूनुना दक्षिणार्थेथऋत्विग्भ्योदत्तःपुत्रःपुराकिल २५ अस्मिन्कालेथसोल्पायुर्दिष्टांतमगमत्प्रभुः तेतंक्षुधाभिसंतप्ताःपरिवार्योप
तस्थिरे २६ याज्यात्मजमथोदृष्ट्वागतासूनृषिसत्तमाः अपचंततदास्थाल्यांक्षुधार्त्ताःकिलभारत २७ निरन्नेमर्त्यलोकेस्मिन्नात्मानंते
परीप्सवः कृच्छ्रामापेदिरेवृत्तिमन्नहेतोस्तपस्विनः २८ अटमानोथतान्मार्गेपच्यमानान्महीपतिः राजाशैब्योवृषादर्भिःक्लिश्यमानान्दद
र्शह २९ वृषादर्भिरुवाच प्रतिग्रहस्तारयतिपुष्टिर्वैप्रतिगृह्यताम् मयियद्विद्यतेवित्तंतच्छृणुध्वंतपोधनाः ३० प्रियोहिमेब्रा
ह्मणोयाच्यमानोदद्यामहंवोश्वतरीसहस्रम् एकैकशःसवृषाःसंप्रसूताःसर्वेषांवैशीघ्रगाःश्वेतरोमाः ३१ कुलंभराननडुहःशतंशतान्
धुर्यान्श्वेतान्सर्वशोहंददामि प्रष्ठौहीनांपीवराणांचतावदग्र्यागृष्ट्याधेनवःसुव्रताश्च ३२ वरान्ग्रामान्व्रीहिरसंयवांश्चरत्नंचान्यद्दु
र्लभंकिंददानि नास्मिन्नभक्ष्येभावमेवंकुरुध्वंपुष्ट्यर्थंवःकिंप्रयच्छाम्यहंवै ३३ ऋषयऊचुः राजन्प्रतिग्रहोराज्ञोमध्वास्वादोविषो
पमः तज्जानमानःकस्मात्त्वंकुरुषेनःप्रलोभनम् ३४ क्षेत्रंहिदैवतमिहब्राह्मणान्समुपाश्रितम् अमलोह्येषतपसाप्रीतःप्रीणातिदे
वताः ३५ अन्हापीहतपोजातुब्राह्मणस्योपजायते तद्दावइवनिर्दह्यात्प्राप्तोराजप्रतिग्रहः ३६

२७ आत्मानंशरीरंपरीप्सवःरक्षितुकामाः
२८ २९ पुष्टिःपुष्टिहेतुः ३१ ३२ ३३ ३४ ब्राह्मणान् क्षेत्रं ब्राह्मणस्वरूपस्थानंदेवतासमूहः यावतीर्वैदेवतास्ताःसर्वावेदविदिब्राह्मणेवसंती
तिश्रुत्यर्थउक्तः ३५ ३६

३७ अन्येनपथा ३८ ३९ ४० नस्महेनस्मः अस्तोरार्षस्तद्रु ४१ ४२ प्रतीच्छन्प्रतिगृण्हन् ४३ ४४ नस्यन्लाभसन्तस्यमात्राइयत्ता ४५ ४६
कामस्तृष्णारूपः ४७ तद्धनंतपोधनम् ४८ पक्षसंमतः पाक्षिकत्वेनमतः ४९ ५० यदितियतोहेतो. येधर्मेविधर्मएववैधर्मन्नास्मिह्लोसादिदोषेस्तनिपरंउत्कृ

कुशलंसहदानेनराजन्नस्तुसदातव अर्थिभ्योदीयतांसर्वमित्युक्त्वान्येनतेययुः ३७ अपक्वमेवतन्मांसमभूत्तेषांमहात्मनाम् अ
थहित्वाययुःसर्वेवनमाहारकांक्षिणः ३८ ततःप्रचोदिताराज्ञावनंगत्वास्यमंत्रिणः प्रचीयोदुम्बराणिस्मदातुंतेषांप्रचक्रिरे ३९
उदुम्बराण्यथान्यानिहेमगर्भाण्युपाहरन् भृत्यास्तेषांततस्तानिप्रग्राहितुमुपाद्रवन् ४० गुरूणीतिविदित्वाथनग्राह्याण्यत्रिरब्रवी
त् नस्महेमन्दविज्ञानानस्महेमंदबुद्धयः ४१ हैमानीमानिजानीमः प्रतिबुद्धाःस्मजागृम इहह्येतदुपादत्तंप्रेत्यस्यात्कटुकोदयम्
४२ अप्रतिग्राह्यमेवैतत्प्रेत्येहचसुखेप्सुना वसिष्ठउवाच. शतेननिष्कंगणितंसहस्रेणचसंमितम् तथाबहुप्रतीच्छन्वैपापि
ष्ठांपततेगतिम् ४३ कश्यपउवाच यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः सर्वंतन्नालमेकस्यतस्माद्विद्वाञ्छमंचरेत् ४४
भरद्वाजउवाच. उत्पन्नस्यरुरोःशृंगंवर्धमानस्यवर्धते प्रार्थनापुरुषस्येवतस्यमात्रानविद्यते ४५ गौतमउवाच नतल्लोके
द्रव्यमस्तियल्लोकंप्रतिपूरयेत् समुद्रकल्पःपुरुषोनकदाचनपूर्यते ४६ विश्वामित्रउवाच कामंकामयमानस्ययदाकामः
समृध्यते अथैनमपरःकामस्तृष्णाविध्यतिबाणवत् ४७ जमदग्निरुवाच प्रतिग्रहेसंयमोवैतपोधारयतेध्रुवम् तद्धनंब्रा
ह्मणस्येहलुभ्यमानस्यविस्रवेत् ४८ अरुन्धत्युवाच धर्मार्थंसंचयोयोवैद्रव्याणांपक्षसंमतः तपःसंचयएवेहविशिष्टोद्रव्य
संचयात् ४९ गंडोवाच उग्रादितोभयाद्यस्माद्बिभ्यतीमेममेश्वराः बलीयांसोदुर्बलवद्बिभेम्यहमतःपरम् ५० पशुसख
उवाच यद्वैधर्मेपरंनास्तिब्राह्मणास्तद्धनंविदुः विनयार्थंसुविद्वांसमुपासेयंयथातथम् ५१ ऋषयऊचुः कुशलंसहदानं
नतस्मैयस्यप्रजाइमाः फलान्युपधियुक्तानियएवंनःप्रयच्छति ५२ भीष्मउवाच इत्युक्त्वाहेमगर्भाणिहित्वातानिफलानिवै
ऋषयोजग्मुरन्यत्रसर्वएवधृतव्रताः ५३ मंत्रिणऊचुः उपधिंशंकमानास्तेहित्वातानिफलानिवै ततोन्येनैवगच्छन्तिविदितंते
स्तुपार्थिव ५४ इत्युक्तःसतुभृत्यैस्तैर्वृषादर्भिश्चुकोपह तेषांवैप्रतिकर्तुंचसर्वेषामगमद्गृहम् ५५

ष्टपदंनास्तितल्लभ्यतेनेतद्धर्मोन्व्यमेवधनंब्राह्मणाविदुः विनयशिक्षानदर्थशिक्षितुमितियावत ५१ उपधिःछन्नम् ५२ ५३ ५४ ५५ ५६

५६ ५७ ५८ नामार्थमेवधारय ५९ ज्ञात्वानामानुरूपंतेषांसामर्थ्यंपरीक्ष्यतान् विनाशय अन्यथात्वामेवतेविनाशयिष्यंतीतिभावः ६० ६१ ६२ ६३
६४ कार्श्यस्यकारणंनित्यकर्मलोपइतिवसिष्ठस्यभावः ६५ क्षुद्दुःखंअधीतनाशंचेत्यर्थः ६६ शास्त्रप्रतिपादितोजरन् क्षीयमाणोधर्मइतिविश्वामित्रस्य ६७

सगत्वाहवनीयेग्नौतीव्रंनियममास्थितः जुहावसंस्कृतैर्मंत्रैरेकैकामाहुतिंनृपः ५६ तस्मादग्नेःसमुत्तस्थौकृत्यालोकभयंकरी तस्या
नामवृषादर्भिर्यातुधानीत्यथाकरोत् ५७ साकृत्याकालरात्रीवकृतांजलिरुपस्थिता वृषादर्भिंनरपतिंकिंकरोमीतिचाब्रवीत् ५८
वृषादर्भिरुवाच ऋषीणांगच्छसप्तानामरुंधत्यास्तथैवच दासीभर्तुश्चदास्याश्चमनसानामधारय ५९ ज्ञात्वानामानिचैवेहसर्वा
नेतान्विनाशय विनष्टेषुतथास्वैरंगच्छयत्रेप्सितंतव ६० सातथेतिप्रतिश्रुत्ययातुधानीस्वरूपिणी जगामतद्वनंयत्रविचेरुस्तेमहर्ष-
यः ६१ भीष्मउवाच अथात्रिप्रमुखाराजन्वनेतस्मिन्महर्षयः व्यचरन्भक्षयंतोवैमूलानिचफलानिच ६२ अथापश्यन्सुपीनां
सपाणिपादमुखोदरम् ६३परिव्रजंतंस्थूलांगंपरिव्राजंशुनासह ६३ अरुंधतीतुतंदृष्ट्वासर्वांगोपचितंशुभम् भवितारोभवंतोवैनैवमि
त्यब्रवीन्नृषीन् ६४ वसिष्ठउवाच नैतस्येहयथास्माकमग्निहोत्रमनिर्हुतम् सायंप्रातश्चहोतव्यंतेनपीवाञ्छुनासह ६५
अत्रिरुवाच नैतस्येहयथास्माकंक्षुधावीर्यंसमाहतम् कृच्छ्राधीतंप्रनष्टंचतेनपीवाञ्छुनासह ६६ विश्वामित्रउवाच नैतस्ये
हयथास्माकंशश्वच्छास्त्रजरद्गवः अतःक्षुब्धतरोमूर्खस्तेनपीवाञ्छुनासह ६७ जमदग्निरुवाच नैतस्येहयथास्माकंभक्तमिं
धनमेवच संचित्यवार्षिकंचित्तंतेनपीवाञ्छुनासह ६८ कश्यपउवाच नैतस्येहयथास्माकंचत्वारश्चसहोदराः देहिदेहीतिभि
क्षन्तितेनपीवाञ्छुनासह ६९ भरद्वाजउवाच नैतस्येहयथास्माकंब्रह्मबंधोरचेतसः शोकोभार्यापवादेनतेनपीवाञ्छुनासह ७०
गौतमउवाच नैतस्येहयथास्माकंत्रिकौशेयंचरांकवम् एकैकंवैत्रिवर्षीयंतेनपीवाञ्छुनासह ७१ भीष्मउवाच अथदृष्ट्वा
परिव्राट्सतान्महर्षीञ्छुनासह अभिगम्ययथान्यायंपाणिस्पर्शन्यथाचरन् ७२ परिचर्यांवनेतांतुक्षुत्प्रतीघातकारिकाम् अन्यो-
न्येननिवेद्याथप्रातिष्ठंतसहैवते ७३ एकनिश्चयकार्याश्चव्यचरंतवनानिते आददानाःसमुद्धृत्यमूलानिचफलानिच ७४

अनादिचिंतेतिजमद-
ग्नेः ६८ बहुकुटुंबितेतिकश्यपस्य ६९ भार्यापवादःकृत्तिकास्वभिशापादितिभारद्वाजस्य ७० हीनवस्त्रत्वंगौतमस्यैवमतंत्रिकौशेयंकुशरज्जुःतयानिर्वृत्तंकौशे
यंपाटितंसंधानंत्रीणिकौशेयानियस्मिन्कुशकालेकुशरज्जुरितिमेदिनीरांकवंरंकोमृगविशेषस्यचर्मतदपित्रिवर्षीयंअनतिजीर्णं ७१ ७२ परिचर्यांकरिष्यामिकुर्वी
ति अन्योन्यमुक्त्वेत्यर्थः ७३ एकरूपएवनिश्चयःकार्यंचयेषांते ७४

७५ ७६ ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ नामार्थद्वारा सामर्थ्यं ज्ञात्वा अस्माकं वधैषिणीयमिति विज्ञायेत्यर्थः
८५ आरात्रिरिति यदिदं सर्वं पाप्मानो अत्रापतन्निदं किंचित्तस्मात्त्रय इति श्रुतौ पाप्मनस्त्राणादत्रिरित्यत्रिशब्दस्य निर्वचनं तं देवशब्दान्तरेण प्रदर्शयति या
तुधानीं विमोहयिष्यन् आरात्रिः अरयः कामादयः संत्यस्मिन्निरयं पापं तस्मात्त्रायत इत्यरात्रिः अरशब्दादलुप्तपंचमीकात् परस्य त्रायते रूपं रिक्किप्रत्य
यः अरशब्दाच्च मत्वर्थीये अर्शआद्यचि यस्येत्यकारलोपे अरमिति सिध्यति अस्मादरात्रिस्तस्मादत्रिः अत्तीत्यदः मृत्युः तस्मात्त्रायत इत्यत्रिरित्यत्रापि अवयवार्थे
न पाप्मानं मृत्युशब्दस्य पाप्मनि प्रयोगदर्शनात् धर्मेण पापमपनुदतीति धर्मोऽप्यत्रिः स्यात् अत आह सा रात्रिरध्यवादिति वै निश्चितं अद्य वर्तमानकाले यां त्रिः त्रिवारं ना

कदाचिद्धिमवत्प्रस्थे वृक्षैरविरलैर्वृताम् शुचिवारिप्रसन्नोदां ददृशुः पद्मिनीं शुभाम् ७५ बालादित्यवपुःप्रख्यैः पुष्करैः समुपशोभिताम् वै
दूर्यवर्णसदृशैः पद्मपत्रैरथावृताम् ७६ नानाविधैश्च विहगैर्जलप्रकरसेविभिः एकद्वारामनादेयां सूपतीर्थामकर्दमाम् ७७ वृषादर्भि
प्रयुक्ता तु कृत्या विकृतदर्शना यातुधानीति विख्याता पद्मिनीं तामरक्षत ७८ पशुसख सहायास्तु बिसार्थं ते महर्षयः पद्मिनीमभिजग्मु-
स्ते सर्वे कृत्याभिरक्षिताम् ७९ ततस्ते यातुधानीं तां दृष्ट्वा विकृतदर्शनाम् स्थितां कमलिनीतीरे कृत्यामूचुर्महर्षयः ८० एकाकिनि स्थिता का त्वं
कस्यार्थे किं प्रयोजनम् पद्मिनीतीरमाश्रित्य ब्रूहि त्वं किं चिकीर्षसि ८१ यातुधान्युवाच यास्मि सास्म्यनुयोगो मे न कर्तव्यः कथंचन
आरक्षिणीं मां पद्मिन्या वित्त सर्वे तपोधनाः ८२ ऋषय ऊचुः सर्व एव क्षुधार्ताः स्म न चान्यत्किंचिदस्ति नः भवत्याः सम्मते सर्वे गृण्हीयाम
बिसान्युत ८३ यातुधान्युवाच समयेन बिसानीतो गृण्हीध्वं कामकारतः एकैको नाम मे प्रोक्त्वा ततो गृण्हीत माचिरम् ८४ भी
ष्म उवाच विज्ञाय यातुधानीं तां कृत्यामृषिवधैषिणीम् अत्रिः क्षुधापरीतात्मा ततो वचनमब्रवीत् ८५ अत्रिरुवाच अरात्रिरत्रिः
सा रात्रिर्यां नाधीते त्रिरद्य वै अरात्रिरत्रिरित्येव नाम मे विद्धि शोभने ८६

धीतेनाधिगच्छति अतीतस्य हि पुत्रादेरनुत्पत्तौ अनागतत्वेन उत्पत्तौ वर्तमान-
त्वेन नाशे अतीतत्वेन नान्वेति त्रिरधिगमोऽस्ति न द्यत्र नास्ति सर्वं वर्तमानमेव भवति यथावस्थायां साक्षादर्काशाग्न्यजगत्कारणप्राप्तिः सर्वपाप्मोच्छेदिका सा रात्रिरुच्यते अ
त्र हि अतीतानागतं सर्वमस्तीति श्रूयते यच्चास्येहास्ति यच्च नास्ति सर्वं तदत्र गत्वा विंदत इति अत्र हि सर्वे कामाः समाहिता इति च यस्माद्देवमरात्रिरस्मि तस्मादत्रिरेव मम ना
म मंत्रोऽपि यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः अत्रयस्तमन्वविंदन्नह्यन्ये अशक्नुवन्निति सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः सूर्यं परं ब्रह्म स्वर्भानुः राहुरूपो मृत्युः अवि
ध्यत् व्याप्तवान् तमसा अनात्मनि आत्मबुद्धिरूपया अविद्यया इति मंत्रपदानामर्थः ८६

तदेतदचिन्त्यंमनसापिदुर्द्धर्षमितिमत्वायातुधान्याह यथेति तेत्वया मय्यिमत्समीपे अतीतानागतयोरपिवर्त्तमानकालेएवदर्शनंकामाद्यनुदयश्चेतिद्वयं अत्यंतंतं मःस्वभावयामयाधांतुमशक्यमितिभावः त्वामहंधर्षितुमशक्तेतित्वंगच्छअवतरपद्मिनींसरसीं ८७ वसिष्ठोस्मीति वसिष्ठःवायुश्चपृथिवीचवायुश्चांतरिक्षंचद्यौश्चादित्यश्चंद्रमाश्चनक्षत्राणिचेतिवसवएतेषुहीदंसर्वंवसुहितमेतीहीदंसर्ववासयंतेइतिश्रुतिप्रसिद्धावसवस्तेयस्यस्वाधीनाभवंतिसवसुमान्प्राप्ताणिमाद्यैश्वर्यो महायोगी।अतिशयेनवसुमानितिवसिष्ठःतादृशोहमस्मि अतिशयेनउरुरस्मि वसुमच्छब्दादिष्ठन्प्रत्ययेपरेमतुब्लोपेटिलोपेचवसिष्ठःउरुशब्दस्येष्ठनिवरादेशश्च प्रियस्थिरादिसूत्रेणज्ञेयः सर्वमहंशोस्मि अहंतुनकस्यापिवशेस्मीतिनामहृदयार्थः वासगृहेषुवासयोग्येषुगृहस्थाश्रमेषुसर्वेषामुपजीव्येषुवसेवसामिअतोअहंवस्तृणांमध्येअतिश्रेष्ठइतिवसिष्ठोऽस्मि वसिष्ठशब्दादिष्ठनितृन्लोपेचवसिष्ठःसर्वेषामाश्रयभूतत्वात् ममर्मांदेवारक्षंतीतिभावः ८८ ८९ कुलमिति कशाश्वताडनरज्जुस्तामर्हंतीतिकश्याअश्वाः अत्रचप्रकरणात् इंद्रियाणिहयानाहुरितिश्रुत्युक्तेरिंद्रियाण्येवाश्वाः कश्याःतदाश्रयत्वाच्छरीराण्यपिकश्यानि कुलंकुलमितिवी

यातुधान्युवाच यथोदाहृतमेतत्तेमयिनाममहाद्युते दुर्धार्यमेतन्मनसागच्छावतरपद्मिनीम् ८७ वसिष्ठउवाच वसिष्ठोस्मि वरिष्ठोऽस्मिवसेवासगृहेष्वपि वसिष्ठत्वाच्चवासाच्चवसिष्ठइतिविद्धिमाम् ८८ यातुधान्युवाच नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् नैतद्धारयितुंशक्यंगच्छावतरपद्मिनीम् ८९ कश्यपउवाच कुलंकुलंचकुवमःकुवमःकश्यपोद्विजः काश्यःकाशनिकाशत्वादेतन्मेनामधारय ९० यातुधान्युवाच यथोदाहृतमेतत्तेमयिनाममहाद्युते दुर्धार्यमेतन्मनसागच्छावतरपद्मिनीम् ९१

प्सायांद्विर्वचनम् सर्वशरीरेष्वहमेवैकःकश्यपोनामद्विजोऽस्मि कश्यानिशरीराणिपातिरक्षतिपिबतिभक्तेपाययतिशोषयतिवाकश्यपइतियोगात्सर्वाणिशरीराणिप्रविश्यांतर्यामिरूपेणपालयामिजीवरूपेणतद्वारासुखदुःखादिकंभक्तेब्रह्मरूपेणतानिसर्वाणिस्वात्मनिप्रविलापयामीत्यर्थः एवंसर्वमध्यात्मंमत्स्वरूपमित्युक्त्वाधिदैवमपिमत्स्वरूपमेवेत्याह कुवमःकुवमइतिकुःपृथिवीतस्यांवमतिवर्षतीतिकुवमआदित्यः आदित्याज्जायतेवृष्टिरितिश्रुतेः पूर्ववद्द्विवचनंसर्वोप्यादित्यःअहमेवमत्तुत्वात्सर्वेषामादित्यानामित्यर्थः पाठांतरेकुपपीःकुंपातीतियोगात्कुपपीःसूर्यएवयापोःकिन् हूचेतिसूत्रेणपातेरीप्रत्ययेप्रकृतेर्द्वित्वेचपपीःइतिरूपंकुपपिरितिह्रस्वपाठेतुआदृगमहनजनेतिकिप्रत्ययेलिड्वद्भावेचकुपपिरितिसूर्यएवकुपपइत्यकारांतपाठस्तुप्रामादिकः यद्वाकुंपृथिवींपातीतिकुपंजलंपिबतीतिकुपपः सूर्यएवेतिसमाधेयंकाश्योदीप्तिमान्तत्रहेतुःकाशनिकाशत्वात्बहुकालत्वेनकाशपुष्पसदृशःसर्वतःपलितश्चिरंतनस्तपसादीप्तोऽस्मीत्यर्थः ९० ९१ ७ ६ ७

प्रजावैं वाजस्तासएव बिभर्त्तियद्द्विभर्त्तितस्माद्भरद्वाजइतिश्रुत्यनुसारेणास्यनामाह भरेइति अशिष्यान्शासितुमयोग्यानपिराक्षसान्शत्रून्श्ववशेकृत्यकरुणयापाल्
यामि तथा अपुत्रानुदासीनानपिदीनानदीनान्पालयामि भार्याभार्येतिपुत्रभृत्यादेरुपलक्षणंईदृग्विधोअन्योपिवाजंवेगंशत्रूणांसाहसंअन्नंवाभरेत्सपृथिवीव
त्सर्वंसहोन्नप्रदश्चभवतीतितस्माद्दहमपितथास्मीत्यर्थः द्वाजमितिछेदेतुद्वाभ्यांजातंसंकरजमित्यर्थः ननुमातात्भस्त्रापितुःपुत्रोयेनजातःसएवसइतिस्मृतेश्चर्मको
शतुल्यामातेत्यतः सर्वोप्येकजएवेतिनास्तिकश्चिद्द्वाजः नहिद्वाभ्यांरेतःसेकाभ्यांएकोजायतइतिसंभवतिगत्य आहवर्णाद्यादीनामपिसंस्कारवतां सर्वेषांद्विविधंजन्म
योनितःसंस्कारतश्चतत्रसंकरो अन्यस्माज्जातोन्येनस्वपुत्रइतिबुध्यासंस्कृतइतिसएवद्वाजः द्विर्जायतइतिद्विजोन्यःद्वाभ्यांस्त्रीपुरुषाभ्यांजायतइति अर्थेद्वाजादयो
निपात्यंतेतनएवद्वाजाअपिसंतीति वशीवशंनयसएकजत्वमितिमंत्रेमन्योःसंकल्पस्यएकजेतिविशेषणम् द्वाजेतुबीजसंस्कारसंकरादवश्यंसंकल्पयोर्वाक्षम
सोर्वापौर्वापर्यविरोधोभवतीतिविश्वासघातकादयोद्वाजाइतिज्ञेयं तदयंसंग्रहः कौशिकेकौर्यतपसीगाधेयेभीरुतेखलेसद्भावाकुचिन्तयेमत्येबीजसंस्कारसंकरा

भारद्वाजउवाच । भरेसुतान्भरेशिष्यान्भरेदेवान्भरेद्विजान् भरेभार्यामनव्याजोभरद्वाजोस्मिशोभने ९२ यातुधान्युवाच
नामनैरुक्तमेतत्तेदुःखव्याभाषिताक्षरम् नैतद्धारयितुंशक्यंगच्छावतरपद्मिनीम् ९३ गौतमउवाच गौतमोऽहमतोधूमोदम
स्तेसमदर्शनात् विद्धिमांगौतमंकृत्येयातुधानिनिबोधमाम् ९४ यातुधान्युवाच यथोदाहृतमेतत्तेमयिनाममहामुने नैतद्धा
रयितुंशक्यंगच्छावतरपद्मिनीम् ९५

द्विति भार्यामनव्याजइतिपाठेअनव्याअनामायातयैवजातोस्मिन्योकृद्धिनार्थेननुकर्पणेत्यर्थः ९२ ९३
गौतमंइति गोपदार्थस्वर्गभूमिंचदमयतिवशीकरोतीतिगोदमः दमइतिदमेनइंद्रियदमेनदमयतीतिजितेंद्रियत्वात् गांभूमिंचदमितुंशक्तोस्मीत्यर्थः अधूमःनि-
र्धूमाग्नितुल्यः अतएवादमः अन्येनदमितुमयोग्यः तत्रहेतुः तेन्वयिसमदर्शनात्समस्यब्रह्मणोदर्शनात् निर्दोषंहिसमंब्रह्मेतिभगवद्वचनात् तस्यहदेवाश्चनाभूत्या
ईशतेआत्माह्येषांसभवतीतिश्रुतेः तस्यब्रह्मविदोअनैश्वर्यायदेवाअपिनईशतेनसमर्थाभवंतिकिमुतनिःसारायातुधानाइतिश्रुत्यर्थः अत्रदकारस्थानेतकारं
कृत्वागौतमइति निपात्यते गोभिस्तमोममध्वस्तंजातमात्रस्यदेहतइतिपाठेदेहतोमातुर्देहाज्जातमात्रस्यअकृततपसोपिममसूर्य तुल्यस्यगोभिर्गरश्मिभिःतमों
धकारंध्वस्तंअतोहंगावः अतंमाः तमोविरोधिनोयस्यसइतिव्युत्पत्त्यागौतमोस्मि त्वयावन्हिवत्दुस्पर्शोहमित्यर्थः ९४ ९५ ७ ७ ७

विश्वेइति विश्वशब्देन अधिदेवंब्रह्मांडस्थादेवाउच्यंते अध्यात्मंचपिंडस्थानींद्रियाणितान्युभयानिमित्रभूतानियस्यसविश्वामित्रः विश्वस्यहवैमित्रंविश्वामित्रं
आसेतिश्रुतेः मित्रेचर्षाविति विश्वपदस्यदीर्घः गवांइंद्रियाणां ९६ ९७ जाजमंद्यइति भूयोभूयोअतिशयेनजमंतियुगपदनेकेषुयज्ञादिषु अनेकवारंपुनः पुन-
र्भक्ष्यंतिहवींषितेजाजमंतोदेवाः जमुभक्षणेयङ्लुङिशत्रंतस्यरूपम् इज्यंतेदेवताअस्मिन्नितियजोग्निः तेषांजानआविर्भावः तस्मिन् जिजायिषिजातोस्मिजनेर्य
ङंतात्सनिलुङात्मनेपदेउत्तमपुरुषैकवचनंआर्षोअडभावश्च इहलोके अतोमांजिजाहिजानीहि अतोयोगात् मांजमदग्निरितिनामतोविद्धिजाजमदित्यत्राद्यपदे
मध्यमाक्षरलोपे द्वितीयस्यजस्त्वेजमदग्निरितिसिद्धं जिंजाहीत्यपिज्ञाधातोर्यङ्लुङिज्ञादेशेमध्यमैकवचनं ततोजाजमंतोग्निस्थास्मिन्संतीतिजमदग्निमानृत-

विश्वामित्रउवाच विश्वेदेवाश्चमेमित्रंमित्रमस्मिगवांतथा विश्वामित्रमितिख्यातंयातुधानिनिबोधमाम् ९६ यातुधान्युवाच
नामनैरुक्तमेतत्तेदुःखव्याभाषिताक्षरम् नैतद्धारयितुंशक्यंगच्छावतरपद्मिनीम् ९७ जमदग्निरुवाच जाजमद्यजजानेहंजिजाहीह
जिजायिषिजमदग्निरितिख्यातस्ततोमांविद्धिशोभने ९८ यातुधान्युवाच यथोदाहृतमेतत्तेमयिनाममहामुने नैतद्धारयितुंशक्यं
गच्छावतरपद्मिनीम् ९९ अरुंधत्युवाच धरांधरित्रींवसुधांभर्त्तुस्तिष्ठाम्यनंतरम् मनोनुरुंधतीभर्त्तुरितिमांविद्ध्यरुंधतीम् १००
यातुधान्युवाच नामनैरुक्तमेतत्तेदुःखव्याभाषिताक्षरम् नैतद्धारयितुंशक्यंगच्छावतरपद्मिनीम् १ गंडोवाच वक्त्रैकदेशेगंडे
तिधातुमेतंप्रचक्षते तेनोन्नतेनगंडेतिविद्धिमानलसंभवे २ यातुधान्युवाच नामनैरुक्तमेतत्तेदुःखव्याभाषिताक्षरम् नैतद्धा
रयितुंशक्यंगच्छावतरपद्मिनीम् ३ पशुसखउवाच पशून्रजामिदृष्ट्वाहंपशूनांचसदासखा गौणंपशुसखेत्येवंविद्धिमामग्निसं
भवे ४

तोमतुब्लोपेनजमदग्निरितिपदं एतेनापिक्लस्याधर्षणीयत्वमुक्तं ९८ ९९ धरामिति धरान्पर्वतान् धरित्रींभुवंवसून्देवान्धत्तेइतिव्युत्पत्त्यावसुधांदिवं
चतिष्ठामिअधितिष्ठामि तत्रहेतुः भर्त्तुर्वसिष्ठस्यानंतरं अव्यवधानेनमनोनुरुंधतीतिअरुषोअतिकठिनान् धरादीन् दधानीत्यरुंधतीतिदकारलोपेनमुमागमेन
चसिद्धं अनुरुंधतीत्यत्रनुकारलोपेनवेति १०० १०१ वक्त्रेति वक्त्रगंडेतिनुमासहितस्यानुकरणंमामांअनलसंभवेत्वंयस्मात्वृषादर्भिणास्वधनमप्रतिगृण्ह-
तामृषीणांवधार्थंत्वंजरामग्नौहुत्वाततोस्याउत्पादितत्वादितिज्ञेयम् २ ३ पशून्जीवान्रक्ष्यामिरंजयामिमांसनामेत्यर्थः ४ छ. छ. छ.

५ श्वाधर्मः तन्सखायोमुनयः तेषांसखाशुनःसखइतिसखात ६ ७ ८ ९ १० ११ कलापशःसंघशः १२ समयशपथ अन्यशपथव्याजेननिषिद्धा

यातुधान्युवाच नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् नैतद्धारयितुंशक्यंगच्छावतरपद्मिनीम् ५ शुनःसखउवाच
एभिरुक्तंयथानामनाहंवक्तुमिहोत्सहे शुनःसखसखायंमांयातुधान्युपधारय ६ यातुधान्युवाच नामनैरुक्तमेतत्तेवाक्यंसंदि
ग्धयागिरा तस्मात्पुनरिदानींत्वंब्रूहियन्नामतेद्विज ७ शुनःसखउवाच सकृदुक्तंमयानामनगृहीतंत्वयायदि तस्मात्त्रिदण्डाभि
हतागच्छभस्मेतिमाचिरम् ८ साब्रह्मदण्डकल्पेनतेनमूर्ध्निहतातदा कृत्यापपातमेदिन्यांभस्मसाचजगामह ९ शुनःसखश्चहत्वा
तांयातुधानींमहाबलाम् भुवित्रिदण्डंविष्टभ्यशाड्वलेसमुपाविशत् १० ततस्तेमुनयःसर्वेपुष्कराणिबिसानिच यथाकाममुपादाय
समुत्तस्थुर्मुदान्विताः ११ श्रमेणमहताकृत्वातेबिसानिकलापशः तीरेनिक्षिप्यपद्मिन्यास्तर्पणंचक्रुरम्भसा १२ अथोत्थायजलात्त-
स्मात्सर्वेतेसमुपागमन् नापश्यंश्चापितेतानिबिसानिपुरुषर्षभाः १३ ऋषयऊचुः केनक्षुधापरीतानामस्माकंपापकर्मणा
नृशंसेनापनीतानिबिसान्याहारकांक्षिणाम् १४ तेशंकमानास्त्वन्योन्यंपप्रच्छुर्द्विजसत्तमाः तऊचुःसमयंसर्वेकुर्मइत्यरिकर्शन १५
तउक्त्वाबाढमित्येवंसर्वएवतदासमम् क्षुधार्त्ताःसुपरिश्रान्ताःशपथायोपचक्रमुः १६ अत्रिरुवाच सगांस्पृशतुपादेनसूर्यंचप्र
तिमेहतु अनध्यायेष्वधीयीतबिसस्तैन्यंकरोतियः १७ वसिष्ठउवाच अनध्यायपरोलोकेशुनःसपरिकर्षतु परिव्राट्कामवृ-
त्तस्तुबिसस्तैन्यंकरोतियः १८ शरणागतंहन्तुसःस्वसुतांचोपजीवतु अर्थान्कांक्षतुकीनाशाद्बिसस्तैन्यंकरोतियः १९ कश्यपउ
वाच सर्वत्रसर्वंलपतुन्यासलोपंकरोतुच कूटसाक्षित्वमभ्येतुबिसस्तैन्यंकरोतियः २० वृथामांसाशनश्चास्तुवृथादानंकरोतुच
यातुस्त्रियंदिवाचैवबिसस्तैन्यंकरोतियः २१ भरद्वाजउवाच नृशंसस्त्यक्तधर्मास्तुस्त्रीषुज्ञातिषुगोषुच ब्राह्मणंचापिजय
तांबिसस्तैन्यंकरोतियः २२ उपाध्यायमधःकृत्वाऋचोऽध्येतुयजूंषिच जुहोतुचसकक्षाग्नौबिसस्तैन्यंकरोतियः २३ जमदग्निरु
वाच पुरीषमुत्सृजत्वप्सुहन्तुगांचैवदुह्यतु अनृतौमैथुनंयातुबिसस्तैन्यंकरोतियः २४ द्वेष्योभार्योपजीवीस्याद्दूरबन्धुश्चवैरवा
न् अन्योन्यस्यातिथिश्चास्तुबिसस्तैन्यंकरोतियः २५ गौतमउवाच अधीत्यवेदांस्त्यजतुत्रीनग्नीनपविध्यतु विक्रीणा-
तुतथासोमंबिसस्तैन्यंकरोतियः २६

न्युच्यंते १३ १४ १५ १६ १७ शुनःस्पर सेयात्परिकर्षतुक्रीडार्थंमृगयार्थंवा १८ स्वसुतांमुपजीवतु ... कीनाशा
त्कर्षकात् १९ २० वृथायागादिनिमित्तंविनावृथान्नदानंनकादौ २१ जयतांयुद्धेवादेवा २२ कक्षाग्नौतृणाग्नौहुतंभस्मीभावसमाप्यत्वेननिष्फलमित्याशय २३ २४ २५
२६ २७

उदपानप्लवेग्रामकूपैकजीवने २७ २८ ब्रह्मकूटवेदराशिस्तथाध्यापयितुर्दोषः २९ ३० ३१ ज्ञातीनाअनादरेपष्ठी अभोग्यायानिदूषिता ३२ ३३ सा

उदपानप्लवेग्रामेब्राह्मणोवृषलीपतिः तस्यसालोक्यतांयातुबिसस्तैन्यंकरोतियः २७ विश्वामित्रउवाच जीवतोवैगुरून्भृत्या भ
रंत्वस्यपरेजनाः अगतिर्बहुपुत्रःस्याद्विसस्तैन्यंकरोतियः २८ अशुचिर्ब्रह्मकूटोस्तुऋध्याचैवाप्यहंकृतः कर्षकोमत्सरीचास्तुबिसस्तै
न्यंकरोतियः २९ वर्षांचरोस्तुभृतकोराज्ञश्चास्तुपुरोहितः अयाज्यस्यभवेदृत्विग्बिसस्तैन्यंकरोतियः ३० अरुंधत्युवाच नि
त्यंपरिभवेच्छ्वश्रूंभर्तुर्भवतुदुर्मनाः एकास्वादुसमाश्नातुबिसस्तैन्यंकरोतिया ३१ ज्ञातीनांगृहमध्यस्थासक्तूनत्तुदिनक्षये अभोग्या
वीरसूरस्तुबिसस्तैन्यंकरोतिया ३२ गंडोवाच अनृतंभाषतुसदाबंधुभिश्चविरुध्यतु ददातुकन्यांशुल्केनबिसस्तैन्यंकरोतिया
३३ साधयित्वास्वयंप्राशेद्दास्येजीर्यतुचैवह विकर्मणाप्रमीयेतबिसस्तैन्यंकरोतिया ३४ पशुसखउवाच दासएवप्रजायेताम
प्रसूतिरकिंचनः दैवतेष्वनमस्कारोबिसस्तैन्यंकरोतियः ३५ शुनःसखउवाच अध्वर्यवेदुहितरंवाददातुच्छंदोगेवाचरितब्रह्मच
र्ये अथर्वणंवेदमधीत्यविप्रःस्नायीतवायोहरतेबिसानि ३६ ऋषयऊचुः इष्टमेतद्द्विजातीनांयोयंतेशपथःकृतः त्वयाकृतं-
बिसस्तैन्यंसर्वेषांनःशुनःसख ३७ शुनःसखउवाच न्यस्तमद्यनपश्यद्भिर्यदुक्तंकृतकर्मभिः सत्यमेतन्नमिथ्येतद्बिसस्तैन्यं-
कृतंमया ३८ मयात्यंतर्हितानीहबिसानीमानिपश्यत परीक्षार्थंभगवतांकृतमेवंमयानघाः ३९ रक्षणार्थंचसर्वेषांभवतामहमा
गतः यातुधानीत्यतिक्रूराकृत्यैषावोवधैषिणी ४० वृषादर्भिप्रयुक्तैषानिहतामेतपोधनाः दुष्टाहिंस्यादियंपापायुष्मान्प्रत्यग्निसंभ
वा ४१ तस्माद्दस्म्यागतोविप्रावासवंमांनिबोधत अलोभादक्षयालोकाःप्राप्तावैसार्वकामिकाः ४२ उत्तिष्ठध्वमितःक्षिप्रंतान
वाप्नुतवैद्विजाः ४३ भीष्मउवाच ततोमहर्षयःप्रीतास्तथेत्युक्त्वापुरंदरम सहैवात्रिदशेंद्रेणसर्वेजग्मुस्त्रिविष्टपम् ४४ एव
मेतेमहात्मानोभोगैर्बहुविधैरपि क्षुधापरमयायुक्ताश्छद्यमानामहात्मभिः ४५ नैवलोभंतदाचक्रुस्ततःस्वर्गमवाप्नुवन् तस्मात्स
र्वास्ववस्थासुनरोलोभंविवर्जयेत् ४६ एषधर्मःपरोराजंस्तस्माल्लोभंविवर्जयेत् ४७ इदंनरःसुचरितंसमवायेषुकीर्तयन् अर्थ
भागीचभवतिनचदुर्गाण्यवाप्नुते ४८ प्रीयंतेपितरश्चास्यऋषयोदेवतास्तथा यशोधर्मार्थभागीचभवतिप्रेत्यमानवः १४९ इति
श्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेबिसस्तैन्योपाख्यानेत्रिनवतितमोऽध्यायः ९३

धयित्वाअन्नंपक्त्वाविकर्मणाजारजातेनगर्भादिना ३४ ३५
३६ ३७ अद्यंभस्यंयदुक्तंतन्नमिथ्येतिसंबंधः ३८ अंतर्हितानिअंतर्धानंप्रापितानि ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ १४९ इतिआनु०टीकायां-
त्रिनवतितमोऽध्यायः ९३ ६७

अत्रशपथेनैवनिषिद्धार्थप्रकाशन १ पुष्करार्थंउद्देशेनस्तैन्यंकृत मुनिभिःशपथाःकृताइत्यर्थः २ ३ ४ ५ ६ ७ बिसमृणालयोःकमलकुमुदनालवदवांत रभेदोज्ञेयः ह्रियंततद्ध्रियमाणं ८ आदत्तंआनं ९ अधर्मइतिच्छेदः १० ११ प्रत्यवरान्मध्यमान् तमःअज्ञान १२ १३ १४ १५ पृष्ठमांसानि

भीष्मउवाच अत्रैवोदाहरंतीममितिहासंपुरातनम् यद्वृत्तंतीर्थयात्रायांशपथंप्रतितच्छृणु १ पुष्करार्थंकृतंस्तैन्यंपुराभरतसत्तम राजर्षिभिर्महाराजतथैवचद्विजर्षिभिः २ ऋषयःसमेताःपश्चिमेवैप्रभासेसमागतामंत्रममंत्रयंत चरामसर्वांपृथिवींपुण्यतीर्थांततःकार्यंहंतगच्छामसर्वे ३ शुक्रोंगिराश्चैवकविश्चविद्वांस्तथाह्यगस्त्योनारदपर्वतौच भृगुर्वसिष्ठःकश्यपोगौतमश्चविश्वामित्रोजमदग्निश्चराजन् ४ ऋषिस्तथागालवोथाष्टकश्चभरद्वाजोरुंधतीवालखिल्याः शिबिर्दिलीपोनहुषोंबरीषोराजाययातिर्धुंधुमारोथपूरुः ५ जग्मुःपुरस्कृत्यमहानुभावंशतक्रतुंवृत्रहणंनरेंद्राः तीर्थानिसर्वाणिपरिक्रमंतोमाघ्यांययुःकौशिकींपुण्यतीर्थाम् ६ सर्वेषुतीर्थेष्ववधूतपापाजग्मुस्ततोब्रह्मसरःसुपुण्यम् देवस्यतीर्थेजलमग्निकल्पाविगाह्यतेभुक्तबिसप्रसूनाः ७ केचिद्बिसान्यखनंस्तत्रराजन्नन्येमृणालान्यखनंस्तत्रविप्राः अथापश्यन्पुष्करंतेह्रियंतंह्रदादगस्त्येनसमुद्धृतंतत् ८ तानाहसर्वानृषिमुख्यआगस्त्यःकेनादत्तंपुष्करंमेसुजातम् युष्मान्शंकेपुष्करंदीयतांमेनवैभवंतोहर्तुमर्हंतिपद्मम् ९ शृणोमिकालोहिंसतेधर्मवीर्यंसोयंप्राप्तोवर्ततेधर्मपीडा पुराधर्मोवर्ततेनेहयावत्तावद्गच्छामःसुरलोकंचिराय १० पुरावेदान्ब्राह्मणाग्राममध्येघुष्टस्वरावृषलाञ्छ्रावयंति पुराराजाव्यवहारान्धर्मान्पश्यत्यहंपरलोकंव्रजामि ११ पुरावरान्प्रत्यवरान्गरीयसोयावन्नरानावमंस्यंतिसर्वे तमोत्तरंयावदिदंनवर्ततेतावद्व्रजामिपरलोकंचिराय १२ पुराप्रपश्यामिपरेणमर्त्यान्बलीयसादुर्बलान्भुज्यमानान् तस्माद्यास्यामिपरलोकंचिरायनह्युत्सहेद्रष्टुमिहजीवलोकम् १३ तमाहुरार्ताऋषयोमहर्षिंनतेवयंपुष्करंचोरयामः मिथ्याभिषंगोभवतानकार्यःशपामतीक्ष्णैःशपथैर्महर्षे १४ तेनिश्चितास्तत्रमहर्षयस्तुसंपश्यंतोधर्ममेतंनरेंद्राः ततोशपंतःशपथान्पर्ययेणसहैवतेपार्थिवपुत्रपौत्रैः १५ भृगुरुवाच प्रत्याक्रोशेदिहाक्रुष्टस्ताडितः प्रतिताडयेत् खादेच्चपृष्ठमांसानियस्तेहरतिपुष्करम् १६ वसिष्ठउवाच अस्वाध्यायपरोलोकेश्वानंचपरिकर्षतु पुरेचभिक्षुर्भवतुयस्तेहरतिपुष्करम् १७ कश्यपउवाच सर्वत्रसर्वंपणतुन्यासेलोभंकरोतुच कूटसाक्षित्वमभ्येतुयस्तेहरतिपुष्करम् १८ गौतमउवाच जीवत्वहंकृतोबुद्ध्याविषमेणासमेनसः कर्षकोमत्सरीचास्तुयस्तेहरतिपुष्करम् १९

पृष्ठवाहानांहयवृषभोष्ट्रादीनांमांसा नि १६ भिक्षुःसन्यासी १७ पणतुक्रयविक्रयकरोतु सर्वंअपण्यमपि १८ विगतःममभावोयस्मात्तेनाममेनकामक्रोधादिना १९ [illegible]

अनिवृत्तिःअकृतप्रायश्चित्तः २० २१ २२ २३ २४ २५ २६ २७ अतिथिर्यतिःगृहस्थःगृहवासीकामवृत्तःयथेष्टचेष्टावान् २८ २९
३० ३१ ३२ भृतःवित्तेनक्रीतःभृतकः धान्यविक्रीतःवैश्यैःक्रीतःसन्अवर्षावृष्टिनिबंधंकरोतु ३३ ३४ ३५ ३६ पापिष्ठाण्यअनर्घार्हाः अभृत्याः अयंतु

अंगिराउवाच अमुनिर्ब्रह्मकूटोस्तुश्वानंचपरिकर्षतु ब्रह्महाःनिवृत्तिश्चास्तुयस्तेहरतिपुष्करम् २० धुंधुमारउवाच अकृतज्ञस्तु मित्राणांशूद्रायांचप्रजायतु एकःसंपन्नमश्नातुयस्तेहरतिपुष्करम् २१ पूरुरुवाच चिकित्सायाप्रचरतुभार्ययाचैवपुष्यतु श्वसुरा त्तस्यवृत्तिःस्याद्यस्तेहरतिपुष्करम् २२ दिलीपउवाच उदपानप्लवेग्रामेब्राह्मणोवृषलीपतिः तस्यलोकान्सव्रजतुयस्तेहरतिपुष्करम् २३ शक्रउवाच वृथामांसंसमश्नातुदिवागच्छतुमैथुनम् प्रेष्योभवतुराज्ञश्चयस्तेहरतिपुष्करम् २४ जमदग्निरुवाच अनध्याये ष्वधीयीतमित्रंश्राद्धेचभोजयेत् श्राद्धेशूद्रस्यचाश्नीयाद्यस्तेहरतिपुष्करम् २५ शिबिरुवाच अनाहिताग्निर्म्रियतांयज्ञेविघ्नंकरोतुच तपस्विभिर्विरुध्येच्चयस्तेहरतिपुष्करम् २६ ययातिरुवाच अनृतौचव्रतीचैवभार्यायांसप्रजायतु निराकरोतुवेदांश्चयस्तेहरतिपुष्करम् २७ नहुषउवाच अतिथिर्गृहसंस्थोस्तुकामवृत्तस्तुदीक्षितः विद्याप्रयच्छतुभृतोयस्तेहरतिपुष्करम् २८ अंबरीषउवाच नृशंसस्त्य क्तधर्मोस्तुस्त्रीषुज्ञातिषुगोषुच निहंतुब्राह्मणंचापियस्तेहरतिपुष्करम् २९ नारदउवाच गृहज्ञानीबहिःशास्त्रंपठतांविस्वरंपदम् गरीय सोवजानातुयस्तेहरतिपुष्करम् ३० नाभागउवाच अनृतंभाषतुसदासद्भिश्चैवविरुध्यतु शुल्केनतुददत्कन्यांयस्तेहरतिपुष्करम् ३१ कविरुवाच पद्भ्यांसगांताडयतुसूर्यंचप्रतिमेहतु शरणागतंसंत्यजतुयस्तेहरतिपुष्करम् ३२ विश्वामित्रउवाच करोतुभृतकोवर्षासु राज्ञश्चास्तुपुरोहितः ऋत्विगस्तुत्वयाज्यस्ययस्तेहरतिपुष्करम् ३३ पर्वतउवाच ग्रामेचाधिकृतःसोस्तुखरयानेनगच्छतु शुनःकर्षतुवृ त्त्यर्थेयस्तेहरतिपुष्कर ३४ भारद्वाजउवाच सर्वपापसमादानंनृशंसेचानृतेचयत् तत्तस्यास्तुसदापापंयस्ते० ३५ अष्टकउवाच सरा जास्त्वकृतप्रज्ञःकामवृत्तश्चपापकृत् अधर्मेणाभिशास्तूर्वींयस्ते० ३६ गालवउवाच पापिष्ठेभ्योत्द्यनर्घार्हःसनरोस्तुस्वपापकृत् दत्ता दानंकीर्त्तयतुयस्ते० ३७ अरुंधत्युवाच श्वश्र्वापवादंवदतुभर्त्तुर्भवतुदुर्मनाः एकास्वादुसमश्नातुयातेह० ३८ शुनःसखउवाच अ ग्निहोत्रमनादृत्यससुखंस्वपतुद्विजः परिव्राट्कामवृत्तोस्तुयस्तेह० ३९ सुरभ्युवाच बालजेननिदानेनकांस्यंभवतुदोहनम् दुह्येतप रवत्सेनयातेहरतिपुष्करम् ४०

ततोप्यपूज्योस्तुयतःस्वपापकृत्स्वेषुज्ञातीषुपापकृत्गराग्निदानादिनावधकृत् ३७ श्वश्र्वाअपवादंज्ञातिच्छेद ३८ ३९
बालजेननृकेशजेनबल्वजेनेतिपाठेबल्वजःबल्वजसंज्ञकःतृणविशेषः तज्जेननिदानंदोहनकालेगवांपादबंधनीरज्जुःतेन ४० ६७ ६७ ६७

४१ प्रत्ययं अभिप्रायम् ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ इति आनुशासनिके पर्वणि दानधर्मे

भीष्म उवाच ततस्तैः शपथैः शप्यमानैर्नानाविधैर्बहुभिः कौरवेन्द्र सहस्राक्षो देवराट् संप्रहृष्टः समीक्ष्य तं कोपनं विप्रमुख्यम्
४१ अथाब्रवीन्मघवा प्रत्ययं स्वं समाभाष्य तमृषिं जातरोषम् ब्रह्मर्षिदेवर्षिनृपर्षिमध्ये यत्तं निबोधेह ममाद्य राजन् ४२ शक्र उवाच
अध्वर्युं वेददुहितरं ददातु छन्दोगे वा चरितब्रह्मचर्ये अथर्वणं वेदमधीत्य विप्रः स्नायीत यः पुष्करमाददाति ४३ सर्वान्वेदानधीयानः पुण्यशी
लोऽस्तु धार्मिकः ब्रह्मणः सदनं यातु यस्ते हरति पुष्करम् ४४ अगस्त्य उवाच . आशीर्वादस्त्वया प्रोक्तः शपथो बलसूदन दीयतां पुष्क
रं मह्यमेष धर्मः सनातनः ४५ इन्द्र उवाच न मया भगवँल्लोभाद्धृतं पुष्करमद्य वै धर्मांस्तु श्रोतुकामेन हृतं न क्रोद्धुमर्हसि ४६ धर्म
श्रुतिसमुत्कर्षो धर्मसेतुरनामयः आर्षो वै शाश्वतो नित्यमव्ययोऽयं मया श्रुतः ४७ तदिदं गृह्यतां विद्वन्पुष्करं द्विजसत्तम अतिक्रमं मे भगवन्
क्षन्तुमर्हस्यनिन्दित ४८ इत्युक्तः स महेन्द्रेण तपस्वी कोपनो भृशम् जग्राह पुष्करं धीमान्प्रसन्नश्चाभवन्मुनिः ४९ प्रययुस्ते ततो भूयस्तीर्थानि
वनगोचराः पुण्येषु तीर्थेषु तथा गात्राण्याप्लावयन्त ते ५० आख्यानं य इदं युक्तः पठेत्पर्वणि पर्वणि न मूर्खं जनयेत्पुत्रं न भवेच्च निराकृतिः ५१
न तमापत्स्पृशेत्काचिद्विज्वरो न जरावहः विरजाः श्रेयसा युक्तः प्रेत्य स्वर्गमवाप्नुयात् ५२ यश्च शास्त्रमधीयीत ऋषिभिः परिपालितम् स गच्छे
द्ब्रह्मणो लोकमव्ययं च नरोत्तम ५३ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे शपथविधिर्नाम चतुर्नवतितमोऽध्यायः ९४
युधिष्ठिर उवाच यदिदं श्राद्धकृत्येषु दीयते भरतर्षभ छत्रं चोपानहौ चैव केनैतत्संप्रवर्तितम् १ कथं चैतत्समुत्पन्नं किमर्थं चैव दीयते
न केवलं श्राद्धकृत्ये पुण्यकेष्वपि दीयते २ बहुष्वपि निमित्तेषु पुण्यमाश्रित्य दीयते एतद्विस्तरतो ब्रह्मन्श्रोतुमिच्छामि तत्त्वतः ३ भी
ष्म उवाच शृणु राजन्नवहितः छत्रोपानहविस्तरम् यथैतत्प्रथितं लोके यथा चैतत्प्रवर्तितम् ४ यथा चाक्षय्यतां प्राप्तं पुण्यतां च त
थागतम् सर्वमेतदशेषेण प्रवक्ष्यामि नराधिप ५ जमदग्नेश्च संवादं सूर्यस्य च महात्मनः पुरा स भगवान्साक्षाद्धनुषाक्रीडत प्रभो ६
संधाय संधाय शरांश्चिक्षेप किल भार्गवः तान्क्षिप्तान्रेणुका सर्वांस्तस्येषून्दीप्ततेजसः ७ आनीय सा तदा तस्मै प्रादादसकृदच्युत अथ
तेन स शब्देन ज्यायाश्चैव शरस्य च ८ प्रहृष्टः संप्रचिक्षेप सा च प्रत्याजहार तान् ततो मध्याह्नमारूढे ज्येष्ठामूले दिवाकरे ९

टीकायां चतुर्नवतितमः ९४

पुण्यकेषु स्त्रीणां व्रतोत्सवेषु २ ३ ४ ५ ६ ७ ८ ज्येष्ठामूले दक्षिणावर्ते प्रथम पादे भवचक्रे ज्येष्ठानां समस्त पतितरोहिणीनक्षत्रतदेव ज्येष्ठानाम् ...यनस्थायत...
हर्णे तु ज्येष्ठामूलम्योः ९ १० ११

१० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७

ससायकान्द्विजोमुक्त्वारेणुकामिदमब्रवीत् गच्छानयविशालाक्षिशरानेतान्धनुश्च्युतान् १० यावदेतान्पुनःक्षुप्त्रुक्षिपामीतिजनाधिप
सागच्छत्यन्तरच्छायांवृक्षमाश्रित्यभामिनी ११ तस्यौतस्याहिसंतप्तंशिरःपादौतथैवच स्थितासातुमुहूर्त्तंवैभर्त्तुःशापभयाच्छुभा १२ य
य्यावानयितुंभूयःसायकानसितेक्षणा प्रत्याजगामचशरांस्तानादायमशस्विनी १३ सावैखिन्नासुचार्वङ्गीपद्भ्यांदुःखनियच्छती उपाज
गामभर्त्तारंभयाद्भर्त्तुःप्रवेपती १४ सतामृषिस्तदाकुद्धोवाक्यमाहशुभाननाम् रेणुकेकिंचिरेणत्वमागतेतिपुनःपुनः १५ रेणुकोवाच
शिरस्तावत्प्रदीप्तंमेपादौचैवतपोधन सूर्यतेजोनिरुद्धाहंवृक्षच्छायांसमाश्रिता १६ एतस्मात्कारणाद्ब्रह्मंश्चिरायैतत्कृतंमया एतच्छ्रुत्वाममवि
प्रोमाकुद्धस्त्वंतपोधन १७ जमदग्निरुवाच अद्यैनंदीप्तकिरणंरेणुकेतवदुःखदम् शरैर्निपातयिष्यामिसूर्यमस्त्राग्नितेजसा
१८ भीष्मउवाच सविस्फार्यधनुर्दिव्यंगृहीत्वाचशरान्बहून् अतिष्ठत्सूर्यमभितोयतोयातस्ततोमुखः १९ अथतंप्रेक्ष्यसन्नद्धंसूर्
योऽभ्येत्यतथाऽब्रवीत् द्विजरूपेणकौन्तेयकिंतेसूर्योपराध्यते २० आदत्तेरश्मिभिःसूर्योदिविविस्थितस्ततस्ततः रसंहृतंवैवर्षासुप्रवर्षतिदि
वाकरः २१ ततोऽन्नंजायतेविप्रमनुष्याणांसुखावहम् अन्नंप्राणाइतियथावेदेषुपरिपठ्यते २२ अथाभ्रेषुनिगूढश्चरश्मिभिःपरिवा
रितः सप्तद्वीपानिमान्ब्रह्मन्वर्षेणाभिप्रवर्षति २३ ततस्तदोषधीनांचवीरुधांपुष्पपत्रजम् सर्ववर्षाभिनिर्वृत्तमन्नंसंभवतिप्रभो २४ जात
कर्माणिसर्वाणिव्रतोपनयनानिच गोदानानिविवाहाश्चतथायज्ञसमृद्धयः २५ शास्त्राणिदानानितथासंयोगावित्तसंचयाः अन्नतःसं
प्रवर्त्तन्तेयथात्वंवेत्थभार्गव २६ रमणीयानियावन्तियावदारंभिकाणिच सर्वमन्नात्प्रभवतिविदितंकीर्तयामिते २७ सर्वंहिवेत्थविप्रत्वं
यदेतत्कीर्त्तितंमया प्रसादयेत्वांविप्रर्षेकिंतेसूर्यनिपात्यवै २८ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेछत्रोपानहोत्प
त्तिर्नामपंचनवतितमोऽध्यायः ९५ युधिष्ठिरउवाच एवंप्रयाचतितदाभास्करेमुनिसत्तमः जमदग्निर्महातेजाःकिंकार्यंप्रत्यपद्यत
१ भीष्मउवाच सतथायाचमानस्यमुनिरग्निसमप्रभः जमदग्निःशमंनैवजगामकुरुनंदन २ ततःसूर्योमधुरयावाचातमिद
मब्रवीत् कृतांजलिर्विप्ररूपीप्रणम्यैनंविशांपते ३

२८ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नील
कंठस्यकृतौभारतभावदीपेआनुशासनिकेपर्वणिदानधर्मेटीकायांपंचनवतितमोऽध्यायः ९५ भास्करेप्रयातिसतीत्यर्थः १ शमंशांतिं २ तंजमदग्निं ३ ७ ७

चलंनिमित्तमिति हे विप्रर्षे सदा गच्छतोऽप्यमतः सूर्यस्य चलं च चलत्वनिमित्तं त्वं सदा यान्तं एकद्वीपाद्द्वीपान्तरं गच्छन्तं भेत्स्यसीत्यन्वयः वेत्स्यसीति क्वचित्पाठः ४ जमदग्नि
रिति स्थिरं स्थैर्यं चलं चंचलत्वं विनयाधानं विनयार्पणम् कदाचित्सूर्यः क्षणं स्थिरो भवतीति प्रतिपादयति ५ यतस्त्वं गच्छन्नसि मध्याह्ने दिवसमध्ये निमेषार्धं तिष्ठसि
स्थिरीभवसि हे सूर्य अहं चात्र मध्याह्ने निमेषार्धे स्थैर्यसमये त्वां भेत्स्यामीति नात्र विचारणा विमर्षणेत्यर्थः ६ ७ ततः सूर्यं जमदग्निर्वाक्यं न भीः सूर्य त्वया कार्येति भ
याभावे हेतुमाह हि यस्मात् प्रणिपातं गतोऽसि ८ धर्मान्लंघयेत्स शरणागतं लंघयेदित्याह ब्राह्मणेष्वार्जवमिति भीष्मेयम् आर्जवं अकौटिल्यम् ९ एतानिभा

चलंनिमित्तं विप्रर्षे सदा सूर्यस्य गच्छतः कथं चलं भेत्स्यसि त्वं सदा यान्तं दिवाकरम् ४ जमदग्निरुवाच स्थिरं चापि चलं चापि जा
नेत्वां ज्ञानचक्षुषा अवश्यं विनयाधानं कार्यमद्य मया तव ५ मध्याह्ने वै निमेषार्धं तिष्ठसि त्वं दिवाकर तत्र भेत्स्यामि सूर्य त्वां न मेऽत्रास्ति
विचारणा ६ सूर्य उवाच असंशयं मां विप्रर्षे भेत्स्यसे धन्विनां वर अपकारिणं मां विद्धि भगवञ्छरणागतम् ७ भीष्म उवाच
ततः प्रहस्य भगवाञ्जमदग्निरुवाच तम् न भीः सूर्य त्वया कार्या प्रणिपातगतो ह्यसि ८ ब्राह्मणेष्वार्जवं यच्च स्थैर्यं च धरणीतले सौम्यतां चैव
सोमस्य गाम्भीर्यं वरुणस्य च ९ दीप्तिमग्नेः प्रभां मेरोः प्रतापं तपनस्य च एतान्यतिक्रमेद्यो वै स हन्याच्छरणागतम् १० भवेत्स गुरुतल्पी च ब्र
ह्महा च स वै भवेत् सुरापानं स कुर्याच्च यो हन्याच्छरणागतम् ११ एतस्य त्वपनीतस्य समाधिं तात चिन्तय यथा सुखगमः पन्था भवेत्त्वद्रश्मिभा
वितः १२ भीष्म उवाच एतावदुक्त्वा स तदा तूष्णीमासीद्भृगूत्तमः अथ सूर्योऽददत्तस्मै छत्रोपानहमाशु वै १३ सूर्य उवाच म
हर्षे शिरसस्त्राणं छत्रं मद्रश्मिवारणम् प्रतिगृह्णीष्व पद्भ्यां च त्राणार्थं चर्मपादुके १४ अद्य प्रभृति चैवेह लोके संप्रचरिष्यति पुण्यकेषु
च सर्वेषु परमक्षय्यमेव च १५ भीष्म उवाच छत्रोपानहमेतत्ते सूर्येणैतत्प्रवर्तितम् पुण्यमेतदभिख्यातं त्रिषु लोकेषु भारत १६
तस्मात्प्रयच्छ विप्रेषु छत्रोपानहमुत्तमम् धर्मस्तेषु महानु भावी न मेऽत्रास्ति विचारणा १७

र्गवादीनि अतिक्रमेल्लंघयेच्छरणागतं हन्यादित्यन्व
यः १० धर्मलंघनमभिधाय अधर्मलंघनाभिधानं तत्तद्धर्मज्ञानार्थं तत्तद्धर्मप्राधान्यख्यापनार्थं वा ११ एतस्य त्वनुपनीतस्य कृतापराधस्य समाधानं यथा सुखगमः सुख
मनतिक्रम्य गच्छन्तीति १२ १३ शिरस्त्राणं मद्रश्मिनिवारणं छत्रं प्रतिगृह्णीष्व पद्भ्यां पादयोस्त्राणार्थं चर्मपादुके च प्रतिगृह्णीष्वेत्यन्वयः १४ चर्मपादुके निवाक्यनिर्देशा
त् दाने चर्मपादुकयोः प्राशस्त्यमिति सूचितं तत्र पादुकादानस्य प्रवर्तकः सूर्य इत्याह १५ छत्रोपानहमिति तेतव १६ १७ ७ ७ ७

सुफ्तंशकन्दुसंपन्नमितियावत् शतशलाकं अपरिमितशलाकं घटितानिर्घटितमित्यर्थः शतपदमधिकपरम् १८ १९ संशितायतीक्ष्णव्रताय २० प्रेत्यपरलो

छत्रंहिभरतश्रेष्ठयःप्रदद्याद्द्विजातये सुफ्तंशतशलाकंवैसप्रेत्यसुखमेधते १८ सशक्रलोकेवसतिपूज्यमानोद्विजातिभिः अप्स
रोभिश्चसततंदेवैश्चभरतर्षभ १९ दह्यमानायविप्रायःप्रयच्छत्युपानहौ स्नातकायमहाबाहोसंशितायद्विजातये २० सोपिलो
कानवाप्नोतिदेवतैरभिपूजितान् गोलोकेसमुदायुक्तोवसतिप्रेत्यभारत २१ एतत्तेभरतश्रेष्ठमयाकार्त्स्न्येनकीर्त्तितम् छत्रोपानह
दानस्यफलंभरतसत्तम २२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेछत्रोपानहदानप्रशंसानामषट्नवतितमोऽध्यायः
९६ युधिष्ठिरउवाच गार्हस्थ्यंधर्ममखिलंप्रब्रूहिभरतर्षभ ऋद्धिमाप्नोतिकिंकृत्वामनुष्यइहपार्थिव १ भीष्मउवाच
अत्रतेवर्त्तयिष्यामिपुरावृत्तंजनाधिप वासुदेवस्यसंवादंपृथिव्याश्चैवभारत २ संस्तुत्यपृथिवींदेवींवासुदेवःप्रतापवान् पप्रच्छ
भरतश्रेष्ठमांत्वंयत्पृच्छसेद्यवै ३ वासुदेवउवाच गार्हस्थ्यंधर्ममाश्रित्यमयावामद्विधेनवा किमवश्यंधरेकार्यंकिंवाकृत्वाकृतं
भवेत् ४ पृथिव्युवाच ऋषयःपितरोदेवामनुष्याश्चैवमाधव इज्याश्चैवार्चनीयाश्चयथाचैवनिबोधमे ५ सदायज्ञेनदेवाश्चस-
दातिथ्येनमानुषाः छंदतश्चयथानित्यमर्हान्भुंजीतनित्यशः ६ तेनत्वृषिगणाःप्रीताभवंतिमधुसूदन नित्यमग्निंपरिचरेदभुक्त्वाब
लिकर्मच ७ कुर्यात्तथैवदेवावैप्रीयंतेमधुसूदन कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनच ८ पयोमूलफलैर्वापिपितॄणांप्रीतिमाहरेत्
सिद्धान्नाद्वैश्वदेवंवैकुर्यादग्नौयथाविधि ९ अग्नीषोमंवैश्वदेवंधान्वंतर्यमनंतरम् प्रजानांपतयेचैवपृथक्होमोविधीयते १० तथैवचा
नुपूर्व्येणबलिकर्मप्रयोजयेत् दक्षिणायांयमायेतिप्रतीच्यांवरुणायच ११ सोमायचाप्युदीच्यांवैवास्तुमध्येप्रजापतेः धन्वंतरेःप्रागुदी-
च्यांप्राच्यांशक्रायमाधव १२ मनुष्येभ्यइतिप्राहुर्बलिंद्वारिगृहस्यवै मरुद्भ्योदेवतेभ्यश्चबलिमंतर्गृहेहरेत् १३

के २१ २२ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेआनुशासनिकेपर्वणिटीकायांष
ट्नवतितमोऽध्यायः ९६ गार्हस्थ्यंगृहस्थयोग्यं १ २ ३ ४ ५ ६ बलिकर्मवैश्वदेवः तत्रप्रागन्नमेवयाह्यम् ७ ८ ९ १० ११ १२ १३ ७

तथैवविश्वेदेवेभ्योबलिमाकाशतोहरेत् निशाचरेभ्योहिखलुबलिंनक्तंतथाहरेत् १४ एवंकृत्वाबलिंसम्यग्दद्याद्भिक्षांद्विजायवै अलाभेब्रा
ह्मणस्याग्नावग्रमुद्धृत्यनिक्षिपेत् १५ यदाश्राद्धंपितृभ्योपिदातुमिच्छेतमानवः तदापश्चात्प्रकुर्वीतनिवृत्तेश्राद्धकर्मणि १६ पितॄन्संतर्प
यित्वातुबलिंकुर्याद्विधानतः वैश्वदेवंततःकुर्यात्पश्चाद्ब्राह्मणवाचनम् १७ ततोन्नेनविशेषेणभोजयेदतिथीनपि अर्च्यपूर्वंमहाराजत
तःप्रीणातिमानवान् १८ अनित्यंहिस्थितोयस्मात्तस्मादतिथिरुच्यते आचार्यस्यपितुश्चैवसख्युराप्तस्यचातिथेः १९ इदमस्तिगृहेमह्य-
मितिनित्यंनिवेदयेत् तेयद्वदेयुस्तत्कुर्यादितिधर्मोविधीयते २० गृहस्थःपुरुषःकृष्णशिष्टाशीचतदाभवेत् राजर्त्विजंस्नातकंचगुरुंश्वशु
रमेवच २१ अर्चयेन्मधुपर्केणपरिसंवत्सरोषितान् श्वभ्यश्चश्वपचेभ्यश्चवयोभ्यश्चावपेद्भुवि २२ वैश्वदेवंहिनामैतत्सायंप्रातर्विधी
यते एतांस्तुधर्मान्गार्हस्थ्यान्यःकुर्यादनसूयकः २३ सइहर्धिवरंप्राप्यप्रेत्यलोकेमहीयते २४ भीष्मउवाच इतिभूमेर्वचःश्रु
त्वाविभुर्देवःप्रतापवान् तथाचकारसततंत्वमप्येवंसदाचर २५ एतद्गृहस्थधर्मंत्वंचेष्टमानोजनाधिप इहलोकेयशःप्राप्यप्रेत्यस्व-
र्गमवाप्स्यसि २६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेबलिदानविधिर्नामसप्तनवतितमोऽध्यायः ९७ युधिष्ठिरउवा
च आलोकदानंनामैतत्कीदृशंभरतर्षभ कथमेतत्समुत्पन्नंफलंवात द्ब्रवीहिमे १ भीष्मउवाच अत्राप्युदाहरंतीममितिहा
संपुरातनम् मनोःप्रजापतेर्वादंसुवर्णस्यचभारत २ तपस्वीकश्चिदभवत्सुवर्णोनामभारत वर्णतोहेमवर्णःससुवर्णइतिपप्रथे ३
कुलशीलगुणोपेतःस्वाध्यायेचपरंगतः बहून्सुवंशप्रभवान्समतीतःस्वकैर्गुणैः ४ सकदाचिन्मनुंविप्रोददर्शोपससर्पच कुशलप्रश्न
मन्योन्यंतौचोभौतत्रचक्रतुः ५ ततस्तौसत्यसंकल्पौमेरौकांचनपर्वते रमणीयेशिलापृष्ठेसहितौसन्यषीदताम् ६ तत्रतौकथयं
तौस्तांकथानानाविधाश्रयाः ब्रह्मर्षिदेवदैत्यानांपुराणानांमहात्मनाम् ७ सुवर्णस्त्वब्रवीद्वाक्यंमनुंस्वायंभुवंप्रति हितार्थंसर्व-
भूतानांप्रश्नंमेवक्तुमर्हसि ८ सुमनोभिर्यदिज्यंतेदैवतानिप्रजेश्वर किमेतत्कथमुत्पन्नंफलयोगंचशंसमे ९ मनुरुवाच
अत्राप्युदाहरंतीममितिहासंपुरातनम् शुक्रस्यचबलेश्चैवसंवादंवैमहात्मनोः १० बलेर्वैरोचनस्येहत्रैलोक्यमनुशासतः समी
पमाजगामाशुशुक्रोभृगुकुलोद्वहः ११ तमर्घ्यादिभिरभ्यर्च्यभार्गवंसोसुराधिपः निषसादासनेपश्चाद्विधिवद्भूरिदक्षिणः १२

१३ १४ १५ तपःवर्णाश्रमधर्मः धर्मोदयादिः वीरुधः लताओषधयः व्रीह्यादयः १६ १७ १८ १९ २० २१ २२ २३ २४

कथेयमभवत्तत्र त्वयायापरिकीर्त्तिता सुमनोधूपदीपानांसंप्रदानेफलंप्रति १३ ततःपप्रच्छदैत्येंद्रःकवींद्रंप्रश्नमुत्तमम् १४ बलि-
रुवाच सुमनोधूपदीपानांकिंफलंब्रह्मवित्तम प्रदानस्यद्विजश्रेष्ठतद्भवान्वक्तुमर्हति १५ शुक्रउवाच तपःपूर्वंसमुत्पन्नंध
र्मस्तस्मादनंतरम् एतस्मिन्नंतरेचैववीरुधओषध्यमेवच १६ सोमस्यात्माचबहुधासंभूतःपृथिवीतले अमृतंचविषंचैवयेचान्येतृ-
णजातयः १७ अमृतंमनसःप्रीतिंसद्यस्तृप्तिंददातिच मनोग्लपयतेतीव्रविषंगंधेनसर्वशः १८ अमृतंमंगलंविद्धिमहद्विषममंग
लम् ओषध्योत्यमृतंसर्वाविषंतेजोग्निसंभवम् १९ मनोह्लादयतेयस्माच्छ्रियंचापिददातिच तस्मात्सुमनसःप्रोक्तानरैःसुकृतकर्म
भिः २० देवताभ्यःसुमनसोयोददातिनरःशुचिः तस्यतुष्यंतिवैदेवास्तुष्टाःपुष्टिंददत्यपि २१ यंयमुद्दिश्यदीयेरन्देवंसुमनसःप्रभो मं
गलार्थंसतेनास्यप्रीतोभवतिदैत्यप २२ ज्ञेयास्तूग्राश्चसौम्याश्चतेजस्विन्यश्चताःपृथक् ओषध्योबहुवीर्याहिबहुरूपास्तथैवच २३
यज्ञियानांचवृक्षाणामयज्ञीयान्निबोधमे आसुराणिचमाल्यानिदेवतेभ्योहितानिच २४ रक्षसामुरगाणांचयक्षाणांचतथाप्रियाः
मनुष्याणांपितृणांचकांतायास्त्वनुपूर्वशः २५ वन्याग्राम्याश्चेहतथाकृष्टोप्ताःपर्वताश्रयाः अकंटकाःकंटकिनोगंधरूपरसान्विताः
२६ द्विविधोहिस्मृतोगंधइष्टोनिष्टश्चपुष्पजः इष्टगंधानिदेवानांपुष्पाणीतिविभावय २७ अकंटकानांवृक्षाणांश्वेतप्रायाश्चवर्णतः
तेषांपुष्पाणिदेवानामिष्टानिसततंप्रभो २८ जलजानिचमाल्यानिपद्मादीनिचयानिवै गंधर्वनागयक्षेभ्यस्तानिदद्याद्विचक्षणः २९
ओषध्योरक्तपुष्पाश्चकटुकाःकंटकान्विताः शत्रूणामभिचारार्थमथर्वसुनिदर्शिताः ३० तीक्ष्णवीर्यास्तुभूतानांदुरालभाःसकंटकाः
रक्तभूयिष्ठवर्णाश्चकृष्णाश्चैवोपहारयेत् ३१ मनोहृदयनंदिन्योविशेषमधुराश्चयाः चारुरूपाःसुमनसोमानुषाणांस्मृताविभो
३२ नतुश्मशानसंभूतादेवतायतनोद्भवाः सन्नयेत्पुष्टिकार्येषुविवाहेषुरहःसुच ३३ गिरिसानुरुहाःसौम्यादेवानामुपपादयेत् प्रो
क्षिताभ्युक्षितासौम्यायथायोग्यंयथास्मृति ३४ गंधेनदेवास्तुष्यंतिदर्शनाद्यक्षराक्षसाः नागाःसमुपभोगेनत्रिभिरेतैस्तुमानुषाः ३५
सद्यःप्रीणातिदेवान्वैतेप्रीताभावयंत्युत संकल्पसिद्धामर्त्यानामीप्सितैश्चमनोरमैः ३६ प्रीताःप्रीणंतिसततंमानितामानयंतिच अव
ज्ञातावधूताश्चनिर्दहंत्यधमान्नरान् ३७ अतऊर्ध्वंप्रवक्ष्यामिधूपदानविधेःफलम् धूपांश्चविविधान्साधूनसाधूंश्चनिबोधमे ३८

२५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ६ ६ ६ ६

निर्यासाः गुग्गुलुप्रभृतयः सारिणः काष्ठाग्निसंयोगान्निःसरंतः कृत्रिमाः अष्टगंधादयः ३९ ४० ४१ फाणिताश्च्युतेआसवेनतीव्रगंधेनसंयुक्ताः देवदारु प्रभृतयः तेःपाठांतरे फाणिताः विकसितामल्लिकादयः तासांरसैर्मकरंदैःगंधरसूसंयुक्तैर्दारवैःसद्यस्तुष्टिकरोगंधइतिशेषः ४२ वैहारिकाविहारमात्रोपयुक्ताः ४३ ४४ ४५ ज्योतिःदीपादितेजःकांतिःप्रकाशःकीर्त्तिः ४६ नरकरूपंदक्षिणायनमप्यंधंनमएव अतउत्तरायणेरात्रौतमोनाशकंज्योतिर्देयंनरकनिवृ-

निर्यासाःसारिणश्चैवकृत्रिमाश्चैवतेत्रयः इष्टोनिष्टोभवेद्गंधस्तन्मेविस्तरशःशृणु ३९ निर्यासाःसल्लकीवर्ज्यादेवानांदयितास्तुते गुग्गुलुंप्रवरस्तेषांसर्वेषामितिनिश्चयः ४० अगुरुःसारिणांश्रेष्ठोयक्षराक्षसभोगिनाम् दैत्यानांसल्लकीयश्चकांक्षितोयश्चतद्विधः ४१ अथ सर्जरसादीनांगंधैःपार्थिवदारवैः फाणितारससंयुक्तैर्मनुष्याणांविधीयते ४२ देवदानवभूतानांसद्यस्तुष्टिकरःस्मृतः येन्येवैहारिकास्तत्र मानुषाणामितिस्मृताः ४३ यएवोक्ताःसुमनसांप्रदानेगुणहेतवः धूपेष्वपिपरिज्ञेयास्तएवप्रीतिवर्द्धनाः ४४ दीपदानेप्रवक्ष्यामिफलयोगमनुत्तमम् यथायेनयदाचैवप्रदेयायादृशाश्चते ४५ ज्योतिस्तेजःप्रकाशंवाप्यूर्ध्वगंचापिवर्ण्यते प्रदानात्तेजसांतस्मात्तेजोवर्द्धयते-नृणाम् ४६ अंधंतमस्तमिस्रंचदक्षिणायनमेवच उत्तरायणमेतस्माज्ज्योतिर्दानंप्रशस्यते ४७ यस्मादूर्ध्वगमेतत्तुतमसश्चैवभेषजम् तस्मादूर्ध्वगतेर्दाताभवेदत्रेतिनिश्चयः ४८ देवास्तेजस्विनोयस्मात्प्रभावंतःप्रकाशकाः तामसाराक्षसाश्चैवतस्माद्दीपःप्रदीयते ४९ आलोकदानाच्चक्षुष्मान्प्रभायुक्तोभवेन्नरः तान्दत्वानोपहिंसेतनहरेन्नोपनाशयेत् ५० दीपहर्त्ताभवेदंधस्तमोगतिरसुप्रभः दीपप्रदः स्वर्गलोकेदीपमालेवराजते ५१ हविषाप्रथमःकल्पोद्वितीयश्चौषधीरसैः वसामेदोस्थिनिर्यासैर्नकार्यःपुष्टिमिच्छता ५२ गिरिप्रपातेगहनेचैत्यस्थानेचतुष्पथे दीपदानंभवेन्नित्यंयइच्छेद्भूतिमात्मनः ५३ कुलेद्योतोविशुद्धात्माप्रकाशत्वंचगच्छति ज्योतिषांचैवसालोक्यंदीपदातानरःसदा ५४ बलिकर्मसुवक्ष्यामिगुणान्कर्मफलोदयान् देवयक्षोरगनृणांभूतानामथरक्षसाम् ५५ येषांनाग्रभुजोविप्रादेवतातिथिबालकाः राक्षसानेवतान्विद्धिनिर्विशंकानमंगलान् ५६ तस्मादग्रेप्रयच्छेतदेवेभ्यःप्रतिपूजितम् शिरसाप्रयतश्चापिहरेद्बलिमतंद्रितः ५७ गृण्हंतिदेवतानित्यमाशंसंतिसदागृहान् बाह्याश्चागंतवोयेन्येयक्षराक्षसपन्नगाः ५८ इतोदत्तेनजीवंतिदेवताःपितरस्तथा तेप्रीताःप्रीणयंत्येनमायुषायशसाधनैः ५९ बलयःसहपुष्पैस्तुदेवानामुपहारयेत् दधिदुग्धमयाःपुण्याः सुगंधाःप्रियदर्शनाः ६० कार्यारुधिरमांसाढ्याबलयोयक्षरक्षसाम् सुरासवपुरस्कारालाजोल्लापिकभूषिताः ६१

त्यर्थं ४७ ४८ ४९ ५० ५१ हविषाघृ तेनऔषधीरसैःतिलसर्षपादिस्नेहैःवसामेदोस्थीनिप्राण्यवयवास्तेषांनिर्यासाःस्नेहरूपसादयःपृथग्वानिर्यासात् ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० लाजोल्लापिक-भूषिताःनाःउल्लापिकउपरिलेपनंस्त्रीन्नमार्षं ६१

नागानांदयितानित्यंपद्मोत्पलविमिश्रिताः तिलान्गुडसुसंपन्नान्भूतानामुपहारयेत् ६२ अग्रदाताग्रभोगीस्याद्बलवीर्यसमन्वितः तस्मा
दग्रंप्रयच्छेतदेवेभ्यःप्रतिपूजितम् ६३ ज्वलंत्यहरहोवेश्मयाश्चास्यगृहदेवताः ताःपूज्याभूतिकामेनप्रसृताग्रप्रदायिना ६४ इत्येतद-
सुरेंद्रायकाव्यःप्रोवाचभार्गवः सुवर्णायमनुःप्राहसुवर्णोनारदायच ६५ नारदोपिमयिप्राहगुणानेतान्महाद्युते त्वमप्येतद्विदित्वेहस
र्वमाचरपुत्रक ६६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेसुवर्णमनुसंवादोनामाष्टनवतितमोऽध्यायः ९८ युधिष्ठिर
उवाच श्रुतंमेभरतश्रेष्ठपुष्पधूपप्रदायिनाम् फलंबलिविधानेचतद्भूयोवक्तुमर्हसि १ धूपप्रदानस्यफलंप्रदीपस्यतथैवच बल
यश्चकिमर्थंवैक्षिप्यंतेगृहमेधिभिः २ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् नहुषस्यचसंवादमगस्त्यस्यभृगोस्त
था ३ नहुषोहिमहाराजराजर्षिःसुमहातपाः देवराज्यमनुप्राप्तःसुकृतेनेहकर्मणा ४ तत्रापिप्रयतोराजन्नहुषस्त्रिदिवेवसन् मा
नुषीश्चैवदिव्याश्चकुर्वाणोविविधाःक्रियाः ५ मानुष्यस्तत्रसर्वास्तुक्रियास्तस्यमहात्मनः प्रवृत्तास्त्रिदिवेराजन्दिव्याश्चैवसनातनाः
६ अग्निकार्याणिसमिधःकुशाःसुमनसस्तथा बलयश्चान्नलाजाभिर्धूपनंदीपकर्मच ७ सर्वंतस्यगृहेराज्ञःप्रावर्त्ततमहात्मनः
जपयज्ञान्मनोयज्ञांस्त्रिदिवेपिचकारसः ८ देवानभ्यर्चयच्चापिविधिवत्ससुरेश्वरः सर्वानेवयथान्यायंयथापूर्वमरिंदम ९ अथें
द्रोहमितिज्ञात्वाअहंकारसमाविशत् सर्वाश्चैवक्रियास्तस्यपर्यहीयतभूपते १० सऋषीन्वाहयामासवरदानमदान्वितः परिहीनक्रि
यश्चैवदुर्बलत्वमुपेयिवान् ११ तस्यवाहयतःकालोमुनिमुख्यांस्तपोधनान् अहंकाराभिभूतस्यसुमहानभ्यवर्त्तत १२ अथपर्याय
शःसर्वान्वाहनायोपचक्रमे पर्यायश्चाप्यगस्त्यस्यसमपद्यतभारत १३ अथागत्यमहातेजाभृगुर्ब्रह्मविदांवरः अगस्त्यमाश्रमस्थंवै-
समुपेत्येदमब्रवीत् १४ एववयमसत्कारंदेवेंद्रस्यास्यदुर्मतेः नहुषस्यकिमर्थंवैमर्षयाममहामुने १५ अगस्त्यउवाच कथमेषमयाशक्यः
शप्तुंयस्यमहामुने वरदेनवरोदत्तोभवतोविदितश्चसः १६ योमेदृष्टिपथंगच्छेत्समेवश्योभवेदिति इत्यनेनवरंदेवोयाचितोगच्छतादिवं १७
एवंनदग्धःसमयाभवताचनसंशयः अन्येनाप्यृषिमुख्येन नदग्धोनचपातितः १८ अमृतंचैवपानायदत्तमस्मैपुराविभो महात्मनातदर्थंच-
नास्माभिर्विनिपात्यते १९ प्रयच्छतिवरंदेवःप्रजानांदुःखकारणं द्विजेष्वधर्मयुक्तानिसकरोतिनराधमः २० तत्रयत्प्राप्तकालंनस्तद्ब्रूहिवदतां
वर भवांश्चापियथाब्रूयात्तत्कर्त्तास्मिनसंशयः २१ भृगुरु० पितामहनियोगेनभवंतंसोहमागतः प्रतिकर्त्तुंबलवतिनहुषेदैवमोहिते २२

२३ २४ २५ २६ २७ २८ २९ इतिआनुशासनिकेपर्वणिटीकायांनवनवतितमोऽध्यायः ९९ १ २ वत्सकापुत्रादेर्यार्षिकोत्सवाः वत्सपुत्रादि

अद्यहित्वांसुदुर्बुद्धीरथेयोऽस्यतिदेवराट् अद्यैनमहमुद्वृत्तंकरिष्येऽनिंद्रमोजसा २३ अद्येंद्रस्थापयिष्यामिपश्यतस्तेशतक्रतुम् संचाल्य
पापकर्माणमैंद्रात्स्थानात्सुदुर्मतिम् २४ अद्यचासौकुदेवेंद्रस्त्वांपदाऽधर्षयिष्यति दैवोपहतचित्तत्वादात्मनाशायमंदधीः २५ व्युत्क्रांत
धर्मंतमहंधर्षणामर्षितोभृशम् अहिर्भवस्वेतिरुषाशप्स्येपापंद्विजद्रुहम् २६ ततएनंसुदुर्बुद्धिंधिक्शब्दाभिहतत्विषम् धरण्यांपात-
यिष्यामिपश्यतस्तेमहामुने २७ नहुषंपापकर्माणमैश्वर्यबलमोहितम् यथाचरोचतेतुभ्यंतथाकर्तास्म्यहंमुने २८ एवमुक्तस्तुभृगुणा
मैत्रावरुणिरव्ययः अगस्त्यःपरमप्रीतोबभूवविगतज्वरः २९ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेअगस्त्यभृगुसंवादोना
मनवनवतितमोऽध्यायः ९९ युधिष्ठिरउवाच कथंवैसविपन्नश्चकथंवैपातितोभुवि कथंचानिंद्रतांप्राप्तस्तद्भवान्वक्तुमर्हति १ भी
ष्मउवाच एवंतयोःसंवदतोःक्रियास्तस्यमहात्मनः सर्वाएवप्रवर्तंतेयादिव्यायाश्चमानुषीः २ तथैवदीपदानानिसर्वोपकरणानिवै ब
लिकर्मचयच्चान्यदुत्सकाश्चपृथग्विधाः ३ सर्वेतस्यसमुत्पन्नादेवेंद्रस्यमहात्मनः देवलोकेनृलोकेचसदाचारबुधाःस्मृताः ४ तेचेद्भवंति
राजेंद्रऋध्यंतेगृहमेधिनः धूपप्रदानैर्दीपैश्चनमस्कारैस्तथैवच ५ यथासिद्धस्यचान्नस्यअग्रमग्रायप्रदीयते बलयश्चगृहोद्देशेअतःप्रीयंति
दैवताः ६ यथाचगृहिणस्तोषोभवेद्वैबलिकर्मणि तथाशतगुणाप्रीतिर्देवतानांप्रजायते ७ एवंधूपप्रदानंचदीपदानंचसाधवः प्रयच्छंति
नमस्कारैर्युक्तमात्मगुणावहम् ८ स्नानेनाद्भिश्चयत्कर्मक्रियतेवैविपश्चिता नमस्कारप्रयुक्तेनतेनप्रीयंतिदेवताः ९ पितरश्चमहाभागाऋ
षयश्चतपोधनाः गृह्याश्चदेवताःसर्वाःप्रीयंतेविधिनार्चिताः १० इत्येतांबुद्धिमास्थायनहुषःसनरेश्वरः सुरेंद्रत्वंमहत्प्राप्यकृतवानेतदद्भु
तम् ११ कस्यचित्त्वथकालस्यभाग्यक्षयउपस्थिते सर्वमेतदवज्ञायकृतवानिदमीदृशम् १२ ततःसपरिहीणोभूत्सुरेंद्रोबलदर्पतः धू
पदीपोदकविधिंनयथावच्चकारह १३ ततोऽस्ययज्ञविषयोरक्षोभिःपर्यवध्यत अथागस्त्यमृषिश्रेष्ठंवाहनायाजुहावह १४ द्रुतंसरस्व
तीकूलात्स्मयन्निवमहाबलः ततोभृगुर्महातेजामैत्रावरुणिमब्रवीत् १५ निमीलयस्वनयनेजटांयावद्विशामिते स्थाणुभूतस्यतस्या
थजटांप्राविशदच्युतः १६ भृगुःससुमहातेजाःपातनायनृपस्यच ततःसदेवराट्प्राप्तस्तमृषिंवाहनायवै १७ ७. ७. ७.

कौत्सवेइतिमेदिनी ३ ४ ५ ग्रहायअतिशये ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ ७. ७. ७.

१८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२

ततोगस्त्यः सुरपतिंवाक्यमाहविशांपते योजयस्वेतिमांक्षिप्रंकंचदेशंवहामितं १८ यत्रवक्ष्यसितत्रत्वांनयिष्यामिसुराधिप इत्युक्तो
नहुषस्तेनयोजयामासतंमुनिम् १९ भृगुस्तस्यजटान्तस्थोबभूवन्दर्षितोभृशम् नचापिदर्शनंतस्यचकारसभृगुस्तदा २० वरदानप्रभा
वज्ञोनहुषस्यमहात्मनः नचुकोपतदागस्त्योयुक्तोपिनहुषेणवै २१ तंतुराजाप्रतोदेनचोदयामासभारत नचुकोपसधर्मात्माततःपादेनदे
वराट् २२ अगस्त्यस्यतदाक्रुद्धोवामेनाभ्यहनच्छिरः तस्मिन्छिरस्यभिहतेसजटान्तर्गतोभृगुः २३ शशापबलवत्क्रुद्धोनहुषंपापचेतस
म् यस्मात्पदाहतःक्रोधाच्छिरसीमंमहामुनिम् तस्मादाशुमहींगच्छसर्पोभूत्वासुदुर्मते इत्युक्तःसतदातेनसर्पोभूत्वापपातह २५ अदृष्टे
नाथभृगुणाभूतलेभरतर्षभ भृगुंहियदिसोद्रक्ष्यन्नहुषःपृथिवीपते २६ नसशक्तोभविष्यद्वैपातनेतस्यतेजसा सतुतैस्तैःप्रदानैश्चत
पोभिर्नियमैस्तथा २७ पतितोपिमहाराजभूतलेस्मृतिमानभूत् प्रसादयामासभृगुंशापान्तोमेभवेदिति २८ ततोगस्त्यःकृपाविष्टःप्रसाद
यततंभृगुम् शापान्तार्थंमहाराजसचप्रादात्कृपान्वितः २९ भृगुरुवाच राजायुधिष्ठिरोनामभविष्यतिकुलोद्वहः सत्वांमोक्षयिता
शापादित्युक्त्वान्तरधीयत ३० अगस्त्योपिमहातेजाःकृत्वाकार्यंशतक्रतोः स्वमाश्रमपदंप्रायात्पूज्यमानोद्विजातिभिः ३१ नहुषोपित्वया
राजंस्तस्माच्छापात्समुद्धृतः जगामब्रह्मभवनंपश्यतस्तेजनाधिप ३२ तदासपातयित्वातंनहुषंभूतलेभृगुः जगामब्रह्मभवनंब्रह्मणेचन्य
वेदयत् ३३ ततःशक्रंसमानाय्यदेवानाहपितामहः वरदानान्ममसुरानहुषोराज्यमाप्तवान् ३४ सचागस्त्येनक्रुद्धेनभ्रंशितोभूतलंग
तः नचशक्यंविनाराज्ञासुरावर्तयितुंक्वचित ३५ तस्मादयंपुनःशक्रोदेवराज्येभिषिच्यताम् एवंसंभाषमाणंतुदेवाःपार्थपितामहम् ३६
एवमस्त्वितिसंहृष्टाःप्रत्यूचुस्तंनराधिप सोभिषिक्तोभगवताद्देवराज्यंचवासवः ३७ ब्रह्मणाराजशार्दूलयथापूर्वंव्यरोचत एवमेतत्पुरावृत्तंन
हुषस्यव्यतिक्रमात् ३८ सचतैरेवसंसिद्धोनहुषःकर्मभिःपुनः तस्माद्दीपाःप्रदातव्याःसायंवैगृहमेधिभिः ३९ दिव्यंचक्षुरवाप्नोतिप्रेत्यदीप
स्यदायकः पूर्णचंद्रप्रतीकाशादीपदाश्चभवन्त्युत ४० यावदक्षिनिमेषाणिज्वलंतेतावतीःसमाः रूपवान्बलवांश्चापिनरोभवतिदीपदः ४१ इ
तिश्रीमहाभारतेआनुशा०अगस्त्यभृगुसंवादोनामशततमोऽध्यायः १०० युधिष्ठिरउवाच ब्राह्मणस्वानियेमंदाहरंतिभरतर्षभ नृशंसकारि
णोमूढाःक्वतेगच्छंतिमानवाः १

३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ इतिआनुशासनिकेपर्वणिदानधर्मेदीपाख्यानशततमोऽध्यायः१०० रजःसेवीरेणुगुंठितः १

२ ३ गोरजसागोपरागेण यथापुष्पस्यपरागोरजःकणस्तदंदोल्नेपरितःप्रसर्पति एवंप्रचलन्त्याधेनोरूधसःसकाशात्प्रसरंत्यःक्षीरविप्रुषोत्रपरागःपर्यायेणरज
पदेनोच्यंते तथाचमेदिनी रजःक्लीबंगुणांतरे आर्तवेचपरागेचरेणुमात्रेचदृश्यतेइति ध्वस्तंव्याप्तंशरीरमितिशेषः विप्रुषमात्रेणापिब्रह्मस्वेनदेहस्विंधत्वंमाभूदितिभा
वः ४ ह्रियतीनांगोग्रहकेनचिद्राज्ञाह्रियमाणानांरजःक्षीरमार्गस्थवर्त्तीरूपंसोममुद्ध्वंसयामासनाशितवान ५ ६ तत्रगोहर्तृणांपुरे ७ ताःगावःविधुन्वतीःस्वस्वा

भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् चांडालस्यचसंवादंक्षत्रबंधोश्चभारत २ राजन्यउवाच वृद्धरूपोसिचांडालबा
लवच्चविचेष्टसे श्वखराणांरजःसेवी कस्मादुद्विजसेगवाम् ३ साधुभिर्गर्हितंकर्मचांडालस्यविधीयते कस्माद्गोरजसाध्वस्तमपांकुंडेनिषिंच-
सि ४ चांडालउवाच ब्राह्मणस्यगवांराजन्ह्रियतीनांरजःपुरा सोममुद्ध्वंसयामासतंसोमंयेपिबन्द्विजाः ५ दीक्षितश्चसराजापिक्षिप्रं
नरकमाविशत् सहतैर्याजकैःसर्वैर्ब्रह्मस्वमुपजीव्यतत् ६ येपितत्रापिबन्क्षीरंघृतंदधिचमानवाः ब्राह्मणाःसहराजन्याःसर्वेनरकमाविशन् ७
जघ्नुस्ताःपयसापुत्रांस्तथापौत्रान्विधुन्वतीः पशूनवेक्षमाणाश्चसाधुवृत्तेनदंपती ८ अहंतत्रावसंराजन्ब्रह्मचारीजितेंद्रियः तासांमेरजसा
ध्वस्तंभैक्षमासीन्नराधिप ९ चांडालोहंततोराजन्भुक्त्वातदभवंनृप ब्रह्मस्वहारीचनृपःसोप्रतिष्ठांगतिंययौ १० तस्माद्धरेन्नविप्रस्वंक
दाचिदपिकिंचन ब्रह्मस्वरजसाध्वस्तंभक्ष्यंमामपश्ययादृशम् ११ तस्मात्सोमोप्यविक्रेयःपुरुषेणविपश्चिता विक्रयंत्विहसोमस्यगर्हयं
तिमनीषिणः १२ येचैनंक्रीणतेतातयेचविक्रीणतेजनाः तेतुवैवस्वतंप्राप्यरौरवंयांतिसर्वशः १३ सोमंतुरजसाध्वस्तंविक्रीणन्विधिपू
र्वकम् श्रोत्रियोवार्धुषीभूत्वानचिरंसविनश्यति १४ नरकंत्रिंशतंप्राप्यस्वविष्ठामुपजीवति श्वचर्यामभिमानंचसखिदारेचविप्लवम् १५
तुलयाधारयन्धर्ममभिमानोतिरिच्यते श्वानंवैपापिनंपश्यविवर्णंहरिणंकृशम् १६ अभिमानेनभूतानामिमांगतिमुपागतम् अहं
वैविपुलेतात कुलेधनसमन्विते १७ अन्यस्मिन्जन्मनिविभोज्ञानविज्ञानपारगः अभवंतत्रजानानोह्येतान्दोषान्मदात्तदा १८ संरब्ध
एवंभूतानांपृष्ठमांसमभक्षयम् सोहंतेनचवृत्तेनभोजनेनचतेनवै १९

मिवत्स्यियोगान्र्याशर्गरिक्षयंत्य परैः पीतेनतत्पयसातेषांपुत्रपौत्रानदंशतीन्
वांचाजघ्नुसद्योत्याप्युषश्चकुः ८ तत्रदेशेकालेच ९ १० ११ प्रसंगात्सोमविक्रयंनिंदति तस्मादिति १२ एनंब्रह्मस्वरूपं १३ चिरंनचिनश्यतीतिन अपितुचिरंनरकवा
सात्नश्यत्येव १४ श्वचर्याश्वसेवाश्वचर्यादिचयंतुलयाधारयनतुल्यमन्यानोभिमानोधर्मंअतिक्रम्यातिरिच्यातिरिक्तोभवति अत्यभिमानीदृष्टस्तापापोपेक्षया-
अत्यंतपापीत्यर्थः १५ १६ १७ १८ एवंकृपितएव १९

भ्रमरैस्तीक्ष्णतुंडैरर्द्यमानमिवबेलांतरव दूह्यमानमिवक्लिश्यंतंमांपश्य २० २१ २२ २३ २४ २५ २६ २७ २८ रक्ष्यमेवनतुभक्ष्यं २९ इतिआनुशास

इमामवस्थांसंप्राप्तःपश्यकालस्यपर्ययम् आदीप्तमिवचैलांतंभ्रमरैरिवचार्दितम् २० धावमानंसुसंरब्धंपश्यमांरजसान्वितम् स्वाध्यायै
स्तुमहत्पापंहरंतिगृहमेधिनः २१ दानैःपृथग्विधैश्चापियथाप्राहुर्मनीषिणः तथापापकृतंविप्रमाश्रमस्थंमहीयते २२ सर्वसंगविनिर्मुक्त
छंदांस्युत्तारयंत्युत अहंहिपापयोन्यांवैप्रसूतःक्षत्रियर्षभ निश्चयंनाधिगच्छामिकथंमुच्येयमित्युत २३ जातिस्मरत्वंचममकेनचित्पूर्वक
र्मणा शुभेनयेनमोक्षंवैप्राप्तुमिच्छाम्यहंनृप २४ त्वमिमंसंप्रपन्नायसंशयंब्रूहिपृच्छते चांडालत्वात्कथमहंमुच्येयमितिसत्तम २५ रा
जन्यउवाच । चांडालप्रतिजानीहियेनमोक्षमवाप्स्यसि ब्राह्मणार्थेत्यजन्प्राणान्गतिमिष्टामवाप्स्यसि २६ दत्त्वाशरीरंक्रव्याद्भ्योरणाग्नौद्विज
हेतुकम् हुत्वाप्राणान्प्रमोक्षस्तेनान्यथामोक्षमर्हसि २७ भीष्मउवाच इत्युक्तःसतदातेनब्रह्मस्वार्थेपरंतप हुत्वारणमुखेप्राणान्गतिमि
ष्टामवापह २८ तस्माद्रक्ष्यंत्वयापुत्रब्रह्मस्वंभरतर्षभ यदीच्छसिमहाबाहोशाश्वतींगतिमात्मनः २९ इतिश्रीदानधर्मेराजन्यचांडाल
संवादोनामैकोत्तरशततमोऽध्यायः १०१ युधिष्ठिरउवाच एकेलोकाःसुकृतिनःसर्वेत्वाहोपितामह तत्रतत्रापिभिन्नास्तेतन्मेब्रूहिपिताम
ह १ भीष्मउ० कर्मभिःपार्थनानात्वंलोकानांयांतिमानवाः पुण्यान्पुण्यकृतोयांतिपापान्पापकृतोनराः २ अत्राप्युदाहरंतीममितिहासंपु
रातनम् गौतमस्यमुनेस्तातसंवादंवासवस्यच ३ ब्राह्मणोगौतमःकश्चिन्मृदुर्दांतोजितेंद्रियः महावनेहस्तिशिशुंपरिद्यूनममातृकम् ४
तंदृष्ट्वाजीवयामाससानुक्रोशोधृतव्रतः सतुदीर्घेणकालेनबभूवातिबलोमहान् ५ तंप्रभिन्नंमहानागंप्रस्रुतंपर्वतोपमम् धृतराष्ट्रस्य
रूपेणशक्रोजग्राहहस्तिनम् ६ ह्रियमाणंतुतंदृष्ट्वागौतमःसंशितव्रतः अभ्यभाषतराजानंधृतराष्ट्रंमहातपाः ७ मामेहार्षीर्हस्तिनंपुत्र
मेनंदुःखात्पुष्टंधृतराष्ट्राकृतज्ञ मैत्रंसतांसप्तपदंवदंतिमित्रद्रोहोमैवराजन्स्पृशेत्त्वाम् ८ इध्मोदकप्रदातारंशून्यपालंममाश्रमे विनीत
माचार्यकुलेसुयुक्तंगुरुकर्मणि ९ शिष्टंदांतंकृतज्ञंचप्रियंचसततंमम नमेविक्रोशतोराजन्हर्तुमर्हसिकुंजरम् १० धृतराष्ट्रउ०
गवांसहस्रंभवतेददामिदासीशतंनिष्कशतानिपंच अन्यच्चवित्तंविविधंमहर्षेकिंब्राह्मणस्येहगजेनकृत्यम् ११ गौतमउवाच तवैवगा
वोहिभवंतुराजन्दास्यःसनिष्काविविधंचरत्नं अन्यच्चवित्तंविविधंनरेंद्रकिंब्राह्मणस्येहधनेनकृत्यम् १२

नीलकं० टी० एकोत्तरशततमोऽध्यायः १०१ एकेतिविद्याभ्यासश्रद्धा
दितारतम्यात्कर्मफलतारतम्यमस्तिउतनेतिप्रश्नार्थः १ कर्मभिरितिपुण्यपापयोरिवपुण्यानामवांतरभेदोस्तीत्यर्थः २ ३ ४ ५ ६ ७ ८ ९ १० ११ ब्राह्मणस्यब्राह्म

१३ १४ १५ यातयिष्येहस्तिनंस्वीयफलंत्वत्तोगृहीष्येइत्यर्थः १६ १७ १८ १९ २० २१ २२ २३ २४ आग्नियोनाधृष्टद्युम्नवदग्निरेव

धृतराष्ट्रउवाच ब्राह्मणानांहस्तिभिर्नास्तिकृत्यंराजन्यानांनागकुलानिविप्र स्ववाहनंनयतोनास्त्यधर्मोनागश्रेष्ठंगौतमास्मान्निवर्त्त
१३ गौतमउवाच यत्रप्रेतोनंदतिपुण्यकर्मायत्रप्रेतःशोचतेपापकर्मा वैवस्वतस्यसदनेमहात्मंस्तत्रत्वाहंहस्तिनंयातयिष्ये १४
धृतराष्ट्रउवाच येनिष्क्रियानास्तिकाःश्रद्दधानापापात्मानोइंद्रियार्थेनिविष्टाः यमस्यतेयातनांप्राप्नुवंतिपरंगंताधृतराष्ट्रोनतत्र १५
गौतमउवाच वैवस्वतीसंयमनीजनानांयत्रानृतंनोच्यतेयत्रसत्यम् यत्राबलाबलिनंयातयंतितत्रत्वाहंहस्तिनंयातयिष्ये १६
धृतराष्ट्रउवाच ज्येष्ठांस्वसारंपितरंमातरंचयथाशत्रुंमदमत्ताश्चरंति तथाविधानामेषलोकोमहर्षेपरंगंताधृतराष्ट्रोनतत्र १७
गौतमउवाच मंदाकिनीवैश्रवणस्यराज्ञोमहाभागाभोगिजनप्रवेश्या गंधर्वयक्षैरप्सरोभिश्चजुष्टातत्रत्वाहंहस्तिनंयातयिष्ये
१८ धृतराष्ट्रउवाच अतिथिव्रताःसुव्रतायेजनावैप्रतिश्रयंददतिब्राह्मणेभ्यः शिष्टाशिनःसंविभज्याश्रितांश्चमंदाकिनींतेपिविभू
षयंति १९ गौतमउवाच मेरोरग्रेयद्वनंभातिरम्यंसुपुष्पितंकिन्नरीगीतजुष्टम् सुदर्शनायत्रजंबूर्विशालातत्रत्वाहंहस्तिनंयात
यिष्ये २० धृतराष्ट्रउवाच येब्राह्मणामृदवःसत्यशीलाबहुश्रुताःसर्वभूताभिरामाः येधीयंतेसेतिहासंपुराणंमध्वाहुत्याजुह्वति
वैद्विजेभ्यः २१ तथाविधानामेषलोकोमहर्षेपरंगंताधृतराष्ट्रोनतत्र यद्विद्यतेविदितंस्थानमस्तितद्ब्रूहित्वंत्वरितोह्येषयामि २२
गौतमउवाच सुपुष्पितंकिंनरराजजुष्टंप्रियंवनंनंदनंनारदस्य गंधर्वाणामप्सरसांचशश्वत्तत्रत्वाहंहस्तिनंयातयिष्ये २३ धृत
राष्ट्रउवाच येनृत्यगीतकुशलाजनाःसदाह्ययाचमानाःसहिताश्चरंति तथाविधानामेषलोकोमहर्षेपरंगंताधृतराष्ट्रोनतत्र २४
गौतमउवाच यत्रोत्तराःकुरवोभांतिरम्यादेवैःसार्धंमोदमानानरेंद्र यत्राग्नियोनाश्चवसंतिलोकाअन्योनयःपर्वतयोनयश्च २५
यत्रशक्रोवर्षतिसर्वकामान्यत्रस्त्रियःकामचाराभवंति यत्रचेर्ष्यानास्तिनारीनराणांतत्रत्वाहंहस्तिनंयातयिष्ये २६ धृतराष्ट्रउवाच
येसर्वभूतेषुनिवृत्तकामाअमांसादान्यस्तदंडाश्चरंति नहिंसंतिस्थावरंजंगमंचभूतानांयेसर्वभूतात्मभूताः २७ निराशिषोनिर्ममावीत
रागालाभालाभेतुल्यनिंदाप्रशंसाः तथाविधानामेषलोकोमहर्षेपरंगंताधृतराष्ट्रोनतत्र २८ गौतमउवाच ततोपरेभांति-
लोकाःसनातनाःसुपुण्यगंधाविरजावीतशोकाः सोमस्यराज्ञःसदनेमहात्मंस्तत्रत्वाहंहस्तिनंयातयिष्ये २९ ५॥

योनियेषांते २५ २६ २७ २८ २९ [illegible]

३० क्षंतारः क्षमिणः सत्रीभूतानामाच्छादनवद्रक्षकाः ३१ ३२ ३३ ३४ ३५ ३६ धर्मएवस्करःक्षरः तत्रसुष्टुआकाशंधारयंतितेस्कः धारिण-

धृतराष्ट्रउवाच येदानशीलानप्रतिगृण्हतेसदानचाप्यर्थांश्चाददतेपरेभ्यः येषामदेयमर्हतेनास्तिकिंचित्सर्वातिथ्याःसुप्रसादाजनाश्च ३० येक्षंतारोनाभिजल्पंतिचान्यान्सत्रीभूताःसततंपुण्यशीलाः तथाविधानामेषलोकोमहर्षेपरंगताधृतराष्ट्रेनतत्र ३१
गौतमउवाच ततोपरेभांतिलोकाःसनातनाविरजसोविनमस्क्विशोकाः आदित्यदेवस्यपदंमहात्मनस्तत्रत्वाहंहस्तिनंयातयिष्ये ३२ धृतराष्ट्रउवाच स्वाध्यायशीलागुरुशुश्रूषणेरतास्तपस्विनःसुव्रताःसत्यसंधाः आचार्याणामप्रतिकूलभाषिणोनित्योत्थितागुरुकर्मस्वचोद्याः ३३ तथाविधानामेषलोकोमहर्षेविशुद्धानाभावितोवाग्यतानाम् सत्येस्थितानांवेदविदांमहात्मनापरंगताधृतराष्ट्रेनतत्र ३४ गौतमउवाच ततोपरेभांतिलोकाःसनातनाःसुपुण्यगंधाविरजाविशोकाः वरुणस्यराज्ञःसदनेमहात्मनस्तत्रत्वाहंहस्तिनंयातयिष्ये ३५ धृतराष्ट्रउवाच चातुर्मास्यैर्येयजंतेजनाःसदातथेष्टीनांदशशतंप्राप्नुवंति येचाग्निहोत्रंजुह्वतिश्रद्दधानायथाम्नायंत्रीणिवर्षाणिविप्राः ३६ सुधारिणांधर्मधुरेमहात्मनांयथोदितेवर्त्मनिसुस्थितानाम् धर्मात्मनांसुदृढव्रतागतिंतापरंगताधृतराष्ट्रेनतत्र ३७ गौतमउवाच इंद्रस्यलोकाविरजाविशोकादुरत्ययाकांक्षितामानवानाम् तस्याहंतेभवनेभूरितेजसोराजन्निमंहस्तिनंयातयिष्ये ३८ धृतराष्ट्रउवाच शतवर्षजीवीयश्चशूरोमनुष्योवेदाध्यायीयश्चयज्वाऽप्रमत्तः एतेसर्वेशक्रलोकंव्रजंतिपरंगताधृतराष्ट्रेनतत्र ३९ गौतमउवाच प्राजापत्याःसंतिलोकामहांतोनाकस्यपृष्ठेपुष्कलावीतशोकाः मनीषिताःसर्वलोकोद्भवानांतत्रत्वाहंहस्तिनंयातयिष्ये ४० धृतराष्ट्रउवाच येराजानोराजसूयाभिषिक्ताधर्मात्मानोरक्षितारःप्रजानाम् येचाश्वमेधावभृथेप्लुतांगास्तेषांलोकाधृतराष्ट्रेनतत्र ४१ गौतमउवाच ततःपरंभांतिलोकाःसनातनाःसुपुण्यगंधाविरजावीतशोकाः तस्मिन्नहंदुर्लभेचाप्यधृष्येगवांलोकेहस्तिनंयातयिष्ये ४२ धृतराष्ट्रउवाच योगोसहस्रीशतदःसमासमागवांशतीदशदद्याच्चशक्त्या तथादशभ्योयश्चदद्यादिहैकांपंचभ्योवादानशीलस्तथैकाम् ४३ येजीर्यंतेब्रह्मचर्येणविप्राब्राह्मींवाचंपरिरक्षंतिचैव मनस्विनस्तीर्थयात्रापरायणास्तेतत्रमोदंतिगवांनिवासे ४४ प्रभासंमानसंतीर्थंपुष्कराणिमहत्सरः पुण्यंचनैमिषंतीर्थंबाहुदांकरतोयिनीम् ४५ गंगांगयाशिरश्चैवविपाशांस्थूलवालुकाम् कृष्णांगंगांपंचनदंमहाह्रदमथापिच ४६

स्तेषां धर्मधुरेइत्यपिपाठः ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५०

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ब्रह्मसत्रब्रह्मलोकेनुगतस्यापिन
जीर्यतइत्यध्यायतात्पर्यम् ६२ ६३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायां द्व्यधिकशततमोऽध्यायः १०२ अहिंसितंअहिंसा १ तपसःकृ-

गोमतींकौशिकींपंपांमहात्मानोधृतव्रताः सरस्वतीदृषद्वत्यौयमुनांयेतुयांतिच ४७ तत्रतेदिव्यसंस्थानादिव्यमाल्यधराःशिवाः प्रयां
तिपुण्यगंधाढ्याधृतराष्ट्रोनतत्रवै ४८ गौतमउवाच तत्रशीतभयंनास्तिनचोष्णभयमप्यपि नक्षुत्पिपासेनग्लानिर्नदुःखं-
नसुखंतथा ४९ नद्वेष्योनप्रियःकश्चिन्नबंधुर्नरिपुस्तथा नजरामरणेतत्रनपुण्यंनचपातकम् ५० तस्मिन्विरजसिस्फीतेप्रज्ञास
त्त्वव्यवस्थिते स्वयंभुभवनेपुण्येहस्तिनंमेप्रदास्यसि ५१ धृतराष्ट्रउवाच निर्मुक्ताःसर्वसंगैर्येकृतात्मानोयतव्रताः अध्या-
त्मयोगसंस्थानैर्मुक्ताःस्वर्गगतिंगताः ५२ तेब्रह्मभुवनंपुण्यंप्राप्नुवंतीहसात्त्विकाः नतत्रधृतराष्ट्रस्तेशक्योद्रष्टुंमहामुने ५३
गौतमउवाच रथंतरंयत्रबृहच्चगीयतेयत्रवेदीपुंडरीकैःस्तृणोति यत्रोपयातिहरिभिःसोमपीथीतत्रत्वाहंहस्तिनंयातयिष्ये ५४ बु
ध्यामित्वांवृत्रहणंशतक्रतुंव्यतिक्रमंतंभुवनानिविश्वा कच्चिन्नवाचावृजिनंकदाचिदकार्षंतेमनसोभिषंगात् ५५ शतक्रतुरुवाच
मघवाहंलोकपथंप्रजानामन्वागमंपरिवादेगजस्य तस्माद्भवान्प्रणतंमानुशास्तुब्रवीषियत्तत्करवाणिसर्वम् ५६ गौतमउवाच
श्वेतंकरेणुंममपुत्रंहिनागंयंमेहार्षीर्दशवर्षाणिबालम् योमेवनेवसतोभूद्द्वितीयस्तमेवमेदेहिसुरेंद्रनागम् ५७ शतक्रतुरुवाच
अयंसुतस्तेद्विजमुख्यनागआगच्छतित्वामभिवीक्ष्यमाणः पादौचतेनासिकयोपजिघ्रतेश्रेयोममाध्याहिनमःस्तुतेस्तु ५८ गौतमउवा
च शिवंसदैवेहसुरेंद्रतुभ्यंध्यायामिपूजांचसदाप्रयुंजे ममापित्वंशक्रशिवंददस्वत्वयादत्तंप्रतिगृह्णामिनागम् ५९ शतक्रतुरु
वाच येषांवेदानिहितावैगुहायांमनीषिणांसत्यवतांमहात्मनाम् तेषांत्वयैकेनमहात्मनास्मिबुद्धस्तस्मात्प्रीतिमांस्तेहमद्य ६० ह
न्तेहिब्राह्मणक्षिप्रंसहपुत्रेणहस्तिना त्वंहिप्राप्तुंशुभान्लोकानह्नायचचिरायच ६१ सगौतमंपुरस्कृत्यसहपुत्रेणहस्तिना दिवमाच-
क्रमेवज्रीसद्भिःसहदुरासदम् ६२ इमंयःशृणुयान्नित्यंयःपठेद्वाजितेंद्रियः सयातिब्रह्मणोलोकंब्राह्मणोगौतमोयथा ६३ इति
श्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेहस्तिकूटोनाम द्व्यधिकशततमोऽध्यायः १०२ युधिष्ठिरउवाच दानंबहुविधाकारंशा
तिःसत्यमहिंसितम् स्वदारतुष्टिश्चोक्तातेफलंदानस्यचैवयत् १ पितामहस्यविदितंकिमन्यत्तपसोबलात् तपसोयत्परंतेद्यतन्मेव्या
ख्यातुमर्हसि २

च्छ्रचांद्रायणादेर्बलादन्यत्किंबलवत्तरंश्रेष्ठं नकिमपि अपितुतपस्तपसामर्थ्यंयत्परं २ ७ ७ ७ ७

लोकोभोग्यप्रदेशः ३ ४ ५ ६ ७ ८ एकरात्रादयःक्रतुविशेषाः ९ नारीपुरंकन्यासहस्रमदां १० ११ १२ १३ १४ चंद्रोभूषणविशेषः न

भीष्मउवाच तपःप्रचक्षतेयावत्तावल्लोकोयुधिष्ठिर मतंममात्रकौंतेयतपोनानशनात्परम् ३ अत्राप्युदाहरंतीममितिहासंपुरातनम्
भगीरथस्यसंवादंब्रह्मणश्चमहात्मनः ४ अतीत्यसुरलोकंचगवांलोकंचभारत ऋषिलोकंचसोगच्छत्भगीरथइतिश्रुतम् ५ तंतु
दृष्ट्वावचःप्राहब्रह्माराजन्भगीरथम् कथंभगीरथाऽगास्त्वमिमंलोकंदुरासदम् ६ नहिदेवानगंधर्वानमनुष्याभगीरथ आयांत्यतप्त
तपसःकथंवैत्वमिहागतः ७ भगीरथउवाच निष्काणांवैत्वददंब्राह्मणेभ्यःशतंसहस्राणिसदैवदानम् ब्राह्मंव्रतंनित्यमास्थायवि
द्धन्नत्वेवाहंतस्यफलादिहागाम् ८ दशैकरात्रान्दशपंचरात्रानेकादशैकादशकान्क्रतूंश्च ज्योतिष्टोमानांचशतंयदिष्टंफलेनतेनापि
चनागतोहं ९ यच्चावसंजान्हवीतीरनित्यःशतंसमास्तप्यमानस्तपोहम् अदांचतत्राश्वतरीसहस्रंनारीपुरंनचतेनाहमागाम् १०
दशायुतानिचाश्वानांगोयुतानिचविंशतिम् पुष्करेषुद्विजातिभ्यःप्रादांशतसहस्रशः ११ सुवर्णचंद्रोत्तमधारिणीनांकन्योत्तमानामद
दंसहस्रम् षष्टिंसहस्राणिविभूषितानांजांबूनदैराभरणैर्नतेन १२ दशार्बुदान्यददंगोसवेज्यास्वेकैकशोदशगालोकनाथ समा
नवत्साःपयसासमन्विताःसुवर्णकांस्योपदुहानतेन १३ आप्तोर्यामेषुनियतमेकैकस्मिन्दशाददम् गृष्टीनांक्षीरदात्रीणांरोहिणीनां
शतानिच १४ दोग्ध्रीणांवैगवांचापिप्रयुतानिदशैवह प्रादांदशगुणंब्रह्मन्नतेनाहमिहागतः १५ वाजिनांवाल्हिजातानामयुतान्यद
ददश कर्कानांहेममालीनांनचतेनाहमागतः १६ कोटीश्चकांचनस्याष्टौप्रदांब्रह्मन्दशान्वहम् एकैकस्मिन्क्रतौतेनफलेनाहंन
चागतः १७ वाजिनांश्यामकर्णानांहरितानांपितामह प्रादांहेमस्रजांब्रह्मन्कोटीर्दशचसप्तच १८ ईषादंतान्महाकायान्कांचन-
स्रग्विभूषितान् पद्मिनोवैसहस्राणिप्रादांदशचसप्तच १९ अलंकृतानांदेवेशदिव्यैःकनकभूषणैः रथानांकांचनांगानांस-
हस्राण्यददंदश २० सप्तचान्यानियुक्तानिवाजिभिःसमलंकृतैः दक्षिणावयवाःकेचिद्वेदेयेसंप्रकीर्तिताः २१ वाजपेये
षुदशसुप्रादांतान्यपिचाप्यहम् शक्रतुल्यप्रभावाणामिज्ययाविक्रमेणह २२ सहस्रंनिष्ककंठानामददंदक्षिणामहम्
विजित्यभूपतीन्सर्वान्नर्थैरिष्ट्वापितामह २३

नेनाहमागांइत्यनुवर्त्तते १५ कर्कःकर्कोटकेवन्हौशुक्लाश्वेदर्पणेघटेइतिमेदिनी कर्काणांशुक्लाश्वानां १६ १७ १८ पद्मिनःपद्मचिन्हान् १९
२० २१ २२ दक्षिणा नान्दक्षिणारूपेणअददंउत्सृष्टवान् २३ ६७ ६७ ६७ ६७ ६७ ६७ ६७ ६७

२४ २५ २६ २७ २८ शम्यां पृथुबुध्नः काष्ठदंडः सबलेनाक्षिप्तो यावद्दूरं पतति तावद्देशो यस्यां वेदिकायां भवति स शम्याक्षेपो यागः तथा सद्यस्कादयो या-
गविशेषाः २९ ३० ३१ ३२ ३३ काञ्चनमयानां वृक्षाणां आवृतानां नानावर्णरत्नैः खचितानां वनमित्यर्थः ३४ ३५ ३६ अग्नीन् अग्निचयनानि ३७ ३८ ३९ गुहा

अथ ज्योतिरात्रसूर्येभ्यो न च तेनाहमागतः । स्रोतस्यथावद्गंगायाश्छन्नमासीज्जगत्पते २४ दक्षिणाभिः प्रवृत्ताभिर्मम नागांश्च तत्कृते । वा-
जिनां च सहस्रे द्वे स्वर्णशतभूषिते २५ वरग्रामशतं चाहमेकैकस्याभिधाददम् । तपस्वी नियताहारः शममास्थाय वाग्यतः २६ दीर्घका-
लं हिमवति गंगायाश्च दुरुत्सहाम् । मूर्ध्ना धारां महादेवः शिरसा यामधारयत् २७ न तेनाप्यहमागच्छं फलेनेह पितामह २८ शम्याक्षेपै-
रयजं यच्च देवान्सद्यस्कानामयुतैश्चापि यत्तत् । त्रयोदशद्वादशाहैश्च देव सपौंडरीकान्न च तेषां फलेन २९ अष्टौ सहस्राणि ककुद्मिनामहं शु-
क्लर्षभाणामददं द्विजेभ्यः । एकैकं वै काञ्चनं शृंगमेभ्यः पत्नीश्चैषामददं निष्ककंठीः ३० हिरण्यरत्ननिचयानददं रत्नपर्वतान् । धनधान्यैः स-
मृद्धांश्च ग्रामाञ्छतसहस्रशः ३१ शतशतानां गृष्टीनाममदं चाप्यतंद्रितः । इष्ट्वानेकैर्महायज्ञैर्ब्राह्मणेभ्यो न तेन च ३२ एकादशाहैरयजं स-
दक्षिणैर्द्विर्द्वादशाहैरश्वमेधैश्च देव । आर्कायणैः षोडशभिश्च ब्रह्मंस्तेषां फलेनेह न चागतोऽस्मि ३३ निष्ककंठमददं योजनायतं तद्विस्ती-
र्णं काञ्चनपादपानाम् । वनं वृतानां रत्नविभूषितानां न चैव तेषामागतोऽहं फलेन ३४ तुरायणं हि व्रतमप्रधृष्यमक्रोधनोऽकरवं त्रिंशतोऽब्दान् । श-
तेन गवामष्टशतानि चैव दिने दिने ह्यददं ब्राह्मणेभ्यः ३५ पयस्विनीनामथ रोहिणीनां तथैवान्याननडुहांल्लोकनाथ । प्रादां नित्यं ब्राह्मणेभ्यः सु-
रेश नेहागतस्तेन फलेन चाहम् ३६ त्रिंशदग्नीनहं ब्रह्मन्नयजं यच्च नित्यदा । अष्टाभिः सर्वमेधैश्च नरमेधैश्च सप्तभिः ३७ दशभिर्विश्वजि-
द्भिश्च शतैरष्टादशोत्तरैः । न चैव तेषां देवेश फलेनाहमिहागमम् ३८ सरय्वां बाहुदायां च गंगायामथ नैमिषे । गवां शतानामयुतमददं न च
तेन वै ३९ इंद्रेण गुह्यं निहितं वै गुहायां यद्भार्गवस्तपसेहाभ्यविंदत् । जाज्वल्यमानमुशनास्तेजसेह तत्साधयामास महद्वरेण्य ४० ततो मे
ब्राह्मणास्तुष्टास्तस्मिन्कर्मणि साधिते । सहस्रमृषयश्चासन्सर्वे वै तत्र संगताः ४१ उक्तस्तैरस्मि गच्छ त्वं ब्रह्मलोकमिति प्रभो । प्रीतेनोक्तः स-
हस्रेण ब्राह्मणानामहं प्रभो ४२ इमं लोकमनुप्राप्तो माभूत्तत्र विचारणा ४३ कामं यथावद्विहितं विधात्रा पृष्टेन वाच्यं तु मया यथावत् । त-
पो हि नान्यच्चानशनान्मतं मे नमोऽस्तु ते देववर प्रसीद ४४

यन्निहितं गोपितं गुह्यं सदनशनं तपसा अभ्यविंदत् आज्ञासीत् उशनास्तेजसा शुक्रस्य व-
चनेन जाज्वल्यमानं च वाक्यशेषात्सर्वभोगत्यागात्मकम् अनशनं सर्वभोगैर्ब्राह्मणानां संतर्पणं च साधयामासेत्यर्थः ४० ४१ ४२ ४३ ४४ ७

४५ ४६ ४७ ४८ इति आनुशासनिकेपर्वणि दानधर्मे टीकायां त्र्यधिकशततमोऽध्यायः १०३ १ २ ३ ४ वर्तयन् अनुतिष्ठन् ५ ६ ७ अलक्षणं-

भीष्मउवाच इत्युक्तवंतंब्रह्माणंराजानंसभगीरथम् पूजयामासपूजार्हंविधिदृष्टेनकर्मणा ४५ तस्मात्त्वमनशनैर्युक्तोविप्रान्पूजय
नित्यदा विप्राणांवचनात्सर्वंपरत्रेहचसिध्यति ४६ वासोभिरन्नैर्गोभिश्चशुभैर्नैवेशिकैरपि शुभैःसुरगणैश्चापितोष्याएवद्विजास्तथा
४७ एतदेवपरंगुह्यमलोभेनसमाचर ४८ इतिश्रीमहाभारते आनुशासनिकेपर्वणिदानधर्मेब्रह्मभगीरथसंवादेत्र्यधिकशततमो
ऽध्यायः १०३ युधिष्ठिरउवाच शतायुरुक्तःपुरुषःशतवीर्यश्चजायते कस्मान्म्रियंतेपुरुषाबालाअपिपितामह १ आयुष्मान्के-
नभवति अल्पायुर्वापिमानवः केनवालभतेकीर्तिंकेनवालभतेश्रियम् २ तपसाब्रह्मचर्येणजपहोमैस्तथौषधैः कर्मणामनसावाचात
न्मेब्रूहिपितामह ३ भीष्मउवाच अत्रतेहंप्रवक्ष्यामियन्मांत्वमनुपृच्छसि अल्पायुर्येनभवतिदीर्घायुर्वापिमानवः ४ येनवालभ
तेकीर्तिंयेनवालभतेश्रियम् यथावर्तयन्पुरुषःश्रेयसासंप्रयुज्यते ५ आचाराल्लभतेह्यायुराचाराल्लभतेश्रियम् आचारात्कीर्तिमाप्नोतिपु
रुषःप्रेत्यचेहच ६ दुराचारोहिपुरुषोनेहायुर्विंदतेमहत् त्रसंतियस्माद्भूतानितथापरिभवंतिच ७ तस्मात्कुर्यादिहाचारंयदिच्छेद्भूतिमात्म
नः अपिपापशरीरस्यआचारोहंत्यलक्षणम् ८ आचारलक्षणोधर्मःसंतश्चारित्रलक्षणाः साधूनांचयथावृत्तमेतदाचारलक्षणम् ९ अ
प्यदृष्टंश्रवादेवपुरुषंधर्मचारिणम् भूतिकर्माणिकुर्वाणंतंजनाःकुर्वतेप्रियम् १० येनास्तिकानिष्क्रियाश्चगुरुशास्त्राभिलंघिनः अधर्मज्ञादु
राचारास्तेभवंतिगतायुषः ११ विशीलाभिन्नमर्यादानित्यंसंकीर्णमैथुनाः अल्पायुषोभवंतीहनरानिरयगामिनः १२ सर्वलक्षणहीनोपि
समुदाचारवान्नरः श्रद्दधानोनसूयश्चशतंवर्षाणिजीवति १३ अक्रोधनःसत्यवादीभूतानामविहिंसकः अनसूयुरजिह्मश्चशतंवर्षाणि
जीवति १४ लोष्टमर्दीतृणच्छेदीनखखादीचयोनरः नित्योच्छिष्टःसंकुसुकोनेहायुर्विंदतेमहत् १५ ब्राह्मेमुहूर्तेबुध्येतधर्मार्थौचानु-
चिंतयेत् उत्थायाचम्यतिष्ठेत्पूर्वांसंध्यांकृतांजलिः १६ एवमेवापरांसंध्यांसमुपासीतवाग्यतः नेक्षेतादित्यमुद्यंतंनास्तंयांतंकदाचन
१७ नोपसृष्टंनवारिस्थंनमध्यंनभसोगतम् ऋषयोनित्यसंध्यत्वाद्दीर्घमायुरवाप्नुयात् १८ तस्मात्तिष्ठेत्सदापूर्वांपश्चिमांचैववाग्यतः
येनपूर्वामुपासंतेद्विजाःसंध्यांनपश्चिमाम् १९

कुष्ठापस्मारादिविरुद्धंलक्षणम् ८ ९ श्रवात् श्रवणात् तंपुरुषम् जनाः साधवः १० ११ १२
१३ १४ संकुसुकोदुर्जनः अस्थिरश्चसंकुसुकोस्थिरइत्यमरः १५ १६ १७ १८ १९ ७ ७ ७

२० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८

सर्वास्तान्धार्मिकोराजाशूद्रकर्माणिकारयेत् परदारान्नगंतव्यासर्ववर्णेषुकर्हिचित् २० नहीदृशमनायुष्यंलोकेकिंचनविद्यते
यादृशंपुरुषस्येहपरदारोपसेवनम् २१ यावंतोरोमकूपाःस्युःस्त्रीणांगात्रेषुनिर्मिताः तावद्वर्षसहस्राणिनरकंपर्युपासते २२ प्रसाधनंच
केशानामंजनंदंतधावनम् पूर्वाण्हएवकार्याणिदेवतानांचपूजनम् २३ पुरीषमूत्रेनोदीक्षेन्नाधितिष्ठेत्कदाचन नातिकल्यंनातिसायं
नचमध्यंदिनेस्थिते २४ नाज्ञातैःसहगच्छेतनैकोनवृषलैःसह पंथादेयोब्राह्मणायगोभ्योराजभ्यएवच २५ वृद्धायभारतप्तायगर्भिण्यै
दुर्बलायच प्रदक्षिणंचकुर्वीतपरिज्ञातान्वनस्पतीन् २६ चतुष्पथान्प्रकुर्वीतसर्वानेवप्रदक्षिणान् मध्यंदिनेनिशाकालेअर्धरात्रेचसर्व
दा २७ चतुष्पथंनसेवेतउभेसंध्येतथैवच उपानहौचवस्त्रंचधृतमन्यैर्नधारयेत् २८ ब्रह्मचारीचनित्यंस्यात्पादंपादेननाक्रमेत् अमा
वास्यांपौर्णमास्यांचतुर्दश्यांचसर्वशः २९ अष्टम्यांसर्वपक्षाणांब्रह्मचारीसदाभवेत् ३० वृथामांसंनखादेतपृष्ठमांसंतथैवच आक्रो
शंपरिवादंचपैशून्यंचविवर्जयेत् ३१ नारुंतुदःस्यान्ननृशंसवादीनहीनतःपरमभ्याददीत ययास्यवाचापरउद्विजेतनतांवदेद्रुशतींपा
पलोक्याम् ३२ वाक्सायकावदनान्निष्पतंतियैराहतःशोचतिरात्र्यहानि परस्यवामर्मसुयेपतंतितान्पंडितोनावसृजेत्परेषु ३३ रोहते
सायकैर्विद्धंवनंपरशुनाहतम् वाचादुरुक्तंबीभत्संनसंरोहतिवाक्क्षतम् ३४ कर्णिनालीकनाराचान्निर्हरंतिशरीरतः वाक्छल्यस्तु
ननिर्हर्तुंशक्योहृदिशयोहिसः ३५ हीनांगानतिरिक्तांगान्विद्याहीनान्विगर्हितान् रूपद्रविणहीनांश्चसत्यहीनांश्चनाक्षिपेत् ३६ ना
स्तिक्यंवेदनिंदांचदेवतानांचकुत्सनम् द्वेषस्तंभाभिमानंश्चतैक्ष्ण्यंचपरिवर्जयेत् ३७ परस्यदंडनोद्यच्छेत्क्रुद्धोनैननिपातयेत् अन्य
त्रपुत्राच्छिष्याद्वाशिष्ट्यर्थंताडनंस्मृतम् ३८ नब्राह्मणान्परिवदेन्नक्षत्राणिननिर्दिशेत् तिथिंपक्षस्यनब्रूयात्तथास्यायुर्नहीयते ३९
कृत्वामूत्रपुरीषेतुरथ्यामाक्रम्यवापुनः पादप्रक्षालनंकुर्यात्स्वाध्यायेभोजनेतथा ४० त्रीणिदेवाःपवित्राणिब्राह्मणानामकल्पयन् अ
दृष्टमद्भिर्निर्णिक्तंयच्चवाचाप्रशस्यते ४१ संयावकृसरंमांसंशष्कुलीपायसंतथा आत्मार्थंनप्रकर्तव्यंदेवार्थंतुप्रकल्पयेत् ४२ नित्यम
ग्निंपरिचरेद्भिक्षांदद्याच्चनित्यदा वाग्यतोदंतकाष्ठंचनित्यमेवसमाचरेत् ४३ नचाभ्युदितशायीस्यात्प्रायश्चित्तीतथाभवेत् मातापि
तरमुत्थायपूर्वमेवाभिवादयेत् ४४

३९ ४० त्रीणिभोज्यानि अद्भुरंपृष्टोदक्यादिभि. ४१ ४२ ४३ ४४ ७. ७ ७ ७.

४५ ४६ नाभिगच्छेंतराजादीन्प्रति ४७ अरजस्वलात्वेन ४८ ४९ ५० अंतर्धाने अत्यंतं अज्ञाते संयुक्ते इतरेणगम्याद्दिना ५१ ५२ ५३ ५४ ५५

आचार्यमथवाप्यन्यंतथायुर्विंदतेमहत् वर्जयेद्दंतकाष्ठानिवर्जनीयानिनित्यशः ४५ भक्षयेच्छास्त्रदृष्टानिपर्वस्वपिविवर्जयेत् उद
ङ्मुखश्चसततंशौचंकुर्यात्समाहितः ४६ अकृत्वादेवपूजांच नाचरेद्दंतधावनम् अकृत्वादेवपूजांचनाभिगच्छेत्कदाचन ४७ अन्य
त्रंतुगुरुंवृद्धंधार्मिकंवाविचक्षणम् अवलोक्योनचादर्शोमलिनोबुद्धिमत्तरैः ४८ नचाज्ञातांस्त्रियंगच्छेद्गर्भिणींवाकदाचन ४९ उद
क्शिरानस्वपेनतथाप्रत्यकशिरानच प्राक्शिराःस्वपेद्विद्वानथवादक्षिणाशिराः ५० नभग्नेनावशीर्णेच शयनेप्रस्वपीतच नांतर्धाने-
नसंयुक्तेनचतिर्यक्कदाचन ५१ नचापिगच्छेत्कार्येणसमयाद्वापिनास्तिके आसनंतुपदाकृष्यनप्रसज्येत्तथानरः ५२ ननग्नःकर्हिचित्स्ना
यान्ननिशायांकदाचन स्नात्वाचनावमृज्येतगात्राणिसुविचक्षणः ५३ नचानुलिंपेदस्नात्वास्नात्वावासोननिर्धुनेत् नचैवार्द्राणिवासांसिनि
त्यंसेवेतमानवः ५४ स्रजश्चनावकृष्येतनबहिर्धारयीतच उदक्ययाचसंभाषांनकुर्वीतकदाचन ५५ नोत्सृजेतपुरीषंच क्षेत्रेग्रामस्यचां-
तिके उभेमूत्रपुरीषेतुनाप्सुकुर्यात्कदाचन ५६ अन्नंबुभुक्षमाणस्तुत्रिर्मुखेनस्पृशेदपः भुक्त्वाचान्नंतथैवत्रिर्द्विःपुनःपरिमार्जयेत् ५७
प्राङ्मुखोनित्यमश्नीयाद्वाग्यतोन्नमकुत्सयन् प्रस्कंदयेच्चमनसा भुक्त्वाचाग्निमुपस्पृशेत् ५८ आयुष्यंप्राङ्मुखोभुंक्तेयशस्यंदक्षिणामु
खः धन्यंपश्चान्मुखोभुंक्तेऋतंभुंक्तेउदङ्मुखः ५९ अग्निमालभ्यतोयेनसर्वान्प्राणानुपस्पृशेत् गात्राणिचैवसर्वाणिनाभिंपाणितले
तथा ६० नाधितिष्ठेत्तुषजातुकेशभस्मकपालिकाः अन्यस्यचाप्यवस्नानंदूरतःपरिवर्जयेत् ६१ शांतिहोमांश्चकुर्वीतसावित्राणिच-
धारयेत् निषण्णश्चापिखादेतनतुगच्छन्कदाचन ६२ मूत्रंनोत्तिष्ठताकार्यंनभस्मनिनगोव्रजे आर्द्रपादस्तुभुंजीतनार्द्रपादस्तुसंविशे
त् ६३ आर्द्रपादस्तुभुंजानोवर्षाणांजीवतेशतम् त्रीणितेजांसिनोच्छिष्टआलभेतकदाचन ६४ अग्निंगांब्राह्मणंचैवतथाह्यायुर्नरिष्य
ते त्रीणितेजांसिनोच्छिष्टउदीक्षेतकदाचन ६५ सूर्याचंद्रमसौचैवनक्षत्राणिचसर्वशः ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआयति ६६ प्रत्यु
त्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यते अभिवादयेत्तद्वृद्धांश्चदद्याच्चैवासनंस्वयम् ६७ कृतांजलिरुपासीतगच्छंतंपृष्ठतोन्वियात् नचा
सीतासनेभिन्नेभिन्नकांस्यंचवर्जयेत् ६८

५६ ५७ प्रस्कंदयेदन्नशेषंकिंचित्त्यजेत् भुक्त्वाचम्य अग्निमुपस्पृशेत् ५८ ऋतंनिःश्रेयसमिच्छ
न्नितिशेषः ५९ प्राणान्नासादीनूर्ध्वच्छिद्राणिच अवस्नानंस्नानजलम् ६१ सावित्राणिमंत्रविशेषान् ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९

६९ ७० नरिष्यतेनहिस्यते ७१ तिलपिष्टंतिलसंयुक्तंभक्ष्यं ७२ नचिंतयेत्वेदं ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० ८१ ८२
मिथ्याप्रवृत्तेपिसम्यक्प्रवर्त्तितव्यं ८३ ८४ ८५ ८६ विपर्ययंऔत्तराधर्य ८७ अपदशंदशाहीनं ८८ प्रियंगुस्त्रीराजिकाकणयोरपितिमेदिनी ८९

नैकवस्त्रेणभोक्तव्यंननग्नःस्नातुमर्हति स्नप्तव्यंनैवनग्नेननचोच्छिष्टोपिसंविशेत् ६९ उच्छिष्टेनस्पृशेच्छीर्षसर्वेप्राणास्तदाश्रयाः के-
शग्रहप्रहारांश्चशिरस्येतान्विवर्जयेत् ७० नसंहताभ्यांपाणिभ्यांकंडूयेदात्मनःशिरः नचाभीक्ष्णंशिरःस्नायात्तथास्यायुर्नरिष्यते ७१
शिरःस्नानेश्चतैलेश्चनागंकिंचिदपिस्पृशेत् तिलपिष्टंनचाश्नीयात्तथास्यायुर्नरिष्यते ७२ नाध्यापयेत्तथोच्छिष्टोनाधीयीतकदाचन वा
तेचपूतिगंधेचमनसापिनचिंतयेत् ७३ अत्रगाथायमोद्गीताःकीर्त्तयंतिपुराविदः आयुरस्यनिकृंतामिप्रजास्तस्याददेतथा ७४ उच्छि
ष्टेयःप्राद्रवतिस्वाध्यायंचाधिगच्छति यश्चानध्यायकालेपिमोहादभ्यस्यतिद्विजः ७५ तस्यवेदःप्रणश्येतआयुश्चपरिहीयते तस्मायु
क्तोह्यनध्यायेनाधीयीतकदाचन ७६ प्रत्यादित्यंप्रत्यनलंप्रतिगांचप्रतिद्विजान् येमेहंतिचपंथानंतेभवंतिगतायुषः ७७ उभेमूत्रपु
रीषेतुदिवाकुर्यादुदङ्मुखः दक्षिणाभिमुखोरात्रौतथात्यायुर्नरिष्यति ७८ त्रीन्कृशान्नावजानीयाद्दीर्घमायुर्जिजीविषुः ब्राह्मणंक्ष-
त्रियंसर्पंसर्वेत्याशीविषास्त्रयः ७९ दहत्याशीविषःक्रुद्धोयावत्पश्यतिचक्षुषा क्षत्रियोपिदहेत्क्रुद्धोयावत्स्पृशतितेजसा ८० ब्राह्म
णस्तुकुलंहन्याद्ध्यानेनावेक्षितेनच तस्मादेतत्त्रयंयत्नादुपसेवेतपंडितः ८१ गुरुणाचैवनिर्बंधोनकर्त्तव्यःकदाचन अनुमान्यःप्र
साद्यश्चगुरुःक्रुद्धोयुधिष्ठिर ८२ सम्यङ्मिथ्याप्रवृत्तेपिवर्त्तितव्यंगुराविह गुरुनिंदादहत्यायुर्मनुष्याणांनसंशयः ८३ दूरादावसथा
न्मूत्रंदूरात्पादावसेचनम् उच्छिष्टोत्सर्जनंचैवदूरेकार्यंहितैषिणा ८४ रक्तमाल्यंनधार्यंस्यात्शुक्लंधार्यंतुपंडितैः वर्जयित्वातुकमलं
तथाकुवलयंप्रभो ८५ रक्तंशिरसिधार्यंतुतथावानेयमित्यपि कांचनीयापिमालायानसादुष्यतिकर्हिचित् ८६ स्नातस्यवर्णकंनि
त्यमार्द्रंदद्याद्विशांपते विपर्ययंनकुर्वीतवाससोबुद्धिमान्नरः ८७ तथानान्यधृतंधार्यंनचापदशमेवच अन्यदेवभवेद्वासःशयनी
येनरोत्तम ८८ अन्यद्रथ्यासुदेवानामर्चायामन्यदेवहि प्रियंगुचंदनाभ्यांचबिल्वेनतगरेणच ८९ पृथगेवानुलिंपेतकेशरेणच
बुद्धिमान् उपवासंचकुर्वीतस्नातःशुचिरलंकृतः ९० पर्वकालेषुसर्वेषुब्रह्मचारीसदाभवेत् समानमेकपात्रेतुभुंजेन्नान्नंजनेश्वर ९१

पृथगितिराजिकयानुलेपनंकृत्वास्नात्वाचंदनाद्यन्यतमेनानुलेपनंकार्यमित्यर्थः तगरस्थगरेमहाराष्ट्राणांगांवबाणइतिप्रसिद्धः उपवासंब्रह्म
चर्यम् ९० । ९१ ढ ढ ढ ढ ढ ढ ढ ढ ढ ढ ढ

आलीढयारजस्वलयापरिकृतंसंपादितं आलीढंना परिहितमितिपाठे आलीढंगवाद्याघ्रातंपरिषेचनहीनं उधृतसाराणिक्षीरादीनिप्रेक्षतेयान्चकाय ९२ मे
धावीनापुरुषः अशुचेः सन्निकृष्टेनभुंजीतमेधावी आशुचेरितिगौडाः धर्मेषुश्राद्धादिषुप्रतिषिद्धान्भक्ष्यान्पृष्ठतः श्राद्धाद्यभावेनभुंजीत ९३ ९४ ९५
९६ वालेनकेशेनउपलक्षितं परश्राद्धंशत्रुश्राद्धं ९७ सदैवनसदानैवेतिसंबंधः ९८ . ९९ १०० निरस्यपानीयादीन्विहाय अन्येषांभक्ष्याणांशेषम्
न्यस्मैनदेयंपानीयादेरपिशेषंपुत्रादिभ्यएवदेयं पितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोज्यमितिस्मरणात् अन्येषांतद्भोजनस्यनिषेधात् गौडास्तुनिःशेषमेतेषांनप्रदे

नालीढंयापरिहृतंभक्षयीतकदाचन तथानोद्धृतसाराणिप्रेक्षितेनाप्रदायच ९२ नसंनिकृष्टेमेधावीनाशुचेर्नचसत्सुच प्रतिसि
द्धान्नधर्मेषुभक्ष्यान्भुंजीतपृष्ठतः ९३ पिप्पलंचवटंचैवशणशाकंतथैवच उदुंबरनखादेच्चभवार्थी पुरुषोत्तमः ९४ आजंगव्यंत-
थामांसंमायूरंचैववर्जयेत् वर्जयेत्शुष्कमांसंचतथापर्युषितंचयत् ९५ नपाणौलवणंविद्वान्प्राश्नीयान्नचरात्रिषु दधिसक्तुंनभुंजी
तवृथामांसंचवर्जयेत् ९६ सायंप्रातश्चभुंजीतनांतरालेसमाहितः वालेनतुनभुंजीतपरश्राद्धंतथैवच ९७ वाग्यतोनैकवस्त्रश्चनास
विष्टःकदाचन भूमौसदैवनाश्नीयान्नानाशीलोनशब्दवत् ९८ तोयपूर्वंप्रदायान्नमतिथिभ्योविशांपते पश्चाद्भुंजीतमेधावीनचाप्य
न्यमनानरः ९९ समानमेकपंक्त्यांतुभोज्यमन्नंनरेश्वर विषंहालाहलंभुंक्तेयोप्रदायकृतहज्जने १०० पानीयपायससक्तून्दधिस-
र्पिर्मधून्यपि निरस्यशेषमेतेषांनप्रदेयंनुकस्यचित् १०१ भुंजानोमनुजव्याघ्रनैवशंकांसमाचरेत् दधिचाप्यनुपानंवैकर्तव्यंचभवा-
र्थिना २ आचम्यचैकहस्तेनपरिस्राव्यंतथोदकं अंगुष्ठंचरणस्याथदक्षिणस्यावसेचयेत् ३ पाणिंमूर्ध्निसमाधायस्पृष्ट्वाचाग्निंस
माहितः ज्ञातिश्रैष्ठ्यमवाप्नोतिप्रयोगकुशलोनरः ४ अद्भिःप्राणान्समालभ्यनाभिंपाणितलेनतु स्पृशंश्चैवप्रतिष्ठेतनचाप्यार्द्रेणपा
णिना ५ अंगुष्ठस्यांतरालेचब्राह्म्यंतीर्थमुदाहृतम् कनिष्ठिकायाःपश्चात्तुदेवतीर्थमिहोच्यते ६ अंगुष्ठस्यचयन्मध्यंप्रदेशिन्याश्च
भारत तेनपित्र्याणिकुर्वीतस्पृष्ट्वापोन्यायतःसदा ७ परापवादंनब्रूयान्नाप्रियंचकदाचन नमन्युःकश्चिदुत्पाद्यःपुरुषेणभवार्थिना
८ पतितैस्तुकथांनेच्छेद्दर्शनंचविवर्जयेत् संसर्गंचनगच्छेततथायुर्विंदतेमहत् नदिवामैथुनंगच्छेन्नकन्यांनचबंधकीम् ९ नचा
स्नातांस्त्रियंगच्छेत्तथायुर्विंदतेमहत् स्वेस्वेतीर्थेसमाचम्यकार्येसमुपकल्पिते त्रिःपीत्वापोद्विःप्रमृज्यकृतशौचोभवेन्नरः १०

यमितिपठंति तत्परिसंख्यापत्तेरुपेक्ष्यं १०१ शंकाजीर्यतिनवेति अन्नस्यापूतत्वात् वाअधिकत्वाच्छंकयानैवभोक्तव्यमित्यर्थः दधित्वनुपानंकर्तव्यमेव
ययेष्टंभुंक्ष्वमाभैःपास्तक्रंसलवणंपिबेतितस्यदृष्टार्थत्वस्मृतेः १०२ कुत्रपरिस्राव्यंतदाहअंगुष्ठमिति ३ ४ आप्राणान्नाभ्यंत ५ ६ ७ ८ ९ १० ७

११ १२ १३ १४ एतेतैलपायिकानपापायअभ्युदयायेत्यर्थः पारावतादयःसर्वेपक्षिविशेषाएव १५ १६ १७ शारणिकस्यरक्षणार्थिनः१८ १९
२० प्रसाधनंकेशानांसंस्कारादिकं नक्तंस्नायादिनिगृह्णेगतौशिरस्नाननिषेधः२१ २२ पानानियानियोग्यानीत्यर्थः वादतानानीतिगौडपाठः अवदातानि-
निर्मलान्यपिशेषाणिवर्जनीयानीत्यर्थः सौहित्यंआतृप्तिभोजनंपरस्यनकर्तव्यंआत्मनश्चसमाचरेत् २३ द्विजच्छेदंपक्षिवधंन कुर्वीत तर्हिपक्षिमांसमे-

इंद्रियाणिसकृत्स्पृश्यत्रिरभ्युक्ष्यचमानवः कुर्वीतपित्र्यंदैवंचवेददृष्टेनकर्मणा ११ ब्राह्मणार्थेचयच्छौचंतच्चमेशृणुकौरव पवित्रंच
हितंचैवभोजनाद्यंतयोस्तथा १२ सर्वशौचेषुब्राह्मेणतीर्थेनसमुपस्पृशेत् निष्ठीव्यतुतथाक्षुत्वास्पृश्यापोहिशुचिर्भवेत् १३ वृद्धो
ज्ञातिस्तथामित्रंदरिद्रोयोभवेदपि गृहेवासयितव्यास्तेधन्यमायुष्यमेवच १४ गृहेपारावताधन्याःशुकाश्चसहसारिकाः गृहेष्वेतेन
पापायतुस्थावैतैलपायिकाः उद्दीपकाश्चगृध्राश्चकपोताभ्रमरास्तथा १५ निविशेयुर्यदातत्रशांतिमेवतदाचरेत् अमंगल्यानिचैता
नितथाक्रोशोमहात्मनाम् १६ महात्मनोतिगुह्यानिनवक्तव्यानिकर्हिचित् अगम्याश्चनगच्छेत्राज्ञःपत्नीःसखीस्तथा १७ वै-
द्यानांबालवृद्धानांभृत्यानांचयुधिष्ठिर बंधूनांब्राह्मणानांचतथाशारणिकस्यच १८ संबंधिनांचराजेंद्रतथायुर्विंदतेमहत् ब्राह्मणस्थ
पतिभ्यांचनिर्मितंयन्निवेशनम् १९ तदावसेत्सदाप्राज्ञोभवार्थीमनुजेश्वर संध्यायांनस्वपेद्राजन्विद्यांनचसमाचरेत् २० नभुंजीतचमे
धावीतथायुर्विंदतेमहत् नक्तंनकुर्यात्पित्र्याणिभुक्त्वाचैवप्रसाधनम् २१ पानीयस्यक्रियानक्तंनकार्याभूतिमिच्छता वर्जनीयाश्चैवनित्यं
सक्तवोनिशिभारत २२ शेषाणिचैवदानानिपानीयंचापिभोजने सौहित्यंनचकर्तव्यंरात्रौनचसमाचरेत् २३ द्विजच्छेदंनकुर्वीतभुक्त्वा
नचसमाचरेत् महाकुलेप्रसूतांचप्रशस्तांलक्षणैस्तथा २४ वयस्थांचमहाप्राज्ञकन्यामावोढुमर्हति अपत्यमुत्पाद्यततःप्रतिष्ठा
प्यकुलंतथा २५ पुत्राःप्रदेयाःज्ञानेषुकुलधर्मेषुभारत कन्याचोत्पाद्यदातव्याकुलपुत्रायधीमते २६ पुत्रानिवेश्याश्चकुलाद्भृत्या
लभ्याश्चभारत शिरस्स्नातोथकुर्वीतदैवंपित्र्यमथापिच नक्षत्रेनचकुर्वीतयस्मिन्जातोभवेन्नरः नप्रोष्ठपदयोःकार्यंतथाग्नेयेच-
भारत २७ दारुणेषुचसर्वेषुप्रत्यरिंचविवर्ज्जयेत् ज्योतिषेयानिचोक्तानितानिसर्वाणिवर्ज्जयेत् २८ प्राङ्मुखःश्मश्रुकर्माणिका
रयेत्सुसमाहितः उदङ्मुखोवाराजेंद्रतथायुर्विंदतेमहत् २९

वनभोक्तव्यमितिफलितमित्याशंक्याह भुक्त्वानसमाचरेत्क्रयक्रीतमेवमांसंभक्ष्यंनतुस्वयंहिंस्यंकार्यमित्यर्थः भुक्त्वापानंसमाचरेदितिपाठआजनांतेनकजलंवापेयमित्यर्थः
२४ २५ज्ञानेषुबहुज्ञाननिमित्तंपुत्रादेयाः विद्वत्सुसमर्पणीयाः २६ कुलान्स्वकुलसंबंधेननिवेश्याः स्वान्यात्लभ्याश्चभनीयाः २७ आग्नेयेकृत्तिकायांप्रत्य-
ग्स्वनक्षत्रादिनक्षत्रं [illegible] ताराप्रत्यरिः २८ २९ ७ ७

३० व्यंगिनीं न्यूनांगीं व्यंगितां विरुद्धांगेन अधिकेनयुक्तां समार्षा समानप्रवरां. ३१ ३२ अयोनिं अज्ञातकुलां ३३ ३४ ३५ ३६ ३७ ३८
३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३

परिवादंनचब्रूयात्परेषामात्मनस्तथा परिवादोह्यधर्माय प्रोच्यते भरतर्षभ ३० वर्जयेद्व्यंगिनींनारींतथाकन्यांनरोत्तम समार्षांव्यं
गितांचैवमातुःस्वकुलजांतथा ३१ वृद्धांप्रव्रजितांचैवतथैवचपतिव्रताम् तथानिकृष्टवर्णांचवर्णोत्कृष्टांचवर्ज्जयेत् ३२ अयोनिंच
वियोनिंचनगच्छेतविचक्षणः पिंगलांकुष्ठिनींनारींनत्वमुद्वोढुमर्हसि ३३ अपस्मारिकुलेजातांनिहीनांचापिवर्ज्जयेत् श्वित्रिणांचकु
लेजातांक्षयिणांमनुजेश्वर ३४ लक्षणैरन्वितायाचप्रशस्तायाचलक्षणैः मनोज्ञांदर्शनीयांचतांभवान्वोढुमर्हति ३५ महाकुलेनि
वेष्टव्यंसदृशेवायुधिष्ठिर अवरापतितांचैवनग्राह्याभूतिमिच्छता ३६ अग्नीनुत्पाद्ययत्नेनक्रियाःसुविहिताश्चयाः वेदेचब्राह्मणैःप्रो
क्तास्ताश्चसर्वाःसमाचरेत् ३७ नचेर्ष्यास्त्रीषुकर्त्तव्यारक्ष्यादाराश्चसर्वशः अनायुष्याभवेदीर्ष्यातस्मादीर्ष्यांविवर्ज्जयेत् ३८ अना-
युष्यंदिवास्वप्नंतथाभ्युदितशायिता प्रगेनिशामासुतथायेचोच्छिष्टाःस्वपन्तिवै ३९ पारदारमनायुष्यंनापितोच्छिष्टतानयो यत्नतोवैन
कर्त्तव्यमभ्यासश्चैवभारत ४० संध्यायांचनभुंजीतनस्नायेन्नतथापठेत् प्रयतश्चभवेत्तस्यांनचकिंचित्समाचरेत् ४१ ब्राह्मणान्पू
जयेच्चापितदास्नात्वानराधिप देवांश्चप्रणमेत्स्नातोगुरूंश्चाप्यभिवादयेत् ४२ अनिमंत्रितोनगच्छेतयज्ञंगच्छेतदर्शकः अनर्चितेह्य
नायुष्यंगमनंतत्रभारत ४३ नचैकेनपरिव्रज्यंनगंतव्यंतथानिशि अनागतायांसंध्यायांपश्चिमायांगृहेवसेत् ४४ मातुःपितुर्गुरूणां
चकार्यमेवानुशासनम् हितंचाप्यहितंचापिनविचार्यंनरर्षभ ४५ धनुर्वेदेचवेदेचयत्नःकार्योनराधिप हस्तिपृष्ठेश्वपृष्ठेचरथचर्
यासुचैवहि ४६ यत्नवान्भवराजेंद्रयत्नवान्सुखमेधते अप्रधृष्यश्चशत्रूणांभृत्यानांस्वजनस्यच ४७ प्रजापालनयुक्तश्चनक्ष-
तिंलभतेक्वचित् युक्तिशास्त्रंचतेज्ञेयंशब्दशास्त्रंचभारत ४८ गंधर्वशास्त्रंचकलाःपरिज्ञेयानराधिप पुराणमितिहासंश्चतथाख्या
नानियानिच ४९ महात्मनांचचरितंश्रोतव्यंनित्यमेवते पत्नींरजस्वलांयाचनाभिगच्छेन्नचाह्वयेत् ५० स्नातांचतुर्थेदिवसेरात्रौग
च्छेद्विचक्षणः पंचमेदिवसेनारीषष्ठेहनिपुमान्भवेत् ५१ एतेनविधिनापत्नीमुपगच्छेतपंडितः ज्ञातिसंबंधिमित्राणिपूजनीयानिस
र्वशः ५२ यष्टव्यंचयथाशक्तियज्ञैर्विविधदक्षिणैः अतऊर्ध्वमरण्यंचसेवितव्यंनराधिप ५३ एषतेलक्षणोद्देशआयुष्याणांप्रकीर्त्तितः
शेषस्त्रैविद्यवृद्धेभ्यःप्रत्याहार्योयुधिष्ठिर ५४

आयुष्याणांआयुष्कराणांकर्मणांउद्देशःसंक्षेपः ५४ ७ ७ ७ ७

१५५ १५६ १५७ · इतिश्रीमन्महाभारतेआनुशासनिकेपर्वणिटीकायांचतुरधिकशततमोऽध्यायः १०४ १ यावच्छिष्य-
स्यगुरोर्वृत्तिस्तावत्तांवर्त्तस्व २ ३ तेषांगुरूणाम् ४ कृतंमित्रम् अरयःनराःभेदयेयुः ५ ६ यवीयसः कनीयान् ७ निचुलस्यवेतसस्य निचुलकःपुमान्

आचारोभूतिजननआचारःकीर्त्तिवर्द्धनः आचाराद्वर्द्धतेह्यायुराचारोहंत्यलक्षणम् ५५ आगमानांहिसर्वेषामाचारःश्रेष्ठउच्यते
आचारप्रभवोधर्मोधर्माद्आयुर्विवर्द्धते ५६ एतद्यशस्यमायुष्यंस्वर्ग्यंस्वस्त्ययनंमहत् अनुकंप्यसर्ववर्णान्ब्रह्मणा समुदाहृतम्
१५७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेचतुरधिकशततमोऽध्यायः १०४ युधिष्ठिरउवाच यथाज्येष्ठःकनिष्ठे
षुवर्त्तेत भरतर्षभ कनिष्ठाश्चयथाज्येष्ठेवर्त्तेरंस्तद्ब्रवीहिमे १ भीष्मउवाच ज्येष्ठवत्तातवर्त्तस्वज्येष्ठोसिसततंभवान् गुरोर्गरीयसी
वृत्तिर्याचशिष्यस्यभारत २ नगुरावकृतप्रज्ञेशक्यंशिष्येणवर्त्तितुम् गुरोर्हिदीर्घदर्शित्वंयत्तच्छिष्यस्यभारत ३ अंधःस्याद्अंधवेलायांज
डःस्याद्अपिवाबुधः परिहारेणतद्ब्रूयाद्यस्तेषांस्यात्व्यतिक्रमः ४ प्रत्यक्षंभिन्नहृदयाभेदयेयुःकृतंनराः श्रियाभितप्ताःकौंतेयभेदकामा
स्तथारयः ५ ज्येष्ठःकुलंवर्द्धयतिविनाशयतिवापुनः हंतिसर्वमपिज्येष्ठःकुलंयत्रावजायते ६ अथयोविनिकुर्वीतज्येष्ठोभ्रातायवीयसः
अज्येष्ठःस्याद्अभागश्चनियम्योराजभिश्चसः ७ निकृतीहिनरोलोकान्पापानाप्नोत्यसंशयम् निचुलस्येवतत्पुष्पंमोघंजनयितुःस्मृतम् ८
सर्वानर्थःकुलेयत्रजायतेपापपूरुषः अकीर्त्तिंजनयत्येवकीर्तिमंतर्दधातिच ९ सर्वेचापिविकर्मस्थाभागंनार्हंतिसोदराः नाप्रदायकनिष्ठे
भ्योज्येष्ठःकुर्वीतयौतकम् १० अनुपघ्नन्पितुर्दायंजंघाश्रमफलोऽध्वगः स्वयमीहितलब्धंतुनाकामोदातुमर्हति ११ भ्रातृणामविभक्तानां
मुत्थानमपिचेत्सह नपुत्रभागंविषमंपितादद्यात्कदाचन १२ नज्येष्ठोनावमन्येतदुष्कृतःसुकृतोपिवा यदिस्त्रीयद्यवरजःश्रेयश्चेत्तत्तदाच
रेत् १३ धर्मंहिश्रेयइत्याहुरितिधर्मविदोजनाः दशाचार्यानुपाध्याय उपाध्यायान्पितादश १४ दशचैवपितॄन्मातासर्वांवापृथिवीमपि गौ
रवेणाभिभवतिनास्तिमातृसमोगुरुः १५ माता गरीयसीयच्चतेनैतांमन्यतेजनः ज्येष्ठोभ्रातापितृसमोमृतेपितरिभारत १६ सह्येषांवृ
त्तिदातास्यात्सचैतान्प्रतिपालयेत् कनिष्ठास्तंनमस्येरन्सर्वेछंदानुवर्त्तिनः १७ तमेवचोपजीवेरन्यथैवपितरंतथा शरीरमेतौसृजतःपि
तामाताचभारत १८ आचार्यशास्तायाजातिःसासत्यासाजराऽमरा ज्येष्ठामातृसमाचापिभगिनीभरतर्षभ १९

वेतसेइतिमेदिनी ८ ९ १०
जंघाश्रमएवफलंधनंयस्य अध्वगःप्रवासी ११ उत्थानंभोजनादौविभागेवा १२ यदिस्त्रीपदिवाकनिष्ठोदुष्कृतस्तथापितस्यश्रेयआचरेत् १३ १४ १५ १६ १७ १८ १९

२० ॥ इति आनुशासनिके पर्वणि टीकायां पंचाधिकशततमोऽध्यायः १०५ ॥ १ ब्रह्मक्षत्रे त्रिरात्राधिकमुपोषणं नेष्टं त्रिरात्रं षड्रात्रं सर्वेषां अथवा आश्रमांतरे क्वचित् नि
र्दिष्टम् २ ३ ४ ५ ६ ७ ८ ९ १० ११ व्युष्टिः फलम् १२ दिनस्य द्वे भक्ते तत्र चतुर्थस्य भक्तस्य लक्षणम् द्विरात्रमभो-

भ्रातुर्भार्यां च तद्दुहित्रा ग्रस्यावा ल्येस्तनं पिबेत् २० इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे ज्येष्ठकनिष्ठवृत्तिर्नाम पंचा
धिकशततमोऽध्यायः १०५ युधिष्ठिर उवाच सर्वेषामेव वर्णानां म्लेच्छानां च पितामह उपवासे मतिरियं कारणं च न विद्महे १ ब्रह्मक्ष
त्रेण नियमाश्चर्त्तव्या इति नः श्रुतम् उपवासे कथं तेषां कृत्यमस्ति पितामह २ नियमांश्चोपवासांश्च सर्वेषां ब्रूहि पार्थिव आप्नोति कां गतिं तात
उपवासपरायणः ३ उपवासः परं पुण्यमुपवासः परायणम् उपोष्येह नरश्रेष्ठ किं फलं प्रतिपद्यते ४ अधर्मान्मुच्यते केन धर्ममाप्नोति वा कथम्
स्वर्गं पुण्यं च लभते कथं भरतसत्तम ५ उपोष्य चापि किं तेन प्रदेयं स्यान्नराधिप धर्मेण च सुखानर्थाल्लभेद्येन ब्रवीहि तम् ६ वैशंपायन
उवाच एवं ब्रुवाणं कौंतेयं धर्मज्ञं धर्मतत्त्ववित् धर्मपुत्रमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत् ७ भीष्म उवाच इदं खलु मया राजन्
च्छ्रुतमासीत्पुरातनम् उपवासविधौ श्रेष्ठा गुणा ये भरतर्षभ ८ ऋषिमंगिरसं पूर्वं पृष्टवानस्मि भारत यथा मां त्वं तथैवाहं पृष्टवांस्तं तपोधन
म् ९ प्रश्नमेतं मया पृष्टो भगवानग्निसंभवः उपवासविधिं पुण्यमाचष्ट भरतर्षभः १० अंगिरा उवाच ब्रह्मक्षत्रे त्रिरात्रं तु विहितं कुरु
नंदन द्विस्त्रिरात्रमथैकाहं निर्दिष्टं पुरुषर्षभ ११ वैश्याः शूद्राश्च यन्मोहादुपवासं प्रचक्रिरे त्रिरात्रं वा द्विरात्रं वा तयोर्व्युष्टिर्न विद्यते १२ च
तुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते त्रिरात्रं न तु धर्मज्ञैर्विहितं धर्मदर्शिभिः १३ पंचम्यां वापि षष्ठ्यां च पौर्णमास्यां च भारत उपोष्य एकभक्तेन
नियतात्मा जितेंद्रियः १४ क्षमावान् रूपसंपन्नः श्रुतवांश्चैव जायते नानपत्यो भवेत्प्राज्ञो दरिद्रो वा कदाचन १५ यजिष्णुः पंचमीं षष्ठीं कुले
भोजयते द्विजान् अष्टमीमथ कौरव्य कृष्णपक्षे चतुर्दशीम् १६ उपोष्य व्याधिरहितो वीर्यवानभिजायते मार्गशीर्षं तु यो मासमेकभक्तेन
संक्षिपेत् १७ भोजयेच्च द्विजान् शक्त्या स मुच्येद्व्याधिकिल्बिषैः सर्वकल्याणसंपूर्णः सर्वौषधिसमन्वितः १८ उपोष्य व्याधिरहितो वीर्यवा
नभिजायते कृषिभागी बहुधनो बहुधान्यश्च जायते १९ पौषमासं तु कौंतेय भक्तेनैकेन यः क्षपेत् सुभगो दर्शनीयश्च यशोभागी च जायते
२० माघं तु नियतो मासमेकभक्तेन यः क्षिपेत् श्रीमत्कुले ज्ञातिमध्ये स महत्त्वं प्रपद्यते २१ भगदैवतमासं तु एकभक्तेन यः क्षपेत् स्त्रीषु वल्लभ
तां याति वश्याश्चास्य भवंति ताः २२

जनमित्यर्थः तच्च त्रिरात्रं तेषामस्तीत्याह १३ १४ १५ यजिष्णुः देवतापूजनशीलः कुले स एव महान् अन्नदाता भवतीत्यर्थः १६

२३ २४ ज्येष्ठमूलंज्येष्ठमासं २५ २६ २७ २८ २९ ३० ३१ सर्वेषुमासेषुएवावैकस्मिन्पक्षेगतेद्वितीयपक्षेभक्तंएकभक्तंअश्नाति

चैत्रंतुनियतोमासमेकभक्तेनयःक्षपेत् सुवर्णमणिमुक्ताढ्येकुलेमहतिजायते २३ निस्तरेदेकभक्तेनवैशाखंयोजितेंद्रियः नरोवायदि
वानारीज्ञातीनांश्रेष्ठतांव्रजेत् २४ ज्येष्ठामूलंतुयोमासमेकभक्तेनसंक्षपेत् ऐश्वर्यमतुलंश्रेष्ठंपुमान्स्त्रीवाप्रपद्यते २५ आषाढमेकभक्ते
नस्थित्वामासमतंद्रितः बहुधान्योबहुधनोबहुपुत्रश्चजायते २६ श्रावणंनियतोमासमेकभक्तेनयःक्षपेत् यत्रतत्राभिषेकेणयुज्यतेज्ञाति
वर्द्धनः २७ प्रौष्ठपदंतुयोमासमेकाहारोभवेन्नरः गवाढ्यंस्फीतमचलमैश्वर्यंप्रतिपद्यते २८ तथैवाश्वयुजंमासमेकभक्तेनयःक्षपेत् मृजा
वान्वाहनाढ्यश्चबहुपुत्रश्चजायते २९ कार्तिकंतुनरोमासंयःकुर्यादेकभोजनम् शूरश्चबहुभार्यश्चकीर्तिमांश्चैवजायते ३० इतिमासानरं
व्याघ्रक्षपतांपरिकीर्तिताः तिथीनांनियमायेतुशृणुतानपिपार्थिव ३१ पक्षेपक्षेगतेयस्तुभक्तमश्नातिभारत गवाढ्योबहुपुत्रश्चदीर्घमा-
युश्चजायते ३२ मासिमासित्रिरात्राणिकृत्वावर्षाणिद्वादश गणाधिपत्यंप्राप्नोतिनिःसपत्नमनाविलम् ३३ एतेतुनियमाःसर्वेकर्तव्याःश
रदोदश द्वेचान्येभरतश्रेष्ठप्रवृत्तिमनुवर्तता ३४ यस्तुप्रातस्तथासायंभुंजानोनांतरापिबेत् अहिंसानिरतोनित्यंजुह्वानोजातवेदसम्
३५ षड्भिःसवर्षैर्नृपतेसिध्यतेनात्रसंशयः अग्निष्टोमस्ययज्ञस्यफलंप्राप्नोतिमानवः ३६ अधिवासेसोप्सरसांनृत्यगीतविनादिते रम-
तेस्त्रीसहस्राढ्येसुकृतीविरजोनरः ३७ तप्तकांचनवर्णाभंविमानमधिरोहति पूर्णंवर्षसहस्रंचब्रह्मलोकेमहीयते ३८ तत्क्षयादि
हचागम्यमाहात्म्यंप्रतिपद्यते यस्तुसंवत्सरंपूर्णमेकाहारोभवेन्नरः ३९ अतिरात्रस्ययज्ञस्यसफलंसमुपाश्नुते दशवर्षसहस्राणिस्व-
र्गेचसमहीयते ४० तत्क्षयादिहचागम्यमाहात्म्यंप्रतिपद्यते यस्तुसंवत्सरंपूर्णंचतुर्थंभक्तमश्नुते ४१ अहिंसानिरतोनित्यंसत्यवाग्वि
जितेंद्रियः वाजपेयस्ययज्ञस्यसफलंसमुपाश्नुते ४२ दशवर्षसहस्राणिस्वर्गलोकेमहीयते षष्ठेकालेतुकौंतेयनरःसंवत्सरंक्षिपन्
४३ अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः चक्रवाकप्रयुक्तेनविमानेनसगच्छति चत्वारिंशत्सहस्राणिवर्षाणांदिविमोदते ४४ अ
ष्टमेनतुभक्तेनजीवन्संवत्सरंनृप गवामयस्ययज्ञस्यफलंप्राप्नोतिमानवः ४५ हंससारसयुक्तेनविमानेनसगच्छति पंचाशतंसहस्राणि
वर्षाणांदिविमोदते ४६ पक्षेपक्षेगतेराजन्योश्नीयाद्वर्षमेवतु षण्मासानशनंतस्यभगवानंगिराब्रवीत् ४७

३२ ३३ ३४ ३५ ३६ ३७ ३८

३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ एकस्मिन्पक्षेगतेपरस्मिन्पक्षेभातिवर्षंचतदेवषण्मासाशनंभवति संवत्सरमितिपक्षैकस्मिन्संवत्सरएकमेकमासंतत्प्रात्राहारोभ
वेदितिवाक्यार्थः यथाश्रुतार्थग्रहणेजीवनाशप्रसंगात् ४७

४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ स्वर्गकामस्य क्षीणत्वाद्यवस्थां प्राप्तस्य आप्यायनादयो न रोचन्ते अपितु तज्जं दुःखं सहमान एव सः स्वत

पुष्टिवर्षसहस्राणि दिवमावसते च सः वीणानां वल्लकीनां च वेणूनां च विशांपते ४८ सुघोषैर्मधुरैः शब्दैः सुप्तः स प्रतिबोध्यते संवत्सरमि
हैकं तु मासि मासि पिबेद्पः ४९ फलं विश्वजित स्तात प्राप्नोति स नरो नृप सिंहव्याघ्रप्रयुक्तेन विमानेन स गच्छति ५० सप्ततिं च सहस्राणि
वर्षाणां दिवि मोदते मासादूर्ध्वं नरव्याघ्र नोपवासो विधीयते ५१ विधिं त्वनशनस्याहुः पार्थ धर्मविदो जनाः अनार्तो व्याधिरहितो गच्छेद
नशनं तु यः पदे पदे यज्ञफलं स प्राप्नोति न संशयः ५२ दिव्यं हंसप्रयुक्तेन विमानेन स गच्छति शतं वर्षसहस्राणां मोदते स दिवि प्रभो ५३ श
तं चाप्सरसः कन्या रमयन्त्यपि तं नरम् आर्तो वा व्याधितो वापि गच्छेदनशनं तु यः शतं वर्षसहस्राणां मोदते स दिवि प्रभो ५४ काञ्चीनूपुरशब्दे
न सुप्तश्चैव प्रबोध्यते सहस्रहंसयुक्तेन विमानेन तु गच्छति स गत्वा स्त्रीशताकीर्णे रमते भरतर्षभ ५५ क्षीणस्याप्यायनं दृष्टं क्षतस्य क्षतरो
हणम् व्याधितस्यौषधग्रामः क्रुद्धस्य च प्रसादनम् ५६ दुःखितस्यार्थमानाभ्यां दुःखानां प्रतिषेधनम् न चैते स्वर्गकामस्य रोचन्ते सुखमेध
सः ५७ अतः स कामसंयुक्तो विमाने हेमसन्निभे रमते स्त्रीशताकीर्णे पुरुषोऽलंकृतः शुचिः ५८ स्वस्थः सफलसंकल्पः सुखी विगतकल्मषः
अनश्नन्देहमुत्सृज्य फलं प्राप्नोति मानवः ५९ बालसूर्यप्रतीकाशे विमाने हेमवर्चसि वैदूर्यमुक्तारचिते वीणामुरजनादिते ६० पताकादी
पिकाकीर्णे दिव्यघण्टानिनादिते स्त्रीसहस्रानुचरिते स नरः सुखमेधते ६१ यावन्ति रोमकूपाणि तस्य गात्रेषु पाण्डव तावन्त्येव सहस्राणि वर्षा-
णां दिवि मोदते ६२ नास्ति वेदात्परं शास्त्रं नास्ति मातृसमो गुरुः न धर्मात्परमो लाभस्तपो नानशनात्परं ६३ ब्राह्मणेभ्यः परं नास्ति पावनं दि
वि चेह च उपवासैस्तथा तुल्यं तपःकर्म न विद्यते ६४ उपोष्य विधिवद्देवास्त्रिदिवं प्रतिपेदिरे ऋषयश्च परां सिद्धिमुपवासैरवाप्नुवन् ६५ दिव्यं
वर्षसहस्राणि विश्वामित्रेण धीमता क्षान्तमेकेन भक्तेन तेन विप्रत्वमागतः ६६ च्यवनो जमदग्निश्च वसिष्ठो गौतमो भृगुः सर्व एव दिवं प्राप्ताः
क्षमावन्तो महर्षयः ६७ इदमङ्गिरसा पूर्वं महर्षिभ्यः प्रदर्शितं यः प्रदर्शयते नित्यं न स दुःखमवाप्नुते ६८ इमं तु कौन्तेय यथाक्रमं विधिं प्रवर्तितं
ह्यङ्गिरसा महर्षिणा पठेच्च यो वै शृणुयाच्च नित्यदा न विद्यते तस्य नरस्य किल्बिषम् ६९ विमुच्यते चापि स सर्वसंकरैर्न चास्य दोषैरभिभूयते म
नः वियोनिजानां च विजानते रुतं ध्रुवां च कीर्तिं लभते नरोत्तमः ७० इति श्रीम० आनु० प० दान० षडधिकशततमोऽध्यायः १०६ ॥ ॥

पोवर्धयतीत्यर्थः ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ वियोनिजानां पक्ष्यादीनां रुतं शब्दं ७० इति षडधिकशततमोऽध्यायः १०६

१ २ ३ अवगुणैः निर्गुणैः एकात्मभिः एकाकिभिः अत एवासंहतैः असहायैः ४ ५ कल्यं प्रातः ६ ७ ८ ९ १० समाप्ते संपूर्णे हे

युधिष्ठिर उवाच पितामहेन विधिवद्यज्ञाः प्रोक्ता महात्मना गुणाश्चैषां यथातथ्यं प्रेत्य चेह च सर्वशः १ न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं पितामह बहूपकरणा यज्ञा नानासंभारविस्तराः २ पार्थिवै राजपुत्रैर्वा शक्याः प्राप्तुं पितामह नार्थन्यूनैरवगुणैरेकात्मभिरसंहतैः ३ यो दरिद्रैरपि विधिः शक्यः प्राप्तुं सदा भवेत अर्थन्यूनैरवगुणैरेकात्मभिरसंहतैः ४ तुल्यो यज्ञफलैरेतैस्तन्मे ब्रूहि पितामह भीष्म उवाच इदमंगिरसा प्रोक्तमुपवासफलात्मकम् विधियज्ञफलैस्तुल्यं तन्निबोध युधिष्ठिर ५ यस्तु कल्यं तथा सायं भुंजानो नांतरा पिबेत् अहिंसानिरतो नित्यं जुह्वानो जातवेदसम् ६ षड्भिरेव स वर्षैस्तु सिंध्यते नात्र संशयः तप्तकांचनवर्णं च विमानं लभते नरः ७ देवस्त्रीणामधीवासे नृत्यगीतनिनादिते प्राजापत्ये वसेत्पद्मं वर्षाणामग्निसंनिभे ८ त्रीणि वर्षाणि यः प्राशेत्सततं त्वेकभोजनम् धर्मपत्नीरतो नित्यमग्निष्टोमफलं लभेत् ९ यज्ञं बहुसुवर्णं वा वासवप्रियमाचरेत् सत्यवाग्दानशीलश्च ब्रह्मण्यश्चानसूयकः क्षांतो दांतो जितक्रोधः स गच्छति परां गतिम् १० पांडुराभ्रप्रतीकाशे विमाने हंसलक्षणे द्वे समाप्ते ततः पद्मे सोऽप्सरोभिर्वसेत्सह ११ द्वितीये दिवसे यस्तु प्राश्नीयादेकभोजनम् सदा द्वादश मासांस्तु जुह्वानो जातवेदसम् १२ अग्निकार्यपरो नित्यं नित्यं कल्यप्रबोधनः अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः १३ हंससारसयुक्तं च विमानं लभते नरः इंद्रलोके च वसते वरस्त्रीभिः समावृतः १४ तृतीये दिवसे यस्तु प्राश्नीयादेकभोजनम् सदा द्वादश मासांस्तु जुह्वानो जातवेदसम् १५ अग्निकार्यपरो नित्यं नित्यं कल्यप्रबोधनः अतिरात्रस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् १६ मयूरहंसयुक्तं च विमानं लभते नरः सप्तर्षीणां सदा लोके सोऽप्सरोभिर्वसेत्सह १७ निवर्त्तनं च तत्रास्य त्रीणि पद्मानि वै विभुः १८ दिवसे यश्चतुर्थे तु प्राश्नीयादेकभोजनम् सदा द्वादश मासान्वै जुह्वानो जातवेदसम् १९ वाजपेयस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् इंद्रकन्याभिरूढं च विमानं लभते नरः २० सागरस्य च पर्यंते वासवं लोकमावसेत् देवराजस्य च क्रीडां नित्यकालमवेक्षते २१ दिवसे पंचमे यस्तु प्राश्नीयादेकभोजनम् सदा द्वादश मासांस्तु जुह्वानो जातवेदसम् २२ अलुब्धः सत्यवादी च ब्रह्मण्यश्चाविहिंसकः अनसूयुरपापस्थो द्वादशाहफलं लभेत् २३ जांबूनदमयं दिव्यं विमानं हंसलक्षणम् सूर्यमालासमाभासमारोहेत्पांडुरं गृहम् २४ आवर्तनानि चत्वारि तथा पद्मानि द्वादश शरांग्निपरिमाणं च तत्रासौ वसते सुखम् २५

पद्मवर्षाणां निगीय शनको
टयर्णकपद्यं ११ १२ १३ १४ १५ १६ १७ निवर्त्तन नियमेन वर्त्तन १८ १९ २० २१ २२ २३ २४ आवर्त्तनानि वर्षाणि चत्वारि द्वादश चेति पोडशपद्मानि तथा शरा
ग्निरग्नि पंचत्रिंशत् वर्षमंक पंचाशत्यद्मानि २५

२६ २७ २८ २९ ऊर्ध्वत्वसामान्यात्पताकामहापद्मारव्यासंख्याविशेषः ३० ३१ ३२ रुक्मनोवर्णकं स्वक्चंदनादि ३३ ३४ ३५ ३६

दिवसेयस्तुषष्ठेवैमुनिःप्राशेतभोजनम् सदाद्वादशमासान्वैजुह्वानोजातवेदसम् २६ सदात्रिषवणस्नायीब्रह्मचार्यनसूयकः गवामेध
स्ययज्ञस्यफलंप्राप्नोत्यनुत्तमम् २७ अग्निज्वालासमाभासंहंसबर्हिणसेवितम् शातकुंभमयंयुक्तंसाधयेद्यानमुत्तमम् २८ नयेद्वा
प्सरसामंकेप्रतिसुप्तःप्रबोध्यते नूपुराणांनिनादेनमेखलानांचनिःस्वनैः २९ कोटिसहस्रंवर्षाणांत्रीणिकोटिशतानिच पद्मान्यष्टाद
शतथापताकेद्वेतथैवच ३० अयुतानिचपंचाशदृक्षचर्मशतस्यच लोम्नांप्रमाणेनसमंब्रह्मलोकेमहीयते ३१ दिवसेसप्तमेयस्तु
प्राश्नीयादेकभोजनम् सदाद्वादशमासान्वैजुह्वानोजातवेदसम् ३२ सरस्वतींगोपयानोब्रह्मचर्यंसमाचरन् रुक्मनोवर्णकंचैवम-
धुमांसंचवर्जयन् ३३ पुरुषोमरुतांलोकमिंद्रलोकंचगच्छति तत्रतत्रहिसिद्धार्थोदेवकन्याभिरर्च्यते ३४ फलंबहुसुवर्णस्यय
ज्ञस्यलभतेनरः संख्यामतिगुणाचापितेषुलोकेषुमोदते ३५ यस्तुसंवत्सरंक्षांतोभुंक्तेहन्यष्टमेनरः देवकार्यपरोनित्यंजुह्वानोजा
तवेदसम् ३६ पौंडरीकस्ययज्ञस्यफलंप्राप्नोत्यनुत्तमं पद्मवर्णनिभंचैवविमानमधिरोहति ३७ कृष्णाःकनकगौर्यश्चनार्यःश्या-
मास्तथापराः वयोरूपविलासिन्योलभतेनात्रसंशयः ३८ यस्तुसंवत्सरंभुंक्तेनवमेनवमेहनि सदाद्वादशमासान्वैजुह्वानोजातवे
दसम् ३९ अश्वमेधसहस्रस्यफलंप्राप्नोत्यनुत्तमम् पुंडरीकप्रकाशंचविमानंलभतेनरः ४० दीप्तसूर्याग्नितेजोभिर्दिव्यमालाभि
रेवच नीयतेरुद्रकन्याभिःसोंतरिक्षंसनातनम् ४१ अष्टादशसहस्राणिवर्षाणांकल्पमेवच कोटिशतसहस्रंचतेषुलोकेषुमोदते
४२ यस्तुसंवत्सरंभुंक्तेदशाहेवैगतेगते सदाद्वादशमासान्वैजुह्वानोजातवेदसम् ४३ ब्रह्मकन्यानिवासेचसर्वभूतमनोहरे अ
श्वमेधसहस्रस्यफलंप्राप्नोत्यनुत्तमम् ४४ रूपवत्यश्चतंकन्यारमयंतिसनातनम् नीलोत्पलनिभैर्वर्णैरक्तोत्पलनिभैस्तथा ४५
विमानमंडलावर्तमावर्तगहनाकुलम् सागरोर्मिप्रतीकाशंसलभेद्यानमुत्तमम् ४६ विचित्रमणिमालाभिर्नादितंशंखनिःस्वनैः
स्फाटिकैर्वज्रसारैश्चस्तंभैःसुकृतवेदिकम् ४७ आरोहतिमहद्यानंहंससारसनादितम् एकादशेतुदिवसेयःप्राप्तेप्राशतेहविः ४८
सदाद्वादशमासांस्तुजुह्वानोजातवेदसम् परस्त्रियंनाभिलषेद्वाचाथमनसापिवा अनृतंचनभाषेतमातापित्रोःकृतेपिवा ४९
अभिगच्छेन्महादेवंविमानस्थंमहाबलम् अश्वमेधसहस्रस्यफलंप्राप्नोत्यनुत्तमम् ५०

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८

स्नारं भुवंचपश्येतर्विमानंसमुपस्थितम् कुमार्यः कांचनाभासारूपवंत्योनयंतितम् ५१ रुद्राणांतमधीवासंदिविदिव्यंमनोहरः वर्षाण्यपरि
मेयानियुगांताग्निसमप्रभः ५२ कोटिशतसहस्रंचदशकोटिशतानिच रुद्रंनित्यंप्रणमतेदेवदानवसंमतम् सतस्मैदर्शनंप्राप्तोदि
वसेदिवसेभवेत् ५३ दिवसेद्वादशेयस्तुप्राप्तेवैप्राशतेहविः सदाद्वादशमासान्वैसर्वमेधफलंलभेत् ५४ आदित्यद्वादशेतस्यावि-
मानंसंविधीयते मणिमुक्ताप्रवालैश्चमहार्हैरुपशोभितम् ५५ हंसभासापरिक्षिप्तंनागवीथीसमाकुलम् मयूरैश्चक्रवाकैश्चकू
जद्भिरुपशोभितम् ५६ अट्टैर्महद्भिःसंयुक्तंब्रह्मलोकेप्रतिष्ठितम् नित्यमावसथेराजन्नरनारीसमावृतम् ऋषिरेवंमहाभागस्तं
गिराप्राहधर्मवित् ५७ त्रयोदशेतुदिवसेप्राप्तेयःप्राशतेहविः सदाद्वादशमासान्वैदेवसत्रफलंलभेत् ५८ रक्तपद्मोदयनामविमा
नंसाधयेन्नरः जातरूपमयुक्तंचरत्नसंचयभूषितम् ५९ देवकन्याभिराकीर्णंदिव्याभरणभूषणम् पुण्यगंधोदयंदिव्यंवायव्यैरुप
शोभितम् ६० तत्रशंकुपताकेद्वेयुगांतंकल्पमेवच अयुतायुतंतथापद्मंसमुद्रंचतथावसेत् ६१ गीतगंधर्वघोषैश्चभेरीपणवनिःस्व
नैः सदाप्रह्लादितस्ताभिर्देवकन्याभिरिज्यते ६२ चतुर्दशेतुदिवसेयःपूर्णेप्राशतेहविः सदाद्वादशमासांस्तुमहामेधफलंलभेत् ६३
अनिर्देश्यवयोरूपादेवकन्याःस्वलंकृताः मृष्टतप्तांगदधराविमानेरनुयांतितम् ६४ कलहंसविनिर्घोषैर्नूपुराणांचनिःस्वनैः कांचीनां
चसमुत्कर्षैस्तत्रतत्रनिबोध्यते ६५ देवकन्यानिवासेचतस्मिन्वसतिमानवः जान्हवीवालुकाकीर्णंपूर्णंसंवत्सरंनरः ६६ यस्तुपक्षेग-
तेभुंक्तेएकभक्तंजितेंद्रियः सदाद्वादशमासांस्तुजुह्वानोजातवेदसम् ६७ राजसूयसहस्रस्यफलंप्राप्नोत्यनुत्तमम् यानमारोहतेदि
व्यंहंसबर्हिणसेवितम् ६८ मणिमंडलकैश्चित्रंजातरूपसमावृतम् दिव्याभरणशोभाभिर्वरस्त्रीभिरलंकृतम् ६९ एकस्तंभंचतुर्द्वा
रंसप्तभौमंसुमंगलम् वैजयंतीसहस्रैश्चशोभितंगीतनिःस्वनैः दिव्यंदिव्यगुणोपेतंविमानमधिरोहति ७० मणिमुक्ताप्रवालैश्च
भूषितंवैद्युतंलभेत् वसेद्युगसहस्रंचखड्गकुंजरवाहनः ७१ षोडशेदिवसेप्राप्तेयःकुर्यादेकभोजनं सदाद्वादशमासान्वैसोमयज्ञ
फलंलभेत् ७२ सोमकन्यानिवासेषुसोध्यावसतिनित्यशः सौम्यगंधानुलिप्तश्चकामकारगतिर्भवेत् ७३ सुदर्शनाभिर्नारीभि-
र्मधुराभिस्तथैवच अर्च्यंतेवैविमानस्थःकामभोगैश्चसेव्यते ७४ फलंपद्मशतप्रख्यंमहाकल्पंदशाधिकम् आवर्त्तनानिचत्वारि-
सागरेयात्यसौनरः ७५

६९ ७० ७१ ७२ ७३ ७४ ७५

७६ ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४

दिवसेसत्यदशमेयःप्रास्तेप्राशतेहविः सदाद्वादशमासान्वैजुह्वानोजातवेदसम् ७६ स्थानंवारुणमैंद्रंचरौद्रंवाप्यधिगच्छति मारु
तोशनसेचैवब्रह्मलोकंचगच्छति ७७ तत्रदैवतकन्याभिरासनेनोपचर्यते भूर्भुवंचापिदेवर्षिविश्वरूपमवेक्षते ७८ तत्रदेवाधि
देवस्यकुमार्योरमयंतितम् द्वात्रिंशद्रूपधारिण्योमधुराःसमलंकृताः ७९ चंद्रादित्यावुभौयावद्गगनेचरतःप्रभो तावच्चरत्यसौधी
रैःसुधामृतरसाशनः ८० अष्टादशेयोदिवसेप्राश्नीयादेकभोजनम् सदाद्वादशमासान्वैसप्तलोकान्सपश्यति ८१ रथैःसनंदि
घोषैश्चपृष्ठतःसोनुगम्यते देवकन्याधिरूढैस्तुभ्राजमानैःस्वलंकृतैः ८२ व्याघ्रसिंहप्रयुक्तंचमेघस्वननिनादितम् विमानमुत्तमं
दिव्यंससर्वोत्द्यधिरोहति ८३ तत्रकल्पसहस्रंसकन्याभिःसहमोदते सुधारसंचभुंजीतअमृतोपममुत्तमम् ८४ एकोनविंश
तिद्दिनेयोभुंक्तेएकभोजनम् सदाद्वादशमासान्वैसप्तलोकान्सपश्यति ८५ उत्तमंलभतेस्थानमप्सरोगणसेवितम् गंधर्वैरुपगी
तंचविमानंसूर्यवर्चसम् ८६ तत्रामरवरस्त्रीभिर्मोदतेविगतज्वरः दिव्यांबरधरःश्रीमानयुतानांशतंशतम् ८७ पूर्णेयविंशेदिवसे-
योभुंक्तेत्वेकभोजनम् सदाद्वादशमासांस्तुसत्यवादीधृतव्रतः ८८ अमांसाशीब्रह्मचारीसर्वभूतहितेरतः सलोकान्विपुलान्र
म्यानादित्यानामुपाश्नुते ८९ गंधर्वैरप्सरोभिश्चदिव्यमाल्यानुलेपनैः विमानैःकांचनैर्हृद्यैःपृष्ठतश्चानुगम्यते ९० एकविंशेतुदिव
सेयोभुंक्तेत्येकभोजनम् सदाद्वादशमासान्वैजुह्वानोजातवेदसम् ९१ लोकमौशनसंदिव्यंशक्रलोकंचगच्छति अश्विनोर्मरुतांचैववसु
रेवधाभिरंतःसदा ९२ अनभिज्ञश्चदुःखानांविमानवरमास्थितः सेव्यमानोवरस्त्रीभिःक्रीडत्यमरवत्प्रभुः ९३ द्वाविंशेदिवसेप्राप्तेयोभु-
क्तेत्येकभोजनम् सदाद्वादशमासान्वैजुह्वानोजातवेदसम् ९४ अहिंसानिरतोधीमान्सत्यवागनसूयकः लोकान्वसूनामाप्नोतिदिवाकर
समप्रभः ९५ कामचारीसुधाहारोविमानवरमास्थितः रमतेदेवकन्याभिर्दिव्याभरणभूषितः ९६ त्रयोविंशेतुदिवसेप्राशेद्यस्त्वेकभोजन
म् सदाद्वादशमासांस्तुमिताहारोजितेंद्रियः ९७ वायोरुशनसश्चैवरुद्रलोकंचगच्छति कामचारीकामगतःपूज्यमानोप्सरोगणैः ९८
अनेकगुणपर्यंतविमानवरमास्थितः रमतेदेवकन्याभिर्दिव्याभरणभूषितः ९९ चतुर्विंशेतुदिवसेयःप्रास्तेप्राशतेहविः सदाद्वादशमा
सांश्चजुह्वानोजातवेदसम् १०० आदित्यानामधीवासेमोदमानोवसेच्चिरम् दिव्यमाल्यांबरधरोदिव्यगंधानुलेपनः १ विमानेकांचनेदिव्ये
हंसयुक्तेमनोरमे रमतेदेवकन्यानांसहस्रैरयुतैस्तथा २

९५ ९६ ९७ ९८ ९९ १०० १०१ १०२ ७७ ७७ ७७

१०३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

पंचविंशंतु दिवसे यः प्राशेदेकभोजनम् सदा द्वादश मासांस्तु पुष्पकं यानमारुहेत् १०३ सिंहव्याघ्रप्रयुक्तैस्तु मेघनिःस्वननादितैः
सरथैर्नंदिघोषैश्च पृष्ठतो ह्यनुगम्यते ४ देवकन्यासमारूढैः कांचनैर्विमलैः शुभैः विमानमुत्तमं दिव्यमास्थाय स मनोहरम् ५ तत्र कल्प
सहस्राणि वसते स्त्रीशतावृते सुधारसं चोपजीवन्नमृतोपममुत्तमम् ६ षड्विंशद्दिवसे यस्तु प्रकुर्यादेकभोजनम् सदा द्वादश मासांस्तु नि
यतो नियताशनः ७ जितेंद्रियो वीतरागो जुह्वानो जातवेदसम् संप्राप्नोति महाभागः पूज्यमानोऽप्सरोगणैः ८ सप्तानां मरुतां लोकान् वसू
नां चापि सोऽश्नुते विमाने स्फाटिके दिव्ये सर्वरत्नैरलंकृते ९ गंधर्वैरप्सरोभिश्च पूज्यमानः प्रमोदते द्वे युगानां सहस्रे तु दिव्ये दिव्येन तेजसा १०
सप्तविंशेथ दिवसे यः कुर्यादेकभोजनम् सदा द्वादश मासांस्तु जुह्वानो जातवेदसम् ११ फलमाप्नोति विपुलं देवलोके च पूज्यते अमृताशी व
सत्यत्र स वितृष्णः प्रमोदते १२ देवर्षिचरितं राजन् राजर्षिभिरनुष्ठितम् अध्यावसति दिव्यात्मा विमानवरमास्थितः १३ स्त्रीभिर्मनोभिरा
माभिः रममाणो मदोत्कटः युगकल्पसहस्राणि त्रीण्यावसति वै सुखम् १४ योऽष्टाविंशंतु दिवसं प्राश्नीयादेकभोजनम् सदा द्वादश मासांस्तु-
जितात्मा विजितेंद्रियः १५ फलं देवर्षिचरितं विपुलं समुपाश्नुते भोगवांस्तेजसा भाति सहस्रांशुरिवामलः १६ सुकुमार्यश्च नार्यस्तं रममाणाः
सुवर्चसः पीनस्तनोरुजघना दिव्याभरणभूषणाः १७ रमयंति मनःकांते विमाने सूर्यसन्निभे सर्वकामगमे दिव्ये कल्पायुतशतं समाः १८ ए
कोनत्रिंशद्दिवसे यः प्राशेदेकभोजनम् सदा द्वादश मासान्वै सत्यव्रतपरायणः १९ यस्य लोकाः शुभा दिव्या देवराजर्षिपूजिताः विमानं सूर्य
चंद्राभं दिव्यं समधिगच्छति २० जातरूपमयं युक्तं सर्वरत्नसमन्वितम् अप्सरोगणसंपूर्णं गंधर्वैरभिनादितम् २१ तत्र चैनं शुभा नार्यो-
दिव्याभरणभूषिताः मनोभिरामा मधुरा रमयंति मदोत्कटाः २२ भोगवांस्तेजसा युक्तो वैश्वानरसमप्रभः दिव्यो दिव्येन वपुषा भ्राजमान
इवामरः २३ वसूनां मरुतां चैव साध्यानामश्विनोस्तथा रुद्राणां च महाराज ब्रह्मलोकं च गच्छति २४ यस्तु मासे गते भुंक्ते एकभक्तं शमात्म
कः सदा द्वादश मासान्वै ब्रह्मलोकमवाप्नुयात् २५ सुधारसकृताहारः श्रीमान्सर्वमनोहरः तेजसा वपुषा लक्ष्म्या भ्राजते रश्मिवानिव २६ दि
व्यमाल्यांबरधरो दिव्यगंधानुलेपनः सुखेष्वभिरतो भोगी दुःखानामविजानकः २७ स्वयंप्रभाभिर्नारीभिर्विमानस्थो महीयते रुद्रदेव-
विकन्याभिः सततं चाभिपूज्यते २८

२० २१ २२ २३ २४ २५ २६ २७ २८ ७. ७. ७. ७.

२९ ३० ३१ ३२ ३३ ३४ ३५ अभ्रमेघस्तस्यावकाशो आकाशं तच्छीलस्तद्धनिर्मन्दः ३६ ३७ ३८ ३९ ४० ४१ १४२ इतिश्री

नानारमणरूपाभिर्नानारागाभिरेव च नानामधुरभाषाभिर्नानारतिभिरेव च २९ विमाने गगनाकारे सूर्यवैदूर्यसन्निभे पृष्ठतः सोमसं
काशे उदक्चैवाभ्रसन्निभे ३० दक्षिणायां तु रक्ताभे अधस्तान्नीलमंडले ऊर्ध्वं विचित्रसंकाशे नैको वसति पूजितः ३१ यावद्वर्षसहस्रं वै
जम्बुद्वीपे प्रवर्षति तावत्संवत्सरा प्रोक्ता ब्रह्मलोकस्य धीमतः ३२ विप्रुषश्चैव यावत्यो निपतन्ति नभस्तलात् वर्षासु वर्षतस्तावन्निवसत्यमर
प्रभः ३३ मासोपवासी वर्षैस्तु दशभिः स्वर्गमुत्तमम् महर्षित्वमथासाद्य सशरीरगतिर्भवेत् ३४ मुनिर्दान्तो जितक्रोधो जितशिश्नोदरः सदा
जुह्वदग्नींश्च नियतः संध्योपासनसेविता ३५ बहुभिर्नियमैरेवं शुचिरश्नाति यो नरः अभ्रावकाशशीलश्च तस्य भानोरिव त्विषः ३६ दिवं
गत्वा शरीरेण स्वेन राजन्यथामरः स्वर्गं पुण्यं यथाकाममुपभुङ्क्ते तथाविधः ३७ एष ते भरतश्रेष्ठ यज्ञानां विधिरुत्तमः व्याख्यातो ह्यानुपूर्व्येण
उपवासफलात्मकः ३८ दरिद्रैर्मनुजैः पार्थ प्राप्तं यज्ञफलं तथा उपवासमिमं कृत्वा गच्छेच्च परमां गतिम् ३९ देवद्विजातिपूजायां रतो भरतसत्त
मः उपवासविधिस्त्वेष विस्तरेण प्रकीर्तितः ४० नियतेष्वप्रमत्तेषु शौचवत्सु महात्मसु दंभद्रोहनिवृत्तेषु कृतबुद्धिषु भारत ४१ अचलेष्वप्र
कंपेषु मा ते भूदत्र संशयः १४२ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे उपवासविधिर्नाम सप्ताधिकशततमोऽध्यायः १०७
युधिष्ठिर उवाच यद्वरं सर्वतीर्थानां तन्मे ब्रूहि पितामह यत्र चैव परं शौचं तन्मे व्याख्यातुमर्हसि १ भीष्म उवाच सर्वाणि खलु ती
र्थानि गुणवन्ति मनीषिणः यत्तु तीर्थं च शौचं च तन्मे शृणु समाहितः २ अगाधे विमले शुद्धे सत्यतोये धृतिह्रदे स्नातव्यं मानसे तीर्थे सत्त्वमा
लंब्य शाश्वतम् ३ तीर्थशौचमनर्थित्वमार्जवं सत्यमार्दवम् अहिंसा सर्वभूतानामानृशंस्यं दमः शमः ४ निर्ममा निरहंकारा निर्द्वन्द्वा नि
ष्परिग्रहाः शुचयस्तीर्थभूतास्ते ये भैक्ष्यमुपभुंजते ५ तत्त्ववित्त्वनहंबुद्धिस्तीर्थप्रवरमुच्यते शौचलक्षणमेतत्ते सर्वत्रैवान्ववेक्षणम्
६ रजस्तमः सत्त्वमथो येषां निर्धौतमात्मनः शौचाशौचे समायुक्ताः स्वकार्यपरिमार्गिणः ७ सर्वत्यागेष्वभिरताः सर्वज्ञाः समदर्शिनः शौ
चेन वृत्तशौचार्थास्ते तीर्थाः शुचयश्च ये ८ नोदकक्लिन्नगात्रस्तु स्नात इत्यभिधीयते स स्नातो यो दमस्नातः स बाह्याभ्यन्तरः शुचिः ९ अ
तीतेष्वनपेक्षा ये प्राप्तेष्वर्थेषु निर्ममाः शौचमेव परं तेषां येषां नोत्पद्यते स्पृहा १० प्रज्ञानं शौचमेवेह शरीरस्य विशेषतः तथा निष्किंचनत्वं च
मनसश्च प्रसन्नता ११

आनुशासनिके पर्वणि टीकायां सप्ताधिकशततमोऽध्यायः १०७ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ इतिआनुशासनिकेपर्वणिटीकायांअष्टाधिकशततमोऽध्यायः १०८ १ २

वृत्तशौचंमनःशौचंतीर्थशौचमतःपरम् ज्ञानोत्पन्नंचयच्छौचंतच्छौचंपरमंस्मृतम् १२ मनसाचप्रदीप्तेनब्रह्मज्ञानजलेनच स्नातियो
मानसेतीर्थेतत्स्नानंतत्वदर्शिनः १३ समारोपितशौचस्तुनित्यंभावसमाहितः केवलंगुणसंपन्नः शुचिरेवनरःसदा १४ शरीरस्थानिती
र्थानिप्रोक्तान्येतानिभारत पृथिव्यांयानितीर्थानिपुण्यानिशृणुतान्यपि १५ शरीरस्ययथोद्दिष्टाः शुचयःपरिकीर्तिताः तथापृथिव्याभागा
श्चपुण्यानिसलिलानिच १६ कीर्त्तनाच्चैवतीर्थस्यस्नानाच्चपितृतर्पणात् धुनंतिपापंतीर्थेषुतेप्रयांतिसुखंदिवम् १७ परिग्रहाच्चसाधूनांपृ
थिव्याश्चैवतेजसा अतीवपुण्यभागास्तेसलिलस्यचतेजसा १८ मनसश्चपृथिव्याश्चपुण्यास्तीर्थास्तथापरे उभयोरेवयःस्नायात्ससिद्धिंशी
घ्रमाप्नुयात् १९ यथाबलंक्रियाहीनंक्रियावाबलवर्जिता नेहसाधयतेकार्यंसमायुक्तातुसिध्यति २० एवंशरीरशौचेनतीर्थशौचेनचान्वितः
शुचिःसिद्धिमवाप्नोतिद्विविधंशौचमुत्तमम् २१ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेशौचानुपृच्छानामअष्टाधिकशततमो
ऽध्यायः १०८ युधिष्ठिरउवाच सर्वेषामुपवासानांयच्छ्रेयःसुमहत्फलम् यच्चाप्यसंशयंलोकेतन्मेत्वंवक्तुमर्हसि १ भीष्मउवाच
शृणुराजन्यथागीतंस्वयमेवस्वयंभुवा यत्कृत्वानिर्वृतोभूयात्पुरुषोनात्रसंशयः २ द्वादश्यांमार्गशीर्षेतु अहोरात्रेणकेशवम् अर्च्याश्वमे
धमाप्नोतिदुष्कृतंचास्यनश्यति ३ तथैवपौषमासेतुपूज्योनारायणेतिच वाजपेयमवाप्नोतिसिद्धिंचपरमांव्रजेत् ४ अहोरात्रेणद्वादश्यां
माघमासेतुमाधवम् राजसूयमवाप्नोतिकुलंचैवसमुद्धरेत् ५ तथैवफाल्गुनेमासिगोविंदेतिचपूजयन् अतिरात्रमवाप्नोतिसोमलोकंच
गच्छति ६ अहोरात्रेणद्वादश्यांचैत्रेविष्णुरितिस्मरन् पौंडरीकमवाप्नोतिदेवलोकंचगच्छति ७ वैशाखमासेद्वादश्यांपूजयन्मधुसूदन
म् अग्निष्टोममवाप्नोतिसोमलोकंचगच्छति ८ अहोरात्रेणद्वादश्यांज्येष्ठेमासित्रिविक्रमम् गवामेधमवाप्नोतिअप्सरोभिश्चमोदते ९
आषाढेमासिद्वादश्यांवामनेतिचपूजयन् नरमेधमवाप्नोतिपुण्यंचलभतेमहत् १० अहोरात्रेणद्वादश्यांश्रावणेमासिश्रीधरम् पंचयज्ञान
वाप्नोतिविमानस्थश्चमोदते ११ तथाभाद्रपदेमासिहृषीकेशेतिपूजयन् सौत्रामणिमवाप्नोतिपूतात्माभवतेचहि १२ द्वादश्यामाश्विनेमा
सिपद्मनाभेतिचार्चयन् गोसहस्रफलंपुण्यंप्राप्नुयान्नात्रसंशयः १३ द्वादश्यांकार्तिकेमासिपूज्यदामोदरेतिच गवायजमवाप्नोतिपुमान्स्त्रीवा
नसंशयः १४

अर्च्य अभ्यर्च्य ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ ७ ७ ७ ७ ७ ७

१५ तद्भावमुपेंद्रंउपेंद्रं तदात्म्यं कीटभृंगन्यायेन ध्यानेनाधिगच्छति १६ . १७ इतिनवाधिकशततमोऽध्यायः १०९ १२ इष्टकामनासिद्ध्यर्थं चांद्रव्रतमाह मार्गेमार्गशीर्षेशुक्लप्रतिपदिमूलनक्षत्रयोगेसतिदंचांद्रंव्रतमारभेत् तत्रचंद्रावयवेषुनक्षत्राणिन्यसेत् पादौमूलेनेत्यादिना स्वदेवतासहितेनमूलेनचंद्रस्यपादौ कल्पयेदित्यर्थः एवंरोहिण्यादिभिः सदेवताभिर्जंघादयः कल्पनीयाः सर्वत्र विभक्तिव्यत्यय आर्षः ३ आषाढयोरिति आषाढाद्वयंफाल्गुनीद्वयं भाद्रपदाद्वयंचज्ञेयम् ४ अत्रायंप्रयोगः पुण्याहवाचनादिपूर्वकं इष्टकाम्यार्थंव्रतंस्वीकृत्यचंद्रं आत्मानंचचंद्राभिन्नंध्यात्वातदवयवेषुतत्तदेवतासहितानि नक्षत्राणि विन्यस्यतत्तन्मंत्रैस्तेषामाराधनंजप

अर्चयेत्पुंडरीकाक्षमेवंसंवत्सरंतुयः जातिस्मरत्वंप्राप्नोतिविद्यात्बहुसुवर्णकं १५ अहन्यहनितद्भावमुपेंद्रंयोधिगच्छति समाप्तेभोजयेद्विप्रानथंवादापयेद्घृतम् १६ अतःपरंनोपलासोभवतीतिविनिश्चयः उवाचभगवान्विष्णोःस्वयमेवपुरातनम् १७ इतिश्रीम० आनुशासनिकेप० दान० विष्णोर्द्वादशकनामनवाधिकशततमोऽध्यायः १०९ वैशंपायनउवाच शरतल्पगतंभीष्मंवृद्धंकुरुपितामहम् उपगम्यमहाप्राज्ञःपर्यपृच्छद्युधिष्ठिरः १ युधिष्ठिरउवाच अङ्गानांरूपसौभाग्यंप्रियंचैवकथंभवेत् धर्मार्थकामसंयुक्तःसुखभागीकथंभवेत् २ भीष्मउवाच मार्गशीर्षस्यमासस्यचंद्रेमूलेनसंयुते पादौमूलेनराजेंद्रजंघायामथरोहिणीम् ३ अश्विन्यांसक्थिनीचैवऊरूचाषाढयोस्तथा गुह्यंतुफाल्गुनीविद्यात्कृत्तिकाकटिकास्तथा ४ नाभिंभाद्रपदेविद्याद्रेवत्यामक्षिमंडलम् पृष्ठमेवधनिष्ठासुअनुराधातुरास्तथा ५ बाहुभ्यांतुविशाखासुहस्तौहस्तेननिर्दिशेत् पुनर्वस्वंगुलीराजन्नाश्लेषासुनखास्तथा ६ ग्रीवांज्येष्ठाचराजेंद्रश्रवणेनतुकर्णयोःमुखंपुष्येणदानेनदंतोष्ठौस्वातिरुच्यते ७ हासंशतभिषांचैवमघांचैवाथनासिकाम् नेत्रेमृगशिरोविद्याल्ललाटेमित्रमेवतु ८ भरण्यांतुशिरोविद्यात्केशानार्द्रानराधिप समाप्तेतुघृतंदद्याद्ब्राह्मणेवेदपारगे ९ सुभगोदर्शनीयश्चज्ञानभाग्यश्चजायते जायतेपरिपूर्णांगःपौर्णमास्येवचंद्रमाः १० इतिश्रीम० आनु० दान० दशाधिकशततमोऽध्यायः ११० युधिष्ठिरउ० पितामहमहाप्राज्ञसर्वशास्त्रविशारद श्रोतुमिच्छामिमर्त्यानांसंसारविधिमुत्तमम् १ केनवृत्तेनराजेंद्रवर्त्तमानानराभुवि प्राप्नुवंत्युत्तमंस्वर्गंकथंचनरकंनृप २ मृतंशरीरमुत्सृज्यकाष्ठलोष्टसमंजनाः प्रयांत्यमुंलोकमितःकोवैतानुनुगच्छति ३ भीष्मउवाच अयमायातिभगवान्बृहस्पतिरुदारधीः पृच्छैनंसुमहाभागमेतद्गुह्यंसनातनम् ४ नैतदन्येनशक्यंहिवक्तुंकेनचिदद्यवै वक्ताबृहस्पतिसमोनह्यन्योविद्यतेक्वचित् ५

होमादिनाप्रत्यहंकर्त्तव्यं एवंपौर्णमासीपर्यंतंकृत्वासमाप्तेव्रतंहोमशेषंसमाप्यघृतंआचार्यायनिवेदयेत् समाप्तेतुघृतंदद्यादित्यनेनघृतमेवहोमद्रव्यंज्ञायते ५ ६ ७ ८ ९ एवंकुर्वन्विकलांगोपिपौर्णमास्यांसकलांगोभवतिएवंसदृष्टांतमाह परिपूर्णांगइति १० इतिदशाधिकशततमोऽध्यायः ११० १ २ ३ ४ ५

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ शरीरस्यनिचय अवस्थितिमितियावत् १९ २० अंतकोयम
अंतार्थंगच्छतीतियोगात् आत्मासाक्षी २१ निशेतिदिवसस्याप्युपलक्षणं एतैःसह धर्मोपूर्वरूपोजीवमनुगच्छति २२ २३ २४ २५ ननुभूतसूक्ष्मव

वैशंपायनउवाच तयोःसंवदतोरेवंपार्थगांगेययोस्तदा आजगामविशुद्धात्मानाकपृष्ठात्बृहस्पतिः ६ ततोराजासमुत्थायधृतराष्ट्र
पुरोगमाः पूजामनुपमांचक्रेसर्वेतेचसभासदः ७ ततोधर्मसुतोराजाभगवंतंबृहस्पतिम् उपगम्यक्रमान्यायंप्रश्नंपप्रच्छतत्वतः ८
युधिष्ठिरउवाच भगवन्सर्वधर्मज्ञसर्वशास्त्रविशारद मर्त्यस्यकःसहायोवैपितामातासुतोगुरुः ९ ज्ञातिसंबंधिवर्गश्चमित्रव
र्गस्तथैवच मृतशरीरमुत्सृज्यकाष्ठलोष्टसमंजनाः गच्छत्यमुत्रलोकंवैकएनमनुगच्छति १० बृहस्पतिरुवाच एकःप्रसू
यतेराजन्नेकएवविनश्यति एकस्तरतिदुर्गाणिगच्छत्येकस्तुदुर्गतिम् ११ असहायःपितामातातथाभ्रातासुतोगुरुः ज्ञातिसंबंधि
वर्गश्चमित्रवर्गस्तथैवच १२ मृतशरीरमुत्सृज्यकाष्ठलोष्टसमंजनाः मुहूर्तमिवरोदित्वाततोयांतिपराङ्मुखाः १३ तैस्तच्छरीर
मुत्सृष्टंधर्मएकोनुगच्छति तस्माद्धर्मःसहायश्चसेवितव्यःसदानृभिः १४ प्राणीधर्मसमायुक्तोगच्छेत्स्वर्गगतिपराम् तथैवाधर्म
संयुक्तोनरकंचोपपद्यते १५ तस्मान्न्यायागतैरर्थैर्धर्मंसेवेतपंडितः धर्मएकोमनुष्याणांसहायःपारलौकिकः १६ लोभान्मोहात्
नुकंपाद्वाभयाद्वाप्यबहुश्रुतः नरःकरोत्यकार्याणिपरार्थेलोभमोहितः १७ धर्मश्चार्थश्चकामश्चत्रितयंजीवितेफलम् एतत्त्रयम
वाप्तव्यमधर्मपरिवर्जितम् १८ युधिष्ठिरउवाच श्रुतंभगवतोवाक्यंधर्मयुक्तंपरंहितम् शरीरनिचयंज्ञातुंबुद्धिस्तुममजा
यते १९ मृतशरीरंहिनृणांसूक्ष्ममव्यक्ततांगतम् अचक्षुर्विषयंप्राप्तंकथंधर्मोनुगच्छति २० बृहस्पतिरुवाच पृथिवी
वायुराकाशमापोज्योतिर्मनोंतकः बुद्धिरात्माचसहिताधर्मंपश्यंतिनित्यदा २१ प्राणिनामिहसर्वेषांसाक्षिभूतादिवानिशं एतै
श्चसहधर्मोपितंजीवमनुगच्छति २२ त्वगस्थिमांसंशुक्रंचशोणितंचमहामते शरीरंवर्जयंत्येतेजीवितेनविवर्जितम् २३ त
तोधर्मसमायुक्तःसजीवःसुखमेधते इहलोकेपरेचैवकिंभूयःकथयामिते २४ ततोधर्मसमायुक्तःप्राप्तेनृतेजीवएवहि ततोस्यकर्म
पश्यंतिशुभंवायदिवाशुभम् देवताःपंचभूतस्थाःकिंभूयःश्रोतुमिच्छसि २५ युधिष्ठिरउवाच नदर्शितंभगवतायथाध
र्मोनुगच्छति एतत्तुज्ञातुमिच्छामिकथंरेतःप्रवर्तते २६

त्फलंसूक्ष्मावस्थारूपमपूर्वंजीवमनुगच्छतुरेतस्तुमूलएवस्थूलतरंकथमेभ्यःप्राणिभ्यःउत्पद्यतइत्याशंक्यतएतदितिति २६ ७ ७ ७ ७

सजीवोपूर्वेणभूतैश्चमिश्रितोवायुद्वारावृष्टित्वंप्राप्यान्नरूपेणपरिणम्यरेतोरूपीभवतीत्याह अन्नमिति २७ २८ २९ कथंसूक्ष्मतमस्यपुरुषस्यस्थूल
तरेणरेतसातादात्म्यंसत्यपिसंसर्गेअभ्रवाय्वोरिवभवतीत्याशंकते आख्यातमिति ३० भूतावेशन्यायेनपुरुषस्तैस्तैर्भूतैरेतोद्वाराशरीराकारत्वंप्राप्तैःस-
हसंगमात्रेणाभिभूयतेतादात्म्येनवर्धतेसंगाभावेतुनसुप्तसमाध्यादावित्याह आसन्नेति ३१ ततस्तादात्म्याभिमानरूपादभिभवादयंकर्तृत्वादिमानभ

बृहस्पतिरुवाच अन्नमश्नन्तियद्देवाःशरीरस्थानरेश्वर पृथिवीवायुराकाशमापोज्योतिर्मनस्तथा २७ ततस्तृप्तेषुराजेंद्रतेषुभूतेषु
पंचसु मनःषष्ठेषुशुद्धात्मन्रेतःसंपद्यतेमहत् २८ ततोगर्भःसंभवतिश्लेषात्स्त्रीपुंसयोर्नृप एतत्तेसर्वमाख्यातंभूयःकिंश्रोतु-
मिच्छसि २९ युधिष्ठिरउवाच आख्यातंमेभगवतागर्भःसंजायतेयथा यथाजातस्तुपुरुषःप्रपद्यतितदुच्यताम् ३०
बृहस्पतिरुवाच आसन्नमात्रःपुरुषस्तैर्भूतैरभिभूयते विप्रयुक्तश्चतैर्भूतैःपुनर्यात्यपरांगतिम् ३१ सर्वभूतसमायुक्तःप्राप्नुते
जीवएवहि ततोऽस्यकर्मपश्यन्तिशुभंवायदिवाशुभम् देवताःपंचभूतस्थाःकिंभूयःश्रोतुमिच्छसि ३२ युधिष्ठिरउवाच
त्वगस्थिमांसमुत्सृज्यतैश्चभूतैर्विवर्जितः जीवःसभगवन्क्वस्थःसुखदुःखेसमश्नुते ३३ बृहस्पतिरुवाच जीवःकर्मसमायु-
क्तःशीघ्रंरेतस्त्वमागतः स्त्रीणांपुष्पंसमासाद्यसूतेकालेनभारत ३४ यमस्यपुरुषैःक्लेशंयमस्यपुरुषैर्वधम् दुःखंसंसारचक्रंचनरः
क्लेशंसविंदति ३५ इहलोकेसचप्राणीजन्मप्रभृतिपार्थिव सुकृतंकर्मवैभुंक्तेधर्मस्यफलमाश्रितः ३६ यदिधर्मंयथाशक्तिजन्मप्र
भृतिसेवते ततःसपुरुषोभूत्वासेवतेनित्यदासुखम् ३७ अथांतरातुधर्मस्याप्यधर्ममुपसेवते सुखस्यानंतरंदुःखंसजीवोऽप्यधिग
च्छति ३८ अधर्मेणसमायुक्तोयमस्यविषयंगतः महद्दुःखंसमासाद्यतिर्यग्योनौप्रजायते ३९ कर्मणायेनयेनेहयस्यांयोनौप्र
जायते जीवोमोहसमायुक्तस्तन्मेनिगदतःशृणु ४० यदेतदुच्यतेशास्त्रेसेतिहासेचछंदसि यमस्यविषयंघोरंमर्त्योलोकःप्रपद्यते ४१
इहस्थानानिपुण्यानिदेवतुल्यानिभूपते तिर्यग्योन्यतिरिक्तानिगतिमंतिचसर्वशः ४२ यमस्यभवनेदिव्येब्रह्मलोकसमेगुणैः कर्मभि
र्नियतैर्बद्धोजंतुर्दुःखान्युपाश्नुते ४३ येनयेनतुभावेनकर्मणापुरुषोगतिम् प्रयातिपरुषांघोरांतत्तेवक्ष्याम्यतःपरम् ४४

वति तदस्यकर्मादिकंदेवाःपश्यंति ३२ स्थूलदेहसंगाद्युज्यतामस्यकर्तृत्वंतद्धाहेकथमस्यसुखादिसंगच्छतेइत्याशंकतेत्वगिति ३३ स्थूलदेहनाशक्षणएवस
रेतस्त्वंशुक्रक्रमेणसूक्ष्मशरीरभावमेतिततः स्त्रीणांपुष्पंसमासाद्येत्यादिस्पष्टंतद्यथातृणजलौकाअन्यत्तृणमाक्रम्यपूर्वंजहातिएवमेतदितिज्ञेयम् ३४ यम
स्येतिगर्भत्वमप्राप्तःसूक्ष्मशरीरावच्छिन्नस्तीव्रपापयोगाद्यातनांलभतइत्यर्थः ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ७

४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३

अधीत्यचतुरोवेदान्द्विजोमोहसमन्वितः पतितात्प्रतिगृह्याथखरयोनौप्रजायते ४५ खरोजीवतिवर्षाणिदशपंचचभारत खरोमृतो
बलीवर्दःसप्तवर्षाणिजीवति ४६ बलीवर्दोमृतश्चापिजायतेब्रह्मराक्षसः ब्रह्मरक्षश्चमासांस्त्रीस्ततोजायतिब्राह्मणः ४७ पतितं-
याजयित्वातुकृमियोनौप्रजायते तत्रजीवतिवर्षाणिदशपंचचभारत ४८ कृमिभावाद्विमुक्तस्तुततोजायतिगर्दभः गर्दभःपंचवर्षा
णिपंचवर्षाणिसूकरः ४९ कुक्कुटःपंचवर्षाणिपंचवर्षाणिजंबुकः श्वावर्षमेकंभवतिततोजायतिमानवः उपाध्यायस्ययःपापशिष्यः
कुर्यादबुद्धिमान् ५० सजीवईहसंसारांस्त्रीनाप्नोतिनसंशयः प्राक्श्वाभवतिराजेंद्रततःक्रव्यात्ततःखरः ततःप्रेतःपरिक्लिष्टःपश्चा
ज्जायतिब्राह्मणः ५१ मनसापिगुरोर्भार्यांयःशिष्योयातिपापकृत् सउग्रान्प्रेतिसंसारानधर्मेणेहचेतसा ५२ श्वयोनौतुससंभूत-
स्त्रीणिवर्षाणिजीवति तत्रापिनिधनंप्राप्तःकृमियोनौप्रजायते ५३ कृमिभावमनुप्राप्तोवर्षमेकंतुजीवति ततस्तुनिधनंप्राप्तोब्रह्म
योनौप्रजायते ५४ यदिपुत्रसमंशिष्यंगुरुर्हन्यादकारणे आत्मनःकामकारेणसोपिहिस्रःप्रजायते ५५ पितरंमातरंचैवयस्तुपुत्रो
ऽवमन्यते सोपिराजन्मृतोजंतुःपूर्वंजायेतगर्दभः ५६ गर्दभत्वंतुसंप्राप्यदशवर्षाणिजीवति संवत्सरंतुकुंभीरस्ततोजायेतमानवः ५७
पुत्रस्यमातापितरौयस्यरुष्टावुभावपि गुर्वपध्यानतःसोपिमृतोजायतिगर्दभः ५८ खरोजीवतिमासांस्तुदशश्वाचचतुर्दश बिडा
लःसप्तमासांस्तुततोजायतिमानवः ५९ मातापितरावाक्रुश्यसारिकःसंप्रजायते ताडयित्वातुतावेवजायतेकच्छपोनृप ६० कच्छ
पोदशवर्षाणित्रीणिवर्षाणिशल्यकः व्यालोभूत्वाचषण्मासांस्ततोजायतिमानुषः ६१ भर्तृपिंडमुपाश्नन्योराजद्विष्टानिसेवते सो
पिमोहसमापन्नोमृतोजायतिवानरः ६२ वानरोदशवर्षाणिपंचवर्षाणिमूषिकः श्वाथभूत्वातुषण्मासांस्ततोजायतिमानुषः ६३
न्यासापहर्तातुनरोयमस्यविषयंगतः संसाराणांशतंगत्वाकृमियोनौप्रजायते ६४ तत्रजीवतिवर्षाणिदशपंचचभारत दुष्कृतस्य
क्षयंकृत्वाततोजायतिमानुषः ६५ असूयकोनरश्चापिमृतोजायतिशार्ङ्गकः विश्वासहर्तातुनरोमीनोजायतिदुर्मतिः ६६ भूत्वामी
नोष्टवर्षाणिमृतोजायतिभारत मृगस्तुचतुरोमासांस्ततश्छागःप्रजायते ६७ छागस्तुनिधनंप्राप्यपूर्णेसंवत्सरेततः कीटःसंजाय
तेजंतुस्ततोजायतिमानुषः ६८ धान्यान्यवांस्तिलान्माषान्कुलित्थान्सर्षपांश्चणान् कलापानथमुद्गांश्चगोधूमानतसीस्तथा ६९

६४ ६५ ६६ ६७ ६८ ६९ ७ ७ ७ ७ ७ ७ ७ ७ ७

सस्यस्यान्यस्य हर्त्ता च मोहाज्जंतुरचेतनः सजायते महाराज मूषिको निरपत्रपः ७० ततः प्रेत्य महाराज मृतो जायति सूकरः सूकरो
जातमात्रस्तु रोगेण म्रियते नृपः ७१ श्वा ततो जायते मूढः कर्मणा तेन पार्थिव भूत्वा श्वा पंच वर्षाणि ततो जायति मानवः ७२ परदारा
भिमर्षं तु कृत्वा जायति वै वृकः श्वा सृगालस्ततो गृध्रो व्यालः कंकोबकस्तथा ७३ भ्रातुर्भार्यां तु पापात्मा यो धर्षयति मोहितः पुंस्को-
किलत्वमाप्नोति सोपि संवत्सरं नृप सखिभार्यां गुरोर्भार्यां राजभार्यां तथैव च ७४ प्रधर्षयित्वा कामात्म मृतो जायति सूकरः सूकरः
पंच वर्षाणि दश वर्षाणि श्वाविधः पिपीलिकस्तु मासांस्त्रीन्कीटः स्यान्मासमेव तु ७५ एतानासाद्य संसारान् कृमियोनौ प्रजायते
तत्र जीवति मासांस्तु कृमियोनौ चतुर्दश ततोऽधर्मक्षयं कृत्वा पुनर्जायति मानवः ७६ उपस्थिते विवाहे तु यज्ञे दाने पि वा विभो मो
हात्करोति यो विघ्नं स मृतो जायते कृमिः ७७ कृमिर्जीवति वर्षाणि दश पंच च भारत अधर्मस्य क्षयं कृत्वा ततो जायति मानवः ७८
पूर्वं दत्वा तु यः कन्यां द्वितीये दातुमिच्छति सोपि राजन्मृतो जंतुः कृमियोनौ प्रजायते ७९ तत्र जीवति वर्षाणि त्रयोदश युधिष्ठिर
अधर्मसंक्षये युक्तस्ततो जायति मानवः ८० देवकार्यमकृत्वा तु पितृकार्यमथापि वा अनिर्वाप्य समश्नन्वै मृतो जायति वायसः
८१ वायसः शतवर्षाणि ततो जायति कुक्कुटः जायते व्यालकश्चापि मासं तस्मात्तु मानुषः ८२ ज्येष्ठं पितृसमं चापि भ्रातरं यो वमन्यते सो-
पि मृत्युमुपागम्य क्रौंचयोनौ प्रजायते ८३ क्रौंचो जीवति वर्षं तु ततो जायति चीरकः ततो निधनमापन्नो मानुषत्वमुपाश्नुते ८४ वृषलो
ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ततः संप्राप्य निधनं जायते सूकरः पुनः ८५ सूकरो जातमात्रस्तु रोगेण म्रियते नृप श्वा ततो जायते
मूढः कर्मणा तेन पार्थिव ८६ श्वा भूत्वा कृतकर्मासौ जायते मानुषस्ततः तत्रापत्यं समुत्पाद्य मृतो जायति मूषिकः ८७ कृतघ्नस्तु मृतो रा
जन्यमस्य विषयं गतः यमस्य पुरुषैः क्रुद्धैर्वधं प्राप्नोति दारुणम् ८८ दंडं समुद्गरं शूलमग्निकुंभं च दारुणम् असिपत्रवनं घोरं वालु
कं कूटशाल्मली ८९ एताश्चान्याश्च बह्वीश्च यमस्य विषयं गतः यातनाः प्राप्य तत्रोग्रास्ततो [illegible]भारत ९० ततो हतः कृतघ्नः स
तत्रोग्रै भरतर्षभ संसारचक्रमासाद्य कृमियोनौ प्रजायते ९१ कृमिर्भवति वर्षाणि दश पंच च भारत ततो गर्भं समासाद्य तत्रैव म्रि
यते शिशुः ९२ ततो गर्भशतैर्जंतुर्बहुभिः संप्रपद्यते संसारांश्च बहून्गत्वा ततस्तिर्यक्षु जायते ९३ ततो दुःखमनुप्राप्य बहुवर्षगणा-
निह अपुनर्भवसंयुक्तस्ततः कूर्मः प्रजायते ९४

९५ निष्पावंराजमाषंहल्लगोलकः दीर्घपुच्छोगोलरूपीकीटविशेषः ९६ कुंभोलूकउलूकजातिभेदः ९७ हारितःपक्षिविशेषः ९८ ९९ पत्रोर्णधौतकौशेयं

दधितक्रंलावकश्चापिपूर्णोमत्स्यानसंस्कृतान् चोरयित्वातुदुर्बुद्धिर्मधुदंशःप्रजायते ९५ फलंवामूलकंहृत्वाअपूपंवापिपीलिकाः चो
रयित्वाचनिष्पावंजायतेहलगोलकः ९६ पायसंचोरयित्वातुनिस्त्रिंशत्वमवाप्नुते हृत्वापिष्टमयंपूपंकुंभोलूकःप्रजायते ९७ अ
योहृत्वातुदुर्बुद्धिर्वायसोजायतेनरः कांस्यंहृत्वातुदुर्बुद्धिर्हारितोजायतेनरः ९८ राजतंभाजनंहृत्वाकपोतःसंप्रजायते हृत्वातु
कांचनंभांडंकृमियोनौप्रजायते ९९ पत्रोर्णंचोरयित्वातुकृकलत्वंनियच्छति कौशिकंतुततोहृत्वानरोजायतिवर्त्तकः १०० अंशु
कंचोरयित्वातुशुकोजायतिमानवः चोरयित्वादुकूलंतुमृतोहंसःप्रजायते १०१ क्रौंचःकार्पासिकंहृत्वामृतोजायतिमानवः चोर-
यित्वानरःपट्टंत्वाविकंचैवभारत २ शशोमृगयस्त्वमादायशशोजंतुःप्रजायते वर्णान्हृत्वातुपुरुषोमृतोजायतिबर्हिणः ३ हृत्वार-
क्तानिवस्त्राणिजायतेजीवजीवकः वर्णकादींस्तथागंधांश्चोरयित्वेहमानवः ४ छुछुंदरित्वमाप्नोतिराजन्लोभपरायण तत्रजीव
तिवर्षाणिततोदशचपंचच ५ अधर्मस्यक्षयंगत्वाततोजायतिमानुषः चोरयित्वापयश्चापिबलाकासंप्रजायते ६ यस्तुचोरयते
तैलंनरोमोहसमन्वितः सोपिराजन्मृतोजंतुस्तैलपायीप्रजायते ७ अशस्त्रंपुरुषंहत्वासशस्त्रःपुरुषाधमः अर्थार्थीयदिवावैरी
सम्मृतोजायतेखरः ८ खरोजीवतिवर्षेद्वेततःशस्त्रेणवध्यते समृतोमृगयोनौतुनित्योद्विग्नोभिजायते ९ मृगोवध्यतिशस्त्रेण
गतेसंवत्सरेतुसः हतोमृगस्ततोमीनःसोपिजालेनबध्यते १० मासेचतुर्थेसंप्राप्तेश्वापदःसंप्रजायते श्वापदोदशवर्षाणिद्वी
पिवर्षाणिपंचच ११ ततस्तुनिधनंप्राप्तःकालपर्यायचोदितः अधर्मस्यक्षयंकृत्वाततोजायतिमानुषः १२ स्त्रियंहत्वातुदुर्बुद्धियम
स्यविषयगतः बहून्क्लेशान्समासाद्यसंसारांश्चैवविंशतिम् १३ ततःपश्चान्महाराजकृमियोनौप्रजायते कृमिर्विंशतिवर्षाणिभूत्वा
जायतिमानुषः १४ भोजनंचोरयित्वातुमक्षिकाजायतेनरः मक्षिकासंघवशगोबहून्मासान्भवत्युत १५ ततःपापक्षयंकृत्वामानु
षत्वमवाप्नुते धान्यंहृत्वातुपुरुषोलोमशःसंप्रजायते १६ तथापिण्याकसंमिश्रमशनंचोरयन्नरः प्रजायतेब्रह्मसमोदारुणोमू
षिकोनरः १७ दशन्वैमानुषान्नित्यंपापात्मासविशांपते घृतंहृत्वातुदुर्बुद्धिःकाकमद्गुःप्रजायते १८ मत्स्यमांसमयोहृत्वाकाकोजा
यतिदुर्मतिः लवणंचोरयित्वातुचीरिकाकःप्रजायते १९ विश्वासेनतुनिक्षिप्तंयोविनिह्नुतिमानवः सगतायुर्नरस्तातमत्स्ययोनौप्र
जायते २०

१०० १ २ वर्णान्हरितालादीन् ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ काकमद्गुःभृंगवान्जलपक्षी १८
१९ २० ७

मत्स्ययोनिमनुप्राप्यमृतोजायतिमानुषः मानुषत्वमनुप्राप्यक्षीणायुरुपपद्यते २१ पापानितुनराःकृत्वातिर्यग्जायंतिभारत नचात्मनः
प्रमाणंतेधर्मंजानंतिकिंचन २२ येपापानिनराःकृत्वानिरस्यंतिव्रतैःसदाः सुखदुःखसमायुक्ताव्याधितास्तेभवंत्युत २३ असंवासाः
प्रजायंतेम्लेच्छाश्चापिनसंशयः नराःपापसमाचारालोभमोहसमन्विताः २४ वर्जयंतिचपापानिजन्मप्रभृतियेनराः अरोगारूपवं
तस्तेधनिनश्चभवंत्युत २५ स्त्रियोप्येतेनकल्पेनकृत्वापापमवाप्नुयुः एतेषामेवजंतूनांभार्यात्वमुपयांतिताः १६ परस्वहरणेदोषाः
सर्वएवप्रकीर्तिताः एतद्धिलेशमात्रेणकथ्यतेमयानघ २७ अपरस्मिन्कथायोगेभूयःश्रोष्यसिभारत एतन्मयामहाराजब्रह्मणो
वदतःपुरा २८ सुरर्षीणांश्रुतंमध्येपृष्टश्चापियथातथम् २९ मयापितच्चकार्त्स्न्येनयथावदनुवर्णितम् एतच्छ्रुत्वामहाराजध-
र्मेकुरुमनःसदा १३० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेसंसारचक्रनामएकादशाधिकशततमोऽध्यायः १११
युधिष्ठिरउवाच अधर्मस्यगतिर्ब्रह्मन्कथितामेत्वयानघ धर्मस्यतुगतिंश्रोतुमिच्छामिवदतांवर १ कृत्वाकर्माणिपापानिकथं-
यांतिशुभांगतिम् कर्मणाचकृतेनेहकेनयांतिशुभांगतिम् २ बृहस्पतिरुवाच कृत्वापापानिकर्माणिअधर्मवशमागतः म
नसाविपरीतेननिरयंप्रतिपद्यते ३ मोहादधर्मंयःकृत्वापुनःसमनुतप्यते मनःसमाधिसंयुक्तोनसंसेवेतदुष्कृतम् ४ यथायथा
मनस्तस्यदुष्कृतंकर्मगर्हते तथातथाशरीरंतुतेनाधर्मेणमुच्यते ५ यदिव्याहरतेराजन्विप्राणांधर्मवादिनाम् ततोऽधर्मकृतात्क्षि
प्रमपवादात्प्रमुच्यते ६ यथायथानरःसम्यगधर्ममनुभाषते समाहितेनमनसाविमुच्येततथातथा ७ भुजंगइवनिर्मोकात्पू
र्वभुक्ताज्जरान्वितात् दत्वाविप्रस्यदानानिविविधानिसमाहितः ८ मनःसमाधिसंयुक्तःसुगतिंप्रतिपद्यते प्रदानानितुवक्ष्या-
मियानिदत्वायुधिष्ठिर ९ नरःकृत्वाप्यकार्याणिततोधर्मेणयुज्यते ९ सर्वेषामेवदानानामन्नंश्रेष्ठमुदाहृतम् पूर्वमन्नंप्रदातव्यं
मृदुनाधर्ममिच्छता १० प्राणाह्यन्नंमनुष्याणांतस्माज्जंतुश्चजायते अन्नेप्रतिष्ठितोलोकस्तस्मादन्नंप्रशस्यते ११ अन्नमेवप्रश
संतिदेवर्षिपितृमानवाः अन्नस्यहिप्रदानेनस्वर्गमश्नातिकौशिकः १२ न्यायलब्धंप्रदातव्यंद्विजातिभ्योन्नमुत्तमम् स्वाध्यायस-
मुपेतेभ्यःप्रहृष्टेनांतरात्मना १३ यस्यह्यन्नमुपाश्नंतिब्राह्मणानांशतंदश हृष्टेनमनसादत्तंनसतिर्यग्गतिर्भवेत् १४

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ इतिआनुशासनिकेपर्वणिटीकायांद्वाद-
शाधिकशततमोऽध्यायः ११२ १ २ ३ त्रीन्दोषानकामक्रोधलोभान् अन्येषुनिधायनतुस्वात्मनिकामक्रोधौचात्लोभं ४ ५ ६ सर्वेषांभूतानांआत्मभूतस्यआ

ब्राह्मणानांसहस्राणिदशभोज्यनरर्षभ नरोधर्मात्प्रमुच्येतयोगेष्वभिरतःसदा १५ भैक्ष्येणान्नंसमाहृत्यविप्रोवेदपुरस्कृतः स्वाध्याय
निरतेविप्रेदत्वेहसुखमेधते १६ अहिंसन्ब्राह्मणस्वानिन्यायेनपरिपाल्यच क्षत्रियस्तरसाप्राप्तमन्नंयोवैप्रयच्छति १७ द्विजेभ्योवे
दवृद्धेभ्यःप्रयतःसुसमाहितः तेनापोहतिधर्मात्मन्दुष्कृतंकर्मपांडव १८ षड्भागपरिशुद्धंचकृषेर्भागमुपार्जितम् वैश्योददद्द्वि-
जातिभ्यःपापेभ्यःपरिमुच्यते १९ अवाप्यप्राणसंदेहंकार्कश्येनसमार्जितम् अन्नंदत्वाद्विजातिभ्यःशूद्रःपापात्प्रमुच्यते २०
औरसेनबलेनान्नमर्जयित्वाविहिंसकः यःप्रयच्छतिविप्रेभ्योनसदुर्गाणिपश्यति २१ न्यायेनावाप्तमन्नंतुनरोहर्षसमन्वितः
द्विजेभ्योवेदवृद्धेभ्योदत्वापापात्प्रमुच्यते २२ अन्नमूर्जस्करंलोकेदत्वोर्जस्वीभवेन्नरः सतांपन्थानमावृत्यसर्वपापैःप्रमुच्यते २३ दानवद्भिःकृ-
तःपंथायेनयांतिमनीषिणः तेहिप्राणस्यदातारस्तेभ्योधर्मःसनातनः २४ सर्वावस्थंमनुष्येणन्यायेनान्नमुपार्जितम् कार्यंपात्रगतंनित्य
मन्नंहिपरमागतिः २५ अन्नस्यहिप्रदानेननरोदुर्गंनसेवते तस्मादन्नंप्रदातव्यमन्यायपरिवर्जितम् २६ यतद्ब्राह्मणपूर्वंहिभोक्तुमन्नं
गृहीसदा अवंध्यंदिवसंकुर्यादन्नदानेनमानवः २७ भोजयित्वादशशतंनरोवेदविदांनृप न्यायविद्धर्मविदुषामितिहासविदांतथा
२८ नयातिनरकंघोरंसंसारांश्चनसेवते सर्वकामसमायुक्तःप्रेत्यचाप्यश्नुतेसुखम् २९ एवंसखलुसमायुक्तोरमतेविगतज्वरः रूपवान्
कीर्तिमांश्चैवधनवांश्चोपपद्यते ३० एतत्तेसर्वमाख्यातमन्नदानफलंमहत् मूलमेतद्धिधर्माणांप्रदानानांचभारत ३१ इतिश्रीमहा०
आनु० दानधर्मेसंसारचक्रेद्वादशाधिकशततमोऽध्यायः ११२ युधिष्ठिरउवाच अहिंसावैदिकंकर्मध्यानमिंद्रियसंयमः तपोथ-
गुरुशुश्रूषाकिंश्रेयःपुरुषंप्रति १ बृहस्पतिरुवाच सर्वाण्येतानिधर्म्याणिपृथग्द्वाराणिसर्वशः शृणुसंकीर्त्यमानानिषडेवभरतर्षभ
२ हंतनिःश्रेयसंजंतोरहंवक्ष्याम्यनुत्तमम् अहिंसापाश्रयंधर्मंयःसाधयतिवैनरः ३ त्रीन्दोषान्सर्वभूतेषुनिधायपुरुषःसदा काम-
क्रोधौचसंयम्यततःसिद्धिमवाप्नुते ४ अहिंसकानिभूतानिदंडेनविनिहंतियः आत्मनःसुखमन्विच्छन्सप्रेत्यनसुखीभवेत् ५ आ
त्मोपमस्तुभूतेषुयोवैभवतिपूरुषः न्यस्तदंडोजितक्रोधःसप्रेत्यसुखमेधते ६ सर्वभूतात्मभूतस्यसर्वभूतानिपश्यतः देवापिमार्गेमुह्य
न्तिअपदस्यपदैषिणः ७ नतत्परस्यसंदध्यात्प्रतिकूलंयदात्मनः एषसंक्षेपतोधर्मःकामादन्यःप्रवर्तते ८

स्वदुःखेनैवपरदुःखेनापि अहिजन
सर्वभूतानिआत्मत्वेन नत्वहंशापश्यतः मार्गेदेवाः मुह्यंतिसर्वव्यापकोभूत्वामुच्यतइत्यर्थः अपदस्यगन्तव्यमार्गहीनत्वात्मार्गसूचकपदरहितस्यपदैषिण स्थानैषिण वा
द्विपर्युक्ताइत्यर्थः ७ ८ ९

स्ययेति हिंसितो हिनस्ति पालितः पालयति तस्मात्पालयेदेव नो हिंसयेदित्यर्थः । १० । ११ इति आनु॰ टीकायां त्रयोदशाधिकशततमोऽध्यायः ११३ १ २ ३ मनसा वचसा कर्मणा भक्षणेनेति चतुर्विधा हिंसा तत्र एकेन त्यक्तासर्वात्मना त्यक्ता न भवति न भक्षयतः असंकल्पयतः अन्य मांसं मोदस्वेत्यवदतः अकुर्वतो वा हिंसा केनचिदंशेन भवति ४ तत्र दृष्टांतमाह यथेति एकेन पादेन विना त्रिभिः पादैः पशुरिवेयमप्येकेनांशेन हीना अंशत्रयेण न तिष्ठतीत्यर्थः ५. यथेति नागपदे गजपदे क्षुद्रपदानामि

प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ९ यथा परः प्रक्रमते परेषु तथा परे प्रक्रमते परस्मिन् तथैव तेषूपमा जीवलोके यथा धर्मो नैपुणेनोपदिष्टः १० वैशंपायन उवाच इत्युक्तः स सुरगुरुर्धर्मराजं युधिष्ठिरम् दिवमाचक्रमे धीमान्पश्यतामेव नस्तदा ११ इति श्रीम॰ आनु॰ दानधर्मे संसारचक्रसमाप्तौ त्रयोदशाधिकशततमोऽध्यायः ११३ वैशंपायन उवाच ततो युधिष्ठिरो राजा शरतल्पे पितामहम् पुनरेव महातेजाः पप्रच्छ वदतां वरः १ युधिष्ठिर उवाच ऋषयो ब्राह्मणा देवाः प्रशंसन्ति महामते अहिंसालक्षणं धर्मं वेदप्रामाण्यदर्शनात् २ कर्मणा मनुजः कुर्वन्हिंसां पार्थिवसत्तम वाचा च मनसा चैव कथं दुःखात्प्रमुच्यते ३ भीष्म उवाच चतुर्विधेयं निर्दिष्टा ह्यहिंसा ब्रह्मवादिभिः एकैकतोपि विभ्रष्टा न भवत्यरिसूदन ४ यथा सर्वश्चतुष्पाद्वै त्रिभिः पादैर्न तिष्ठति तथैवेयं महीपाल कारणैः प्रोच्यते त्रिभिः ५ यथा नागपदेऽन्यानि पदानि पदगामिनाम् सर्वाण्येवापिधीयन्ते पदजातानि कौंजरे एवं लोकेष्वहिंसा तु निर्दिष्टा धर्मतः पुरा कर्मणा लिप्यते जन्तुर्वाचा च मनसापि च ७ पूर्वं तु मनसा त्यक्त्वा तथा वाचाथ कर्मणा न भक्षयति यो मांसं त्रिविधं स विमुच्यते ८ त्रिकारणं तु निर्दिष्टं श्रूयते ब्रह्मवादिभिः मनो वाचि तथा स्वादे दोषा ह्येषु प्रतिष्ठिताः ९ न भक्षयन्त्यतो मांसं तपोयुक्ता मनीषिणः दोषांस्तु भक्षणे राजन्मांसस्येह निबोध मे १० पुत्रमांसोपमं जानन्खादते यो विचेतनः मांसं मोहसमायुक्तः पुरुषः सोऽधमः स्मृतः ११ पितृमातृसमायोगे पुत्रत्वं जायते तथा हिंसां कृत्वावशः पापो भूयिष्ठं जायते तथा १२ रसं च प्रति जिह्वाया ज्ञानं प्रज्ञायते यथा तथा शास्त्रेषु नियतं रागो ह्यास्वादितान्द्भवेत् १३ संस्कृतासंस्कृताः पक्वा लवणालवणास्तथा प्रजायन्ते यथा भावास्तथा चित्तं निरुध्यते १४ भेरीमृदंगशब्दांश्च तंत्रीशब्दांश्च पुष्कलान् निषेविष्यन्ति वै मंदा मांसभक्षाः कथं नराः १५ अचिन्तितमनिर्दिष्टमसंकल्पितमेव च रसगृद्ध्याभिभूता ये प्रशंसन्ति फलार्थिनः १६ प्रशंसा ह्येव मांसस्य दोषकर्मफलान्विता जीवितं हि परित्यज्य बहवः साधवो जनाः १७ स्वमांसैः परमांसानि परिपाल्य दिवं गताः १८ एवमेषा महाराज चतुर्भिः कारणैर्वृता अहिंसा तव निर्दिष्टा सर्वधर्मानुसंहिता १९ इति श्री॰ आ॰ दानधर्मे मांसवर्जनकथने चतुर्दशाधिकशततमोऽध्यायः ११४

व सर्वेषां धर्माणां समावेशो भवति अहिंसायां कुंजरे पदे दत्ते सति सर्वाणि पदानि यथापिधीयन्ते एवं हिंसायां सर्वे धर्माः पिधीयन्ते ६ ७ ८ ९ १० ११ पित्रेति यथा स्त्रीपुंयोगेनांतरीयकं पुत्रजन्म एवं हिंसकस्य भूयिष्ठपापयोनौ जन्मेत्यर्थः १२ १३ १४ १५ १६ जीवितं हीति यथा स्वमांसार्पणात् शिबिरूर्ध्वं गतः एवं परमांसादनादधो गच्छतीत्यर्थः १७ १८ १९ इति आनु॰ टीकायां चतुर्दशाधिकशततमोऽध्यायः ११४

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ सर्वेद

युधिष्ठिरउवाच अहिंसापरमोधर्मइत्युक्तंबहुशस्त्वया श्राद्धेषुच्च भवानाहपितॄनामिषकांक्षिणः १ मांसैर्बहुविधैःप्रोक्तस्त्वयाश्रा
द्धविधिःपुरा अहत्वाचकुतोमांसमेवमेतद्विरुध्यते २ जातोनःसंशयोधर्मेमांसस्यपरिवर्जने दोषोभक्षयतःकःस्यात्कश्चाभक्षयतो
गुणः ३ हत्वाभक्षयतोवापिपरेणोपहृतस्यवा हन्याद्वायःपरस्यार्थेक्रीत्वावाभक्षयेन्नरः ४ एतदिच्छामितत्त्वेनकथ्यमानंत्वयानघ
निश्चयेनचिकीर्षामिधर्ममेतंसनातनम् ५ कथमायुरवाप्नोतिकथंभवतिसत्त्ववान् कथमव्यंगतामेतिलक्षण्योजायतेकथम् ६ भी
ष्मउवाच मांसस्याभक्षणाद्राजन्योधर्मःकुरुनंदन तन्मेशृणुयथातत्त्वंयथास्यविधिरुत्तमः ७ रूपमव्यंगतामायुर्बुद्धिंसत्त्वंबलंस्मृति
म् प्राप्तुकामैर्नरैर्हिंसावर्जितावैमहात्मभिः ८ ऋषीणामत्रसंवादोबहुशःकुरुनंदन बभूवतेषांतुमतंयत्तच्छृणुयुधिष्ठिर ९ योयजेता
श्वमेधेनमासिमासियतव्रतः वर्जयेन्मधुमांसंचसममेतद्युधिष्ठिर १० सप्तर्षयोवालखिल्यास्तथैवचमरीचिपाः अमांसभक्षणंराजन्प्रश
ंसंतिमनीषिणः ११ नभक्षयतियोमांसंनचहन्यान्नघातयेत् तन्मित्रंसर्वभूतानांमनुःस्वायंभुवोऽब्रवीत् १२ अधृष्यःसर्वभूतानांवि
श्वास्यःसर्वजंतुषु साधूनांसंमतोनित्यंभवेन्मांसंविवर्जयन् १३ स्वमांसंपरमांसेनयोवर्द्धयितुमिच्छति नारदःप्राहधर्मात्मानियतंसोव
सीदति १४ ददातियजतेचापितपस्वीचभवत्यपि मधुमांसनिवृत्त्येतिप्राहचैवंबृहस्पतिः १५ मासिमास्यश्वमेधेनयोयजेतशतंसमाः न
खादतिचयोमांसंसममेतन्मतंमम १६ सदायजतिसत्रेणसदादानंप्रयच्छति सदातपस्वीभवतिमधुमांसविवर्जनात् १७ सर्वेवेदानत
त्क्रतुःसर्वयज्ञाश्चभारत योभक्षयित्वामांसानिपश्चादपिनिवर्त्तते १८ दुष्करंचरसज्ञानेमांसस्यपरिवर्जनम् चर्तुव्रतमिदंश्रेष्ठंसर्व
प्राण्यभयप्रदम् १९ सर्वभूतेषुयोविद्वान्ददात्यभयदक्षिणाम् दाताभवतिलोकेसप्राणानांनात्रसंशयः २० एवंवैपरमंधर्मंप्रशंसंतिमनी
षिणः प्राणायथात्मनोऽभीष्टाभूतानामपिवैतथा २१ आत्मौपम्येनगंतव्यंबुद्धिमद्भिःकृतात्मभिः मृत्युतोभयमस्तीतिविदुषांभूतिमिच्छ
ताम् २२ किंपुनर्हन्यमानानांतरसाजीवितार्थिनाम् अरोगाणामपापानांपापैर्मांसोपजीविभिः २३ तस्माद्विद्धिमहाराजमांसस्यपरिव
र्जनम् धर्मस्यायतनंश्रेष्ठंस्वर्गस्यचसुखस्यच २४ अहिंसापरमोधर्मस्तथाहिंसापरंतपः अहिंसापरमंसत्यंयतोधर्मःप्रवर्त्तते २५

ति अहिंसत्वात्कृत्स्नोवेदः तथातद्बोधिता यज्ञाश्चपुरुषंहिंसायांप्रवर्त्तयंतिकिंतुपरिसंख्याविध्यानिवृत्तिमेवबोधयंतीत्यर्थः १८ १९ २० २१ २२ २३ २४ २५

नहिमांसंतृणात्काष्ठादुपलाद्वापिजायते हत्वाजंतुंततोमांसंतस्माद्दोषस्तुभक्षणे २६ स्वाहास्वधामृतभुजोदेवाःसत्यार्जवप्रियाः
क्रव्यादान्राक्षसान्विद्धिजिह्मानृतपरायणान् २७ कांतारेष्वथघोरेषुदुर्गेषुगहनेषुच रात्रावहनिसंध्यासुचत्वरेषुसभासुच २८
उद्यतेषुचशस्त्रेषुमृगव्यालहतेषुच अमांसभक्षणेराजन्भयमन्येनगच्छंति २९ शरण्यःसर्वभूतानांविश्वास्यःसर्वजंतुषु अनुद्वेगक
रोल्लोकेनचाप्युद्विजतेसदा ३० यदिचेत्खादकोनस्यान्नतदाघातकोभवेत् घातकःखादकार्थायतद्घातयतिवैनरः ३१ अभक्ष्यमेत
दितिवैइतिहिंसानिवर्त्तते खादकार्थमतोहिंसामृगादीनांप्रवर्त्तते ३२ यस्माद्ग्रसतिचैवायुर्हिंसकानांमहाद्युते तस्माद्विवर्जयेन्मांसंयइ
च्छेद्भूतिमात्मनः ३३ त्रातारंनाधिगच्छंतिरौद्राःप्राणिविहिंसकाः उद्वेजनीयाभूतानांयथाव्यालमृगास्तथा ३४ लोभाद्वाबुद्धिमोहाद्वाब
लवीर्यार्थमेवच संसर्गादथपापानामधर्मरुचिनानृणाम् ३५ स्वमांसंपरमांसेनयोवर्धयितुमिच्छति उद्विग्नवासोवसतियत्रयत्राभिजा
यते ३६ धन्यंयशस्यमायुष्यंस्वर्ग्यंस्वस्त्ययनंमहत् मांसस्याभक्षणंप्राहुर्नियताःपरमर्षयः ३७ इदंतुखलुकौंतेयश्रुतमासीत्पुरामया
मार्कंडेयस्यवदतोयेदोषामांसभक्षणे ३८ योहिखादतिमांसानिप्राणिनांजीवितैषिणाम् हतानांवामृतानांवायथाहंतातथैवसः ३९
धनेनक्रयिकोहंतिखादकश्चोपभोगतः घातकोवधबंधाभ्यामित्येषत्रिविधोवधः ४० अखादन्ननुमोदंश्चभावदोषेणमानवः योऽनुमोद
तिहंतव्यःसोऽपिदोषेणलिप्यते ४१ अधृष्यःसर्वभूतानामायुष्मान्निरुजःसदा भवत्यभक्षयन्मांसंदयावान्प्राणिनामिह ४२ हिरण्य
दानैर्गोदानैर्भूमिदानैश्चसर्वशः मांसस्याभक्षणेधर्मोविशिष्टइतिनःश्रुतिः ४३ अप्रोक्षितंवृथामांसंविधिहीनंनभक्षयेत् भक्षयन्नि
रययातिनरोनास्त्यत्रसंशयः ४४ प्रोक्षिताभ्युक्षितंमांसंतथाब्राह्मणकाम्यया अल्पदोषमिहज्ञेयंविपरीतेतुलिप्यते ४५ खादकस्यकृ
तेजंतून्योहन्यात्पुरुषाधमः महादोषतरस्तत्रघातकोनतुखादकः ४६ इज्यायज्ञश्रुतिकृतैर्योमार्गैरबुधोऽधमः हन्याज्जंतून्मांसगृध्नुः
सवैनरकभाङ्नरः ४७ भक्षयित्वापियोमांसंपश्चादपिनिवर्त्तते तस्यापिसुमहान्धर्मोयःपापाद्विनिवर्त्तते ४८ आहर्त्ताचानुमंताच
विशस्ताक्रयविक्रयी संस्कर्त्ताचोपभोक्ताचखादकाःसर्वएवते ४९ इदमन्यत्तुवक्ष्यामिप्रमाणंविधिनिर्मितं पुराणमृषिभिर्जुष्टंवेदेषुपरि
निष्ठितम् ५०

४३ ४४ ४५ ४६ इज्यादेवपूजायज्ञोऽश्वमेधादिःतदर्थंश्रुतिकृतैर्मार्गैरुपायैः अबुधःयज्ञोपनिषदमजानन्केवलंयज्ञव्याजेनमांसंभोक्तुकामः ४७ ४८ ४९ ५०

५१ ५२ ५३ ५४ ५५ व्रीहिमयःपशुःपुरोडाशादिरूपः तएतदुत्क्रांतमेधा अमेध्याःपशवइत्यन्वातस्मादाहुःपुरोडाशसत्रंलोक्यमितिब्राह्मणात् ५६

प्रवृत्तिलक्षणोधर्मः प्रजार्थिभिरुदाहृतः यथोक्तंराजशार्दूलनतुतन्मोक्षकांक्षिणाम् ५१ हविर्यत्संस्कृतंमंत्रैःप्रोक्षिताभ्युक्षितंशुचि
वेदोक्तेनप्रमाणेनपितॄणांप्रक्रियासुच ५२ अतोन्यथावृथामांसमभक्ष्यंमनुरब्रवीत् अस्वर्ग्यमयशस्यंचरक्षोवद्भरतर्षभ ५३ विधि
हीनंनरःपूर्वंमांसंराजन्नभक्षयेत् अप्रोक्षितंवृथामांसंविधिहीनंनभक्षयेत् ५४ यइच्छेत्पुरुषोत्यंतमात्मानंनिरुपद्रवम् सवर्जयेतमां
सानिप्राणिनामिहसर्वशः ५५ श्रूयतेहिपुराकल्पेनृणांव्रीहिमयःपशुः येनायजंतयज्वानःपुण्यलोकपरायणाः ५६ ऋषिभिःसंशयंपृष्टो
वसुश्चेदिपतिःपुरा अभक्ष्यमितिमांसंयःप्राहभक्ष्यमितिप्रभो ५७ आकाशादवनिंप्राप्तस्ततःसपृथिवीपतिः एतदेवपुनश्चोक्त्वाविवेश
धरणीतलम् ५८ प्रजानांहितकामेनत्वगस्त्येनमहात्मना आरण्याःसर्वदैवत्याःप्रोक्षितास्तपसामृगाः ५९ क्रियाह्येवंनहीयंतेपितृदैवत
संश्रिताः प्रीयंतेपितरश्चैवन्यायतोमांसतर्पिताः ६० इदंतुशृणुराजेंद्रकीर्त्यमानंमयानघ अभक्षणेसर्वसुखंमांसस्यमनुजाधिप ६१ य
स्तुवर्षशतंपूर्णंतपस्तप्येत्सुदारुणम् यश्चैववर्जयेन्मांसंसममेतन्मतंमम ६२ कौमुदेतुविशेषेणशुक्लपक्षेनराधिप वर्जयेन्मधुमांसानि
धर्मोह्यत्रविधीयते ६३ चतुरोवार्षिकान्मासान्योमांसंपरिवर्जयेत् चत्वारिभद्राण्याप्नोतिकीर्तिमायुर्यशोबलम् ६४ अथवामासमेकं
वैसर्वमांसान्यभक्षयन् अतीत्यसर्वदुःखानिसुखंजीवेन्निरामयः ६५ वर्जयंतिहिमांसानिमासशःपक्षशोपिवा तेषांहिंसानिवृत्तानांब्र
ह्मलोकोविधीयते ६६ मासंतुकौमुदंपक्षंवर्जितंपार्थराजभिः सर्वभूतात्मभूतस्थैर्विदितार्थपरावरैः ६७ नाभागेनांबरीषेणगयेनच
महात्मना आयुनाथानरण्येनदिलीपरघुपूरुभिः ६८ कार्तवीर्यानिरुद्धाभ्यांनहुषेणययातिना नृगेणविष्वगश्वेनतथैवशशबि
दुना ६९ युवनाश्वेनचतथाशिबिनौशीनरेणच मुचुकुंदेनमांधात्राहरिश्चंद्रेणवाविभो ७० सत्यंवदतमासत्यंसत्यंधर्मःसनात
नः हरिश्चंद्रश्चरतिवैदिविसत्येनचंद्रवत् ७१ श्येनचित्रेणराजेंद्रसोमकेनवृकेणच रैवतेरंतिदेवेनवसुनासृंजयेनच ७२ एतैश्चा
न्यैश्चराजेंद्रकृपेणभरतेनच दुष्यंतेनकरूषेणरामालर्कनरैस्तथा विरूपाश्वेननिमिनाजनकेनचधीमता ७३ शिनेनपृथुनाचैव
वीरसेनेनचैवह इक्ष्वाकुणाशंभुनाचश्वेतेनसगरेणच ७४

५७ अभक्ष्यमपिमांसंभक्ष्यमित्याह अतःपपातेत्यर्थः ५८ आरण्याःप्रोक्षिताइतिनमु
क्त्वानारण्यानुत्सृजंतीतिश्रुतेरारण्यैर्यज्ञंकृत्वापितेषांवधोनकृतइत्यर्थः ५९ ६० । ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ इत्यर्थः ५

अर्जेनधुंधुनाचैवतथैवचसुबाहुना हर्यश्वेनचराजेंद्रक्षुपेणभरतेनच ७५ एतैश्चान्यैश्चराजेंद्रपुरामांसंनभक्षितम् शारदंकौ
मुदंमासंततस्तेस्वर्गमाप्नुवन् ७६ ब्रह्मलोकेतुतिष्ठंतिज्वलमानाःश्रियान्विताः उपास्यमानागंधर्वैस्त्रीसहस्रसमन्विताः ७७ तथैत
दुत्तमंधर्ममहिंसाधर्मलक्षणम् येचरंतिमहात्मानोनाकपृष्ठेवसंतिते ७८ मधुमांसंचयेनित्यंवर्जयंतीहधार्मिकाः जन्मप्रभृतिमद्यंचस
र्वेतेमुनयःस्मृताः ७९ इदंधर्ममंमांसादयश्चरेच्छ्रावयीतवा अपिचेत्सुदुराचारोननातुनिरयंव्रजेत् ८० पठेद्वायइदंराजन्छृणुयाद्वा
प्यभीक्ष्णशः अमांसभक्षणविधिंपवित्रमृषिपूजितम् ८१ विमुक्तःसर्वपापेभ्यःसर्वकामैर्महीयते विशिष्टतांज्ञातिषुचलभतेनात्रसं-
शयः ८२ आपन्नश्चापदोमुच्येतबद्धोमुच्येतबंधनात् मुच्येत्तथातुरोरोगादुःखान्मुच्येतदुःखितः ८३ तिर्यग्योनिंनगच्छेतरूपवांश्चभवे
न्नरः ऋद्धिमान्वैकुरुश्रेष्ठप्राप्नुयाच्चमहद्यशः ८४ एतत्तेकथितंराजन्मांसस्यपरिवर्जने प्रवृत्तौचनिवृत्तौचविधानमृषिनिर्मितम् ८५
इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेमांसभक्षणनिषेधेपंचदशाधिकशततमोऽध्यायः ११५ युधिष्ठिरउवाच इमेवैमा
नवालोकेनृशंसामांसगृद्धिनः विसृज्यविविधान्भक्ष्यान्महारक्षोगणाइव १ अपूपान्विविधाकारान्शाकानिविविधानिच खाडवान्रसयो
गान्नतथेच्छंतियथामिषम् २ तत्रमेबुद्धिरत्रैवविषयेपरिमुह्यते नमन्येरसतःकिंचिन्मांसतोस्तीतिकिंचन ३ तदिच्छामिगुणान्श्रोतुंमां
संस्याभक्षणेप्रभो भक्षणेचैवयेदोषास्तांश्चैवपुरुषर्षभ ४ सर्वतत्त्वेनधर्मज्ञयथावदिहधर्मतः किंवाभक्ष्यमभक्ष्यंवासर्वमेतद्वदस्वमे ५
यथैतद्यादृशंचैवगुणायेचास्यवर्जने दोषाभक्षयतोयेपितन्मेब्रूहिपितामह ६ भीष्मउवाच एवमेतन्महाबाहोयथावदसिभारत
नमांसात्परमंकिंचिद्रसतोविद्यतेभुवि ७ क्षतक्षीणाभितप्तानांग्राम्यधर्मरतात्मनाम् अध्वनाकर्शितानांचनमांसाद्विद्यतेपरम् ८ सद्योव
र्धयतिप्राणान्पुष्टिमग्र्यांदधातिच नभक्ष्योभ्यधिकःकश्चिन्मांसादस्तिपरंतप ९ विवर्जितेतुबहवोगुणाःकौरवनंदन येभवंतिमनुष्याणां
तान्मेनिगदतःशृणु १० स्वमांसंपरमांसेनयोवर्द्धयितुमिच्छति नास्तिक्षुद्रतरस्तस्मात्सनृशंसतरोनरः ११ नहिप्राणात्प्रियतरंलोकेकिंच
नविद्यते तस्माद्दयांनरःकुर्याद्यथात्मनितथापरे १२ शुक्राच्चतातसंभूतिर्मांसस्येहनसंशयः भक्षणेतुमहान्दोषोनिवृत्त्यापुण्यमुच्यते १३

१४ १५ आरण्याइति यजमानेनउत्सृष्टानामप्यारण्यानांराज्ञांमृगयायांवधोन्याय्यएव उत्सृष्टपशोर्जीवनेनतत्तद्देवतायाःस्वत्वयोगात् अतएवकपिंजलानाल
भेनेत्यत्र अधिकानामालंभेदोषप्रसंगात् त्रितयेनैवशास्त्रार्थस्यानुष्ठितत्वात् बहुत्वस्यत्रित्वेपर्यवसानमुक्तम् अन्यथाकपिंजलानामारण्यत्वेनपर्यग्निकरणांते
उत्सृष्टानांवधस्याप्रसक्तेरधिकानामालंभेदोषोनप्रसज्जेत तथाचयदित्र्यधिकानुत्सृजेत्तर्हिनहृष्येउत्सृष्टःपापं यदित्रीनेवतर्ह्यधिकवधेहेतुः पापमितिसिद्धेत
दिदमुक्तम् आरण्याःसर्वदेवत्याःसर्वशःप्रोक्षितामृगाः अगस्त्येनपुराराजन्मृगयायेनपूज्यतइति सर्वशइतिउत्पन्नमात्रस्यग्रहणम् १६ किंचहन्यमानाप्य-

विधिनावेददृष्टेनतद्भुक्त्वेहनदुष्यति यज्ञार्थेपशवःसृष्टाइत्यपिश्रूयतेश्रुतिः १४ अतोन्यथाप्रवृत्तानांराक्षसोविधिरुच्यते क्षत्रि
याणांतुयोदृष्टोविधिस्तमपिमेशृणु १५ वीर्येणोपार्जितमांसंयथाभुंजन्नदुष्यति आरण्याःसर्वदैवत्याःसर्वशःप्रोक्षितामृगाः
१६ अगस्त्येनपुराराजन्मृगयायेनपूज्यते नात्मानमपरित्यज्यमृगयानामविद्यते १७ समतामुपसंगम्यभूतान्निघ्नंतिमानवाः अतो
राजर्षयःसर्वेमृगयांयांतिभारत १८ नहिलिप्यंतिपापेननचैतत्पातकंविदुः नह्यतःसदृशंकिंचिदिहलोकेपरत्रच १९ यत्सर्वेष्विहभू
तेषुदयांकौरवनंदन नभयंविद्यतेजातुनरस्येहदयावतः २० दयावतामिमेलोकाःपरेचापितपस्विनाम् अहिंसालक्षणोधर्मइति
धर्मविदोविदुः यदहिंसात्मकंकर्मतत्कुर्यादात्मवान्नरः पितृदैवतयज्ञेषुप्रोक्षितंहविरुच्यते २२ अभयंसर्वभूतेभ्योयोददातिदयापरः
अभयंतस्यभूतानिददतीत्यनुशुश्रुम २३ क्षतंचस्खलितंचैवपतितंक्लिष्टमाहतम् सर्वभूतानिरक्षंतिसमेषुविषमेषुच २४ नैनंव्याल
मृगाघ्नंतिनपिशाचानराक्षसाः मुच्यंतेभयकालेषुमोक्षयेत्योभयेपरान् २५ प्राणदानात्परंदानंनभूतंनभविष्यति नह्यात्मनःप्रियत
रंकिंचिदस्तीहनिश्चितम् २६ अनिष्टंसर्वभूतानांमरणंनामभारत मृत्युकालेहिभूतानांसद्योजायतिवेपथुः २७ जातिजन्मजरादुःखैर्नि
त्यंसंसारसागरे जंतवःपरिवर्तंतेमरणादुद्विजंतिच २८ गर्भवासेषुपच्यंतेक्षाराम्लकटुकैरसैः मूत्रश्लेष्मपुरीषाणांपरुषैर्भृशदारुणैः २९
जाताश्चाप्यवशास्तत्रछिद्यमानाःपुनःपुनः पाच्यमानाश्चदृश्यंतेविवशामांसगृद्धिनः ३० कुंभीपाकेचपच्यंतेतांतांयोनिमुपागताः आक्र
म्यमार्यमाणाश्चभ्राम्यंतेवैपुनःपुनः ३१

शोःस्ववधस्यापिप्रसंभवात् प्राणपणेनेयंक्रियमाणामृगयानदोषायेत्याह नात्मानमिति हन्यते
नभूतंचैनंहंति १७ १८ एवंप्रवृत्तिमार्गमुक्त्वायस्तुतन्नमाहनहीति नहि अतःसदृशंपुण्यंसर्वेषांपशूनामात्मभ्यःप्रोक्षणादिकमिदानींनिंदनेननक्रतुर्गएवास्तिनमु
प्रोक्षितानांवधेदोषएवनापिप्राणपणत्वेनमृगयायाअदोषत्वंतस्मात्प्राणमपितथानिर्दोषत्वप्रसंगादितिनहिशब्देनसूचितं १९ २० २१ २२ २३ २४ २५त्यक्तइत्यर्थः ५
न्मगर्भजन्म २८ २९ ३०

नात्मनोस्तिप्रियतरःपृथिवीमनुसृत्यह तस्मात्प्राणिषुसर्वेषुदयावानात्मवान्भवेत् ३२ सर्वमांसानियोराजन्यावज्जीवन्नभक्षयेत् स्व
र्गेसविपुलस्थानंप्राप्नुयान्नात्रसंशयः ३३ येभक्षयन्तिमांसानिभूतानांजीवितैषिणाम् भक्ष्यन्तेतेपिभूतैस्तैरितिमेनास्तिसंशयः ३४
मांसभक्षयतेयस्माद्भक्षयिष्येतमप्यहम् एतन्मांसस्यमांसत्वमनुबुध्यस्वभारत ३५ घातकोबध्यतेनित्यंतथाबध्यतिभक्षिता आ
क्रोष्टाक्रुध्यतेराजन्स्तथाद्वेष्यत्वमाप्नुते ३६ येनयेनशरीरेणयद्यत्कर्मकरोतियः तेनतेनशरीरेणतत्तत्फलमुपाश्नुते ३७ अहिंसाप
रमोधर्मस्तथाहिंसापरोदमः अहिंसापरमंदानमहिंसापरमंतपः ३८ अहिंसापरमोयज्ञस्तथाहिंसापरंफलम् अहिंसापरमंमि
त्रमहिंसापरमंसुखम् ३९ सर्वयज्ञेषुवादानंसर्वतीर्थेषुचाप्लुतम् सर्वदानफलंवापिनैतत्तुल्यमहिंसया ४० अहिंस्रस्यतपोक्षय्यम
हिंस्रोयजतेसदा अहिंस्रःसर्वभूतानांयथामातायथापिता ४१ एतत्फलमहिंसायाभूयश्चकुरुपुंगव नहिशक्यागुणावक्तुमपिव
र्षशतैरपि ४२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेअहिंसाफलकथनेषोडशाधिकशततमोऽध्यायः ११६ युधिष्ठि
रउवाच अकामाश्चसकामाश्चयेहताःस्ममहामृधे कांगतिंप्रतिपन्नास्तेतन्मेब्रूहिपितामह १ दुःखंप्राणपरित्यागःपुरुषाणांमहामृधे जा
नासित्वंमहाप्राज्ञप्राणत्यागंसुदुष्करम् २ समृद्धेवाऽसमृद्धेवाशुभेवायदिवाऽशुभे कारणंतत्रमेब्रूहिसर्वज्ञोह्यसिमेमतः ३ भीष्मउवाच
समृद्धेवासमृद्धेवाशुभेवायदिवाऽशुभे संसारेऽस्मिन्समाजाताःप्राणिनःपृथिवीपते ४ निरतायेनभावेनतत्रमेशृणुकारणम् सम्यक्चाय
मनुप्रश्नस्त्वयोक्तस्तुयुधिष्ठिर ५ अत्रतेवर्तयिष्यामिपुरावृत्तंयुधिष्ठिर द्वैपायनस्यसंवादंकीटस्यचयुधिष्ठिर ब्रह्मभूतश्चरन्विप्रःकृष्णद्वैपायनःपुरा ददर्शकीटंधावन्तंशीघ्रंशकटवर्त्मनि ६ गतिज्ञःसर्वभूता
नांभाषाज्ञश्चशरीरिणाम् सर्वज्ञःसतदादृष्ट्वाकीटंवचनमब्रवीत् ७ व्यासउवाच कीटसंत्रस्तरूपोसित्वरितश्चैवलक्ष्यसे क्वधाव
सितदाचक्ष्वकुतस्तेभयमागतम् ८ कीटउवाच शकटस्यास्यमहतोघोषंश्रुत्वाभयंमम आगतंवैमहाबुद्धेस्वनएषहिदारुणः ९
श्रूयतेनचमाहन्यादितितस्मादपक्रमे श्वसतांचशृणोम्येनंगोपुत्राणांप्रतोद्यताम् १० वहतांसुमहाभारंसन्निकर्षेस्वनंप्रभो
नृणांचसंवाहयतांश्रूयतेविविधःस्वनः ११ सोढुमस्मद्विधेनैषनशक्यःकीटयोनिना तस्मादतिक्रमाम्येषभयादस्मात्सुदारुणात् १२ दुःखंहिमृ
त्युर्भूतानांजीवितंचसुदुर्लभम् अतोभीतःपलायामिगच्छेयंनासुखंसुखात् १३ भीष्मउवाच इत्युक्तःसततंप्राहकुतःकीटसुखंतव मरणंतेसुखंम
न्येतिर्यग्योनौतुवर्त्तसे १४ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ ६ ७ १५३

१५ १६ इहेतिमानुषाणांस्थैर्यजानांस्थावराणांचविशेषतोभोगाः संति जंगमानांतुसाधारण्येनैवसर्वविषयजंसुखंदुःखंवास्तीत्यर्थः १७ १८ १९ पर्यशितःभृत्यादीन्परित्यज्याशनंकृतवानस्मीत्यर्थः २० २१ २२ नबुभूषकः अमैश्वर्यमिच्छन् २३ २४ २५ २६ २७ २८ इतिआनुशासनिकेपर्वणिटीकायांसप्तदशाधिकशततमोऽध्यायः ११७ शुभेनयेननमुत्स्यसेतन्ममैवकर्म १२३ तिर्यगाइत्यत्रवर्णलोपआर्षःसिद्धइत्यर्थः धर्मोपिमनुष्ये

शब्दंस्पर्शंरसंगंधंभोगांश्चोच्चावचान्बहून् नाभिजानासिकीटत्वंश्रेयोमरणमेवते १५ कीटउवाच सर्वत्रनिरतोजीवइतस्त्रापि
सुखंमम चिंतयामिमहाप्राज्ञतस्मादिच्छामिजीवितुम् १६ इहापिविषयःसर्वोयथादेहंप्रवर्तितः मानुषास्थैर्यजाश्चैवपृथग्भोगा
विशेषतः १७ अहमासंमनुष्योवैशूद्रोबहुधनःप्रभो अब्रह्मण्योनृशंसश्चकदर्योवृद्धिजीवनः १८ वाक्तीक्ष्णोनिकृतिप्रज्ञो
द्वेष्टाविश्वस्यसर्वशः मिथ्याकृतोपिविधिनापरस्वहरणेरतः १९ भृत्यातिथिजनश्चापिगृहेपर्यशितोमया मात्सर्यात्स्वादुकामेननृ
शंसेनबुभुक्षता २० देवार्थंपितृयज्ञार्थमन्नंश्रद्धाकृतंमया नदत्तमर्थकामेनदेयमन्नंपुराकिल गुप्तंशरणमाश्रित्यभयेषुशरणा
गताः २१ अकस्मात्तेमयात्यक्तानत्राताअभयैषिणः धनधान्यप्रियान्दारान्यानवासस्तथाद्भुतम् २२ श्रियंदृष्ट्वामनुष्याणा
मसूयामिनिरर्थकम् ईर्षुःपरसुखंदृष्ट्वाअन्यस्यनबुभूषकः २३ त्रिवर्गहंताचान्येषामात्मकामानुवर्तकः नृशंसगुणभूयिष्ठंपुरा
कर्मकृतंमया २४ स्मृत्वातदनुतप्येहंहित्वाप्रियमिवात्मजम् शुभानांनाभिजानामिकृतानांकर्मणांफलम् २५ माताचपूजितावृ
द्धाब्राह्मणश्चार्चितोमया सकृज्जातिगुणोपेतःसंगत्यागृहमागतः २६ अतिथिःपूजितोब्रह्मंस्तेनमांनाजहात्स्मृतिः २७ कर्म
णापुनरेवाहंसुखमागामिलक्षये तच्छ्रोतुमहमिच्छामित्वत्तःश्रेयस्तपोधन २८ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदा
नधर्मेकीटोपाख्यानेसप्तदशाधिकशततमोऽध्यायः ११७ व्यासउवाच शुभेनकर्मणायत्वंतिर्यग्योनौनमुह्यसे ममैव
कीटतत्कर्मयेनत्वंनप्रमुह्यसे १ अहंत्वांदर्शनादेवतारयामितपोबलात् तपोबलाद्धिबलवद्बलमन्यन्नविद्यते २ जानामिपापैःस्व
कृतैर्गतंत्वांकीटकीटताम् अवाप्स्यसिपुनर्धर्मंधर्मंतुयदिमन्यसे ३ कर्मभूमिकृतंदेवाभुंजतेतिर्यगाश्चये धर्मोपिहिमनुष्येषुका
मार्थश्चतथागुणाः ४ वाग्बुद्धिपाणिपादैश्चव्यपेतस्याविपश्चितः किंहास्यतिमनुष्यस्यमंदस्यापिहिजीवतः ५

पुमूर्देषुकामार्थःकाम्यएवास्तिनमुक्तिक्रमः एवंगुणाअपिकामार्थास्व ४ वागिनिकर्णणिपश्ची वागादिहीनंमुखमृत्स्वाजीवितंनरःकिंहास्यतिकिंत्यक्ष्यतिनकिमपिसर्वपुरुषार्थैरयंत्यक्तइत्यर्थः ५

जीवन्हीतिहेकीटयत्रविप्राग्र्यःतत्रत्वंएष्यसि ६ गुणेतितत्रविप्रजन्मेत्वंभृतानिभक्ष्यसितत्रयोनौतेतुभ्यंअहंब्रह्मविनिवेशयामिब्रह्मविद्यांदास्यामियत्रवात्वं
एष्यसिवांछसितत्रत्वांनेष्यामीतियोजना ७ ८ ९ सउतियत्रयत्रगंतुंमनसाइच्छितवान्तत्रतत्रऋषिमेवददर्शेत्यर्थः १० ११ १२ १३ १४ १५

जीवन्हिकुरुतेपूजांविप्राग्र्यःशशिसूर्ययोः ब्रुवन्नपिकथांपुण्यांतत्रकीटलभिष्यसि ६ गुणभूतानिभूतानितत्रत्वमुपभोक्ष्यसे तवते
हंविनेष्यामिब्रह्मत्वंयत्रचेष्यसि ७ सतथेतिप्रतिश्रुत्यकीटोवर्त्मन्यतिष्ठत शकटोग्रजगाम्यस्महानागतश्चयदृच्छया ८ चक्राक्रमेण-
भिन्नश्चकीटःप्राणान्मुमोचह संभूतःक्षत्रियकुलेप्रसादादमितौजसः ९ तमृषिंद्रष्टुमगमत्सर्वास्वन्यासुयोनिषु श्वाविड्गोधावराहाणां
तथैवमृगपक्षिणाम् १० श्वपाकशूद्रवैश्यानांक्षत्रियाणांचयोनिषु सकीटएवमाभाष्यऋषिणासत्यवादिना ११ प्रतिस्मृत्याथजग्रा
हपादौमूर्ध्निकृतांजलिः १२ कीटउवाच इदंतदतुलस्थानमीप्सितंदशभिर्गुणैः यदहंप्राप्यकीटत्वमागतोराजपुत्रताम् १३
वहंतिमामतिबलाःकुंजराहेममालिनः स्यंदनेषुचकांबोजायुक्ताःपरमवाजिनः १४ उष्ट्राश्वतरयुक्तानियानानिचवहंतिमाम् सबांध
वःसहामात्यश्चाश्नामिपिशितौदनम् १५ गृहेषुसत्यनिपातेषुसुखेषुशयनेषुच वरार्हेषुमहाभागस्वपामिचसुपूजितः १६ सर्वेष्वपर
रात्रेषुसूतमागधबंदिनः स्तुवंतिमांयथादेवामहेंद्रंप्रियवादिनः १७ प्रसादात्सत्यसंधस्यभवतोमिततेजसः यदहंकीटतांप्राप्यसंप्राप्तो
राजपुत्रताम् १८ नमस्तेस्तुमहाप्राज्ञकिंकरोमिप्रशाधिमाम् त्वत्तपोबलनिर्दिष्टमिदंत्वधिगतंमया १९ व्यासउवाच अर्चितोहं
त्वयाराजन्वाग्भिरद्ययदृच्छया अद्यतेकीटतांप्राप्यस्मृतिर्जाताजुगुप्सिता २० नतुनाशोस्तिपापस्ययस्त्वयोपचितःपुरा शूद्रेणार्थ
प्रदानेननृशंसेनाततायिना २१ ममतेदर्शनंप्राप्तंतच्चैवसुकृतंत्वया तिर्यग्योनौस्मजातेनममचाप्यर्चनात्तथा २२ इतस्त्वंराजपुत्रत्वा-
द्ब्राह्मण्यंसमवाप्स्यसि गोब्राह्मणकृतेप्राणान्हुत्वात्मानंरणाजिरे २३ राजपुत्रसुखंप्राप्यक्रतूंश्चैवाप्तदक्षिणान् अथमोदिष्यसेस्वर्गे
ब्रह्मभूतोव्ययःसुखी २४ तिर्यग्योन्याःशूद्रतामभ्युपैतिशूद्रोवैश्यत्वंक्षत्रियत्वंचवैश्यः वृत्तश्लाघीक्षत्रियोब्राह्मणत्वंस्वर्गंपुण्यंब्राह्म
णःसाधुवृत्तः २५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेकीटोपाख्यानंनामशतोपरिअष्टादशोऽध्यायः ११८ भी
ष्मउवाच क्षत्रधर्ममनुप्राप्तःस्मरन्नेवचवीर्यवान् त्यक्त्वासकीटतांराजंश्चचारविपुलंतपः १

१६ १७ १८ १९ २० २१ २२ गोब्राह्मण
कृतेप्राणान्हित्वाब्राह्मण्यमवाप्स्यसीतियोजना २३ २४ २५ इतिदानधर्मेटीकायांशतोपरिअष्टादशोऽध्यायः ११८ १ ७ ७ ७

२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ इतिआनुशासनिकेपर्वणिटीकायांऊनविंश

तस्यधर्मार्थविदुषोदृष्ट्वातंद्विपुलंतपः आजगामद्विजश्रेष्ठःकृष्णद्वैपायनस्तदा २ व्यासउवाच क्षात्रंचैवव्रतंकीटभूतानांपरिपा-
लनम् क्षात्रंदेवव्रतंध्यायंस्ततोविप्रत्वमेष्यसि ३ पाहिसर्वाःप्रजाःसम्यक्शुभाशुभविदात्मवान् शुभैःसंविभजन्कामैरशुभानां
चपावनैः ४ आत्मवान्भवसुप्रीतःस्वधर्माचरणेरतः क्षात्रींतनुंसमुत्सृज्यततोविप्रत्वमेष्यसि ५ भीष्मउवाच सोऽथारण्यम
नुप्राप्यपुनरेवयुधिष्ठिर. महर्षेर्वचनंश्रुत्वाप्रजाधर्मेणपाल्यच ६ अचिरेणैवकालेनकीटःपार्थिवसत्तम प्रजापालनधर्मेणप्रेत्य
विप्रत्वमागतः ७ ततस्तंब्राह्मणंदृष्ट्वापुनरेवमहायशाः आजगाममहाप्राज्ञःकृष्णद्वैपायनस्तदा ८ व्यासउवाच भो-
भोब्रह्मर्षभश्रीमन्माव्यथिष्ठाःकथंचन शुभकृच्छुभयोनीषुपापकृत्पापयोनिषु ९ उपपद्यतिधर्मज्ञयथापापफलोपगम् तस्मान्मृ
त्युभयात्कीटमाव्यथिष्ठाःकथंचन १० धर्मलोपभयंतेस्यात्तस्माद्धर्मंचरोत्तमम् ११ कीटउवाच सुखात्सुखतरंप्राप्तोभग
वंस्त्वत्कृतेह्यहम् धर्ममूलांश्रियंप्राप्यपाप्मानष्टइहाद्यमे १२ भीष्मउवाच भगवद्वचनात्कीटोब्राह्मण्यंप्राप्यदुर्लभम्
अकरोत्पृथिवींराजन्यज्ञयूपशतांकिताम् १३ ततःसालोक्यमगमद्ब्रह्मणोब्रह्मवित्तमः अवापचपदंकीटःपार्थब्रह्मसनातनम्
१४ स्वकर्मफलनिर्वृत्तंव्यासस्यवचनात्तदा तेपियस्मात्स्वभावेनहताःक्षत्रियपुंगवाः १५ संप्राप्तास्तेगतिंपुण्यांतस्मान्माशोचपुत्रक
१६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेकीटोपाख्याननामऊनविंशत्यधिकशततमोऽध्यायः ११९ युधिष्ठिरउ
वाच विद्यातपोवायदानाद्वाकमेतेषांविशिष्यते पृच्छामित्वासतांश्रेष्ठतन्मेब्रूहिपितामह १ भीष्मउवाच अत्राप्युदाह
रंतीममितिहासंपुरातनम् मैत्रेयस्यचसंवादंकृष्णद्वैपायनस्यच २ कृष्णद्वैपायनोराजन्नज्ञातचरितंचरन् वाराणस्यामुपाति
ष्ठन्मैत्रेयंस्वैरिणीकुले ३ तमुपस्थितमासीनंज्ञात्वासमुनिसत्तमम् अर्चित्वाभोजयामासमैत्रेयोऽशनमुत्तमम् ४ तदन्नमुत्तमं-
भुक्त्वागुणवत्सार्वकामिकम् प्रतिष्ठमानोऽस्मयतप्रीतःकृष्णोमहामनाः ५ तमुत्स्मयतसंप्रेक्ष्यमैत्रेयःकृष्णमब्रवीत् कारणंब्रूहि
धर्मात्मन्व्यस्मयिष्ठाःकुतश्चते ६ तपस्विनोधृतिमतःप्रमोदःसमुपागतः एतत्पृच्छामितेविद्वन्नभिवाद्यप्रणम्यच आत्मनश्च
तपोभाग्यंमहाभाग्यंतवेहच ७

त्यधिकशततमोऽध्यायः ११९ १ २ मैत्रेयमपिअज्ञातचरितंचरंतमित्यर्थः संदर्शयतिधर्मायप्रेरयतिस्वैरिणीमुनिश्रेणीतस्यकुलेगृहे ३ ४ अस्मय
तविस्मयंप्राप्तवान् ५ कुतश्चतेप्रमोदइतिसंबंधः ६ एततआत्मनस्तपोभाग्यंतवचमहाभाग्यंतेत्वांपृच्छामि आश्चर्यदर्शनंविनाविस्मयोनभवतीतिभावः ७ ७

पृथगिति पृथगात्माउपाधिपरिच्छिन्नोजीवः सुखात्मा अनुपाधिकंब्रह्म पंचम्यर्थे षष्ठी ततःपृथगाचरतः नवजीवन्मुक्तस्यमुक्तामुक्तोभयात्मनः अपेक्षयाहंआ-
त्मानंअल्यांतरंमन्येयतस्त्वंमद्भाग्यंदृष्ट्वाविस्मितोसि अतोहंत्वत्तोल्पांतरोस्मीति नात्मानमनुमिनोमीत्यर्थः अन्वयात्मित्रवंश्यत्वात् विशिष्टमपांतरेभ्यः ८
अतिच्छेदोत्यंतमंतरमशक्येनसमुद्रशोषणमिव अतिच्छंदइतिपाठेपिसएवार्थः अतिवादस्तस्यैवार्थस्यकथनंलोकेताभ्यांविस्मयोमेभवत् इदंस्थानंक्रतुशतंवि
नानप्राप्यतइतिवेदवचनमसत्यं जन्ममात्रदानेनतवतत्प्राप्तिदर्शनात् देशकालपात्रश्रद्धाविशेषादल्पमपिमहत्तमंत्वंजलमौक्तिकन्यायेनप्राप्नोतीतिदर्शनात् कस्मा

पृथगाचरतस्तात पृथगात्मसुखात्मनोः अल्पांतरमहंमन्येविशिष्टमपिचान्वयात् ८ व्यासउवाच अतिच्छेदातिवादाभ्यांस्म
योयंसमुपागतः असत्यंवेदवचनंकस्माद्वेदोनृतंवदेत् ९ त्रीण्येवतुपदान्याहुःपुरुषस्योत्तमंव्रतम् १० नद्रुह्येच्चैवदद्याच्चसत्यंचैव
परंवदेत् इतिवेदोक्तमृषिभिःपुरस्तात्परिकल्पितम् ११ इदानींचैवनःकृत्यंपुरस्ताच्चपरिश्रुतम् अल्पोहितादृशोदायोभवत्युतमहाफलः
१२ तृषितायचतेदत्तंहृदयेनानुसूयता तृषितस्तृषितायत्वंदत्त्वैवदशनंमम १३ अजैषीर्महतोलोकान्महायज्ञैरिवप्रभो ततोदानप
वित्रेणप्रीतोस्मितपसैवच १४ पुण्यस्यैववृद्धिसत्वंपुण्यस्यैवचदर्शनम् पुण्यस्यैवाधिगंधस्तेमन्येकर्मविधानजम् १५ अधिकंमा
र्जनात्तात तथाचैवानुलेपनात् शुभंसर्वपवित्रेभ्योदानमेवपरंद्विज नोचेत्सर्वपवित्रेभ्योदानमेवपरंभवेत् १६ यानीमान्युत्तमा-
नीहवेदोक्तानिप्रशंससि तेषांश्रेष्ठतरंदानमितिमेनात्रसंशयः १७ दानकृद्भिःकृतःपंथायेनयांतिमनीषिणः तेहिप्राणस्यदातारस्ते-
षुधर्मःप्रतिष्ठितः १८ यथावेदाःस्वधीताश्चयथाचेंद्रियसंयमः सर्वत्यागोयथाचेहतथादानमनुत्तमम् १९ त्वंहितातमहाबुद्धेसु
खमेष्यसिशोभनम् सुखात्सुखतरंप्राप्तिमाप्नुतेमतिमान्नरः २० तन्नःप्रत्यक्षमेवेदमुपलब्धमसंशयम् श्रीमंतःप्राप्नुवंत्यर्थान्दान
यज्ञतथासुखम् २१ सुखादेवपरंदुःखंदुःखादप्यपरंसुखम् दृश्यतेहिमहाप्राज्ञनियतंवैस्वभावतः २२ त्रिविधानीहवृत्तानिन
रस्याहुर्मनीषिणः पुण्यमन्यत्पापमन्यन्नपुण्यंनचपापकम् २३ नवृत्तंमन्यतेतस्यमन्यतेनचपातकम् तथास्वकर्मनिर्वृत्तंनपुण्यं
नचपातकम् २४

द्वेदोनृतंवदेदितिउक्तं ९ पदानिपदनीयानि एतदेवत्रयंउत्तमंव्रतं १० ११ नअस्माभिरपिकृत्यंअवश्यकर्तव्यम् दायोदानं १२ १३ त्वंमहतोलोकानजै
षीरित्येतन्ममदर्शनम् प्रत्यक्षंतेनाहंविस्मितोस्मीतिभावः एतद्दर्शनमितिपाठेस्पष्टोर्थः १४ धर्मतपोदानानिपुण्यत्रयेदृष्टांताइत्याह पुण्यस्यैवेति १५ मार्जना
त्तीर्थस्नानात् अनुलेपनात् वेदव्रतसमापनात् १६ १७ १८ १९ २० २१ २२ २३ त्रिविधानीत्यस्यार्थसंपादयाचष्टेनवृत्तमितितस्यब्रह्मनिष्ठस्ययज्ञादीनिपुण्यंद्रोहादी
निपापंततोन्यत्रपुण्यंनचपातकमिति स्वकर्मनिर्वृत्तंपुण्यंपापंचनमन्यतइत्यर्थः २४ ७

२५ २६ सत्तुपुण्यस्यैवाधिकारीत्याहरमस्वेति २७ इति आनुशासनिके पर्वणि टीकायां विंशत्यधिकशततमोऽध्यायः १२० एवमिति १ २ ३ पात्रगुणाद्दानस्य महाफलत्वं मैत्रेय आह निर्दोषमिति द्वाभ्यां ४ ५ भवतोदर्शनात् नः अस्माकं अभ्युदयो भवेदिति योजना ६ ७ शास्त्रज्ञानं ब्राह्मणादृते ८ इदमंधंतम एव स्याद्यतो वर्णधर्मादिकं तेन विना न प्रज्ञायेत ९ १० ११ अदन्निति तमदंतं स अबुधः अदत्तोऽन्नस्य च तादृशस्य हंता स्वयमपि हन्यते दोषेणेत्यर्थः तच्चान्नं पातियच्चान्नमिति पाठे तच्चान्नमद्यमानं सततमत्तारं हंतीति पूर्वेणान्वयः यच्चान्नं स तस्य हंता मूर्खस्ताभ्यां हताभ्यामयमबुधो दाता हन्यत इत्यर्थः

यज्ञदानतपःशीलानरावैपुण्यकर्मिणः येभिद्रुह्यंतिभूतानितेवैपापकृतोजनाः २५ द्रव्याण्याददतेचैवदुःखंयांतिपतंतिच ततोन्यत्क र्मयत्किंचिन्नपुण्यंनचपातकम् २६ रमस्वैधस्वमोदस्वदेहिचैवयजस्वच नत्वामभिभविष्यंतिवैद्याश्चतपस्विनः २७ इतिश्रीम हाभारते आनुशासनिके पर्वणि दानधर्मे मैत्रेयभिक्षायां विंशत्यधिकशततमोऽध्यायः १२० भीष्मउवाच एवमुक्तःप्रत्युवाचमै त्रेयःकर्मपूजकः अत्यंतश्रीमतिकुलेजातःप्राज्ञोबहुश्रुतः १ मैत्रेयउवाच असंशयंमहाप्राज्ञयथैवात्थतथैवतत् अनु ज्ञातस्तुभवताकिंचिद्ब्रूयामहंविभो २ व्यासउवाच यद्यदिच्छसिमैत्रेययावद्यावद्यथायथा ब्रूहितत्त्वंमहाप्राज्ञशुश्रूषेवचनं तव ३ मैत्रेयउवाच निर्दोषंनिर्मलंचैववचनंदानसंहितम् विद्यातपोभ्यांहिभवान्भावितात्मानसंशयः ४ भवतोभावितात्म त्वाल्लाभोयंसुमहान्मम भूयोबुद्ध्यानुपश्यामिसुसमृद्धतपाइव ५ अपिनोदर्शनादेवभवतोभ्युदयोभवेत् मन्येभवत्प्रसादोयंतद्धि कर्मस्वभावतः ६ तपःश्रुतंचयोनिश्चाप्येतद्ब्राह्मण्यकारणम् त्रिभिर्गुणैःसमुदितस्ततोभवतिवैद्विजः ७ अस्मिंस्तृप्तेचतृप्यंतेपितरो देवतानिच नहिश्रुतवतांकिंचिदधिकंब्राह्मणादृते ८ अंधंस्यात्तमएवेदंनप्रज्ञायेतकिंचन चातुर्वर्ण्यंनिवर्त्तेतधर्माधर्मावृतानृते ९ यथाहिसुकृतेक्षेत्रेफलंविंदतिमानवः एवंदत्वाश्रुतवतिफलंदातासमश्नुते १० ब्राह्मणश्चेन्नविंदेतश्रुतवृत्तोपसंहितः प्रतिग्रही तादानस्यमोघंस्याद्धनिनांधनम् ११ अदन्ह्यविद्वान्हंत्यन्नमद्यमानंचहंतितम् तच्चान्नंपातियश्चान्नंसहंताहन्यतेबुधः १२ प्रभुर्ह्यन्न मदन्विद्वान्पुनर्जनयतीश्वरः सचान्नाज्जायतेतस्मात्सूक्ष्मएषव्यतिक्रमः १३

१२ प्रभुरिति यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ इति स्मृतेः विद्वानन्नमदन् तस्य प्रभुर्भवति ईश्वरत्वाच्च क्षेत्रभूतः सन् पुनर्जनयति दात्रे अनेकगुणितं प्रयच्छतीत्यर्थः स च दाता तु अन्नाज्जायते प्रजारूपेण गृहस्थश्चान्नं तत्र यस्मादन्नं तस्य संततिरिति सूक्ष्मोऽव्यतिक्रमोऽस्ति तेन गृहस्थः परपाकेनान्नीयादिति गम्यते १३ ७ ७ ७ ७ ७

यदेवेति प्रतिग्रहीत्रभावे अन्नस्यवृद्धिर्नस्यात तृष्ण्यभावेदातुर्दाने प्रवृत्तिर्नस्यादितिदातृ प्रति गृहीतारौचक्रवच्छोकतंत्रवहत इत्यर्थः १४ १५ १६
१७ इतिआनुशासनिकेपर्वणिटीकायांशतोपरिएकविंशोऽध्यायः १२१ १ आर्यगुणान्प्रभुगुणान् २ वर्त्तयिष्यामिकथयिष्यामि ३ ४ ५

यदेवददतःपुण्यंतदेवप्रतिगृण्हतः नन्ह्येकचक्रंवर्त्तेत इत्येवमृषयोविदुः १४ यत्रवैब्राह्मणाःसंतिश्रुतवृत्तोपसंहिताः तत्रदानफलपुण्यमिहचामुत्रचाश्नुते १५ येयोनिशुद्धाःसततंतपस्यभिरताभृशम् दानाध्ययनसंपन्नास्तेवैपूज्यतमाःसदा १६ तैर्हिसद्भिःकृतःपंथाःस्तेनयातोनमुह्यते तेहिस्वर्गस्यनेतारोयज्ञवाहाःसनातनाः १७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेमैत्रेयभिक्षायांशतोपरिएकविंशोऽध्यायः १२१ भीष्मउवाच एवमुक्तःसभगवान्मैत्रेयंप्रत्यभाषत दिष्ट्यैवंत्वंविजानासिदिष्ट्यातेबुद्धिरीदृशी १ लोकोत्वार्यगुणानेवभूयिष्ठंतुप्रशंसति रूपमानवयोमानश्रीमानाश्चाप्यसंशयम् २ दिष्ट्यानाभिभवंतित्वांदैवस्तेयमनुग्रहः यत्तेभृशतरंदानाद्वर्तयिष्यामितत्शृणु ३ यानीहागमशास्त्राणियाश्चकाश्चित्प्रवृत्तयः तानिवेदंपुरस्कृत्यप्रवृत्तानियथाक्रमम् ४ अहंदानंप्रशंसामिभवानपितपःश्रुते तपःपवित्रंवेदस्यतपःस्वर्गस्यसाधनम् ५ तपसामहदाप्नोतिविद्ययाचेतिनःश्रुतम् तपसैवचापनुदेद्यच्चान्यदपिदुष्कृतम् ६ यद्यद्धिकिंचित्संधायपुरुषस्तप्यतेतपः सर्वमेतदवाप्नोतिविद्ययाचेतिनःश्रुतम् ७ दुरन्वयंदुःप्रधर्षंदुरापंदुरतिक्रमम् सर्वंवैतपसाभ्येतितपोहिबलवत्तरम् ८ सुरापोऽसमतादायीभ्रूणहागुरुतल्पगः तपसातरतेसर्वमेनसश्चप्रमुच्यते ९ सर्वविद्यस्तुचक्षुष्मानपियादृशतादृशः तपस्विनंयथैवाहुस्ताभ्यांकार्यंसदानमः १० सर्वेपूज्याःश्रुतधनास्तथैवचतपस्विनः दानप्रदाःसुखंप्रेत्यप्राप्नुवंतीहचश्रियम् ११ इमंचब्रह्मलोकंचलोकंचबलवत्तरम् अन्नदानैःसुकृतिनःप्रतिपद्यंतिलौकिकाः १२ पूजिताःपूजयंत्येतेमानितामानयंतिच सदातायत्रयत्रेतिसर्वतःसंप्रणुद्यते १३ अकर्त्ताचैवकर्त्ताचलभतेयस्ययादृशम् यदिचोर्ध्वंयद्यधोवास्वान्लोकानतियास्यसि १४ प्राप्स्यसित्वंनपानानियानिवांछसिकानिचित् मेधाव्यसिकुलेजातःश्रुतवाननृशंसवान् १५ कौमारचारीश्रुतवान्मैत्रेयनिरतोभव एतद्गृहाणप्रथमंप्रशस्तंगृहमेधिनाम् १६ योभर्त्तावासितातुष्टोभर्तुस्तुष्टाचवासिता यस्मिन्नेवंकुलेसर्वंकल्याणंतत्रवर्त्तते १७ अद्भिर्गात्रान्मलमिवतमोग्निप्रभयायथा दानेनतपसाचैवसर्वपापमपोहति १८

६ ७ ८ असमतादायीयथाचपरं प्रतिग्रहमभिमन्यतेस्तेनोभवतीतिस्मृतेःस्तेनः ९ यःसर्वविद्सचक्षुष्मान् यादृशतादृशमपितपस्विनं तथैवचक्षुष्मंतमेवाहुः ताभ्यांसर्वविद्यतपस्विभ्यां १० ११ १२ १३ १४ १५ कौमारचारीप्रथमवयाः १६ वासितास्वस्त्री १७ १८ ७

१९ २० इतिआनुशासनिकेपर्वणिटीकायांशतोपरिद्वाविंशोऽध्यायः १२२ सत्स्त्रीणामिति १ २ ३ ४ ५ ६ ७ ८ ९

स्वस्तिप्राप्नुहिमैत्रेयगृहान्साधुव्रजाम्यहम् एतन्मनसिकर्त्तव्यंश्रेयएवंभविष्यति १९ तंप्रणम्यायमैत्रेयःकृत्वाचापिप्रदक्षिणम्
स्वस्तिप्राप्नोतुभगवानित्युवाचकृतांजलिः २० इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेमैत्रेयभिक्षायांशतोपरिद्वावि
शोऽध्यायः १२२ युधिष्ठिरउवाच सत्स्त्रीणांसमुदाचारंसर्वधर्मविदांवर श्रोतुमिच्छाम्यहंत्वत्तस्तन्मेब्रूहिपितामह १
भीष्मउवाच सर्वज्ञांसर्वतत्त्वज्ञांदेवलोकेमनस्विनीम् कैकेयीसुमनानामशांडिलींपर्यपृच्छत २ केनवृत्तेनकल्याणिसमा
चारेणकेनवा विधूयसर्वपापानिदेवलोकंत्वमागता ३ हुताशनशिखेवत्वंज्वलमानास्वतेजसा सुतातारागधिपस्येवप्रभयादिव
मागता ४ अरजांसिचवस्त्राणिधारयंतीगतक्लमा विमानस्थाशुभाभासिसहस्रगुणमोजसा ५ नत्वमल्पेनतपसादानेन
नियमेनवा इमंलोकमनुप्राप्तात्वंहितत्त्वंवदस्वमे ६ इतिपृष्टासुमनयामधुरंचारुहासिनी शांडिली निभृतंवाक्यंसुमनामिद
मब्रवीत् ७ नाहंकाषायवसनानापिवल्कलधारिणी नचमुंडानजटिलाभूत्वादेवत्वमागता ८ अहितानिचवाक्यानिस
र्वाणिपरुषाणिच अप्रमत्ताचभर्त्तारंकदाचिन्नाहमब्रुवम् ९ देवतानांपितॄणांचब्राह्मणानांचपूजने अप्रमत्तासदायुक्ताश्वश्रू
श्वशुरवर्त्तिनी १० पैशून्येनप्रवर्त्तामिनममैतन्मनोगतम् अद्वारेनचतिष्ठामिचिरंनकथयामिच ११ असद्वाहसितंकिंचि
दहितंवापिकर्मणा रहस्यमरहस्यंवानप्रवर्त्तामिसर्वथा १२ कार्यार्थेनिर्गतंचापिभर्त्तारंगृहमागतम् आसनेनोपसंयोज्यपूज
यामिसमाहिता १३ यदन्नंनाभिजानातियद्भोज्यंनाभिनंदति भक्ष्यंवायदिवालेह्यंतत्सर्वंवर्जयाम्यहम् १४ कुटुंबार्थेसमानीतं
यत्किंचित्कार्यमेवतु प्रातरुत्थायतत्सर्वंकारयामिकरोमिच १५ प्रवासंयदिमेयातिभर्त्ताकार्येणकेनचित् मंगलैर्बहुभिर्युक्ताभवा
मिनियतातदा १६ अंजनंरोचनांचैवस्नानंमाल्यानुलेपनम् प्रसाधनंचनिष्क्रांतेनाभिनंदामिभर्त्तरि १७ नोत्थापयामिभर्त्तारं
सुखंसुप्तमहंसदा आतुरेष्वपिकार्येषुतेननुष्यतिमेमनः १८ नायासयामिभर्त्तारंकुटुंबार्थेपिसर्वदा गुप्तगुह्यासदाचास्मिसुसं
मृष्टनिवेशना १९ इमंधर्मपथंनारीपालयंतीसमाहिता अरुंधतीवनारीणांस्वर्गलोकेमहीयते २० भीष्मउवाच एत
दाख्यायसादेवीसुमनायैतपस्विनी पतिधर्मंमहाभागाजगामादर्शनंतदा २१

१० ११ १२ १३ १४ १५ मंगलैर्नियतेतिमंगलसूत्रमात्रंधारयामिनतुनानावृत्तादीनित्यर्थः १६ १७ १८ १९ २० २१ ७ ५

२२ . २३ इतिआनुशासनिकेपर्वणिटीकायांशततोपरित्रयोविंशोऽध्यायः १२३ ॥ १ २ ३ ४ ५ ६ हरिणःपांडुरवर्णः ७ ८ ९ १०

यश्चैवंपांडवाख्यानंपठेत्पर्वणिपर्वणि सदेवलोकंसंप्राप्यनंदतेससुखीवसेत् २२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मे
शांडिलीसुमनासंवादेशततोपरित्रयोविंशोऽध्यायः १२३ युधिष्ठिरउवाच साम्निचापिप्रदानेचज्यायःकिंभवतोमतम् प्रब्रूहि
भरतश्रेष्ठयदत्रव्यतिरिच्यते १ भीष्मउवाच साम्नाप्रसाद्यतेकश्चिद्दानेनचतथापरः पुरुषःप्रकृतिंज्ञात्वातयोरेकतरंभजेत्
२ गुणांस्तुशृणुमेराजन्सांत्वस्यभरतर्षभ दारुणान्यपिभूतानिसांत्वेनाराधयेद्यथा ३ अत्राप्युदाहरंतीममितिहासंपुरातनम् गृ
हीत्वारक्षसामुक्तोद्विजातिःकाननेयथा ४ कश्चिद्वाग्बुद्धिसंपन्नोब्राह्मणोविजनेवने गृहीतःकृच्छ्रमापन्नोरक्षसाभक्षयिष्यता
५ सबुद्धिश्रुतिसंपन्नस्तंदृष्ट्वातीवभीषणम् सामेवास्मिन्प्रयुयुजेनमुमोहनविव्यथे ६ रक्षस्तुवाचसंपूज्यप्रश्नंपप्रच्छतद्द्वि
जम् मोक्षसेब्रूहिमेप्रश्नंकेनास्मिहरिणःकृशः ७ मुहूर्तमथसंचिंत्यब्राह्मणस्तस्यरक्षसः आभिर्गाथाभिरव्यग्रःप्रश्नंप्रतिज
गादह ८ ब्राह्मणउवाच विदेशस्थोविलोकस्थोविनानूनंसुहृज्जनैः विषयानतुलान्भुंक्षेतेनासिहरिणःकृशः ९ नूनंमि
त्राणितेरक्षःसाधूपचरितान्यपि स्वदोषादपरज्यंतेतेनासिहरिणःकृशः १० धनैश्वर्याधिकास्तब्धास्त्वद्गुणैःपरमावराः अवजा
नंतिनूनंत्वांतेनासिहरिणःकृशः ११ गुणवान्विगुणानन्यान्नूनंपश्यसिसत्कृतान् प्राज्ञोप्राज्ञान्विनीतात्मातेनासिहरिणःकृशः
१२ अवृत्त्याक्लिश्यमानोपिवृत्त्युपायान्विगर्हयन् माहात्म्याद्व्यथसेनूनंतेनासिहरिणःकृशः १३ संपीड्यात्मानमार्यत्वात्त्वयाकश्चि
दुपस्कृतः जितंत्वमन्यतेसाधोतेनासिहरिणःकृशः १४ क्लिश्यमानान्विमार्गेषुकामक्रोधावृतात्मनः मन्येत्वंध्यायसिजनांस्तेनासि
हरिणःकृशः १५ प्रज्ञासंभावितोनूनमप्रज्ञैरुपसंहितः हीयमानोसिदुर्वृत्तैस्तेनासिहरिणःकृशः १६ नूनंमित्रमुखःशत्रुःकश्चिदा
र्यवदाचरन् वंचयित्वागतस्त्वांवैतेनासिहरिणःकृशः १७ प्रकाशार्थगतिर्नूनंरहस्यकुशलःकृती तज्ज्ञैर्नपूज्यसेनूनंतेनासिहरिणः
कृशः १८ असत्स्वपिनिविष्टेषुब्रुवतोमुक्तसंशयम् गुणास्तेनविराजंतेतेनासिहरिणःकृशः १९ धनबुद्धिश्रुतैर्हीनःकेवलंतेजसान्वि
तः महत्प्रार्थयसेनूनंतेनासिहरिणःकृशः २० तपःप्रणिहितात्मानंमन्येत्वारण्यकांक्षिणम् बांधवानाभिनंदंतितेनासिहरिणःकृ
शः २१ इष्टभार्यस्यतेनूनंप्रातिवेश्योमहाधनः युवासुललितःकामीतेनासि॰ २२ नूनमर्थवतांमध्येतववाक्यमनुत्तमम् नभातिका
लेभिहितंतेनासिहरिणःकृशः २३

११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ ७॥

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ अनात्मविषयिणीश्चिंताया
दुत्वकुशलेहेतुः दानाभावेसाम्नैवजीवनोपायइत्यध्यायतात्पर्यं. ३९ इतिआनुशासनिकेपर्वणिटीकायांशततोपरिचतुर्विंशोऽध्यायः १२४ १ २ ३ ४

दृढपूर्वंश्रुतंमूर्खंकुपितंहृदयप्रियम् अनुनेतुंनशक्नोषितेनासिहरिणःकृशः २४ नूनमासंजयित्वात्वांकृतेकस्मिंश्चिदीप्सिते कश्चिद्-
र्थयतेनित्यंतेनासिहरिणःकृशः २५ नूनंत्वांसगुणैर्युक्तंपूजयानंसुहृद्ध्रुवम् ममार्थइतिजानीतेतेनासिहः० २६ अंतर्गतमभिप्रायंनूनंने-
च्छसिलज्जया विवेक्तुंप्राप्तिशैथिल्यात्तेनासिहः० २७ नानाबुद्धिरुचींल्लोकेमनुष्यान्नूनमिच्छसि गृहीतुंस्वगुणैःसर्वांस्तेनासि० २८
अविद्वान्भीरुरल्पार्थोविद्याविक्रमदानजम् यशःप्रार्थयसेनूनंतेनासिहः० २९ चिराभिलषितंकिंचित्फलंसप्राप्तमेवच कृतमन्यैरपहृतं
तेनासिहः० ३० नूनमात्मकृतंदोषमपश्यन्किंचिदात्मनः अकारणेभिशस्तोसितेनासि० ३१ साधून्गृहस्थान्दृष्ट्वाचतथासाधून्वनेच
रान् मुक्तांश्चावसथेसक्तांस्तेनासिहः० ३२ सुहृदांदुःखमार्त्तानांनप्रमोक्ष्यसिआर्तिजम् अलमर्थगुणैर्हीनंतेनासिहः० ३३ धर्म्यम
र्थ्यंचकाम्यंचकालेचाभिहितंवचः नप्रतीयंतितेनूनंतेनासि० ३४ दत्तानकुशलैरर्थान्मनीषीसंजिजीविषुः प्राप्यवर्त्तयसेनूनंतेनासि
हः० ३५ पापान्प्रवर्धतोदृष्ट्वाकल्याणानावसीदतः ध्रुवंगर्हयसेनित्यंतेनासिहरिणःकृशः ३६ परस्परविरुद्धानांप्रियंनूनंचिकीर्ष
सि सुहृदामुपरोधेनतेनासि० ३७ श्रोत्रियांश्चविकर्मस्थान्प्राज्ञांश्चाप्यजितेंद्रियान् मन्येनुध्यायसिजनांस्तेनासि० ३८ एवंसं
पूजितंरक्षोविप्रंतंप्रत्यपूजयत् सखायमकरोच्चैनंसंयोज्यार्थैर्मुमोचह ३९ इतिश्रीमहा०आनु०दानधर्मेहरिणकृशकाख्याननामशततोपरि
चतुर्विंशोऽध्यायः १२४ युधिष्ठिरउवाच जन्ममानुष्यकंप्राप्यकर्मक्षेत्रंसुदुर्लभम् श्रेयोर्थिनादरिद्रेणकिंकर्त्तव्यंपितामह १ दा
नानामुत्तमंयच्चदेयंयच्चयथायथा मान्यान्पूज्यांश्चगांगेयरहस्यंवक्तुमर्हसि २ वैशंपायनउवाच एवंपृष्टोनरेंद्रेणपांडवेनयशस्विना ध
र्माणांपरमंगुह्यंभीष्मःप्रोवाचपार्थिवम् ३ भीष्मउवाच शृणुष्वावहितोराजन्धर्मगुह्यानिभारत यथामेभगवान्व्यासःपुराकथितवा
न्मयि ४ देवगुह्यमिदंराजन्यमेनाक्लिष्टकर्मणा नियमस्थेनयुक्तेनतपसोमहतःफलम् ५ येनयःप्रीयतेदेवःप्रीयंतेपितरस्तथा ऋ
षयःप्रमथाःश्रीश्चचित्रगुप्तोदिशागजाः ६ ऋषिधर्मःस्मृतोयत्रसरहस्योमहाफलः महादानफलंचैवसर्वयज्ञफलंतथा ७ यश्चैतदेवं
जानीयाज्ज्ञात्वावाकुरुतेनघ सदोषोदोषवांश्चेहतैर्गुणैःसहयुज्यते ८ दशसूनासमंचक्रंदशचक्रसमोध्वजः दशध्वजसमावेश्यादश
वेश्यासमोनृपः ९

यमेनप्राप्तमितिशेषः ५ ६ ७ ८ दशानांसूनानांसूनावधोयत्रसापशुघ्नजातिदंशसूना चक्रंचक्रयानंतैलिकः ध्वजःसुरापायीनृप सद्रोराजा ९ ७ ७

अधिकमनृपतिस्सुएतानिसर्वाणिअर्थेनतुल्यनकथ्यते एतच्चतारतम्यप्रतिग्रहार्थमुच्यते एवंदुष्प्रतिग्रहपरग्रहेणत्रिवर्गशास्त्रंधर्मार्थकामशास्त्राणिज्ञेयानि १० तत्रा
र्थकामयोःप्रसिद्धत्वाद्धर्मशास्त्राण्येवश्रोतव्यानीत्याहधर्मेत्यादिना ११ १२ १३ पठंतिशास्त्रं उपतिष्ठतिरहस्यंकस्मुरुति आचष्टेचयःसस्वयंनारायणएवेतिज्ञातव्यः १४

अर्थेनैतानिसर्वाणिनृपतिःकथ्यतेधिकः त्रिवर्गसहितंशास्त्रंपवित्रंपुण्यलक्षणम् १० धर्मव्याकरणंपुण्यंरहस्यश्रवणंमहत् श्रोतव्यंधर्म
संयुक्तंविहितंत्रिदशैःस्वयम् ११ पितॄणांयत्रगुह्यानिप्रोच्यंतेश्राद्धकर्मणि दैवतानांचसर्वेषांरहस्यंकथ्यतेखिलम् १२ ऋषिधर्मःस्मृ
तोयत्रसरहस्योमहाफलः महायज्ञफलंचैवसर्वदानफलंतथा १३ येपठंतिसदामर्त्याएषांचैवोपतिष्ठति श्रुत्वाचफलमाचष्टेस्वयंना-
रायणःप्रभुः १४ गवांफलंतीर्थफलंयज्ञानांचैवयत्फलम् एतत्फलमवाप्नोतियोनरोतिथिपूजकः १५ श्रोतारःश्रद्दधानाश्चयेषांशुद्धंच
मानसम् तेषांव्यक्तंजितालोकाःश्रद्दधानेनसाधुना १६ मुच्यतेकिल्बिषाच्चैवनसपापेनलिप्यते धर्मंचलभतेनित्यंप्रेत्यलोकगतोन
रः १७ कस्यचित्त्वथकालस्यदेवदूतोयदृच्छया स्थितोह्यंतर्हितोभूत्वापर्यभाषतवासवम् १८ यौतौकामगुणोपेतावश्विनौभिषजां-
वरौ आज्ञयाहंतयोःप्राप्तःसनरान्पितृदेवतान् १९ कस्माद्धिमैथुनंश्राद्धेदातुर्भोक्तुश्चवर्जितम् किमर्थंचत्रयःपिंडाःप्रविभक्ताःपृ
थक्पृथक् २० प्रथमःकस्यदातव्योमध्यमःक्वचगच्छति उत्तरश्चस्मृतःकस्यएतदिच्छामिवेदितुम् २१ श्रद्दधानेनदूतेनभाषितंधर्मसंहितम्
पूर्वस्थास्त्रिदशाःसर्वेपितरःपूज्यखेचरम् २२ पितरऊचुः स्वागतंतेस्तुभद्रंतेश्रूयतांखेचरोत्तम गूढार्थःपरमःप्रश्नोभवतासमुदीरितः २३ श्रा
द्धंदत्वाचभुक्त्वाचपुरुषोयःस्त्रियंव्रजेत् पितरस्तस्यतंमासंतस्मिन्रेतसिशेरते २४ विभागंतुपिंडानांप्रवक्ष्याम्यनुपूर्वशः पिंडोह्यधस्ताद्ग
च्छस्तुअपआविश्यभावयेत् २५ पिंडंतुमध्यमंतत्रपत्नीत्वेकाश्नुते पिंडस्तृतीयोयस्तेषांतंदद्याज्जातवेदसि २६ एषश्राद्धविधिःप्रोक्तो
यथाधर्मोनलुप्यते पितरस्तस्यतुष्यंतिप्रहृष्टमनसःसदा २७ प्रजाविवर्द्धतेचास्यअक्षयंचोपतिष्ठति २८ देवदूतउवाच आ
नुपूर्व्येणपिंडानांप्रविभागःपृथक्पृथक् पितॄणांत्रिषुसर्वेषांनिरुक्तंकथितंत्वया २९ एकःसमुद्धृतःपिंडोह्यधस्तात्कस्यगच्छति कंवाप्रीण
यतेदेवंकथंतारयतेपितॄन् ३० मध्यमंतुतदापत्नीभुंक्तेनुज्ञातमेवहि किमर्थंपितरस्तस्यकव्यमेवचभुंजते ३१ अत्रयस्त्वंतिमःपिंडोगच्छ
तेजातवेदसम् भवतेकागतिस्तस्यकंवासमनुगच्छति ३२ एतदिच्छाम्यहंश्रोतुंपिंडेषुत्रिषुयागतिः फलंवृत्तिंचमार्गंचयश्चैनंप्रतिपद्य
ते ३३ पितरऊचुः सुमहानेषप्रश्नोवैयस्त्वयासमुदीरितः रहस्यमद्भुतंचापिपृष्टाःस्मगगनेचर ३४

एवस्तुत्वाशास्त्रमारभतेगवांफलमितिशास्त्रसंक्षे-
पः १५ श्रोतारइतिद्वाभ्यांश्रद्धाप्रशंसा १६ १७ १८ सनरान्सहर्षान्प्राप्तःप्रष्टुमितिशेषः १९ २० २१ पूज्यसंपूज्य २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४

३५ ३६ ३७ ३८ ३९ ४० ४१ यतः ऋत्विक् श्राद्धभोक्ता यजमानस्य पितृत्वं गच्छति तस्माद्दन्यात्मतां गत. स्वस्त्रियं न गच्छेत् सारदार्य दोष

एतदेव प्रशंसंति देवाश्च मुनयस्तथा तेप्येवं नाभिजानंति पितृकार्यविनिश्चयम् ३५ वर्जयित्वा महात्मानं चिरंजीविनमुत्तमम् पि
तृभक्तस्तपोविप्रो वरलब्धो महायशाः ३६ त्रयाणामपि पिंडानां श्रुत्वा भगवतो गतिम् देवदूतेन यत्पृष्टः श्राद्धस्य विधिनिश्चयः ३७
गतिं त्रयाणां पिंडानां शृणुष्वावहितो मम अपो गच्छति यो ह्यत्र शशिनं ह्येष प्रीणयेत् ३८ शशी प्रीणयते देवान् पितॄंश्चैव महामते भुं
क्ते तु पत्नी यं चैषामनुज्ञातो तु मध्यमम् ३९ पुत्रकामाय पुत्रं तु प्रयच्छति पितामहाः हव्यवाहे तु यः पिंडो दीयते तन्निबोध मे ४० पितरस्ते
न तृप्यंति प्रीताः कामान् दिशंति च एतत्ते कथितं सर्वं त्रिषु पिंडेषु या गतिः ४१ ऋत्विग्भ्यो यजमानस्य पितृत्वमनुगच्छति तस्मिन्नहनि
मन्यते परिहार्यं हि मैथुनम् ४२ शुचिना तु सदा श्राद्धं भोक्तव्यं खचरोत्तम ये मया कथिता दोषास्ते तथा स्युर्न चान्यथा ४३ तस्मात्स्नातः
शुचिः क्षांतः श्राद्धं भुंजीत वै द्विजः प्रजा विवर्धते चास्य यश्चैवं संप्रयच्छति ४४ ततो विद्युत्प्रभो नाम ऋषिराह महातपाः आदित्यतेजसा
तस्य तुल्यरूपप्रकाशते ४५ स च धर्मरहस्यानि श्रुत्वा शक्रमथाब्रवीत् तिर्यग्योनिगतान्सत्वान् मर्त्या हिंसंति मोहिताः ४६ कीटान्पिपी-
लिकान्सर्पान् मेषान्समृगपक्षिणः किल्बिषं सुबहु प्राप्ताः किंस्विदेषां प्रतिक्रिया ४७ ततो देवगणाः सर्वे ऋषयश्च तपोधनाः पितरश्च
महाभागाः पूजयंति स्म तं मुनिम् ४८ शक्र उवाच कुरुक्षेत्रं गयां गंगां प्रभासं पुष्कराणि च एतानि मनसा ध्यात्वा अवगाहेत्ततो
जलम् ४९ तथा मुच्यति पापेन राहुणा चंद्रमा यथा त्र्यहं स्नातः स भवति निराहारश्च वर्तते ५० स्पृशते यो गवां पृष्ठं वालधिं च नमस्यति त
तो विद्युत्प्रभो वाक्यमभ्यभाषत वासवम् ५१ अयं सूक्ष्मतरो धर्मस्तन्निबोध शतक्रतो घृष्टो वटकषायेण अनुलिप्तः प्रियंगुणा ५२ क्षीरे
णाषष्टिकान्भुक्त्वा सर्वपापैः प्रमुच्यते श्रूयतां चापरं गुह्यं रहस्यमृषिचिंतितम् ५३ श्रुतं मे भाषमाणस्य स्थाणोः स्थाने बृहस्पतेः रुद्रेण
सह देवेश तन्निबोध शचीपते ५४ पर्वतारोहणं कृत्वा एकपादो विभावसुम् निरीक्षेत निराहार ऊर्ध्वबाहुः कृतांजलिः ५५ तपसा मह
ता युक्त उपवासफलं लभेत् रश्मिभिस्तापितोर्कस्य सर्वपापमपोहति ५६ ग्रीष्मकालेथ वा शीते एवं पापमपोहति ततः पापात्प्रमुक्तस्य
द्युतिर्भवति शाश्वती ५७ तेजसा सूर्यवद्दीप्तो भ्राजते सोमवत्पुनः मध्ये त्रिदशवर्गस्य देवराजः शतक्रतुः ५८

तुल्यं येन दिव्यर्यः ४७ एतच्चरणमार्गस्य द्र-
ष्टव्यमित्याशयेनाह भुंचिनेति ४३, ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ वटकुपारणवटजटाकषायेण प्रियंगु गजसर्षप. ५२ षष्टिकान् षष्टिरात्रेण पक्वधान्यं ५३ ५४
५५ ५६ ५७ ५८

उवाचमधुरंवाक्यंबृहस्पतिमनुत्तमम् धर्मंगुह्यंतुभगवन्मानुषाणांसुखावहम् ५९ सरहस्याश्चयेदोषास्तान्यथावदुदीरय ६०
बृहस्पतिरुवाच प्रतिमेहंतियेसूर्यमनिलंद्विषतेचये हव्यवाहंप्रदीप्तंचसमिधंयेनजुह्वति ६१ बालवत्सांचयेधेनुंदुहंतिक्षीरकारणात्
तेषांदोषान्प्रवक्ष्यामितान्निबोधशचीपते ६२ भानुमाननिलश्चैवहव्यवाहश्चवासव लोकानांमातरश्चैवगावःसृष्टाःस्वयंभुवा ६३
लोकांस्तारयितुंशक्तामर्त्येष्वेतेषुदेवताः ६४ सर्वेभवंतःशृण्वंतुएकैकंधर्मनिश्चयम् वर्षाणिषडशीतिंतुदुर्वृत्ताःकुलपांसनाः ६५ स्त्रियः
सर्वाश्चदुर्वृत्ताःप्रतिमेहंतियारविम् अनिलद्वेषिणःशक्रगर्भस्थाच्यवतेप्रजा ६६ हव्यवाहस्यदीप्तस्यसमिधंयेनजुह्वति अग्निकार्येषु
वैतेषांहव्यनाश्नातिपावकः ६७ क्षीरंतुबालवत्सानांयेपिबंतीहमानवाः नतेषांक्षीरपाःकेचिज्जायंतेकुलवर्धनाः ६८ प्रजाक्षयेणयुज्यं
तेकुलवंशक्षयेणच एवमेतत्सुराद्दृष्टंकुलवृद्धैर्द्विजातिभिः ६९ तस्माद्वर्ज्यानिवर्ज्यानिकार्यंकार्यंचनित्यशः भूतिकामेनमर्त्येनसत्यमेत
द्ब्रवीमिते ७० ततःसर्वेमहाभागादेवताःसमरुद्गणाः ऋषयश्चमहाभागाःपृच्छंतिस्मपितॄंस्ततः ७१ पितरःकेनतुष्यंतिमर्त्यानामल्पचे
तसाम् अक्षय्यंचकथंदानंभवेच्चैवौर्ध्वदेहिकम् ७२ आनृण्यंवाकथंमर्त्यागच्छेयुःकेनकर्मणा एतदिच्छामहेश्रोतुंपरंकौतूहलंहिनः
७३ पितरऊचुः न्यायतोवैमहाभागाःसंशयःसमुदाहृतः श्रूयतांयेनतुष्यामोमर्त्यानांसाधुकर्मणाम् ७४ नीलषंडप्रमोक्षेणअमा
वास्यांतिलोदकैः वर्षासुदीपकैश्चैवपितॄणामनृणोभवेत् ७५ अक्षय्यंनिर्व्यलीकंचदानमेतन्महाफलम् अस्माकंपरितोषश्चअक्षयः
परिकीर्त्यते ७६ श्रद्दधानाश्चयेमर्त्याआहरिष्यंतिसंततिम् दुर्गात्तारयिष्यंतिनरकात्प्रपितामहान् ७७ पितॄणांभाषितंश्रुत्वाहृष्टरो
मातपोधनः वृद्धगार्ग्योमहातेजास्तानेवंवाक्यमब्रवीत् ७८ केगुणानीलषंडस्यप्रमुक्तस्यतपोधनाः वर्षासुदीपदानेनतथैवचतिलोदकैः
७९ पितरऊचुः नीलषंडस्यलांगूलंतोयमभ्युद्धरेद्यदि षष्टिवर्षसहस्राणिपितरस्तेनतर्पिताः ८० यस्तुशृंगगतंपंकंकूलादुद्धृत्यति
ष्ठति पितरस्तेनगच्छंतिसोमलोकमसंशयम् ८१ वर्षासुदीपदानेनशशीवच्छोभतेनरः तमोरूपंनतस्यास्तिदीपकंयःप्रयच्छति ८२
अमावास्यांतुयेमर्त्याःप्रयच्छंतितिलोदकम् पात्रमौदुंबरंगृह्यमधुमिश्रंतपोधन ८३ कृतंभवतितैःश्राद्धंसरहस्यंयथार्थवत् हृष्टपुष्ट
मनास्तेषांप्रजाभवतिनित्यदा ८४

८५ ८६ इतिआनुशासनिकेपर्वणिदानधर्मेटीकायांशतोपरिपंचविंशोऽध्यायः १२५ १ २ पादोनस्त्रीयावप्यभिवाद्यौ संध्यायांशिष्टाचारात चक्रेगोमयोपलिप्ते

कुलवंशस्यवृद्धिस्तुपिंडदस्यफलंभवेत् श्रद्दधानस्तुयःकुर्यात्पितृणामनृणोभवेत् ८५ एवमेषसमुद्दिष्टःश्राद्धकालक्रमस्तथा वि
धिःपात्रंफलंचैवयथावदनुकीर्त्तितम् ८६ इतिश्रीमहाभारते आनुशासनिकेपर्वणिदानधर्मेपितृरहस्यंनाम शतोपरिपंचविंशोऽध्या
यः १२५ भीष्मउवाच केनतेचभवेत्प्रीतिःकथंतुष्टिंतुगच्छसि इतिपृष्टःसुरेंद्रेणप्रोवाचहरिरीश्वरः १ विष्णुरुवाच ब्रा
ह्मणानांपरीवादोममविद्वेषणंमहत् ब्राह्मणैःपूजितैर्नित्यंपूजितोहंनसंशयः २ नित्याभिवाद्याविप्रेंद्राभुक्त्वापादौतथात्मनः तेषांतु
ष्यामिमर्त्यानांयश्चक्रेचबलिंहरेत् ३ वामनंब्राह्मणंदृष्ट्वावराहंचजलोत्थितम् उद्धृतांधरणींचैवमूर्ध्नाधारयतेतुयः ४ नतेषामशु
भंकिंचित्कल्मषंचोपपद्यते अश्वत्थसेवनंगांचपूजयेद्योनरःसदा ५ पूजितंचजगत्तेनसदेवासुरमानुषम् स्वेनरूपेणतेषांचपूजां
गृण्हामितत्त्वतः ६ पूजाममैषान्नास्त्यन्यामयालोकाःप्रतिष्ठिताः अन्यथाहिवृथामर्त्याःपूजयंत्यल्पबुद्धयः ७ नाहंतत्प्रतिगृण्हामिन
सातुष्टिकरीमम ८ इंद्रउवाच चक्रंपादौवराहंचब्राह्मणंचापिवामनम् उद्धृतांधरणींचैवकिमर्थंत्वंप्रशंससि ९ भवान्सृज
तिभूतानिभवान्संहरतिप्रजाः प्रकृतिःसर्वभूतानांसमर्त्यानांसनातनी १० भीष्मउवाच संप्रहस्यततोविष्णुरिदंवचनमब्रवी
त् चक्रेणनिहतादैत्याःपद्भ्याक्रांतावसुंधरा ११ वाराहंरूपमास्थायहिरण्याक्षोनिपातितः वामनंरूपमास्थायजितोराजामयाबलिः
१२ परितुष्टोभवाम्येवंमानुषाणांमहात्मनाम् तन्मांयेपूजयिष्यंतिनास्तितेषांपराभवः १३ अपिवाब्राह्मणंदृष्ट्वाब्रह्मचारिणमाग
तम् ब्राह्मणाग्र्यंहुतिंदत्वाअमृतंतस्यभोजनम् १४ ऐंद्रींसंध्यामुपासित्वाआदित्याभिमुखःस्थितः सर्वतीर्थेषुसस्नातोमुच्यतेसर्वकि
ल्बिषैः १५ एतद्वःकथितंगुह्यमखिलेनतपोधनाः संशयंपृच्छमानानांकिंभूयःकथयाम्यहम् १६ बलदेवउवाच श्रूयतांपर
मंगुह्यंमानुषाणांसुखावहम् अजानंतोयदबुधाःक्लिश्यंतेभूतपीडिताः १७ कल्यउत्थाययोमर्त्यःस्पृशेद्गांवैघृतंदधि सर्षपंचप्रिय
गुंचकल्मषात्प्रतिमुच्यते १८ भूतानिचैवसर्वाणिअग्रतःपृष्ठतोपिवा उच्छिष्टंवापिच्छिद्रेषुवर्जयंतितपोधनाः १९ देवाऊचुः प्र
गृह्यौदुंबरंपात्रंतोयपूर्णमुदङ्मुखः उपवासंतुगृण्हीयाद्यद्वासंकल्पयेद्व्रतम् २०

सुदर्शनमंत्रेणपूजिते ३ ४ ५ ६ ७

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० छ छ छ

देवतास्तस्यतुष्यंतिकामिकंचापिसिध्यति अन्यथाहिवृथामर्त्याःकुर्वंतेस्वल्पबुद्धयः २१ उपवासेबलौचापिताम्रपात्रंविशिष्यते ब
लिभिक्षातथार्घंचपितॄणांचतिलोदकम् २२ ताम्रपात्रेणदातव्यमन्यथाल्पफलंभवेत् गुह्यमेतत्समुद्दिष्टंयथातुष्यंतिदेवताः २३
धर्मउवाच राजपौरुषिकेविप्रेघांटिकेपरिचारिके गोरक्षकेवाणिजकेतथाकारुकुशीलवे २४ मित्रद्रुह्यनधीयानेयश्चस्याद्वृषली
पतिः एतेषुदैवंपित्र्यंवानदेयंस्यात्कथंचन २५ पिंडदास्तस्यहीयंतेनचप्रीणातिवैपितॄन् अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिवर्त्तते
२६ पितरस्तस्यदेवाश्चअग्नयश्चतथैवहि निराशाःप्रतिगच्छंतिअतिथेरप्रतिग्रहात् २७ स्त्रीघ्नैर्गोघ्नैःकृतघ्नैश्चब्रह्मघ्नैर्गुरुतल्पगैः
तुल्यदोषोभवत्येभिर्यस्यातिथिरनर्चितः २८ अग्निरुवाच पादमुद्यम्ययोमर्त्यःस्पृशेद्गाश्चसदुर्मतिः ब्राह्मणंवामहाभागंदी
प्यमानंतथानलम् २९ तस्यदोषान्प्रवक्ष्यामितच्छृणुध्वंसमाहिताः दिवंस्पृशत्यशब्दोस्यत्रस्यंतिपितरश्चवै ३० वैमनस्यंचदेवानां
कृतंभवतिपुष्कलम् पावकश्चमहातेजाहव्यंनप्रतिगृण्हति ३१ आजन्मनांशतंचैवनरकेपच्यतेतुसः निष्कृतिंचनतस्यापिअनुमन्यं
तिकर्हिचित् ३२ तस्माद्गावोनपादेनस्प्रष्टव्यावैकदाचन ब्राह्मणश्चमहातेजादीप्यमानस्तथानलः ३३ श्रद्दधानेनमर्त्येनआत्मनो
हितमिच्छता एतेदोषामयाप्रोक्तास्त्रिषुयःपादमुत्सृजेत् ३४ विश्वामित्रउवाच श्रूयतांपरमंगुह्यंरहस्यंधर्मसंहितम् परमा
न्नेनयोदद्यात्पितॄणामौपहारिकम् ३५ गजच्छायायांपूर्वस्यांकुतपेदक्षिणामुखः यदाभाद्रपदेमासिभवतेबहुलेमघा ३६ श्रूयतांत
स्यदानस्ययादृशोगुणविस्तरः कृतंतेनमहच्छ्राद्धंवर्षाणीहत्रयोदश ३७ गावऊचुः बहुलेसमगेत्वकुतोभयेचक्षेमेचसख्येव
हिभूयसीच यथापुराब्रह्मपुरेसवत्साशतक्रतोर्वज्रधरस्ययज्ञे ३८ भूयश्चयाविष्णुपदेस्थितायाविभावसोश्चापिपथिस्थितायादे
वाश्चसर्वेसहनारदेनप्रकुर्वतेसर्वसहेतिनाम ३९ मंत्रेणतेनाभिवदेतयोवैविमुच्यतेपापकृतेनकर्मणा लोकानवाप्नोतिपुरंदरस्यग
वांफलंचंद्रमसोद्युतिंच ४० एतंहिमंत्रंत्रिदशाभिजुष्टंपठेतयःपर्वसुगोष्ठमध्ये नतस्यपापंनभयंनशोकःसहस्रनेत्रस्यचयातिलोक
म् ४१ भीष्मउवाच अथसप्तमहाभागाऋषयोलोकविश्रुताः वसिष्ठप्रमुखाःसर्वेब्रह्माणंपद्मसंभवम् ४२ प्रदक्षिणमभिक्रम्य
सर्वेप्रांजलयःस्थिताः उवाचवचनंतेषांवसिष्ठोब्रह्मवित्तमः ४३

४४ ४५ ४६ ४७ ४८ ४९ ५० इति आनुशासनिकेपर्वणिटीकायांशतोपरिषड्विंशोऽध्यायः १२६ १ २ ३ ४ ५ ६

सर्वप्राणिहितंपथ्यंब्रह्मक्षत्रेविशेषतः द्रव्यहीनाःकथंमर्त्यादरिद्राःसाधुवर्त्तिनः ४४ प्राप्नुवंतीहयज्ञस्यफलंकेनचकर्मणा एतच्छ्रु
त्वावचस्तेषांब्रह्मावचनमब्रवीत् ४५ ब्रह्मोवाच अहोप्रश्नोमहाभागागूढार्थःपरमःशुभः सूक्ष्मःश्रेयांश्चमर्त्यानांभवद्भिःस
मुदाहृतः ४६ श्रूयतांसर्वमाख्यास्येनिखिलेनतपोधनाः यथायज्ञफलंमर्त्यालभंतेनात्रसंशयः ४७ पौषमासस्यशुक्लेवैयदायुज्येतरो
हिणी तेननक्षत्रयोगेनआकाशशयनोभवेत् ४८ एकवस्त्रःशुचिःस्नातःश्रद्दधानःसमाहितः सोमस्यरश्मयःपीत्वामहायज्ञफलंल
भेत् ४९ एतद्वःपरमंगुह्यंकथितंद्विजसत्तमाः यन्मांभवंतःपृच्छंतिसूक्ष्मतत्वार्थदर्शिनः ५० इतिश्रीमहाभारतेआनुशासनिकेपर्वणि
दानधर्मेदेवरहस्येशतोपरिषड्विंशोऽध्यायः १२६ विभावसुरुवाच सलिलस्यांजलिंपूर्णमक्षताश्चघृतोत्तराः सोमस्योत्तिष्ठमानस्य
तज्जलंचाक्षतांश्चतान् १ स्थितोह्यभिमुखोमर्त्यःपौर्णमास्यांबलिंहरेत् अग्निकार्यंकृतंतेनहुताश्चास्याग्नयस्त्रयः २ वनस्पतिंचयोहन्या
दमावास्यामबुद्धिमान् अपिह्येकेनपत्रेणलिप्यतेब्रह्महत्यया ३ दंतकाष्ठंतुयःखादेदमावास्यामबुद्धिमान् हिंसितश्चंद्रमास्तेनपितर
श्चोद्विजंतिच ४ हव्यंनतस्यदेवाश्चप्रतिगृण्हंतिपर्वसु कुप्यंतेपितरश्चास्यकुलेवंशोस्यहीयते ५ श्रीरुवाच प्रकीर्णभाजनंयत्रभि
न्नभांडमथासनम् योषितश्चैवहन्यंतेकश्मलोपहतेगृहे ६ देवताःपितरश्चैवउत्सवेपर्वणीपुवा निराशाःप्रतिगच्छंतिकश्मलोपहताद्गृ
हात् ७ अंगिराउवाच यस्तुसंवत्सरंपूर्णंदद्याद्दीपंकरंजके सुवर्चलामूलहस्तःप्रजानस्यविवर्धते ८ गार्ग्यउवाच आति
थ्यंसततंकुर्याद्दीपंदद्यात्प्रतिश्रये वर्जयानोदिवास्वापंनचमांसानिभक्षयेत् ९ गोब्राह्मणंनहिंस्याच्चपुष्कराणिचकीर्तयेत् एषश्रेष्ठत
मोधर्मःसरहस्योमहाफलः १० अपिक्रतुशतैरिष्ट्वाक्षयंगच्छंतितद्धविः नतुक्षीयंतितेधर्माःश्रद्दधानैःप्रयोजिताः ११ इदंचपरमंगुह्यंस
रहस्यंनिबोधत श्राद्धकल्पेचदैवेचतैर्थिकेपर्वणीषुच १२ रजस्वलाचयानारीश्वित्रिकापुत्रिकाचया एताभिश्चक्षुषादृष्टंहविर्नाश्नंतिदे
वताः १३ पितरश्चननुष्यंतिवर्षाण्यपित्रयोदश शुक्लवासाःशुचिर्भूत्वाब्राह्मणान्स्वस्तिवाचयेत् १४ कीर्त्तयेत्भारतंचैवतथास्याद्दक्ष
यंहविः १५ धौम्यउवाच भिन्नभांडंचखट्वांचकुक्कुटंशुनकंतथा अप्रशस्तानिसर्वाणियश्चवृक्षोगृहेरुहः १६

१ करजस सर्चल्लेत्यवाह्निविशेषो ८ ९ १० ११ १२ अशुचिकेनिच्छेद १३ १४ १५ १६ ७ ७ ७

१७ सलंरश्चिकसर्पादि नरोपयेत् गृहेऽग्निशेष १८ १९ २० २१ इति आनुशासनिकेपर्वणिदानधर्मेटीकायांशतोपरिसप्तविंशोऽध्यायः १२७ १ २

भिन्नभांडेकलिंप्राहुःखट्वायांतुधनक्षयः कुक्कुटेश्चुनकेचैवहविर्नाश्नंतिदेवताः १७ वृक्षमूलेध्रुवंसत्वंतस्मात्वृक्षंनरोपयेत् १८
जमदग्निरुवाच यो यजेदश्वमेधेनवाजपेयशतेनह अवाक्शिरावलंबेतसत्रवास्फीतमाहरेत् १९ नयस्यहृदयंशुद्धंनरकंसध्रुवंव्र
जेत् तुल्यंयज्ञश्चसत्यंचहृदयस्यचशुद्धता २० शुद्धेनमनसादत्वासक्तुप्रस्थंद्विजातये ब्रह्मलोकमनुप्राप्तःपर्याप्तंतन्निदर्शनम् २१ इ
तिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेदेवरहस्येशतोपरिसप्तविंशोऽध्यायः १२७ वायुरुवाच किंचिद्धर्मंप्रवक्ष्यामिमानु
षाणांसुखावहम् सरहस्याश्चयेदोषास्तान्शृणुध्वंसमाहिताः १ चतुरोवार्षिकान्मासान्योददातितिलोदकम् भोजनंचयथाशक्त्याब्राह्म
णेवेदपारगे २ अग्निकार्यंचकर्तव्यंपरमान्नेनभोजनम् दीपकश्चापिकर्तव्यःपितृणांसतिलोदकः ३ एतेनविधिनामर्त्यःश्रद्धानःसमा
हितः पशुबंधशतस्येहफलंप्राप्नोतिपुष्कलम् ४ इदंचैवापरंगुह्यमप्रशस्तंनिबोधत अग्नेस्तुवृषलोनेताहविर्मूढाश्चयोषितः ५ मन्य
तेधर्मएवेतिसचाधर्मेणलिप्यते अग्नयस्तस्यकुप्यंतिशूद्रयोनिंसगच्छति ६ पितरश्चनतुष्यंतिसहदेवैर्विशेषतः प्रायश्चित्तंतुयत्त
त्रब्रुवतस्तन्निबोधमे ७ यत्कृत्वातुनरःसम्यक्सुखीभवतिविज्वरः गवांमूत्रपुरीषेणपयसाचघृतेनच ८ अग्निकार्यंत्र्यहंकुर्यान्नि
राहारःसमाहितः ततःसंवत्सरेपूर्णेप्रतिगृण्हंतिदेवताः ९ हृष्यंतिपितरश्चास्यश्राद्धकालउपस्थिते एषह्यधर्मोधर्मश्चरहस्यःसंप्रकी
र्तितः १० मर्त्यानांस्वर्गकामानांप्रेत्यस्वर्गसुखावहः ११ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेदेवरहस्येशतोपरिअ
ष्टाविंशोऽध्यायः १२८ लोमशउवाच परदारेषुयेसक्ताअकृत्वादारसंग्रहम् निराशाःपितरस्तेषांश्राद्धकालेभवंतिवै १ परदा
ररतिर्यश्चयश्चवंध्यामुपासते ब्रह्मस्वंहरतेयश्चसमदोषाभवंतिते २ असंभाष्याभवंत्येतेपितृणांनात्रसंशयः देवताःपितरश्चैषांना
भिनंदंतितद्धविः ३ तस्मात्परस्यवैदारांस्त्यजेद्वंध्यांचयोषितम् ब्रह्मस्वंहिनहर्तव्यमात्मनोहितमिच्छता ४ श्रूयतांचापरंगुह्यंरहस्यं
धर्मसंहितम् श्रद्धधानेनकर्तव्यंगुरूणांवचनंयथा ५ द्वादश्यांपौर्णमास्यांचमासिमासिघृताक्षतम् ब्राह्मणेभ्यःप्रयच्छेततस्यपुण्यं
निबोधत ६ सोमश्चवर्धतेतेनसमुद्रश्चमहोदधिः अश्वमेधचतुर्भागंफलंसृजतिवासवः ७

३ ४ अग्नेरग्नीस्थस्यस्मत्यक्षस्यवावैदिकस्यनेतादेशांतरप्राप-
कोयदिशूद्रःस्यात्यदियोषितःहविषासोमाज्यपयःप्रभृतिनायज्ञावशिष्टेनइडादिस्थानीयेनमूढाःस्युस्तर्हितस्यदोषःप्रायश्चित्तंचवक्ष्यमाणंज्ञेयं ५ ६ ७ ८ ९
१० ११ इतिशतोपरिअष्टाविंशोऽध्यायः १२८ १ २ ३ ४ ५ ६ महोदधिःजलसमुद्रः ७

८ ९ १० ११ १२ १३ १४ १५ इतिआनुशासनिकेपर्वणिटीकायांशतोपरिऊनत्रिंशोऽध्यायः १२९ १ २ ३ ४ मयोक्तव्याःधर्मवाच्याः ५ ६

दानेनैतेनतेजस्वीवीर्यवांश्चभवेन्नरः प्रीतश्चभगवान्सोमइष्टान्कामान्प्रयच्छति ८ श्रूयतांचापरोधर्मःसरहस्योमहाफलः इमंकलि
युगंप्राप्यमनुष्याणांसुखावहः ९ कल्यमुत्थाययोमर्त्यःस्नातःशुक्लेनवाससा तिलपात्रंप्रयच्छेतब्राह्मणेभ्यःसमाहितः १० तिलोदकंच
योदद्यात्पितॄणांमधुनासह दीपकंकृसरंचैवश्रूयतांतस्ययत्फलम् ११ तिलपात्रेफलंप्राहभगवान्पाकशासनः गोप्रदानंचयःकुर्याद्भूमि
दानंचशाश्वतम् १२ अग्निष्टोमंचयोयज्ञंयजेतबहुदक्षिणम् तिलपात्रंसहैतेनसममन्यन्तदेवताः १३ तिलोदकंसदाश्राद्धेमन्यन्तेपित
रोऽक्षयम् दीपेचकृसरेचैवतुष्यन्तेस्यपितामहाः १४ स्वर्गेचपितृलोकेचपितृदेवाभिपूजितम् एवमेतन्मयोद्दिष्टमृषिदृष्टंपुरातनम् १५ इ
तिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेलोमशरहस्ये शतोपरिऊनत्रिंशोऽध्यायः १२९ भीष्मउवाच ततस्त्वृषिगणाःसर्वेपितर
श्चसदेवताः अरुंधतींतपोवृद्धामपृच्छन्तसमाहिताः १ समानशीलांवीर्येणवसिष्ठस्यमहात्मनः त्वत्तोधर्मरहस्यानिश्रोतुमिच्छामहेवयम्
२ यत्तेगुह्यतमंभद्रेतत्प्रभाषितुमर्हसि ३ अरुंधत्युवाच तपोवृद्धिर्मयाप्राप्ताभवतांस्मरणेनवै भवतांचप्रसादेनधर्मान्वक्ष्यामिशा
श्वतान् ४ सगुह्यांश्चरहस्यांश्चतान्छृणुध्वमशेषतः श्रद्दधानेप्रयोक्तव्यायस्यशुद्धंतथामनः ५ अश्रद्दधानोमानीचब्रह्महागुरुतल्पगः
असंभाष्याहिचत्वारोनैषांधर्मंप्रकाशयेत् ६ अहन्यहनियोदद्यात्कपिलांद्वादशीःसमाः मासिमासिचसत्रेणयोयजेतसदानरः ७ गवां
शतसहस्रंचयोदद्याज्ज्येष्ठपुष्करे नतद्धर्मफलंतुल्यमतिथिर्यस्यतुष्यति ८ श्रूयतांचापरोधर्मोमनुष्याणांसुखावहः श्रद्दधानेनकर्तव्यः
सरहस्योमहाफलः ९ कल्यमुत्थायगोमध्येगृह्यदर्भान्सहोदकान् निषिंचेतगवांशृंगेमस्तकेनचतज्जलम् १० प्रतीच्छेतनिराहारस्तस्य
धर्मफलंशृणु श्रूयन्तेयानितीर्थानित्रिषुलोकेषुकानिचित् ११ सिद्धचारणजुष्टानिसेवितानिमहर्षिभिः अभिषेकःसमस्तेषांगवांशृंगोदक
स्यच १२ साधुसाध्वितिचोद्दिष्टंदैवतैःपितृभिस्तथा भूतैश्चैवसुसंहृष्टैःपूजितासाप्यरुंधती १३ पितामहउवाच अहोधर्मोमहाभागेस
रहस्यउदाहृतः वरंददामितेधन्येतपस्तेवर्धतांसदा १४ यमउवाच रमणीयाकथादिव्यायुष्मत्तोयामयाश्रुता श्रूयतांचित्रगुप्तस्यभाषितं
ममचप्रियम् १५ रहस्यधर्मसंयुक्तंशक्यंश्रोतुंमहर्षिभिः श्रद्दधानेनमर्त्येनआत्मनोहितमिच्छता १६ नहिपुण्यंतथापापंकृतंकिंचिद्विनश्य
ति पर्वकालेचयत्किंचिदादित्यंचाधितिष्ठति १७ प्रेतलोकंगतेमर्त्येतत्तत्सर्वंविभावसुः प्रतिजानातिपुण्यात्मातच्चतत्रोपयुज्यते १८

७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ प्रतिजानातिअर्पयति उपयुज्यतेपुण्यपापकर्ता १८ ७ ७ ७ ७

किंचिद्धर्मंप्रवक्ष्यामिचित्रगुप्तमतंशुभम् पानीयंचैवदीपंचदातव्यंसततंनया १९ उपानहौचछत्रंचकपिलांचयथातथम् पुष्करेकपि
लांदेयाब्राह्मणेवेदपारगे २० अग्निहोत्रंचयत्नेनसर्वशःप्रतिपालयेत् अयंचैवापरोधर्मश्चित्रगुप्तेनभाषितः २१ फलमस्यपृथक्त्वेन
श्रोतुमर्हंतिसत्तमाः प्रलयंसर्वभूतैस्तुगंतव्यंकालपर्ययात् २२ तत्रदुर्गमनुप्राप्ताःक्षुत्तृष्णापरिपीडिताः दह्यमानाविपच्यंतेनतत्रास्ति
पलायनम् २३ अहंकारंतमोघोरंप्रविशंत्यल्पबुद्धयः तत्रधर्मंप्रवक्ष्यामियेनदुर्गाणिसंतरेत् २४ अल्पव्ययंमहार्थंचप्रेत्यचैवसु
खोदयम् पानीयस्यगुणादिव्याःप्रेतलोकेविशेषतः २५ तत्रपुण्योदकानामनदीतेषांविधीयते अक्षयंसलिलंतत्रशीतलंह्यमृतोप
मम् २६ सतत्रतोयंपिबतिपानीयंयःप्रयच्छति प्रदीपस्यप्रदानेनश्रूयतांगुणविस्तरः २७ तमोंधकारंनियतंदीपदानेप्रणश्यति
प्रभांचास्यप्रयच्छंतिसोमभास्करपावकाः २८ देवताश्चास्यमन्यंतेविमलाःसर्वतोदिशः द्योततेचयथादित्यःप्रेतलोकगतोनरः २९
तस्माद्दीपःप्रदातव्यःपानीयंचविशेषतः कपिलांयेप्रयच्छंतिब्राह्मणेवेदपारगे ३० पुष्करेचविशेषेणश्रूयतांतस्ययत्फलम् गोशतंस
वृषंतेनदत्तंभवतिशाश्वतम् ३१ पापकर्मचयत्किंचिद्ब्रह्महत्यासमंभवेत् शोधयेत्कपिलाह्येकाप्रदत्तंगोशतंयथा ३२ तस्मात्तुक
पिलांदेयांकौमुद्यांज्येष्ठपुष्करे नतेषांविषमंकिंचिन्नदुःखंनचकंटकाः ३३ उपानहौचयोदद्यात्पात्रभूतेद्विजोत्तमे छत्रदानेसुखां
च्छायांलभतेपरलोकगः ३४ नहिदत्तस्यदानस्यनाशोस्तीहकदाचन चित्रगुप्तमतंश्रुत्वात्हृष्टरोमाविभावसुः ३५ उवाचदेवताःस
र्वाःपितॄंश्चैवमहाद्युतिः श्रुतंहिचित्रगुप्तस्यधर्मगुह्यंमहात्मनः ३६ श्रद्दधानाश्चयेमर्त्याब्राह्मणेषुमहात्मसु दानमेतत्प्रयच्छंतिन
तेषांविद्यतेभयम् ३७ कर्मदोषास्त्विमेपंचयेषांनास्तीहनिष्कृतिः असंभाष्याअनाचारावर्जनीयानराधमाः ३८ ब्रह्महाचैवगोघ्नश्च
परदाररतश्चयः अश्रद्दधानश्चनरःस्त्रियंयश्चोपजीवति ३९ प्रेतलोकगतास्त्वेतेनरकेपापकर्मिणः पच्यंतेवैयथामीनाःपूयशोणि
तभोजनाः ४० असंभाष्याःपितॄणांचदेवानांचैवपंचते स्नातकानांचविप्राणांयेचान्येचतपोधनाः ४१ इतिश्रीमहाभारतेआनुशा
सनिकेपर्वणिदानधर्मेचित्रगुप्तरहस्येशततोपरित्रिंशोऽध्यायः १३० भीष्मउवाच ततःसर्वेमहाभागादेवाश्चपितरश्चह ऋषयश्चमहाभा
गाःप्रमथान्वाक्यमब्रुवन् १

२ ३ ४ अधरोत्तरेप्रांते अधरओष्ठःउत्तरोयत्रओष्ठस्यावसानेकृतेसति ५ आमिषंमांसंशिरसिदधानःपादतःशय्यायांपादस्थानेशिरःकृत्वायःसंविशेत्

भवंतोवैमहाभागाअपरोक्षनिशाचराः उच्छिष्टानशुचीन्क्षुद्रान्कथंहिंसथमानवान् २ केचस्मृताःप्रतीघाताःयेनमर्त्यान्नहिंसथ रक्षोघ्नानिचकानिस्युर्येर्गृहेषुप्रणश्यथ ३ श्रोतुमिच्छामयुष्माकंसर्वमेतन्निशाचराः ४ प्रमथाऊचुः मैथुनेनसदोच्छिष्टाःकृते-चैवाधरोत्तरे मोहान्मांसानिखादेतवृक्षमूलेचयःस्वपेत् ५ आमिषंशीर्षतोयस्यपादतोयश्चसंविशेत् ततउच्छिष्टकाःसर्वेबहुच्छिद्राश्चमानवाः ६ उदकेचाप्यमेध्यानिश्लेष्माणंचप्रमुंचति एतेभक्ष्याश्चवध्याश्चमानुषानात्रसंशयः ७ एवंशीलसमाचारान्धर्षयामोहिमानवान् श्रूयतांचप्रतीघातान्येनशक्नुमहिंसितुम् ८ गोरोचनासमालंभोवचाहस्तश्चयोभवेत घृताक्षतंचयोदद्यान्मस्तकेतत्परायणः ९ येचमांसंनखादंतितान्नशक्नुमहिंसितुम् यस्यचाग्निर्गृहेनित्यंदिवारात्रौचदीप्यते १० तरक्षोश्चर्मदंष्ट्राश्चतथैवगिरिकच्छपः आज्यधूमोबिडालश्चच्छागःकृष्णोथपिंगलः ११ येषामेतानितिष्ठंतिगृहेषुगृहमेधिनाम् तान्यधृष्याण्यगाराणिपिशिताशैःसुदारुणैः १२ लोकानस्मद्विधायेचविचरंतियथासुखाः तस्मादेतानिगेहेषुरक्षोघ्नानिविशांपते १३ एतद्वःकथितंसर्वयत्रवःसंशयोमहान् १४ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेप्रमथरहस्येशतोपरिएकत्रिंशोऽध्यायः १३१ भीष्मउवाच ततःपद्मप्रतीकाशःपद्मोद्भूतःपितामहः उवाचवचनंदेवान्वासवंचशचीपतिम् १ अयंमहाबलोनागोरसातलचरोबली तेजस्वीरेणुकोनाममहासत्वपराक्रमः २ अतितेजस्विनःसर्वेमहावीर्यामहागजाः धारयंतिमहींकृत्स्नांसशैलवनकाननाम् ३ भवद्भिःसमनुज्ञातोरेणुकस्तान्महागजान् धर्मगुह्यानिसर्वाणिगत्वापृच्छतुतत्रवै ४ पितामहवचःश्रुत्वातेदेवारेणुकंतदा प्रेषयामासुरव्यग्रायत्रतेधरणीधराः ५ रेणुकउवाच अनुज्ञातोस्मिदेवैश्चपितृभिश्चमहाबलाः धर्मगुह्यानियुष्माकंश्रोतुमिच्छामितत्त्वतः ६ कथयध्वंमहाभागायद्वस्तत्त्वंमनीषितम् ७ दिग्गजाऊचुः कार्तिकेमासिचाश्लेषाबहुलस्याष्टमीशिवा तेननक्षत्रयोगेनयोददातिगुडौदनम् ८ इममंत्रंजपञ्छ्राद्धेयताहारोह्यकोपनः बलदेवप्रभृतयोयेनागाबलवत्तराः ९ अनंतान्यक्षयानित्यंभोगिनःसुमहाबलाः तेषांकुलोद्भवायेचमहाभूताभुजंगमाः १० एवमुक्त्वाबलिंतत्रवल्मीकेतुनिवेदयेत् तेभ्योबलिंप्रयच्छतुबलंतेजोभिवृद्धये ११

६ ७ ८ ९ १० तरक्षोर्व्याघ्रस्यगिरिकच्छपःपर्वतदरीशायीस्थूलकूर्मः ११ १२ १३ १४ इतिश्रीमन्महाभारतेआनुशासनिकेपर्वणिटीकायांशतोपरिएकत्रिंशोऽध्यायः १३१ ॐ १ नागोगजः २ ३ ४ ५ ६ ७ ८ ९ १० ११ ॐ

यदानारायणःश्रीमानुज्जहारवसुंधराम् तद्बलंतस्यदेवस्यधरानुद्धरतस्तथा एवमुक्त्वाबलिंतत्रवल्मीकेतुनिवेदयेत् १२ गजेंद्रकुसु
मार्कीर्णनीलवस्त्रानुलेपनम् निर्वपेत्तंतुवल्मीकेअस्तंयातेदिवाकरे १३ एवंतुष्टास्ततःसर्वेअधस्ताद्भारपीडिताः श्रमंतंनावबुध्यामो
धारयंतोवसुंधराम् १४ एवंमन्यामहेसर्वेभारार्त्तानिरपेक्षिणः ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवायद्युपोषितः १५ एवंसंवत्सरंकुलादा
नंबहुफलंलभेत् वल्मीकेबलिमादायतन्नोबहुफलंमतम् १६ येचनागामहावीर्यास्त्रिषुलोकेषुकृत्स्नशः कृतातिथ्याभवेयुस्तेशतं
वर्षाणितत्त्वतः १७ दिग्गजानांचतच्छ्रुत्वादेवतापितरस्तथा ऋषयश्चमहाभागाःपूजयंतिस्मरेणुकम् १८ इतिश्रीमहाभारतेआ
नुशासनिकेपर्वणिदानधर्मेदिग्गजानांरहस्येशततोपरिद्वात्रिंशोऽध्यायः १३२ महेश्वरउवाच सारमुद्धृत्ययुष्माभिःसाधुधर्म
उदाहृतः धर्मगुह्यमिदंमत्तःशृणुध्वंसर्वएवह १ येषांधर्माश्रिताबुद्धिःश्रद्दधानाश्चयेनराः तेषांस्यादुपदेष्टव्यःसरहस्योमहाफलः
२ निरुद्विग्नस्तुयोदद्यान्मासमेकंगवाह्निकम् एकभक्तंतथाश्नीयाच्छ्रूयतांतस्ययत्फलम् ३ इमागावोमहाभागाःपवित्रंपरमंस्मृताः
त्रींल्लोकान्धारयंतिस्मसदेवासुरमानुषान् ४ तासुचैवमहापुण्यशुश्रूषाचमहाफलम् अहन्यहनिधर्मेणयुज्यतेवैगवाह्निकः ५
मयाह्येताह्यनुज्ञाताःपूर्वमासन्कृतेयुगे ततोहमनुनीतोवैब्रह्मणापद्मयोनिना ६ तस्माद्व्रजस्थानंगतस्तिष्ठत्युपरिमेवृषः रमेहंसह
गोभिश्चतस्मात्पूज्याःसदैवताः ७ महाप्रभावावरदावरंदद्युरुपासिताः तागावोस्यानुमन्यंतेसर्वकर्मसुयत्फलम् ८ तस्यतत्र
चतुर्भागोयोदद्यातिगवाह्निकम् ९ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेमहादेवरहस्येशततोपरित्रयस्त्रिंशोऽध्यायः १३३
स्कंदउवाच ममाप्यनुमतोधर्मस्तंशृणुध्वंसमाहिताः नीलषंडस्यशृंगाभ्यांगृहीत्वामृत्तिकांतुयः १ अभिषेकंत्र्यहंकुर्यात्तस्यध
र्मंनिबोधत शोधयेदशुभंसर्वमाधिपत्यंपरत्रच २ यावच्चजायतेमर्त्यस्तावच्छूरोभविष्यति इदंचाप्यपरंगुह्यंसरहस्यंनिबोधत
३ प्रगृह्यौदुंबरंपात्रंपक्वान्नंमधुनासह सोमस्योत्तिष्ठमानस्यपौर्णमास्यांबलिंहरेत् ४ तस्यधर्मफलंनित्यंश्रद्दधानानिबोधत सा
ध्यारुद्रास्तथादित्याविश्वेदेवास्तथाश्विनौ ५ मरुतोवसवश्चैवप्रतिगृण्हंतितंबलिम् सोमश्चवर्धतेतेनसमुद्रश्चमहोदधिः ६ एष
धर्मोमयोद्दिष्टःसरहस्यःसुखावहः ७ विष्णुरुवाच धर्मगुह्यानिसर्वाणिदेवतानांमहात्मनाम् ऋषीणांचैवगुह्यानियःपठेदाह्निकं
सदा ८

९ १० ११ १२ १३ १४ १५ १६ १७ इतिआनुशासनिकेपर्वणिटीकायांशतोपरिचतुस्त्रिंशोऽध्यायः १३४ केभोज्याःभोज्या
न्नाः १ २ ३ वैश्याःभोज्याः भोजनीयाः ४ ५ ६ नकेवलंशूद्रान्नमेववर्ज्यंकिंतुशूद्रस्यकर्मनिष्ठायांसेवायांवर्त्तमानो विकर्मस्थोविशिष्टकर्मस्थःसंध्यावं

शृणुयाद्वानसूयुर्यःश्रद्दधानःसमाहितः नास्यविघ्नःप्रभवतिभयंचास्यनविद्यते ९ येचधर्माःशुभाःपुण्याःसरहस्याउदाहृताः तेषां धर्मफलंतस्ययःपठेतजितेंद्रियः १० नास्यपापंप्रभवतिनचपापेनलिप्यते पठेद्वाश्रावयेद्वापिश्रुत्वावालभतेफलम् ११ भुंजतेपितरोदेवाहव्यंकव्यमथाक्षयम् श्रावयंश्चापिधिप्रेंद्रान्पर्वसुप्रयतोनरः १२ ऋषीणांदेवतानांचपितॄणांचैवनित्यदा भवत्यभिमतःश्रीमान्धर्मेषुप्रयतःसदा १३ कृत्वापिपापकंकर्ममहापातकवर्जितम् रहस्यधर्मंश्रुत्वेमंसर्वपापैःप्रमुच्यते १४ भीष्मउवाच एतद्धर्मरहस्यंवैदेवतानांनराधिप व्यासोद्दिष्टंमयाप्रोक्तंसर्वदेवनमस्कृतम् १५ पृथिवीरत्नसंपूर्णाज्ञानंचेदमनुत्तमम् इदमेवततःश्राव्यमितिमन्येतधर्मवित् १६ नाश्रद्दधानायननास्तिकायननष्टधर्मायननिर्घृणाय नहेतुदुष्टायगुरुद्विषेवानानात्मभूतायनिवेद्यमेतत् १७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेदेवरहस्येशतोपरिचतुस्त्रिंशोऽध्यायः १३४ युधिष्ठिरउवाच केभोज्याब्राह्मणस्येहकेभोज्याःक्षत्रियस्यह तथावैश्यस्यकेभोज्याःकेशूद्रस्यचभारत १ भीष्मउवाच ब्राह्मणाब्राह्मणस्येहभोज्यायेचैवक्षत्रियाः वैश्याश्चापितथाभोज्याःशूद्राश्चपरिवर्जिताः २ ब्राह्मणाःक्षत्रियावैश्याभोज्यावैक्षत्रियस्यह वर्जनीयास्तुवैशूद्राःसर्वभक्ष्याविकर्मिणः ३ वैश्यास्तुभोज्याविप्राणांक्षत्रियाणांतथैवच नित्याग्नयोविविक्ताश्चचातुर्मास्यरताश्चये ४ शूद्राणामथयोभुंक्तेसभुंक्तेपृथिवीमलम् मलंनृणांसपिबतिमलंभुंक्तेजनस्यच ५ शूद्राणांयस्तथाभुंक्तेसभुंक्तेपृथिवीमलम् पृथिवीमलमश्नंतियेद्विजाःशूद्रभोजिनः ६ शूद्रस्यकर्मनिष्ठायांविकर्मस्थोहिपच्यते ब्राह्मणःक्षत्रियोवैश्योविकर्मस्थश्चपच्यते ७ स्वाध्यायनिरताविप्रास्तथास्वस्त्ययनेनृणाम् रक्षणेक्षत्रियंप्राहुर्वैश्यंपुष्ट्यर्थमेवच ८ करोतिकर्मयद्वैश्यस्तद्गत्वाह्युपजीवति कृषिगोरक्ष्यवाणिज्यमकुत्सावैश्यकर्मणि ९ शूद्रकर्मतुयःकुर्यादवहायस्वकर्मच सविज्ञेयोयथाशूद्रोनचभोज्यःकदाचन १० चिकित्सकःकांडपृष्ठःपुराध्यक्षःपुरोहितः सांवत्सरोवृथाध्यायीसर्वेतेशूद्रसंमिताः ११ शूद्रकर्मस्वथैतेषुयोभुंक्तेनिरपत्रपः अभोज्यभोजनंभुक्त्वाभयंप्राप्नोतिदारुणम् १२ कुलंवीर्यंचतेजश्चतिर्यग्योनित्वमेवच संप्रयातियथाश्वावैनिष्क्रियोधर्मवर्जितः १३

दनादियुक्तोपिपच्यतेनरकइतिशेषः ७ ८ ९ १० कांडपृष्ठःअधमः ११ १२ १३ ७ ७ ७ ७

१४ १५ निशाम्ननंतत्संबंधि १६ १७ नगरीरक्षतितस्य १८ १९ २० २१ इतिआनुशासनिकेपर्वणिटीकायांशतोपरिपंचत्रिंशोऽध्यायः १३५ १
२ ३ सावित्र्यासमिदाहुतिरितिसर्वत्रसंबध्यते ४ आदित्योदयनंतत्पर्यंतंस्थित्वा ५ विवृतंलोकप्रत्यक्षंधारयन् ६ ७ ८ ९ १० ग्रहसूतकयोःकारागा

भुक्तेश्चिकित्सकस्यान्नंनदन्नंचपुरीषवत् पुंश्चल्यन्नंचमूत्रंस्यात्कारुकान्नंचशोणितम् १४ विद्योपजीविनोन्नंचयोभुंक्तेसाधुसंमतः तद
थ्यन्नयथाशौद्रंतत्साधुःपरिवर्जयेत् १५ वचनीयस्ययोभुंक्तेतमाहुःशोणितं ह्रदम् पिशुनंभोजनंभुंक्तेब्रह्महत्यासमंविदुः १६ असत्कृ
तमवज्ञातंनभोक्तव्यंकदाचन १७ व्याधिकुलक्षयंचैवक्षिप्रंप्राप्नोतिब्राह्मणः नगरीरक्षिणोभुंक्तेश्वपचप्रवणोभवेत् १८ गोघ्नेचब्रा
ह्मणघ्नेचसुरापेगुरुतल्पगे भुक्त्वान्नंजायतेविप्रोरक्षसांकुलवर्धनः १९ न्यासापहारिणोभुक्त्वाकृतघ्नेक्लीबवर्त्तिनि जायतेशबरावा-
सेमध्यदेशबहिष्कृते २० अभोज्याश्चैवभोज्याश्चमयोक्तायथाविधि किमन्यदद्यकौंतेयमत्तस्त्वंश्रोतुमिच्छसि २१ इतिश्रीमहा
भारतेआनुशासनिकेपर्वणिदानधर्मेभोज्याभोज्यान्नकथनंनामशतोपरिपंचत्रिंशोऽध्यायः १३५ युधिष्ठिरउवाच उक्तास्तुभ
वताभोज्यास्तथाऽभोज्याश्चसर्वशः अत्रमेप्रश्नसंदेहस्तन्मेवदपितामह १ ब्राह्मणानांविशेषेणहव्यकव्यप्रतिग्रहे नानाविधेषुभो
ज्येषुप्रायश्चित्तानिशंसमे २ भीष्मउवाच हंतवक्ष्यामितेराजन्ब्राह्मणानांमहात्मनाम् प्रतिग्रहेषुभोज्येचमुच्यतेयेनपाप्मनः
३ घृतप्रतिग्रहेचैवसावित्रीसमिदाहुतिः तिलप्रतिग्रहेचैवसममेतद्युधिष्ठिर ४ मांसप्रतिग्रहेचैवमधुनोलवणस्यच आदित्योदयनं
स्थित्वापूतोभवतिब्राह्मणः ५ कांचनंप्रतिगृह्याथजपमानोगुरुश्रुतिम् कृष्णायसंचविवृतंधारयन्मुच्यतेद्विजः ६ एवंप्रतिगृहीतेथध
नेवस्त्रेतथास्त्रियाम् एवमेवनरश्रेष्ठसुवर्णस्यप्रतिग्रहे ७ अन्नप्रतिग्रहेचैवपायसेक्षुरसेतथा इक्षुतैलपवित्राणांत्रिसंध्ये-
प्सुनिमज्जनम् ८ व्रीहौपुष्पेफलेचैवजलेपिष्टमयेतथा यावकेदधिदुग्धेचसावित्रीशतशोन्विताम् ९ उपानहौचछत्रंच
प्रतिगृह्यौर्ध्वदैहिके जपेच्छतंसमायुक्तस्तेनमुच्येतपाप्मना १० क्षेत्रप्रतिग्रहेचैवग्रहसूतकयोस्तथा त्रीणिरात्र्याण्युपोषित्वा
तेनपाप्माद्विमुच्यते ११ कृष्णपक्षेतुयःश्राद्धंपितृणामश्नुतेद्विजः अन्नमेतदहोरात्रात्पूतोभवतिब्राह्मणः १२ नचसंध्यामुपा
सीतनचजाप्यंप्रवर्त्तयेत् नसंकिरेत्तदन्नंचततःपूयेतब्राह्मणः १३

रस्थाशौचवतोः ११ १२ नचसंध्यामुपासीतेत्यत्र अस्नातइतिशेषः नसंकिरेदितिपुनर्भोजनंनकुर्यादित्यर्थः १३ छ छ छ

अभ्यीयुरित्यर्थमिति संबंधः अपराण्हे क्रुद्धो धास्यसम्यगन्नमश्नन्तीत्यर्थः कीर्तिताः निमन्त्रिताः १४ हविः अन्नं १५ १६ दशरात्रेण दशरात्रावधि मृतस्याशौचं ग
वमेव प्रायश्चित्तानीत्यर्थः सावित्रीं जपन् रैवतीमिष्टिं रैवतं साम यद्दिरिं पवित्रेष्टिं कूष्माण्डं यद्देवा देवहेडनं कृतमित्यनुवाकपञ्चकं अघमर्षणं जले मज्जंश्च दशरात्रं वसेत्
युक्तगायत्र्याः ऋतं चेति तृचस्य वा अभिजपः प्रायश्चित्तानीति बहुवचनात्सर्वेषां समुच्चयः १७ १८ १९ २० आशौचं च शौचमात्रं प्रायश्चित्तमेव २१ २२

इत्यर्थमपराण्हे तु पितृणां श्राद्धमुच्यते यथोक्तानां यदश्नीयुर्ब्राह्मणाः पूर्वकीर्तिताः १४ मृतकस्य तृतीयाहे ब्राह्मणो योऽन्नमश्नुते स त्रि
वेलं समुन्मज्य द्वादशाहेन शुध्यति १५ द्वादशाहे व्यतीते तु कृतशौचो विशेषतः ब्राह्मणेभ्यो हविर्दत्त्वा मुच्यते तेन पाप्मना १६ मृतस्य द
शरात्रेण प्रायश्चित्तानि दापयेत् सावित्रीं रैवतीमिष्टिं कूष्माण्डमघमर्षणम् १७ मृतकस्य त्रिरात्रे यः समुद्दिष्टं समश्नुते सप्ताभिषवणं स्नात्वा पू
तो भवति ब्राह्मणः १८ सिद्धिमाप्नोति विपुलामापदं चैव नाप्नुयात् १९ यस्तु शूद्रैः समश्नीयाद्ब्राह्मणोऽप्येकभोजने आशौचं विधिवत्तस्य शौ
चमात्रं विधीयते २० यस्तु वैश्यैः सहाश्नीयाद्ब्राह्मणोऽप्येकभोजने स वै त्रिरात्रं दीक्षित्वा मुच्यते तेन कर्मणा २१ क्षत्रियैः सह योऽश्नीयाद्ब्रा
ह्मणोऽप्येकभोजने आप्लुतः सहवासोभिस्तेन मुच्येत पाप्मना २२ शूद्रस्य तु कुलं हन्ति वैश्यस्य पशुबान्धवान् क्षत्रियस्य श्रियं हन्ति ब्राह्मणस्य
सुवर्चसम् २३ प्रायश्चित्तं च शान्तिं च जुहुयात्तेन मुच्यते सावित्रीं रैवतीमिष्टिं कूष्माण्डमघमर्षणम् २४ अथोच्छिष्टमथान्योन्यं संप्राशेन्ना
त्र संशयः रोचना विरजा रात्रिर्मङ्गलालम्भनानि च २५ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे प्रायश्चित्तविधिर्नाम शतोप
रिषट्त्रिंशोऽध्यायः १३६ युधिष्ठिर उवाच दानेन वर्तते त्याह तपसा चैव भारत तदेतन्मे मनोदुःखं व्यपोह त्वं पितामह १ किं स्वित्पृ
थिव्यां तन्मे भवान्वक्तुमर्हति भीष्म उवाच शृणु यैर्धर्मनिरतैस्तपसा भावितात्मभिः लोका ह्यसंशयं प्राप्ता दानपुण्यरतैर्नृपैः
२ सत्कृतश्च तथात्रेयः शिष्येभ्यो ब्रह्म निर्गुणम् उपदिश्य तदा राजन्गतो लोकाननुत्तमान् ३ शिबिरौशीनरः प्राणान्प्रियस्य तनयस्य च
ब्राह्मणार्थमुपाकृत्य नाकपृष्ठमितो गतः ४ प्रतर्दनः काशिपतिः प्रदाय तनयं स्वकम् ब्राह्मणायातुलां कीर्तिमिह चामुत्र चाश्नुते ५ रन्तिदे
वश्च सांकृत्यो वसिष्ठाय महात्मने अर्घ्यं प्रदाय विधिवल्लेभे लोकाननुत्तमान् ६ दिव्यं शतशलाकं च यज्ञार्थं काञ्चनं शुभम् छत्रं देवावृधो द
त्त्वा ब्राह्मणायास्थितो दिवम् ७

विरजा दूर्वा रात्रिर्हरिद्रा तिर्यक्च २५ इति आनुशासनिके पर्वणि टीकायां शतोपरिषट्त्रिंशोऽध्यायः १३६ दानेन वर्ते
न्ये पृथिव्यां कः श्रेष्ठमिति दानेनेति सार्धेनाह वर्तन्ते स्वर्गे इति शेषः नयो दानमेव प्रशंसन्ति स्म पृथिव्यां दाना १ २ ३ ४ ५ ६ ७ ७. ७

८ सावित्रः कर्णः ९ १० ११ मनसोमनःसंकल्पादप्यधिकान् १२ देवराट् भूदेवोवसिष्ठः १३ १४ न्यासंदानरूपेणस्थापनम् १५ १६ अनुज्ञाप्यदत्त्वा १७

भगवानंबरीषश्चब्राह्मणायामितौजसे प्रदायसकलंराष्ट्रंसुरलोकमवाप्तवान् ८ सावित्रः कुंडलेदिव्येयानंचजनमेजयः ब्राह्मणाय
चगांदत्त्वागतोलोकाननुत्तमान् ९ वृषादर्भिश्चशैब्यश्चरत्नानिविविधानिच रम्यांश्चावसथान्दत्त्वाद्विजेभ्योदिवमागतः १० निमीराष्ट्रंच
वैदर्भिःकन्यांदत्त्वामहात्मने अगस्त्यायगतःस्वर्गंसपुत्रपशुबांधवः ११ जामदग्न्यश्चविप्रायभूमिंदत्त्वामहायशाः रामोक्षयांस्तथालोका
ञ्जगाममनसोधिकान् १२ अवर्षतिचपर्जन्येसर्वभूतानिदेवराट् वसिष्ठोजीवयामासयेनयातोक्षयांगतिम् १३ रामोदाशरथिश्चैवहुत्वा
यज्ञेषुवैवसु सगतोह्यक्षयाँल्लोकान्यस्यलोकेमहद्यशः १४ कक्षसेनश्चराजर्षिर्वसिष्ठायमहात्मने न्यासंयथावत्संन्यस्यजगामसुम-
हायशाः १५ करंधमस्यपौत्रस्तुमरुत्तोविक्षितःसुतः कन्यामांगिरसेदत्त्वादिवमाशुजगामसः १६ ब्रह्मदत्तश्चपांचाल्योराजाधर्मभृतांव
रः निधिंशंखमनुज्ञाप्यजगामपरमांगतिम् १७ राजामित्रसहश्चैववसिष्ठायमहात्मने मदयंतींप्रियांभार्यांदत्त्वाचत्रिदिवंगतः १८ म
नोःपुत्रश्चसुद्युम्नोलिखितायमहात्मने दंडमुद्धृत्यधर्मेणगतोलोकाननुत्तमान् १९ सहस्रचित्योराजर्षिःप्राणानिष्टान्महायशाः ब्राह्म
णार्थेपरित्यज्यगतोलोकाननुत्तमान् २० सर्वकामैश्चसंपूर्णंदत्त्वावेश्महिरण्मयम् मौद्गल्यायगतःस्वर्गंशतद्युम्नोमहीपतिः २१ भक्ष्य
भोज्यस्यचकृतान्राशयःपर्वतोपमान् शांडिल्यायपुरादत्त्वासुमन्युर्दिवमास्थितः २२ नाम्नाचद्युतिमान्नामशाल्वराजोमहाद्युतिः दत्त्वा
राज्यमृचीकायगतोलोकाननुत्तमान् २३ मदिराश्वश्चराजर्षिर्दत्त्वाकन्यांसुमध्यमाम् हिरण्यहस्तायगतोलोकान्देवैरधिष्ठितान् २४ लो
मपादश्चराजर्षिःशांतांदत्त्वासुतांप्रभुः ऋष्यशृंगायविपुलैःसर्वैःकामैरयुज्यत २५ कौत्सायदत्त्वाकन्यांतुहंसींनामयशस्विनीम् गतो
क्षयानतोलोकान्राजर्षिश्चभगीरथः २६ दत्त्वाशतसहस्रंतुगवांराजाभगीरथः सवत्सानांकोहलायगतोलोकाननुत्तमान् २७ एतेचा
न्येचबहवोदानेनतपसाचह युधिष्ठिरगताःस्वर्गंनिवर्तंतेपुनःपुनः २८ तेषांप्रतिष्ठिताकीर्तिर्यावत्स्थास्यतिमेदिनी गृहस्थैर्दानतपसा
यैर्लोकावैविनिर्जिताः २९ शिष्टानांचरितंह्येतत्कीर्तितंमेयुधिष्ठिर दानयज्ञप्रजासर्गैरेतेहिदिवमास्थिताः ३० दत्त्वातुसततंतेस्तुकौर
वाणांधुरंधर दानयज्ञक्रियायुक्ताबुद्धिर्धर्मोपचायिनी ३१ यत्रतेनृपशार्दूलसंदेहोवैभविष्यति श्वःप्रभातेहिवक्ष्यामिसंध्याहिसमुपस्थि
ता ३२

१८ दंडंचोरयोग्यंहस्तच्छेदरूपं १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ७.

इतिआनुशासनिकेपर्वणिटीकायांशतोपरिसप्तत्रिंशोऽध्यायः १३७ १ २ ३ ४ ५ धर्मादित्यनन्याचष्टे इहेति ६ अथार्थिलक्षणमाहददातीति ७
८ ९ १० ११ इतिआनुशासनिकेपर्वणिटीकायांशतोपरिअष्टत्रिंशोऽध्यायः १३८ पितामहेत्यध्यायद्वयस्पष्टार्थं तस्यतात्पर्यंएकार्णवप्रभुःपर्वतस्यदाहकउ

इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेशतोपरिसप्तत्रिंशोऽध्यायः १३७ युधिष्ठिरउवाच श्रुतंमेभवतस्तातसत्यव्रतपरा
क्रम दानधर्मेणमहतायेप्राप्तास्त्रिदिवंनृपाः १ इमांस्तुश्रोतुमिच्छामिधर्मान्धर्मभृतांवर दानंकतिविधंदेयंकिंतस्यचफलंलभेत् २ क-
थंकेभ्यश्चधर्म्यंचदानंदातव्यमिष्यते कैःकारणैःकतिविधंश्रोतुमिच्छामितत्त्वतः ३ भीष्मउवाच शृणुतत्त्वेनकौंतेयदानंप्रतिममा
नघ यथादानंप्रदातव्यंसर्ववर्णेषुभारत ४ धर्मादर्थाद्भयात्कामात्कारुण्यादितिभारत दानंपंचविधंज्ञेयंकारणैर्यैर्निबोधतत् ५
इहकीर्तिमवाप्नोतिप्रेत्यचानुत्तमंसुखम् इतिदानंप्रदातव्यंब्राह्मणेभ्योनसूयता ६ ददातिवादास्यतिवामह्यंदत्तमनेनवा इत्यर्थिभ्यो
निशम्यैवसर्वंदातव्यमर्थिने ७ नास्याहंनमदीयोयंपापंकुर्याद्विमानितः इतिदद्याद्भयादेवदृढमूढायपंडितः ८ प्रियोमेयंप्रियोस्या
हमितिसंप्रेक्ष्यबुद्धिमान् वयस्यायैवमक्लिष्टंदानंदद्यादतंद्रितः ९ दीनश्चयाचतेयंचाल्पेनापिहितुष्यति इतिदद्याद्दरिद्रायकारु
ण्यादितिसर्वथा १० इतिपंचविधंदानंपुण्यकीर्तिविवर्द्धनम् यथाशक्त्याप्रदातव्यमेवमाहप्रजापतिः ११ इतिश्रीमहाभारते
आनुशासनिकेपर्वणिदानधर्मेशतोपरिअष्टत्रिंशोऽध्यायः १३८ युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशारद
आगमैर्बहुभिःस्फीतोभवान्नःप्रवरेकुले १ त्वत्तोधर्मार्थसंयुक्तमायत्यांचसुखोदयम् आश्चर्यभूतंलोकस्यश्रोतुमिच्छाम्यरिंदम
२ अयंचकालःसंप्राप्तोदुर्लभोज्ञातिबांधवैः शास्ताचनहिनःकश्चित्त्वामृतेपुरुषर्षभ ३ यदितेहमनुग्राह्योभ्रातृभिःसहितोनघ व
क्तुमर्हसिनःप्रश्नंयत्त्वापृच्छामिपार्थिव ४ अयंनारायणःश्रीमान्सर्वपार्थिवसंमतः भवंतंबहुमानेनप्रश्रयेणचसेवते ५ अस्यचैव
समक्षंत्वंपार्थिवानांचसर्वशः भ्रातॄणांचप्रियार्थंमेस्नेहाद्भाषितुमर्हसि ६ वैशंपायनउवाच तस्यतद्वचनंश्रुत्वास्नेहादागतसं-
भ्रमः भीष्मोभागीरथीपुत्रइदंवचनमब्रवीत् ७ भीष्मउवाच अहंतेकथयिष्यामिकथामतिमनोहराम् अस्यविष्णोःपुराराजन्प्र
भावोयोमयाश्रुतः ८

द्वापरकल्पेसप्तवैष्णवेविष्णुरित्यभिगतःपूर्वाध्याये माहेश्वरेमहेश्वरइत्युत्तराध्याये अत्रैवनेत्रसंमीलनेदेव्यावाल्याद-
निर्दिते नष्टालोकेसदालोकक्षणेनसंपद्यतेतेनमहेश्वरवचनेनशिवभूतैरंशाद्यस्यवाभेदोदर्शितः १ २ ३ ४ ५ ६ ७ ८

यश्चगोवृषभांकस्यप्रभावस्तंचमेशृणु रुद्राण्याः संशयोयश्चदंपत्योस्तंचमेशृणु ९ व्रतंचचारधर्मात्मा कृष्णोद्वादशवार्षिकम् दीक्षि
तंचागतौद्रष्टुमुभौनारदपर्वतौ १० कृष्णद्वैपायनश्चैव धौम्यश्चजपतांवरः देवलःकाश्यपश्चैवहस्तिकाश्यपएवच ११ अपरेचर्षयः
संतोदीक्षादमसमन्विताः शिष्यैरनुगताःसिद्धैर्देवकल्पैस्तपोधनैः १२ तेषामतिथिसत्कारमर्चनीयंकुलोचितम् देवकीतनयःप्रीतोदे
वकल्पमकल्पयत् १३ हरितेषुसुवर्णेषुबर्हिष्केषुनवेषुच उपोपविविशुःप्रीताविष्टरेषुमहर्षयः १४ कथाश्चक्रुस्ततस्तेतुमधुराधर्मसंहिताः
राजर्षीणांसुराणांचयेवसंतितपोधनाः १५ ततोनारायणंतेजोव्रतचर्येंधनोत्थितम् वक्त्रान्निःसृत्यकृष्णस्यवन्हिरद्भुतकर्मणः १६ सोग्नि
र्ददाहतंशैलंसद्रुमंसलताक्षुपम् सपक्षिमृगसंघातंसश्वापदसरीसृपम् १७ मृगैश्चविविधाकारैर्हाहाभूतमचेतनम् शिखरंतस्यशैल
स्यमथितंदीनदर्शनम् १८ सतुवन्हिर्महाज्वालोदग्ध्वासर्वमशेषतः विष्णोःसमीपआगम्यपादौशिष्यवदस्पृशत् १९ ततोविष्णुर्गिरिंदृष्ट्वा
निर्दग्धमरिकर्शनः सौम्यैर्दृष्टिनिपातैस्तंपुनःप्रकृतिमानयत् २० तथैवसगिरिर्भूयःप्रपुष्पितलताद्रुमः सपक्षिगणसंघुष्टःसश्वापदसरी-
सृपः २१ तमद्भुतमचिंत्यंचदृष्ट्वामुनिगणस्तदा विस्मितोहृष्टरोमाचबभूवास्राविलेक्षणः २२ ततोनारायणोदृष्ट्वातानृषीन्विस्मयान्विता
न् प्रश्रितंमधुरंस्निग्धंपप्रच्छवदतांवरः २३ किमर्थमृषिपूगस्यत्यक्तसंगस्यनित्यशः निर्ममस्यागमवतोविस्मयःसमुपागतः २४ एत-
न्मेसंशयंसर्वंयाथातथ्यमनिंदिताः ऋषयोवक्तुमर्हंतिनिश्चितार्थंतपोधनाः २५ ऋषयऊचुः भवान्विसृजतेलोकान्भवान्संहरतेपुनः
भवान्शीतंभवानुष्णंभवानेवचवर्षति २६ पृथिव्यांयानिभूतानिस्थावराणिचराणिच तेषांपितात्वंमातात्वंप्रभुःप्रभवएवच २७ एतन्नो
विस्मयकरंसंशयंमधुसूदन त्वमेवार्हसिकल्याणवक्तुंवन्हिविनिर्गमम् २८ ततोविगतसंत्रासावयमप्यरिकर्शन यच्छ्रुतंयच्चदृष्टंनस्तत्प्रव-
क्ष्यामहेहरे २९ वासुदेवउवाच एतद्वैष्णवंतेजोममवक्त्राद्विनिःसृतम् कृष्णवर्त्मायुगांताभोयेनायंमथितोगिरिः ३० ऋषयश्चा
र्तिमापन्नाजितक्रोधाजितेंद्रियाः भवंतोव्यथिताश्चासन्देवकल्पास्तपोधनाः ३१ व्रतचर्यापरीतस्यतपस्विव्रतसेवया ममवन्हिःसमुद्भू
तोनवैव्यथितुमर्हथ ३२ व्रतंचर्तुमिहायातस्त्वहंगिरिमिमंशुभम् पुत्रंचात्मसमंवीर्येतपसालब्धुमागतः ३३ १६६

ततोममात्मायोदेहेसोऽग्निर्भूत्वाविनिःसृतः गतश्चवरदंद्रष्टुंसर्वलोकपितामहम् ३४ तेनचात्मानुशिष्टोमेपुत्रत्वेमुनिसत्तमाः तेजसोऽर्थेनपु
त्रस्तेभवितेतिवृषध्वजः ३५ सोयंवन्हिमुपागम्यपादमूलेममांतिकम् शिष्यवत्परिचर्यार्थंशांतःप्रकृतिमागतः एतदेवरहस्यंवःपद्मना
भस्यधीमतः मयाप्रोक्तंसमासेननभीःकार्यातपोधनाः ३७ सर्वत्रगतिरव्यग्राभवतांदीर्घदर्शनात् तपस्विव्रतसंदीप्ताज्ञानविज्ञानशो
भिताः ३८ यच्छ्रुतंयच्चवोदृष्टंदिविवायदिवाभुवि आश्चर्यंपरमंकिंचित्तद्भवंतोब्रुवंतुमे ३९ तस्यामृतनिकाशस्यवाङ्मधोरस्तिमेस्पृ
हा भवद्भिःकथितस्येहतपोवननिवासिभिः ४० यद्यप्यहमदृष्टंवोदिव्यमद्भुतदर्शनम् दिविवाभुविवाकिंचित्पश्याम्यमरदर्शनाः ४१
प्रकृतिःसाममपरानक्वचित्प्रतिहन्यते नचात्मागतमैश्वर्यमाश्चर्यंप्रतिभातिमे ४२ श्रद्धेयःकथितोह्यर्थःसज्जनश्रवणंगतः चिरंति
ष्ठतिमेदिन्यांशैलेलेख्यमिवार्पितम् ४३ तदहंसज्जनमुखान्निःसृतंतत्समागमम कथयिष्याम्यहमहोबुद्धिदीपकरंनृणाम् ४४ ततो
मुनिगणाःसर्वेविस्मिताःकृष्णसन्निधौ नेत्रैःपद्मदलप्रख्यैरपश्यंस्तंजनार्दनम् ४५ वर्धयंतस्तथैवान्येपूजयंतस्तथापरे वाग्भिर्ऋ
ग्भूषितार्थाभिःस्तुवंतोमधुसूदनम् ४६ ततोमुनिगणाःसर्वेनारदंदेवदर्शनम् तदानियोजयामासुर्वचनेवाक्यकोविदम् ४७
मुनयऊचुः यदाश्चर्यमचिंत्यंचगिरौहिमवतिप्रभो अनुभूतंमुनिगणैस्तीर्थयात्रापरैर्मुने ४८ तद्भवान्नृषिसंघस्यहितार्थंसर्वमादितः
यथादृष्टंहृषीकेशेसर्वमाख्यातुमर्हसि ४९ एवमुक्तःसमुनिभिर्नारदोभगवान्मुनिः कथयामासदेवर्षिःपूर्ववृत्तामिमांकथाम् ५०
इतिश्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे शततोपरिऊनचत्वारिंशोऽध्यायः १३९ भीष्मउवाच ततोनारायणसुहृन्ना
रदोभगवानृषिः शंकरस्योमयासार्धंसंवादंप्रत्यभाषत १ नारदउवाच तपश्चचारधर्मात्मावृषभांकःसुरेश्वरः पुण्येगिरौ
हिमवतिसिद्धचारणसेविते २ नानौषधियुतेरम्येनानापुष्पसमाकुले अप्सरोगणसंकीर्णेभूतसंघनिषेविते ३ तत्रदेवोमुदायुक्तो
भूतसंघशतैर्वृतः नानारूपैर्विरूपैश्चदिव्यैरद्भुतदर्शनैः ४ सिंहव्याघ्रगजप्रख्यैःसर्वजातिसमन्वितैः क्रोष्टुकद्वीपिवदनैर्ऋक्षर्षभ
मुखैस्तथा ५ उलूकवदनैर्भीमैर्वृकश्येनमुखैस्तथा नानावर्णैर्मृगमुखैःसर्वजातिसमन्वितैः ६ किंनरैर्यक्षगंधर्वैरक्षोभूतगणैस्त-
था दिव्यपुष्पसमाकीर्णंदिव्यज्वालासमाकुलम् ७ दिव्यचंदनसंयुक्तंदिव्यधूपेनधूपितम् तत्सदोवृषभांकस्यदिव्यवादित्रनादितम् ८

मृदंगपणवोतघुष्टंशंखभेरीनिनादितम् नृत्यद्भिर्भूतसंघैश्चबर्हिणैश्चसमंततः ९ प्रनृत्ताप्सरसंदिव्यंदेवर्षिगणसेवितम् दृष्टिकांत
मनिर्देश्यंदिव्यमद्भुतदर्शनम् १० सगिरिस्तपसातस्यगिरिशस्यव्यरोचत स्वाध्यायपरमैर्विप्रैर्ब्रह्मघोषोनिनादितः ११ षट्पदैरुप-
गीतैश्चमाधवाप्रतिमोगिरिः तन्महोत्सवसंकाशंभीमरूपधरंततः १२ दृष्ट्वामुनिगणस्यासीत्पराप्रीतिर्जनार्दन मुनयश्चमहाभागाःसि
द्धाश्चैवोर्ध्वरेतसः १३ मरुतोवसवःसाध्याविश्वेदेवाःसवासवाः यक्षानागाःपिशाचाश्चलोकपालाहुताशनाः १४ वाताःसर्वेमहाभू
तास्तत्रैवासन्समागताः ऋतवःसर्वपुष्पैश्चव्यकिरंतमहाद्भुतैः १५ ओषध्योज्वलमानाश्चद्योतयंतिस्मतद्वनम् विहंगाश्चमुदायुक्ताः
प्रानृत्यन्व्यनदंश्चह १६ गिरिपृष्ठेषुरम्येषुव्याहरंतोजनप्रियाः तत्रदेवोगिरितटेदिव्यधातुविभूषिते १७ पर्यंकइवविभ्राजन्नुपवि
ष्टोमहामनाः व्याघ्रचर्मांबरधरःसिंहचर्मोत्तरच्छदः १८ व्यालयज्ञोपवीतीचलोहितांगदभूषणः हरिश्मश्रुर्जटीभीमोभयकर्त्तासु
रद्विषाम् १९ अभयःसर्वभूतानांभक्तानांवृषभध्वजः दृष्ट्वामहर्षयःसर्वेशिरोभिरवनिंगताः २० विमुक्ताःसर्वपापेभ्यःक्षांताविगत
कल्मषाः तस्यभूतपतेःस्थानंभीमरूपधरंबभौ २१ अप्रधृष्यतरंचैवमहोरगसमाकुलम् क्षणेनैवाभवत्सर्वमद्भुतंमधुसूदन
२२ तत्सदोवृषभांकस्यभीमरूपधरंबभौ तमभ्ययाच्छैलसुताभूतस्त्रीगणसंवृता २३ हरतुल्यांबरधरासमानव्रतधारिणी बि
भ्रतीकलशंरौक्मंसर्वतीर्थजलोद्भवम् २४ गिरिस्रवाभिःसर्वाभिःपृष्ठतोनुगताशुभा पुष्पवृष्ट्याभिवर्षंतीगंधैर्बहुविधैस्तथा सेवती
हिमवत्पार्श्वंहरपार्श्वमुपागमत् २५ ततःस्मयंतीपाणिभ्यांनर्मार्थंचारुहासिनी हरनेत्रेशुभेदेवीसहसासासमावृणोत् २६ संवृता
भ्यांतुनेत्राभ्यांतमोभूतमचेतनं निर्होमंनिर्वषट्कारंजगद्वैसहसाभवत् २७ जनश्चविमनाःसर्वोभयत्राससमन्वितः निमीलितेभू
तपतौनष्टसूर्यइवाभवत् २८ ततोवितिमिरोलोकःक्षणेनसमपद्यत ज्वालाचमहतीदीप्ताललाटात्तस्यनिःसृता २९ तृतीयंचास्य
संभूतंनेत्रमादित्यसन्निभम् युगांतसदृशंदीप्तंयेनासौमथितोगिरिः ३० ततोगिरिसुतादृष्ट्वादीप्ताग्निसदृशेक्षणम् हरंप्रणम्यशिर
सादद्दर्शायतलोचना ३१ दह्यमानेनटेतस्मिन्ससालसरलद्रुमे सचंदनवनेरम्येदिव्यौषधिविदीपिते ३२ मृगयूथैर्द्रुतैर्भीतैर्हरपा-
र्श्वमुपागतैः शरणंचाप्यविदद्भिस्तत्सदःसंकुलंबभौ ३३ ततोनभस्पृशज्ज्वालोविद्युल्लोलोग्निरुल्बणः द्वादशादित्यसदृशोयुगांता
ग्निरिवापरः ३४

क्षणेनतेननिर्दग्धोहिमवानभवन्नगः सधातुशिखराभोगोदीनदग्धलतौषधिः ३५ तंदृष्ट्वामथितंशैलंशैलराजसुतातततः भगवंतंप्रप-
न्नावैसांजलिप्रग्रहास्थिता ३६ उमांशर्वस्तदादृष्ट्वास्त्रीभावगतमार्दवाम् पितुर्दैन्यमनिच्छंतींप्रीत्यापश्यत्तदागिरिम् ३७ क्षणेनहिम
वान्सर्वःप्रकृतिस्थःसुदर्शनः प्रहृष्टविहगश्चैवसुपुष्पितवनद्रुमः ३८ प्रकृतिस्थंगिरिंदृष्ट्वाप्रीतादेवंमहेश्वरम् उवाचसर्वलोकानांपतिं
शिवमनिंदिता ३९ उमोवाच भगवन्सर्वभूतेशशूलपाणेमहाव्रत संशयोमेमहान्जातस्तन्मेव्याख्यातुमर्हसि ४० किमर्थंतेललला
टेवैतृतीयंनेत्रमुत्थितम् किमर्थंचगिरिर्दग्धःसपक्षिगणकाननः ४१ किमर्थंचपुनर्देवप्रकृतिस्थस्त्वयाकृतः तथैवद्रुमसंच्छन्नःकृ
तोयंतेपितामम ४२ महेश्वरउवाच नेत्रेमेसंवृतेदेवित्वयाबाल्यादनिंदिते नष्टालोकस्तदालोकःक्षणेनसमपद्यत ४३ नष्टा-
दित्येतथालोकेतमोभूतेनगात्मजे तृतीयंलोचनंदीप्तंसृष्टंमेरक्षताप्रजाः ४४ तस्यचाक्ष्णोमहत्तेजोयेनायंमथितोगिरिः त्वत्प्रियार्थं
चमेदेविप्रकृतिस्थःपुनःकृतः ४५ उमोवाच भगवन्केननेवक्त्रंचंद्रवत्प्रियदर्शनम् पूर्वंतथैवश्रीकांतमुत्तरंपश्चिमंतथा ४६
दक्षिणंचमुखंरौद्रंकेनोर्ध्वंकपिलाजटाः केनकंठश्चतेनीलोबर्हिबर्हनिभःकृतः ४७ हस्तेदेवपिनाकंतेसततंकेनतिष्ठति जटिलोब्र
ह्मचारीचकिमर्थमसिनित्यदा ४८ एतन्मेसंशयंसर्वंवक्तुमर्हसिवैप्रभो सधर्मचारिणीचाहंभक्ताचेतिवृषध्वज ४९ भीष्मउवाच
एवमुक्तःसभगवान्शैलपुत्र्यापिनाकधृक् तस्याधृत्याचबुद्ध्याचप्रीतिमानभवत्प्रभुः ५० ततस्तामब्रवीद्देवःसुभगेश्रूयतामिति हेतुभि
र्यैर्ममैतानिरूपाणिरुचिरानने ५१ इतिश्रीम० आनु० दानधर्मेउमामहेश्वरसंवादोनामशततोपरिचत्वारिंशोऽध्यायः १४० श्रीभ
गवानुवाच तिलोत्तमानामपुराब्रह्मणायोषिदुत्तमा तिलंतिलंसमुद्धृत्यरत्नानांनिर्मिताशुभा १ साभ्यगच्छतमांदेविरूपेणाप्र-
तिमाभुवि प्रदक्षिणंलोभयंतीमांशुभेरुचिरानना २ यतोयतःसासुदतीमामुपाधावदंतिके ततस्ततोमुखंचारुममदेविविनिर्ग-
तम् ३ तांदिदृक्षुरहंयोगाच्चतुर्मूर्तित्वमागतः चतुर्मुखश्चसंवृत्तोदर्शयन्योगमुत्तमम् ४ पूर्वेणवदनेनाहमिंद्रत्वमनुशास्मिह उ
त्तरेणत्वयासार्धंरमाम्यहमनिंदिते ५ पश्चिमंमेमुखंसौम्यंसर्वप्राणिसुखावहम् दक्षिणंभीमसंकाशंरौद्रंसंहरतिप्रजाः ६

एवंशंभोःकृष्णादन्यत्वंजगदात्मत्वंचोक्त्वाचतुर्मुखादनन्यत्वंचाहतिलोत्तमेत्यादिना १ २ ३ ४ पूर्वेणवदनेनेत्यादिनासकलदिक्पा
लान्प्राप्याहमेवैकः ५ ६ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

एवंभूतोपिस्वात्मभूतलोकरक्षार्थंतपआयुधंचधारयामीत्याह जटिलइति ७ इंद्रेणेति एवमहंदासानामतिक्रमंसोढ्वा तन्नकांस्त्यैर्थनीलकंठमपिधारयामीतिस्वस्यपर
मकारुणिकत्वंचदर्शितम ८ ९ सुरभीमिति वाचंधेनुमुपासीततस्याश्चत्वारस्तनाःस्वाहाकारःस्वधाकारोहंतकारोवषट्कारइतिवाग्धेनोश्चतुर्भिःस्तनैःपुष्टो
गोधर्मोगोवृषस्तस्यफलभूतंपरंवैराग्यंविवेकादिकंफेनस्थानीयंयदायत्नोपगतंभवतितदावाग्धेनोःपारमार्थिकंप्रामाण्यमयतेव्यावहारिकमेवनतनुस्थाप्यते १०
११ सोयंगवाम् विवर्णभावःधर्मश्चएवंभूतस्यजीवन्मुक्तस्वरूपसूचकोध्वजइवतत्त्वविदिदृश्यतइतिप्रघट्टकार्थः १२ १३ १४ १५ पूर्वंमैत्रेयभिक्षायांवारा

जटिलोब्रह्मचारीचलोकानांहितकाम्यया देवकार्यार्थसिध्यर्थंपिनाकंमेकरेस्थितम् ७ इंद्रेणचपुरावज्रंक्षिप्तंश्रीकांक्षिणाममं दग्ध्वाकं
ठंतुतद्यातंतेनश्रीकंठतामम ८ उमोवाच वाहनेषुत्रसर्वेषुश्रीमत्स्वन्येषुसत्तम कथंचवृषभोदेववाहनत्वमुपागतः ९ म-
हेश्वरउवाच सुरभीमसृजद्ब्रह्मादेवधेनुंपयोमुचम् सासृष्टाबहुधाजाताक्षरमाणापयोमृतम् १० तस्यावत्समुखोत्सृष्टःफेनो-
मद्गात्रमागतः ततोदग्धामयागावोनानावर्णत्वमागताः ११ ततोहंलोकगुरुणाशमंनीतोर्थवेदिना वृषंचैनंध्वजार्थंमेददौवाहनमे
वच १२ उमोवाच निवासाबहुरूपास्तेदिविसर्वगुणान्विताः तांश्चसंत्यज्यभगवन्श्मशानेरमसेकथम् १३ केशास्थिकलि-
लेभीमेकपालघटसंकुले गृध्रगोमायुबहुलेचिताग्निशतसंकुले १४ अशुचौमांसकलिलेवसाशोणितकर्दमे विकीर्णांत्रास्थिनिच
येशिवानादविनादिते १५ महेश्वरउवाच मेध्यान्वेषीमहींकृत्स्नांविचराम्यनिशंसदा नचमेध्यतरंकिंचिच्छ्मशानादिहलक्ष्यते
१६ तेनमेसर्ववासानांश्मशानेरमतेमनः न्यग्रोधशाखासंछन्नेनिर्भुग्नस्रग्विभूषिते १७ तत्रचैवरमंतीमेभूतसंघाःशुचिस्मिते न
चभूतगणैर्देविविनाहंवस्तुमुत्सहे १८ एषवासोहिमेमेध्यःस्वर्गीयश्चमतःशुभे पुण्यःपरमकश्चैवमेध्यकामैरुपास्यते १९
उमोवाच भगवन्सर्वभूतेशसर्वधर्मविदांवर पिनाकपाणेवरदसंशयोमेमहानयम् २०

णस्यामज्ञातैर्मुमुक्षुभिर्वस्तव्यमितिव्यासवा
क्येनसूचितम् अग्रेचकाश्यांशवदर्शनाच्छिवदर्शनंसंवर्तवासेनसूच्यते पूर्वत्रअल्पयाभिक्षयादत्तयामैत्रेयस्यानंतपुण्योत्पत्तिवचनेनवाराणस्याःपुण्यक्षेत्रत्व
मुक्तं अग्रेचकाश्यांशवदर्शनाच्छिवदर्शनस्यान्यथासिद्धिसूचनेनामृतानांशरीरंशिवलिंगमयंभवतीतिअत्रपवित्रत्वेनतदेवप्रदृश्यतेमेध्यात्वेषीत्यादिनामेधायां
धीवृत्तौअविदितंमेध्यंब्रह्मतत्कामैःइदंश्मशानंउपास्यतइतिवचनान्नान्यत्श्मशानंरुद्रावासइतिज्ञेयम् १६ १७ १८ १९ योगजधर्मंवृषंवारा
णसीश्मशानंचसेवितुमशक्तानांतपआदिकंविधातुंभगवन्नित्यादिर्ग्रंथःप्रवर्तते २० ७ ७ ७ ७ ७ ७

तपस्तपोवेषः तपःसूचकोवेषः नखलोमजटाधारणत्यादिः २१ २२ २३ २४ २५ २६ पंचविधः अहिंसादिविशिष्टोगार्हस्थ्यधर्मादिः धर्मस्यपुण्य

अयंमुनिगणःसर्वस्तपस्तेपइतिप्रभो तपोन्वेषकरोल्लोकेभ्रमतेविविधाकृतिः २१ अस्यचैवर्षिसंघस्यममचप्रियकाम्यया एतंममेह
संदेहंवक्तुमर्हस्यरिंदम २२ धर्मःकिंलक्षणःप्रोक्तःकथंवाचरितुंनरैः शक्योधर्ममविदद्भिर्धर्मज्ञवदमेप्रभो २३ नारदउवाच ततो
मुनिगणःसर्वस्तांदेवींप्रत्यपूजयत् वाग्भिःऋग्भूषितार्थाभिःस्तवैश्चार्थविशारदैः २४ महेश्वरउवाच अहिंसासत्यवचनंसर्वभू
तानुकंपनम् शमोदानंयथाशक्तिगार्हस्थ्योधर्मउत्तमः २५ परदारेष्वसंसर्गोन्यासस्त्रीपरिरक्षणम् अदत्तादानविरमोमधुमांसस्यवर्जन
म् २६ एषपंचविधोधर्मोबहुशाखःसुखोदयः देहिभिर्धर्मपरमैश्चर्तव्योधर्मसंभवः २७ उमोवाच भगवन्संशयःपृष्टस्तन्मेशंसितु
मर्हसि-चातुर्वर्ण्यस्ययोधर्मःस्वेस्वेवर्णेगुणावहः २८ ब्राह्मणेकीदृशोधर्मःक्षत्रियेकीदृशोभवत् वैश्येकिंलक्षणोधर्मःशूद्रेकिंलक्षणोभवे
त् २९ महेश्वरउवाच न्याय्यतस्तेमहाभागेसर्वशःसमुदीरितः भूमिदेवामहाभागाःसदालोकेद्विजातयः ३० उपवासःसदाधर्मोब्रा
ह्मणस्यनसंशयः सहिधर्मार्थसंपन्नोब्रह्मभूयायकल्पते ३१ तस्यधर्मक्रियादेविब्रह्मचर्याचन्यायतः व्रतोपनयनंचैवद्विजोयेनोपपद्यते
३२ गुरुदैवतपूजार्थंस्वाध्यायाभ्यसनात्मकः देहिभिर्धर्मपरमैश्चर्तव्योधर्मसंभवः ३३ उमोवाच भगवन्संशयोमह्यंतन्मेव्याख्या
तुमर्हसि चातुर्वर्ण्यस्यधर्मंवैनैपुण्येनप्रकीर्तय ३४ महेश्वरउवाच रहस्यश्रवणंधर्मोवेदव्रतनिषेवणम् अग्निकार्यंतथाधर्मो
गुरुकार्यप्रसाधनम् ३५ भैक्षचर्यापरोधर्मोनित्ययज्ञोपवीतिना नित्यस्वाध्यायिताधर्मोब्रह्मचर्याश्रमस्तथा ३६ गुरुणाचाभ्यनुज्ञात
समावर्तेततवैद्विजः विंदेतानंतरंभार्यामनुरूपांयथाविधि ३७ शूद्रान्नवर्जनंधर्मस्तथासत्पथसेवनम् धर्मोनित्योपवासित्वंब्रह्मचर्यंत
थैवच ३८ आहिताग्निरधीयानोजुह्वानःसंयतेंद्रियः विघसाशीयताहारोगृहस्थःसत्यवाक्शुचिः ३९ अतिथिव्रततधर्मोधर्मस्त्रेताग्नि
धारणम् इष्टीश्चपशुबंधांश्चविधिपूर्वंसमाचरेत् ४० यज्ञश्चपरमोधर्मस्तथाहिंसाचदेहिषु अपूर्वभोजनंधर्मोविघसाशित्वमेवच ४१
भुक्तेपरिजनेपश्चाद्भोजनंधर्मउच्यते ब्राह्मणस्यगृहस्थस्यश्रोत्रियस्यविशेषतः ४२ दंपत्योःसमशीलत्वंधर्मःस्याद्गृहमेधिनः गृह्याणांचै
वदेवानांनित्यपुष्पबलिक्रिया ४३

गगनंमनोयोनि २७ २८ २९ ३० उपवास उद्रियजय ३१ ३२ ३३ ३४ ३५ ३६ ३७
३८ ३९ ४० अपूर्वभोजनंशाकभोजनतदभाव.सकृद्भोजनमित्यर्थः ४१ ४२ ४३ ७. ७. ७. ७. ७. ७. ७.

४४ ४५ ४६ निर्दिष्टः षड्भागः ४७ ४८ ४९ ५० ५१ आर्त्तहस्तेति आर्त्तप्रियइत्यर्थः आर्द्रेतिपाठेसजलेनहस्तेनददाति ५२ ५३ ५४ ५५

नित्योपलेपनंधर्मस्तथानित्योपवासिता सुसंमृष्टोपलिप्तेचसाज्यधूमोभवेद्गृहे ४४ एषद्विजजनेधर्मोगार्हस्थ्योलोकधारणः द्विजानां
चसतांनित्यंसदेवैषप्रवर्त्तते ४५ यस्तुक्षत्रगतोदेविलयाधर्मउदीरितः तमहंतेप्रवक्ष्यामितन्मेशृणुसमाहिता ४६ क्षत्रियस्यस्मृतोध
र्मःप्रजापालनमादितः निर्दिष्टफलभोक्ताहिराजाधर्मेणयुज्यते ४७ प्रजाःपालयतेयोहिधर्मेणमनुजाधिपः तस्यधर्मार्जितालोकाःप्रजा
पालनसंचिताः ४८ तस्यराज्ञःपरोधर्मोदमःस्वाध्यायएवच अग्निहोत्रपरिस्पंदोदानाध्ययनमेवच ४९ यज्ञोपवीतधरणंयज्ञोधर्मक्रिया
स्तथा भृत्यानांभरणंधर्मःकृतेधर्मेण्यमोघता ५० सम्यग्दंडेस्थितिर्धर्मोधर्मोवेदक्रतुक्रियाः व्यवहारस्थितोधर्मःसत्यवाक्यरतिस्तथा
५१ आर्त्तहस्तप्रदोराजाप्रेत्यचेहमहीयते गोब्राह्मणार्थेविक्रांतःसंग्रामेनिधनंगतः ५२ अश्वमेधजितांल्लोकानाप्नोतित्रिदिवालये
५३ वैश्यस्यसततंधर्मःपाशुपाल्यंकृषिस्तथा अग्निहोत्रपरिस्पंदोदानाध्ययनमेवच ५४ वाणिज्यंसत्पथस्थानमातिथ्यंप्रशमोदमः वि
प्राणांस्वागतंत्यागोवैश्यधर्मःसनातनः ५५ तिलान्गंधान्रसांश्चैवविक्रीणीयान्नचैवहि वणिक्पथमुपासीनोवैश्यःसत्पथमाश्रितः ५६
सर्वातिथ्यंत्रिवर्गस्ययथाशक्तियथार्हतः शूद्रधर्मःपरोनित्यंशुश्रूषाचद्विजातिषु ५७ सशूद्रःसंशिततपाःसत्यवादीजितेंद्रियः शुश्रूषुरति
थिंप्राप्तंतपःसंचिनुतेमहत् ५८ नित्यंसहिशुभाचारोदेवताद्विजपूजकः शूद्रोधर्मफलैरिष्टैःसंप्रयुज्येतबुद्धिमान् ५९ एतत्तेसर्वमाख्या
तंचातुर्वर्ण्यस्यशोभने एकैकस्येहसुभगेकिमन्यच्छ्रोतुमिच्छसि ६० उमोवाच उक्तस्त्वयापृथग्धर्मश्चातुर्वर्ण्यहितःशुभः सर्वव्या
पीतुयोधर्मोभगवंस्तद्ब्रवीहिमे ६१ महेश्वरउवाच ब्राह्मणालोकसारेणसृष्टावैब्रह्मणाकिल लोकांस्तारयितुंकृत्स्नान्मर्त्येषुक्षि
तिदेवताः ६२ तेषामपिप्रवक्ष्यामिधर्मकर्मफलोदयम् ब्राह्मणेषुहियोधर्मःसधर्मःपरमोमतः ६३ इमेतेलोकधर्मार्थंत्रयःसृष्टाःस्वयंभु
वा पृथिव्यांसर्ज्जनेनित्यंसृष्टास्तानपिमेशृणु ६४ वेदोक्तःपरमोधर्मःस्मृतिशास्त्रगतोपरः शिष्टाचीर्णोपरःप्रोक्तस्त्रयोधर्माःसनातनाः
६५ त्रैविद्योब्राह्मणोविद्वान्नचाध्ययनजीवकः त्रिकर्मात्रिपरिक्रांतोमैत्रएषस्मृतोद्विजः ६६ षडिमानितुकर्माणिप्रोवाचभुवनेश्वरः वृ
त्त्यर्थंब्राह्मणानांवैशृणुधर्मान्सनातनान् ६७ यजनंयाजनंचैवतथादानप्रतिग्रहौ अध्यापनंचाध्ययनंषट्कर्माधर्मभाग्द्विजः ६८

५६ सर्वप्रकारे
णातिथ्यंसर्वातिथ्यं ५७ ५८ ५९ ६० ६१ ६२ ६३ त्रयोधर्माःसर्ज्जनेसर्जनकाले ६४ ६५ त्रिकर्मादानाध्ययनयजनकर्मा त्रीन्कामक्रोधलोभान्परिक्रांतःपरित्यज्य
गतः ६६ ६७ ६८

६९ ७० ७१ अजिह्मइतिच्छेदः ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६

नित्यःस्वाध्यायिताधर्मोधर्मोयज्ञःसनातनः दानंप्रशस्यतेचास्ययथाशक्तियथाविधि ६९ शमस्तुपरमोधर्मःप्रवृत्तःसत्सुनित्यशः गृह
स्थानांविशुद्धानांधर्मस्यनिचयोमहान् ७० पंचयज्ञविशुद्धात्मासत्यवागनसूयकः दाताब्राह्मणसत्कर्तासुसंमृष्टनिवेशनः ७१ अमा
नीचसदाजिह्मःस्निग्धवाणिप्रदस्तथा अतिथ्याभ्यागतरतःशेषान्नकृतभोजनः ७२ पाद्यमर्घ्यंयथान्यायमासनंशयनंतथा दीपंप्रतिश्र
यंचैवयोददातिसधार्मिकः ७३ प्रातरुत्थायचाचम्यभोजनेनोपमंत्र्यच सत्कृत्यानुव्रजेद्यस्तुतस्यधर्मःसनातनः ७४ सर्वातिथ्यंत्रिवर्ग
स्ययथाशक्तिनिशानिशम् शूद्रधर्मःसमाख्यातस्त्रिवर्गपरिचारणम् ७५ प्रवृत्तिलक्षणोधर्मोगृहस्थेषुविधीयते तमहंवर्तयिष्यामिस
र्वभूतहितंशुभम् ७६ दातव्यमसकृच्छक्त्यायष्टव्यमसकृत्तथा पुष्टिकर्मविधानंचकर्तव्यंभूतिमिच्छता ७७ धर्मेणार्थःसमाहार्योध
र्मलब्धंत्रिधाधनम् कर्तव्यंधर्मपरमंमानवेनप्रयत्नतः ७८ एकेनांशेनधर्मार्थःकर्तव्योभूतिमिच्छता एकेनांशेनकामार्थएकमंशंविवर्द्ध-
येत् ७९ निवृत्तिलक्षणस्त्वन्योधर्मोमोक्षायतिष्ठति तस्यवृत्तिंप्रवक्ष्यामिशृणुमेदेविनत्त्वतः ८० सर्वभूतदयाधर्मोनचैकग्रामवासिना आ
शापाशविमोक्षश्चशस्यतेमोक्षकांक्षिणाम् ८१ नकुट्यांनोदकेसंगोनवाससिनचासने नत्रिदंडेनशयनेनाग्नौनशरणालये ८२ अध्या
त्ममतिचित्तोयस्तन्मनास्तत्परायणः युक्तोयोगंमहाभागेप्रतिसंख्यानमेवच ८३ वृक्षमूलपरोनित्यंशून्यागारनिवेशनः नदीपुलिनशा-
यीचनदीतीररतिश्चयः ८४ विमुक्तःसर्वसंगेषुस्नेहबंधुषुचद्विजः आत्मन्येवात्मनोभावंसमासज्जेतवैद्विजः ८५ स्थाणुभूतोनिराहारोमो-
क्षदृष्टेनकर्मणा परिव्रजतियोयुक्तस्तस्यधर्मःसनातनः ८६ नचैकत्रसमासक्तोनचैकग्रामगोचरः मुक्तोव्यटतिनिर्मुक्तोनचैकपुलिनेशयः
८७ एषमोक्षविदांधर्मोवेदोक्तःसत्पथःसताम् योमार्गमनुयातीमंपदंतस्यनविद्यते ८८ चतुर्विधाभिक्षवस्तेकुटीचकबहूदकौ हंसः
परमहंसश्चयोयःपश्चात्सउत्तमः ८९ अतःपरतरंनास्तिनाचरंनतिरोगतः अदुःखमसुखंसौम्यमजरामरमव्ययम् ९० उमोवाच गा
र्हस्थ्योमोक्षधर्मश्चसज्जनाचरितस्त्वया भाषितोजीवलोकस्यमार्गःश्रेयस्करोमहान् ९१ ऋषिधर्मंतुधर्मज्ञश्रोतुमिच्छाम्यतःपरम् स्पृ
हाभवतिमेनित्यंतपोवननिवासिषु ९२

८१ ८८ कुटीचकबहूदकौत्रिदंडिनौएकोगृहेवसतिअपरस्तीर्थान्यटतिइतरौएकदंडिनौतयोरायःआश्रमधर्म
नियतःपरोनिस्त्रैगुण्यइतितेषांभेदः ८९ अतःपरमहंस्येनास्त्यधिगमात्परंश्रेष्ठंनास्तिनापिअचरादिसर्वस्याभेदांतर्भूतत्वात् ९० ९१ ९२ ७ ७

९३ ९४ ९५ मुनयः संन्यासिनः ९६ ९७ ब्राह्म्यब्रह्मसमानीयराबुधिर्फेनोल्कर अग्रान्नसमूहंउंच्छंति अल्पश आदद्‌तेतदिदममृतं ब्राह्मणांधकावस्थायां
पीतं अध्वरे दृष्ट्यादिद्वारायज्ञांगरूपेण दिविदिव्यभोगात्मनात्मसूतम ९८ मार्गउक्तःइतिशेषः ९९ १०० १०१ स्वेस्वेधर्मइतिशेषः १०२ १०३ चक्रनगराःचक्रच

आज्यधूमोभवेद्गंधोरुणद्धीवतपोवनम् तंदृष्ट्वामेमनःप्रीतंमहेश्वरसदाभवेत् ९३ एतन्मेसंशयंदेवमुनिधर्मकृतंविभो सर्वधर्मार्थ
तत्त्वज्ञ देवदेववदस्वमे ९४ निखिलेनमयापृष्टंमहादेवयथातथम् ९५ श्रीभगवानुवाच हंततेहंप्रवक्ष्यामिमुनिधर्ममनुत्तमम् यं
कृत्वामुनयोयांतिसिद्धिंस्वतपसाशुभे ९६ फेनपानामृषीणांयोधर्मोधर्मविदांसताम् तन्मेशृणुमहाभागेधर्मज्ञेधर्ममादितः ९७ उंच्छंति
सततंयेनैब्राह्म्यंफेनोल्करंशुभम् अमृतंब्रह्मणापीतमध्वरेप्रसृतंदिवि ९८ एषतेषांविशुद्धानांफेनपानांतपोधने धर्मचर्याकृतोमार्गोवा
लखिल्यगणैःशृणु ९९ वालखिल्यास्तपःसिद्धामुनयःसूर्यमंडले उंच्छंतिधर्मिधर्मज्ञाः शाकुनींवृत्तिमास्थिताः १०० मृगनिर्मोकवसनाश्चीर
वल्कलवाससः निर्द्वंद्वाःसत्पथंप्राप्ताःवालखिल्यास्तपोधनाः १०१ अंगुष्ठपर्वमात्रायेभूत्वास्वेस्वेव्यवस्थिताः तपश्चरणमीहंतेतेषांधर्मफ-
लंमहत् १०२ तेसुरैःसमतांयांतिसुरकार्यार्थसिद्धये द्योतयंतिदिशःसर्वास्तपसादग्धकिल्बिषाः १०३ येत्वन्येशुद्धमनसोदयाधर्मपराय
णाः सन्तश्चक्रचराःपुण्याःसोमलोकचराश्चये १०४ पितृलोकसमीपस्थाःस्तेउंच्छंतियथाविधि संप्रक्षालाश्मकुट्टाश्च दंतोलूखलिकाश्च
ते १०५ सोमपानांचदेवानामूष्मपानांतथैवच उंच्छंतियेसमीपस्थाःसदारानियतेंद्रियाः १०६ तेषामग्निपरिस्पंदःपितृणांचार्चनंतथा य
ज्ञानांचैवपंचानांयजनंधर्मउच्यते १०७ एषचक्रचरैर्देविदेवलोकचरैर्द्विजैः ऋषिधर्मःसदाचीर्णोयोन्यस्तमपिमेशृणु १०८ सर्वेष्वेवर्षि
धर्मेषुज्ञेयोत्मासंयतेंद्रियैः कामक्रोधौततःपश्चाज्जेतव्यावितिमेमतिः १०९ अग्निहोत्रपरिस्पंदोधर्मरात्रिसनातनम् सोमयज्ञाभ्यनुज्ञातं
पंचमीयज्ञदक्षिणा ११० नित्यंयज्ञक्रियाधर्मःपितृदेवार्चनेरतिः सर्वातिथ्यंचकर्तव्यमन्नेनोंच्छार्जितेनवै १११ निवृत्तिरुपभोगेषुगो
रसानांशमेरतिः स्थंडिलेशयनेयोगःशाकपर्णनिषेवणम् ११२ फलमूलाशनंवायुरापःशैवलभक्षणम् ऋषीणांनियमाह्येतेयैर्जय
त्यजितांगतिम् ११३ विधूमेसन्नमुसलेव्यंगारेभक्तवर्जने अतीतपात्रसंचारेकालेविगतभैक्षके ११४ अतिथिंकांक्षमाणोवैशेषा
न्नकृतभोजनः सतुधर्मरतःशांतोमुनिधर्मेणयुज्यते ११५

चरंतिवासररहिताइत्यर्थः ४ उंच्छंतिअर्थात्सोमकिरणान् संप्रक्षालाःसम्यक्पात्रादि
कंप्रक्षाल्यंतिनतुश्वोर्थेकिंचित्स्थापयंति ५ ६ ७ ८ ९ धर्मरात्रिर्धर्मसत्रंतेनसम्यगासनंधर्मचक्रंसनातनमितिगौडः १० ११ १२ १३ १४ ११५

१६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांशतोपरिएकचत्वारिंशोऽध्यायः १४१ १ २ स्वशरीरमेवोपजीवंतिनतुभृत्यादिस्वयंदासाइत्यर्थः ३ ४
५ ६ ७ वीरशय्यांवीरासनंवीरस्थानंमहारण्यंभीरुभिरप्रवेश्यं ८ मंडूकयोगोहठशास्त्रप्रसिद्धः ९ वीरासनंसदोपवेशनंशीतंवर्षास्वासारशायी तोयंहे

नस्तंभीनचमानीस्यान्नाप्रसन्नोनविस्मितः मित्रामित्रसमोमैत्रोयःसधर्मविदुत्तमः १६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदान
धर्मेशतोपरिएकचत्वारिंशोऽध्यायः १४१ उमोवाच देशेषुरमणीयेषुनदीनांनिर्झरेषुच स्रवंतीनांनिकुंजेषुपर्वतेषुवनेषुच १
देशेषुचपवित्रेषुफलवत्सुसमाहिताः मूलवत्सुचमेध्येषुवसंतिनियतव्रताः २ तेषामपिविधिंपुण्यंश्रोतुमिच्छामिशंकर वानप्रस्थे
षुदेवेशस्वशरीरोपजीविषु ३ महेश्वरउवाच वानप्रस्थेषुयोधर्मस्तन्मेशृणुसमाहिता श्रुत्वाचैकमनादेविधर्मबुद्धिपराभ
व ४ संसिद्धैर्नियमैःसद्भिर्वनेवाससुपागतैः वानप्रस्थैरिदंकर्मकर्तव्यंशृणुयादृशम् ५ त्रिकालमभिषेकंचपितृदेवार्चनंतथा अग्नि
होत्रपरिस्पंदइष्टिहोमविधिस्तथा ६ नीवारग्रहणंचैवफलमूलनिषेवणम् इंगुदैरंडतैलानांस्नेहार्थेचनिषेवणम् ७ योगचर्या-
कृतैःसिद्धैःकामक्रोधविवर्जितैः वीरशय्यामुपासद्भिर्वीरस्थानोपसेविभिः ८ युक्तैर्योगवहैःसद्भिर्ग्रीष्मेपंचतपस्तथा मंडूकयोग
नियतैर्यथान्यायंनिषेविभिः ९ वीरासनरतैर्नित्यंस्थंडिलेशयनंतथा शीततोयाग्नियोगश्चचर्तव्योधर्मबुद्धिभिः १० अब्भक्षै
र्वायुभक्षैश्चशैवलोत्तरभोजनैः अश्मकुट्टैस्तथादंतैःसंप्रक्षालैस्तथापरैः ११ चीरवल्कलसंवीतैर्मृगचर्मनिवासिभिः काया-
यात्रायथाकालंयथाधर्मंयथाविधि १२ वननित्यैर्वनचरैर्वनजैर्वनगोचरैः वनंगुरुमिवासाद्यवस्तव्यंवनजीविभिः १३ तेषांहोम-
क्रियाधर्मःपंचयज्ञनिषेवणम् भागंचपंचयज्ञस्यवेदोक्तस्यानुपालनम् १४ अष्टमीयज्ञपरताचातुर्मास्यनिषेवणम् पौर्णमासा
दयोयज्ञानित्ययज्ञस्तथैवच १५ विमुक्तादारसंयोगैर्विमुक्ताःसर्वसंकरैः विमुक्ताःसर्वपापैश्चचरंतिमुनयोवने १६ स्रुग्भांडपरमा
नित्यंत्रेताग्निशरणाःसदा सतःसत्पथनित्यायेतेयांतिपरमांगतिम् १७ ब्रह्मलोकंमहापुण्यंसोमलोकंचशाश्वतम् गच्छंतिमुनयः
सिद्धाःसत्यधर्मव्यपाश्रयाः १८ एषधर्मोमयादेविवानप्रस्थाश्रितःशुभः विस्तरेणार्थसंपन्नोयथास्थूलमुदाहृतः १९ उमोवाच
भगवन्सर्वभूतेशसर्वभूतनमस्कृत योधर्मोमुनिसंगस्यसिद्धिवादेषुतंवद २० सिद्धिवादेषुसंसिद्धास्तथावननिवासिनः स्वैरिणो
दारसंयुक्तास्तेषांधर्मःकथंस्मृतः २१

मंतेजलवासी अग्निःग्रीष्मेपंचाग्निमध्यस्थः एवंशीततोयाग्नियोगः १० ११ १२ १३
१४ १५ १६ १७ १८ १९ सिद्धिवादेषुज्ञानगोष्ठिषु २० संसिद्धाःसंपन्ना नैकदाचित्स्वैरिणः कदाचिद्दारसंयुक्ताः २१

तत्र स्वैरिणां मोऽयं कषायश्च कारणं ज्ञापकं दारसंयुक्तानां रात्रिर्वासे कारणम् नस्वैरिणामिवनेषां यथेष्टविहारोऽस्तीत्यर्थः २२ त्रिकालमभिषेकउभयेषां दारवनामृषि-
कृतं वन्यांबुफलादिना होम॰ एवं यथायोग्यं धर्मसंबंध उक्तः २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

महेश्वर उवाच स्वैरिणस्तापसा देवि सर्वे दारविहारिणः तेषां मोऽयं कषायश्च वासे गतिश्च कारणम् २२ त्रिकालमभिषेकश्च होत्रं-
ऋषिकृतं महत् समाधिसत्पथस्थानं यथोद्दिष्टनिषेवणम् २३ ये घते पूर्वकथिता धर्मास्ते वनवासिनाम् यदि सेवंति धर्मास्तानाप्नुवंति
तपःफलम् २४ ये च दंपती धर्माणः स्वदारनियतेंद्रियाः चरंति विधिदृष्टं तदृतुकालाभिगामिनः २५ तेषामृषिकृतो धर्मो धर्मिणामुप
पद्यते न कामकारात्कामोऽन्यः संसेव्यो धर्मदर्शिभिः २६ सर्वभूतेषु यः सम्यग्ददात्यभयदक्षिणाम् हिंसादोषविमुक्तात्मा स वै धर्मेण यु
ज्यते २७ सर्वभूतानुकंपी यः सर्वभूतार्जवव्रतः सर्वभूतात्मभूतश्च स वै धर्मेण युज्यते २८ सर्ववेदेषु वा स्नानं सर्वभूतेषु चार्जवम् उ-
भे एते समे स्यातामार्जवं वा विशिष्यते २९ आर्जवं धर्ममित्याहुरधर्मो जिह्म उच्यते आर्जवेनेह संयुक्तो नरो धर्मेण युज्यते ३० आर्ज
वे तु रते नित्यं वसत्यमरसन्निधौ तस्मादार्जवयुक्तः स्याद्य इच्छेद्धर्ममात्मनः ३१ क्षांतो दांतो जितक्रोधो धर्मभूतो विहिंसकः धर्मे रतमना
नित्यं नरो धर्मेण युज्यते ३२ व्यपेततंद्रीर्धर्मात्मा शक्त्या सत्पथमाश्रितः चारित्रपरमो बुद्धो ब्रह्मभूयाय कल्पते ३३ उमोवाच
आश्रमाभिरता देव तापसा ये तपोधनाः दीप्तिमंतः कया चैव चर्यया यांति भवतित्ते ३४ राजानो राजपुत्राश्च निर्धना ये महाधनाः कर्मणा
केन भगवन्प्राप्नुवंति महाफलम् ३५ नित्यं स्थानमुपागम्य दिव्यचंदनभूषिताः केन वा कर्मणा देव भवंति वनगोचराः ३६ एतन्मे
संशयं देव तपश्चर्याश्रितं शुभम् शंस सर्वमशेषेण त्र्यक्ष त्रिपुरनाशन ३७ महेश्वर उवाच उपवासव्रतैर्दांता ह्यहिंस्राः सत्य-
वादिनः संसिद्धाः प्रेत्य गंधर्वैः सह मोदंत्यनामयाः ३८ मंडूकयोगशयनो यथान्यायं यथाविधि दीक्षां चरति धर्मात्मा स नागैः सह मोद
ते ३९ शस्यं मृगमुखोच्छिष्टं यो मृगैः सह भक्ष्यति दीक्षितो वै मुदा युक्तः स गच्छत्यमरावतीम् ४० शैवालं शीर्णपर्णं वा तद्व्रतो यो-
निषेवते शीतयोगवहो नित्यं स गच्छेत्परमां गतिम् ४१ वायुभक्षोंबुभक्षो वा फलमूलाशनोऽपि वा यक्षेष्वैश्वर्यमाधाय मोदतेऽप्सर
सां गणैः ४२ अग्नियोगवहो ग्रीष्मे विधिदृष्टेन कर्मणा चीर्त्वा द्वादश वर्षाणि राजा भवति पार्थिवः ४३ आहारनियमं कृत्वा मुनि
र्द्वादशवार्षिकम् मरुं संसाध्य यत्नेन राजा भवति पार्थिवः ४४

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३
मरुर्ना गिरिधन्वनोरिति मेदिनी मरुसाधनं मेरुसाधनमिति पर्यायः जलाहारमपि त्यक्त्वेत्यर्थः ४४ ७ ७ ७ ७ ७ ७

शऽद्भिमितिआसनंविनोपविश्य ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ अरणीसहितअग्निंस्कंधेतरुप्रकांडेबध्वाविलंब्यनराव

देहंचानशनेत्यक्त्वासस्वर्गेसुखमेधते स्थंडिलेशऽद्भमाक्रम्यपरिगृह्यसमंततः ४५ प्रविश्यचमुदायुक्तोदीक्षांद्वादशवार्षिकीम् स्थं
डिलस्यफलान्याहुर्यानानिशयनानिच ४६ गृहाणिचमहार्हाणिचंद्रशुभ्राणिभामिनि आत्मानमुपजीवन्योनियतोनियताशनः
४७ देहंवाशयनेत्यक्त्वासस्वर्गेसमुपाश्नुते आत्मानमुपजीवन्योदीक्षांद्वादशवार्षिकीम् ४८ त्यक्त्वामहार्णवेदेहंवारुणंलोकमश्नुते
आत्मानमुपजीवन्योदीक्षांद्वादशवार्षिकीम् ४९ अश्मनाचरणोभित्वागुह्यकेषुसमोदते साधयित्वात्मनात्मानंनिर्द्वंद्वोनिष्परिग्रहः
५० चीर्त्वाद्वादशवर्षाणिदीक्षामेतांमनोगताम् स्वर्गलोकमवाप्नोतिदेवैश्चसहमोदते ५१ आत्मानमुपजीवन्योदीक्षांद्वादशवा
र्षिकीम् हुत्वाग्नौदेहमुत्सृज्यवन्हिलोकेमहीयते ५२ यस्तुदेवियथान्यायंदीक्षितोनियतोद्विजः आत्मन्यात्मानमाधायनिर्ममो
धर्मलालसः ५३ चीर्त्वाद्वादशवर्षाणिदीक्षामेतांमनोगताम् अरणीसहितस्कंधेबध्वागच्छत्यनावृतः ५४ वीराध्वानगतोनि
त्यंवीरासनरतस्तथा वीरस्थायीचसततंसवीरगतिमाप्नुयात् ५५ सशक्रलोकगोनित्यंसर्वकामपुरस्कृतः दिव्यपुष्पसमाकीर्णो
दिव्यचंदनभूषितः ५६ सुखंवसतिधर्मात्मादिविदेवगणैःसह वीरलोकगतोनित्यंवीरयोगसहःसदा ५७ सत्वस्थःसर्वमुत्सृज्यदीक्षितो-
नियतःशुचिः वीराध्वानंप्रपद्येद्यस्तस्यलोकाःसनातनाः ५८ कामगेनविमानेनसवैचरतिछंदतः शक्रलोकगतःश्रीमान्मोदतेचनिरामं
यः ५९ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेउमामहेश्वरसंवादेशतोपरिद्विचत्वारिंशोऽध्यायः १४२ उमोवाच
भगवन्भगनेत्रघ्नपूष्णोदंतनिपातन दक्षक्रतुहरत्र्यक्षसंशयोमेमहानयम् १ चातुर्वर्ण्यंभगवतापूर्वंसृष्टंस्वयंभुवा केनकर्मविपा
केनवैश्योगच्छतिशूद्रताम् २ वैश्योवाक्षत्रियःकेनद्विजोवाक्षत्रियोभवेत् प्रतिलोमःकथंदेवशक्योधर्मोनिवर्तितुम् ३ केनवाकर्म
णाविप्रःशूद्रयोनौप्रजायते क्षत्रियःशूद्रतामेतिकेनवाकर्मणाविभो ४ एतन्मेसंशयंदेववदभूतपतेनघ त्रयोवर्णाःप्रकृत्येहकथंब्रा
ह्मण्यमाप्नुयुः ५ महेश्वरउवाच ब्राह्मण्यंदेविदुःप्रापंनिसर्गाद्ब्राह्मणःशुभे क्षत्रियोवैश्यशूद्रौवानिसर्गादितिमेमतिः ६
कर्मणादुष्कृतेनेहस्थानाद्भ्रश्यतिवैद्विजः ज्येष्ठंवर्णमनुप्राप्यतस्माद्रक्षेतवैद्विजः ७ स्थितोब्राह्मणधर्मेणब्राह्मण्यमुपजीवति क्ष
त्रियोवाथवैश्योवाब्रह्मभूयंसगच्छति ८ यस्तुविप्रत्वमुत्सृज्यक्षात्रंधर्मंनिषेवते ब्राह्मण्यात्सपरिभ्रष्टःक्षत्रयोनौप्रजायते ९

निधिसृज्येत्यर्थः ५४ ५५ ५६ वीराटेहत्यागयोगसंसहतेमहः ५७ ५८ ५९ इतिआनु० शतोपरिद्विचत्वारिंशोऽध्यायः १४२ १ २ ३ ४ ५ ६ ७ ८ ९

१० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ कुंडेपात्रपात्रेअश्नातीनिकुंडाशी २४ २५

वैश्यकर्मचयोविप्रोलोभमोहव्यपाश्रयः ब्राह्मण्यंदुर्लभंप्राप्यकरोत्यल्पमतिःसदा १० सद्विजोवैश्यतामेतिवैश्योवाशूद्रतामियात् स्व
धर्मात्प्रच्युतोविप्रस्ततःशूद्रत्वमाप्नुते ११ तत्रासौनिरयंप्राप्तोवर्णभ्रष्टोबहिष्कृतः ब्रह्मलोकात्परिभ्रष्टःशूद्रःसमुपजायते १२ क्षत्रि
योवामहाभागेवैश्योवाधर्मचारिणि स्वानिकर्माण्यपाहायशूद्रकर्मनिषेवते १३ स्वस्थानात्सपरिभ्रष्टोवर्णसंकरतांगतः ब्राह्मणःक्ष
त्रियोवैश्यःशूद्रत्वंयातितादृशः १४ यस्तुबुद्धःस्वधर्मेणज्ञानविज्ञानवाञ्छुचिः धर्मज्ञोधर्मनिरतःसधर्मफलमश्नुते १५ इदंचैवापरंदेवि
ब्रह्मणासमुदाहृतम् अध्यात्मंनैष्ठिकंसद्भिर्धर्मकामैर्निषेव्यते १६ उग्रान्नंगर्हितंदेविगणान्नंश्राद्धसूतकम् दुष्टान्नंचैवभोक्तव्यंशू
द्रान्नंचैवकर्हिचित् १७ शूद्रान्नंगर्हितंदेविसदादेवैर्महात्मभिः पितामहमुखोत्सृष्टंप्रमाणमितिमेमतिः १८ शूद्रान्नेनावशेषेण
जठरेम्रियतेद्विजः आहिताग्निस्तथायज्वासशूद्रगतिभाग्भवेत् १९ तेनशूद्रान्नशेषेणब्रह्मस्थानादपाकृतः ब्राह्मणःशूद्रतामेति
नास्तितत्रविचारणा २० यस्यान्नेनावशेषेणजठरेयोम्रियेद्विजः तांतांयोनिंव्रजेद्विप्रोयस्यान्नमुपजीवति २१ ब्राह्मणत्वंशुभंप्रा
प्यदुर्लभंयोवमन्यते अभोज्यान्नानिचाश्नातिसद्विजत्वात्पतेतवै २२ सुरापोब्रह्महाक्षुद्रश्चोरोभग्नव्रतोशुचिः स्वाध्यायवर्जितः
पापोलुब्धोनैकृतिकःशठः २३ अव्रतीवृषलीभर्ताकुंडाशीसोमविक्रयी निहीनसेवीविप्रोहिपततिब्रह्मयोनितः २४ गुरुतल्पी
गुरुद्रोहीगुरुकुत्सारतिश्चयः ब्रह्मविच्चापिपततिब्राह्मणोब्रह्मयोनितः २५ एभिस्तुकर्मभिर्देविशुभैराचरितैस्तथा शूद्रोब्राह्म
णतांयातिवैश्यःक्षत्रियतांव्रजेत् २६ शूद्रकर्माणिसर्वाणियथान्याययथाविधि शुश्रूषांपरिचर्यांचज्येष्ठेवर्णेप्रयत्नतः २७ कु
र्यादविमनाःशूद्रःसततंसत्पथेस्थितः देवद्विजातिसत्कर्तासर्वातिथ्यकृतव्रतः २८ ऋतुकालाभिगामीचनियतोनियताशनः चौ
क्षश्चोक्षजनान्वेषीशेषान्नकृतभोजनः २९ वृथामांसंनभुंजीतशूद्रोवैश्यत्वमृच्छति ऋतवागनहंवादीनिर्द्वंद्वःशमकोविदः ३०
यजतेनित्ययज्ञैश्चस्वाध्यायपरमःशुचिः दांतोब्राह्मणसत्कर्तासर्ववर्णबुभूषकः ३१

२६ २७ २८ चोक्षःशुद्धः २९ ३० ३१ ७ ७ ७ ७ ७ ७ ७ ७

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७

गृहस्थव्रतमातिष्ठन्द्विकालकृतभोजनः शेषाशी विजिताहारो निष्कामो निरहंवदः ३२ अग्निहोत्रमुपासंश्च जुह्वानश्च यथाविधि स
र्वातिथ्यमुपातिष्ठन् शेषान्नकृतभोजनः ३३ त्रेताग्निमन्त्रविहितो वैश्यो भवति वै द्विजः स वैश्यः क्षत्रियकुले शुचौ महति जायते ३४ स वै
श्यः क्षत्रियो जातो जन्मप्रभृति संस्कृतः उपनीतो व्रतपरो द्विजो भवति सत्कृतः ३५ ददाति यजते यज्ञैः समृद्धैराप्तदक्षिणैः अधीत्य स्वर्गम
न्विच्छंस्त्रेताग्निशरणः सदा ३६ आर्तहस्तप्रदो नित्यं प्रजा धर्मेण पालयन् सत्यः सत्यानि कुरुते नित्यं यः सुखदर्शनः ३७ धर्मदण्डेन नि
र्दण्डो धर्मकार्यानुशासकः यन्त्रितः कार्यकरणैः षड्भागकृतलक्षणः ३८ ग्राम्यधर्मं न सेवेत स्वच्छन्देनार्थकोविदः ऋतुकाले तु धर्मात्मा प
त्नीमुपशयेत्सदा ३९ सदोपवासी नियतः स्वाध्यायनिरतः शुचिः बर्हिष्यान्तरिते नित्यं शयानोऽग्निगृहे सदा ४० सर्वातिथ्यं त्रिवर्गस्य कुर्वा
णः सुमनाः सदा शूद्राणां चान्नकामानां नित्यं सिद्धमिति ब्रुवन् ४१ स्वार्थाद्वा यदि वा कामान्न किंचिदुपलक्षयेत् पितृदेवातिथिकृते साध
नं कुरुते च यः ४२ स्ववेश्मनि यथान्यायमुपास्ते भैक्ष्यमेव च त्रिकालमग्निहोत्रं च जुह्वानो वै यथाविधि ४३ गोब्राह्मणहितार्थाय रणे चाभि
मुखो हतः त्रेताग्निमन्त्रपूतं वा समाविश्य द्विजो भवेत् ४४ ज्ञानविज्ञानसंपन्नः संस्कृतो वेदपारगः विप्रो भवति धर्मात्मा क्षत्रियः स्वेन कर्मणा
४५ एतैः कर्मफलैर्देवि न्यूनजातिकुलोद्भवः शूद्रोऽप्यागमसंपन्नो द्विजो भवति संस्कृतः ४६ ब्राह्मणो वाप्यसद्वृत्तः सर्वसंकरभोजनः ब्राह्म
ण्यं सत्यमुत्सृज्य शूद्रो भवति तादृशः ४७ कर्मभिः शुचिभिर्देवि शुद्धात्मा विजितेन्द्रियः शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्माऽब्रवीत्स्वयम् ४८ स्व
भावः कर्म च शुभं यत्र शूद्रेऽपि तिष्ठति विशिष्टः स द्विजातेर्वै विज्ञेय इति मे मतिः ४९ न योनिर्नापि संस्कारो न श्रुतं न च संततिः कारणानि द्विज
त्वस्य वृत्तमेव तु कारणम् ५० सर्वोऽयं ब्राह्मणो लोके वृत्तेन तु विधीयते वृत्ते स्थितस्तु शूद्रोऽपि ब्राह्मणत्वं नियच्छति ५१ ब्राह्मः स्वभावः सु
श्रोणि समः सर्वत्र मे मतिः निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः ५२ एते योनिफला देवि स्थानभागनिदर्शकाः स्वयं च वरदेनोक्ता ब्रह्मणा
सृजता प्रजाः ५३ ब्राह्मणोऽपि महत्क्षेत्रं लोके चरति पादवत् यत्तत्र बीजं वपति सा कृषिः प्रेत्यभाविनी ५४ विघसाशिना सदा भाव्यं सत्प
थालम्बिना तथा ब्राह्मं हि मार्गमाक्रम्य वर्तितव्यं बुभूषता ५५ संहिताध्यायिना भाव्यं गृहे वै गृहमेधिना नित्यं स्वाध्यायिना भाव्यं गृहे वै
गृहजीविना ५६

४८ ४९ ५० ५१ ५२ ५३ पादवत्तगतिशून ५४ ५५ ५६ ७ ७ ७ ७ ७

५७ ब्राह्मण्यमिति कुयोनिसंबंधात्कुप्रतिग्रहात् आदानाच्च ब्राह्मण्यं नश्यतीति भावः ५८ ५९ इति आनुशासनिके दानधर्मे टीकायां शततोपरि त्रिचत्वारिंशोध्यायः १४३ १ २ ३ ४ सर्वेषामाश्रमाणां लिंगैर्विवर्जिताः ५ ६ नसज्जंतिसक्तानभवंति ७ प्राणातिपातात् इंद्रियाणां विषयाभिमुख्यात्

एवंभूतोहियोविप्रःसत्पथंसत्पथेस्थितः आहिताग्निरधीयानोब्रह्मभूयायकल्पते ५७ ब्राह्मण्यंदेविसंप्राप्यरक्षितव्यंयतात्मना योनिप्रतिग्रहादानैःकर्मभिश्चशुचिस्मिते ५८ एतत्तेगुह्यमाख्यातंयथाशूद्रोभवद्द्विजः ब्राह्मणोवाच्युतोधर्माद्यथाशूद्रत्वमाप्नुते ५९ इति श्रीमहाभारते आनुशासनिके पर्वणि दानधर्मे उमामहेश्वरसंवादोनाम शततोपरित्रिचत्वारिंशोऽध्यायः १४३ उमोवाच भगवन्सर्वभूतेशदेवासुरनमस्कृत धर्माधर्मौनृणांदेवब्रूहिमेसंशयंविभो १ कर्मणामनसावाचात्रिविधैर्हिनरःसदा बध्यतेबंधनैःपाशैर्मुच्यतेप्यथवापुनः २ केनशीलेनवृत्तेनकर्मणाकीदृशेनवा समाचारैर्गुणैःकैर्वास्वर्गंयांतीहमानवाः ३ महेश्वरउवाच देविधर्मार्थतत्त्वज्ञेधर्मनित्येदमेरते सर्वप्राणिहितःप्रश्नःश्रूयतांबुद्धिवर्द्धनः ४ सत्यधर्मरताःसंतःसर्वलिंगविवर्जिताः धर्मलब्धार्थभोक्तारस्तेनराःस्वर्गगामिनः ५ नाधर्मेणनधर्मेणबध्यंतेछिन्नसंशयाः ५ प्रलयोत्पत्तितत्त्वज्ञाःसर्वज्ञाःसर्वदर्शिनः वीतरागाविमुच्यंतेपुरुषाःकर्मबंधनैः ६ कर्मणामनसावाचायेनहिंसंतिकिंचन येनसज्जंतिकस्मिंश्चित्तेनबध्यंतिकर्मभिः ७ प्राणातिपाताद्विरताःशीलवंतोदयान्विताः तुल्यद्वेष्यप्रियादांतामुच्यंतेकर्मबंधनैः ८ सर्वभूतदयावंतोविश्वास्याःसर्वजंतुषु त्यक्तहिंसासमाचारास्तेनराःस्वर्गगामिनः ९ परस्वेनिर्ममानित्यंपरदारविवर्जकाः धर्मलब्धान्नभोक्तारस्तेनराःस्वर्गगामिनः १० मातृवत्स्वसृवच्चैवनित्यंदुहितृवच्चये परदारेषुवर्त्तंतेतेनराःस्वर्गगामिनः ११ स्तैन्यान्निवृत्ताःसततंसंतुष्टाःस्वधनेनच स्वभाग्यान्युपजीवंतितेनराःस्वर्गगामिनः १२ स्वदारनिरतायेचऋतुकालाभिगामिनः अग्राम्यसुखभोगाश्चतेनराःस्वर्गगामिनः १३ परदारेषुयेनित्यंचारित्रावृत्तलोचनाः यतेंद्रियाःशीलपरास्तेनराःस्वर्गगामिनः १४ एषदेवकृतोमार्गःसेवितव्यःसदाबुधैः अकषायकृतश्चैवमार्गःसेव्यःसदाबुधैः १५ दानधर्मतपोयुक्तःशीलशौचदयात्मकः वृत्त्यर्थंधर्महेतोर्वासेवितव्यःसदानरैः १६ स्वर्गवासमभीप्सद्भिर्नसेव्यस्त्वतउत्तरः १७ उमोवाच वाचातुबध्यतेयेनमुच्यतेप्यथवापुनः तानिकर्माणिमेदेववदभूतपतेनघ १८ महेश्वरउवाच आत्महेतोःपरार्थेवानर्महास्याश्रयात्तथा येमृषानवदंतीहतेनराःस्वर्गगामिनः १९

८ ९ १० ११ १२ १३ १४ अकषायकृतः रागद्वेषोद्यमार्यनिर्मितः १५ १६ १७ १८ नर्मकौटिल्यंविनासर्पादौसर्पभ्रमोत्पादनं हास्यं तादृशमेवमात्रादिषु दोषारोपपूर्वकंगालनम् १९ ७

२० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० नहिंसंति आदानेन तत्स्वामिनं नपीडयंति ३१

धृत्यर्थेधर्महेतोर्वाकामकारात्तथैवच अनृतंयेनभाषंतेतेनराःस्वर्गगामिनः २० श्लक्ष्णांवाणींनिराबाधांमधुरांपापवर्जिताम् स्वा
गतेनाभिभाषंतेतेनराःस्वर्गगामिनः २१ परुषंयेनभाषंतेकटुकंनिष्ठुरंतथा अपैशून्यरताःसंतस्तेनराःस्वर्गगामिनः २२ पिशुनांन
प्रभाषंतेमित्रभेदकरींगिरम् ऋतंमैत्रंतुभाषंतेतेनराःस्वर्गगामिनः २३ येवर्जयंतिपरुषंपरद्रोहंचमानवाः सर्वभूतसमादांतास्तेन
राःस्वर्गगामिनः २४ शठप्रलापाद्विरताविरुद्धपरिवर्जकाः सौम्यप्रलापिनोनित्यंतेनराःस्वर्गगामिनः २५ नकोपाद्व्याहरंतेयेवाचंहृ
दयदारणीम् सांत्वंवदंतिक्रुद्धापितेनराःस्वर्गगामिनः २६ एषवाणीकृतोदेविधर्मःसेव्यःसदानरैः शुभःसत्यगुणोनित्यंवर्जनीयो
मृषाबुधैः २७ उमोवाच मनसाबध्यतेयेनकर्मणापुरुषःसदा तन्मेब्रूहिमहाभागदेवदेवपिनाकधृक् २८ महेश्वरउवाच
मानसेनेहधर्मेणसंयुक्ताःपुरुषाःसदा स्वर्गंगच्छंतिकल्याणितन्मेकीर्तयतःशृणु २९ दुष्प्रणीतेनमनसादुष्प्रणीततराकृतिः मनो
बध्यतियेनेहशृणुवाक्यंशुभानने ३० अरण्येविजनेन्यस्तंपरस्वंदृश्यतेयदा मनसापिनहिंसंतितेनराःस्वर्गगामिनः ३१ ग्रामेगृहे
वायत्द्रव्यंपारक्यंविजनेस्थितम् नाभिनंदंतिवैनित्यंतेनराःस्वर्गगामिनः ३२ तथैवपरदारान्येकामवृत्तान्रहोगतान् मनसापि
नहिंसंतितेनराःस्वर्गगामिनः ३३ शत्रुंमित्रंचयेनित्यंतुल्येनमनसानराः भजंतिमित्राःसंगम्यतेनराःस्वर्गगामिनः ३४ श्रुतवंतोदयावंतः
शुचयःसत्यसंगराः स्वैरर्थैःपरिसंतुष्टास्तेनराःस्वर्गगामिनः ३५ अवैरायेत्वनायासामैत्रीचित्तरताःसदा सर्वभूतदयावंतस्तेनराःस्वर्गगा
मिनः ३६ श्रद्धावंतोदयावंतश्चोक्षाश्चोक्षजनप्रियाः धर्माधर्मविदोनित्यंतेनराःस्वर्गगामिनः ३७ शुभानामशुभानांचकर्मणांफलसंच
यम् विपाकज्ञाश्चयेदेवितेनराःस्वर्गगामिनः ३८ न्यायोपेतागुणोपेतादेवद्विजपराःसदा समुत्थानमनुप्राप्तास्तेनराःस्वर्गगामिनः ३९ शु
भैःकर्मफलैर्देविमयैतेपरिकीर्तिताः स्वर्गमार्गपराभूयःकिंत्वंश्रोतुमिहेच्छसि ४० उमोवाच महान्मेसंशयःकश्चिन्मर्त्यान्प्रतिमहेश्व
र तस्मात्त्वंनैपुणेनाद्यममव्याख्यातुमर्हसि ४१ केनायुर्लभतेदीर्घंकर्मणापुरुषप्रभो तपसावापिदेवेशकेनायुर्लभतेमहत् ४२ क्षीणा-
युःकेनभवतिकर्मणाभुविमानवः विपाकंकर्मणांदेववक्तुमर्हस्यनिंदित ४३ अपरेचमहाभाग्यामंदभाग्यास्तथापरे अकुलीनास्तथाचान्ये
कुलीनाश्चतथापरे ४४ दुर्दर्शाःकेचिदाभांतिनराःकाष्ठमयाइव प्रियदर्शास्तथाचान्येदर्शनादेवमानवाः ४५

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ७.

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० इतिआनुशासनिकेपर्वणिटीकायांशततोपरिचतु

दुष्प्रज्ञाःकेचिदाभांतिकेचिदाभांतिपंडिताः महाप्राज्ञास्तथैवान्येज्ञानविज्ञानभाविनः ४६ अल्पाबाधास्तथाकेचिन्महाबाधास्तथापरे दृ
श्यंतेपुरुषादेवतन्मेव्याख्यातुमर्हसि ४७ महेश्वरउवाच हंततेहंप्रवक्ष्यामिदेविकर्मफलोदयम् मर्त्यलोकेनरःसर्वोयेनस्वफलमश्नुते
४८ प्राणातिपातेयोरौद्रोदंडहस्तोद्यतःसदा नित्यमुद्यतशस्त्रश्चहंतिभूतगणान्नरः ४९ निर्दयःसर्वभूतानांनित्यमुद्वेगकारकः अपिकी
टपिपीलानामशरण्यःसुनिर्घृणः ५० एवंभूतोनरोदेविनिरयंप्रतिपद्यते विपरीतस्तुधर्मात्मारूपवानभिजायते ५१ पापेनकर्मणादेवि
वध्योहिंसारतिर्नरः अप्रियःसर्वभूतानांहीनायुरुपजायते ५२ निरयंयातिहिंसात्मायातिस्वर्गमहिंसकः यातनांनिरयेरौद्रांसकृच्छ्रांल
भतेनरः ५३ यःकश्चिन्निरयात्तस्मात्समुत्तरतिकर्हिचित् मानुष्यंलभतेचापिहीनायुस्तत्रजायते ५४ पापेनकर्मणादेविबद्धोहिंसारति
र्नरः अप्रियःसर्वभूतानांहीनायुरुपजायते ५५ यस्तुशुक्लाभिजातीयःप्राणिघातविवर्जकः निक्षिप्तशस्त्रोनिर्दंडोनहिंसतिकदाचन
५६ नघातयतिनोहंतिघ्नंतंनैवानुमोदते सर्वभूतेषुसस्नेहोयथात्मनितथापरे ५७ ईदृशःपुरुषोत्कर्षोदेविदेवत्वमश्नुते उपपन्नान्सुखा
न्भोगानुपाश्नातिमुदायुतः ५८ अथचेन्मानुषेलोकेकदाचिदुपपद्यते तत्रदीर्घायुरुत्पन्नःसनरःसुखमेधते ५९ एषदीर्घायुषांमार्गः
सुवृत्तानांसुकर्मिणाम् प्राणिहिंसाविमोक्षेणब्रह्मणासमुदीरितः ६० इतिश्रीम॰ आनु॰ दानधर्मेउमामहेश्वरसंवादेशततोपरिचतुश्च
त्वारिंशोऽध्यायः १४४ उमोवाच किंशीलःकिंसमाचारःपुरुषःकैश्चकर्मभिः स्वर्गंसमभिपद्येतसंप्रदानेनकेनवा १ महेश्वरउवाच
दाताब्राह्मणसत्कर्त्तादीनार्त्तकृपणादिषु भक्ष्यभोज्यान्नपानानांवाससांचप्रदायकः २ प्रतिश्रयान्सभाःकूपान्प्रपाःपुष्करिणीस्तथा नैत्य
कानिचसर्वाणिकिमिच्छकमतीवच ३ आसनंशयनंयानंगृहंरत्नंधनंतथा सस्यजातानिसर्वाणिगाःक्षेत्राणियथोप्सितम् ४ सुप्रतीतमना
नित्यंयःप्रयच्छतिमानवः एवंभूतोनरोदेविदेवलोकेभिजायते ५ तत्रोष्यसुचिरंकालंभुक्त्वाभोगाननुत्तमान् सहाप्सरोभिर्मुदितोरमतेनं
दनादिषु ६ तस्मात्स्वर्गाच्च्युतोलोकान्मानुषेषुप्रजायते महाभोगकुलेदेविधनधान्यसमन्वितः ७ तत्रकामगुणैःसर्वैःसमुपेतोमुदायुतः म
हाभोगोमहाकोशोधनीभवतिमानवः ८ एतेदेविमहाभागाःप्राणिनोदानशीलिनः ब्रह्मणावैपुराप्रोक्ताःसर्वस्यप्रियदर्शनाः ९

श्चत्वारिंशोऽध्यायः १४४ १ २ नैत्यकानिनित्यदेयानिकिमिच्छसीतिपृष्ट्वायदीप्सितंदीयतेतत्किमिच्छकं ३ ४ ५ ६ ७ ८ ९

१० अतिथीनदृष्ट्वानैर्याच्यमानाःसंतोनिवर्त्ततेनप्रयच्छंति ११ १२ १३ १४ १५ १६ १७ १८ १९ . २१ २२

अपरेमानवादेविप्रदानकृपणाद्विजैः याचितानप्रयच्छंतिविद्यमानेप्यबुद्धयः १० दीनांधकृपणान्दृष्ट्वाभिक्षुकानतिथीनपि या
च्यमानानिवर्त्तंतेजिह्वालोभसमन्विताः ११ नधनानिनवासांसिनभोगान्नचकांचनम् नगावोनान्नविकृतिंप्रयच्छंतिकदाचन १२
अप्रवृत्ताश्चयेलुब्धानास्तिकादानवर्जिताः एवंभूतानरादेविनिरयंयांत्यबुद्धयः १३ तेयेमनुष्यतांयांतियदाकालस्यपर्ययात् धन
रिक्तेकुलेजन्मलभंतेस्वल्पबुद्धयः १४ क्षुत्पिपासापरीताश्चसर्वलोकबहिष्कृताः निराशाःसर्वभोगेभ्योजीवन्त्यधमजीविकाम् १५
अल्पभोगकुलेजाताअल्पभोगरतानराः अनेनकर्मणादेविभवन्त्यधनिनोनराः १६ अपरेस्तंभिनोनित्यमानिनःपापतोनराः आस
नार्हस्ययेपीठंनप्रयच्छंत्यचेतसः १७ मार्गार्हस्यचयेमार्गंनयच्छंत्यल्पबुद्धयः पाद्यार्हस्यचयेपाद्यंनददत्यल्पबुद्धयः १८ अ-
र्घार्हान्नचसत्कारैरर्चयंतियथाविधि अर्घ्यमाचमनीयंवानयच्छंत्यल्पबुद्धयः १९ गुरुंचाभिगतंप्रेम्णागुरुवन्नबुभूषते अभि
मानप्रवृत्तेनलोभेनसमवस्थिताः २० संमान्यांश्चावमन्यंतेवृद्धान्परिभवंतिच एवंविधानरादेविसर्वेनिरयगामिनः २१ तेवैय
दिनरास्तस्मान्निरयादुत्तरंतिवै वर्षपूगैस्ततोजन्मलभंतेकुत्सितेकुले २२ श्वपाकपुल्कसादीनांकुत्सितानामचेतसाम् कुलेषुते
षुजायंतेगुरुवृद्धापचायिनः २३ नस्तंभीनचमानीयोदेवताद्विजपूजकः लोकपूज्योनमस्कर्ताप्रश्रितोमधुरंवचः २४ सर्ववर्ण-
प्रियकरःसर्वभूतहितःसदा अद्वेषीसुमुखःश्लक्ष्णःस्निग्धवाणीप्रदःसदा. २५ स्वागतेनैवसर्वेषांभूतानामविहिंसकः यथार्हस
त्क्रियापूर्वमर्चयन्नुपतिष्ठति २६ मार्गार्हायददन्मार्गंगुरुंगुरुवदर्चयेत अतिथिप्रग्रहरतस्तथाभ्यागतपूजकः २७ एवंभूतोनरोदे
विस्वर्गतिंप्रतिपद्यते ततोमानुषतांप्राप्यविशिष्टकुलजोभवेत् २८ तत्रासौविपुलैर्भोगैःसर्वरत्नसमायुतः यथार्हदाताचार्हेषुधर्म
चर्यापरोभवेत् २९ संमतःसर्वभूतानांसर्वलोकनमस्कृतः स्वकर्मफलमाप्नोतिस्वयमेवनरःसदा ३० उदात्तकुलजातीयउदात्ता
भिजनःसदा एषधर्मोमयाप्रोक्तोविधात्रास्वयमीरितः ३१ यस्तुरौद्रसमाचारःसर्वसत्वभयंकरः हस्ताभ्यांयदिवापद्भ्यांरज्ज्वादंडे
नवापुनः ३२ लोष्टैःस्तंभैरायुधैर्वाजंतून्बाधतिशोभने हिंसार्थंनिकृतिप्रज्ञःप्रोद्वेजयतिचैवह ३३ उपक्रामतिजंतूंश्चउद्वेगजननः
सदा एवंशीलसमाचारोनिरयंप्रतिपद्यते ३४ सवैमनुष्यतांगच्छेद्यदिकालस्यपर्ययात् बह्वाबाधपरिक्लिष्टेकुलेजायतिसोधमे ३५

गुरुवृद्धापचायिनः गुरूणांवृद्धानांचहीनत्वसंपादकाः २३ २४ २५ २६ गुरुवत्पितृवत् २७ २८ २९ ३० उदात्तप्रशस्त ३१ ३२ ३३ ३४ ३५

लोकद्वेष्योधमःपुंसांस्वयंकर्मफलैःकृतैः एषदेविमनुष्येषुबोद्धव्योज्ञातिबंधुषु ३६ अपरःसर्वभूतानिदयावाननुपश्यति मैत्रदृष्टिः
पितृसमोनिर्वैरोनियतेंद्रियः ३७ नोद्वेजयतिभूतानिनविघातयतेतथा हस्तपादैःसुनियतैर्विश्वास्यःसर्वजंतुषु ३८ नरज्वानचदं
डेनलोष्टैर्नायुधेनच उद्वेजयतिभूतानिश्लक्ष्णकर्मादयापरः ३९ एवंशीलसमाचारःस्वर्गेसमुपजायते, तत्रासौभवनेदिव्येमुदावस
तिदेववत् ४० सचेत्कर्मक्षयान्मर्त्योमनुष्येषूपजायते अल्पबाधोनिरातंकःसजातःसुखमेधते ४१ सुखभागीनिरायासोनिरुद्वेगः
सदानरः एषदेविसतांमार्गोबाधायत्रनविद्यते ४२ उमोवाच इमेमनुष्यादृश्यन्तेऊहापोहविशारदाः ज्ञानविज्ञानसंपन्नाः
प्रज्ञावंतोर्थकोविदाः ४३ दुष्प्रज्ञाश्चापरेदेवज्ञानविज्ञानवर्जिताः केनकर्मविशेषेणप्रज्ञावान्पुरुषोभवेत् ४४ अल्पप्रज्ञोविरूपा
क्षःकथंभवतिमानवः एतन्मेसंशयंछिंधिसर्वधर्मविदांवर ४५ जात्यंधाश्चापरेदेवरोगार्ताश्चापरेतथा नराःक्लीबाश्चदृश्यंतेकारणं
ब्रूहितत्रवै ४६ महेश्वरउवाच ब्राह्मणान्वेदविदुषःसिद्धान्धर्मविदस्तथा परिपृच्छंत्यहरहःकुशलाकुशलंतथा ४७ वर्ज
यंतोऽशुभंकर्मसेवमानाःशुभंतथा लभंतेस्वर्गतिंनित्यमिहलोकेतथासुखम् ४८ सचेन्मानुषतांयातिमेधावीतत्रजायते श्रुतंप्र
ज्ञानुगंयस्यकल्याणमुपजायते ४९ परदारेषुयेचापिचक्षुर्दुष्टंप्रयुंजते तेनदुष्टस्वभावेनजात्यंधास्तेभवंतिह ५० मनसातुप्रदुष्टे
ननग्नांपश्यंतियेस्त्रियम् रोगार्तास्तेभवंतीहनरादुष्कृतकर्मिणः ५१ येतुमूढादुराचारावियोनौमैथुनेरताः पुरुषेषुसुदुष्प्रज्ञाः
क्लीबत्वमुपयांतिते ५२ पशूंश्चयेवधयंतेयेचैवगुरुतल्पगाः प्रकीर्णमैथुनायेचक्लीबाजायंतितेनराः ५३ उमोवाच सा
वद्यंकिंतुवैकर्मनिरवद्यंतथैवच श्रेयःकुर्वन्नवाप्नोतिमानवोदेवसत्तम ५४ महेश्वरउवाच श्रेयांसंमार्गमन्विच्छन्सदायः
पृच्छतिद्विजान् धर्मान्वेषीगुणाकांक्षीसस्वर्गंसमुपाश्नुते ५५ यदिमानुषतांदेविकदाचित्सनिगच्छति मेधावीधारणायुक्तःप्रा
यस्तत्राभिजायते ५६ एषदेविसतांधर्मोमंतव्योभूतिकारकः नृणांहितार्थायतवमुदावैसमुदाहृतः ५७ उमोवाच अपरे
अल्पविज्ञानाधर्मविद्वेषिणोनराः ब्राह्मणान्वेदविदुषोनेच्छंतिपरिसर्पितुम् ५८ व्रतवंतोनराःकेचिच्छ्रद्धाधर्मपरायणाः अव्र
ताभ्रष्टनियमास्तथान्येराक्षसोपमाः ५९ यज्वानश्चतथैवान्येनिर्होमाश्चतथापरे केनकर्मविपाकेनभवंतीहवदस्वमे ६०

६१ ६२ ६३ ६४ . इतिआनुशासनिकेपर्वणिटीकायांशतोपरिपंचचत्वारिंशोऽध्यायः १४५ १ २ ३ ४ ५ ६ ७

महेश्वरउवाच आगमाल्लोकधर्माणांमर्यादाःसर्वनिर्मिताः प्रामाण्येनानुवर्त्तंतेदृश्यंतेचदृढव्रताः ६१ अधर्मंधर्ममित्याहुर्येच-
मोहवशंगताः अव्रतानष्टमर्यादास्तेप्रोक्ताब्रह्मराक्षसाः ६२ तेचेत्कालकृतोद्योगात्संभवंतीहमानुषाः निर्होमानिर्वषट्कारास्तेभ-
वंतिनराधमाः ६३ एषदेविमयासर्वःसंशयच्छेदनायते कुशलाकुशलोनॄणांव्याख्यातोधर्मसागरः ६४ इतिश्रीमहाभारतेआ
नुशासनिकेपर्वणिदानधर्मेउमामहेश्वरसंवादेशतोपरिपंचचत्वारिंशोऽध्यायः १४५ महेश्वरउवाच परावरज्ञेधर्मज्ञेत
पोवननिवासिनि साध्विसुभ्रुसुकेशांतेहिमवत्पर्वतात्मजे १ दक्षेशमदमोपेतेनिर्ममेधर्मचारिणि पृच्छामित्वांवरारोहेपृष्टावदम
मेप्सितम् २ सावित्रीब्रह्मणःसाध्वीकौशिकस्यशचीसती मार्तंडजस्यधूमोर्णाऋद्धिर्वैश्रवणस्यच ३ वरुणस्यततोगौरीसूर्यस्यचसु
वर्चला रोहिणीशशिनःसाध्वीस्वाहाचैवविभावसोः ४ अदितिःकश्यपस्याथसर्वास्ताःपतिदेवताः पृष्टाश्चोपासिताश्चैवतास्त्वया-
देविनित्यशः ५ तेनत्वांपरिपृच्छामिधर्मज्ञेधर्मवादिनि स्त्रीधर्मंश्रोतुमिच्छामित्वयोदाहृतमादितः ६ सधर्मचारिणीमेत्वंसमशी
लासमव्रता समानसारवीर्याचतपस्तीव्रकृतंचते ७ त्वयाह्युक्तोविशेषेणगुणवान्संभविष्यति लोकेचैवत्वयादेविप्रमाणत्वमुपै
ष्यति ८ स्त्रियश्चैवविशेषेणस्त्रीजनस्यगतिःपुरा गौर्यागच्छतिसुश्रोणिलोकेष्वेषागतिःसदा ९ ममचार्द्धंशरीरस्यतवचार्धे
ननिर्मितम् सुरकार्यकरीचत्वंलोकसंतानकारिणी १० तवसर्वःसुविदितःस्त्रीधर्मःशाश्वतःशुभे तस्मादशेषतोब्रूहिस्त्रीधर्मंवि
स्तरेणमे ११ उमोवाच भगवन्सर्वभूतेशभूतभव्यभवोत्तम त्वत्प्रभावादियंदेववाक्चैवप्रतिभातिमे १२ इमास्तुनद्यो
देवेशसर्वतीर्थोदकैर्युताः उपस्पर्शनहेतोस्त्वांमुपयातिसमीपतः १३ एताभिःसहसमंत्र्यप्रवक्ष्याम्यनुपूर्वशः अभवन्योऽनहंवादी
सर्वेपुरुषउच्यते १४ स्त्रीचभूतेशसततंस्त्रियमेवानुधावति मयासंमानिताश्चैवभविष्यंतिसरिद्वराः १५ एषासरस्वतीपुण्या-
नदीनामुत्तमानदी प्रथमासर्वसरितांनदीसागरगामिनी १६ विपाशाचवितस्ताचचंद्रभागाइरावती शतद्रुर्देविकासिंधुःकौशि
कीगोमतीतथा १७ तथादेवनदीचेयंसर्वतीर्थाभिसंभृता गगनाद्गांगतादेविगंगासर्वसरिद्वरा १८ इत्युक्त्वादेवदेवस्यपत्नी-
धर्मभृतांवरा स्मितपूर्वमथाभाष्यसर्वास्ताःसरितस्तथा १९ अपृच्छद्देवमहिषीस्त्रीधर्मंधर्मवत्सला स्त्रीधर्मकुशलास्तावैगंगाद्याः
सरितांवराः २०
गुणवान्सस्त्रीधर्मः ८ गौर्यांभूमौगच्छतिअनादिपरंपरयाचलति ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ७

उमोवाच अयंभगवताप्रश्नःकृतःस्त्रीधर्मसंश्रितः तंतुसंमंत्र्ययुष्माभिर्वक्तुमिच्छामिशंकरम् २१ नचैवसाध्यंपश्यामिविज्ञा
नंभुविकस्यचित् दिविवासागरगमास्तेनवोमानयाम्यहम् २२ एवंसर्वाःसरिच्छ्रेष्ठाःपृष्टाःपुण्यतमाःशिवाः ततोदेवनदीगंगानियु
क्ताप्रतिपूज्यच २३ बह्वीभिर्बहुभिःस्फीतास्त्रीधर्मज्ञाशुचिस्मिता शैलराजसुतादेवीपुण्यपापक्षयापहा २४ बुध्याविनयसं
पन्नासर्वधर्मविशारदा सस्मितंबहुबुध्याढ्यागंगावचनमब्रवीत् २५ गंगोवाच धन्यास्म्यनुगृहीतास्मिदेविधर्मपरायणे
यात्वंसर्वजगन्मान्यानदींमानयसेनघे २६ प्रभवन्पृच्छतेयोहिसंमानयतिवापुनः नूनंजनमदुष्टात्मापंडिताख्यांसगच्छति २७
ज्ञानविज्ञानसंपन्नानूहापोहविशारदान् प्रवक्तॄन्पृच्छतेयोन्यान्सवैनापदमृच्छति २८ अन्यथाबहुबुध्याढ्योवाक्यंवदति
संसदि अन्यथैवत्यहंवादीदुर्बलंवदतेवचः २९ दिव्यज्ञानेदिविश्रेष्ठेदिव्यपुण्येसहोत्थिते त्वमेवार्हसिनोदेविस्त्रीधर्माननुभा-
षितुम् ३० ततःसाराधितादेवीगंगयाबहुभिर्गुणैः प्राहसर्वमशेषेणस्त्रीधर्मंसुरसुंदरी ३१ उमोवाच स्त्रीधर्मोमां
प्रतियथाप्रतिभातियथाविधि तमहंकीर्तयिष्यामितथैवप्रथितोभव ३२ स्त्रीधर्मःपूर्वएवायंविवाहेबंधुभिःकृतः सहधर्म
चरीभर्तुर्भवत्यग्निसमीपतः ३३ सुस्वभावासुवचनासुवृत्तासुखदर्शना अनन्यचित्तासुमुखीभर्तुःसाधर्मचारिणी ३४ सा
भवेद्धर्मपरमासाभवेद्धर्मभागिनी देववत्सततंसाध्वीयाभर्तारंप्रपश्यति ३५ शुश्रूषांपरिचारंचदेववद्याकरोतिच नान्य-
भावाह्यविमनाःसुव्रतासुखदर्शना ३६ पुत्रवक्त्रमिवाभीक्ष्णंभर्तुर्वदनमीक्षते यासाध्वीनियताहारासाभवेद्धर्मचारिणी श्रु
त्वादंपतिधर्मंवैसहधर्मकृतंशुभम् ३७ याभवेद्धर्मपरमानारीभर्तृसमव्रता देववत्सततंसाध्वीभर्तारमनुपश्यति दंपत्योरेषवैधर्मः
सहधर्मकृतःशुभः ३८ शुश्रूषांपरिचारंचदेवतुल्यंप्रकुर्वती वश्यभावेनसुमनाःसुव्रतासुखदर्शना अनन्यचित्तासुमुखीभर्तुःसा
धर्मचारिणी ३९ परुषाण्यपिचोक्तायादृष्टादुष्टेनचक्षुषा सुप्रसन्नमुखीभर्तुर्यानारीसापतिव्रता ४० नचंद्रसूर्यौनतरुंपुंना
म्नायानिरीक्षते भर्तृवर्जंवरारोहासाभवेद्धर्मचारिणी ४१ दरिद्रंव्याधितंदीनमध्वनापरिकर्शितम् पतिंपुत्रमिवोपास्तेसानारीध
र्मभागिनी ४२ यानारीप्रयतादक्षायानारीपुत्रिणीभवेत् पतिप्रियापतिप्राणासानारीधर्मभागिनी ४३

४४ ४५ सुसंमृष्टक्षयाशोधितगृहा ४६ ४७ ४८ ४९ ५० लघुसत्वयाशीघ्रमर्यादावबोधिन्याबुध्या ५१ ५२ ५३ ५४ ५५
५६ ५७ ५८ ५९ इतिश्रीमहाभारते आनुशासनिके पर्वणि टीकायां शतोपरिषट्चत्वारिंशोऽध्यायः १४६ पिनाकिन् अस्मिन्नध्याये योहिमां द्रष्टु

शुश्रूषां परिचर्यां च करोत्यविमनाः सदा सुप्रतीता विनीता च सा नारी धर्मभागिनी ४४ न कामेषु न भोगेषु नैश्वर्ये न सुखे तथा स्पृहा यस्या-
यथा पत्यौ सा नारी धर्मभागिनी ४५ कल्योत्थानरतिर्नित्यं गृहशुश्रूषणे रता सुसंमृष्टक्षया चैव गोशकृत्कृतलेपना ४६ अग्निकार्यप
रा नित्यं सदा पुष्पबलिप्रदा देवतातिथिभृत्यानां निर्वाप्य पतिना सह ४७ शेषान्नमुपभुञ्जाना यथान्यायं यथाविधि तुष्टपुष्टजनानि
त्यं नारी धर्मेण युज्यते ४८ श्वश्रूश्वशुरयोः पादौ तोषयन्ती गुणान्विता मातापितृपरा नित्यं या नारी सा तपोधना ४९ ब्राह्मणान्दुर्बला
नाथान्दीनान्धकृपणांस्तथा बिभर्त्यन्नेन या नारी सा पतिव्रतभागिनी ५० व्रतं चरति या नित्यं दुश्चरं लघुसत्त्वया पतिचित्ता पति-
हिता सा पतिव्रतभागिनी ५१ पुण्यमेतत्तपश्चैव स्वर्गश्चैष सनातनः या नारी भर्तृपरमा भवेद्भर्तृव्रता सती ५२ पतिर्हि देवो नारीणां
पतिर्बन्धुः पतिर्गतिः पत्या समा गतिर्नास्ति दैवतं वा यथा पतिः ५३ पतिप्रसादः स्वर्गो वा तुल्यो नार्या न वा भवेत् अहं स्वर्गं न हीच्छेयं त्व
य्यप्रीते महेश्वरे ५४ यद्यकार्यमधर्मं वा यदि वा प्राणनाशनम् पतिर्ब्रूयाद्दरिद्रो वा व्याधितो वा कथंचन ५५ आपन्नो रिपुसंस्थो वा
ब्रह्मशापार्दितोपि वा आपद्धर्माननुप्रेक्ष्य तत्कार्यमविशङ्कया ५६ एष देव मया प्रोक्तः स्त्रीधर्मो वचनात्तव या त्वेवंभाविनी नारी सा
पतिव्रतभागिनी ५७ भीष्म उवाच इत्युक्तः स तु देवेशः प्रतिपूज्य गिरेः सुताम् लोकान्विसर्जयामास सर्वैरनुचरैर्वृतान् ५८
ततो ययुर्भूतगणाः सरितश्च यथागतम् गंधर्वाप्सरसश्चैव प्रणम्य शिरसा भवम् ५९ इतिश्रीमहाभारते आनुशासनिके पर्वणि
दानधर्मे उमामहेश्वरसंवादे शतोपरिषट्चत्वारिंशोऽध्यायः १४६ ऋषय ऊचुः पिनाकिन्भगनेत्रघ्न सर्वलोकनमस्कृत मा
हात्म्यं वासुदेवस्य श्रोतुमिच्छामि शंकर १ ईश्वर उवाच पितामहादपि वरः शाश्वतः पुरुषो हरिः कृष्णो जाम्बूनदाभासो व्य
भ्रे सूर्य इवोदितः २ दशबाहुर्महातेजा देवतारिनिषूदनः श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः ३ ब्रह्मा तस्योदरभवस्तस्याहं
च शिरोभवः शिरोरुहेभ्यो ज्योतींषि रोमभ्यश्च सुरासुराः ४ ऋषयो देहसंभूतास्तस्य लोकाश्च शाश्वताः पितामहगृहं साक्षात्स
र्वदेवगृहं च सः ५ सोस्याः पृथिव्याः कृत्स्नायाः स्रष्टा त्रिभुवनेश्वरः संहर्ता चैव भूतानां स्थावरस्य चरस्य च ६

मिच्छतेति श्लोकद्वयेन ब्रह्मविष्णुरुद्राणामैकात्म्यं दर्शितम् अन्यथा पदर्शितं न देवात्त्वोपसंहृतमिति बोध्यम् १ २ ३ ४ ५ ६ ७ ७

सहिदेववरःसाक्षाद्देवनाथःपरंतपः सर्वज्ञःसर्वसंश्लिष्टःसर्वगःसर्वतोमुखः ७ परमात्माहृषीकेशःसर्वव्यापीमहेश्वरः नतस्मात्प
रमंभूतंत्रिषुलोकेषुकिंचन ८ सनातनोवैमधुहागोविंदइतिविश्रुतः ससर्वान्पार्थिवान्संख्येघातयिष्यतिमानद ९ सुरकार्या
र्थमुत्पन्नोमानुषवपुरास्थितः नहिदेवगणाःशक्तास्त्रिविक्रमविनाकृताः १० भुवनेदेवकार्याणिकर्तुंनायकवर्जिताः नायकःसर्वभू
तानांसर्वदेवनमस्कृतः ११ एतस्यदेवनाथस्यदेवकार्यपरस्यच ब्रह्मभूतस्यसततंब्रह्मर्षिशरणस्यच १२ ब्रह्मावसतिगर्भस्थः
शरीरेसुखसंस्थितः शर्वःसुखसंश्रितश्चशरीरेसुखसंस्थितः १३ सर्वाःसुखसंश्रिताश्चशरीरेतस्यदेवताः सदेवःपुंडरीकाक्षःश्री
गर्भःश्रीसहोषितः १४ शार्ङ्गचक्रायुधःखड्गीसर्वनागरिपुध्वजः उत्तमेनसशीलेनदमेनचशमेनच १५ पराक्रमेणवीर्येणवपु
षादर्शनेनच आरोहेणप्रमाणेनधैर्येणार्जवसंपदा १६ आनृशंस्येनरूपेणबलेनचसमन्वितः अस्त्रैःसमुदितःसर्वैर्दिव्यैरद्भुत
दर्शनैः १७ योगमायासहस्राक्षोनिरपायोमहामनाः वीरोमित्रजनश्लाघीज्ञातिबंधुजनप्रियः १८ क्षमावांश्चानहंवादीब्रह्मण्यो
ब्रह्मनायकः भयहर्ताभयार्तानांमित्राणांनंदिवर्धनः १९ शरण्यःसर्वभूतानांदीनानांपालनेरतः श्रुतवानर्थसंपन्नःसर्वभूतनमस्कृ
तः २० समाश्रितानांवरदःशत्रूणामपिधर्मवित् नीतिज्ञोनीतिसंपन्नोब्रह्मवादीजितेंद्रियः २१ भवार्थमिहदेवानांबुध्यापरमयायुतः
प्राजापत्येशुभेमार्गेमानवेधर्मसंस्कृते २२ समुत्पत्स्यतिगोविंदोमनोर्वंशेमहात्मनः अंगोनाममनोःपुत्रोअंतर्धामाततःपरः २३
अंतर्धाम्नोहविर्धामाप्रजापतिरनिंदितः प्राचीनबर्हिर्भविताहविर्धाम्नःसुतोमहान् २४ तस्यप्रचेताप्रमुखाभविष्यंतिदशात्मजाः
प्राचेतसस्तथादक्षोभवितेहप्रजापतिः २५ दाक्षायिण्यास्तथादित्योमनुरादित्यतस्तथा मनोश्चवंशजइलासुद्युम्नश्चभविष्यति
२६ बुधात्पुरूरवाश्चापितस्मादायुर्भविष्यति नहुषोभवितातस्माद्ययातिस्तस्यचात्मजः २७ यदुस्तस्मान्महासत्वःक्रोष्टातस्माद्भवि
ष्यति क्रोष्टुश्चैवमहान्पुत्रोवृजिनीवान्भविष्यति २८ वृजिनीवतश्चभविताउषंगुरपराजितः उषंगोर्भवितापुत्रःशूरश्चित्ररथस्त
था २९ तस्यत्ववरजःपुत्रःशूरोनामभविष्यति तेषांविख्यातवीर्याणांचरित्रगुणशालिनाम् ३० यज्वनांसुविशुद्धानांवंशेब्राह्मणसंम
ते सशूरःक्षत्रियश्रेष्ठोमहावीर्योमहायशाः स्ववंशविस्तरकरंजनयिष्यतिमानदः ३१ वसुदेवइतिख्यातंपुत्रमानकदुंदुभिम् तस्यपुत्र
श्चतुर्बाहुर्वासुदेवोभविष्यति ३२ १७७

३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ अर्हितःपुण्यभूपादिनार्चितःपूजितःवाचाच

दाताब्राह्मणसत्कर्त्ताब्रह्मभूतोर्द्विजप्रियः राज्ञःसर्वान्सुबद्धान्समोक्षयिष्यतियादवः ३३ जरासंधंतुराजानंनिर्जित्यगिरिगह्वरे स
र्वपार्थिवरत्नाढ्योभविष्यतिसर्वीर्यवान् ३४ पृथिव्यामप्रतिहतोवीर्येणचभविष्यति विक्रमेणचसंपन्नःसर्वपार्थिवपार्थिवः ३५
शूरसेनेषुभूत्वासद्वारकायांवसन्प्रभुः पालयिष्यतिगांदेवोविजित्यनयवित्सदा ३६ तंभवंतःसमासाद्यवाङ्माल्यैरर्हणैर्वरैः अ-
र्चयंतुयथान्यायब्रह्माणमिवशाश्वतम् ३७ योहिमांद्रष्टुमिच्छेतब्रह्माणंचपितामहम् द्रष्टव्यस्तेनभगवान्वासुदेवःप्रतापवान् ३८
दृष्टेतस्मिन्नहंदृष्टोनमेत्रास्तिविचारणा पितामहोवादेवेशइतिवित्ततपोधनाः ३९ सयस्यपुंडरीकाक्षःप्रीतियुक्तोभविष्यति तस्यदे-
वगणःप्रीतोब्रह्मपूर्वोभविष्यति ४० यश्चतंमानवेलोकेसंश्रयिष्यतिकेशवम् तस्यकीर्त्तिजयश्चैवस्वर्गश्चैवभविष्यति ४१ ध-
र्माणांदेशिकःसाक्षात्सभविष्यतिधर्मभाक् धर्मवद्भिःसुदेवेशोनमस्कार्यःसदोद्यतैः ४२ धर्मएवपरोहिस्यात्तस्मिन्नभ्यर्चितेवि
भौ सहिदेवोमहातेजाःप्रजाहितचिकीर्षया ४३ धर्मार्थंपुरुषव्याघ्रऋषिकोटीःससर्जह ताःसृष्टास्तेनविभुनापर्वतेगंधमादने
४४ सनत्कुमारप्रमुखास्तिष्ठंतितपसान्विताः तस्मात्सवाग्मीधर्मज्ञोनमस्योद्विजपुंगवाः ४५ दिविश्रेष्ठोहिभगवान्हरिर्नारायणःप्र
भुः वंदितोहिसवंदेतमानितोमानयीतच अर्हितश्चार्हयेन्नित्यंपूजितःप्रतिपूजयेत् ४६ दृष्टःपश्येदहरहःसंश्रितःप्रतिसंश्रयेत्
अर्चितश्चार्चयेन्नित्यंसदेवोद्विजसत्तमाः ४७ एतत्तस्यानवद्यस्यविष्णोर्वैपरमंव्रतम् आदिदेवस्यमहतःसज्जनाचरितंसदा ४८
भुवनेभ्यर्चितोनित्यंदेवैरपिसनातनः अभयेनानुरूपेणयुज्यंतेतमनुव्रताः ४९ कर्मणामनसावाचासनमस्योद्विजैःसदा यत्नवद्भि
रुपस्थायद्रष्टव्योदेवकीसुतः ५० एषवोभिहितोमार्गोमयावैमुनिसत्तमाः तंदृष्ट्वासर्वशोदेवंदृष्टाःस्युःसुरसत्तमाः ५१ महाव-
राहंतंदेवंसर्वलोकपितामहम् अहंचैवनमस्यामिनित्यमेवजगत्पतिम् ५२ तत्रचत्रितयंदृष्टंभविष्यतिनसंशयः समस्ताहिव-
यंदेवास्तस्यदेहेवसामहे ५३ तस्यचैवाग्रजोभ्राताशिताद्रिनिचयप्रभः हलीबलइतिख्यातोभविष्यतिधराधरः ५४ त्रिशि
रास्तस्यदिव्यश्चशातकुंभमयोद्रुमः ध्वजस्तृणेंद्रोदेवस्यभविष्यतिरथाश्रितः ५५ शिरोनागैर्महाभोगैःपरिकीर्णंमहात्मभिः
भविष्यतिमहाबाहोःसर्वलोकेश्वरस्यच ५६ चिंतितानिसमेष्यंतिशस्त्राण्यस्त्राणिचैवह अनंतश्चसएवोक्तोभगवान्हरिरव्ययः ५७

महीकृतः ४६ अर्चितःमनसाध्यातः ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ तृणेंद्रःतालद्रुमः ५५ ५६ ५७ ६७ ६७ ६७

५८ ५९ ६० ६१ ६२ इतिआनुशासनिकेपर्वणिटीकायांशतोपरिसप्तचत्वारिंशोऽध्यायः १४७ अथव्योम्नीतिकथोपसंहारार्थःस्पष्टार्थोऽध्यायः १ २

समादिष्टश्चविबुधैर्दर्शयत्वमितिप्रभो सुपर्णोऽयंयस्यवीर्येणकश्यपस्यात्मजोबली अंतंनैवाशकद्द्रष्टुंदेवस्यपरमात्मनः ५८ सचशे
षोविचरतेपरयावैमुदायुतः अंतर्वसतिभोगेनपरिरभ्यवसुंधराम् ५९ यएवविष्णुःसोऽनंतोभगवान्वसुधाधरः योरामःसहृषीकेशो
योऽच्युतःसधराधरः ६० तावुभौपुरुषव्याघ्रौदिव्यौदिव्यपराक्रमौ द्रष्टव्यौमाननीयौचचक्रलांगलधारिणौ ६१ एषवोनुग्रहःप्रोक्तो
मयापुण्यस्तपोधनाः यद्भवंतोयदुश्रेष्ठंपूजयेयुःप्रयत्नतः ६२ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपुरुषमाहात्म्ये
नामशतोपरिसप्तचत्वारिंशोऽध्यायः १४७ नारदउवाच अथव्योम्निमहान्छब्दःसविद्युत्स्तनयित्नुमान् मेघैश्चगग
ननीलंसंरुद्धमभवद्घनैः १ प्रावृषीवचपर्जन्योववृषेनिर्मलंपयः तमश्चैवाभवद्घोरंदिशश्चनचकाशिरे २ ततोदेवगिरौतस्मि
न्रम्येपुण्येसनातने नसर्वंभूतसंघंवादद्दृशुर्मुनयस्तदा ३ व्यभ्रंचगगनंसद्यःक्षणेनसमपद्यत तीर्थयात्रांततोविप्राजग्मुश्चान्ये
यथागतम् ४ तदद्भुतमचिंत्यंचदृष्ट्वातेविस्मिताभवन् शंकरस्योमयासार्द्धंसंवादंत्वत्कथाश्रयम् ५ सभावान्पुरुषव्याघ्रब्रह्मभू
तःसनातनः यदर्थंमुनिशिष्टाःस्मोगिरिपृष्ठेमहात्मना ६ द्वितीयंत्वद्भुतमिदंत्वत्तेजःकृतमद्यवै दृष्ट्वाचविस्मिताःकृष्णसाचनःस्मृ
तिरागता ७ एतत्तेदेवदेवस्यमाहात्म्यंकथितंप्रभो कपर्दिनोगिरीशस्यमहाबाहोजनार्दन ८ इत्युक्तःसतदाकृष्णस्तपोवननिवा-
सिभिः मानयामासतान्सर्वानृषीन्देवकिनंदनः ९ अथर्षयःसंप्रहृष्टाःपुनस्तेकृष्णमब्रुवन् पुनःपुनर्दर्शयास्मान्सदैवमधुसूदन
१० नहिनःसारतिःस्वर्गेयाचत्वद्दर्शनेविभो तद्दृतंचमहाबाहोयदाहभगवान्भवः ११ एतत्तेसर्वमाख्यातंरहस्यमरिकर्शन त्व
मेवत्वर्थतत्त्वज्ञःपृष्टोऽस्मान्पृच्छसेयदा १२ तदस्माभिरिदंगुह्यंत्वत्प्रियार्थमुदाहृतम् नचतेविदितंकिंचित्त्रिषुलोकेषुविद्यते १३
जन्मचैवप्रसूतिश्चयच्चान्यत्कारणंविभो वयंतुबहुचापल्यादशक्तागुह्यधारणे १४ ततःस्थितेत्वयिविभोलघुत्वात्प्रलपामहे
नहिकिंचित्तदाश्चर्यंयन्नवेत्तिभवानिह १५ दिवियद्भुविवादेवसर्वंहिविदितंतव साधयामवयंकृष्णबुद्धिंपुष्टिमवाप्नुहि १६ पु
त्रस्तेसदृशस्तातविशिष्टोवाभविष्यति महाप्रभावसंयुक्तोदीप्तिकीर्त्तिकरःप्रभुः १७ भीष्मउवाच ततःप्रणम्यदेवेशंयाद
वंपुरुषोत्तमम् प्रदक्षिणमुपावृत्यप्रजग्मुस्तेमहर्षयः १८ सोऽयंनारायणःश्रीमान्दीप्त्यापरमयायुतः व्रतंयथावत्तच्चीर्त्वाद्वारकांपु
नरागमत् १९ ११८

३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

२० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६

पूर्णेच दशमे मासि पुत्रोस्य परमाद्भुतः रुक्मिण्यां संमतो जज्ञे शूरो वंशधरः प्रभो २० सकामः सर्वभूतानां सर्वभागवतो नृप असुराणां
सुराणां च चरत्यंतर्गतः सदा २१ साय पुरुषशार्दूलो मेघवर्णश्चतुर्भुजः संश्रितः पांडवान्प्रेम्णा भवंतश्चैनमाश्रिताः २२ कीर्त्तिर्लक्ष्मी
धृतिश्चैव स्वर्गमार्गस्तथैव च यत्रैष संस्थितस्तत्र देवो विष्णुस्त्रिविक्रमः २३ सेंद्रा देवास्त्रयस्त्रिंशदेवनात्र विचारणा आदिदेवो महादे-
वः सर्वभूतप्रतिश्रयः २४ अनादिनिधनोव्यक्तो महात्मा मधुसूदनः अयं जातो महातेजाः सुराणामर्थसिद्धये २५ सुदुस्तरार्थतत्त्वस्य
वक्ता कर्त्ता च माधवः तव पार्थ जयः कृत्स्नस्तव कीर्त्तिस्तथातुला २६ तेवयं पृथिवी देवी कृत्स्ना नारायणाश्रयात् अयं नाथस्तवाचिंत्यो
यस्य नारायणो गतिः २७ स भवान्स्त्वमृषिः पूर्वमाग्नेयाहुतवान्नृपान् कृष्णास्रुवेण महता युगांताग्निसमेन वै २८ दुर्योधनश्च शो-
च्योसौ सपुत्रभ्रातृबांधवः कृतवान्योऽबुधः कोपाद्धरिगांडीवविग्रहम् २९ दैतेया दानवेंद्राश्च महाकाया महाबलाः चक्राग्नावक्षय
मापन्ना दावाग्नौ शलभा इव ३० प्रतियोद्धुं न शक्यो हि मानुषैरेष संयुगे विहीनैः पुरुषव्याघ्र सत्त्वशक्तिबलादिभिः ३१ जयो योगी यु
गांताभः सव्यसाची रणाग्रगः तेजसा हतवान्सर्वं सुयोधनबलं नृप ३२ यत्तु गोवृषभांकेन मुनिभ्यः समुदाहृतम् पुराणं हिमवत्पृ-
ष्ठे तन्मे निगदितः शृणु ३३ यावत्तस्य भवेत्पुष्टिस्तेजो दीप्तिः पराक्रमः प्रभावः संनतिर्जन्म कृष्णे तत्त्रिगुणं विभो ३४ कः शक्नोत्यन्यथा
कर्त्तुं तद्यदि स्यात्तथा शृणु यत्र कृष्णो हि भगवांस्तत्र पुष्टिरनुत्तमा ३५ वयं त्विहाल्पमतयः परतंत्राः सुविक्लवाः ज्ञानपूर्वं प्रपन्नाः स्मो
मृत्योः पंथानमव्ययम् ३६ भवांश्चाप्यार्जवपरः पूर्वं कृत्वा प्रतिश्रयम् राजवृत्तं न लभते प्रतिज्ञापालने रतः ३७ अप्रयत्नवधं लोके
राजंस्त्वं बहुमन्यसे न हि प्रतिज्ञा या दत्ता तां प्रहातुमिहार्हसि ३८ कालेनायं जनः सर्वो निहतो रणमूर्धनि वयं च कालेन हताः कालो हि
परमेश्वरः ३९ न हि कालेन कालज्ञः स्पृष्टः शोचितुमर्हति कालोलोहितरक्ताक्षः कृष्णो दंडी सनातनः ४० तस्मात्कुंतीसुत ज्ञातीन्
हतान्शोचितुमर्हसि व्यपेतमन्युर्नित्यं त्वं भव कौरवनंदन माधवस्यास्य माहात्म्यं श्रुतं यत्कथितं मया ४१ तदेव तावत्पर्याप्तं सज्जन-
स्य निदर्शनम् व्यासस्य वचनं श्रुत्वा नारदस्य च धीमतः ४२ स्वयं चैव महाराज कृष्णस्यार्हत्तमस्य वै प्रभावश्चापि भृगुस्य कथितः सुम
हान्मया ४३ महेश्वरस्य संवादं शैलपुत्र्याश्च भारत धारयिष्यति यश्चैनं महापुरुषसंभवम् ४४

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४

शृणुयात्कथयेद्वायःसश्रेयोलभतेपरम् भवितारश्चतस्यार्थाःसर्वेकामायथेप्सिताः ४५ प्रेत्यस्वर्गंचलभतेनरोनास्त्यत्रसंशयः ४६
न्यायश्रेयोभिकामेनप्रतिपत्तुंजनार्दनः एषएवाक्षयोविप्रैःस्तुतोराजन्जनार्दनः ४७ महेश्वरमुखोत्सृष्टायेचधर्मगुणाःस्मृताः तैल
-यात्मनसाधार्याःकुरुराजदिवानिशम् ४८ एवंतेवर्तमानस्यसम्यग्दंडधरस्यच प्रजापालनदक्षस्यस्वर्गलोकोभविष्यति ४९
धर्मेणापिसदाराजन्प्रजारक्षितुमर्हसि यस्तस्यविपुलोदंडःसम्यग्धर्मःसकीर्त्यते ५० यएषकथितोराजन्मयासज्जनसन्निधौ शं
करस्योमयासार्धंसंवादोधर्मसंहितः ५१ श्रुत्वावाश्रोतुकामैर्वाप्यर्च्योयेवृषभध्वजम् विशुद्धेनेहभावेनयइच्छेत्भूतिमात्मनः
५२ एषतस्यानवद्यस्यनारदस्यमहात्मनः सदेशोदेवपूजार्थंतंतथाकुरुपांडव ५३ एतदत्यद्भुतंवृत्तंपुण्यंहिभवतिप्रभो वा
सुदेवस्यकौंतेयस्थाणोश्चैवस्वभावजम् ५४ दशवर्षसहस्राणिबदर्यामेषशाश्वतः तपश्चचारविपुलंसहगांडीवधन्वना ५५
त्रियुगेपुंडरीकाक्षोवासुदेवधनंजयौ विदितौनारदेनैतौममव्यासाच्चपार्थिव ५६ बालएवमहाबाहुश्चकारकदनंमहत् कंसस्य
पुंडरीकाक्षोज्ञातित्राणार्थकारणात् ५७ कर्मणामस्यकौंतेयनांतंसंख्यातुमुत्सहे शाश्वतस्यपुराणस्यपुरुषस्ययुधिष्ठिर ५८
ध्रुवंश्रेयःपरंतातभविष्यतितवोत्तमम् यस्यतेपुरुषव्याघ्रःसखाचायंजनार्दनः ५९ दुर्योधनंतुशोचामिप्रेत्यलोकेपिदुर्मतिम् य
त्कृतेपृथिवीसर्वाविनष्टासहयद्विपा ६० दुर्योधनापराधेनकर्णस्यशकुनेस्तथा दुःशासनचतुर्थानांकुरवोनिधनंगताः ६१
वैशंपायनउवाच एवंसंभाषमाणेतुगांगेयेपुरुषर्षभे तूष्णींबभूवकौरव्योमध्येतेषांमहात्मनाम् ६२ तच्छ्रुत्वाविस्मयंज-
ग्मुर्धृतराष्ट्रादयोनृपाः संपूज्यमनसाकृष्णंसर्वेप्रांजलयोभवन् ६३ ऋषयश्चापितेसर्वेनारदप्रमुखास्तथा प्रतिगृह्याभ्यनंदंत
तद्वाक्यंप्रतिपूज्यच ६४ इत्येतदखिलंसर्वैःपांडवोभ्रातृभिःसह श्रुतवान्सुमहाश्चर्यंपुण्यंभीष्मानुशासनम् ६५ युधिष्ठिरस्तु
गांगेयंविश्रांतंभूरिदक्षिणम् पुनरेवमहाबुद्धिःपर्यपृच्छन्महीपतिः ६६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मे
महापुरुषप्रस्तावेशततोपरिअष्टचत्वारिंशोऽध्यायः १४८

विश्वंविष्णुरित्यतःप्राक्तनोग्रंथःस्पष्टार्थः नामपदानामन्वयवार्थस्तुश्रीशंकराचार्यभगवत्पादीयभाष्यादेवावगंतव्यः शूद्रःसुखमवाप्नुयादित्यनेनशू-

वैशंपायनउवाच श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः युधिष्ठिरःशांतनवंपुनरेवाभ्यभाषत १ युधिष्ठिरउवाच किमेकंदैवतंलोकेकिंवाप्येकंपरायणम् स्तुवंतःकंकमर्चंतःप्राप्नुयुर्मानवाःशुभम् २ कोधर्मःसर्वधर्माणांभवतःपरमोमतः किंजपन्मुच्यतेजंतुर्जन्मसंसारबंधनात् ३ भीष्मउवाच जगत्प्रभुंदेवदेवमनंतंपुरुषोत्तमम् स्तुवन्नामसहस्रेणपुरुषःसततोत्थितः ४ तमेवचार्चयन्नित्यंभक्त्यापुरुषमव्ययम् ध्यायंस्तुवन्नमस्यंश्चयजमानस्तमेवच ५ अनादिनिधनंविष्णुंसर्वलोकमहेश्वरम् लोकाध्यक्षंस्तुवन्नित्यंसर्वदुःखातिगोभवेत् ६ ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्तिवर्द्धनम् लोकनाथंमहद्भूतंसर्वभूतभवोद्भवम् ७ एषमेसर्वधर्माणांधर्मोधिकतमोमतः यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा ८ परमंयोमहत्तेजःपरमंयोमहत्तपः परमंयोमहद्ब्रह्मपरमंयःपरायणम् ९ पवित्राणांपवित्रंयोमंगलानांचमंगलम् दैवतंदेवतानांचभूतानांयोव्ययःपिता १० यतःसर्वाणिभूतानिभवंत्यादियुगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये ११ तस्यलोकप्रधानस्यजगन्नाथस्यभूपते विष्णोर्नामसहस्रंमेशृणुपापभयापहम् १२ यानिनामानिगौणानिविख्यातानिमहात्मनः ऋषिभिःपरिगीतानितानिवक्ष्यामिभूतये १३ ओम् विश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः भूतकृद्भूतभृद्भावोभूतात्माभूतभावनः १४ पूतात्मापरमात्माचमुक्तानांपरमागतिः अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोक्षरएवच १५ योगोयोगविदांनेताप्रधानपुरुषेश्वरः नारसिंहवपुःश्रीमान्केशवःपुरुषोत्तमः १६ सर्वःशर्वःशिवःस्थाणुर्भूतादिर्निधिरव्ययः संभवोभावनोभर्ताप्रभवःप्रभुरीश्वरः १७ स्वयंभूःशंभुरादित्यःपुष्कराक्षोमहास्वनः अनादिनिधनोधाताविधाताधातुरुत्तमः १८ अप्रमेयोहृषीकेशःपद्मनाभोमरप्रभुः विश्वकर्मामनुस्त्वष्टास्थविष्ठःस्थविरोध्रुवः १९ अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रतर्दनः प्रभूतस्त्रिककुब्धामपवित्रंमंगलंपरम् २० ईशानःप्राणदःप्राणोज्येष्ठःश्रेष्ठःप्रजापतिः हिरण्यगर्भोभूगर्भोमाधवोमधुसूदनः २१ ईश्वरोविक्रमीधन्वीमेधावीविक्रमःक्रमः अनुत्तमोदुराधर्षःकृतज्ञःकृतिरात्मवान् २२ सुरेशःशरणंशर्मविश्वरेताःप्रजाभवः अहःसंवत्सरोव्यालःप्रत्ययःसर्वदर्शनः २३ अजःसर्वेश्वरःसिद्धःसिद्धिःसर्वादिरच्युतः वृषाकपिरमेयात्मासर्वयोगविनिःसृतः २४ वसुर्वसुमनाःसत्यःसमात्मासंमितःसमः अमोघःपुंडरीकाक्षोवृषकर्मावृषाकृतिः २५

रुद्राध्यायेन न्यूनाधिका

गोस्तिइतिदर्शितम् शेषंसुगमम् १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२
२३ २४ २५ २६

रुद्रोबहुशिराबभ्रुर्विश्वयोनिःशुचिश्रवाः अमृतःशाश्वतःस्थाणुर्वरारोहोमहातपाः २६ सर्वगःसर्वविद्भानुर्विष्वक्सेनोजनार्दनः वेदो
वेदविदव्यंगोवेदांगोवेदवित्कविः २७ लोकाध्यक्षःसुराध्यक्षोधर्माध्यक्षःकृताकृतः चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः २८ भ्रा
जिष्णुर्भोजनंभोक्तासहिष्णुर्जगदादिजः अनघोविजयोजेताविश्वयोनिःपुनर्वसुः २९ उपेंद्रोवामनःप्रांशुरमोघःशुचिरूर्जितः अ
तींद्रःसंग्रहःसर्गोधृतात्मानियमोयमः ३० वेद्योवैद्यःसदायोगीवीरहामाधवोमधुः अतींद्रियोमहामायोमहोत्साहोमहाबलः ३१
महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः अनिर्देश्यवपुःश्रीमानमेयात्मामहाद्रिधृक् ३२ महेष्वासोमहीभर्ताश्रीनिवासःसतांगतिः
अनिरुद्धःसुरानंदोगोविंदोगोविदांपतिः ३३ मरीचिर्दमनोहंसःसुपर्णोभुजगोत्तमः हिरण्यनाभःसुतपाःपद्मनाभःप्रजापतिः ३४
अमृत्युःसर्वदृक्सिंहःसंधातासंधिमान्स्थिरः अजोदुर्मर्षणःशास्ताविश्रुतात्मासुरारिहा ३५ गुरुर्गुरुतमोधामसत्यःसत्यपराक्र
मः निमिषोनिमिषःस्रग्वीवाचस्पतिरुदारधीः ३६ अग्रणीर्ग्रामणीःश्रीमान्न्यायोनेतासमीरणः सहस्रमूर्द्धाविश्वात्मासहस्राक्षः
सहस्रपात् ३७ आवर्त्तनोनिवृत्तात्मासंवृतःसंप्रमर्दनः अहःसंवर्त्तकोवन्हिरनिलोधरणीधरः ३८ सुप्रसादःप्रसन्नात्माविश्वधृग्
विश्वभुग्विभुः सत्कर्त्तासत्कृतःसाधुर्जन्हुर्नारायणोनरः ३९ असंख्येयोप्रमेयात्माविशिष्टःशिष्टकृच्छुचिः सिद्धार्थःसिद्धसंकल्पः
सिद्धिदःसिद्धिसाधनः ४० वृषाहीवृषभोविष्णुर्वृषपर्वावृषोदरः वर्द्धनोवर्द्धमानश्चविविक्तःश्रुतिसागरः ४१ सुभुजोदुर्धरोवाग्मी
महेंद्रोवसुदोवसुः नैकरूपोबृहद्रूपःशिपिविष्टःप्रकाशनः ४२ ओजस्तेजोद्युतिधरःप्रकाशात्माप्रतापनः ऋद्धःस्पष्टाक्षरोमंत्रश्चं-
द्रांशुर्भास्करद्युतिः ४३ अमृतांशूद्भवोभानुःशशबिंदुःसुरेश्वरः औषधंजगतःसेतुःसत्यधर्मपराक्रमः ४४ भूतभव्यभवन्नाथः
पवनःपावनोनलः कामहाकामकृत्कांतःकामःकामप्रदःप्रभुः ४५ युगादिकृद्युगावर्त्तोनैकमायोमहाशनः अदृश्योव्यक्तरूपश्चस
हस्रजिदनंतजित् ४६ इष्टोविशिष्टःशिष्टेष्टःशिखंडीनहुषोवृषः क्रोधहाक्रोधकृत्कर्ताविश्वबाहुर्महीधरः ४७ अच्युतःप्रथि
तःप्राणःप्राणदोवासवानुजः अपांनिधिरधिष्ठानमप्रमत्तःप्रतिष्ठितः ४८ स्कंदःस्कंदधरोधुर्योवरदोवायुवाहनः वासुदेवोबृहद्-
भानुरादिदेवःपुरंदरः ४९ अशोकस्तारणस्तारःशूरःशौरिर्जनेश्वरः अनुकूलःशतावर्त्तःपद्मीपद्मनिभेक्षणः ५०

५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६

पद्मनाभोरविंदाक्षः पद्मगर्भःशरीरभृत् महर्द्धिरृद्धोवृद्धात्मामहाक्षोगरुडध्वजः ५१ अतुलःशरभोभीमःसमयज्ञोहविर्हरिः
सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ५२ विक्षरोरोहितोमार्गोहेतुर्दामोदरःसहः महीधरोमहाभागोवेगवानमिताशनः
५३ उद्भवःक्षोभणोदेवःश्रीगर्भःपरमेश्वरः करणंकारणंकर्ताविकर्तागहनोगुहः ५४ व्यवसायोव्यवस्थानःसंस्थानःस्थानदोध्रु
वः परर्द्धिःपरमस्पष्टस्तुष्टःपुष्टःशुभेक्षणः ५५ रामोविरामोविरजोमार्गोनेयोनयोनयः वीरःशक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः
५६ वैकुंठःपुरुषःप्राणःप्राणदःप्रणवःपृथुः हिरण्यगर्भःशत्रुघ्नोव्याप्तोवायुरधोक्षजः ५७ ऋतुःसुदर्शनःकालःपरमेष्ठीपरिग्रहः उ
ग्रःसंवत्सरोदक्षोविश्रामोविश्वदक्षिणः ५८ विस्तारःस्थावरःस्थाणुःप्रमाणंबीजमव्ययम् अर्थोनर्थोमहाकोशोमहाभोगोमहाधनः
५९ अनिर्विण्णःस्थविष्ठोभूर्धर्मयूपोमहामखः नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामःसमीहनः ६० यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांग
तिः सर्वदर्शीविमुक्तात्मासर्वज्ञोज्ञानमुत्तमम् ६१ सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुखदःसुहृत् मनोहरोजितक्रोधोवीरबाहुर्वि
दारणः ६२ स्वापनःस्ववशोव्यापीनैकात्मानैककर्मकृत् वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ६३ धर्मगुब्धर्मकृद्धर्मीसदसत्क्ष
रमक्षरम् अविज्ञातासहस्रांशुर्विधाताकृतलक्षणः ६४ गभस्तिनेमिःसत्वस्थःसिंहोभूतमहेश्वरः आदिदेवोमहादेवोदेवेशोदे
वभृद्गुरुः ६५ उत्तरोगोपतिर्गोप्ताज्ञानगम्यःपुरातनः शरीरभूतभृद्भोक्ताकपींद्रोभूरिदक्षिणः ६६ सोमपोमृतपःसोमःपुरुजित्पुरु
सत्तमः विनयोजयःसत्यसंधोदाशार्हःसात्वतांपतिः ६७ जीवोविनयितासाक्षीमुकुंदोमितविक्रमः अंभोनिधिरनंतात्मामहोदधि-
शयोंतकः ६८ अजोमहार्हःस्वाभाव्योजितामित्रःप्रमोदनः आनंदोनंदनोनंदःसत्यधर्मात्रिविक्रमः ६९ महर्षिःकपिलाचार्यःकृ
तज्ञोमेदिनीपतिः त्रिपदस्त्रिदशाध्यक्षोमहाशृंगःकृतांतकृत् ७० महावराहोगोविंदःसुषेणःकनकांगदी गुह्योगभीरोगहनोगुप्त
श्चक्रगदाधरः ७१ वेधाःस्वांगोजितःकृष्णोदृढःसंकर्षणोच्युतः वरुणोवारुणोवृक्षःपुष्कराक्षोमहामनाः ७२ भगवान्भगहानंदी
वनमालीहलायुधः आदित्योज्योतिरादित्यःसहिष्णुर्गतिसत्तमः ७३ सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः दिवस्पृक्सर्वदृग्व्या
सोवाचस्पतिरयोनिजः ७४ त्रिसामासामगःसामनिर्वाणंभेषजंभिषक् संन्यासकृच्छमःशांतोनिष्ठाशांतिःपरायणः ७५

६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७ ७ ७ ७ ७ ७

शुभांगःशांतिदःस्रष्टाकुमुदःकुवलेशयः गोहितोगोपतिर्गोप्तावृषभाक्षोवृषप्रियः ७६ अनिवर्त्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः
श्रीवत्सवक्षाःश्रीवासःश्रीपतिःश्रीमतांवरः ७७ श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीविभावनः श्रीधरःश्रीकरःश्रेयःश्रीमाँल्लोकत्र-
याश्रयः ७८ स्वक्षःस्वंगःशतानंदोनंदिर्ज्योतिर्गणेश्वरः विजितात्माविधेयात्मासत्कीर्तिश्छिन्नसंशयः ७९ उदीर्णःसर्वतश्चक्षुरनीशः
शाश्वतःस्थिरः भूशयोभूषणोभूतिर्विशोकःशोकनाशनः ८० अर्चिष्मानर्चितःकुंभोविशुद्धात्माविशोधनः अनिरुद्धोप्रतिरथःप्र
द्युम्नोमितविक्रमः ८१ कालनेमिनिहावीरःशूरिःशौरिर्जनेश्वरः त्रिलोकात्मात्रिलोकेशःकेशवःकेशिहाहरिः ८२ कामदेवःका
मपालःकामीकांतःकृतागमः अनिर्देश्यवपुर्विष्णुर्वीरोनंतोधनंजयः ८३ ब्रह्मण्योब्रह्मकृद्ब्रह्माब्रह्मब्रह्मविवर्द्धनः ब्रह्मविद्ब्रा
ह्मणोब्रह्मीब्रह्मज्ञोब्राह्मणप्रियः ८४ महाक्रमोमहाकर्मामहातेजामहोरगः महाक्रतुर्महायज्वामहायज्ञोमहाहविः ८५ स्त-
व्यःस्तवप्रियःस्तोत्रंस्तुतिःस्तोतारणप्रियः पूर्णःपूरयितापुण्यःपुण्यकीर्त्तिरनामयः ८६ मनोजवस्तीर्थकरोवसुरेतावसुप्रदः वसुप्र
देवासुदेवोवसुर्वसुमनाहविः ८७ सद्गतिःसत्कृतिःसत्तासद्भूतिःसत्परायणः शूरसेनोयदुश्रेष्ठःसन्निवासःसुयामुनः ८८ भूता
वासोवासुदेवःसर्वासुनिलयोनलः दर्पहादर्पदोदृप्तोदुर्धरोथापराजितः ८९ विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान् अने
कमूर्त्तिरव्यक्तःशतमूर्त्तिःशताननः ९० एकोनैकःसवःकःकिंयत्तत्पदमनुत्तमम् लोकबंधुर्लोकनाथोमाधवोभक्तवत्सलः
९१ सुवर्णवर्णोहेमांगोवरांगश्चंदनांगदी वीरहाविषमःशून्योघृताशीरचलश्चलः ९२ अमानीमानदोमान्योलोकस्वामी-
त्रिलोकधृक् सुमेधामेधजोधन्यःसत्यमेधाधराधरः ९३ तेजोवृषोद्युतिधरःसर्वशस्त्रभृतांवरः प्रग्रहोनिग्रहोव्यग्रोनैकशृंगो
गदाग्रजः ९४ चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः चतुरात्माचतुर्भावश्चतुर्वेदविदेकपात् ९५ समावर्त्तोनिवृत्तात्मादुर्जयोदुरति
क्रमः दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा ९६ शुभांगोलोकसारंगःसुतंतुस्तंतुवर्द्धनः इंद्रकर्मामहाकर्माकृतकर्माकृतागमः
९७ उद्भवःसुंदरःसुंदोरत्ननाभःसुलोचनः अर्कोवाजसनःशृंगीजयंतःसर्वविज्जयी ९८ सुवर्णबिंदुरक्षोभ्यःसर्ववागीश्वरेश्वरः
महाह्रदोमहागर्त्तोमहाभूतोमहानिधिः ९९ कुमुदःकुंदरःकुंदःपर्जन्यःपावनोनिलः अमृताशोमृतवपुःसर्वज्ञःसर्वतोमुखः १००

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः न्यग्रोधोदुंबरोश्वत्थश्चाणूरांध्रनिषूदनः १०१ सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः
अमूर्त्तिरनघोचिंत्योभयकृद्भयनाशनः २ अणुर्बृहत्कृशः स्थूलोगुणभृन्निर्गुणोमहान् अधृतः स्वधृतः स्वास्यः प्राग्वंशोवंशवर्द्धनः
३ भारभृत्कथितोयोगीयोगीशः सर्वकामदः आश्रमः श्रमणः क्षामः सुपर्णोवायुवाहनः ४ धनुर्द्धरोधनुर्वेदोदंडोदमयितादमः अ
पराजितः सर्वसहोनियंतानियमोयमः ५ सत्ववान्सात्विकः सत्यः सत्यधर्मपरायणः अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्द्धनः ६
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः रविर्विरोचनः सूर्यः सवितारविलोचनः ७ अनंतोहुतभुग्भोक्तासुखदोनैकदोग्रजः अनि
र्विण्णः सदामर्षीलोकाधिष्ठानमद्भुतः ८ सनात्सनातनतमः कपिलः कपिरव्ययः स्वस्तिदः स्वस्तिकृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षि
णः ९ अरौद्रः कुंडलीचक्रीविक्रम्यूर्जितशासनः शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ११० अक्रूरः पेशलोदक्षोदक्षिणः क्षमि-
णांवरः विद्वत्तमोवीतभयः पुण्यश्रवणकीर्त्तनः ११ उत्तारणोदुष्कृतिहापुण्योदुःस्वप्ननाशनः वीरहारक्षणः संतोजीवनः पर्यवस्थितः
१२ अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः चतुरस्रोगभीरात्माविदिशोव्यादिशोदिशः १३ अनादिर्भूर्भुवोलक्ष्मीः सुवीरोरुचिरांगदः
जननोजनजन्मादिर्भीमोभीमपराक्रमः १४ आधारनिलयोधातापुष्पहासः प्रजागरः ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः १५
प्रमाणंप्राणनिलयः प्राणभृत्प्राणजीवनः तत्वंतत्वविदेकात्माजन्ममृत्युजरातिगः १६ भूर्भुवः स्वस्तरुस्तारः सविताप्रपितामहः यज्ञो
यज्ञपतिर्यज्वायज्ञांगोयज्ञवाहनः १७ यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञसाधनः यज्ञांतकृद्यज्ञगुह्यमन्नमन्नादएवच १८ आत्म
योनिः स्वयंजातोवैखानः सामगायनः देवकीनंदनः स्रष्टाक्षितीशः पापनाशनः १९ शंखभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः रथांग
पाणिरक्षोभ्यः सर्वप्रहरणायुधः ओन्नमइति १२० इतीदंकीर्त्तनीयस्यकेशवस्यमहात्मनः नाम्नांसहस्रंदिव्यानामशेषेणप्रकी
र्त्तितम् २१ यइदंशृणुयान्नित्यंयश्चापिपरिकीर्त्तयेत् नाशुभंप्राप्नुयात्किंचित्सोमुत्रेहचमानवः २२ वेदांतगोब्राह्मणस्यात्क्षत्रियो
विजयीभवेत् वैश्योधनसमृद्धःस्याच्छूद्रः सुखमवाप्नुयात् २३ धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् कामानवाप्नुयात्कामी
प्रजार्थीप्राप्नुयात्प्रजाम् २४ भक्तिमान्यः सदोत्थायशुचिस्तद्गतमानसः सहस्रंवासुदेवस्यनाम्नामेतत्प्रकीर्त्तयेत् १२५

१२६ १२७ १२८ १२९ १३० १३१ १३२ १३३ १३४ १३५ १३६ १३७ १३८ १३९ १४० १४१

यशः प्राप्नोतिविपुलंज्ञातिप्राधान्यमेवच अचलांश्रियमाप्नोतिश्रेयः प्राप्नोत्यनुत्तमम् २६ नभयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति भव
त्यरोगोद्युतिमान्बलरूपगुणान्वितः२७ रोगार्त्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात् भयान्मुच्येतभीतस्तुमुच्येदापन्नआपदः १२८ दु
र्गाण्यतितरत्याशुपुरुषःपुरुषोत्तमम् स्तुवन्नामसहस्रेणनित्यंभक्तिसमन्वितः १२९ वासुदेवाश्रयोमर्त्योवासुदेवपरायणः सर्व
पापविशुद्धात्मायातिब्रह्मसनातनम् १३० नवासुदेवभक्तानामशुभंविद्यतेक्वचित् जन्ममृत्युजराव्याधिभयंनैवोपजायते ३१
इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वितः युज्येतात्मासुखक्षांतिःश्रीधृतिस्मृतिकीर्तिभिः ३२ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः
भवतिकृतपुण्यानांभक्तानांपुरुषोत्तमे ३३ द्यौःसचंद्रार्कनक्षत्राखंदिशोभूर्महोदधिः वासुदेवस्यवीर्येणविधृतानिमहात्मनः ३४
ससुरासुरगंधर्वंसयक्षोरगराक्षसम् जगद्वशेवर्त्ततेदंकृष्णस्यसचराचरम् १३५ इंद्रियाणिमनोबुद्धिःसत्वंतेजोबलंधृतिः वासुदे
वात्मकान्याहुःक्षेत्रंक्षेत्रज्ञमेवच ३६ सर्वागमानामाचारःप्रथमंपरिकल्पते आचारःप्रथमोधर्मोधर्मस्यप्रभुरच्युतः १३७ ऋ
षयःपितरोदेवामहाभूतानिधातवः जंगमाजंगमंचेदंजगन्नारायणोद्भवम् ३८ योगोज्ञानंतथासांख्यंविद्याशिल्पादिकर्मच वे
दाःशास्त्राणिविज्ञानमेतत्सर्वंजनार्दनात् १३९ एकोविष्णुर्महद्भूतंपृथग्भूतान्यनेकशः त्रींल्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुग
व्ययः १४० इमंस्तवंभगवतोविष्णोर्व्यासेनकीर्त्तितम् पठेद्यइच्छेत्पुरुषःश्रेयःप्राप्तुंसुखानिच १४१ विश्वेश्वरमजंदेवंज
गतःप्रभवाप्ययम् भजंतियेपुष्कराक्षंनतेयांतिपराभवम् १४२ अर्जुनउवाच पद्मपत्रविशालाक्षपद्मनाभसुरोत्तम
भक्तानामनुरक्तानांत्राताभवजनार्दन १४३ श्रीभगवानुवाच योमांनामसहस्रेणस्तोतुमिच्छतिपांडव सोह
मेकेनश्लोकेनस्तुतएवनसंशयः १४४ नमोस्त्वनंतायसहस्रमूर्त्तयेसहस्रपादाक्षिशिरोरुबाहवे सहस्रनाम्नेपुरुषायशाश्व
तेसहस्रकोटीयुगधारिणेनमः १४५ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांआनुशासनिकेपर्वणिदानधर्मे
विष्णुसहस्रनामरूपःशतोपरिएकोनचत्वारिंशोऽध्यायः १४९

१४२ १४३ १४४ १४५ इतिश्रीमन्महाभारतेआनुशासनिकेपर्वणिटीकायांशतोपरिएकोनचत्वारिंशोऽध्यायः १४९ ७ ७ ७

श्रीगणेशायनमः अथगजेंद्रमोक्षप्रारंभः शतानीकउवाच मयाहिदेवदेवस्यविष्णोरमिततेजसः श्रुताःसंभूतयःसर्वागदतः
स्तवस्फुवत १ यदिप्रसन्नोभगवाननुग्राह्योस्मितेयदि तदहंश्रोतुमिच्छामिनृणांदुःस्वप्ननाशनम् २ स्वप्नादिषुमहाभागदृश्यंतेयेशु
भाशुभाः फलानिचप्रयच्छंतितद्गुणान्येवभार्गव ३ तादृक्पुण्यंपवित्रंचनृणामतिशुभप्रदम् दुःस्वप्नोपशमनंतन्मेविस्तरतोवद ४
शौनकउवाच इदमेवमहाभागपृष्टवांस्थपितामहम् भीष्मंधर्मभृतांश्रेष्ठंधर्मपुत्रोयुधिष्ठिरः ५ भीष्मउवाच जितंतेपुंडरीका
क्षनमस्तेविश्वभावन नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज ६ आद्यंपुरुषमीशानंपुरुहूतंपुरातनम् ऋतमेकाक्षरंब्रह्मव्यक्ताव्यक्तंसनातन
नम् ७ असच्चासच्चयद्विश्वंनित्यंसदसतःपरम् परंपराणांपरमंपुराणंपरमव्ययम् ८ मंगल्यंमंगलंविष्णुंवरेण्यमनघंशुचिम् नमस्कृत्य
हृषीकेशंचराचरगुरुंहरिम् ९ प्रवक्ष्यामिमहापुण्यंकृष्णद्वैपायनस्यच येनोक्तेनश्रुतेनापिनश्यतेसर्वपातकम् १० नारायणसमोदेवोनभू
तोनभविष्यति एतेनसत्यवाक्येनसर्वार्थान्साधयाम्यहम् ११ किंतस्यबहुभिर्मंत्रैःकिंतस्यबहुभिर्व्रतैः नमोनारायणायेतिमंत्रःसर्वार्थसा
धकः १२ जज्ञेबहुंजंपरमत्स्यदारंयंद्वीपमध्येसुतमात्मवंतम् पराशराद्गंधवतीमहर्षेस्तस्मैनमोज्ञानतमोनुदाय १३ नमोभगवतेतस्मैव्या
सायामिततेजसे यस्यप्रसादाद्वक्ष्यामिनारायणकथामिमाम् १४ वैशंपायनमासीनंपुराणोक्तिविचक्षणम् इममर्थंसराजर्षिःपृष्टवाञ्ज
नमेजयः १५ जनमेजयउवाच किंजपन्मुच्यतेपापात्किंजपन्स्मरयमश्नुते दुःस्वप्ननाशनंपुण्यंश्रोतुमिच्छामिमानद १६ वैशंपा
यनउवाच एवमेवपुराप्रश्नंपृष्टवांस्तेपितामहः भीष्मंदेवव्रतिनांश्रेष्ठंतंचाहंकथयामिते १७ देवव्रतंमहाप्राज्ञंसर्वशास्त्रविशारदम् वि
नयेनोपसंगम्यपर्यपृच्छद्युधिष्ठिरः १८ युधिष्ठिरउवाच दुःस्वप्ननाशनंघोरमवेक्ष्यभरतर्षभ प्रयतःकिंजपेज्ज्ञात्वाविबुधर्षकिमनु
स्मरेत् १९ यस्यकुर्यान्नमस्कारंप्रातरुत्थायमानवः किंवाध्यायेतसततंकिंपूज्यंवाभवेत्सदा २० पितामहप्रसादेनबुद्धिभेदोभवेन्मम त
दहंश्रोतुमिच्छामिब्रूहिनोवदतांवर २१ भीष्मउवाच शृणुराजन्महाबाहोकथयिष्यामिशांतिकम् दुःस्वप्नदर्शनेजाप्यंयदैनित्यं
समाहितैः २२ अत्राप्युदाहरंतीममितिहासंपुरातनम् गजेंद्रमोक्षणंचैवकृष्णस्याद्भुतकर्मणः २३ सर्वरत्नमयःश्रीमान्त्रिकूटोनामप
र्वतः सुतःपर्वतराजस्यसुमेरोर्भास्करद्युतेः २४

क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः २५ अप्सरोभिः परिवृतः श्रीमत्प्रस्रवणाकुलः गंधर्वैः
किन्नरैर्यक्षैः सिद्धचारणपन्नगैः २६ मृगैः सिंहैर्गजेंद्रैश्च वृतगात्रो विराजते पुन्नागैः कर्णिकारैश्च स्फाबिल्वैर्दिव्यपाटलैः २७ चूतनिंबक
दंबैश्च चंदनागरुचंपकैः शालैस्तालैस्तमालैश्च तरुभिश्चार्जुनैस्तथा २८ बकुलैः कुंदपुष्पैश्च सरलैर्देवदारुभिः मंदारकुसुमैश्चान्यैः पारि
जातैश्च सर्वशः २९ एवं बहुविधैर्वृक्षैः सर्वतः समलंकृतः नानाधात्वंकितैः शृंगैः प्रस्रवद्भिः समंततः ३० शोभितो रुचिरप्रख्यैस्त्रिभिर्विस्तीर्ण
सानुभिः मृगैः शाखामृगैः सिंहैर्मातंगैश्च सदामदैः ३१ जीवंजीवकसंघुष्टं चकोरशिखिनादितम् तस्यैकं कांचनं शृंगं सेव्यते यद्दिवाकरः
३२ नानापुष्पसमाकीर्णं नानाशृंगैः समाकुलम् द्वितीयं राजतं शृंगं सेव्यते यन्निशाकरः ३३ पांडराबुदसंकाशं तुषाराचलसन्निभम् वज्रे
द्रनीलवैडूर्यतेजोभिर्भासयन्नभः ३४ तृतीयं ब्रह्मसदनं प्रकृष्टं शृंगमुत्तमम् पद्मरागसमप्रख्यं तारागणसमन्वितम् ३५ नैतत्कृतघ्नाः प
श्यंति न नृशंसा न नास्तिकाः नातप्ततपसो लोके ये च पापकृतो जनाः ३६ नानाराधितगोविंदाः शैलं पश्यंति ते नराः तस्य सानुमतः पृष्ठे सरः
कांचनपंकजम् ३७ कारंडवसमाकीर्णं राजहंसोपशोभितम् मत्तभ्रमरसंघुष्टं चकोरशिखिनादितम् ३८ कमलोत्पलकह्लारपुंडरी
कोपशोभितम् कुमुदैः शतपत्रैश्च कांचनैः समलंकृतम् ३९ पत्रैर्मरकतप्रख्यैः पुष्पैः कांचनसन्निभैः गुल्मैः कीचकवेणूनां समंतात्परि
वारितम् ४० अत्यद्भुतमहास्थानं विचित्रशिखराकुलम् शतयोजनविस्तीर्णं दशयोजनमायतम् ४१ पंचयोजनमूर्धानं सरः प्रमाण
तः हिमखंडोदकं राजन्स्वादमृतोपमम् ४२ त्रैलोक्ये दृष्टपूर्वं च यत्तत्सरमनुत्तमम् सुप्रसन्नं सरो दिव्यं देवानामपि दुर्लभम् ४३
ख्यातेन हि गुणं प्रोक्तं शरद्द्यौरिव निर्मलम् उपहाराय देवानां सिद्धाद्यर्चितपंकजम् ४४ तस्मिन्सरसि दुष्टात्मा विरूपोंतर्जलाशयः आ
सीद्ग्राहो गजेंद्राणां दुराधर्षो महाबलः ४५ अथ दंतोज्ज्वलमुखः कदाचिद्गजयूथपः आजगाम तृषाक्रांतः करेणुपरिवारितः ४६ मदस्रा
वीजलाकांक्षी पादचारीव पर्वतः वासयन्मदगंधेन महानैरावतोपमः ४७ गजो ह्यंजनसंकाशो मदाच्चलितलोचनः तृषितः पानकामो य
मवतीर्णश्च तत्सरः ४८ पिबतस्तस्य तत्तोयं ग्राहश्च समपद्यत स लीनः पंकजवने यूथमध्यगतः करी ४९ गृहीतस्तेन रौद्रेण ग्राहेणातिबली
यसा पश्यंतीनां करेणूनां क्रोशंतीनां सुदारुणम् ५० १८३

५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३

नीयतेपंकजवनेग्राहेणाव्यक्तमूर्त्तिना गजोप्याकर्षतेतीरंग्राहस्त्वाकर्षतेजलम् ५१ तयोर्युद्धंमहाघोरंदिव्यवर्षसहस्रकम् वारुणैः
संयुतःपाशैर्निष्प्रयत्नगतिःकृतः ५२ वेष्ट्यमानस्सघोरैस्तुपाशैर्नाग दृढैस्तथा विस्फूर्जितमहाशक्तिर्विक्रोशन्समहारवान् ५३ व्यथि
तःसनिरुत्साहोगृहीतोघोरकर्मणा परमापदमापन्नोमनसाचिंतयद्धरिम् ५४ सतुनागवरःश्रीमान्नारायणपरायणः तमेवशरणंदेवंग
तःसर्वात्मनातदा ५५ एकाग्रोनिगृह्यात्माविशुद्धेनांतरात्मना नैकजन्मांतराभ्यासाद्भक्तिमान्गरुडध्वजे ५६ नान्यंदेवंमहादेवात्पूज
यामासकेशवात् दिग्बाहुंसर्गमूर्धानंभूःपादंगगनोदरम् ५७ आदित्यचंद्रनयनमनंतंविश्वतोमुखम् भूतात्मानंचमेघाभंशंखच
क्रगदाधरम् ५८ सहस्रशुभनामानमादिदेवमजंविभुम् संगृह्यपुष्कराग्रेणकांचनंकमलोत्तमम् ५९ निवेद्यमनसाध्यात्वापूजांकृत्वा
जनार्दनं आपद्विमोक्षमन्विच्छन्गजःस्तोत्रमुदीरयत् ६० गजेंद्रउवाच नमोमूलप्रकृतयेअजितायमहात्मने अनाश्रयायदे
वायनिस्पृहायनमोनमः ६१ नमआद्यायबीजायआर्षेयायप्रवर्तिने अनंतायचनैकायअव्यक्तायनमोनमः ६२ नमोगुह्यायगूढायगु
णायगुणधर्मिणे अतर्क्यायाप्रमेयायअतुलायनमोनमः ६३ नमःशिवायशांतायनिश्चयायायशस्विने सनातनायपूर्वायपुराणायनमो
नमः ६४ नमोजगत्प्रतिष्ठायगोविंदायनमोनमः नमोदेवाधिदेवायस्वभावायनमोनमः ६५ नमोस्तुपद्मनाभायसांख्ययोगोद्भवायच वि
श्वेश्वरायदेवायशिवायहरयेनमः ६६ नमोस्तुतस्मैदेवायनिर्गुणायगुणात्मने नारायणायदेवायदेवानांपतयेनमः ६७ नमोनमःका
रणवामनायनारायणायामितविक्रमाय श्रीशार्ङ्गचक्रासिगदाधरायनमोस्तुतस्मैपुरुषोत्तमाय ६८ गुह्यायवेदनिलयायमहोदराय
सिंहायदैत्यनिधनायचतुर्भुजाय ब्रह्मेंद्ररुद्रमुनिचारणसंस्तुतायदेवोत्तमायवरदायनमोच्युताय ६९ नागेंद्रभोगशयनायनमःप्रिया
यगोक्षीरहेमशुकनीलघनोपमाय पीतांबरायमधुकैटभनाशनायविश्वायचारुमुकुटायनमोक्षराय ७० नाभिप्रजातकमलासनसंस्त
तायक्षीरोदकार्णवनिकेतयशोधराय नानाविचित्रमुकुटांगदभूषणायसर्वेश्वरायविरजायनमोवराय ७१ भक्तिप्रियायवरदीप्तसुद
र्शनायफुल्लारविंदविपुलायतलोचनाय देवेंद्रविघ्नशमनोद्यतपौरुषायनारायणायवरदायनमोच्युताय ७२ नारायणायपरलोकपराय
णायकालायकालकमलायतलोचनाय रामायरावणविनाशकृतोद्यमायधरायधरातिलकायनमोवराय ७३

६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७ ७

पद्मासनायमणिकुंडलभूषणायकंसांतकायशिशुपालविनाशनाय गोवर्धनायसुरशत्रुनिकृंतनायदामोदरायविरजायनमोवराय ७४
ब्रह्मायनायत्रिदशायनायलोकैकनाथायहितात्मकाय नारायणायार्तिविनाशनायमहावराहायनमस्करोमि ७५ कूटस्थमव्यक्तमचिं
त्यरूपंनारायणंकारणमादिदेवम् युगांतशेषंपुरुषंपुराणंतंवासुदेवंशरणंप्रपद्ये ७६ अदृश्यमच्छेद्यमनंतमव्ययंमहर्षयोब्रह्ममयंस
नातनम् वदंतियंवैपुरुषंपुरातनंतंवासुदेवंशरणंप्रपद्ये ७७ उत्तिष्ठतस्तस्यजलोरुकुक्षेर्महावराहस्यमहींविदार्य विधुन्वतोवेदमयंश
रीरंलोकांतरस्थामुनयोगृणंति ७८ योगेश्वरंचारुविचित्रमौलिंज्ञेयंसमस्तप्रकृतेःपरस्थम् क्षेत्रज्ञमात्मप्रवरंवरेण्यंतंवासुदेवंशरणंप्रप
द्ये ७९ किरीटकेयूरमहार्हनिष्कैर्मण्युत्तमालंकृतसर्वगात्रम् पीतांबरंकांचनचित्रनद्धमालाधरंकेशवमभ्युपैमि ८० कार्यंक्रियाकारणमप्र
मेयंहिरण्यबाहुंवरपद्मनाभम् महाबलंवेदनिधिंसुरोत्तमंतंवासुदेवंशरणंप्रपद्ये ८१ भूर्वाङ्मयंवेदविदांवरिष्ठंयोगात्मकंसांख्यविदांव
रिष्ठम् आदित्यचंद्राग्निवसुप्रभावंप्रभुंप्रपद्येच्युतमात्मवंतम् ८२ यदक्षरंब्रह्मवदंतिसर्वगंनिशम्ययंमृत्युमुखात्प्रमुच्यते तमीश्वरंतृप्त
मनुत्तमैर्गुणैःसनातनंलोकगुरुंनमामि ८३ नमस्तस्मैवराहायलीलयोद्धरतेमहीम् खुरमध्यगतोयस्यमेरुःखुरखुरायते ८४ श्रीवत्सां
कंमहादेवंदेवगुह्यमनूपमम् प्रपद्येसूक्ष्ममचलंवरेण्यमभयप्रदम् ८५ प्रभवंसर्वभूतानांनिर्गुणंपरमेश्वरम् प्रपद्येमुक्तसंगानांयतीनां
परमांगतिम् ८६ भगवंतंगुणाध्यक्षमक्षरंपरमंपदम् शरण्यंशरणंभक्त्याप्रपद्येभक्तवत्सलम् ८७ त्रिविक्रमंत्रिलोकेशंसर्वेषांप्रपिता
महम् योगात्मानंमहात्मानंप्रपद्येहंजनार्दनम् ८८ आदिदेवमजंविष्णुंव्यक्ताव्यक्तंसनातनम् नारायणमणीयांसंप्रपद्येब्राह्मणप्रियम्
८९ अकूपारायदेवायनमःसर्वमहाद्युते प्रपद्येदेवदेवेशमणीयांसमणोःसदा ९० एकायलोकनाथायपरतःपरमात्मने नमःसहस्रशि
रसेअनंतायनमोनमः ९१ तमेवपरमंदेवमृषयोवेदपारगाः कीर्तयंतिचसर्वेवैब्रह्मादीनांपरायणम् ९२ नमस्तेपुंडरीकाक्षभक्तानाम
भयंकर सुब्रह्मण्यनमस्तेस्तुत्राहिमांशरणागतम् ९३ तावद्भवनिमेदुःखचिंतासंसारसागरे यावत्कमलपत्राक्षंनस्मरामिजनार्दनम्
९४ भीष्मउवाच भक्तिंतस्यानुसंचिंत्यनागस्यामोघसंस्तवान् प्रीतिमानभवद्राजन्मुख्यश्चक्रगदाधरः ९५ आरुह्यगरुडंविष्णुरा
जगामसुरोत्तमः सांनिध्यंकल्पयामासतस्मिन्सरसिलोककृत् ९६

९७ ९८ ९९ १०० १०१ १०२ १०३ १०४ १०५ १०६ १०७ १०८ १०९ ११०

ग्राहग्रस्तंगजेंद्रंचतंग्राहंचजलाशयात् उज्जहाराप्रमेयात्मातरसामधुसूदनः ९७ जलस्थंदारयामासग्राहंचक्रेणमाधवः मोचयामा
सनागेंद्रंपाशेभ्यःशरणागतम् ९८ सहिदेवलशापेनहूहूर्गंधर्वसत्तमः इदमप्यपरंगुह्यंराजन्पुण्यतमंशृणु ९९ युधिष्ठिरउवाच
कथंशापोभवत्तावद्गंधर्वस्यमहात्मनः एतदिच्छाम्यहंश्रोतुंविस्तरेणपितामह १०० भीष्मउवाच यथातौशापितौतेनदेवलेनम
हात्मना हाहाहूहूरितिख्यातौगीतवाद्यविशारदौ १०१ उर्वशीमेनकारंभातथान्येचाप्सरोगणाः शक्रस्यपुरतोराजन्नृत्यंतेताःक्रमध्य
माः १०२ ततस्तौगायमानौगंधर्वौराजसद्मनि अन्योन्यंचक्रतुःस्पर्द्धांशक्रस्यपुरतःस्थितौ ३ आवयोरुभयोर्मध्येयःश्रेष्ठोगीतवाद्य
योः तंवदस्वसुरश्रेष्ठज्ञात्वागीतस्यलक्षणम् ४ गंधर्वयोर्वचःश्रुत्वाप्रत्युवाचशतक्रतुः युवयोर्गीतवाद्येषुविशेषोनोपलभ्यते ५ एकाग्र
श्चमुनिःश्रेष्ठोदेवलोनामनामतः युवयोःसंशयच्छेत्ताभविष्यतिनसंशयः ६ ततस्तुतौशक्रवचोनिशम्यप्रणम्यराजन्शिरसासुरोत्तमम्
गतौस्तुतद्धौजयकांक्षिणौतौयत्राश्रमेतिष्ठतिसद्विजाग्र्यः ७ ततोदृष्ट्वामुनिश्रेष्ठंदेवलंशंसितव्रतम् अभिवाद्यमहात्मानमूचतुःपार्श्व
संस्थितौ ८ शक्रेणप्रेषितौदेवत्वत्समीपेद्विजोत्तम एकस्यनौजयंदेहियत्तेमनसिवर्त्तते ९ पृथक्स्वरंतौगायंतौमधुरंमधुराक्षरम् न
किंचिद्वदतेवाक्यंमुनिर्मौनस्यधारणात् १० शृण्वन्नपिपदंतेषांनकिंचिद्वदतेमुनिः तदातौकुपितौतस्यदेवलस्यमहात्मनः ११ ऊचतु
स्तौतदावाक्यंगंधर्वौकालनोदितौ मूढोयंनाभिजानातिनिश्चयंगीतवाद्ययोः १२ निशम्यतद्वचस्तेषांगंधर्वाणांमदान्वितम् क्रोधादुत्था
यविप्रेंद्रइदंवचनमब्रवीत् १३ एषहूहूर्दुरात्मातुग्राहत्वंयातुमूढधीः त्वमेवगंजगजस्तुभवस्वगिरिगह्वरे १४ एवंशापंददौक्रुद्धोदेव
लःसुमहातपाः ततस्तौशापितौतेनदेवलेनमहात्मना १५ प्रणम्यशिरसाविप्रंगंधर्वाविदमूचतुः भूमंडलगतौस्यावप्रसादंकुरुष्व
नौ प्रभो १६ निश्चयंकुरुविप्रेंद्रयेनशापाद्विमुच्यते ततस्तौपुरुषौदृष्ट्वाछ्रोशापभयाद्दितौ १७ प्रेक्ष्यवाचमुनिःश्रेष्ठोगंधर्वाणाभयापहम्
मेरुपृष्ठेसरोरम्यंबहुवृक्षसमाकुलम् १८ नानापक्षिगणाढ्यंचाहूतीयइवसागरः तस्मिन्सरोवरेरम्येयहोनित्यंभविष्यति १९ तृषा
तस्तत्रमातंगोगमिष्यतिनगोत्तमात् तयोर्मध्येमहद्युद्धंभविष्यतिसुदारुणम् २० ग्राहेणाकृष्यमाणस्तुगजस्तोषंकरिष्यति तदेव
देवदेवेशस्तुष्यतेनात्रसंशयः २१

१११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

२२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

ततोनारायणःप्रीतः शापात्त्वांमोचयिष्यति इत्युक्त्वाऋषिणातेनवरेणैतौप्रमोदितौ २२ ग्राहत्वमगमत्सोथवधंप्राप्यदिवंगतः
अपहिसुक्तोयुगपद्गजोगंधर्वएवच २३ गजोऽपिमुक्ततांयातःश्रीकृष्णेनविमोक्षितः तस्माच्छापाद्विनिर्मुक्तोगजोगंधर्वएवच २४
तौचस्वंस्वंवपुःप्राप्यप्रणिपत्यजनार्दनम् गजोगंधर्वराजश्चपरांनिर्वृतिमागतौ २५ प्रीतिमान्पुंडरीकाक्षःशरणागतवत्सलः अभव
द्देवदेवेशस्ताभ्यांचैवप्रपूजितः २६ भजंतंगजराजानमवदन्मधुसूदनः श्रीभगवानुवाच येमांत्वांचसरश्चैवग्राहस्यचविदारण
म् २७ गुल्मकीचकवेणूनांतचशैलवरंतथा प्रभासंभास्करंगंगांनैमिषारण्यपुष्करम् २८ प्रयागंब्रह्मतीर्थंचदंडकारण्यमेवच ये
स्मरिष्यंतिमनुजाःप्रयताःस्थिरबुद्धयः २९ दुःस्वप्नोनश्यतेतेषांसुस्वप्नश्चभविष्यति अनिरुद्धंगजंग्राहंवासुदेवंमहाद्युतिम् ३०
संकर्षणंमहात्मानंप्रद्युम्नंचतथैवच मत्स्यंकूर्मंवराहंचवामनंतार्क्ष्यमेवच ३१ नारसिंहंचनागेंद्रंसृष्टिप्रलयकारकम् विश्वरूपंहृषी
केशंगोविंदंमधुसूदनम् ३२ सहस्राक्षंचतुर्बाहुंमुरारिंगरुडध्वजम् त्रिदशंवंदितंदेवंहृदभक्तिमनुत्तमम् ३३ वैकुंठंदुष्टदमनंमु
क्तिदंमधुसूदनम् एतानिप्रातरुत्थायसंस्मरिष्यंतियेनराः ३४ सर्वपापैःप्रमुच्यंतेविष्णुलोकमवाप्नुयुः भीष्मउवाच एवमु
क्त्वामहाराजराजेंद्रंमधुसूदनः ३५ स्पर्शयामासहस्तेनगजंगंधर्वमेवच तौचस्पृष्टौततःसद्योदिव्यमाल्यांबरावुभौ ३६ तमेवमनसा
प्राप्यजग्मतुस्त्रिदशालयम् ततोदिव्यवपुर्भूत्वाहस्तिराट्परमंपदम् ३७ गच्छतिस्ममहाबाहोनारायणपरायणः ततोनारायणः
श्रीमान्मोचयित्वागजोत्तमम् ३८ ऋषिभिःस्तूयमानोथवेदगुह्यपराक्षरैः ततःसभगवान्विष्णुर्दुर्विज्ञेयगतिःप्रभुः ३९ शंख-
चक्रगदापाणिरंतर्धानंसमाविशत् वैशंपायनउवाच गजेंद्रमोक्षणंश्रुत्वाकुंतीपुत्रोयुधिष्ठिरः ४० भ्रातृभिःसहितःस
म्यक्ब्राह्मणैर्वेदपारगैः पूजयामासदेवेशंपार्श्वस्थंमधुसूदनम् ४१ विस्मयोत्फुल्लनयनःश्रुत्वानागस्यमोक्षणम् ऋषयश्चमहा
भागाःसर्वेप्रांजलयःस्थिताः ४२ अजंवरेण्यंवरपद्मनाभंमहाबलंवेदनिधिंसुरोत्तमम् तंवेदगुह्यंपुरुषंपुराणंववंदिरेवेदवि
दांवरिष्ठम् ४३ एतत्पुण्यंमहाबाहोनराणांपुण्यकर्मणाम् दुःस्वप्नदर्शनंघोरंश्रुत्वापापैःप्रमुच्यते ४४ तस्मात्त्वंहिमहाराजप्रपद्यशरणंहरि
म् विमुक्तःसर्वपापेभ्यःप्राप्स्यसेपरमंपदम् ४५

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ६९

यदामहाग्राहगृहीतकातरंक्षुधितेपद्मवनेमहाद्विपम् विमोक्षयामासगजंजनार्दनोदुःस्वप्ननाशंचकरोतुदयंसदा ४६ परंपराणां
परमपवित्रंपरेशमीशंसुरलोकनाथम् सुरासुरैरर्चितपादपद्मंसनातनंलोकगुरुंनमामि ४७ वरगजस्मरणाद्धिमुक्तिहेतुंपुरुषवरं
स्तुतिदिव्यदेहगीतम् सततमपिपठंतियेतुतेषामभिहितमरणांतककिल्बिषापहःस्यात् ४८ धर्मद्रुदःस्मृतिबद्धमूलोवेदस्कंधःपुराण
शाखाढ्यः क्रतुकुसुमोमोक्षफलोमधुसूदनपादपोजयति ४९ नमोब्रह्मण्यदेवायगोब्राह्मणहितायच जगद्धितायकृष्णायगोविंदायन
मोनमः ५० आकाशात्पतितंतोयंयथागच्छतिसागरम् सर्वदेवनमस्कारःकेशवंप्रतिगच्छति १५१ इतिश्रीमहाभारतेआनुशास-
निकेशांतिपर्वणिदानधर्मेगजेंद्रमोक्षणंशततोपरिपंचाशत्तमोऽध्यायः १५० युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशार
द किंजप्यंजपतोनित्यंभवेद्धर्मफलंमहत् १ प्रस्थानेवाप्रवेशेवाप्रवृत्तेवापिकर्मणि दैवेवाश्राद्धकालेवाकिंजप्यंकर्मसाधनम् २ शांति
कंपौष्टिकंरक्षाशत्रुघ्नंभयनाशनम् जप्यंयद्ब्रह्मसमितंतद्भवान्वक्तुमर्हति ३ भीष्मउवाच व्यासप्रोक्तमिमंमंत्रंशृणुष्वैकमना
नृप सावित्र्याविहितंदिव्यंसद्यःपापविमोचनम् ४ शृणुमंत्रविधिंकृत्स्नंप्रोच्यमानंमयानघ यंश्रुत्वापांडवश्रेष्ठसर्वपापैःप्रमुच्यते ५ रात्रावह
र्निधर्मज्ञजपन्पापैर्नलिप्यते तत्तेहंसंप्रवक्ष्यामिशृणुष्वैकमनानृप ६ आयुष्मान्भवतेचैवयंश्रुत्वापार्थिवात्मज पुरुषस्तुसुसिद्धार्थःप्रे
त्यचेहचमोदते ७ सेवितंसततंराजन्पुराराजर्षिसत्तमैः क्षत्रधर्मपरैर्नित्यंसत्यव्रतपरायणैः ८ इदमाह्निकमव्यग्रंकुर्वद्भिर्नियतैःसदा
नृपैर्भरतशार्दूलप्राप्यतेश्रीरनुत्तमा ९ नमोवसिष्ठायमहाव्रतायपराशरंवेदनिधिंप्रणम्य नमोस्त्वनंतायमहोरगायनमोस्तुसिद्धेभ्य
इहाक्षयेभ्यः १० नमोस्त्वृषिभ्यःपरमंपरेषांदेवेषुदेवंवरदंवराणाम् सहस्रशीर्षायनमःशिवायसहस्रनामायजनार्दनाय ११ अजैकपा
दहिर्बुध्न्यःपिनाकीचापराजितः ऋतश्चपितृरूपश्चत्र्यंबकश्चमहेश्वरः १२ वृषाकपिश्चशंभुश्चहवनोथेश्वरस्तथा एकादशैतेप्रथिता
रुद्रास्त्रिभुवनेश्वराः १३ शतमेतत्समाम्नातंशतरुद्रेमहात्मनाम् अंशोभागश्चमित्रश्चवरुणश्चजलेश्वरः १४ तथाधातार्यमाचैवज
यंतोभास्करस्तथा त्वष्टापूषातथैवेंद्रोद्वादशोविष्णुरुच्यते १५ इत्येतेद्वादशादित्याःकाश्यपेयाइतिश्रुतिः धरोध्रुवश्चसोमश्चसावित्रो
ऽथानिलोनलः १६

१३ संज्ञायाः अश्वरूपाया नासतः नासिकायाःसकाशात्विनिर्गतौ १८ १९ २० २१ २२ २३ २४ २५ २६

प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्त्तिताः नासत्यश्चापिदस्रश्चस्मृतौद्वावश्विनावपि १७ मार्त्तंडस्यात्मजावेतौसंज्ञानासाविनिर्गतौ अतःप
रंप्रवक्ष्यामिलोकानांकर्मसाक्षिणः १८ अपियज्ञस्यवेत्तारोदत्तस्यसुकृतस्यच अदृश्याःसर्वभूतेषुपश्यंतित्रिदशेश्वराः १९ शुभाशुभानिस्व
र्वाणिमृत्युःकालश्चसर्वशः विश्वेदेवाःपितृगणामूर्त्तिमंतस्तपोधनाः २० मुनयश्चैवसिद्धाश्चतपोमोक्षपरायणाः शुचिस्मिताःकीर्त्तयतांप्रय
च्छंतिशुभंनृणाम् प्रजापतिकृतानेतान्लोकान्दिव्येनतेजसा २१ वसंतिसर्वलोकेषुप्रयताःसर्वकर्मसु प्राणानामीश्वरानेतान्कीर्त्तयन्प्रयतोन
रः २२ धर्मार्थकामैर्विपुलैर्युज्यतेसहनित्यशः लोकांश्चलभतेपुण्यान्विश्वेश्वरकृतांछुभान् २३ एतेदेवास्त्रयस्त्रिंशत्सर्वभूतगण-
श्वराः नंदीश्वरोमहाकायोग्रामणीर्वृषभध्वजः २४ ईश्वराःसर्वलोकानांगणेश्वरविनायकाः सौम्यारौद्रागणाश्चैवयोगभूतगणास्तथा
२५ ज्योतींषिसरितोव्योमसुपर्णःपन्नगेश्वरः पृथिव्यांतपसासिद्धाःस्थावराश्चचराश्चह २६ हिमवान्गिरयःसर्वेचत्वारश्चमहार्ण
वाः भवस्यानुचराश्चैवहरतुल्यपराक्रमाः २७ विष्णुर्देवोथजिष्णुश्चस्कंदश्चांबिकयासह कीर्त्तयन्प्रयतःसर्वान्सर्वपापैःप्रमुच्यते २८
अतऊर्ध्वंप्रवक्ष्यामिमानवानृषिसत्तमान् यवक्रीतश्चरैभ्यश्चअर्वावसुपरावसू २९ औशिजश्चैवकक्षीवान्बलश्चांगिरसःसुतः ऋषि
र्मेधातिथिःपुत्रःकण्वोबर्हिषदस्तथा ३० ब्रह्मतेजोमयाःसर्वेकीर्त्तितालोकभावनाः लभंतेहिशुभंसर्वेरुद्रानलवसुप्रभाः ३१ भुविकृत्वा
शुभंकर्ममोदंतेदिविदेवताः महेंद्रगुरवःसप्तप्राच्यांवैदिशमाश्रिताः ३२ प्रयतःकीर्त्तयेदेतान्शक्रलोकेमहीयते उन्मुचुःप्रमुचुश्चैवस्व
स्त्यात्रेयश्चवीर्यवान् ३३ दृढव्यश्चोर्ध्वबाहुश्चतृणसोमांगिरस्तथा मित्रावरुणयोःपुत्रस्तथागस्त्यःप्रतापवान् ३४ धर्मराजर्त्विजःसप्त
दक्षिणांदिशमाश्रिताः दृढेयुश्चऋतेयुश्चपरिव्याधश्चकीर्त्तिमान् ३५ एकतश्चद्वितश्चैवत्रितश्चादित्यसन्निभाः अत्रेःपुत्रश्चधर्मा-
त्मांऋषिःसारस्वतस्तथा ३६ वरुणस्यर्त्विजःसप्तपश्चिमांदिशमाश्रिताः अत्रिर्वसिष्ठोभगवान्कश्यपश्चमहानृषिः ३७ गौतमश्चभर-
द्वाजोविश्वामित्रोथकौशिकः ऋचीकतनयश्चोग्रोजमदग्निःप्रतापवान् ३८ धनेश्वरस्यगुरवःसप्तैतेउत्तराश्रिताः अपरेमुनयःसप्तदि
क्षुसर्वास्वधिष्ठिताः ३९ कीर्त्तिस्वस्तिकरानृणांकीर्त्तितालोकभावनाः धर्मःकामश्चकालश्चवसुर्वासुकिरेवच ४०

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४०

४१ ४२ ४३ ४४ ; ४५ ४६ ४७ ४८ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

अनंतःकपिलश्चैवसप्तैतेधरणीधराः रामोव्यासस्तथाद्रौणिरश्वत्थामाचलोमशः ४१ इत्येतेमुनयोदिव्याएकैकःसप्तसप्तधा शां
तिस्वस्तिकरालोकेदिशापालाःप्रकीर्त्तिताः ४२ यस्यांयस्यांदिशिह्येतेतन्मुखःशरणंव्रजेत् स्रष्टारःसर्वभूतानांकीर्त्तितालोकपावनाः ४३
संवर्त्तोमेरुसावर्णोमार्कंडेयश्चधार्मिकः सांख्ययोगौनारदश्चदुर्वासाश्चमहानृषिः ४४ अत्यंततपसोदांतास्त्रिषुलोकेषुविश्रुताः
अपरेरुद्रसंकाशाःकीर्त्तिताःब्रह्मलौकिकाः ४५ अपुत्रोलभतेपुत्रंदरिद्रोलभतेधनम् तथाधर्मार्थकामेषुसिद्धिंचलभतेनरः ४६
पृथुंवैन्यंनृपवरंपृथ्वीयस्याभवत्सुता प्रजापतिंसार्वभौमंकीर्त्तयेद्वसुधाधिपम् ४७ आदित्यवंशप्रभवंमहेंद्रसमविक्रमम् पुरू
रवसमैलंचत्रिषुलोकेषुविश्रुतम् ४८ बुधस्यदयितंपुत्रंकीर्त्तयेद्वसुधाधिपम् त्रिलोकविश्रुतंवीरंभरतंचप्रकीर्त्तयेत् ४९ गवा
मयेनयज्ञेनयेनेष्टंवैकृतेयुगे रंतिदेवंमहादेवंकीर्त्तयेत्परमद्युतिम् ५० विश्वजित्तपसोपेतंलक्षण्यंलोकमंगलम् तथाश्वेतंचरा-
जर्षिंकीर्त्तयेत्परमद्युतिम् ५१ सगरस्यात्मजायेनप्लाविताःस्तारितास्तथा हुताशनसमानेतान्महारूपान्महौजसः ५२ उग्रकायान्म
हासत्वान्कीर्त्तयेत्कीर्त्तिवर्द्धनान् देवानृषिगणांश्चैवनृपांश्चजगतीश्वरान् ५३ सांख्ययोगंचपरमंहव्यकव्यंतथैवच कीर्त्तितंपर-
मंब्रह्मसर्वश्रुतिपरायणम् ५४ मंगल्यंसर्वभूतानांपवित्रंबहुकीर्त्तितम् व्याधिप्रशमनंश्रेष्ठंपौष्टिकंसर्वकर्मणाम् ५४ प्रयतःकी
र्त्तयेच्चैतान्कल्यंसायंचभारत एतेवैयांतिवर्षंतिभांतिवांतिसृजंतिच ५५ एतेविनायकाःश्रेष्ठा दक्षाःक्षांताजितेंद्रियाः नराणामशु
भंसर्वेव्यपोहंतिप्रकीर्त्तिताः ५६ साक्षिभूतामहात्मानःपापस्यसुकृतस्यच एतान्वैकल्यमुत्थायकीर्त्तयन्शुभमश्नुते ५७ नाग्निचौ
रभयंतस्यनमार्गप्रतिरोधनम् एतान्कीर्त्तयतांनित्यंदुःस्वप्नोनश्यतेनृणाम् ५८ मुच्यतेसर्वपापेभ्यःस्वस्तिमांश्चगृहंव्रजेत् दीक्षाका
लेषुसर्वेषुयःपठेन्नियतोद्विजः ५९ न्यायवानात्मनिरतःक्षांतोदांतोनसूयकः रोगार्त्तोव्याधियुक्तोवापठन्पापात्प्रमुच्यते ६० वा-
स्तुमध्येतुपठतःकुलेस्वस्त्ययनंभवेत् क्षेत्रमध्येतुपठतःसर्वसस्यंप्ररोहति ६१ गच्छतःक्षेममध्वानंग्रामांतरगतःपठन् आत्मनश्च
सुतानांचदाराणांचधनस्यच ६२ बीजानामोषधीनांचरक्षामेतांप्रयोजयेत् एतान्संग्रामकालेतुपठतःक्षत्रियस्यतु ६३ व्रजंतिरि
पवोनाशंक्षेमंचपरिवर्त्तते एतान्दैवेचपित्र्येचपठतःपुरुषस्यहि ६४ भुंजतेपितरःकव्यंहव्यंचत्रिदिवौकसः नव्याधिश्वापदभयंन
द्विपान्नहितस्करात् ६५

५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६ ६ ६ ६ ६

कृच्छ्रंलब्ध्वातांयातिपाप्मनाचप्रमुच्यते पानपात्रेचयानेचप्रवासेराजवेश्मनि ६६ परांसिद्धिमवाप्नोतिसावित्रींह्युत्तमांपठन् नचराजभ-
यंतेषांनपिशाचान्नराक्षसान् ६७ नाग्न्यम्बुपवनव्यालाद्भयंतस्योपजायते चतुर्णामपिवर्णानामाश्रमस्यविशेषतः ६८ करोतिसत
तंशांतिंसावित्रीमुत्तमांपठन् नाग्निर्दहतिकाष्ठानिसावित्रीयत्रपठ्यते ६९ नतत्रबालोम्रियतेनचतिष्ठंतिपन्नगाः नतेषांविद्यते
दुःखंगच्छंतिपरमांगतिम् ७० येशृण्वंतिमहद्ब्रह्मसावित्रीगुणकीर्तनम् गवांमध्येतुपठतोगावोस्यबहुवत्सलाः ७१ प्रस्थानेवा-
प्रवासेवासर्वावस्थांगतःपठेत् जपतांजुह्वतांचैवनित्यंचप्रयतात्मनाम् ७२ ऋषीणांपरमंजप्यंगुह्यमेतन्नराधिप याथातथ्येनसि
द्धस्यइतिहासंपुरातनम् ७३ पराशरमतंदिव्यंशक्रायकथितंपुरा तदेतत्तेसमाख्यातंतथ्यंब्रह्मसनातनम् ७४ हृदयंसर्वभूता
नांश्रुतिरेषासनातनी सोमादित्यान्वयाःसर्वेराघवाःकुरवस्तथा ७५ पठंतिशुचयोनित्यंसावित्रींप्राणिनांगतिम् अभ्यासेनित्य
देवानांसप्तर्षीणांध्रुवस्यच ७६ मोक्षणंसर्वकृच्छ्राणांमोचयत्यशुभात्सदा ७७ वृद्धैःकाश्यपगोतमप्रमुखैर्भृग्वंगिरोत्र्यादि
भिःशुक्रागस्त्यबृहस्पतिप्रभृतिभिर्ब्रह्मर्षिभिःसेवितम् भारद्वाजमतंऋचीकतनयैःप्राप्तंवसिष्ठात्पुनःसावित्रीमधिगम्यशक्रवसुभिः
कृत्स्नाजितादानवाः ७८ योगोशतंकनकशृंगमयंददातिविप्रायवेदविदुषेचबहुश्रुताय दिव्यांचभारतकथांकथयेच्चनित्यंतुल्यं-
फलंभवतितस्यचतस्यचैव ७९ धर्मोविवर्धतिभृगोःपरिकीर्तनेनवीर्यंविवर्द्धतिवसिष्ठनमोनतेन संग्रामजिद्भवतिचैवरघुंनमस्य
न्स्यादश्विनौचपरिकीर्तयतोनरोगः ८० एषातेकथिताराजन्सावित्रीब्रह्मशाश्वती विवक्षुरसियच्चान्यत्तत्तेवक्ष्यामिभारत ८१
इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेसावित्रीव्रतोपाख्यानेशतोपरिएकपंचाशत्तमोऽध्यायः १५१ युधिष्ठिरउवाच
केपूज्याःकेनमस्कार्याःकथंवर्त्तेतकेषुच किमाचारःकीदृशेषुपितामहनरिष्यते १ भीष्मउवाच ब्राह्मणानांपरिभवःसाध
येदपिदेवताः ब्राह्मणांस्तुनमस्कृत्ययुधिष्ठिरनरिष्यते २ तेपूज्यास्तेनमस्कार्यावर्त्तेथास्तेषुपुत्रवत् तेहिलोकानिमान्सर्वान्धारयं
तिमनीषिणः ३ ब्राह्मणाःसर्वलोकानांमहांतोधर्मसेतवः धनत्यागाभिरामाश्चवाक्यंथमरताश्चये ४ रमणीयाश्चभूतानांनिधा-
नंचधृतव्रताः प्रणेतारश्चलोकानांशास्त्राणांचयशस्विनः ५ तपोयेषांधनंनित्यंवाक्चैवविपुलंबलम् प्रभवश्चैवधर्माणांधर्मज्ञाः
सूक्ष्मदर्शिनः ६

७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ इति

धर्मकामाःस्थिताधर्मेसुकृतैर्धर्मसेतवः यान्समाश्रित्यजीवंतिप्रजाःसर्वाश्चतुर्विधाः ७ पंथानःसर्वनेतारोयज्ञवाहाःसनातनाः पि
तृपैतामहींगुर्वीमुद्वहंतिधुरंसदा ८ धुरयेनावसीदंतिविषयेसद्गवाइव पितृदेवातिथिमुखाहव्यकव्याग्रभोजनाः ९ भोजनादे
वलोकांस्त्रींस्त्रायंतेमहतोभयात् दीपःसर्वस्यलोकस्यचक्षुश्चक्षुष्मतामपि १० सर्वशिक्षाश्रुतिधनानिपुणाःमोक्षदर्शिनः गति
ज्ञाःसर्वभूतानामध्यात्मगतिचिंतकाः ११ आदिमध्यावसानानांज्ञातारश्छिन्नसंशयाः परावरविशेषज्ञाःगंतारःपरमांगतिम् १२
विमुक्ताधूतपाप्मानोनिर्द्वंद्वानिष्परिग्रहाः मानार्हामानितानित्यंज्ञानविद्भिर्महात्मभिः १३ चंदनेमलपंकेचभोजनेभोजनेसमाः या
सोयेषांदुकूलंचतुल्यंक्षौमाजिनानिच १४ तिष्ठेयुरप्यभुंजानाबहूनिदिवसान्यपि शोषयेयुश्चगात्राणिस्वाध्यायैःसंयतेंद्रियाः १५
अदैवंदैवतंकुर्युर्दैवतंचाप्यदैवतम् लोकानन्यान्सृजेयुस्तेलोकपालांश्चकोपिताः १६ अपेयःसागरोयेषामभिशापान्महात्मनाम्
येषांकोपाग्निरद्यापिदंडकेनोपशाम्यति १७ देवानामपियेदेवाःकारणंकारणस्यच प्रमाणस्यप्रमाणंचकस्तानभिभवेद्बुधः १८
येषांवृद्धश्चबालश्चसर्वःसंमानमर्हति तपोविद्याविशेषात्तुमानयंतिपरस्परम् १९ अविद्वान्ब्राह्मणोदेवःपात्रंवैपावनंमहत् वि
द्वान्भूयस्तरोदेवःपूर्णसागरसन्निभः २० अविद्वांश्चैवविद्वांश्चब्राह्मणोदैवतंमहत् प्रणीतश्चाप्रणीतश्चयथाग्निर्दैवतंमहत्
२१ श्मशानेह्यपितेजस्वीपावकोनैवदुष्यति हविर्यज्ञेचविधिवद्गृहएवाभिशोभते २२ एवंयद्यप्यनिष्टेषुवर्ततेसर्वकर्मसु सर्वथा
ब्राह्मणोमान्योदैवतंविद्धितत्परम् २३ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेब्राह्मणप्रशंसायांशतोपरिद्विपंचाश-
त्तमोऽध्यायः १५२ युधिष्ठिरउवाच कांतुब्राह्मणपूजायांव्युष्टिंदृष्ट्वाजनाधिप कंवाकर्मोदयंमत्वातानर्चसिमहामते
१ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् पवनस्यचसंवादमर्जुनस्यचभारत २ सहस्रभुजभृच्छ्रीमान्का
र्तवीर्योभवत्प्रभुः अस्यलोकस्यसर्वस्यमाहिष्मत्यांमहाबलः ३ सतुरत्नाकरवतींसद्वीपांसागरांबराम् शशासपृथिवींसर्वांहैहे
यःसत्यविक्रमः ४ स्ववित्तंतेनदत्तंतुदत्तात्रेयायकारणे क्षत्रधर्मंपुरस्कृत्यविनयंश्रुतमेवच ५ आराधयामासचतंकृतवीर्यात्म
जोमुनिम् न्यमंत्रयतसंतुष्टोद्विजस्तंचैनवरैस्त्रिभिः ६ सवरैश्छंदितस्तेनतृपोवचनमब्रवीत् सहस्रबाहुर्भूयांवैचमूमध्येगृहेन्य-
था ७

श्रीमहाभारतेआनुशासनिकेपर्वणिटीकायांशतोपरिद्विपंचाशत्तमोऽध्यायः १५२ ७ १ २ ३ ४ ५ ६ ७ ७

८ ९ १० ११ १२ १३ १४ १५ पूर्वोवादोब्राह्मोत्तरः यत्राब्राह्मणाधिक्यवचनंपूर्वपक्षः क्षत्रियाधिक्यंसिद्धांतइत्यर्थः द्वे
तुयुक्तोप्रजापालनेननहेतुनायुक्तोसहितौतौब्राह्मणक्षत्रियौ १६ ब्रह्मवेदोयज्ञोवाअध्यापनयजनार्थएवउपधाच्छलंयेषांतेतथाक्षत्रियान्खादंतिउपजीवंति १७

ममबाहुसहस्रंतुपश्यंतांसैनिकारणे विक्रमेणमहींकृत्स्नांजयेयंसंशितव्रतः ८ तांचधर्मेणसंप्राप्यपालयेयमतंद्रितः चतुर्थंतुवरंया
चेत्वामहंद्विजसत्तम ९ तन्ममानुग्रहकृतेदातुमर्हस्यनिंदित अनुशासंतुमांसंतोमिथ्योवृत्तंत्वदाश्रयम् १० इत्युक्तःसद्विजःप्राह
तथास्त्वितिनराधिपम् एवंसमभवंस्तस्यवरास्तेदीप्ततेजसा ११ ततःसरथमास्थायज्वलनार्कसमद्युतिम् अब्रवीद्वीर्यसंमोहात्को
वास्तिपुरुषोत्तमः १२ धैर्यवीर्ययशःशौर्यैर्विक्रमेणौजसापिवा तद्वाक्यांतेचांतरिक्षेवागुवाचाशरीरिणी १३ नत्वंमूढविजानीषे
ब्राह्मणंक्षत्रियाद्वरं सहितोब्राह्मणेनेहक्षत्रियःशास्तिवैप्रजाः १४ अर्जुनउवाच कुर्यांभूतानितुष्टोहंक्रुद्धोनाशंतथानये
कर्मणामनसावाचानमत्तोस्तिवरोद्विजः १५ पूर्वोब्राह्मोत्तरोवादोद्वितीयःक्षत्रियोत्तरः त्वयोक्तौहेतुयुक्तौतौविशेषस्तत्रदृश्यते १६
ब्राह्मणाःसंश्रिताःक्षत्रंनक्षत्रंब्राह्मणाश्रितम् श्रिताब्रह्मोपधाविप्राःखादंतिक्षत्रियान्भुवि १७ क्षत्रियेष्वाश्रितोधर्मःप्रजानांपरि-
पालनम् क्षत्राद्वृत्तिर्ब्राह्मणानांतैःकथंब्राह्मणोवरः १८ सर्वभूतप्रधानांस्तान्भैक्षवृत्तीनहंसदा आत्मसंभावितान्विप्रान्स्थापया
म्यात्मनोवशे १९ कथितंत्वनयाऽसत्यंगायत्र्याकन्ययादिवि विजेष्याम्यवशान्सर्वान्ब्राह्मणांश्चर्मवाससः २० नचमांच्यावयेद्रा
ष्ट्रात्त्रिषुलोकेषुकश्चन देवोवामानुषोवापितस्माज्ज्येष्ठोद्विजादहम् २१ अद्यब्रह्मोत्तरंलोकंकरिष्येक्षत्रियोत्तरम् नहिमेसंयुगेक
श्चित्सोढुमुत्सहतेबलम् २२ अर्जुनस्यवचःश्रुत्वावित्रस्ताभून्निशाचरी अथैनमंतरिक्षस्थस्ततोवायुरभाषत २३ त्यजैनंकलु
षभावंब्राह्मणेभ्योनमस्कुरु एतेषांकुर्वतःपापंराष्ट्रक्षोभोभविष्यति २४ अथवात्वांमहीपालशमयिष्यंतिवैद्विजाः निरशिष्यंतिते
राष्ट्राद्धतोत्साहंमहाबलाः २५ तंराजाकस्त्वमित्याहततस्तंप्राहमारुतः वायुर्वैदेवदूतोस्मिहितंत्वांप्रब्रवीम्यहम् २६ अर्जुनउवाच
अहोत्वयाद्यविप्रेषुभक्तिरागःप्रदर्शितः यादृशंपृथिवीभूतंतादृशंब्रूहिमेद्विजम् २७ वायोर्वासदृशंकिंचिद्ब्रूहित्वंब्राह्मणोत्तमम् अ
पांवेसदृशंवन्हिसूर्यस्यनभसोपिवा २८ इतिश्रीम॰आनुशा॰दानधर्मपर्वणिवाय्वर्जुनसंवादेब्राह्मणमाहात्म्येशततोपरित्रिपंचाशत्तमोऽध्यायः
१५३

१८ १९ गायत्र्यासरस्वत्या असत्यंकथितंचर्मवाससः अजिनवस्त्रान् २० २१ ब्रह्मोत्तरंसंतं २२ निशाचरी अंतर्हितासरस्वतीयद्वानिशाचरीराक्षस्यपिवित्र
स्ताभूत्किमुतान्ये आस्तिकाइतिभावः २३ २४ २५ २६ पृथिवीभूतंपृथिव्यात्मकंभूतं २७ २८ इतिआनुशा॰टीकायांशततोपरित्रिपंचाशत्तमोऽध्यायः १५३

शृणिवति १ २ ३ ४ अहंवायुः ५ ६ ७ कविःअग्निः ८ महतःसागरपुत्रान् आसंतउपासंत सुवर्णधारिणाशोभनोब्राह्मणवर्णस्तस्यधारिणा धात्राद्विजातिनाकपिलेन ९ १० ११ १२ अग्निंब्राह्मणमित्यन्वयः १३. अनुभूतंप्रतिभूतंअनुपालकंपोषकं १४ १५. ननुब्रह्मांडेजातत्वात्कथमंडमजनयदित्यत्राह अंडेतिकेचिदितित्वंत्स्यर्थः १६ दूषयति द्रष्टव्यमिति अजत्वादेवब्रह्मानअंडजातःअंडजत्ववचनंतस्यप्रकारांतरेणेत्याह स्मृतमिति आकाशंअव्याकृतं १७ आकाशजःपितामहः किमाश्रयेणतिष्ठेदितिचेत् कश्चिदुपात्तंप्रतिब्रूहितदानकिंचिद्भवेदिति पितामहस्यनिरधिष्ठानत्वेसति

वायुरुवाच शृणुमूढगुणान्कांश्चिद्ब्राह्मणानांमहात्मनाम् येत्वयाकीर्त्तिताराज स्तेभ्योथब्राह्मणोवरः १ त्यक्त्वामहीत्वंभूमि- स्तुस्पर्धयांगनृपस्यह नाशंजगामतांविप्रोव्यस्तम्भयतकश्यपः २ अजेयाब्राह्मणाराजन्दिविचेहचनित्यदा अपिबत्तेजसाह्यापस्त्वय मेवांगिराःपुरा ३ सताःपिबन्क्षीरमिवनातृप्यतमहामनाः अपूरयन्महौघेनमहींसर्वांचपार्थिव ४ तस्मिन्नहंचक्रुद्धेवैजगत्यक्त्वा ततोगतः व्यतिष्ठमग्निहोत्रेचचिरमंगिरसोभयात् ५. अथशप्तश्चभगवान्गौतमेनपुरंदरः अहल्यांकामयानोवैधर्मार्थंचवनहिंसि तः ६. यथासमुद्रोनृपतेपूर्णोमृष्टस्यवारिणा ब्राह्मणैरभिशप्तश्चबभूवलवणोदकः ७ सुवर्णवर्णोनिर्धूमःसंगतोर्ध्वशिखःकविः क्रु द्धेनांगिरसाशप्तोगुणैरेतैर्विवर्जितः ८ महतश्चूर्णितान्पश्ययेह्यासंतमहोदधिम सुवर्णधारिणानित्यमवशप्ताद्विजातिना ९ समा नत्वंद्विजातिभ्यःश्रेयोविद्धिनराधिप गर्भस्थान्ब्राह्मणान्सम्यङ्नमस्यतिकिलप्रभुः १० दंडकानामहद्राज्यंब्राह्मणेनविनाशितं ता लजंघंमहाक्षत्रमौर्वेणैकेननाशितम् ११ त्वयाचविपुलंराज्यंबलंधर्मंश्रुतंतथा दत्तात्रेयप्रसादेनप्राप्तंपरमदुर्लभम् १२ अ- ग्निंत्वंयजसेनित्यंकस्माद्ब्राह्मणमर्जुन सहिसर्वस्यलोकस्यहव्यवाट्किंनवेत्सितम १३ अथवाब्राह्मणश्रेष्ठमनुभूतानुपालकम् कर्त्तारंजीवलोकस्यकस्माज्ज्ञानाद्विमुह्यसे १४ तथाप्रजापतिर्ब्रह्माअव्यक्तःप्रभुरव्ययः येनेदंनिखिलंविश्वंजनितंस्थावरंचरम १५ अंडजातंतुब्रह्माणंकेचिदिच्छंत्यपंडिताः अंडाद्भिन्नाद्बभुःशैलादिशोंभःपृथिवीदिवं १६ द्रष्टव्यंनैतदेवंहिकथंजायेदजोहिसः स्मृत माकाशमंडंतुतस्माज्जातःपितामहः १७ तिष्ठेत्कथमितिब्रूहिनकिंचिद्धिनदाभवत् अहंकारइतिप्रोक्तःसर्वतेजोमयःप्रभुः १८

तज्जमिदंसर्वंशून्यमेवस्यान्नकिंचिद्भवेदित्यर्थः ननुकोयंप्रजापतिपदेनोच्यतेअतआह अहंकारइतिप्रोक्तइतिप्रभुःव्यापकः यतःसर्वतेजोमयःत्तिगतःजलकंद्रन्याये नकृत्स्नंचैतन्यज्योतिःप्राप्तः द्वितीयाश्रितेतिसमासः अयंभावः प्रभुम्निसंदृश्यादव्याकृतनाकाशादुत्थितोहंकारस्यउपाधिस्तेननसाक्षीसर्वात्मनाःवच्छिन्नः सोयमहं कारविशिष्टेवात्यंव्योमादिकंकल्पितवान एवंशास्त्रानुभवाभ्यांजानातिसब्राह्मणोजगत्कर्त्तातेननतस्साम्यंसमृद्ध्यैगतस्यैवकदाचिदपिनसंभवति १८ ६७

अतएव अंडं नास्तिरज्जुरगवत्कल्पनामात्रत्वात् कल्पकस्तु सब्रह्मा ब्राह्मणोऽस्तीत्युक्तः सराजार्जुनः इतिवायुनाउक्तः सन् तूष्णीमभून्ततोवायुरब्रवीद्वक्ष्यमाणमर्थमितिशेषः १९ इतिआनुशासनिके पर्वणि टीकायां शततोपरिचतुःपंचाशत्तमोऽध्यायः १५४ इमामिति १ २ भूमित्वंत्यक्त्वाब्रह्मणःपदंगमिष्यामीतिसंबंधः ३ आत्मानंदेहंत्यक्त्वानिर्जीवमहीदेहंप्रविश्यसजीवंयोगबलेनकृतवान् ४ भूमिस्तुधर्मोत्तरास्वधर्मबलेनब्रह्मलोकंगत्वानष्टभयासीदित्यर्थः ५ कश्य

नास्त्यंडमस्तितुब्रह्मासराजालोकभावनः इत्युक्तःसतदातूष्णीमभूद्वायुस्ततोब्रवीत् १९ इतिश्रीमहाभारते आनुशासनिकेपर्वणिदानधर्मे पवनार्जुनसंवादे शततोपरिचतुःपंचाशत्तमोऽध्यायः १५४ वायुरुवाच इमांभूमिंद्विजातिभ्योदित्सुर्वैदक्षिणापुरा अंगोनामनृपोराजंस्ततश्चिंतांमहीययौ १ धारणीसर्वभूतानामयंप्राप्यवरोनृपः कथमिच्छतिमांदातुंद्विजेभ्योब्रह्मणःसुताम् २ साहंत्यक्त्वागमिष्यामिभूमित्वंब्रह्मणःपदम् अयंसराष्ट्रोनृपतिर्माभूदितिततोगमत् ३ ततस्तांकश्यपोदृष्ट्वाव्रजंतींपश्यतांतदा प्रविवेशमहींसद्योत्यक्त्वात्मानंसमाहितः ४ ऋद्धासासर्वतोयज्ञेतृणौषधिसमन्विता धर्मोत्तरानष्टभयाभूमिरासीत्ततोनृप ५ एवंवर्षसहस्राणिदिव्यानिविपुलव्रतः त्रिंशतःकश्यपोराजन्भूमिरासीदतंद्रितः ६ अथागम्यमहाराजनमस्कृत्यचकश्यपम् पृथिवीकाश्यपीजज्ञेसुतातस्यमहात्मनः ७ एषराजन्नीदृशोवैब्राह्मणःकश्यपोभवत् अन्यंप्रब्रूहिवात्वंचकश्यपात्क्षत्रियंवरम् ८ तूष्णींबभूवनृपतिःपवनस्त्वब्रवीत्पुनः शृणुराजन्नुतथ्यस्यजातस्यांगिरसेकुले ९ भद्रासोमस्यदुहितारूपेणापरमामता तस्यास्तुल्यंपतिंसोमउतथ्यंसमपश्यत १० साचतीव्रंतपस्तेपेमहाभागायशस्विनी उतथ्यार्थेतुचार्वंगीपरंनियममास्थिता ११ ततआहूयसोतथ्यंददावत्रिर्यशस्विनीम् भार्यार्थेसचजग्राहविधिवद्भूरिदक्षिणः १२ तांत्वकामयतश्रीमान्वरुणःपूर्वमेवह सचागम्यवनप्रस्थंयमुनायाजहारताम् १३ जलेश्वरस्तुहृत्वातामनयत्स्वपुरंप्रति परमाद्भुतसंकाशंषट्सहस्रशतह्रदम् १४ नहिरम्यतरंकिंचित्तस्मादन्यत्पुरोत्तमम् प्रासादैरप्सरोभिश्चदिव्यैःकामैश्चशोभितम् १५ तत्रदेवस्तयासार्धंरेमेराजन्जलेश्वरः अथाख्यातमुतथ्यायततःपत्न्यवमर्दनम् १६ तच्छ्रुत्वानारदात्सर्वमुतथ्योनारदंतथा प्रोवाचगच्छब्रूहित्वंवरुणंपरुषंवचः १७ मद्वाक्यान्मुंचमेभार्यांकस्मात्तांहृतवानसि लोकपालोसिलोकानांनलोकस्यविलोपकः १८

पोभूमिर्भूत्वासीदित्यन्वयः ६ ७ ८ ९ १० ११ सोत्रिःसोमपिताउतथ्यमाहूयतांतस्मैददौसोतथ्यमितिसंधिरार्षः १२ १३ १४ १५ देवःवरुणःतयाभद्रया १६ १७ १८ ७ ७ ७ ७ ७ ७ ७

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ इतिश्रीमत्पद
वाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्य कृतौ भारतभावदीपे आनुशासनिकेपर्वणि दानधर्मे टीकायांशतोपरिपंचपंचाश

सोमेनदत्ताभार्यामेत्वयाचापहृताद्यवै इत्युक्तोवचनात्तस्यनारदेनजलेश्वरः १९ मुंचभार्यामुतथ्यस्यत्वंकस्मात्त्वंहृतवानसि इति
श्रुत्वावचस्तस्यसोप्येतंवरुणोब्रवीत् २० ममैषासुप्रियाभार्यानैनामुत्स्रष्टुमुत्सहे इत्युक्तोवरुणेनाथनारदःप्राप्यतंमुनिम् उ
तथ्यमब्रवीद्वाक्यंनातिहृष्टमनाइव २१ गलेगृहीत्वाक्षिप्तोस्मिवरुणेनमहामुने नप्रयच्छतितेभार्यांयत्तेकार्यंकुरुष्वतत् २२
नारदस्यवचःश्रुत्वाक्रुद्धःप्राज्वलदंगिराः अपिबत्तेजसावारिविष्टभ्यसुमहातपाः २३ पीयमानेतुसर्वस्मिंस्तोयेपिसलिलेश्व
रः सुहृद्भिःक्षिप्यमाणोपिनैवामुंचततातदा २४ ततःक्रुद्धोब्रवीद्भूमिमुतथ्योब्राह्मणोत्तमः दर्शयस्वस्थलंभद्रेषट्सहस्रशत
हृदम् २५ ततस्तदीरणंजातंसमुद्रश्चापिसर्पितः तस्माद्देशान्नदींचैवप्रोवाचासौद्विजोत्तमः २६ अदृश्यागच्छभीरुत्वंसरस्व
तिमरुंप्रति अपुण्यएषभवतुदेशस्त्यक्तस्त्वयाशुभे २७ तस्मिन्संशोषितेदेशेभद्रामादायवारिपः अददाच्छरणंगत्वाभार्यां-
मांगिरसायवै २८ प्रतिगृह्यतुतांभार्यामुतथ्यःसुमनाभवत् मुमोचचजगद्दुःखाद्वरुणंचैवहैहय २९ ततःसलब्ध्वातांभा
र्यांवरुणंप्राहधर्मवित् उतथ्यःसुमहातेजायत्तच्छृणुनराधिप ३० मयैषातपसाप्राप्ताक्रोशतस्तेजलाधिप इत्युक्त्वातामुपा
दायस्वमेवभवनंययौ ३१ एषराजन्नीदृशोवैउतथ्योब्राह्मणर्षभः ब्रवीम्यहंब्रूहिवात्वमुतथ्यात्क्षत्रियंवरम् ३२ इति
श्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपवनार्जुनसंवादोनामशतोपरिपंचपंचाशत्तमोऽध्यायः १५५ भीष्मउवाच
इत्युक्तःसनृपस्तूष्णीमभूद्वायुस्ततोब्रवीत् शृणुराजन्नगस्त्यस्यमाहात्म्यंब्राह्मणस्यह १ असुरैर्निर्जितादेवानिरुत्साहाश्चतेकृताः यज्ञाश्चैषांहृताःसर्वेपितॄणांचस्वधास्तथा २ कर्मेज्यामानवानांचदानवैर्हैहयर्षभ भ्रष्टैश्वर्यास्ततोदेवाश्चेरुःपृथ्वीमभि
नियामः ३ ततःकदाचित्तेराजन्दीप्तमादित्यवर्चसम् ददृशुस्तेजसायुक्तमगस्त्यंविपुलव्रतम् ४ अभिवाद्यतुतंदेवापृष्ट्वाकुशल
मेवच इदमूचुर्महात्मानंवाक्यंकालेजनाधिप ५ दानवैर्युधिभग्नाःस्मतथैश्वर्याच्चभ्रंशिताः तदस्मान्नोभयात्तीव्रात्त्राहित्वंमु-
निपुंगव ६

तमोऽध्यायः १५५ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

इत्युक्तः स तदा देवैरगस्त्यः कुपितोऽभवत् प्रजज्वाल च तेजस्वी कालाग्निरिव संक्षये ७ तेन दीप्तांशुजालेन निर्दग्धा दानवास्तदा अं
तरिक्षान्महाराज निपेतुस्ते सहस्रशः ८ दह्यमानास्तु ते दैत्यास्तस्यागस्त्यस्य तेजसा उभौ लोकौ परित्यज्य गताः काष्ठां तु दक्षिणा
म् ९ बलिस्तु यजते यज्ञमश्वमेधं महीं गतः येऽन्येऽधःस्था महीस्थाश्च ते न दग्धा महासुराः १० ततो लोकाः पुनः प्राप्ताः सुरैः शांतं च
तद्रजः अथैनमब्रुवन्देवा भूमिष्ठानसुरान्जहि ११ इत्युक्तः प्राह देवान्स न शक्यामि महीगतान् दग्धुं तपो हि क्षीयेन्मे न शक्यामीति
पार्थिव १२ एवं दग्धा भगवता दानवाः स्वेन तेजसा अगस्त्येन तदा राजन्तपसा भावितात्मना १३ ईदृशश्चाप्यगस्त्यो हि कथि
तस्ते मयानघ ब्रवीम्यहं ब्रूहि वा त्वमगस्त्यात्क्षत्रियं वरम् १४ भीष्म उवाच इत्युक्तः स तदा तूष्णीमभूद्वायुस्ततोऽब्रवीत् शृ
णु राजन्वसिष्ठस्य मुख्यं कर्म यशस्विनः १५ आदित्याः सत्रमासंत सरो वै मानसं प्रति वसिष्ठं मनसा गत्वा ज्ञात्वा तत्रास्य गौरवम्
१६ यजमानांस्तु तान्दृष्ट्वा सर्वान्दीक्षानुकर्शितान् हंतुमैच्छंत शैलाभाः खलिनो नाम दानवाः १७ अदूरात्तु ततस्तेषां ब्रह्मदत्तवरं
सरः हता हता वै ते तत्र जीवंत्याप्लुत्य दानवाः १८ ते प्रगृह्य महाघोरान्पर्वतान्परिघान्द्रुमान् विक्षोभयंतः सलिलमुत्थिताः शतयोज
नम् १९ अभ्यद्रवंत देवांस्ते सहस्राणि दशैव हि ततस्तैरर्दिता देवाः शरणं वासवं ययुः २० स च तैर्व्यथितः शक्रो वसिष्ठं शरणं य
यौ ततोऽभयं ददौ तेभ्यो वसिष्ठो भगवानृषिः २१ तदा तान्दुःखितान्ज्ञात्वा आनृशंस्यपरो मुनिः अयत्नेनादहत्सर्वान्खलिनः स्वेन
तेजसा २२ कैलासं प्रस्थितां चैव नदीं गंगां महातपाः आनयत्तत्सरो दिव्यं तया भिन्नं च तत्सरः २३ सरो भिन्नं तया नद्या सरयूः सा
ततोऽभवत् हताश्च खलिनो यत्र स देशः खलिनोऽभवत् २४ एवं सेंद्रा वसिष्ठेन रक्षितास्त्रिदिवौकसः ब्रह्मदत्तवराश्चैव हता दैत्या म
हात्मना २५ एतत्कर्म वसिष्ठस्य कथितं हि मयानघ ब्रवीम्यहं ब्रूहि वा त्वं वसिष्ठात्क्षत्रियं वरम् २६ इति श्रीमहाभारते आ
नुशासनिके पर्वणि दानधर्मे पवनार्जुनसंवादे शतोपरिषट्पंचाशत्तमोऽध्यायः १५६

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

भीष्मउवाच इत्युक्तस्त्वर्जुनस्तूष्णीमभूद्वायुस्तमब्रवीत् शृणुमेहैहयश्रेष्ठकर्मात्रेःसुमहात्मनः १ घोरेतमस्ययुध्यंतसहि
तादेवदानवाः अविध्यतशरैस्तत्रस्वर्भानुःसोमभास्करौ २ अथतेतमसाग्रस्तानिहन्यंतेस्मदानवैः देवानृपतिशार्दूलसहैवबलि
भिस्तदा ३ असुरैर्वध्यमानास्तेक्षीणप्राणादिवौकसः अपश्यंततपस्यंतमत्रिंविप्रंतपोधनम् ४ अथैनमब्रुवन्देवाःशांतक्रोधंजि
तेंद्रियम् असुरैरिषुभिर्विद्धौचंद्रादित्याविमावुभौ ५ वयंवध्यामहेचापिशत्रुभिस्तमसावृते नाधिगच्छामशांतिंचभयात्त्रायस्वनः
प्रभो ६ अत्रिरुवाच कथंरक्ष्यामिभवतस्तेब्रुवंश्चंद्रमाभव तिमिरघ्नश्चसवितादस्युहताचनोभव ७ एवमुक्तस्तदात्रिर्वैतमो
नुदभवच्छशी अपश्यत्सौम्यभावाच्चसोमवत्प्रियदर्शनः ८ दृष्ट्वानातिप्रभंसोमंतथासूर्यंचपार्थिव प्रकाशमकरोदत्रिस्तपसास्वेन
संयुगे ९ जगद्वितिमिरंचापिप्रदीप्तमकरोत्तदा १० व्यजयच्छत्रुसंघांश्चदेवानांस्वेनतेजसा अत्रिणादह्यमानांस्तान्दृष्ट्वादेवामहा
सुरान् ११ पराक्रमैस्तेपितदात्यभ्यघ्नन्नत्रिसुरक्षिताः उद्भासितश्चसविताद्देवास्त्राताहतासुराः १२ अत्रिणात्वथसामर्थ्यंकृतमुत्तमते
जसा द्विजेनाग्निद्वितीयेनजपताचर्मवाससा १३ फलभक्षेणराजर्षेपश्यकर्मात्रिणाकृतम् तस्यापिविस्तरेणोक्तंकर्मात्रेःसुमहात्म
नः ब्रवीम्यहंब्रूहिवात्वमत्रितःक्षत्रियवरम् १४ इत्युक्तस्त्वर्जुनस्तूष्णीमभूद्वायुस्ततोऽब्रवीत् शृणुराजन्महत्कर्मच्यवनस्यमहात्म
नः १५ अश्विनोःप्रतिसंश्रुत्यच्यवनःपाकशासनम् प्रोवाचसहितौदेवैःसोमपावश्विनौकुरु १६ इंद्रउवाच अस्माभिर्निंदि
तावेतौभवेतांसोमपौकथम् देवैर्नसंमितावेतौतस्मान्मैवंवदस्वनः १७ अश्विभ्यांसहनेच्छामसोमंपातुंमहाव्रत यदन्यद्वक्ष्यसेवि
प्रतत्करिष्यामितेवचः १८ च्यवनउवाच पिबेतामश्विनौसोमंभवद्भिःसहिताविमौ उभावेतावपिसुरौसूर्यपुत्रौसुरेश्वर १९
क्रियतांमद्वचोदेवायथावैसमुदाहृतम् एतद्वःकुर्वतांश्रेयोभवेन्नैतदकुर्वताम् २० इंद्रउवाच अश्विभ्यांसहसोमंवैनपा
स्यामिद्विजोत्तम पिबंत्वन्येयथाकाममनाहंपातुमिहोत्सहे २१ च्यवनउवाच नचेत्करिष्यसिवचोमयोक्तंबलसूदन मया
प्रमथितःसद्यःसोमंपास्यसिवैमख २२ वायुरुवाच ततःकर्मसमारब्धंहितायसहसाश्विनोः च्यवनेनततोमंत्रैरभिभू
ताःसुराभवन् २३

१७ १८ १९ २० २१ २२ २३ छ छ छ छ

तच्चुकर्मसमारब्धंदृष्ट्वेंद्रःक्रोधमूर्छितः उद्यम्यविपुलंशैलंच्यवनंसमुपाद्रवत् २४ तथावज्रेणभगवानमर्षाकुललोचनः तमापतंतंदृ
ष्ट्वैवच्यवनस्तपसान्वितः २५ अद्भिःसिक्त्वास्तंभयत्तंसवज्रंसहपर्वतम् अथेंद्रस्यमहाघोरंसोसृजच्छत्रुमेवहि २६ मदंनामाहुतिमयंव्या
दितास्यमहामुनिः तस्यदंतसहस्रंतुबभूवशतयोजनम् २७ द्वियोजनशतास्तस्यदंष्ट्राःपरमदारुणाः हनुस्तस्याभवद्भूमावास्यंचास्यास्पृ
शद्दिवम् २८ जिव्हामूलेस्थितास्तस्यसर्वेदेवाःसवासवाः तिमेरास्यमनुप्राप्तायथामत्स्यामहार्णवे २९ तेसंमंत्र्यततोदेवामदस्यास्यसमीप
गाः अब्रुवन्सहिताःशक्रंप्रणमास्मैद्विजातये ३० अश्विभ्यांसहसोमंचपिबामविगतज्वराः ततःसप्रणतःशक्रश्चकारच्यवनस्यतत् ३१ च्य
वनःकृतवानेतावश्विनौसोमपायिनौ ततःप्रत्याहरत्कर्ममदंचव्यभजन्मुनिः ३२ अक्षेषुमृगयायांचपानेस्त्रीषुचवीर्यवान् एतेदोषैर्नरारा
जन्क्षयंयांतिनसंशयः ३३ तस्मादेतान्नरोनित्यंदूरतःपरिवर्जयेत् ३४ एतत्तेच्यवनस्यापिकर्मराजन्प्रकीर्तितम् ब्रवीम्यहंब्रूहिवात्वंक्ष
त्रियंब्राह्मणाद्वरम् ३५ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपवनार्जुनसंवादेशतोपरिसप्तपंचाशत्तमोऽध्यायः १५७
भीष्मउवाच तूष्णीमासीदर्जुनस्तुपवनस्त्वब्रवीत्पुनः शृणुमेब्राह्मणेष्वेवमुख्यंकर्मजनाधिप १ मदस्यास्यमनुप्राप्तायदासेंद्रादिवौ
कसः तदेवच्यवनेनेहहृतातेषांवसुंधरा २ उभौलोकौहृतौमत्वातेदेवादुःखिताभवन् शोकार्त्ताश्चमहात्मानंब्रह्माणंशरणंययुः ३ दे
वाऊचुः मदास्यव्यतिषिक्तानामस्माकंलोकपूजित च्यवनेनहृताभूमिःकपैश्चैवदिवंप्रभो ४ ब्रह्मोवाच गच्छध्वंशरणंविप्राना
शुसेंद्रादिवौकसः प्रसाद्यतांस्तुभौलोकाववाप्स्यथयथापुरा ५ तेययुःशरणंविप्रानूचुस्तेकान्जयामहे इत्युक्तास्तेद्विजान्प्राहुर्जयतेहकपा
निति ६ भूगतान्हिविजेतारोवयमित्यब्रुवन्द्विजाः ततःकर्मसमारब्धंब्राह्मणैःकपनाशनम् ७ तच्छ्रुत्वाप्रेषितोदूतोब्राह्मणेभ्योधनी
कपैः सचतान्ब्राह्मणानाहधनीकपवचोयथा ८ भवद्भिःसदृशाःसर्वेकपाःकिमिहवर्त्तते सर्ववेदविदःप्राज्ञाःसर्वेचक्रतुयाजिनः ९ सर्वे
सत्यव्रताश्चैवसर्वेतुल्यामहर्षिभिः श्रीश्चैवरमतेतेषुधारयंतिश्रियंचते १० वृथादारान्नगच्छंतिवृथामांसंनभुंजते दीप्तमग्निंजुव्हतेच
गुरूणांवचनेस्थिताः ११ सर्वेचनियतात्मानोबालानांसंविभागिनः उपेत्यशनकैर्यांतिनसेवंतिरजस्वलाम् १२

१३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७

अभक्तवत्सुनारीषुंतिगर्भिणीःस्वङ्कादिषु पूर्वाण्हेषुनदीष्वंतिदिवाचैवनशेरते १३ एतैश्चान्यैश्चबहुभिर्गुणैर्युक्तान्कथंकपान्
विजेष्यथनिवर्त्तध्वंनिवृत्तानांसुखंहिवः १४ ब्राह्मणाऊचुः कपान्वयंविजेष्यामोयेदेवास्तेवयंस्मृताः तस्माद्वध्याःकपा स्मा
कंधनिन्याहियथागतम् १५ धनीगत्वाकपानाहनवोविप्राःप्रियंकराः गृहीत्वास्त्राण्यतोविप्रान्कपाःसर्वेसमाद्रवन् १६ समुदग्रध्वजा
न्दृष्ट्वाकपान्सर्वेद्विजातयः व्यसृजन्ज्वलितानग्नीन्कपानांप्राणनाशनान् १७ ब्रह्मसृष्टाहव्यभुजःकपान्हत्वाहुताशनाः नभसीवय
थाभ्राणिव्यराजंतनराधिप १८ हत्वावैदानवान्देवाःसर्वेसंभूयसंयुगे तेनाभ्यजानन्हितदाब्राह्मणैर्निहतान्कपान् १९ अथागम्यमहा
तेजानारदोकथयद्विभो यथाहतामहाभागैस्तेजसाब्राह्मणैःकपाः २० नारदस्यवचःश्रुत्वाप्रीताःसर्वेदिवौकसः प्रशशंसुर्द्विजांश्चापि
ब्राह्मणांश्चयशस्विनः २१ तेषांतेजस्तथावीर्यंदेवानांववृधेततः अवाप्नुवंश्चामरत्वंत्रिषुलोकेषुपूजितम् २२ इत्युक्तवचनंवायुमर्जुनः
प्रत्युवाचह प्रतिपूज्यमहाबाहोयत्तच्छृणुयुधिष्ठिर २३ अर्जुनउवाच जीवाम्यहंब्राह्मणार्थंसर्वथासततंप्रभो ब्रह्मण्योब्रा
ह्मणेभ्यश्चप्रणमामिचनित्यशः २४ दत्तात्रेयप्रसादाच्चमयाप्राप्तमिदंबलम् लोकेचपरमाकीर्तिर्धर्मश्चाचरितोमहान् २५ अहोब्रा
ह्मणकर्माणिमयामारुततत्त्वतः त्वयाप्रोक्तानिकार्त्स्न्येनश्रुतानिप्रयतेनच २६ वायुरुवाच ब्राह्मणान्क्षात्रधर्मेणपालयस्वेंद्रिया
णिच भृगुभ्यस्तेभयंघोरंतत्तुकालाद्भविष्यति २७ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेपवनार्जुनसंवादेशतोपरिअ
ष्टपंचाशत्तमोऽध्यायः १५८ युधिष्ठिरउवाच ब्राह्मणानर्चसेराजन्सततंसंशितव्रतान् किंतुकर्मोदयंदृष्ट्वातानर्चसिजनाधिप १
कांवाब्राह्मणपूजायांव्युष्टिंदृष्ट्वामहाव्रत तानर्चसिमहाबाहोसर्वमेतद्वदस्वमे २ भीष्मउवाच एषतेकेशवःसर्वमाख्यास्यतिमहा
मतिः व्युष्टिंब्राह्मणपूजायांदृष्टव्युष्टिर्महाव्रतः ३ बलंश्रोत्रेवाङ्मनश्चक्षुषीचज्ञानंतथानसविशुद्धंममाद्य देहन्यासोनातिचिरान्मतोमेनचा
तितूर्णंसविताद्ययाति ४ उक्ताधर्मायेपुराणेमहांतोराजन्ब्राह्मणानांक्षत्रियाणांविशांच तथाशूद्राणांधर्ममुपासतेचशेषंकृष्णादुपशिक्ष
स्वपार्थ ५ अहंह्येनंवेद्मितत्त्वेनकृष्णंयोयंहियच्चास्यबलंपुराणम् अमेयात्माकेशवःकौरवेंद्रसोयंधर्मंवक्ष्यतिसंशयेषु ६

इतिदानधर्मेटीकायांशतोपरिअष्टपंचाशत्तमोऽध्यायः १५८ ब्राह्मणान्कर्मोदयंफलोदयं १ २ ३ नचेतिदुःखिनस्यदिनंमहद्भवनीत्यर्थः ४ ५ ६ ७ ७

७ अस्य चाध इत्याकाशादेरुपर्युपरि अयमेवासीत्फक्तं ८ अर्णवं तर्जयानमित्यगाधत्वमपारत्वंचोक्तम् ९ कृतइति ज्ञानं अकर्त्तव्यकोटेरपिउपस्थानात् त्रेता-
यांविवेक आसीत् द्वापरेतुद्वितीयकोटेः साम्याद्बलंप्रधानमासीत्ननधर्मः कलौतधर्मएव बलवान्निति भावः १० सएव पूर्व आदिदेवो दैत्यान्निजघानसएवसम्राट् बलि
रूपी पूर्वदेवोदैत्योबभूव ११ ग्लानिग्लायति १२ एवमेनंचराहुंसोमंशक्रंचविद्धि १३ शोणितभृच्छरि १४ रायःधनंतस्यपोषः पोषकः १५ १६ महींसत्रंपृथिव्या

कृष्णः पृथ्वीमसृजत्खंदिवंच कृष्णास्यदेहान्मेदिनीसंबभूव वराहोयंभीमबलः पुराणः सपर्वतान्व्यसृजद्वै दिशश्च ७ अस्यचाधोथांतरिक्षं
दिवंचदिशश्चतस्रोविदिशश्चतस्रः सृष्टिस्तथैवेयमनुप्रसूता स निर्ममे विश्वमिदंपुराणम् ८ अस्यनाभ्यांपुष्करसंप्रभूतं यत्रोत्पन्नः स्वयमेवा
मितौजाः येनाच्छिन्नंतत्तमः पार्थघोरं यत्तत्तिष्ठत्यर्णवंतर्जयानम् ९ कृतेयुगेधर्म आसीत्समग्रस्त्रेताकालेज्ञानमनुप्रपन्नः बलंत्वासीद्द्वापरेपार्थ
कृष्णः कलौत्वधर्मः क्षितिमेवाजगाम १० सएवपूर्वंनिजघानदैत्यान्सपूर्वदेवश्चबभूवसम्राट् सभूतानांभावनोभूतभव्यः सविश्वस्यास्यजगत
श्चाभिगोप्ता ११ यदाधर्मेग्लानिर्वंशेसुराणांतदाकृष्णोजायतेमानुषेषु धर्मेस्थित्वासतुवैभावितात्मापरांश्चलोकानपरांश्चपाति १२ त्या
ज्यांस्त्यक्त्वाथोसुराणांवधायकार्याकार्येकारणंचैवपार्थ कृतंकरिष्यत्क्रियतेनराहुंदेवोसोमंविद्धिचशक्रमेनम् १३ सविश्वकर्मासहिवि
श्वरूपः सविश्वभुग्विश्वसृग्विश्वजिच्च सशूलभृच्छोणितभृत्करालस्तंकर्मभिर्विदितंवैस्तुवंति १४ तंगंधर्वाणामप्सरसांचनित्यमुप
तिष्ठंतेविविधानांशतानि तंराक्षसाश्चपरिसंवदंतिरायस्पोषः सविजिगीषुरेकः १५ तमध्वरेशंसितारः स्तुवंतिरथंतरेसामगाश्चस्तुव
ति तंब्राह्मणाब्रह्ममंत्रैस्तुवंतितस्मैहविरध्वर्यवः कल्पयंति १६ सपौराणींब्रह्मगुहांप्रविष्टोमहींसत्रं भारताग्रेददर्श सचैवगामुद्दधा
राग्र्यकर्माविक्षोभ्यदैत्यानुरगान्दानवांश्च १७ तंघोषार्थेगीर्भिरिंद्रास्तुवंतिसचापीशोभारतैकः पशूनाम् तस्यभक्षान्विविधान्वे
दयंतितमेवाजौवाहनंवेदयंति १८ तस्यांतरिक्षंपृथिवीदिवंचसर्वंवशेतिष्ठतिशाश्वतस्य सकुंभरेतः ससृजेसुराणांयत्रोत्पन्नमृषि
माहुर्वसिष्ठम् १९

श्छादनमर्जुनमितियावत् सत्रंयज्ञेमहादानाच्छादनारण्यकैतवेइतिमेदिनी १७ घोषार्थेगोवर्द्धनोद्धरणकालेपोषोंबुनादोवावृष्ट्यर्थमित्यर्थः प
शूनांगवांजीवानांच १७ वाहनंजयप्रापकम् १८ सुराणांमित्रावरुणयोरेतः कुंभेससर्ज १९ ७ ७ ७ ७ ७

विक्रमैः पादविक्षेपैः त्रीणि भुवनानि २० देवानां आसेति शेषः २१ जुषंति सेवंते २२ विधत्ते ऽध्वरमित्यर्थात् त्रिनाभि शीतोष्णवृष्टिकालगर्भं चक्रं संवत्सरं त्रिधा सेति
वर्षवातोष्णप्रकारं २३ हंसं सूर्यं २४ २५ बंधुरः संसाररथस्य योक्ता त्रिचक्रः सत्वरजस्तमोमयः त्रिवृच्छिराः ऊर्ध्वमध्याधोगतिफलः चतुरश्वः कालादृष्टेश्वरेच्छा

समातरिश्वा विभुरश्ववाजी स रश्मिवान्सविता चादिदेवः तेनासुरा विजिताः सर्व एव न हि क्रांतैर्विजितानीह त्रीणि २० स देवानां मानुषाणां
पितॄणां तमेवाहुर्यज्ञविदां वितानम् स एव कालं विभजन्नुदेति तस्योत्तरं दक्षिणं चायने द्वे २१ तस्यैवोर्ध्वं तिर्यगधश्चरंति गभस्तयो मेदि
नीं भासयंतः तं ब्राह्मणा वेदविदो जुषंति तस्यादित्यो भामुपयुज्य भाति २२ स मासि मासि अध्वरकृद्विधत्ते तमध्वरे वेदविदः पठंति स ए
वोक्तश्चक्रमिदं त्रिनाभि सप्ताश्वयुक्तं वहते वै त्रिधाम २३ महातेजाः सर्वगः सर्वसिंहः कृष्णो लोकान्धारयते यथैकः हंसं तमोघ्नं च त-
मेव वीर कृष्णं सदा पार्थ कर्त्तारमेहि २४ स एकदा कक्षगतो महात्मा तुष्टो विभुः खांडवे धूमकेतुः स राक्षसानुरगांश्चावजित्य सर्वत्रगः
सर्वमग्नौ जुहोति २५ स एव पार्थाय श्वेतमश्वं प्रायच्छत्स एवाश्वानथ सर्वांश्चकार स बंधुरस्तस्य रथस्त्रिचक्रस्त्रिवृच्छिराश्चतुर-
श्वस्त्रिनाभिः २६ स विहायो व्यदधात्पंचनाभिः स निर्ममे गां दिवमंतरिक्षम् सोरण्यानि व्यसृजत्पर्वतांश्च हृषीकेशोमितदीप्ताग्नितेजाः
२७ अलंघयद्वै सरितो जिघांसन् शक्रं वज्रं प्रहरंतं निरास स महेंद्रः स्तूयते वै महाध्वरे विप्रैरेको ऋक्सहस्रैः पुराणैः २८ दुर्वासा वै ते
न नान्येन शक्यो गृहे राजन्वासयितुं महौजाः तमेवाहुर्ऋषिमेकं पुराणं स विश्वकृद्विदधात्यात्मभावान् २९ वेदांश्च यो वेदयतेधिदे
वो विधींश्च यश्चाश्रयते पुराणान् कामे वेदे लौकिके यत्फलं च विष्वक्सेनः सर्वमेतत्प्रतीहि ३० ज्योतींषि शुक्लानि हि सर्वलोके त्रयो लो
का लोकपालास्त्रयश्च त्रयोग्नयो व्याहृतयश्च तिस्रः सर्वे देवा देवकीपुत्र एव ३१ संवत्सरः स ऋतुः सोर्द्धमासः सोहोरात्रः स कला वै
स काष्ठा मात्रा मुहूर्त्ताश्च लवाः क्षणाश्च विष्वक्सेनः सर्वमेतत्प्रतीहि ३२ चंद्रादित्यौ ग्रहनक्षत्रताराः सर्वाणि पर्वाण्यथ पौर्णमासम्
नक्षत्रयोगा ऋतवश्च पार्थ विष्वक्सेनात्सर्वमेतत्प्रसूतम् ३३ रुद्रादित्या वसवो याश्विनौ च साध्याश्च विश्वे मरुतां गणाश्च प्रजापति
देवमाता दितिश्च सर्वे कृष्णादृषयश्चैव सप्त ३४ वायुर्भूत्वा विक्षिपते च विश्वमग्निर्भूत्वा दहते विश्वरूपः आपो भूत्वा मज्जयते च
सर्वं ब्रह्मा भूत्वा सृजते सर्वसंघान् ३५

स संकल्पाश्चत्वारो ऽश्वा यस्य त्रिनाभिः शुक्लकृष्णशुक्लकृष्णं त्रिविधकर्मगर्भः २६ पंचनाभिः पांचभौतिकः
पंचभूतानां नाभिराश्रय इत्यर्थः २७ निरास पराभूतवान् २८ २९ विधीन् अग्निहोत्रादीन् ३० ३१ ३२ ३३ ३४ ३५ ६५

वेद्यंवेदप्रतिपाद्यंज्ञेयं ३६ ३७ ३८ अनिरुद्धंअहंकारं पंचधापचप्रकारंदेवासुरमनुष्यश्वापदतिर्यग्रूपेणपंचजनाःपंचभूतानितैरुपपन्नंविश्वंसिसृक्षुरा
ज्ञापयतीतिपूर्वेणान्वयः ३९ चतुर्विधंजरायुजादि ४० पंचबीजांचतुर्विधभूतग्रामःकर्मचतेषांबीजभूता ४१ ४२ ४३ ४४ ४५ अतः

वेद्यंचयद्वेदयतेचवेद्यंविधिश्चयश्चाश्रयतेविधेयम् धर्मेचवेदेचबलेचसर्वंचराचरंकेशवंत्वंप्रतीहि ३६ ज्योतिर्भूतःपरमोसौपुरस्ता
त्प्रकाशतेयत्प्रभयाविश्वरूपः अपःसृष्ट्वासर्वभूतात्मयोनिःपुराकरोत्सर्वमेवाथविश्वम् ३७ ऋतूनुत्पातान्विविधान्यद्भुतानिमेघा
न्विद्युत्सर्वमैरावतंच सर्वंकृष्णात्स्थावरंजगमंचविश्वात्मानंविश्वमेनंप्रतीहि विश्वावासंनिर्गुणंवासुदेवंसंकर्षणंजीवभूतंवदंति
३८ ततःप्रद्युम्नमनिरुद्धंचतुर्थमाज्ञापयत्यात्मयोनिर्महात्मा सपंचधापंचजनोपपन्नंसंचोदयन्विश्वमिदंसिसृक्षुः ३९ ततश्च
काराविनिमारुतंचापिखंज्योतिरंभश्चतथैवपार्थ सस्थावरंजंगमंचैवमेतच्चतुर्विधंलोकमिमंचकृत्वा ४० ततोभूमिंव्यदधात्पंचबीजांद्यौः
पृथिव्यांधास्यतिभूरिवारि तेनविश्वंकृतमेतद्धिराजन्सजीवयत्यात्मनैवात्मयोनिः ४१ ततोदेवानसुरान्मानवांश्चलोकानृषींश्चापि
पितृन्प्रजाश्च समासेनविधिवत्प्राणिलोकान्सर्वान्सदाभूतपतिःसिसृक्षुः ४२ शुभाशुभंस्थावरंजंगमंचविष्वक्सेनात्सर्वमेत-
त्प्रतीहि यद्वर्ततेयच्चभविष्यतीहसर्वंह्येतत्केशवंत्वंप्रतीहि ४३ मृत्युश्चैवप्राणिनामंतकालेसाक्षात्कृष्णःशाश्वतोधर्मवाहः भू-
तंचयच्चेहनविद्मकिंचिद्विष्वक्सेनात्सर्वमेतत्प्रतीहि ४४ यत्प्रशस्तंचलोकेषुपुण्यंयच्चशुभाशुभम् तत्सर्वंकेशवोचिंत्योविपरी
तमतःपरम् ४५ एतादृशःकेशवोऽतश्चभूयोनारायणःपरमश्चाव्ययश्च मध्यमाद्यंतोस्यजगतस्तस्थुषश्चबुभूषतांप्रभवश्चाव्य
यश्च ४६ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेमहापुरुषमाहात्म्यनामशतोपरिएकोनषष्टितमोऽध्यायः १५९
युधिष्ठिरउवाच ब्रूहिब्राह्मणपूजायांव्युष्टिंत्वंमधुसूदन वेत्तात्वमस्यचार्थस्यवेदत्वांहिपितामहः १ वासुदेवउवाच
शृणुष्वावहितोराजन्द्विजानांभरतर्षभ यथातत्त्वेनवदतोगुणान्वैकुरुसत्तम २ द्वारवत्यांसमासीनंपुरामांकुरुनंदन प्रद्युम्नःपरि
पप्रच्छब्राह्मणैःपरिकोपितः ३ किंफलंब्राह्मणेष्वस्तिपूजायांमधुसूदन ईश्वरत्वंकुतस्तेषामिहैवचपरत्रच ४ सदाद्विजाती-
न्संपूज्यकिंफलंतत्रमानद एतद्ब्रूहिस्फुटंसर्वंसुमहान्संशयोत्रमे ५

केशवात्यत्परंकल्प्यतेतद्विपरीतम् असन्मार्गइत्यर्थः ४६
इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेटीकायांशतोपरिएकोनषष्टितमोऽध्यायः १५९ १ २ ३ ४ ५ ६ ७

इत्युक्तेवचनेतस्मिन्प्रद्युम्नेनतथात्वहम् प्रत्यब्रुवंमहाराजयत्तच्छृणुसमाहितः ६ युधिष्ठिंब्राह्मणपूजायांरौक्मिणेयनिबोधमे एतेहि
सोमराजानईश्वराःसुखदुःखयोः ७ अस्मिन्लोकेरौक्मिणेयतथामुष्मिंश्चपुत्रक ब्राह्मणप्रमुखंसौम्यनमेत्रास्तिविचारणा ८ ब्रा
ह्मणप्रतिपूजायामायुःकीर्त्तिर्यशोबलम् लोकालोकेश्वराश्चैवसर्वेब्रह्मणपूजकाः ९ त्रिवर्गेचापवर्गेचयशःश्रीरोगशांतिषु देव
तापितृपूजासुसंतोष्याश्चैवनोद्विजाः १० तत्कथंवैनाद्रियेयमीश्वरोस्मीतिपुत्रक मातेमन्युर्महाबाहोभवत्वत्रद्विजान्प्रति ११ ब्रा
ह्मणाहिमहद्भूतमस्मिन्लोकेपरत्रच भस्मकुर्युर्जगदिदंक्रुद्धाःप्रत्यक्षदर्शिनः १२ अन्यानपिसृजेयुश्चलोकान्लोकेश्वरांस्तथा
कथंतेषुनवर्त्तेरन्सम्यग्ज्ञानात्सुतेजसः १३ अवसन्मद्गृहेतातब्राह्मणोहरिपिंगलः चीरवासाबिल्वदंडीदीर्घश्मश्रुःकृशोमहान
१४ दीर्घेभ्यश्चमनुष्येभ्यःप्रमाणादधिकोभुवि सस्वैरंचरतेलोकान्येदिव्यायेचमानुषाः इमांगाथांगायमानश्चत्वरेषुसभासुच १५
दुर्वाससंवासयेत्कोब्राह्मणंसत्कृतंगृहे रोषणःसर्वभूतानांसूक्ष्मेप्यपकृतेकृते परिभाषांचमेश्रुत्वाकोनुदद्यात्प्रतिश्रयम् १६ यो
मांकश्चिद्वासयीतनसमांकोपयेदिति यस्मान्नाद्रियतेकश्चित्ततोहंसमवासयम् ससंभुंक्तेसहस्राणांबहूनामन्नमेकदा १७ ए
कदासोल्पकंभुंक्तेनचैवैतिपुनर्गृहान् अकस्माच्चप्रहसतितथाकस्मात्प्ररोदिति १८ नचास्यवयसातुल्यःपृथिव्यामभवत्तदा
अथस्वावसथंगत्वासशय्यास्तरणानिच १९ कन्याश्चालंकृतादग्ध्याततोव्यपगतःपुनः अथमामब्रवीद्भूयःसमुनिःसंशितव्र-
तः २० कृष्णापायसमिच्छामिभोक्तुमित्येवसत्वरः तदेवतुमयातस्यचित्तज्ञेनगृहेजनः २१ सर्वाण्यन्नानिपानानिभक्ष्याश्चोच्चा
वचास्तथा भवंतुसत्कृतानीहपूर्वमेवप्रचोदितः २२ ततोहंज्वलमानंवैपायसंप्रत्यवेदयम् तंभुक्त्वैवसतुक्षिप्रंततोवचनमब्रवीत्
२३ क्षिप्रमंगानिलिंपस्वपायसेनेतिसस्मह अविमृश्यैवचततःकृतवानस्मितत्तथा २४ तेनोच्छिष्टेनगात्राणिशिरश्चैवाभ्यमृक्षय
म् सददर्शतदाभ्याशेमातरंतेशुभाननाम् २५ तामपिस्मयमानांसपायसेनाभ्यलेपयत् मुनिःपायसदिग्धांगीरथेतूर्णमयोजय
त् २६ तमारुह्यरथंचैवनिर्ययौसगृहान्मम अग्निवर्णोज्वलन्धीमान्सद्विजोरथधुर्यवत् २७ प्रतोदेनातुदद्बालांरुक्मिणीममप
श्यतः नचमेस्तोकमप्यासीद्दुःखमीर्ष्याकृतंतया २८

२९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५

तथासराजमार्गेणमहतानिर्ययौबहिः तदृष्ट्वामहदाश्चर्यंदाशार्हाजातमन्यवः २९ तत्राजल्पन्मिथःकेचित्समाभाष्यपरस्परम् ब्रा
ह्मणाएवजायेरन्नान्योवर्णःकथंचन ३० कोह्येनंरथमास्थायजीवेदन्यःपुमानिह आशीविषविषंतीक्ष्णंततस्तीक्ष्णतरोद्विजः ३१
ब्रह्माशीविषदग्धस्यनास्तिकश्चिच्चिकित्सकः तस्मिन्व्रजतिदुर्धर्षेप्रास्खलद्रुक्मिणीपथि ३२ तन्नामर्षयतश्रीमांस्ततस्तूर्णमचोद
यत् ततःपरमसंक्रुद्धोरथात्प्रस्कंद्यसद्विजः ३३ पदातिरुत्पथेनैवप्राद्रवद्दक्षिणामुखः तमुत्पथेनधावंतमन्वधावंद्विजोत्तमम्
३४ तथैवपायसादिग्धःप्रसीदभगवन्निति ततोविलोक्यतेजस्वीब्राह्मणोमामुवाचह ३५ जितक्रोधस्त्वयाकृष्णप्रकृत्यैवमहा-
भुज नतेपराधमिहवैदृष्टवानस्मिसुव्रत ३६ प्रीतोस्मितवगोविंदवृणुकामान्यथेप्सितान् प्रसन्नस्यचमेतातपश्यव्युष्टिंयथाविधि
३७ यावद्देवमनुष्याणामन्नेभावोभविष्यति तथैवान्नेतथातेषांत्वयिभावोभविष्यति ३८ यावच्चपुण्यलोकेषुत्वयिकीर्तिर्भविष्य-
त्रिषुलोकेषुतावच्चवैशिष्ट्यंप्रतिपत्स्यसे ३९ सुप्रियःसर्वलोकस्यभविष्यसिजनार्दन यत्तेभिन्नंचदग्धंवयच्चकिंचिद्विनाशितम्
४० सर्वंतथैवद्रष्टासिविशिष्टंवाजनार्दन यावदेतत्प्रलिप्तंतेगात्रेषुमधुसूदन ४१ अतोमृत्युभयंनास्तियावदिच्छसिचाच्युत
नतुपादतलेलिप्तेकस्मात्तेपुत्रकाद्यवै ४२ नैतन्मेप्रियमित्येवंसमांप्रीतोब्रवीत्तदा इत्युक्तोहंशरीरंस्वंददर्शश्रीसमायुतम् ४३ रु
क्मिणींचाब्रवीत्प्रीतःसर्वस्त्रीणांवरंयशः कीर्तिंचानुत्तमांलोकेसमवाप्स्यसिशोभने ४४ नत्वांजरावारोगोवावैवर्ण्यंचापिभावि
नि स्वल्यंतिपुण्यगंधाश्चकृष्णमाराधयिष्यसि ४५ षोडशानांसहस्राणांवधूनांकेशवस्यह वरिष्ठाचसलोक्याचकेशवस्यभवि
ष्यसि ४६ तवमातरमित्युक्त्वाततोमांपुनरब्रवीत् प्रस्थितःसुमहातेजादुर्वासाग्निरिवज्वलन् ४७ एषैवतेबुद्धिरस्तुब्राह्मणा
न्प्रतिकेशव इत्युक्त्वासतदापुत्रतत्रैवांतरधीयत ४८ तस्मिन्नंतर्हितेचाहमुपांशुव्रतमाचरम् यत्किंचिद्ब्राह्मणोब्रूयात्सर्वंकुर्यामि
तिप्रभो ४९ एतद्व्रतमहंतत्त्वामात्रातेसहपुत्रक ततःपरमहृष्टात्माप्राविशंगृहमेवच ५० प्रविष्टमात्रश्चगृहेसर्वंपश्यामितन्नवं
यद्भिन्नंयच्चवैदग्धंतेनविप्रेणपुत्रक ५१ ततोहंविस्मयंप्राप्तःसर्वंदृष्ट्वानवंदृढम् अपूजयंचमनसारौक्मिणेयसदाद्विजान् ५२

४६ ४७ ४८ ४९ ५० ५१ ५२

५३ ५४ ५५ इतिआनुशासनिकेपर्वणिटीकायांशततोपरिषष्टितमोऽध्यायः १६० दुर्वाससेति अत्रत्रिपुरदाहः अन्धकारादीनांनिंदार्थः उपासकानांस्थूलसूक्ष्म
कारणदेहत्रयरूपाणांतिसृणांपुरांदाहेनसंसारानर्थनिवृत्तिर्महादेवस्यत्रिपुरहंतुःप्रसादादेवभवतीतिप्रदर्शनार्थः १ २ ३ ४ ५ ६ ७

इत्यहंरौक्मिणेयस्यपृच्छतोभरतर्षभ माहात्म्यंद्विजमुख्यस्यसर्वमाख्यातवांस्तदा ५३ तथात्वमपिकौंतेयब्राह्मणान्सततंप्रभो पूज
यस्वमहाभागान्वाग्भिर्दानैश्चनित्यदा ५४ एवंव्युष्टिमहंप्राप्तोब्राह्मणस्यप्रसादजां यच्चमामाहभीष्मोयंतत्सत्यंभरतर्षभ ५५
इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेदुर्वासोभिक्षानामशततोपरिषष्टितमोऽध्यायः १६० युधिष्ठिरउवाच दुर्वास-
सःप्रसादात्तेयत्तदामधुसूदन अवाप्तमिहविज्ञानंतन्मेव्याख्यातुमर्हसि १ महाभाग्यंचयत्तस्यनामानिचमहात्मनः तत्वतोज्ञा
तुमिच्छामिसर्वंमतिमतांवर २ वासुदेवउवाच हंततेकीर्तयिष्यामिनमस्कृत्यकपर्दिने यदवाप्तंमयाराजञ्छ्रेयोयच्चार्जि-
तंयशः ३ प्रयतःप्रातरुत्थाययदधीयेविशांपते प्रांजलिःशतरुद्रीयंतन्मेनिगदितःशृणु ४ प्रजापतिस्तत्ससृजेतपसोंतेमहातपाः
शंकरस्त्वसृजत्तातप्रजाःस्थावरजंगमाः ५ नास्तिकिंचित्परंभूतंमहादेवाद्विशांपते इहत्रिष्वपिलोकेषुभूतानांप्रभवोहिसः ६ नचै-
वोत्सहतेस्थातुंकश्चिदग्रेमहात्मनः नहिभूतंसमंतेनत्रिषुलोकेषुविद्यते ७ गंधेनापिहिसंग्रामेतस्यक्रुद्धस्यशत्रवः विसंज्ञाहतभू
यिष्ठावेपंतेचपतंतिच ८ घोरंचनिनदंतस्यपर्जन्यनिनदोपमम् श्रुत्वाविशीर्येद्धृदयंदेवानामपिसंयुगे ९ यांश्चघोरेणरूपेणप
श्येत्क्रुद्धःपिनाकधृक् नसुरानासुरालोकेनगंधर्वानपन्नगाः १० कुपितेसुखमेधंतेतस्मिन्नपिगुहागताः प्रजापतेश्चदक्षस्ययजतो
विततेक्रतौ ११ विव्याधकुपितोयज्ञंनिर्भयस्तुभवस्तदा धनुषाबाणमुत्सृज्यसघोषंविननादच १२ तेनशर्मकुतःशांतिर्विषादंले
भिरेसुराः विद्धेचसहसायज्ञेकुपितेचमहेश्वरे १३ तेनज्यातलघोषेणसर्वेलोकाःसमाकुलाः बभूवुरवशाःपार्थविषेदुश्चसुरासुराः
१४ आपश्चुक्षुभिरेचैवचकंपेचवसुंधरा व्यद्रवन्गिरयश्चापिद्यौःपफालचसर्वशः १५ अंधेनतमसालोकाःप्रावृतानचकाशिरे
प्रनष्टाज्योतिषांभाश्चसहसूर्येणभारत १६ भृशंभीतास्ततःशांतिंचक्रुःस्वस्त्ययनानिच ऋषयःसर्वभूतानामात्मनश्चहितैषिणः
१७ ततःसोभ्यद्रवद्देवान्क्रुद्धोरुद्रपराक्रमः भगस्यनयनेक्रुद्धःप्रहारेणव्यशातयत् १८ पूषणंचाभिदुद्रावपादेनचरुषान्वितः पु-
रोडाशंभक्षयतोदशनान्वैव्यशातयत् १९ ततःप्रणेमुर्देवास्तेवेपमानाःस्मशंकरम् पुनश्चसंदधेरुद्रोदीप्तंसुनिशितंशरम् २०

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ७ ७ ७ ७

१ २८ २९ ३० ३१ तंचैवेति ग्वमध्यात्मंत्रिपुरदाहेपि क्षरसारात्मकः सूक्ष्म प्रपंचोयावद्देहपातं-

२४ २५ २६ २८ स्वयंभ्वरूपंपुरदग्धुरंकूगतंजीवन्मुक्तप्रतीतिगोचरंजिज्ञासमानाउमाब्रह्म विद्यामयाकृत्स्नबाधेकृतेपिअ

२१ २२ २३ तेंने एवंतंबालंहिरण्यगर्भा

बाधितानुवृत्त्यान

भैः ःप्रसादयामासुःशर्वंतेविबुधोत्तमाः २१ जेपुश्चशतरुद्रीयंदेवाःकृत्वांजलिंतदा संस्तू

त्कमंदृष्ट्वाभीतादेवाःसहर्षि रु स्यभागयज्ञेचविशिष्टंतेनुकल्पयन् भयेनत्रिदशाराजन्छरणंचप्रपेदिरे २३ तेनचैं

रुद्रस्त्रिदशैःप्रसादमहेश्वरः २२ धचापद्धततत्रतत्तथैवानुजीवयत २४ असुराणांपुराण्यासंस्त्रीणिवीर्यवतांदिवि आयसंराज

हतुष्टेनसयज्ञःसंधितोभवत् य शिकृत्तानिमघवाजेतुंसर्वायुधैरपि अथसर्वेऽमरारुद्रंजग्मुःशरणमर्दिताः २६ तत्रऊचुर्महात्मानो

तंचैवसौवर्णमपिचापरम् २५ न ष्यतिपशवःसर्वकर्मसु २७ जहिदैत्यान्सहसुरैर्लोकांस्त्रायस्वमानद सतथोक्तस्तथेत्युक्त्वाकृ

देवाःसर्वेसमागताः रुद्ररौद्राभवि ग्नितथाकृत्वापुंखंवैवस्वतंयमम् वेदान्कृत्वाधनुःसर्वान्ज्यांचसावित्रिमुत्तमाम् २९ ब्रह्माणंसा

त्वाविष्णुंशरोत्तमम् २८ शल्यं पर्वणात्रिशल्येनतेनतानिबिभेदसः ३० शरेणादित्यवर्णेनकालाग्निसमतेजसा तेसुराःसपुरास्त

थिंकृत्वाविनियुज्यचसर्वशः त्रि कगतंदृष्ट्वाबालंपंचशिखंपुनः उमाजिज्ञासमानावैकोयमित्यब्रवीत्तदा ३२ असूयतश्चशक्रस्य

त्रदग्धारुद्रेणभारत ३१ तंचैवां यामासतंबाहुंपरिघोपमम् ३३ नसंबुबुधिरेचैवदेवास्तंभुवनेश्वरम् सप्रजापतयःसर्वेतस्मिन्मुमु

वज्रेणप्रहरिष्यतः सवज्रंस्तंभ्ने गवान्ब्रह्मातमप्रमितौजसम् अयंश्रेष्ठइतिज्ञात्वाववंदेतमुमापतिम् ३५ द्वारवत्याममगृहेचिरंकालं

हरीश्वरे ३४ ततोध्यात्वाचभर्गं सुरुमारुद्रंचतेसुराः ३६ बभूवसतदाबाहुर्बलहंतुर्यथापुरा सचापिब्राह्मणोभूत्वादुर्वासानामवीर्य

मुपावसत् ततःप्रसादयाम् कृस्मसुबहून्ममवेश्मनि तानुदारतयाचाहंचक्षमेचातिदुःसहान् ३८ सवैरुद्रःसचशिवःसोग्निःसर्वः

वान् ३७ विप्रकारान्प्रयुंक्ते युश्चसोश्विनौसचविद्युतः ३९ सचंद्रमाःसचेशानःससूर्योवरुणश्चसः सकालःसोंतकोमृत्युःसयमो-

ससर्वजित् सचैवेंद्रश्चवस र्धमासाऋतवःसंध्येसंवत्सरश्चसः सधातासविधाताचविश्वकर्मासंसर्ववित् ४१ नक्षत्राणिग्रहाश्चैवदि

रात्र्यहानिच ४० मासप वमूर्तिरमेयात्माभगवान्परमद्युतिः ४२ एकधाचद्विधाचैवबहुधाचसएवहि शतधासहस्रधाचतथाश

शोथप्रदिशस्तथा निन

तसहस्रधा ... ३ कोः वशिष्टइत्यब्र वीत्पृष्टवनी तत्रमहादेवस्यप्रत्यगनन्यत्वादनुत्तरमेवोत्तरत्वेनोदितत्वाद्वेदएवमुख्यंप्रमाणंप्रत्यक्षानुमानयो- १९५

व्यभिचरित्वा त्रयरूपाणांतिसृणां नात् ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२एकधाब्रह्मरूपेणद्विधाब्रह्मभेदेनबहुधेत्यादिप्रपंचरूपेण ४३

इहशश्च महादेवोभूयश्च भगवान्सुतः नहिशक्यागुणावक्तुमपिवर्षशतैरपि ४४ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदान-
धर्मेईश्वरप्रशंसानामशतोपरिएकषष्टितमोऽध्यायः १६१ वासुदेवउवाच युधिष्ठिरमहाबाहोमहाभाग्यंमहात्मनः रु-
द्रायबहुरूपायबहुनाम्नेनिबोधमे १ वदंत्यग्निंमहादेवंतथास्थाणुंमहेश्वरम् एकाक्षंत्र्यंबकंचैवविश्वरूपंशिवंतथा द्वेतनूतस्य
देवस्यवेदज्ञाब्राह्मणाविदुः २ घोरामन्यांशिवामन्यांतेतनूबहुधापुनः उग्राघोरातनुर्यस्यसोग्निर्विद्युत्सभास्करः ३ शिवासौ
म्यायाचयात्वस्यधर्मस्त्वापोथचंद्रमाः आत्मनोर्धंतुतस्याग्निःसोमोर्धंपुनरुच्यते ४ ब्रह्मचर्यंचरत्येकाशिवाचास्यतनुस्तथा या
स्यघोरतमामूर्तिर्जगत्संहरतेतथा ५ ईश्वरत्वान्महत्वाच्चमहेश्वरइतिस्मृतः यन्निर्दहतियत्तीक्ष्णोयदुग्रोयत्प्रतापवान् ६ मां
सशोणितमज्जादोयत्ततोरुद्रउच्यते देवानांसुमहान्यच्चयच्चास्यविषयोमहान् ७ यच्चविश्वंमहत्पातिमहादेवस्ततःस्मृतः धू
म्ररूपंचयत्तस्यधूर्जटीत्यतउच्यते ८ समेधयतियन्नित्यंसर्वान्वैसर्वकर्मभिः मनुष्यान्शिवमन्विच्छंस्तस्मादेषशिवःस्मृतः ९ दह
त्यूर्ध्वंस्थितोयच्चप्राणान्नृणांस्थिरश्चयत् स्थिरलिंगश्चयन्नित्यंतस्मात्स्थाणुरितिस्मृतः १० यदस्यबहुधारूपंभूतंभव्यंभवत्तदा स्था
वरंजंगमंचैवबहुरूपस्ततःस्मृतः विश्वेदेवाश्चयत्तस्मिन्विश्वरूपस्ततःस्मृतः ११ सहस्राक्षोयुताक्षोवासर्वतोक्षिमयोपिवा चक्षुषः
प्रभवत्तेजोनास्त्यंतोथास्यचक्षुषी १२ सर्वथायत्पशून्पातितैश्चयद्रमतेसह तेषामधिपतिर्यच्चतस्मात्पशुपतिःस्मृतः १३ नित्येनब्र
ह्मचर्येणलिंगमस्ययदास्थितम् महयत्यस्यलोकश्चप्रियंह्येतन्महात्मनः १४ विग्रहंपूजयेद्योवैलिंगव्यापीमहात्मनः लिंगपूजयिता
नित्यंमहतींश्रियमश्नुते १५ ऋषयश्चापिदेवाश्चगंधर्वाप्सरसस्तथा लिंगमेवार्चयंतिस्मयत्तदूर्ध्वंसमास्थितम् १६ पूज्यमानेततस्त
स्मिन्मोदतेसमहेश्वरः सुखंददातिप्रीतात्माभक्तानांभक्तवत्सलः १७ एषएवश्मशानेषुदेवोवसतिनिर्दहन् यजंतेयेजनास्तत्रवीर-
स्थाननिषेविणः १८ विषयस्थःशरीरेषुसमृत्युःप्राणिनामिह सचवायुःशरीरेषुप्राणापानशरीरिणाम् १९ तस्यघोराणिरूपाणिदी
प्तानिचबहूनिच लोकेयान्यस्यपूज्यंतेविप्रास्तानिविदुर्बुधाः २० नामधेयानिदेवेषुबहून्यस्ययथार्थवत् निरुच्यंतेमहत्वाच्चवि
भुत्वात्कर्मभिस्तथा २१ वेदेचास्यविदुर्विप्राःशतरुद्रीयमुत्तमम् व्यासेनोक्तंचयच्चापिउपस्थानंमहात्मनः २२

प्रदातासर्वलोकानांविश्वंचाप्युच्यतेमहत् ज्येष्ठभूतंवदंत्येनंब्राह्मणाऋषयोपरे २३ प्रथमोह्येषदेवानांमुखादग्निमजीजनत् ग्रहैर्ब
हुविधैःप्राणान्संरुद्धानुत्सृजत्यपि २४ विमुंचतिनपुण्यात्माशरण्यःशरणागतान् आयुरारोग्यमैश्वर्यंवित्तंकामांश्चपुष्कलान् २५
सददातिमनुष्येभ्यःसएवाक्षिपतेपुनः शक्रादिषुचदेवेषुतस्यैश्वर्यमिहोच्यते २६ सएवव्यापृतोनित्यंत्रैलोक्यस्यशुभाशुभे ऐश्व
र्याच्चैवकामानामीश्वरःपुनरुच्यते २७ महेश्वरश्चलोकानांमहतामीश्वरश्चसः बहुभिर्विविधैरूपैर्विश्वंव्याप्तमिदंजगत् २८
तस्यदेवस्ययद्वक्त्रंसमुद्रेवडवामुखम् २९ इतिश्रीमहाभारतेआनुशासनिकेपर्वणिदानधर्मेमहेश्वरमाहात्म्यंनामशतोपरि
द्विषष्टितमोऽध्यायः १६२ वैशंपायनउवाच इत्युक्तवतिवाक्यंतुकृष्णेदेवकिनंदने भीष्मंशांतनवंभूयःपर्यपृच्छद्युधि-
ष्ठिरः १ निर्णयेवामहाबुद्धेसर्वधर्मविदांवर प्रत्यक्षमागमोवेतिकिंतयोःकारणंभवेत् २ भीष्मउवाच नास्त्यत्रसंश-
यःकश्चिदितिमेवर्त्ततेमतिः शृणुवक्ष्यामितेप्राज्ञसम्यक्त्वमनुपृच्छसि ३ संशयःसुगमस्तत्रदुर्गमस्तस्यनिर्णयः दृष्टंश्रुतम
नंतंहियत्रसंशयदर्शनम् ४ प्रत्यक्षंकारणंदृष्ट्वाहैतुकाःप्राज्ञमानिनः नास्तीत्येवंव्यवस्यंतिसत्यंसंशयमेवच ५ तदयुक्तंव्य
वस्यंतिबालाःपंडितमानिनः अथचेन्मन्यसेचैकंकारणंकिंभवेदिति ६ शक्यंदीर्घेणकालेनयुक्तेनातंद्रितेनच प्राणयात्रामने
कांचकल्पमानेनभारत ७ तत्परेणैवनान्येनशक्यंह्येतस्यदर्शनम् हेतूनामंतमासाद्यविपुलंज्ञानमुत्तमम् ८ ज्योतिःसर्वस्य
लोकस्यविपुलंप्रतिपद्यते नत्वेनगमनंराजन्हेतुतोगमनंतथा अग्राह्यमनिबद्धंचवाचासंपरिवर्जयेत् ९ युधिष्ठिरउवा
च प्रत्यक्षंलोकतःसिद्धिर्लोकश्चागमपूर्वकः शिष्टाचारोबहुविधस्तन्मेब्रूहिपितामह १० भीष्मउवाच धर्मस्याक्रि
यमाणस्यबलवद्भिर्दुरात्मभिः संस्थायत्नैरपिकृताकालेनप्रतिभिद्यते ११ अधर्मोधर्मरूपेणतृणैःकूपइवावृतः ततस्तैर्भिद्यतेवृत्तं
शृणुचैवयुधिष्ठिर १२ अवृत्तायेतुभिंदंतिश्रुतित्यागपरायणाः धर्मविद्वेषिणोमंदाइत्युक्तस्तेषुसंशयः १३ अतृप्यंतस्तुसाधूनाम
एवागमबुद्धयः परमित्येवसंतुष्टास्तानुपास्वचपृच्छच १४ कामार्थौपृष्ठतःकृत्वालोभमोहानुसारिणौ धर्मइत्येवसंबु
द्धास्तानुपास्वचपृच्छच १५

३ ४ ५ ६ ७ ८ ९ १० ११ वृत्तंशिष्टाचारः १२ भिंदंतिवृत्तंतेषुप्रत्यक्षानुगमनाचा
रेषु १३ अतृप्यंतःनित्यंसोत्कंठाः आगमजन्याःबुद्धयोयेषांतेएवपरंश्रेष्ठंप्रमाणमित्यन्वयः १४ १५ ७ ७ ७ ७ ७ ७ ७

नेतिवृत्तंप्रत्यक्षदृश्यंशीलम् आचारः शौचादिः कारणंवेदः त्रयंमिलित्वाएकोधर्मः सधर्मःसाधनीयइत्यर्थः स्वाध्यायकर्मवेदरक्षार्थमाचारांतर्गतमेवज्ञेयम् १६
१७ वेदइतिप्रमाणभेदात्प्रमेयैर्धर्मैरपित्रिभिर्भवितव्यं १८ कथमेकोधर्मस्त्रितयप्रतिपाद्यइत्याशंक्याह धर्मस्येतिहेराजन्यद्येवंधर्मत्रयंमन्य सेतन्नेतिशेषः
किंतुक्रियमाणस्यैकस्यैवधर्मस्यत्रिधात्रिप्रकाराविचारणा एकएवप्रमाणत्रयसंवादेनपरीक्षणीयइत्यर्थः १९ त्रिधेत्यस्यव्याख्यानंएकएवेतित्रयाणांप्रमाणा

नतेषांभिद्यतेवृत्तंयज्ञाःस्वाध्यायकर्मच आचारःकारणंचैवधर्मश्चैकस्त्रयंपुनः १६ युधिष्ठिरउवा० पुनरेवहिमेबुद्धिःसंशयेप
रिमुह्यति अपारेमार्गमाणस्यपरंतीरमपश्यतः १७ वेदःप्रत्यक्षमाचारःप्रमाणंतत्त्रयंयदि पृथक्त्वंलभ्यतेचैषां धर्मश्चैकस्त्रयंकथम्
१८ भीष्मउवाच धर्मस्यक्रियमाणस्यबलवद्भिर्दुरात्मभिः यद्येवंमन्यसेराजंस्त्रिधाधर्मविचारणा १९ एकएवेतिजानीहि त्रिधाधर्म
स्यधारणम् पृथक्त्वेचनमेबुद्धिस्त्रयाणामपिवैतथा २० उक्तोमार्गस्त्रयाणांवैतत्तथैवसमाचर जिज्ञासातुनकर्तव्याधर्मस्यतुनतर्कणा
त् २१ सदैवभरतश्रेष्ठमातेभूदत्रसंशयः अंधोजडइवाशंकीयद्ब्रवीमितदाचर २२ अहिंसासत्यमक्रोधोदानमेतच्चतुष्टयम् अजात
शत्रोसेवस्वधर्मएषसनातनः २३ ब्राह्मणेषुचवृत्तिर्यापितृपैतामहोचिता तामन्वेहिमहाबाहोधर्मस्यैतेहिदेशिकाः २४ प्रमाणमप्र
माणंवैयःकुर्यादबुधोजनः नसप्रमाणतामर्होविवादजननोहिसः २५ ब्राह्मणानेवसेवस्वसत्कृत्यबहुमन्यच एतेष्वेवत्विमेलोकाःकृ
त्स्नाइतिनिबोधतान् २६ युधिष्ठिरउवाच येचधर्ममसूयंतेयेचैनंपर्युपासते ब्रवीतुमेभवानेतत्क्वतेगच्छंतिताद्दशाः २७ भी
ष्मउवाच रजसातमसाचैवसमवस्तीर्णचेतसः नरकंप्रतिपद्यंतेधर्मविद्वेषिणोजनाः २८ येतुधर्मंमहाराजसततंपर्युपासते सत्यार्जव
पराःसंतस्तेवैस्वर्गभुजोनराः २९ धर्मएवगतिस्तेषामाचार्योपासनाद्भवेत् देवलोकंप्रपद्यंतेयेधर्मंपर्युपासते ३० मनुष्यायदिवादेवाःश
रीरमुपताप्यवै धर्मिणःसुखमेधंतेलोभद्वेषविवर्जिताः ३१ प्रथमंब्राह्मणाःपुत्रधर्ममाहुर्मनीषिणः धर्मेणपर्युपासंतेफलंपक्वमिवाश
यः ३२ युधिष्ठिरउवाच असतांकीदृशंरूपंसाधवःकिंचकुर्वते ब्रवीतुमेभवानेतत्संतोऽसंतश्चकीदृशाः ३३ भीष्मउवाच दुरा
चाराश्चदुर्धर्षादुर्मुखाश्चाप्यसाधवः साधवःशीलसंपन्नाःशिष्टाचारस्यलक्षणम् ३४

नांपृथक्त्वेऽप्येकत्वात्त्रयेणधर्मप्रतिपादकत्वेममबुद्धिर्नच २०
यदुक्तइतिप्रत्यक्षस्यातींद्रियेधर्मेप्रमाणाभावात् आचारस्यचप्रध्वंसित्वात् त्रयाणांप्रमाणानांमध्येपरिशेषात् यदुक्तःवेदेसएवमार्गः नतुपरिनर्कणात् ध
र्मस्यविचारः कर्तव्यइत्यर्थः २१ अत्रवेदे अशंकीशंकाशून्यः २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ आशयोभोक्तुर्मनः ३२ कीदृशाःकिंलक्षणाःकिंकर्माणश्च
३३ ३४

धर्मार्थस्यधर्मफलस्यदर्शनात्यदाधर्मएवश्रेयस्करइतिबुद्धिर्भवेत्तदायंधर्मात्माधर्मचित्तः धर्मेआश्वसीत विश्वासंकुर्वीत अदृढबुद्धिस्तुनविश्वसेत्धर्मफले
३ एतावद्धर्मेविश्वासवत्वंउभयवित्कर्तव्याकर्तव्यवित् ४ राजसामलिनाः ५ धर्मःकदाप्यधर्मोभवेदित्याह नहीति अधर्मतयादुःखहेतुतया ६ ७ एतौविशु
द्धनाधर्मास्पर्शौ ८ नयेत्धर्ममितिशेषः धर्मेणधर्मानुष्ठानार्थंइतरैरुच्यमानःप्रेर्यमाणःसन्सर्वलोकभयच्छलेनतेषांप्रतारणेप्रवर्तते यदास्वंनिस्तारंस्वयमे
वाचरेदित्याह नलिति नयेत्ऊर्ध्वमितिशेषः किंतुधर्मभयलोकभययोश्छलेननिरतिनिमित्तधर्मेणहेतुनाअर्थात्प्राज्ञेनउच्यते मानवएवनरःऊर्ध्वंगच्छतीति
शेषः ९ शूद्रोहमित्यादिवदन्नितियोज्यं अपरेसाधवःनउपदधति नछलंकुर्वंति यथाधिकारंधर्मंकुर्वंति नछलमित्यर्थः तस्मात्सवर्णानासवर्ण्यर्थैवेतिभा-

यदात्वस्यभवेद्बुद्धिर्धर्मार्थस्यप्रदर्शनात् तदाश्वसीतधर्मात्मादृढबुद्धिर्नविश्वसेत् ३ एतावन्मात्रमेतद्धिभूतानांप्राज्ञलक्षणम् का
लयुक्तोप्युभयवित्छ्रेयंयुक्तंसमाचरेत् ४ तथाह्युपस्थितैश्वर्याःप्रजायंतेनराजसाः एवमेवात्मनात्मानपूजयंतीहधार्मिकाः ५ नत्वधर्मं
धर्मभयाद्धर्मंदद्यात्कालःकथंचन तस्माद्विशुद्धमात्मानंजानीयाद्धर्मचारिणम् ६ स्प्रष्टुमप्यसमर्थोहिज्वलंतमिवपावकम् अधर्मःसंत
तोधर्मःकालेनपरिरक्षति ७ कार्यावेतौहिधर्मेणधर्मोहिविजयावहः त्रयाणामपिलोकानामालोकःकरणंभवेत् ८ नतुकश्चिन्नये
त्प्राज्ञोगृहीत्वैवकरेनरम् उच्यमानस्तुधर्मेणधर्मलोकभयच्छले ९ शूद्रोहंनाधिकारोमेचतुराश्रम्यसेवने इतिविज्ञानमपरेनात्मस्यु-
पदधत्यत १० विशेषणंचवक्ष्यामिचातुर्वर्ण्यस्यलिंगतः पंचभूतशरीराणांसर्वेषांसदृशात्मनाम् ११ लोकधर्मंचधर्मंचविशेषकरण
कृतम् यथैकत्वंपुनर्यांतिप्राणिनस्तत्रविस्तरः १२ अध्रुवोहिकथंलोकःस्मृतोधर्मःकथंध्रुवः यत्रकालोध्रुवस्तातनत्रधर्मःसनातनः १३

वः १० विशेषेणेतियुग्मंसर्वेषांप्राणिनांपुरुषाणांवा पांचभौतिकत्वेप्रत्यक्षेपिविशेषकरणंइदंपवित्रमिदमपवित्रमिति व्यवस्थापनंलोकधर्मेशास्त्रीय
धर्मेचनिमित्तेसतिकृतं पशुपामर पंडितानांयथापुनर्विहितेनैतेएकत्वंप्राकृतंगच्छेयुरितिशास्त्रेणधर्मनियमःकृतइत्यर्थः ११ १२ अत्रशं-
कते अध्रुवइति लोकस्यधर्मस्यकार्यकारणाभावात्कार्यस्याध्रुवत्वंकारणस्यध्रुवत्वंचनयुक्तंनंतुनाशमंतरेणपटनाशायोगादित्यर्थः उत्तरमाह
कालःसंकल्पः निष्कामएवतत्फलंनतुसकामइत्यर्थः १३ ७ ७ ७ ७ ७ ७ ७

सर्वेषामिति धर्मसंयुक्तः संकल्पान्नशेषः शिष्यतेनान्यः सचकथमुद्देष्यनीत्यत्राह स्वयंगुरुरिति धर्मबलात्स्वयमेवचसउदेतिनिनशिक्षयेत्यर्थः १४ एवमितियदाभूता-
नांप्राक्कर्मैवतत्रतत्रसुखदुःखसाधनेप्रवर्तकं अतोधर्मसेवनेकर्मफलभोगेअसमंजसेपिभूतानांदोषोनास्ति यतःतिर्यग्योनावपिसतांविद्यमानानांभूतानांसदसत्प्रवृ

सर्वेषांतुल्यदेहानांसर्वेषांसदृशात्मनाम् कालोधर्मेणसंयुक्तःशेषएवस्वयंगुरुः १४ एवंसतिनदोषोस्तिभूतानांधर्मसेवने तिर्यग्योनावपि
सतांलोकएवमतोगुरुः १५ इतिश्रीम० आनुशास० दानधर्मेशतोपरि पंचषष्टितमोऽध्यायः १६५ वैशंपायनउवाच शरतल्प
गतंभीष्मंपांडवोथकुरूद्वहः युधिष्ठिरोहितप्रेप्सुरपृच्छत्कल्मषापहम् १ युधिष्ठिरउवाच किंश्रेयःपुरुषस्येहकिंकुर्वन्सुखमेधते वि
पाप्मासभवेत्केनकिंवाकल्मषनाशनम् २ वैशंपायनउवाच तस्मैशुश्रूषमाणायभूयःशांतनवस्तदा दैवंवंशंयथान्यायमाचष्टपुरुष
र्षभ ३ भीष्मउवाच अयंदैवतवंशोवैऋषिवंशसमन्वितः त्रिसंध्यंपठितःपुत्रकल्मषापहरःपरः ४ यदन्हाकुरुतेपापमिंद्रियैःपु
रुषश्चरन् बुद्धिपूर्वमबुद्धिर्वारात्रौयच्चापिसंध्ययोः ५ मुच्यतेसर्वपापेभ्यःकीर्त्तयन्वैशुचिःसदा नांधोनबधिरःकालेकुरुतेस्वस्तिमा
न्सदा ६ तिर्यग्योनिंनगच्छेच्चनरकंसंकराणिच नचदुःखभयंतस्यमरणेसनमुह्यति ७ देवासुरगुरुर्देवःसर्वभूतनमस्कृतः अचिंत्यो
थाप्यनिर्देश्यःसर्वप्राणोह्ययोनिजः ८ पितामहोजगन्नाथःसावित्रीब्रह्मणःसती वेदभूरथकर्त्ताचविष्णुर्नारायणःप्रभुः ९ उमापतिर्वि
रूपाक्षःस्कंदःसेनापतिस्तथा विशाखोहुतभुग्वायुश्चंद्रसूर्यौप्रभाकरौ १० शक्रःशचीपतिर्देवोयमोधूमोर्णयासह वरुणःसहगौर्याच
सहऋध्याधनेश्वरः ११ सौम्यागौःसुरभिर्देवीविश्रवाश्चमहानृषिः संकल्पःसागरोगंगास्रवंत्योथमरुद्गणाः १२ वालखिल्यास्तपःसि
द्धाःकृष्णद्वैपायनस्तथा नारदःपर्वतश्चैवविश्वावसुर्हाहाहूहूः १३ तुंबरुश्चित्रसेनश्चदेवदूतश्चविश्रुतः देवकन्यामहाभागादिव्याश्चा
प्सरसांगणाः १४ उर्वशीमेनकारंभामिश्रकेशीअलंबुषा विश्वाचीचघृताचीचपंचचूडातिलोत्तमा १५ आदित्यावसवोरुद्राःसाश्विनःपि
तरोपिच धर्मश्रुतंतपोदीक्षाव्यवसायःपितामहः १६ शर्वर्योदिवसाश्चैवमारीचःकश्यपस्तथा शक्रोबृहस्पतिर्भौमोबुधोराहुःशनैश्च
रः १७ नक्षत्राण्यृतवश्चैवमासाःपक्षाःसवत्सराः वैनतेयाःसमुद्राश्चकद्रुजाःपन्नगास्तथा १८ शतद्रुश्चविपाशाचचंद्रभागासरस्वती
सिंधुश्चदेविकाचैवप्रभासंपुष्कराणिच १९ गंगामहानदीवेणाकावेरीनर्मदातथा कुल्पुनाविशल्याचकरतोयाम्बुवाहिनी २० सर
यूर्गंडकीचैवलोहितश्चमहानदः ताम्रारुणावेत्रवतीपर्णाशागौतमीतथा २१

त्तौपूर्वकर्मानुसाराल्लोकएवगुरुर्दृष्टःशिधिनियंत्रितोल्लोकदृष्टांतेनैवसा
धुन्यसाधुनिवाकर्मणिप्रवर्त्ततेइत्यर्थः १५ इतिआ० टीकायांशतोपरिपंचषष्टितमोऽध्यायः १६५ शरतल्पगतमित्यध्यायद्वयंस्पष्टार्थं १ २ ३ ४ ५ ६ ७ ८ ९ १०
११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

गोदावरीचवेणाचकृष्णावेणातथाद्विजा दृषद्वतीचकावेरीवंक्षुर्मंदाकिनीतथा २२ प्रयागंचप्रभासंचपुण्यंनैमिषमेवच तच्चविश्वेश्वरस्था
नंयत्रतद्विमलंसरः २३ पुण्यतीर्थेषुकलिलंकुरुक्षेत्रंप्रकीर्त्तितम् सिंधूत्तमंतपोदानंजंबूमार्गमथापिच हिरण्वतीवितस्ताचतथाप्लक्षवती
नदी वेदस्मृतिर्वेदवतीमालवाथाश्ववत्यपि २५ भूमिभागास्तथापुण्यागंगाद्वारमथापिच ऋषिकुल्यास्तथामेध्यानद्यःसिंधुवहास्तथा
२६ चर्मण्वतीनदीपुण्याकौशिकीयमुनातथा नदीभीमरथीचैवबाहुदाचमहानदी २७ माहेंद्रवाणीत्रिदिवानीलिकाचसरस्वती नंदाचा
परनंदाचतथातीर्थमहान्ह्रदः २८ गयाथफल्गुतीर्थंचधर्मारण्यंसुरैर्वृतं तथादेवनदीपुण्यासरश्चब्रह्मनिर्मितम् २९ पुण्यंत्रिलो
कविख्यातंसर्वपापहरंशिवम् हिमवान्पर्वतश्चैवदिव्यौषधिसमन्वितः ३० विंध्योधातुविचित्रांगस्तीर्थवानौषधान्वितः मेरुर्महेंद्रोमल
यःश्वेतश्चरजतावृतः ३१ शृंगवान्मंदरोनीलोनिषधोदर्दुरस्तथा चित्रकूटोंजनाभश्चपर्वतोगंधमादनः ३२ पुण्यःसोमगिरिश्चैवतथैवा
न्येमहीधराः दिशश्चविदिशश्चैवक्षितिःसर्वेमहीधराः ३३ विश्वेदेवानभश्चैवनक्षत्राणिग्रहास्तथा पांतुनःसततंदेवाःकीर्त्तिताऽकी
र्त्तितामया ३४ कीर्त्तयानोनरोह्येतान्मुच्यतेसर्वकिल्बिषैः स्तुवंश्चप्रतिनंदंश्चमुच्यतेसर्वतोभयात् ३५ सर्वसंकरपापेभ्योदेवतास्त
वनंदकः देवतानंतरंविप्रास्तपःसिद्धांस्तपोधिकान् ३६ कीर्त्तितान्कीर्त्तयिष्यामिसर्वपापप्रमोचनान् यवक्रीतोथरैभ्यश्चकक्षीवानौषि
जस्तथा ३७ भृग्वंगिरास्तथाकण्वोमेधातिथिरथप्रभुः बर्हीचगुणसंपन्नःप्राचींदिशमपाश्रिताः ३८ भद्रांदिशमहाभागाउल्मुचुः
प्रमुचुस्तथा मुमुचुश्चमहाभागःस्वस्त्यात्रेयश्चवीर्यवान् ३९ मित्रावरुणयोःपुत्रस्तथागस्त्यःप्रतापवान् दृढायुश्चोर्ध्वबाहुश्च-
विश्रुतावृषिसत्तमौ ४० पश्चिमांदिशमाश्रित्ययएधंतेनिबोधतान् उषंगुःसहसोदर्यैःपरिव्याधश्चवीर्यवान् ४१ ऋषिर्दीर्घतमा
श्चैवगोतमःकाश्यपस्तथा एकतश्चद्वितश्चैवत्रितश्चैवमहानृषिः ४२ अत्रेःपुत्रश्चधर्मात्मातथासारस्वतःप्रभुः उत्तरांदिशमाश्रि
त्ययएधंतेनिबोधतान् ४३ अत्रिर्वसिष्ठःशक्तिश्चपाराशर्यश्चवीर्यवान् विश्वामित्रोभरद्वाजोजमदग्निस्तथैवच ४४ ऋचीकपुत्रो
रामश्चऋषिरौद्दालकिस्तथा श्वेतकेतुःकोहलश्चविपुलोदेवलस्तथा ४५ देवशर्माचधौम्यश्चहस्तिकाश्यपएवच लोमशोनाचि
केतश्चलोमहर्षणएवच ४६ ऋषिरुग्रश्रवाश्चैवभार्गवश्च्यवनस्तथा एषवैसमवायश्चऋषिदेवसमन्वितः ४७ आद्यःप्रकीर्त्तितोरा
जन्सर्वपापप्रमोचनः नृगोययातिर्नहुषोयदुःपूरुश्चवीर्यवान् ४८.

धुंधुमारोदिलीपश्चसगरश्चप्रतापवान् कृशाश्वोयौवनाश्वश्चचित्राश्वःसत्यवांस्तथा ४९ दुःषंतोभरतश्चैवचक्रवर्तीमहायशाः पवनोजनक
श्चैवतथादृष्टरथोनृपः ५० रघुर्नरवरश्चैवतथादशरथोनृपः रामोराक्षसहावीरःशशबिंदुर्भगीरथः ५१ हरिश्चंद्रोमरुत्तश्चतथादृढ
रथोनृपः महोदयोह्यलर्कश्चऐलश्चैवनराधिपः ५२ करंधमोनरश्रेष्ठःकध्मोरश्चनराधिपः दक्षोंबरीषकुकुरौरैवतश्चमहायशाः ५३
कुरुःसंवरणश्चैवमांधातासत्यविक्रमः मुचुकुंदश्चराजर्षिर्जन्हुर्जान्हविसेवितः ५४ आदिराजःपृथुर्वैन्योमित्रभानुःप्रियंकरः त्रसदस्यु
स्तथाराजाश्वेतोराजर्षिसत्तमः ५५ महाभिषश्चविख्यातोनिमीराजातथाष्टकः आयुःक्षुपश्चराजर्षिःकक्षेयुश्चनराधिपः ५६ प्रतर्द
नोदिवोदासःसुदासःकोसलेश्वरः ऐलोनलश्चराजर्षिर्मनुश्चैवप्रजापतिः ५७ हविध्रश्चपृषध्रश्चप्रतीपःशांतनुस्तथा अजःप्राचीनब
र्हिश्चतथेक्ष्वाकुर्महायशाः ५८ अनरण्योनरपतिर्जानुजंघस्तथैवच कक्षसेनश्चराजर्षिर्येचान्येचानुकीर्तिताः ५९ कल्यमुत्थायोयो
नित्यंसंध्येद्वेस्तमयोदये पठेच्छुचिरनावृत्तःसधर्मफलभाग्भवेत् ६० देवादेवर्षयश्चैवस्तुताराजर्षयस्तथा पुष्टिमायुर्यशःस्वर्गंवि-
धास्यंतिममेश्वराः ६१ माविघ्नमाचमेपापमाचमेपरिपंथिनः ध्रुवोजयोमेनित्यःस्यात्परत्रचशुभागतिः ६२ इतिश्रीम० आनु० दानधर्मेवं-
शानुकीर्त्तननामशतोपरिषट्षष्टितमोऽध्यायः १६६ जनमेजयउवाच शरतल्पगतेभीष्मेकौरवाणांधुरंधरे शयानेवीरशयनेपांड
वैःसमुपस्थिते १ युधिष्ठिरोमहाप्राज्ञोममपूर्वपितामहः धर्माणामागमंश्रुत्वाविदित्वासर्वसंशयान् २ दानानांचविधिंश्रुत्वाछिन्नधर्मा
र्थसंशयः यदन्यदकरोद्विप्रतन्मेशंसितुमर्हसि ३ वैशंपायनउवाच अभूत्मुहूर्त्तंस्तिमितंसर्वंतद्राजमंडलम् तूष्णींभूतेततस्तस्मिन्पटेचि
त्रमिवार्पितम् ४ मुहूर्त्तमिवचध्यात्वाव्यासःसत्यवतीसुतः नृपंशयानंगांगेयमिदमाहवचस्तदा ५ राजन्प्रकृतिमापन्नःकुरुराजोयुधिष्ठि
रः सहितोभ्रातृभिःसर्वैःपार्थिवैश्चानुयायिभिः ६ उपास्तेत्वांनरव्याघ्रसहकृष्णेनधीमता तमिमंपुरयानायसमनुज्ञातुमर्हसि ७ एवमु
क्तोभगवताव्यासेनपृथिवीपतिः युधिष्ठिरंसहामात्यमनुजज्ञेनदीसुतः ८ उवाचचैनंमधुरंनृपंशांतनवोनृपः प्रविशस्वपुरींराजन्व्येतु
तेमानसोज्वरः ९ यजस्वविविधैर्यज्ञैर्बह्वन्नैःस्वाप्तदक्षिणैः ययातिरिवराजेंद्रश्रद्धादमपुरःसरः १० क्षत्रधर्मरतःपार्थपितॄन्देवांश्च
तर्पय श्रेयसायोक्ष्यसेचैवव्येतुतेमानसोज्वरः ११ रंजयस्वप्रजाःसर्वाःप्रकृतीःपरिसांत्वय सुहृदःफलसत्कारैरर्चयस्वयथार्हतः १२
अनुज्ञानात जीवंतुमित्राणिसुहृदस्तथा चैत्यस्थानेस्थितंवृक्षंफलवंतमिवद्विजाः १३ यः १६६ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२
१३ ७.

१४ १५ १६ १७ इतिआनुशासनिकेपर्वणिटीकायांशतोपरिसप्तषष्टितमोऽध्यायः १६७ १ २ ३ ४ ५ ६ ७ ८ ९ १० भीष्मस्याग्नीनिति-

आगंतव्यंचभवतासमयेममपार्थिव विनिवृत्तेदिनकरेप्रवृत्तेचोत्तरायणे १४ तथेत्युक्त्वाचकौंतयःसोभिवाद्यपितामहम् प्रययौसपरीवारोनगरं
नागसाह्वयम् १५ धृतराष्ट्रंपुरस्कृत्यगांधारींचपतिव्रताम् सहितैर्ऋषिभिःसर्वैर्भ्रातृभिःकेशवेनच १६ पौरजानपदैश्चैवमंत्रिवृद्धैश्चपार्थि
व प्रविवेशकुरुश्रेष्ठःपुरंवाराणसाह्वयम् १७ इतिश्रीम० आनु० दानधर्मेभीष्मानुज्ञायांसप्तषष्टित्यधिकशततमोऽध्यायः १६७ वैशंपा
यनउवाच ततःकुंतीसुतोराजापौरजानपदंजनम् पूजयित्वायथान्यायमनुजज्ञेगृहान्प्रति १ सांत्वयामासनारीश्चहतवीराहतेश्वराः वि
पुलैरर्थदानैःसतदापांडुसुतोनृपः २ सोभिषिक्तोमहाप्राज्ञःप्राप्यराज्यंयुधिष्ठिरः अवस्थाप्यनरश्रेष्ठःसर्वासुप्रकृतीस्तदा ३ द्विजेभ्यो
गुणमुख्येभ्योनैगमेभ्यश्चसर्वशः प्रतिगृह्याशिषोमुख्यास्तथाधर्मभृतांवरः ४ उषित्वाशर्वरीःश्रीमान्पंचाशन्नगरोत्तमे समयंकौरवाग्र्य
स्यसंस्मारपुरुषर्षभः ५ सनिर्ययौगजपुराद्याजकैःपरिवारितः दृष्ट्वानिवृत्तमादित्यंप्रवृत्तंचोत्तरायणम् ६ घृतंमाल्यंचगंधांश्चक्षौमा
णिचयुधिष्ठिरः चंदनागुरुमुख्यानितथाकालीयकान्यपि ७ प्रस्थाप्यपूर्वंकौंतेयोभीष्मसंस्करणायवै माल्यानिचवरार्हाणिरत्नानिविवि
धानिच ८ धृतराष्ट्रंपुरस्कृत्यगांधारींचयशस्विनीम् मातरंचपृथांधीमान्भ्रातृंश्चपुरुषर्षभान् ९ जनार्दनेनानुगतोविदुरेणचधीमता यु
युत्सुनाचकौरव्योयुयुधानेनवाविभो १० महताराजभोगेनपरिबर्हेणसंवृतः स्तूयमानोमहातेजाभीष्मस्याग्नीननुव्रजन् ११ निश्चक्रामपुरा
त्तस्माद्यथादेवपतिस्तथा आससादकुरुक्षेत्रेततःशांतनवंनृपम् १२ उपास्यमानंव्यासेनपाराशर्येणधीमता नारदेनचराजर्षेदेवलेनासि
तेनच १३ हतशिष्टैर्नृपैश्चान्यैर्नानादेशसमागतैः रक्षिभिश्चमहात्मानंरक्ष्यमाणंसमंततः १४ शयानंवीरशयनेददर्शनृपतिस्ततः ततोर
थादवातीर्यभ्रातृभिःसहधर्मराट् १५ अभिवाद्याथकौंतेयःपितामहमरिंदमम् द्वैपायनादीन्विप्रांश्चतैश्चप्रत्यभिनंदितः १६ ऋत्विग्भिर्ब्रह्म
कल्पैश्चभ्रातृभिश्चसहाच्युतः आसाद्यशरतल्पस्थमृषिभिःपरिवारितम् १७ अब्रवीद्भरतश्रेष्ठंधर्मराजोयुधिष्ठिरः १८ भ्रातृभिःसह-
कौरव्यशयानंनिम्नगासुतम् युधिष्ठिरोहंनृपतेनमस्तेजान्हवीसुत १९ शृणोषिचेन्महाबाहोब्रूहिकिंकरवाणिते प्राप्तोस्मिसमयेराजन्न
ग्नीनादायतेविभो २० आचार्यान्ब्राह्मणांश्चैवऋत्विजोभ्रातरश्चमे पुत्रश्चतेमहातेजाधृतराष्ट्रोजनेश्वरः २१ उपस्थितःसहामात्योवासु
देवश्चवीर्यवान् हतशिष्टाश्चराजानःसर्वेचकुरुजांगलाः २२ तान्पश्यनरशार्दूलसमुन्मीलयलोचने यच्चेहकिंचित्कर्तव्यंतत्सर्वंप्रापित
मया २३

तेनतस्यापियन्नासीत्त यद्वासंस्कारकानग्नीन् ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ ६७

२४ २५ २६ २७ माघोयमिति सौम्यश्चांद्रःमासस्य चतुर्भागः भागोसार्द्धसप्ततिथ्येभोगस्तान अष्टम्यर्धस्यानतीतत्वेन प्रथमभागस्याविद्यमानत्वात त्रिभागशेषोभवितुमर्हतीत्य

यथोक्तंभवताकालेसर्वमेवचतत्कृतम् वैशंपायनउवाच एवमुक्तस्तुगांगेयःकुंतीपुत्रेणधीमता २४ ददर्शभरतान्सर्वान्स्थितान्संपरिवार्यह तत-
श्चतबलीभीष्मःप्रगृह्यविपुलंभुजम् २५ उद्यन्मेघस्वरोवाग्मीकालेवचनमब्रवीत् दिष्ट्याप्राप्तोसिकौंतेयसहामात्योयुधिष्ठिर २६ परिवृत्तोहिभगवा
न्सहस्रांशुर्दिवाकरः अष्टपंचाशतंरात्र्यःशयानस्याद्यमेगताः शरेषुनिशिताग्रेषुयथावर्षशतंतथा २७ माघोयंसमनुप्राप्तोमासःसौम्योयुधिष्ठिर त्रि
भागशेषःपक्षोयंशुक्लोभवितुमर्हति २८ एवमुक्त्वातुगांगेयोधर्मपुत्रयुधिष्ठिरम् धृतराष्ट्रमथामंत्र्यकालेवचनमब्रवीत् २९ भीष्मउवाच राज
न्विदितधर्मोसिसुनिर्णीतार्थसंशयः बहुश्रुताहितेविप्राबहवःपर्युपासिताः ३० वेदशास्त्राणिसर्वाणिधर्मांश्चमनुजेश्वर वेदांश्चचतुरःसर्वान्नि
खिलेनानुबुध्यसे ३१ नशोचितव्यंकौरव्यभवितव्यंहितत्तथा श्रुतंदेवरहस्यंतेकृष्णद्वैपायनादपि ३२ यथापांडोःसुताराजंस्तथैवतवधर्मतः
तान्पालयस्थितोधर्मेगुरुशुश्रूषणेरतान् ३३ धर्मराजोहिशुद्धात्मानिदेशेस्थास्यतेतव आनृशंस्यपरंह्येनंजानामिगुरुवत्सलम् ३४ तवपुत्राद
रात्मानःक्रोधलोभपरायणाः ईर्ष्याभिभूतादुर्वृत्तास्तान्नशोचितुमर्हसि ३५ वैशंपायनउवाच एतावदुक्त्वावचनंधृतराष्ट्रंमनीषिणम् वा
सुदेवंमहाबाहुमभ्यभाषतकौरवः ३६ भीष्मउवाच भगवन्देवदेवेशसुरासुरनमस्कृत त्रिविक्रमनमस्तुभ्यंशंखचक्रगदाधर ३७ वासुदे
वोहिरण्यात्मापुरुषःसविताविराट् जीवभूतोनुरूपस्त्वंपरमात्मासनातनः ३८ त्वद्भक्तस्त्वद्गतमनाःसदास्म्यपरिग्रहः त्रायस्वपुंडरीकाक्षपुरु
षोत्तमनित्यशः ३९ अनुजानीहिमांकृष्णवैकुंठपुरुषोत्तम रक्ष्याश्चतेपांडवेयाभवान्येषांपरायणम् उक्तवानस्मिदुर्बुद्धिंमंदंदुर्योधनंतदा ४०
यतःकृष्णस्ततोधर्मोयतोधर्मस्ततोजयः वासुदेवेनतीर्थेनपुत्रसंशाम्यपांडवैः संधानस्यपरःकालस्तवेतिचपुनःपुनः ४१ नचमेतद्व-
चोमूढःकृतवान्ससुमंदधीः घातयित्वेहपृथिवींततःसनिधनंगतः ४२ त्वांतुजानाम्यहंवीरपुराणमृषिसत्तमम् नरेणसहितंवीर
बदर्यांसुचिरोषितम् ४३ तथामेनारदःप्राहव्यासश्चसुमहातपाः नरनारायणावेतौसंभूतौमनुजेष्विति ४४ समात्वमनुजानीहि
कृष्णमोक्ष्येकलेवरम् त्वयाहंसमनुज्ञातोगच्छेयंपरमांगतिम् ४५ वासुदेवउवाच अनुजानामिभीष्मत्वांवसून्प्रा-
प्नुहिपार्थिव नतेस्तिवृजिनंकिंचिदिहलोकेमहाद्युते ४६ पितृभक्तोसिराजर्षेमार्कंडेयइवापरः तेनमृत्युस्तववशेस्थितोभृत्यइवा
नतः ४७ वैशंपायनउवाच एवमुक्तस्तुगांगेयःपांडवानिदमब्रवीत् धृतराष्ट्रमुखांश्चापिसर्वांश्चसुहृदस्तथा ४८
प्राणानुत्स्रष्टुमिच्छामितत्रानुज्ञातुमर्हथ सत्येषुयतितव्यंवःसत्यंहिपरमंबलम् ४९

र्थः तेनाद्याष्टमीत्यर्थः २८ २९ ३०
३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९

५० ५१ ५२ इतिदानधर्मेटीकायांशतोपरिअष्टषष्टितमोऽध्यायः १६८ एवमुक्त्वेति १ धारणास्र आधारादिषुस्थानेषुयथाक्रमंमूलाधारात्स्वाधिष्ठानं ततोमणिपूरंततोनाहतंततोविशुद्धिंततोआज्ञमेवंक्रमेणमनःसहितंवायुंनिरुन्धन् उपर्युपर्यानीतवानित्यर्थः २ ३ यद्यदितिमार्गेणमुक्तंगात्रंप्रशिथिलावयवं

आनृशंस्यपरैर्भाव्यंसदैवनियतात्मभिः ब्रह्मण्यैर्धर्मशीलैश्चतपोनित्यैश्चभारताः ५० इत्युक्त्वासुहृदःसर्वान्संपरिष्वज्यचैवह पुनरेवा
ब्रवीद्धीमान्युधिष्ठिरमिदंवचः ५१ ब्राह्मणाश्चैवतेनित्यंप्राज्ञाश्चैवविशेषतः आचार्याऋत्विजश्चैवपूजनीयाजनाधिप ५२ इतिश्रीमहा
आनुशासनिकेप॰दानधर्मेशतोपरिअष्टषष्टितमोऽध्यायः १६८ वैशंपायनउवाच एवमुक्त्वाकुरून्सर्वान्भीष्मःशांतनवस्तदा तूष्णीं
बभूवकौरव्यःसमुहूर्तमरिंदम १ धारयामासचात्मानंधारणासुयथाक्रमम् तस्योर्ध्वमगमन्प्राणाःसन्निरुद्धामहात्मनः २ इदमाश्चर्य
मासीच्चमध्येतेषांमहात्मनाम् सहितैर्ऋषिभिःसर्वैस्तदाव्यासादिभिःप्रभो ३ यद्यन्मुंचतिगात्रंहिसशांतनुसुतस्तदा तत्तद्विशल्यंभवति
योगयुक्तस्यतस्यवै ४ क्षणेनप्रेक्षतांतेषांविशल्यःसोऽभवत्तदा ५ तंदृष्ट्वाविस्मिताःसर्वेवासुदेवपुरोगमाः सहतैर्मुनिभिःसर्वैस्तदाव्यासा
दिभिर्नृप ६ सन्निरुद्धस्तुतेनात्मासर्वेष्वायतनेषुच जगामभित्वामूर्धानंदिव्यमभ्युत्पपातच ७ देवदुंदुभिनादश्चपुष्पवर्षैःसहाभवत् सिद्धाब्र
ह्मर्षयश्चैवसाधुसाध्वितिहर्षिताः ८ महोल्केवचभीष्मस्यमूर्धदेशाज्जनाधिप निःसृत्याकाशमाविश्यक्षणेनांतरधीयत ९ एवंसराजशार्दूल
नृपःशांतनवस्तदा समयुज्यतकालेनभरतानांकुलोद्वहः १० ततस्त्वादायदारूणिगंधांश्चविविधान्बहून् चितांचक्रुर्महात्मानःपांडवाविदुरस्त
था ११ युयुत्सुश्चापिकौरव्यःप्रेक्षकास्त्वितरेभवन् युधिष्ठिरश्चगांगेयंविदुरश्चमहामतिः १२ छादयामासतुरुभौक्षौमैर्माल्यैश्चकौरवम् धार
यामासतस्याथयुयुत्सुश्छत्रमुत्तमम् १३ चामरव्यजनेशुभ्रेभीमसेनार्जुनावुभौ उष्णीषेपरिगृह्णीतांमाद्रीपुत्रावुभौतथा १४ स्त्रियःकौरव
नाथस्यभीष्मंकुरुकुलोद्वह तालवृंतान्युपादायपर्यवीजंतसर्वशः ततोऽस्यविधिवच्चक्रुःपितृमेधंमहात्मनः १५ यजनंबहुशश्चाग्नेर्जगुःसा
मानिसामगाः ततश्चंदनकाष्ठैश्चतथाकालीयकैरपि कालागुरुप्रभृतिभिर्गंधैश्चोच्चावचैस्तथा १६ समवच्छाद्यगांगेयंसंप्रज्वाल्यहुताशनं
अपसव्यमकुर्वंतधृतराष्ट्रमुखाश्चिताम् १७ संस्कृत्यचकुरुश्रेष्ठंगांगेयंकुरुसत्तमाः जग्मुर्भागीरथींपुण्यामृषिजुष्टांकुरूद्वहाः १८ अनुग
म्यमानाव्यासेननारदेनासितेनच कृष्णेनभरतस्त्रीभिर्येचपौराःसमततः १९ उदकंचक्रिरेचैवगांगेयस्यमहात्मनः विधिवत्क्षत्रियश्रेष्ठाः
सचसर्वोजनस्तथा २० ततोभागीरथीदेवीतनयस्योदकेकृते उत्थायसलिलात्तस्माद्रुदतीशोकविह्वला २१

संयोगंसत्वममपिशरंधारयितुमक्षममभूत् अन-
स्तत्तदंगंविशल्यमभूदित्यर्थः ४ ५ ६ आत्माप्राणसंयुक्तंमनः ७ ८ ९ १० ११ १२ १३ उष्णीषेकिरीटशिरोवस्त्रे उष्णीषंतुशिरोवेष्टेकिरीटेलक्षणांतरे इतिमेदिनी १४ १५ १६

२२ २३ २४ २५ २६ २७ २८ २९ ३० मरणजंशोकमपनयति वसुरेषइति देवस्यमानुषत्वंनरकतुल्यंअतोयंहीनस्थानादुत्तमंलोकंगतोनशो
च्यइत्यर्थः ३१ नीचहस्तेनमरणंजातंशोकंदूरीकरोति सएषइति ३२ अर्जुनमपिनशप्स्य नीतिशंकयातस्यमृत्युभयमेवनास्तीत्याहभीष्महीति, ३३ ३४ ३५
३६ ३७ ३८ गोपालंभूम्निदेवेशिवमुपनिषदिब्रह्मविल्लक्षणार्यं तर्केधीरेसमिश्नानुफणिपति भणितोपोलगंगाधरार्यं भट्टंनारायणंयोगुरुमकृतनंदक्षिणामूर्त्यु-

परिदेवयतीतत्रकौरवानभ्यभाषत निबोधतयथावृत्तमुच्यमानंमयानघाः २२ राजवृत्तेनसंपन्नःप्रज्ञयाभिजनेनच सत्कर्त्ताकुरुवृ-
द्धानापितृभक्तोमहाव्रतः २३ जामदग्न्येनरामेणयःपुरानपराजितः दिव्यैरस्त्रैर्महावीर्यःसहतोद्यशिखण्डिना २४ अश्मसारमयंनू
नंहृदयंममपार्थिवाः अपश्यन्त्याःप्रियंपुत्रंयन्नदीर्यतिमेद्यवै २५ समेतपार्थिवंक्षत्रंकाशिपुर्यांस्वयंवरे विजित्यैकरथेनैषकन्यास्त्वा-
यजहारह २६ यस्यनास्तिबलेतुल्यःपृथिव्यामपिकश्चन हतंशिखण्डिनाश्रुत्वानविदीर्येतयन्मनः २७ जामदग्न्यःकुरुक्षेत्रेयुधिये
नमहात्मना पीडितोनातियत्नेनसहतोद्यशिखण्डिना २८ एवंविधंबहुतदाविलपतींमहानदीम् आश्वासयामासतदागंगांदामो-
दरोविभुः २९ समाश्वसिहिभद्रेत्वमाशुचःशुभदर्शने गतःसपरमंलोकंतवपुत्रोनसंशयः ३० वसुरेषमहातेजाःशापदोषेणशो
भने मानुषत्वमनुप्राप्तोनैनंशोचितुमर्हसि ३१ सएषक्षत्रधर्मेणअयुध्यतरणाजिरे धनंजयेननिहतोनैषदेविशिखण्डिना ३२
भीष्मंहिकुरुशार्दूलमुद्यतेषुमहारणे नशक्तःसंयुगेहंतुंसाक्षादपिशतक्रतुः ३३ स्वच्छंदतस्तवसुतोगतःस्वर्गंशुभानने नशक्ता
विनिहंतुंहिरणेतंसर्वदेवताः ३४ तस्मात्त्वंसरितांश्रेष्ठेशोचस्वकुरुनंदनम् वसुरेषगतोदेविपुत्रस्तेविज्वराभव ३५ वैशंपा
यनउवाच. इत्युक्तासातुकृष्णेनव्यासेनतुसरिद्वरा त्यक्त्वाशोकंमहाराजस्ववार्यवततारह ३६ सत्कृत्यतेतांसरितंततःकृष्ण-
मुखानृप अनुज्ञातास्तयासर्वेन्यवर्त्तंतजनाधिपाः ३७ आनुशासनिकंपर्वश्रुत्वाभक्तिसमन्वितः आयुरारोग्यमैश्वर्यंपुत्रांश्चसमवाप्नुया
न् ३८ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांआनुशासनिकेपर्वणिदानधर्मेभीष्मयुधिष्ठिरसंवादेभीष्ममुक्तिर्नामशतो
परिएकोनषष्टितमोऽध्यायः १६९ इतिआनुशासनिकंपर्वसमाप्तम् अतःपरमाश्वमेधिकंपर्वभविष्यति तस्यायमाद्यःश्लो
कः वैशंपायनउवाच कृतोदकंतुराजानंधृतराष्ट्रंयुधिष्ठिरः पुरस्कृत्यमहाबाहुरुत्ततारकुलेंद्रियः १ ७ ७

पास्तेश्रीतंचिंतामणिंचव्यभजतसमहाभारतेदानधर्मान् १ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभा
रतभावदीपेआनुशासनिकेपर्वणिदानधर्मेटीकायांशततोपरिएकोनषष्टितमोऽध्यायःसमाप्तम् १६९ श्रीकृष्णार्पणमस्तु श्रीमज्जगदीश्वरार्पणमस्तु ७

इतिश्रीमन्महाभारत आनुशासनिकंपर्वसमाप्तम्.


अथ श्रीमन्महाभारते आश्वमेधिकपर्वप्रारंभः
श्री कृष्ण:
होमकुंडम
व्यासादिऋषिसमूह:
पांडवादिराजसमूह
अश्व:

श्रीगणेशायनमः श्रीमद्गोपालमानम्यप्राचीनाचार्यवर्त्मना आश्वमेधिकभावार्थःश्रीकृष्णेनप्रकाश्यते १ अश्विस्तत्फूर्द्धुयायाताष्टावक्रीयेषुसू-
त्रितम् सनत्सुजातेविवृतंगीतायांविपुलीकृतम् २ मोक्षधर्मेषुचपुनर्नानाख्यानोपबृंहणैः अतीवव्याकृतंप्रत्यगात्मतत्वमनाकुलम् ३ यार्ज्जिज्ञासो
र्द्ययेवजपदानादयःस्मृताः अनुशासनिकेसम्यक्चित्तदोषविनाशकाः ४ यत्रप्राबल्यलाभायवैराग्योदयसिद्धये कुरुक्षयादिकोलोकवृत्तांतउपव
र्णितः ५ तदेवस्पष्टमत्रोपसंहारव्यपदेशतः आत्मतत्वंविवृणुतेमुनिराख्यानकैस्त्रिभिः ६ आख्यायनत्रयंच संवर्तमरुत्तीयम् कृष्णधर्मसंवा
दः कृष्णार्जुनसंवादश्च तत्राद्येकाश्यांमृतस्यमुक्तिलिंगेनैवसूचयित्वाईश्वराराधनादिनाधर्मेणैवधनंलब्ध्वात्मशुद्धयेयष्टव्यमित्युक्तम् द्वितीयेशास्त्रा
र्थसूत्रणं तृतीयेतद्विवरणंचेति तदूर्ध्वउत्तंकोछवृत्त्याद्याख्यानैर्ज्ञानोपयोगिगुरुशुश्रूषामाहात्म्यहिंसात्मकयज्ञनिंदादिचयथायथंतात्पर्यविषयतया

नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १ वैशंपायनउवाच कृतोदकं
तुराजानंधृतराष्ट्रंयुधिष्ठिरः पुरस्कृत्यमहाबाहुरुत्तताराकुलेंद्रियः २ उत्तीर्यतुमहाबाहुर्बाष्पव्याकुललोचनः पपात
तीरेगंगायाव्याधविद्धइवद्विपः ३ तंसीदमानंजग्राहभीमःकृष्णेनचोदितः मैवमित्यब्रवीच्चैनंकृष्णःपरबलार्दनः ४
तमार्तंपतितंभूमौनिश्वसंतंपुनःपुनः ददृशुःपार्थिवाराजन्धर्मपुत्रंयुधिष्ठिरम् ५

ज्ञेयम् तत्रायमाद्यश्लोकः नारायणमिति
आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताःपूर्वंतेननारायणःस्मृतइति स्मृतेःआपःपुरुषवचसइतिश्रुतेश्चांभःप्रधानंभूतपंचकंनरे
णांतर्यामिणासृष्टंनारंतत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेः स्रष्टाप्रवेष्टाचनारायणईश्वरः सएवप्रविश्योपाधिधर्मानभिमन्यमानोनरोजीवः ता
भ्यामुत्तमोनरोत्तमः कार्यकारणोपाधिद्वयनिर्मुक्तःपरमात्मा एतत्त्रयंतत्त्वरूपप्रकाशिकांसरस्वतींदेवींचप्रणम्यजयंमहाभारताख्यमिति-
हासंसर्वश्रुतिस्मृतिसारभूतमुदीरयेदितितस्यार्थः एतेनतत्त्वमस्यादिवाक्यार्थोजीवब्रह्माभेदोग्रंथप्रतिपाद्योदर्शितः १ कृतोदकंतुराजानमि
तिउत्ततारगंगांतइतिशेषः २ ३ ४ ५ ६ ६ ६ ६ ६ ६ ६

राजानुधृतराष्ट्रश्चपुत्रशोकाभिपीडितः वाक्यमाहमहाबुद्धिःप्रज्ञाचक्षुर्युधिष्ठिरम् ७ उत्तिष्ठकुरुशार्दूलकुरुकार्यमनं-
तरम् क्षात्रधर्मेणकौंतेयजितेयमवनीत्वया ८ तांभुंक्ष्वभ्रातृभिःसार्द्धंसुहृद्भिश्चनरेश्वर शोचितव्यंनपश्यामित्वया
धर्मभृतांवर ९ शोचितव्यंमयाचैवगांधार्याचमहीपते तयोःपुत्रशतंनष्टंस्वप्नलब्धंयथाधनम् १० अश्रुत्वाहितकाम
स्यविदुरस्यमहात्मनः वाक्यानिसुमहार्थानिपरितप्यामिदुर्मतिः ११ उक्तवान्विदुरोयन्मांधर्मात्मादिव्यदर्शनः दुर्योध
नापराधेनकुलंतेविनशिष्यति १२ स्वस्तिचेदिच्छसेराजन्कुलस्यकुरुमेवचः त्यज्यतामेषदुष्टात्मामंदोराजासुयोधनः
१३ कर्णश्चशकुनिश्चैवनैनंपश्यतुकर्हिचित् द्यूतसंघातमप्येषामप्रमादेनवारय १४ अभिषेचयराजानंधर्मात्मानंयु-
धिष्ठिरम् सपालयिष्यतिवशीधर्मेणपृथिवीमिमाम् १५ अथनेच्छसिराजानंकुंतीपुत्रंयुधिष्ठिरम् मेढीभूतःस्वयंराज्यंप्र
तिगृण्हीष्वपार्थिव १६ समंसर्वेषुभूतेषुवर्तमानंनराधिप अनुजीवंतुसर्वेत्वांज्ञातयोज्ञातिभिःसह १७ एवंब्रुवतिकौंतेयवि-
दुरेदीर्घदर्शिनि दुर्योधनमहंपापमन्ववर्तंवृथामतिः १८ अश्रुत्वाह्यस्यधीरस्यवाक्यानिमधुराण्यहम् फलंप्राप्यमहद्दुःखं
निमग्नःशोकसागरे १९ वृद्धौहितेस्मपितरौपश्यनौदुःखितौनृप नशोचितव्यंभवतापश्यामीहजनाधिप २० इतिश्री
मन्महाभारते आश्वमेधिकेपर्वणि प्रथमोऽध्यायः १ वैशंपायनउवाच एवमुक्तस्तुराज्ञासधृतराष्ट्रेणधीम-
ता तूष्णींबभूवमेधावीतमुवाचाथकेशवः १ अतीवमनसाशोकःक्रियमाणोजनाधिप संतापयतिवैतस्यपूर्वप्रेतान्पि
तामहान् २ यजस्वविविधैर्यज्ञैर्बहुभिःस्वाप्तदक्षिणैः देवांस्तर्पयसोमेनस्वधयाचपितॄनपि ३ अतिथीनन्नपानेनका
मैरन्यैरकिंचनान् विदितंवेदितव्यंतेकर्तव्यमपितेकृतम् ४ श्रुताश्चराजधर्मास्तेभीष्माद्भागीरथीसुतात् कृष्णद्वैपाय
नाच्चैवनारदाद्विदुरात्तथा ५ नेमामर्हसिमूढानांवृत्तिंत्वमनुवर्तितुम् पितृपैतामहंवृत्तमास्थायधुरमुद्वह ६ युक्तंहिय
शस्विक्षत्रंस्वर्गंप्राप्तुमसंशयम् नहिकश्चिद्धिशूराणांनिहतोत्रपराङ्मुखः ७ त्यजशोकंमहाराजभवितव्यंहितत्तथा न
शक्यास्तेपुनर्द्रष्टुंत्वयायेस्मिन्रणेहताः ८ एतावदुक्त्वागोविंदोधर्मराजंयुधिष्ठिरम् विररामहातेजास्तमुवाचयुधिष्ठिरः ९

युधिष्ठिरउवाच गोविंदमयियाप्रीतिस्तवसाविदितामम सौहृदेनतथाप्रेम्णासदामय्यनुकंपसे १० प्रियंतुमेस्या
त्सुमहत्कृतंचक्रगदाधर श्रीमन्प्रीतेनमनसासर्वंयादवनंदन ११ यदिमामनुजानीयाद्भवान्गंतुंतपोवनम्
नाहिशांतिंप्रपश्यामिपातयित्वापितामहम् १२ कर्णंचपुरुषव्याघ्रंसंग्रामेष्वपलायिनम् कर्मणायेनमुच्येयमस्मात्क्रू
राज्जनार्दन १३ कर्मणातद्विधत्स्वेहयेनशुध्यतिमेमनः तमेवंवादिनंपार्थंव्यासःप्रोवाचधर्मवित् १४ सांत्वयन्सुमहा
तेजाःशुभंवचनमर्थवत् अकृतातेमतिस्तातपुनर्बाल्येनमुह्यसे १५ किमाकाशेवयंतातप्रलपामोमुहुर्मुहुः विदिताःक्ष
त्रधर्मास्तेयेषांयुद्धेनजीविका १६ तथाप्रवृत्तोनृपतिर्नाधिबंधेनयुज्यते मोक्षधर्माश्चनिखिलायाथातथ्येनतेश्रुताः १७
असकृच्चापिसंदेहाश्छिन्नास्तेकामजामया अश्रद्दधानोदुर्मेधालुप्तस्मृतिरसिध्रुवम् १८ मैवंभवनतेयुक्तमिदमज्ञानमीदृ
शम् प्रायश्चित्तानिसर्वाणिविदितानिचतेनघ १९ राजधर्माश्चतेसर्वेदानधर्माश्चतेश्रुताः सकथंसर्वधर्मज्ञःसर्वागमवि
शारदः परिमुह्यसिभूयस्त्वमज्ञानादिवभारत २० इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिद्वितीयोऽध्यायः
२ व्यासउवाच युधिष्ठिरतवप्रज्ञानसम्यगितिमेमतिः नहिकश्चित्स्वयंमर्त्यःस्ववशःकुरुतेक्रियाम् १ ईश्व
रेणचयुक्तोयंसाध्वसाधुचमानवः करोतिपुरुषःकर्मतत्रकापरिदेवना २ आत्मानंमन्यसेचाथपापकर्माणमंततः शृणु
तत्रयथापापमपकृष्यतेभारत ३ तपोभिःक्रतुभिश्चैवदानेनचयुधिष्ठिर तरंतिनित्यंपुरुषायेस्मपापानिकुर्वते ४ यज्ञे
नतपसाचैवदानेनचनराधिप पूयंतेनरशार्दूलनरादुष्कृतकारिणः ५ असुराश्चसुराश्चैवपुण्यहेतोर्मखक्रियाम् प्रय
तंतेमहात्मानस्तस्माद्यज्ञःपरायणम् ६ यज्ञैरेवमहात्मानोबभूवुरधिकासुराः ततोदेवाःक्रियावंतोदानवानभ्यधर्षय
न् ७ राजसूयाश्वमेधौचसर्वमेधंचभारत नरमेधंचनृपतेत्वमाहरयुधिष्ठिर ८ यजस्ववाजिमेधेनविधिवद्दक्षिणाव
ता बहुकामान्नवित्तेनरामोदाशरथिर्यथा ९ यथाचभरतोराजादौष्यंतिःपृथिवीपतिः शाकुंतलोमहावीर्यस्तवपूर्वपितामहः
१०

११ १२ १३ १४ १५ १६ १७ प्रतिविधिमनुकल्पम् १८ १९ २० २१ २२ २३ इत्याश्वमेधिकेपर्वणिटीकायांद्

युधिष्ठिरउवाच अंसंशयंवाजिमेधःपावयेत्पृथिवीपतिम् अभिप्रायस्तुमेकश्चित्तंत्वंश्रोतुमिहार्हसि ११ इमंज्ञाति
वधंकृत्वासुमहांतंद्विजोत्तम दानमल्पंनशक्नोमिदातुंवित्तंचनास्तिमे १२ नतुबालानिमान्दीनानुत्सहेवसुयाचितुम् नचै
वार्द्रव्रणान्कृच्छ्रेवर्तमानान्नृपात्मजान् १३ स्वयंविनाश्यपृथिवींयज्ञार्थेद्विजसत्तम करमाहारयिष्यामिकथंशोकपरायणः
१४ दुर्योधनापराधेनवसुधावसुधाधिपाः प्रनष्टायोजयित्वास्मानकीर्त्यामुनिसत्तम १५ दुर्योधनेनपृथिवीक्षयितावित्त
कारणात् कोशश्चापिविशीर्णोसौधार्तराष्ट्रस्यदुर्मतेः १६ पृथिवीदक्षिणाचात्रविधिःप्रथमकल्पितः विद्वद्भिःपरिदृष्टो
यंशिष्टोविधिविपर्ययः १७ नचप्रतिविधिंकर्तुंचिकीर्षामितपोधन अत्रमेभगवन्सम्यक्साचिव्यंकर्तुमर्हसि १८ एवमु
क्तस्तुपार्थेनकृष्णद्वैपायनस्तदा मुहूर्तमनुसंचिंत्यधर्मराजानमब्रवीत् १९ व्यासउवाच कोशश्चापिविशीर्णो
यंपरिपूर्णोभविष्यति विद्यतेद्रविणंपार्थगिरौहिमवतिस्थितम् २० उत्सृष्टंब्राह्मणैर्यज्ञेमरुत्तस्यमहात्मनः तदानयस्वकौं
तेयपर्याप्तंतद्भविष्यति २१ युधिष्ठिरउवाच कथंयज्ञेमरुत्तस्यद्रविणंतत्समाचितम् कस्मिंश्चकालेसनृपो
बभूववदतांवर २२ व्यासउवाच यदिशुश्रूषसेपार्थशृणुकारंधमंनृपम् यस्मिन्कालेमहावीर्यःसराजासी
न्महाधनः २३ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिसंवर्तमरुत्तीयेतृतीयोऽध्यायः ३ युधिष्ठिरउवा
च शुश्रूषेतस्यधर्मज्ञराजर्षेःपरिकीर्तनम् द्वैपायनमरुत्तस्यकथांप्रब्रूहिमेनघ १ व्यासउवाच आसी
त्कृतयुगेतातमनुर्दंडधरःप्रभुः तस्यपुत्रोमहाबाहुःप्रसंधिरितिविश्रुतः २ प्रसंधेरभवत्पुत्रःक्षुपइत्यभिसंज्ञितः क्षुप
स्यपुत्रइक्ष्वाकुर्महीपालोभवत्प्रभुः ३ तस्यपुत्रशतंराजन्नासीत्परमधार्मिकम् तांस्तुसर्वान्महीपालानिक्ष्वाकुरकरोत्
प्रभुः ४ तेषांज्येष्ठस्तुविंशोभूत्प्रतिमानंधनुष्मताम् विंशस्यपुत्रःकल्याणोविविंशोनामभारत ५ विविंशस्यसुताराज
न्बभूवुर्दशपंचच सर्वेधनुषिविक्रांताब्रह्मण्याःसत्यवादिनः ६

तीयोऽध्यायः ३ शुश्रूषेइति १ मरुत्तयज्ञप्रशंसाप्रसंगात्तद्द
श्यान्स्तौति आसीत्कृतयुगइत्यादिना अध्यायद्वयेन अत्यंतंमहांतोपिकर्मैवानुतिष्ठंतीतिकर्ममाहात्म्यख्यापनार्थम् २ ३ ४ ५ ६

दानधर्मरताःशांताःसततंप्रियवादिनः तेषांज्येष्ठःखनीनेत्रःसतान्सर्वानपीडयत् ७ खनीनेत्रस्तुविक्रांतोजित्वाराज्य
मकंटकम् नाशकद्रक्षितुंराज्यंनान्वरज्यंतनंप्रजाः ८ तमपास्यचतद्राज्येतस्यपुत्रंसुवर्चसम् अभ्यषिंचंतराजेंद्रमुदिता
ह्यभवंस्तदा ९ सपितुर्विक्रियांदृष्ट्वाराज्यान्निरसनंतथा नियतोवर्तयामासप्रजाहितचिकीर्षया १० ब्रह्मण्यःसत्यवा
दीचशुचिःशमदमान्वितः प्रजास्तंचान्वरज्यंतधर्मनित्यंमनीषिणम् ११ तस्यधर्मप्रवृत्तस्यव्यशीर्यत्कोशवाहनम् तंक्षीण
कोशंसामंताःसमंतात्पर्यपीडयन् १२ सपीड्यमानोबहुभिःक्षीणकोशाश्ववाहनः आर्तिमार्च्छत्परांराजासहभृत्यैःपुरेण
च १३ नचैनमभिहंतुंतेशक्नुवंतिबलक्षये सम्यग्वृत्तोहिराजासधर्मनित्योयुधिष्ठिर १४ यदातुपरमामार्तिंगतोसौसपुरो
नृपः ततःप्रदध्मौसकरंप्रादुरासीत्ततोबलम् १५ ततस्तानजयत्सर्वान्प्रत्यमित्रान्नराधिपान् एतस्मात्कारणाद्राजन्वि
श्रुतःसकरंधमः १६ तस्यकारंधमःपुत्रस्त्रेतायुगमुखेभवत् इंद्रादनवरःश्रीमान्देवैरपिसुदुर्जयः १७ तस्यसर्वेमहीपाला
वर्तंतेस्मवशेतदा सहिसम्राडभूत्तेषांवृत्तेनचबलेनच अविक्षिन्नामधर्मात्माशौर्येणेंद्रसमोभवत् यज्ञशीलोधर्मरतिर्धृ
तिमान्संयतेंद्रियः १९ तेजसादित्यसदृशःक्षमयापृथिवीसमः बृहस्पतिसमोबुद्ध्याहिमवानिवसुस्थिरः २० कर्मणामन
सावाचादमेनप्रशमेनच मनांस्याल्हादयामासप्रजानांसमहीपतिः २१ यईजेहयमेधानांशतेनविधिवत्प्रभुः याजयामा
सयंविद्वान्स्वयमेवांगिराःप्रभुः २२ तस्यपुत्रोतिचक्रामपितरंगुणवत्तया मरुत्तोनामधर्मज्ञश्चक्रवर्तीमहायशाः २३ ना
गायुतसमप्राणःसाक्षाद्विष्णुरिवापरः सयक्ष्यमाणोधर्मात्माशातकुंभमयान्युत २४ कारयामासशुभ्राणिभाजनानिस
हस्रशः मेरुंपर्वतमासाद्यहिमवत्पार्श्वउत्तरे २५ कांचनःसुमहान्पादस्तत्रकर्मचकारसः ततःकुंडानिपात्रीश्चपिठराण्या
सनानिच २६ चक्रुःसुवर्णकर्तारोयेषांसंख्यानविद्यते तस्यैवचसमीपेतुयज्ञवाटोबभूवह २७ ईजेतत्रसधर्मात्मावि
धिवत्पृथिवीपतिः मरुत्तःसहितैःसर्वैःप्रजापालैर्नराधिपः २८ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिचतुर्थोऽध्या
यः ४

कथंवीर्यःसमभवत्सराजावदतांवर कथंचजातरूपेणसमयुज्यतसद्विज १ क्वचतत्सांप्रतंद्रव्यंभगवन्नवतिष्ठते कथं-
चशक्यमस्माभिस्तदवाप्तुंतपोधन २ व्यासउवाच असुराश्चसुराश्चैवदक्षस्यासन्प्रजापतेः अपत्यंबहुलं
तातसंस्पर्द्धंतपरस्परम् ३ तथैवांगिरसःपुत्रौव्रततुल्यौबभूवतुः बृहस्पतिर्बृहत्तेजाःसंवर्तश्चतपोधनः ४ तावतिस्पर्धि
नौराजन्पृथगास्तांपरस्परम् बृहस्पतिःससंवर्तंबाधतेस्मपुनःपुनः सबाध्यमानःसततंभ्रात्राज्येष्ठेनभारत अर्थानुत्सृ
ज्यदिग्वासावनवासमरोचयत् ६ वासवोप्यसुरान्सर्वान्विजित्यचनिपात्यच इंद्रत्वंप्राप्यलोकेषुततोवव्रेपुरोहितम् ७ पु
त्रमंगिरसोज्येष्ठंविप्रश्रेष्ठंबृहस्पतिम् याज्यस्त्वंगिरसःपूर्वमासीद्राजाकरंधमः ८ वीर्येणाप्रतिमोलोकेवृत्तेनचबलेनच
शतक्रतुरिवौजस्वीधर्मात्मासंशितव्रतः ९ वाहनंयस्ययोधाश्चमित्राणिविविधानिच शयनानिचमुख्यानिमहार्हाणिच-
सर्वशः १० ध्यानादेवाभवद्राजन्मुखवातेनसर्वशः सगुणैःपार्थिवान्सर्वान्वशेचक्रेनराधिपः १२ संजीव्यकालमिष्टंच-
सशरीरोदिवंगतः बभूवतस्यपुत्रस्तुययातिरिवधर्मवित् १३ अविक्षिन्नामशत्रुजित्सवशेकृतवान्महीम् विक्रमेणगुणै
श्चैवपितेवासीत्सपार्थिवः १३ तस्यवासवतुल्योभून्मरुत्तोनामवीर्यवान् पुत्रस्तमनुरक्ताभूत्पृथिवीसागरांबरा १४ स्पर्द्ध
तेसस्मसततंदेवराजेननित्यदा वासवोपिमरुत्तेनस्पर्द्धतेपांडुनंदन १५ शुचिःसगुणवानासीन्मरुत्तःपृथिवीपतिः यतमा
नोपियंशक्रोनविशेषयतिस्मह १६ सोऽशक्नुवन्विशेषायसमाहूयबृहस्पतिम् उवाचेदंवचोदेवैःसहितोहरिवाहनः १७
बृहस्पतेमरुत्तस्यमाकार्षीस्त्वंकथंचन दैवंकर्माथपित्र्यंवाकर्तासिममचेत्प्रियम् १८ अहंहित्रिषुलोकेषुसुराणांचबृह
स्पते इंद्रत्वंप्राप्तवानेकोमरुत्तस्तुमहीपतिः १९ कथंह्यमर्त्यंब्रह्मंस्त्वंयाजयित्वासुराधिपम् याजयेर्मृत्युसंयुक्तंमरुत्तमवि
शंकया २० मांवावृणीष्वभद्रंतेमरुत्तंवामहीपतिम् परित्यज्यमरुत्तंवायथाजोषंभजस्वमाम् २१ एवमुक्तःसकौरव्य
देवराज्ञाबृहस्पतिः मुहूर्तमिवसंचिंत्यदेवराजानमब्रवीत् २२ त्वंभूतानामाधिपतिस्त्वयिलोकाःप्रतिष्ठिताः नमुचेर्वि-
श्वरूपस्यनिहंतात्वंबलस्यच २३

त्वमाजहर्थदैत्यानामेकोवीरश्रियंपराम् त्वंबिभर्षिभुवंद्यांचसदैवबलसूदन २४ पौरोहित्यंकथंकृत्वानवदेवगणेश्वर या
जयेयमहं मर्त्यंमरुत्तंपाकशासन २५ समाश्वसिहिदेवेंद्रनाहंमर्त्यस्यकर्हिचित् ग्रहीष्यामिस्रुवंयज्ञेशृणुचेदंवचोमम
२६ हिरण्यरेतानोष्णःस्यात्परिवर्तेतमेदिनी भासंतुनरविःकुर्यान्नतुसत्यंचलेन्मयि २७ वैशंपायनउवाच
बृहस्पतिवचःश्रुत्वाशक्रोविगतमत्सरः प्रशस्यैनंविवेशाथस्वमेवभवनंतदा २८ इतिश्रीमन्महाभारतेआश्वमेधि
केपर्वणिसंवर्तमरुत्तीयेपंचमोऽध्यायः ५ व्यासउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् बृहस्पतेश्च
संवादंमरुत्तस्यचधीमतः १ देवराजस्यसमयंकृतमांगिरसेनह श्रुत्वामरुत्तोनृपतिर्यज्ञमाहारयत्परम् २ संकल्प्यम-
नसायज्ञंकरंधमसुतात्मजः बृहस्पतिमुपागम्यवाग्मीवचनमब्रवीत् ३ भगवन्यन्मयापूर्वमभिगम्यतपोधन कृतोभि
संधिर्यज्ञस्यभवतोवचनाद्गुरो ४ तमहंयष्टुमिच्छामिसंभाराःसंभृताश्चमे याज्योस्मिभवतःसाधोतत्प्राप्नुहिविधत्स्वच
५ बृहस्पतिरुवाच नकामयेयाजयितुंत्वामहंपृथिवीपते वृतोस्मिदेवराजेनप्रतिज्ञातंचतस्यमे ६ मरुत्त
उवाच पित्र्यमस्मितवक्षेत्रंबहुमन्येचतेभृशम् नवास्मियाज्यतांप्राप्तोभजमानंभजस्वमाम् ७ बृहस्पतिरुवाच
अमर्त्यंयाजयित्वाहंयाजयिष्येकथंनरम् मरुत्तगच्छवामावानिवृत्तोस्म्यद्ययाजनात् ८ नत्वांयाजयितास्म्यद्यवृणुयंत्वमि
हेच्छसि उपाध्यायंमहाबाहोयस्तेयज्ञंकरिष्यति ९ व्यासउवाच एवमुक्तस्तुनृपतिर्मरुत्तोव्रीडितोभवत् प्र
त्यागच्छन्स्कसंविग्नोददर्शपथिनारदम् १० देवर्षिणासमागम्यनारदेनसपार्थिवः विधिवत्प्रांजलिस्तस्थावथैनंनारदो
ब्रवीत् ११ राजर्षेनातिहृष्टोसिकच्चित्क्षेमंतवानघ क्वगतोसिकुतश्चेदमप्रीतिस्थानमागतम् १२ श्रोतव्यंचेन्मयाराज
न्ब्रूहिमेपार्थिवर्षभ व्यपनेष्यामितेमन्युंसर्वयत्नैर्नराधिप १३ एवमुक्तोमरुत्तस्तुनारदेनमहर्षिणा विप्रलंभमुपाध्या
यात्सर्वमेवन्यवेदयत् १४ मरुत्तउ॰ गतोस्म्यंगिरसःपुत्रंदेवाचार्यंबृहस्पतिं यज्ञार्थमृत्विजंद्रष्टुंसचमांनाभ्यनंदत १५ ४

१६ १७ १८ १९ २० २१ उन्मत्तवेषमिति अत्रकुणपदर्शनेनमहेश्वरदर्शनसिद्धिंदर्शयताकुणपस्यमहेश्वरप्रतिमात्वंसूचितम् तथाचाविमु
क्तंप्रकृत्योक्तं अत्रहिजंतोः प्राणषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतीतिसिद्धं कुणपाभिमानिनोजीवस्यब्रह्मभा-

प्रत्याख्यातश्चतेनाहंजीवितुंनाद्यकामये परित्यक्तश्चगुरुणादूषितश्चास्मिनारद १६ व्यासउवाच एवमुक्तस्तु
राज्ञासनारदःप्रत्युवाचह आविक्षितंमहाराजवाचासंजीवयन्निव १७ नारदउवाच राजन्नंगिरसःपुत्रःसंव
र्तोनामधार्मिकः चंक्रमीतिदिशःसर्वादिग्वासामोहयन्प्रजाः १८ तंगच्छयदियाज्यंत्वांनवांछतिबृहस्पतिः प्रसन्न-
स्त्वांमहातेजाःसंवर्तोयाजयिष्यति १९ मरुत्तउवाच संजीवितोहंभवतावाक्येनानेननारद पश्येयंक्वनुसंवर्तं
शंसमेवदतांवर २० कथंचतस्मैवर्तेयंकथंमांनपरित्यजेत् प्रत्याख्यातश्चतेनापिनाहंजीवितुमुत्सहे २१ नारदउवा
च उन्मत्तवेषंबिभ्रत्सचंक्रमीतियथासुखम् वाराणस्यांमहाराजदर्शनेप्सुर्महेश्वरम् २२ तस्याद्वारंसमासाद्यन्य
सेथाःकुणपंक्वचित् तंदृष्ट्वायोनिवर्तेतससंवर्तोमहीपते २३ तंपृष्ठतोनुगच्छेथायत्रगच्छेत्सवीर्यवान् तमेकांतेसमा
साद्यप्रांजलिःशरणंव्रज २४ पृच्छेत्त्वांयदिकेनाहंतवाख्यातइतिस्मह ब्रूयास्त्वंनारदेनेतिसंवर्तंकथितोसिमे २५ सचे
त्त्वामनुयुंजीतममानुगमनेप्सया शंसेथावन्हिमारूढंमामपित्वमशंकया २६ व्यासउवाच सतथेतिप्रति-
श्रुत्यपूजयित्वाचनारदम् अभ्यनुज्ञायराजर्षिर्ययौवाराणसींपुरीम् २७ तत्रगत्वायथोक्तंसपुर्याद्वारंमहायशाः कु
णपंस्थापयामासनारदस्यवचःस्मरन् २८ योगपद्येनविप्रश्चपुरीद्वारमथाविशत् ततःसकुणपंदृष्ट्वासहसासंन्यवर्तत
२९ सतंनिवृत्तमालक्ष्यप्रांजलिःपृष्ठतोन्वगात् आविक्षितोमहीपालःसंवर्तमुपशिक्षितुम् ३० सचतंविजनेदृष्ट्वापांसु
भिःकर्दमेनच श्लेष्मणाचैवराजानंष्ठीवनेश्चसमाकिरत् ३१ सतथाबाध्यमानोवैसंवर्तेनमहीपतिः अन्वगादेवतमृषिं
प्रांजलिःसंप्रसादयन् ३२ ततोनिवर्त्यसंवर्तःपरिश्रांतउपाविशत् शीतलच्छायमासाद्यन्यग्रोधंबहुशाखिनम् ३३ इ-
तिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिमरुत्तीयेषष्ठोऽध्यायः ६

वोपूर्वोज्ञापितः एवंचोपरिधारिणोविधिवाद्विधिरेवायमित्युपपादि
तं २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ इत्याश्वमेधिकेपर्वणिटीकायांषष्ठोऽध्यायः ६

संवर्तउवाच कथमस्मित्वयाज्ञातः केनवाकथितोऽस्मिते एतदाचक्ष्वमेतत्वमिच्छसेचेन्ममप्रियम् १ सत्यंतेब्रुवतः
सर्वेसंपत्स्यंतेमनोरथाः मिथ्यातुब्रुवतोमूर्धाशतधातेस्फुटिष्यति २ मरुत्तउवाच नारदेनभवान्मह्यमाख्या
तोऽस्यटतापथि गुरुपुत्रोममेतिलंततोमेप्रीतिरुत्तमा ३ संवर्तउवाच सत्यमेतद्भवानाहसमांजानातिसत्रिणम्
कथयस्वतदेनन्मेक्वनुसंप्रतिनारदः ४ मरुत्तउवाच भवंतंकथयित्वासममदेवर्षिसत्तमः ततोमामभ्यनुज्ञाय
प्रविष्टोहव्यवाहनम् ५ व्यासउवाच श्रुत्वातुपार्थिवस्यैतत्संवर्तःप्रमुदंगतः एतावदहमप्येवंशक्नुयामितिसो-
ऽब्रवीत् ६ ततोमरुत्तमुन्मत्तोवाचानिर्भर्त्सयन्निव रूक्षयाब्राह्मणोराजन्पुनःपुनरथाब्रवीत् ७ वातप्रधानेनमयास्वचि
त्तवशवर्तिना एवंविकृतरूपेणकथंयाजितुमिच्छसि ८ भ्राताममसमर्थश्चवासवेनचसंगतः वर्ततेयाजनेचैवतेनकर्मा
णिकारय ९ गार्हस्थ्यंचैवयाज्याश्चसर्वागृह्याश्चदेवताः पूर्वजेनसमाक्षिप्तंशरीरंवर्जितंत्विदम् १० नाहंतेनाननुज्ञातस्त्वा
माविक्षितकर्हिचित् याजयेयंकथंचिद्वैसहिपूज्यतमोमम ११ सत्वंबृहस्पतिंगच्छतमनुज्ञाप्यचाव्रज ततोहंयाजयिष्ये
त्वांयदियष्टुमिहेच्छसि १२ मरुत्तउवाच बृहस्पतिंगतःपूर्वमहंसंवर्ततच्छृणु नमांकामयतेयाज्यमसौवासव
काम्यया १३ अमरंयाज्यमासाद्ययाजयिष्येनमानुषम् शक्रेणप्रतिषिद्धोहंमरुत्तंमास्मयाजय १४ स्पर्द्धतेचमयाविप्र-
सदाहिसतुपार्थिवः एवमस्त्वितिचाप्युक्तोभ्रात्रातेबलसूदन १५ समामभिगतंप्रेम्णायाज्यत्वेनबुभूषति देवराजंसमा
श्रित्यतद्विद्धिमुनिपुंगव १६ सोहमिच्छामिभवतासर्वस्वेनापियाजितुम् कामयेसमतिक्रांतुंवासवंत्वत्कृतैर्गुणैः १७
नहिमेवर्ततेबुद्धिर्गंतुंब्रह्मन्बृहस्पतिम् प्रत्याख्यातश्चतेनास्मितथानपकृतेसति १८ संवर्तउवाच चिकीर्षसि
यथाकामंसर्वमेतत्त्वयिध्रुवम् यदिसर्वानभिप्रायान्कर्तासिममपार्थिव १९ याज्यमानंमयाहित्वांबृहस्पतिपुरंदरौ द्विषेतां
समभिक्रुद्धावेतदेकंसमर्थये २० स्थैर्यमत्रकथंमेस्यात्सत्वंनिःसंशयंकुरु कुपितस्त्वांनहीदानींभस्मीकुर्यांसबांधवम् २१

२२ २३ २४ २५ २६ इत्याश्वमेधिकेपर्वणिटीकायांसप्तमोऽध्यायः ७ गिरेर्हिमवतः इत्यष्टमेनतस्मैभगवतेकृत्वानमइत्यादिनस्तु

मरुत्तउवाच यावत्तपेत्सहस्रांशुस्तिष्ठेरंश्चापिपर्वताः तावल्लोकान्नलभेयंत्यजेयंसंगतंयदि २२ माचापिसुभबुद्धि
त्वंलभेयमितिकर्हिचित् विषयैःसंगतंचास्तुत्यजेयंसंगतंयदि २३ संवर्त्तउवाच आविक्षितशुभाबुद्धिर्वर्ततां
तवकर्मसु याजनंहिममाप्येवंवर्ततेहृदिपार्थिव २४ अभिधास्येचतेराजन्नक्षय्यंद्रव्यमुत्तमं येनदेवान्सगंधर्वांश्छक्रंचा
भिभविष्यसि २५ नतुमेवर्ततेबुद्धिर्धनेयाज्येषुवापुनः विप्रियंतुकरिष्यामिभ्रातुश्चेंद्रस्यचोभयोः २६ गमयिष्यामिश
क्रेणसमतामपितेध्रुवम् प्रियंचतेकरिष्यामिसत्यमेतद्ब्रवीमिते २७ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणि
संवर्त्तमरुत्तीयेसप्तमोऽध्यायः ७ संवर्त्तउवाच गिरेर्हिमवतःपृष्ठेमुंजवान्नामपर्वतः तप्यतेयत्रभगवांस्तपोनि
त्यमुमापतिः १ वनस्पतीनांमूलेषुशृंगेषुविषमेषुच गुहासुशैलराजस्यरमतेस्मयथासुखम् २ उमासहायोभगवा
न्यत्रनित्यंमहेश्वरः आस्तेशूलीमहातेजानानाभूतगणावृतः ३ तत्ररुद्राश्चसाध्याश्चविश्वेथवसवस्तथा यमश्चव
रुणश्चैवकुबेरश्चसहानुगः ४ भूतानिचपिशाचाश्चनासत्यावश्विनौतथा गंधर्वाप्सरसश्चैवयक्षादेवर्षयस्तथा ५ आ
दित्यामरुतश्चैवयातुधानाश्चसर्वशः उपासंतेमहात्मानंबहुरूपमुमापतिम् ६ रमतेभगवांस्तत्रकुबेरानुचरैःसह विकृ
तैर्विकृताकारैःक्रीडद्भिःपृथिवीपते ७ श्रियाज्वलन्दृश्यतेवैबालादित्यसमद्युतिः नरूपंशक्यतेनस्यसंस्थानंवाक
दाचन ८ निर्देष्टुंप्राणिभिःकैश्चित्प्राकृतैर्मांसलोचनैः नोष्णंनशिशिरंतत्रनवायुर्नचभास्करः ९ नजरात्क्षुत्पिपासेवा
नमृत्युर्नभयंनृप तस्यशैलस्यपार्श्वेषुसर्वेषुजयतांवर १० धातवोजातरूपस्यरश्मयःसवितुर्यथा रक्ष्यंतेतेकुबेरस्य
सहायैरुद्यतायुधैः ११ चिकीर्षद्भिःप्रियंराजन्कुबेरस्यमहात्मनः तस्मैभगवतेकृत्वानमःशर्वायवेधसे १२ रुद्रायशि
तिकंठायपुरुषायसुवर्चसे कपर्दिनेकरालायहर्यक्ष्णेवरदायच १३ त्र्यक्ष्णेपूष्णोदंतभिदेवामनायशिवायच याम्या
यान्यक्तरूपायसद्वृत्तेशंकरायच १४

वर्णमवाप्स्यसीत्यंतं सुवर्णकामस्यजप्यस्तोत्रम् तस्यसंवर्तऋषिः हिरण्यबाहूरुद्रोदेवता अनु
ष्टुप्छंदः अत्रशतंनामानिचतुर्थ्यंतानि १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ ७

क्षेम्यायहरिकेशायस्थाणवेपुरुषायच हरिकेशायमुंडायकृशायोत्तारणायच १५ भास्करायसुतीर्थायदेवदेवायरंह
से उष्णीषिणेसुवक्त्रायसहस्राक्षायमीढुषे १६ गिरिशायप्रशांताययतयेचीरवाससे बिल्वदंडायसिद्धायसर्वदंडधराय
च १७ मृगव्याधायमहतेधन्विनेथभवायच वरायसोमवक्त्रायसिद्धमंत्रायचक्षुषे १८ हिरण्यबाहवेराजन्नुग्रायपतये
दिशाम् लेलिहानायगोष्ठायसिद्धमंत्रायवृष्णये १९ पशूनांपतयेचैवभूतानांपतयेनमः वृषायमातृभक्तायसेनान्येम
ध्यमायच २० स्रुवहस्तायपतयेधन्विनेभार्गवायच अजायकृष्णनेत्रायविरूपाक्षायचैवहि २१ तीक्ष्णदंष्ट्रायतीक्ष्णा
यवैश्वानरमुखायच महाद्युतयेनंगायशर्वायपतयेदिशाम् २२ विलोहितायदीप्तायदीप्ताक्षायमहौजसे वसुरेतःसुव
पुषेपृथवेकृत्तिवाससे २३ कपालमालिनेचैवसुवर्णमुकुटायच महादेवायकृष्णायत्र्यंबकायानघायच २४ क्रोधना
यानृशंसायमृदवेबाहुशालिने दंडिनेतप्ततपसेतथैवाक्रूरकर्मणे २५ सहस्रशिरसेचैवसहस्रचरणायच नमःस्वधा
स्वरूपायबहुरूपायदंष्ट्रिणे २६ पिनाकिनंमहादेवंमहायोगिनमव्ययम् त्रिशूलहस्तंवरदंत्र्यंबकंभुवनेश्वरम् २७ त्रिपु
रघ्नंत्रिनयनंत्रिलोकेशंमहौजसम् प्रभवंसर्वभूतानांधारणंधरणीधरम् २८ ईशानंशंकरंसर्वंशिवंविश्वेश्वरंभवम् उ
मापतिंपशुपतिंविश्वरूपंमहेश्वरम् २९ विरूपाक्षंदशभुजंदिव्यगोवृषभध्वजम् उग्रंस्थाणुंशिवंरौद्रंशर्वंगौरीशमीश्व
रम् ३० शितिकंठमजंशक्रंपृथुंपृथुहरंवरम् विश्वरूपंविरूपाक्षंबहुरूपमुमापतिम् ३१ प्रणम्यशिरसादेवमनंगांग
हरंहरम् शरण्यंशरणंयाहिमहादेवंचतुर्मुखम् ३२ एवंकृत्वानमस्तस्मैमहादेवायरंहसे महात्मनेक्षितिपतेतत्सुवर्ण
मवाप्स्यसि ३३ सुवर्णमाहरिष्यंतस्तत्रगच्छंतुतेनराः इत्युक्तःसवचस्तेनचक्रेकारंधमात्मजः ३४ ततोतिमानुषंसर्वंच
क्रेयज्ञस्यसंविधिम् सौवर्णानिचभांडानिसंचक्रुस्तत्रशिल्पिनः ३५ बृहस्पतिस्ततांश्रुत्वामरुत्तस्यमहीपतेः समृद्धिमति
देवेभ्यःसंतापमकरोद्भृशम् ३६ सतप्यमानोवैवर्ण्यंकृशत्वंचागमत्परम् भविष्यतिहिमेशत्रुःसंवर्तोवसुमानिति ३७

तंश्रुत्वाभृशसंतप्तोदेवराजोबृहस्पतिम् अधिगम्यामरवृतःप्रोवाचेदंवचस्तदा ३८ इत्याश्वमेधिकेपर्वणि अष्टमोऽ
ध्यायः ८ इंद्रउवाच कच्चित्सुखंस्वपिषित्वंबृहस्पतेकच्चिन्मनोज्ञाःपरिचारकास्ते कच्चिद्देवानांसुखकामोसि
विप्रकच्चिद्देवास्त्वांपरिपालयंति १ बृहस्पतिरुवाच सुखंशयेशयनेदेवराजतथामनोज्ञाःपरिचारकामे तथा
देवानांसुखकामोस्मिनित्यंदेवाश्चमांसुभृशंपालयंति २ इंद्रउवाच कुतोदुःखंमानसंदेहजंवापांडुर्विवर्णश्चकुत
स्त्वमद्य आचक्ष्वमेब्राह्मणयावदेतान्निहन्मिसर्वांस्तवदुःखकर्तॄन् ३ बृहस्पतिरुवाच मरुत्तमाहुर्मघवन्यक्
ष्यमाणंमहायज्ञेनोत्तमदक्षिणेन संवर्तोयाजयतीतिमेश्रुतंतदिच्छामिनसतंयाजयेत ४ इंद्रउवाच सर्वान्
कामाननुयातोसिविप्रयस्त्वंदेवानांमंत्रवित्सुपुरोधाः उभौचतेजरामृत्यूव्यतीतौकिंसंवर्तस्तवकर्ताद्यविप्र ५ बृहस्प
तिरुवाच देवैःसहत्वमसुरान्प्रणुद्यजिघांससेचाप्युतसानुबंधान् यंयंसमृद्धंपश्यसितत्रतत्रदुःखंसपत्नेषुसमृद्धि
भावः ६ अतोस्मिदेवेंद्रविवर्णरूपःसपत्नोमेवर्धतेतन्निशम्य सर्वोपायैर्मघवन्संनियच्छसंवर्तंवापार्थिवंवामरुत्तम् ७
इंद्रउवाच एहिगच्छप्रहितोजातवेदोबृहस्पतिंपरिदातुंमरुत्ते अयंवैत्वांयाजयिताबृहस्पतिस्तथामरश्चैवकरिष्यतीति ८
अग्निरुवाच अहंगच्छामिमघवन्दूतोद्यबृहस्पतिंपरिदातुंमरुत्ते वाचंसत्यांपुरुहूतस्यकर्तुंबृहस्पतेश्चापचितिंचि
कीर्षुः ९ व्यासउवाच ततःप्रायाद्धूमकेतुर्महात्मावनानिसर्वाणिवीरुधश्चाप्यमृदन् कामाद्धिमांतेपरिवर्तमा
नःकाष्ठातिगोमातरिश्वेवनर्दन् १० मरुत्तउवाच आश्चर्यमद्यपश्यामिरूपिणंवह्निमागतम् आसनंसलिलंपाद्यं
गांचोपानयवैमुने ११ अग्निरुवाच आसनंसलिलंपाद्यंप्रतिनंदामितेनघ इंद्रेणतुसमादिष्टंविद्धिमांदूतमागत
म् १२ मरुत्तउवाच कच्चिच्छ्रीमान्देवराजःसुखीचकच्चिच्चास्मान्प्रीयतेधूमकेतो कच्चिद्देवाअस्यवशेयथावत्
प्रब्रूहित्वंममकात्स्न्येनदेव १३ अग्निरुवाच शक्रोभृशंसुसुखीपार्थिवेंद्रप्रीतिंचेच्छत्यजरांवैत्वयासः देवाश्चसर्वे
वशगास्तस्यराजन्संदेशंतंशृणुमेदेवराज्ञः १४

यदर्थमांप्राहिणोस्त्वत्सकाशंबृहस्पतिंपरिदातुंमरुत्ते अयंगुरुर्याजयतांनृपत्वांमर्त्यंसंतममरंत्वांकरोतु १५ मरुत्तउवा
च संवर्तोयंयाजयिताद्विजोमांबृहस्पतेरंजलिरेषतस्य नचैवासौयाजयित्वामहेंद्रंमर्त्यंसंतंयाजयन्नद्यशोभेत् १६
अग्निरुवाच येवैलोकादेवलोकेमहांतःसंप्राप्स्यसेतान्देवराजप्रसादात् त्वांचेदसौयाजयेद्वैबृहस्पतिर्नूनंस्वर्गंत्वंजयेःकी
र्तियुक्तः १७ तथालोकामानुषायेचदिव्याःप्रजापतेश्चापियेवैमहांतः तेतेजितादेवराज्यंचकृत्स्नंबृहस्पतिर्याजयेच्चेन्नरेंद्र १८
संवर्त उवाच मास्मैवंत्वंपुनरागाःकथंचित्बृहस्पतिंपरिदातुंमरुत्ते मात्वांधक्ष्येचक्षुषादारुणेनसंक्रुद्धोहंपावकत्वं
निबोध १९ व्यासउवाच ततोदेवानगमद्धूमकेतुर्दाहाद्भीतोव्यथितोश्वत्थपर्णवत् तंवैदृष्ट्वाप्राहशक्रोमहात्मा
बृहस्पतेःसन्निधौहव्यवाहम् २० यत्त्वंगतःप्रहितोजातवेदोबृहस्पतिंपरिदातुंमरुत्ते तत्किंप्राहसनृपोयक्ष्यमाणःकच्चिद्व
चःप्रतिगृण्हातितच्च २१ अग्निरुवाच नतेवाचंरोचयतेमरुत्तोबृहस्पतेरंजलिंप्राहिणोत्सः संवर्तोमां
याजयितेत्यवाचपुनःपुनःसमयायाच्यमानः २२ उवाचेदंमानुषायेचदिव्याःप्रजापतेर्येचलोकामहांतः तांश्चेल्ल
भेयंसंविदंतेनकृत्वानथापिनेच्छेयमितिप्रतीतः २३ इंद्रउवाच पुनर्गत्वापार्थिवंतंसमेत्यवाक्यंमदीयं
प्रापयस्वार्थयुक्तम् पुनर्यद्युक्तोनकरिष्यतेवचस्ततोवज्रंसंप्रहर्तास्मितस्मै २४ अग्निरुवाच गंधर्व
राड्यात्वयंतत्रदूतोबिभेम्यहंवासवतत्रगंतुम् संरब्धोमामब्रवीत्तीक्ष्णरोषःसंवर्तोवाक्यंचरितब्रह्मचर्यः २५ य
द्यागच्छेःपुनरेवंकथंचिद्बृहस्पतिंपरिदातुंमरुत्ते दहेयंत्वांचक्षुषादारुणेनसंक्रुद्धइत्येतदवेहिशक्र २६ श
क्रउवाच त्वमेवान्यान्दहसेजातवेदोनहित्वदन्योविद्यतेभस्मकर्ता त्वत्संस्पर्शात्सर्वलोकोबिभेति अश्र
द्धेयंवदसेहव्यवाह २७ अग्निरुवाच दिवंदेवेंद्रपृथिवींचसर्वांसंवेष्टयेस्त्वंस्वबलेनैववश
क्र एवंविधस्येहसतस्तवासौकथंवृत्रस्त्रिदिवंप्राग्जहार २८ ७ ७ ७ ७

तत्रनवमेनाहंदौर्बल्यात्वृत्रेणजितइतिवक्तुंस्वसामर्थ्यमिंद्रोवह्निंप्रतिवदति नगंडिकाकारयोगंकरेणुम् नगंपर्वतंडीयतेविहायसागच्छतीतिडीः प
क्षीअल्पोडीःडिकामक्षिकामशकादिः तस्याआकारेणयोगोस्यास्तीत्येवंरूपंअणुंसूक्ष्मंकरेकुर्वे कृञश्छांदसंभौवादिकत्वम् करेणेतिपाठेकरोमीत्य
ध्याहारः पाथोधिंकरेकर्तुमगस्त्यइवाहंपर्वतमपिमशकीकर्तुंसमर्थोस्मीत्यर्थः कुतस्तर्हिवृत्रस्त्वांनाराधितवानित्यतआह नचारिसोमंप्रपिबामिवन्हे

इंद्रउवाच नगंडिकाकारयोगंकरेणुंनचारिसोमंप्रपिबामिवन्हे नदुर्बलेवैप्रहरामिवज्रंकोमेसुखायप्रहरेतमर्त्यः २९
प्रव्राजयेयंकालकेयान्पृथिव्यामपाकर्षंदानवानंतरिक्षात् दिवःप्रन्हादमवसानमानयंकोमेसुखायप्रहरेतमानवः ३०
अग्निरुवाच यत्रशर्यातिंच्यवनोयाजयिष्यन्सहाश्विभ्यांसोममगृण्हादेकः तंत्वांकृद्धःप्रत्यषेधःपुरस्ताच्छर्यातियज्ञंस्मरतंमहेंद्र ३१ वज्रंगृहीत्वाचपुरंदरत्वंसंप्रहार्षीश्च्यवनस्यातिघोरम् सतेविप्रःसहवज्रेणबाहुमपागृण्हात्तपसाजातमन्युः ३२ ततोरोषात्सर्वतोघोररूपंसपत्नंतेजनयामासभूयः मदंनामासुरंविश्वरूपंयत्वंदृष्ट्वाचक्षुषीसंन्यमीलः ३३
हनुरेकाजगतीस्थातथैकादिवंगतामहतोदानवस्य सहस्रंदंतानांशतयोजनानांसुतीक्ष्णानांघोररूपंबभूव ३४ वृत्ताःस्थूलाराजतस्तंभवर्णादंष्ट्राश्चतस्रोद्वेशतेयोजनानाम् सत्वांदंतान्विदशन्नभ्यधावज्जिघांसयाशूलमुद्यम्यघोरम ३५ अपश्यस्त्वंतंतदाघोररूपंसर्वेत्वांददृशुर्दर्शनीयम् तस्माद्भीतःप्रांजलिस्त्वंमहर्षिमागच्छेथाःशरणंदानवघ्न ३६ क्षात्राद्बलाद्ब्रह्मबलंगरीयोनब्रह्मतःकिंचिदन्यद्गरीयः सोहंजानन्ब्रह्मतेजोयथावन्नसंवर्तंजेतुमिच्छामिशक्र ३७ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिसंवर्तमरुत्तीयेनवमोऽध्यायः ९ इंद्रउवाच एवमेतद्ब्रह्मबलंगरीयोनब्रह्मणःकिंचिदन्यद्गरीयः आविक्षितस्यतुबलंनमृष्येवज्रंचास्मैप्रहरिष्यामिघोरम् १

आरिसोमंशत्रुदत्तंसोमम् त्वंयंवसकुतोननिर्जितइत्यतआह नक्षीणःशक्तोपहरामिवज्रमित्यादिना नगंडिकाजंगमोनोकरेणुरितिपाठेनुकरेणुर्हस्तीमर्मऐरावतःखंडिकायुद्धंद्रविडभाषयाप्रसिद्धम् तांप्रतिजंगमोगतिशीलोनभवतीतिनोअस्ति ऐरावतवाहनस्यमेशत्रुजयइषत्करइत्यर्थः खंडिकाशब्दस्तालव्यादिरिहज्ञेयः इंद्रोहंतिवृषभंखंडिकानामितिमंत्रवर्णात् २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ दशमस्तूक्तनात्पर्यःशेषमतिरोहितार्थम् ३७ इत्याश्वमेधिकेपर्वणिटीकायांनवमोऽध्यायः ९ एवमिति १ २ ३ ४ ५

धृतराष्ट्रप्रहितोगच्छमरुत्तंसंवर्तेनसंगतंतंवदस्व बृहस्पतिंत्वमुपशिक्षस्वराजन्वज्रंवातेप्रहरिष्यामिघोरम् २ व्या
सउवाच ततोगत्वाधृतराष्ट्रोनरेंद्रंप्रोवाचेदंवचनंवासवस्य ३ धृतराष्ट्रउवाच गंधर्वंधृतराष्ट्रंमांनिबोधत्वा
मागतंवक्तुकामंनरेंद्र ऐंद्रंवाक्यंशृणुमेराजसिंहयत्प्राहलोकाधिपतिर्महात्मा ४ बृहस्पतिंयाजकंत्वंवृणीष्ववज्रंवाते
प्रहरिष्यामिघोरम् वचश्चैतन्नकरिष्यसेमेप्राहैतदेतावदचिंत्यकर्मा ५ मरुत्तउवाच त्वंचैवैतद्वेत्थपुरंद
रश्चविश्वदेवावसवश्चाश्विनौच मित्रद्रोहेनिष्कृतिर्नास्तिलोकेमहत्पापंब्रह्महत्यासमंतत् ६ बृहस्पतिर्याजयतांमहेंद्रं
देवश्रेष्ठंवज्रभृतांवरिष्ठम् संवर्तोमांयाजयिताद्यराजन्नतेवाक्यंनस्थवारोचयामि ७ गंधर्वउवाच घोरो
नादःश्रूयतांवासवस्यनभस्तलेगर्जतोराजसिंह व्यक्तंवज्रंमोक्ष्यतेतेमहेंद्रःक्षेमंराजंश्चिंत्यतामेषकालः ८ व्यास
उवाच इत्येवमुक्तोधृतराष्ट्रेणराजन्श्रुत्वानादंनदतोवासवस्य तपोनित्यंधर्मविदांवरिष्ठंसंवर्तंतंज्ञापयामासकार्य
म् ९ मरुत्तउवाच इममात्मानंप्लवमानमारादध्वादूरंतेननदृश्यतेद्य प्रपद्येहंशर्मविप्रेंद्रत्वत्तःप्रयच्छतस्माद
भयंविप्रमुख्य १० अयमायातिवैवज्रीदिशोविद्योतयन्दश अमानुष्येणघोरेणसदस्यास्त्रासिताहिनः ११ संव
र्तउवाच भयंशक्राद्व्येतुतेराजसिंहप्रणोत्स्येहंभयमेतत्सुघोरम् संस्तंभिन्याविद्ययाक्षिप्रमेवमाभैस्त्वमस्याभिभवा
त्प्रतीतः १२ अहंसंस्तंभयिष्यामिमाभैस्त्वंशक्रतोनृप सर्वेषामेवदेवानांक्षयितान्यायुधानिमे १३ दिशोवज्रंभजतांवायु
रेतुवर्षंभूत्वावर्षतांकाननेषु आपःप्लवंत्वंतरिक्षेवृथाचसौदामिनीदृश्यतेमाविभेस्त्वम् १४ वन्हिर्देवस्त्रातुवासर्वतस्ते
कामान्सर्वान्वर्षतुवासवोवा वज्रंतथास्थापयतांवधायमहाघोरंप्लवमानंजलौघैः १५ मरुत्तउवाच घोरश्चा
यंश्रूयतेवैमहास्वनोवज्रस्यैषःसहितोमारुतेन आत्माहिमेप्रव्यथतेमुहुर्मुहुर्नमेस्वास्थ्यंजायतेचाद्यविप्र १६ संवर्तउ·
वज्रादुग्राद्व्येतुभयंतवाद्यवातोभूत्वाहन्मिनरेंद्रवज्रम् भयंत्यक्त्वावरमन्यंवृणीष्वकंतेकामंमनसासाधयामि १७ मरुत्तउ·
इंद्रःसाक्षात्सहसाभ्येतुविप्रहविर्यज्ञेप्रतिगृण्हातुचैव स्वंस्वंधिष्ण्यंचैवजुषंतुदेवाःहुतंसोमंप्रतिगृण्हंतुचैव· १८ ६

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२

संवर्त्तउवाच अयमिंद्रोहरिभिर्यातिराजन्देवैःसर्वैस्त्वरितैस्तूयमानः मंत्राहूतोयज्ञमिमंमयाद्यपश्यस्वैनंमंत्रविस्र
स्तकायं १९ ततोदेवैःसहितोदेवराजोरथेयुक्तातान्हरीन्वाजिमुख्यान् आयाद्यज्ञमथराज्ञःपिपासुराविक्षितस्याप्रमेय
स्यसोमम् २० तमायांतंसहितंदेवसंघैःप्रत्युद्ययौसपुरोधामरुत्तः चक्रेपूजांदेवराजायचाग्र्यांयथाशास्त्रंविधिवत्प्रीयमा
णः २१ संवर्त्तउवाच स्वागतंतेपुरुहूतेहविद्वन्यज्ञोऽप्ययंसन्निहितेत्वयींद्र शोभिष्यतेबलवृत्रघ्नभूयःपिबस्व
सोमंसुतमुद्यतंमया २२ मरुत्तउवाच शिवेनमांपश्यनमश्चतेस्तुप्राप्तोयज्ञःसफलंजीवितंमे अयंयज्ञंकु
रुतेमेसुरेंद्रबृहस्पतेरवरजोविप्रमुख्यः २३ इंद्रउवाच जानामितेगुरुमेनंतपोधनंबृहस्पतेरनुजंतिग्मतेजस
म् यस्याह्वानादागतोहंनरेंद्रप्रीतिर्मेद्यत्वयिमन्युःप्रनष्टः २४ संवर्त्तउवाच यदिप्रीतस्त्वमसिवैदेवराजन
स्मात्स्वयंशाधियज्ञेविधानम् स्वयंसर्वान्कुरुभागान्सुरेंद्रजानात्वयंसर्वलोकश्चदेव २५ व्यासउवाच एवमु
क्तस्त्वांगिरसेनशक्रःसमादिदेशस्वयमेवदेवान् सभाःक्रियंतामावसथाश्चमुख्याःसहस्रशश्चित्रभूताःसमृद्धाः २६ कॢ
प्ताःस्थूणाःकुरुतारोहणानिगंधर्वाणामप्सरसांचशीघ्रम् यत्रनृत्येरंस्त्वप्सरसःसमस्ताःस्वर्गोपमःक्रियतांयज्ञवाटः
२७ इत्युक्तास्तेचक्रुराशुप्रतीतादिवौकसःशक्रवाक्यान्नरेंद्र ततोवाक्यंप्राहराजानमिंद्रःप्रीतोराजन्पूज्यमानोमरुत्त
म् २८ एषत्वयाहमिहराजन्समेत्ययेचाप्यन्येतवपूर्वेनरेंद्र सर्वाश्चान्यादेवताःप्रीयमाणाहविस्तुभ्यंप्रतिगृण्हंतुराज
न् २९ आग्नेयंवैलोहितमालभंतांवैश्वदेवंबहुरूपंहिराजन् नीलंचोक्षाणंमेध्यमभ्यालभंतांचलच्छिश्नंमत्प्रदिष्टंहि
जाग्र्याः ३० ततोयज्ञोववृधेतस्यराजन्यत्रदेवाःस्वयमन्नानिजह्रुः यस्मिन्शक्रोब्राह्मणैःपूज्यमानःसदस्योभूद्धरिमा
न्देवराजः ३१ ततःसंवर्तश्चैत्यगतोमहात्मायथावह्निःप्रज्वलितोद्वितीयः हवींष्युच्चैराह्वयन्देवसंघान्जुहावाग्नौमंत्र
वत्सुप्रतीतः ३२ ततःपीत्वाबलभित्सोममग्र्यंयेचाप्यन्येसोमपादेवसंघाः सर्वेनुज्ञाताःप्रययुःपार्थिवेनयथाजोषंतर्पिताः
प्रीतिमंतः ३३

३३ ५ ५ ५ ५ ५ ५ ५ ५

३४ ३५ ३६ ३७ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिटीकायांदशमोऽध्यायः १० शेषमनिरोहितार्थंयथावान्हिः पञ्चाधि
नइत्युक्तेनृपतौतस्मिन्नित्यध्यायत्रयंकृष्णयुधिष्ठिरसंवादोब्रह्मविद्यासूत्रम् १ उपप्लुतंराहुग्रस्तं २ ३ ब्रह्मज्ञानेकनाश्यःशोकोऽस्त्यतोनिःसहस्रेण
वाक्रतुसहस्रेणवाननश्यतीत्यभिसंधानोभगवान्वासुदेवउवाच सर्वंजिह्ममिति जिह्मंकामादिमृत्युपदंसंसारप्रापकं आर्जवंशमादि ब्रह्मणःपदं

ततोराजाजातरूपस्यराशीन्पदेपदेकारयामासहृष्टः द्विजातिभ्योविसृजन्भूरिवित्तंरराजवित्तेशइवारिहंता ३४ त
तोवित्तंविविधंसंनिधाययथोत्साहंकारयित्वाचकोशं अनुज्ञातोगुरुणासंनिवृत्यशशासगामखिलांसागरांताम् ३५
एवंगुणःसबभूवेहराजायस्यक्रतौतत्सुवर्णप्रभूतम् तत्त्वंसमादायनरेंद्रवित्तंयजस्वदेवांस्तर्पयानोविधानैः ३६ वै
शंपायनउवाच ततोराजापांडवोहृष्टरूपःश्रुत्वावाक्यंसत्यवत्याःसुतस्य मनश्चक्रेतेनवित्तेनयष्टुंततोमात्यैर्मंत्र
यामासभूयः ३७ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणि संवर्तमरुत्तीयेदशमोऽध्यायः १० वैशंपा
यनउवाच इत्युक्तेनृपतौतस्मिन्व्यासेनाद्भुतकर्मणा वासुदेवोमहातेजास्ततोवचनमाददे १ तंनृपंदीनमनसंनि
हतज्ञातिबांधवम् उपप्लुतमिवादित्यंसधूममिवपावकम् २ निर्विण्णमानसंपार्थंज्ञात्वायदुकुलोद्वहः आश्वासयन्धर्म
सुतंप्रवक्तुमुपचक्रमे ३ वासुदेवउवाच सर्वंजिह्मंमृत्युपदमार्जवंब्रह्मणःपदं एतावान्ज्ञानविषयःकिंप्रला
पःकरिष्यति ४ नैवतेनिष्ठितंकर्मनैवतेशत्रवो जिताः कथंशत्रुंशरीरस्थमात्मनोनावबुध्यसे ५ अत्रतेवर्तयिष्यामि
यथाधर्मंयथाश्रुतम् इंद्रस्यसहवृत्रेणयथायुद्धमवर्तत ६ वृत्रेणपृथिवीव्याप्तापुराकिलनराधिप दृष्ट्वासपृथिवींव्या
प्तांगंधस्यविषयेहृते ७ धराहरणदुर्गंधोविषयःसमपद्यत शतक्रतुश्चुकोपाथगंधस्यविषयेहृते ८ वृत्रस्यसत
तःक्रुद्धोघोरंवज्रमवासृजत् सवध्यमानोवज्रेणसुभृशंभूरितेजसा ९

मोक्षस्यप्रापकम् ज्ञानविषयः हेयोपादेयतयाज्ञात
व्यइत्यर्थः ४ शत्रुंनाशयितारं अत्राज्ञानरूपम् ५ नदेवाह अत्रतेइति इंद्रस्यचिदात्मनः वृत्रेणकामादिधर्मिणाचिदचिद्ग्रंथिरूपेणाहंकारेण ६ पृथि
वीस्थूलंशरीरम् यच्छरीरंसापृथिवीतिश्रुतेः व्याप्तां आत्मत्वेनगृहीतां गंधस्यविषये प्रदेशेपिंडेहृतेसति ७ तेनदुर्गंधअनात्मभूतविषयोब्रह्मांडंजातं
एकदेशस्यात्मत्वेनपरिग्रहात्इदंसर्वंयदयमात्मेति श्रुतेश्चिन्मात्रंसदप्येतत् एतस्यदृष्ट्यानित्यत्वाद्घ्राणातमभूदित्यर्थः ८ वज्रंविवेकंवक्ष्यमाणम् ९ ६७

तोयंकर्मसमवेतेःसोमाज्यपयः प्रभृतिभिरबहुलैर्द्रव्यैश्चंद्रलोकेभोगायारब्धंयत्शरीरं आपःपुरुषवचसइतिश्रुतेः मानुषाद्देहाद्व्युत्थापितोदिव्यदेहमा
त्मत्वेनगृहीतवानित्यर्थः रसेदिव्यलोकेहृतेममतयागृहीते १० ११ एवंस्थूलदेहद्वयाद्व्युत्थापितोज्योतिस्तैजसंप्रपंचंविवेशततः तत्रकिंचिद्रूपंदृश्यंआत्मत्वे
नजग्राह किंचिन्ममतयाहृतवान् १२ १३ वायुंसमष्टिलिंगंवायुरेवव्यष्टिर्वायुःसमष्टिरितिश्रुतेः ततः तत्रप्रवेशरूपयातदुपास्त्याब्रह्मलोकेपिसंकल्प
मात्रोत्थितेषुविषयेषुपूर्ववदात्मत्वेनात्मीयत्वेनचजग्राहेत्यर्थः स्पर्शेमानसविषयसंगे १४ १५ द्विविधादपिसूक्ष्माद्व्युत्थापितः आकाशं अव्याकृतं

विवेशसहसातोयंजग्राहविषयंततः अप्सुवृत्रगृहीतासुरसेचविषयेहृते १० शतक्रतुरतिक्रुद्धस्तत्रवज्रमवासृजत
सवध्यमानोवज्रेणतस्मिन्नमिततेजसा ११ विवेशसहसाज्योतिर्जग्राहविषयंततः व्याप्तेज्योतिषिवृत्रेणरूपेसविष
येहृते १२ शतक्रतुरतिक्रुद्धस्तत्रवज्रमवासृजत् सवध्यमानोवज्रेणतस्मिन्नमिततेजसा १३ विवेशसहसावायुंज
ग्राहविषयंततः व्याप्तेवायौतुवृत्रेणस्पर्शेथविषयेहृते १४ शतक्रतुरतिक्रुद्धस्तत्रवज्रमवासृजत् सवध्यमानोवज्रे
णतस्मिन्नमिततेजसा १५ आकाशमभिदुद्रावजग्राहविषयंततः आकाशेवृत्रभूतेचशब्देचविषयेहृते १६ शतक्र
तुरभिक्रुद्धस्तत्रवज्रमवासृजत सवध्यमानोवज्रेणतस्मिन्नमिततेजसा १७ विवेशसहसाशक्रंजग्राहविषयंततः तस्य
वृत्रगृहीतस्यमोहःसमभवन्महान् १८ रथंतरेणतंतातवसिष्ठःप्रत्यबोधयत् १९ ततोवृत्रंशरीरस्थंजघानभरतर्षभ
शतक्रतुरदृश्येनवज्रेणेतीहनःश्रुतम् २० इदंधर्मरहस्यंवैशक्रेणोक्तंमहर्षिषु ऋषिभिश्चममप्रोक्तंतन्निबोधजना
धिप २१ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिकृष्णधर्मसंवादेएकादशोऽध्यायः ११ ७

स्वसुप्त्यास्यंजाड्यंतेन शब्देशब्दादौविषयेहृतेगिलितेसति १५ १६ ततोव्युत्थापितः शक्रंचिदात्मानमेव वृत्रोजग्राह चिदात्मैश्वर्याभिमान
वानभूदित्यर्थः १८ रथोमायारूपोविग्रहः तंतरत्यनेनेतद्रथंतरं अहंब्रह्मास्मीतिवाक्यंतेनवसिष्ठोगुरुस्तंप्रत्यबोधयत् द्वितदर्शनान्निषेधनद्वि
तीयाद्वैभयंभवतीतिश्रुतेः १९ अतएवादृश्येनदृश्यशून्येन २० एवंद्विविधादपिकारणोपाधेर्व्युत्थापितःपरानंदंब्रह्मनिष्ठांप्रापदित्यर्थः २१ इ
त्याश्वमेधिकेपर्वणिटीकायामेकादशोऽध्यायः ११ ७ ५ ५ ५ ७ ५ ८

वज्रशब्दोक्तंविवेकंदर्शयतिस्थूलसूक्ष्मदेहयोर्वैधर्म्यप्रदर्शनेन द्विविधइत्यादिना परस्परमिति सत्वादिगुणजालिंगंतद्रहितस्यनस्थूलंशरीरमस्ति नचैनद्विनातेषांउपलंभस्थानमस्तीत्यर्थः १ २ शीतोष्णेकफपित्ते वायुर्वानः तेषांसाम्येस्वास्थ्यंवैषम्येव्याधिर्भवतीत्यर्थः ३ उष्णेनेति शीतोष्णयोरन्यतराधिक्यजंदोषमितरवर्द्धकेनौषधादिनापनयेदित्यर्थः सत्वमिति आत्मगुणाः लिंगधर्माः ४ साम्यंसुषुप्तिप्रलययोः विधानंउपायः ५ हर्षशोकयोः सत्वरजःकार्ययोःपरस्परबाधकत्वमुक्त्वानमस्तयोर्बाधकंताभ्यांबाध्यनेचेत्याह कश्चिदितिदुःखकालेप्यतीतसुखस्मृत्याप्यतीवव्यामुह्यति

व्यासदेवउवाच द्विविधोजायतेव्याधिःशारीरोमानसस्तथा परस्परंतयोर्जन्मनिर्द्वन्द्वंनोपपद्यते १ शरीरेजायतेव्याधिःशारीरःसनिगद्यते मानसेजायतेव्याधिर्मानसस्तुनिगद्यते २ शीतोष्णेचैववायुश्चगुणाराजन्शरीरजाः तेषांगुणानांसाम्यंचेत्तदाहुःस्वस्थलक्षणम् ३ उष्णेनबाध्यतेशीतंशीतेनोष्णंचबाध्यते सत्वंरजस्तमश्चेतित्रयआत्मगुणाःस्मृताः ४ तेषांगुणानांसाम्यंचेत्तदाहुःस्वस्थलक्षणम् तेषामन्यतमोत्सेकेविधानमुपदिश्यते ५ हर्षेणबाध्यतेशोकोहर्षःशोकेनबाध्यते कश्चिद्दुःखेवर्तमानःसुखस्यस्मर्तुमिच्छति कश्चित्सुखेवर्तमानोदुःखस्यस्मर्तुमिच्छति ६ सत्वंनदुःखीदुःखस्यनसुखीसुखस्यच स्मर्तुमिच्छसिकौन्तेयकिमन्यद्दुःखविभ्रमात् ७ अथवातेस्वभावोयंयेनपार्थावकृष्यसे दृष्ट्वासभागतांकृष्णामेकवस्त्रांरजस्वलाम् ८ मिषतांपाण्डवेयानांतत्सर्वंस्मर्तुमर्हसि प्रव्राजनंचनगरादजिनैश्चविवासनम् ९ महारण्यनिवासश्चनतस्यस्मर्तुमर्हसि १० जटासुरात्परिक्लेशश्चित्रसेनेनचाहवः सैंधवाच्चपरिक्लेशोनतस्यस्मर्तुमर्हसि ११ पुनरज्ञातचर्यायांकीचकेनपदावधः याज्ञसेन्यास्तथापार्थनतस्यस्मर्तुमर्हसि १२ यच्चतेद्रोणभीष्माभ्यांयुद्धमासीदरिंदम मनसैकेनयोद्धव्यंतत्तेयुद्धमुपस्थितम् १३ तस्मादभ्युपगन्तव्यंयुद्धायभरतर्षभ परमव्यक्तरूपस्यपारंयुक्त्यास्वकर्मभिः १४

नतुनैवविवेकेनतितिक्षते एवंसुखकालेप्यतीतंपुत्रमरणादिदुःखंस्मृत्वासिद्धमपिसुखंनाशयतीतिभावः ६ सइतित्वंतुउक्तविधद्विविधव्याधिहीनः नचसुखंदुःखंवास्मर्तुमिच्छसिनेच्छेरित्यर्थः किंतुदुःखविभ्रमात्यत् अन्यत् अकाममशोकंब्रह्मतदेवस्मर्तुमनुसंधातुमिच्छसिइच्छेरित्यर्थः ७ अथवेति अयंदुःखित्वादिःतत्स्वभावस्यापितवशोकोनयुक्तोतीतत्वात् दुःखस्येतिभावः ८ ९ १० ११ १२ मनसाऽहंकारेण १३ अभ्युपगंतव्यं अभिमुखीभवितव्यं अव्यक्तरूपस्यमायामात्रस्यमहतः परंपारं ब्रह्मयुक्त्यायोगेनकर्मभिश्चशोधकैःप्राप्नुहीतिशेषः मनोनाशेन

आत्मनामनसा १५ तस्मिन्नसति कां दुःखबहुबलामवस्थां एतत् मनसो मायामात्रत्वम् १६ आगतिं उत्पत्तिं गतिं प्रलयम् मायामात्रत्वेन ज्ञात्वा सुखं वर्त
स्वेत्यर्थः १७ इत्याश्वमेधिके पर्वणि टीकायां द्वादशोऽध्यायः १२ ननु कामत्यागेनैव मनो जेतव्यं अतो यः पूर्वं मया यदि मामनुजानीयाद्भवान् गंतुं त
पोवनमिति राज्यत्यागः प्रार्थितः स एव तर्हि युक्तस्तत्र कथं शाधि राज्यं यथोचितमिति वदसीत्याशंक्याह न बाह्यमिति न बाह्यस्य राज्यादेरर्थस्य त्यागात् त्या
गी भवति किंतु शारीरं लिंगशरीरोत्थं कामादिकं त्यक्त्वैव सिद्धिर्मोक्षः न वेति शुष्कवैराग्यवतोऽविवेकशून्यस्य सिद्ध्यभावं सूचयति १ बाह्येति गृध्यतः सक्तस्य
यो धर्मः सः अधर्म एव यत्सुखं तत् दुःखमेव मोढ्यं स्यानपायात् अनस्ताद्विषतामेवास्तु तुच्छमित्यर्थः २ द्व्यक्षरमिति ममत्वं संसारहेतुः तदभावो ब्रह्मप्रा

यत्र मे च धरैः कार्यं न भृत्यैर्न च बंधुभिः आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् १५ तस्मिन्नानिर्जिते युद्धे कामवस्थां गमि
ष्यसि एतज्ज्ञात्वा तु कौंतेय कृतकृत्यो भविष्यसि १६ एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिम् पितृपैतामहं वृत्तं शा
धि राज्यं यथोचितम् १७ इति श्रीमन्महाभारते आश्वमेधिके पर्वणि कृष्णधर्मसंवादे द्वादशोऽध्यायः १२ वा
सुदेव उवाच न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा १ बाह्यद्रव्यवि
मुक्तस्य शरीरस्य च गृध्यतः यो धर्मो यत्सुखं चैव द्विषतामस्तु तत्तथा २ द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् म
मेति च भवेन्मृत्युर्न ममेति च शाश्वतम् ३ ब्रह्म मृत्यू ततो राजन्नात्मन्येव व्यवस्थितौ अदृश्यमानौ भूतानि योजयतो ना
संशयम् ४ अविनाशोऽस्य सत्वस्य नियतो यदि भारत भित्वा शरीरं भूतानामहिंसां प्रतिपद्यते ५ लब्ध्वापि पृथिवीं कृ
त्स्नां सहस्थावरजंगमाम् ममत्वं यस्य नैव स्यात्किं तया स करिष्यति ६ अथवा वसतः पार्थ वने वन्येन जीवतः ममता
यस्य द्रव्येषु मृत्योरास्ये स वर्तते ७

प्तिहेतुरित्यर्थः ३ ब्रह्ममृत्यू निःसंगत्वससंगत्वे आत्मनि चित्ते एकस्मिन्नस्तानि बद्धूनां ममत्वं च तेषु
ध्वंत एव ४ एवं निर्ममोऽप्यसमाप्ताधिकारश्चित्तस्वाभाव्यादम्भ दादिवद्युध्यन् पिनत्तरवल्लिप्यत इत्याह अविनाश इति अस्य जगतः सत्वस्य सत्तायाः
अविनाशोऽधिष्ठानसत्तानतिरिक्तत्वान्नाशाभावः नियतो निश्चितो यदि जगतो बाध्यत्वं जानन् स्वमकृतपापेनैव सर्वभूतशरीरोच्छेदं कुर्वन्नपि अहिंसां अहिं
सकत्वमेव प्रतिपद्यते हत्वापि स इमांल्लोकान्न हंति न निहन्यत इत्यर्थः ५ लब्ध्वापीति स्वप्नोपलब्धधनेष्विव बुद्धस्य ममत्वाभावः स्वतः सिद्ध इत्यर्थः ६ ७

बाह्यंतराणामिति स्वभावं आत्मंमायामात्रत्वलक्षणंतत्त्वम् पश्यध्यानेनसाक्षात्कुरु तेध्यानयोगानुगताअपश्यन्देवात्मशक्तिंस्वगुणैर्निगूढामितिश्रु
तेः एवंदृष्ट्वान्वयत्यतः ननुतमपिस्वभावंभूतमनादिंनपश्यतिमायामपिबाधित्वाचिन्मात्रेणरूपेणयोवतिष्ठतेसमहाभयात्संसारान्मुच्यतइत्यर्थः ८ नन्वै
श्वर्यमेववरंकिंसुषुप्तिसमेनमोक्षेणेत्यत आह कामात्मानमिति अथर्यत्रान्यत्पश्यतितदल्पमितिश्रुतेः ऐश्वर्यमपितुच्छमेवातोनप्रशंसंतिसंतः मनसः
कामादयःततः प्रवृत्तिस्ततोदुःखं अतोमनएवनिरोद्धव्यमित्यर्थः ९ एतच्चानेकजन्मसाध्यमित्याह भूयोभूयइति विच्छिद्यविच्छिद्योत्तरोत्तरभूमिला
भरूपंजन्मयस्यसः भूयोभूयोजन्म तस्मादेवाभ्यासयोगात् शुद्धचित्तः सन्संसारमार्गंमोक्षमार्गंविचिंत्यकामान्संहरतइतिपूर्वेणान्वयः कोसौइत्याह दानं
चेति १० योदानादिध्यानयोगांतान्कामेनकामपूर्वकंनारभते यद्यच्चायंकामयतेसधर्मोनेतिविदित्वेतिसंबंधः फलितमाह योधर्मोनियमस्तस्यमूलमिति

बाह्यंतराणांशत्रूणांस्वभावंपश्यभारत योनपश्यतिनद्भूतंमुच्यतेसमहाभयात् ८ कामात्मानंनप्रशंसंतिलोके
नेहाकामाकाचिदस्तिप्रवृत्तिः सर्वेकामामनसोंगप्रभूतायान्पंडितःसंहरतेविचिंत्य ९ भूयोभूयोजन्मनोभ्यासयोगाद्यो
गीयोगंसारमार्गंविचिंत्य दानंचवेदाध्ययनंतपश्चकाम्यानिकर्माणिचवैदिकानि १० व्रतंयज्ञान्नियमान्ध्यानयोगान्का
मेनयोनारभतेविदित्वा यद्यच्चायंकामयतेसधर्मोनयोधर्मोनियतस्तस्यमूलम् ११ अत्रगाथाःकामगीताःकीर्तयंतिपु
राविदः शृणुसंकीर्त्यमानास्ताअखिलेनयुधिष्ठिर १२ नाहंशक्योनुपायेनहंतुंभूतेनकेनचित् योमांप्रयततेहंतुंज्ञा
त्वाप्रहरणेबलम् १३ तस्यतस्मिन्प्रहरणेपुनःप्रादुर्भवाम्यहम् योमांप्रयततेहंतुंयज्ञैर्विविधदक्षिणैः १४ जंगमेष्वि
वधर्मात्मापुनःप्रादुर्भवाम्यहं योमांप्रयततेनित्यंवेदैर्वेदांतसाधनैः १५

तस्यकामस्ययोनियमोनिग्रहःसधर्मःसचमूलंमोक्षबीजं ११
कामस्यदुरुच्छेद्यत्वंकामोक्तिभिरेवाह अत्रगाथाइत्यादिना १२ अनुपायेननिर्ममत्वंयोगाभ्यासश्चकामजयोपायउक्तः तद्व्यतिरेकेणेत्यर्थः योमामि
तिप्रहरणेयागादींद्रियसाध्येजपादिशस्त्रे प्रादुर्भवामि अहमेवसर्वोत्कृष्टोजपादिकर्तेत्यभिमानरूपेणाविर्भवामि तेनजपादिकंविफलंकरोमीत्य
र्थः १३ द्वितीयेनयोमामितिश्लोकेनप्रहरणेमनसि श्मशानवैराग्यन्यायेनजितोमयाकामइतिनिश्चित्यप्रयततेसंन्यासादिकंकरोति तस्यमनस्येव
पुनरहंप्रादुर्भवामि यदाहुरभियुक्ताः प्रमादिनोबहिश्चित्ताःपिशुनाःकलहोत्सुकाः संन्यासिनोपिदृश्यंतेदेवसंदूषिताशयाइति १४ योयज्ञैःकामंजि ११
घांसति तस्यचेतसियथाधर्मात्माजंगमेषुउत्तमयोनौउदाररूपेणाविर्भवामि तद्वत्तस्यचेत सि अहंदंभादिरूपेणाविर्भवामि १५

स्थावरेषु अनभिव्यक्तरूपेण भूतात्मा जीवः धर्मात्मेत्यपि पाठं पठंति केचित् यायजूकापेक्षया वेदवेदांतसाधनेष्वल्पकामादिभिर्व्याप्तिरित्यर्थः १६ धृ
त्या संग्रामे विपद्दि धैर्यतः भावाश्चित्तम् धैर्यबलेनैव लोकद्वयं जेष्यामीत्यभिमानवंतं तं करोमीत्यर्थः सच इममेवाभिमानं कामत्वेन बंधकत्वेन नाव
बुध्यते तपसा योगबलेन १७ तत्रापि योगोपसर्गरूपेण मधुमात्याद्यैश्वर्यभूमिषु स्पृहारूपेणाविर्भवामि १८ मोक्षमास्थाय नित्यमुक्तमात्मान-
मज्ञात्वा मोक्षार्थं यस्तप आदि करोति तमज्ञं प्राप्य नृत्यामि च हसामि चेत्यर्थः १९ तस्मादिति यस्मान्निर्ममत्वपूर्वकयोगाभ्यासमंतरेण अन्यः काम

स्थावरेष्विवभूतात्मा तस्य प्रादुर्भवाम्यहम् यो मां प्रयतते हंतुं धृत्या सत्यपराक्रमः १६ भावो भवामि तस्याहं सच मां
नावबुध्यते यो मां प्रयतते हंतुं तपसा शंसितव्रतः १७ ततस्तपसि तस्याथ पुनः प्रादुर्भवाम्यहम् यो मां प्रयतते हंतुं मोक्षमा
स्थाय पंडितः १८ तस्य मोक्षरतिस्थस्य नृत्यामि च हसामि च अवध्यः सर्वभूतानामहमेकः सनातनः १९ तस्मात्त्वमपि तं
कामं यज्ञैर्विविधदक्षिणैः धर्मं कुरु महाराज तत्र ते स भविष्यति २० यजस्व वाजिमेधेन विधिवद्दक्षिणावता अन्यैश्च
विविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः २१ मा ते व्यथास्तु निहतान्बंधून्वीक्ष्य पुनः पुनः न शक्यास्ते पुनर्द्रष्टुं ये हतास्मिन्रणाजि
रे ३२ स त्वमिष्ट्वा महायज्ञैः समृद्धैराप्तदक्षिणैः कीर्तिं लोके परां प्राप्य गतिमग्र्यां गमिष्यसि २३ इति श्रीमन्महाभा
रते आश्वमेधिके पर्वणि कृष्णधर्मसंवादे त्रयोदशोऽध्यायः १३ वैशंपायन उवाच एवं बहुविधैर्वाक्यैर्मु-
निभिस्तैस्तपोधनैः समाश्वस्यत राजर्षिर्हतबंधुर्युधिष्ठिरः १ सोनुनीतो भगवता विष्टरश्रवसा स्वयम् द्वैपायनेन कृष्णे
न देवस्थानेन वा विभुः २ नारदेनाथ भीमेन नकुलेन च पार्थिवः कृष्णया सहदेवेन विजयेन च धीमता ३ अन्यैश्च पुरुषव्या
घ्रैर्ब्राह्मणैः शास्त्रदृष्टिभिः व्यजहाच्छोकजं दुःखं संतापं चैव मानसं ४ अर्चयामास देवांश्च ब्राह्मणांश्च युधिष्ठिरः कृ
त्वाथ प्रेतकार्याणि बंधूनां स पुनर्नृपः अन्वशासच्च धर्मात्मा पृथिवीं सागरांबराम् ५ प्रशांतचेताः कौरव्यः स्वराज्यं प्राप्य के
वलम् व्यासं च नारदं चैव तांश्चान्यानब्रवीन्नृपः ६ ।

जयोपायो नास्ति निर्ममत्वं च यज्ञादिजन्यां चित्तशुद्धिं विना न संभवति तस्मान्निष्कामान्यज्ञादीननुतिष्ठतः तव श्रेयःसिद्धिरिति शेषः
२० २१ २२ २३ इत्याश्वमेधिके पर्वणि टीकायां त्रयोदशोऽध्यायः १३ आख्यायिकामनुसरत्यध्यायद्वयेन एवं बहुविधैर्वाक्यैरित्यादि
ना १ २ ३ ४ कृत्वाथेति पुनरिति मासिकादीनि प्रेतकार्याणि पूर्वकृतानामेवानुवादो वा ५ ६ ७ ८ ९

आश्वासितोऽहंप्राग्स्वद्वैर्भवद्भिर्मुनिपुंगवैः नसूक्ष्ममपिमेकिंचिद्व्यलीकमिहविद्यते ७ अर्थश्चसमहान्प्राप्तोयेनयक्ष्या
मिदेवताः पुरस्कृत्याद्यभवतःसमानेष्यामहंमखम् ८ हिमवंतंत्वयागुप्तागमिष्यामःपितामह बह्वाश्चर्योहिदेशःसश्रू
यतेद्विजसत्तम ९ तथाभगवताचित्रंकल्याणंबहुभाषितम् देवर्षिणानारदेनदेवस्थानेनचैवह १० नाभागधेयःपुरुषःक
श्चिदेवंविधान्गुरून् लभतेव्यसनंप्राप्यसुहृदःसाधुसंमतान् ११ एवमुक्तास्ततोराज्ञासर्वएवमहर्षयः अभ्यनुज्ञाप्यरा
जानंतथातौकृष्णफाल्गुनौ १२ पश्यतामेवसर्वेषांतत्रैवादर्शनंययुः ततोधर्मसुतोराजातत्रैवोपाविशत्प्रभुः १३ एवंनाति
महान्कालःसतेषामभ्यवर्तत कुर्वतांशौचकार्याणिभीष्मस्यनिधनेतदा १४ महादानानिविप्रेभ्योददतामौर्ध्वदेहिकम् भी
ष्मकर्णपुरोगाणांकुरूणांकुरुसत्तम १५ सहितोधृतराष्ट्रेणप्रददावौर्ध्वदेहिकम् ततोदत्वाबहुधनंविप्रेभ्यःपांडवर्षभः १६
धृतराष्ट्रंपुरस्कृत्यविवेशगजसाह्वयम् ससमाश्वास्यपितरंप्रज्ञाचक्षुषमीश्वरम् १७ अन्वशाद्वैसधर्मात्मापृथिवींभ्रातृ
भिःसह १८ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिचतुर्दशोऽध्यायः १४ जनमेजयउवाच विजिते
पांडवेयैस्तुप्रशांतेचद्विजोत्तम राष्ट्रेकिंचक्रतुर्वीरौवासुदेवधनंजयौ १ वैशंपायनउवाच विजितेपांडवे
येतुप्रशांतेचविशांपते राष्ट्रेबभूवतुर्हृष्टौवासुदेवधनंजयौ २ विजह्रातेमुदायुक्तौदिविदेवेश्वराविव तौवनेषुविचित्रे
षुपर्वतेषुससानुषु ३ तीर्थेषुचैवपुण्येषुपल्वलेषुनदीषुच चंक्रम्यमाणौसंहृष्टावश्विनाविवनंदने ४ इंद्रप्रस्थेमहात्मा
नौरमतुःकृष्णपांडवौ प्रविश्यतांसभांरम्यांविजह्रातेमराविव ५ तत्रयुद्धकथाश्चित्राःपरिक्लेशांश्चपार्थिव कथायोगे
कथायोगेकथयामासतुःसदा ६ ऋषीणांदेवतानांचवंशांस्तावाहतुस्तदा प्रीयमाणौमहात्मानौपुराणावृषिसत्तमौ ७
मधुरास्तुकथाश्चित्राश्चित्रार्थपदनिश्चयाः निश्चयज्ञःसपार्थायकथयामासकेशवः ८ पुत्रशोकाभिसंतप्तंज्ञातीनांचसह
स्रशः कथाभिःशमयामासपार्थंशौरिर्जनार्दनः ९ सतमाश्वास्यविधिवद्विज्ञानज्ञोमहातपाः अपहृत्यात्मनोभारंविशश्रा
मेवसात्वतः १०

तनःकथांतेगोविंदोगुडाकेशमुवाचह सांत्वयन्श्लक्ष्णयावाचाहेतुयुक्तमिदंवचः ११ वासुदेवउवाच विजितेयंधराकृ
त्स्नासव्यसाचिन्परंतप त्वद्बाहुबलमाश्रित्यराज्ञाधर्मसुतेनच १२ असपत्नांमहींभुंक्तेधर्मराजोयुधिष्ठिरः भीमसेनानुभावेनय
मयोश्चनरोत्तम १३ धर्मेणराज्ञाधर्मज्ञप्राप्तंराज्यमकंटकम् धर्मेणनिहतःसंख्येसचराजासुयोधनः १४ अधर्मरुचयोलुब्धाः
सदाचाप्रियवादिनः धार्तराष्ट्रादुरात्मानःसानुबंधानिपातिताः १५ प्रशांतामखिलांपार्थपृथिवींपृथिवीपतिः भुंक्तेधर्मसुतोरा
जात्वयागुप्तःकुरूद्वह १६ रमेचाहंत्वयासार्द्धमरण्येष्वपिपांडव किमुयत्रजनोयंवैपृथाचामित्रकर्षण १७ यत्रधर्मसुतोराजा
यत्रभीमोमहाबलः यत्रमाद्रवतीपुत्रौरतिस्तत्रपरामम १८ तथैवस्वर्गकल्पेषुसभोद्देशेषुकौरव रमणीयेषुपुण्येषुसहितस्यत्व
यानघ १९ कालोमहांस्त्वतीतोमेशूरसूनुमपश्यतः बलदेवंचकौरव्यनथान्यान्वृष्णिपुंगवान् २० सोहंगंतुमभीप्सामिपुरींद्वार
वतींप्रति रोचतांगमनंमह्यंतवापिपुरुषर्षभ २१ उक्तोबहुविधंराजातत्रतत्रयुधिष्ठिरः सहभीष्मेणप्रत्युक्तमस्माभिःशोकका
रिते २२ शिष्टोयुधिष्ठिरोस्माभिःशास्तासन्नपिपंडितः तेनतत्तुवचःसम्यग्गृहीतंसुमहात्मना २३ धर्मपुत्रेहिधर्मज्ञेकृतज्ञेसत्यवा
दिनि सत्यंधर्मोमतिश्चाग्र्यास्थितिश्चसततंस्थिरा २४ तत्रगत्वामहात्मानंयदितेरोचतेर्जुन अस्मद्गमनसंयुक्तंवचोब्रूहिजना
धिपम् २५ नहितस्याप्रियंकुर्यांप्राणत्यागेप्युपस्थिते कुतोगंतुंमहाबाहोपुरींद्वारवतींप्रति २६ सर्वंत्विदमहंपार्थत्वत्प्रीतिहितुका
म्यया ब्रवीमिसत्यंकौरव्यनमिथ्यैतत्कथंचन २७ प्रयोजनंचनिर्वृत्तमिहवासेममार्जुन धार्तराष्ट्रोहताराजासबलःसपदानु
गः २८ पृथिवीचवशेतातधर्मपुत्रस्यधीमतः स्थितासमुद्रवलयासशैलवनकानना २९ चितारत्नैर्बहुविधैःकुरुराजस्यपांडव
धर्मेणराजाधर्मज्ञःपातुसर्वांवसुंधराम् ३० उपास्यमानोमुनिभिःसिद्धैश्चापिमहात्मभिः स्तूयमानश्चसततंबंदिभिर्भरतर्षभ ३१
त्वंमयासहगत्वाद्यराजानंकुरुवर्धनम् आपृच्छकुरुशार्दूलगमनंद्वारकांप्रति ३२ इदंशरीरंवसुयच्चमेगृहेनिवेदितंपार्थयु
धिष्ठिरेनृपे प्रियश्चमान्यश्चहिमेयुधिष्ठिरःसदाकुरूणामधिपोमहामतिः ३३ प्रयोजनंचापिनिवासकारणेनविद्यतेमेत्वदृ
तेनृपात्मज स्थिताहिपृथ्वीतवपार्थशासनेगुरोःसुवृत्तस्ययुधिष्ठिरस्य ३४

इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीकायांपंचदशोऽध्यायः १५   सभायाम् १ २ ३ ४ ५ ६ ७ ८ ९ १०

इतीदमुक्तःसतदामहात्मनाजनार्दनेनामितविक्रमोऽर्जुनः तथेतिदुःखादिववाक्यमेरयज्जनार्दनंसंप्रतिपूज्यपार्थिव ३५
इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिपंचदशोऽध्यायः १५ जनमेजयउवाच सभायांवसतोस्तत्रनि
हत्यारीन्महात्मनोः केशवार्जुनयोःकानुकथासमभवद्द्विज १ वैशंपायनउवाच कृष्णेनसहितःपार्थःसराज्यंप्रा
प्यकेवलम् तस्यांसभायांदिव्यायांविजहारमुदायुतः २ तत्रकंचित्सभोद्देशंस्वर्गोद्देशसमंनृप यदृच्छयातौमुदितौजग्मतुः
स्वजनावृतौ ३ ततःप्रतीतःकृष्णेनसहितःपांडवोऽर्जुनः निरीक्ष्यतांसभांरम्यामिदंवचनमब्रवीत् ४ विदितंमेमहाबाहोसंग्रा
मेसमुपस्थिते माहात्म्यंदेवकीमातस्तच्चतेरूपमैश्वरम् ५ यत्तद्भगवताप्रोक्तंपुराकेशवसौहृदात् तत्सर्वंपुरुषव्याघ्रनष्टंमेभ्र
ष्टचेतसः ६ ममकौतूहलंत्वस्तितेष्वर्थेषुपुनःपुनः भवांस्तुद्वारकांगंतानचिरादिवमाधव ७ वैशंपायनउवाच एव
मुक्तस्ततःकृष्णःफाल्गुनंप्रत्यभाषत परिष्वज्यमहातेजावचनंवदतांवरः ८ वासुदेवउवाच श्रावितस्त्वंमयागुह्यं
ज्ञापितश्चसनातनम् धर्मंस्वरूपिणंपार्थसर्वलोकांश्चशाश्वतान् ९ अबुद्ध्यानाग्रहीर्यत्त्वंतन्मेसुमहदप्रियम् नचसाद्यपुन-
र्भूयःस्मृतिर्मेसंभविष्यति १० नूनमश्रद्दधानोसिदुर्मेधाह्यसिपांडव नचशक्यंपुनर्वक्तुमशेषेणधनंजय ११ सहिधर्मःसुपर्या
प्तोब्रह्मणःपरिवेदने नशक्यंतन्मयाभूयस्तथावक्तुमशेषतः १२ परंहिब्रह्मकथितंयोगयुक्तेनतन्मया इतिहासंतुवक्ष्यामितस्मि
न्नर्थेपुरातनम् १३ यथात्वंबुद्धिमास्थायगतिमग्र्यांगमिष्यसि शृणुधर्मभृतांश्रेष्ठगदितंसर्वमेवमे १४ आगच्छद्ब्राह्मणःक
श्चित्स्वर्गलोकादरिंदम ब्रह्मलोकाच्चदुर्धर्षःसोस्माभिःपूजितोऽभवत् १५ अस्माभिःपरिपृष्टश्चयदाहभरतर्षभ दिव्येनवि
धिनापार्थतच्छृणुष्वाविचारयन् १६ ब्राह्मणउवाच मोक्षधर्मंसमाश्रित्यकृष्णयन्मामपृच्छथाः भूतानामनुकंपा
र्थंयन्मोहच्छेदनंविभो १७ तत्तेहंसंप्रवक्ष्यामियथावन्मधुसूदन शृणुष्वावहितोभूत्वागदतोममभाधव १८ कश्चिद्विप्रस्तपो
युक्तःकाश्यपोधर्मवित्तमः आससादद्विजंकंचिद्धर्माणामागतागमम् १९

११ १२ १३ १४ १५ १६ षोडशेसभायामित्यादिनाप्रस्तूयानु-
गीतामारभतेमोक्षधर्ममित्यादिना भूतानामेवनस्त्वस्य विभोपरमात्मन् १७ १८ आगतागमंप्राप्तशास्त्ररहस्यंऊहापोहकुशलमित्यर्थः १९

गतागतेमरणसंसरणेविषये ज्ञानंशास्त्रानुमानजम् विज्ञानंयोगजप्रत्यक्षम् अस्येवव्याख्यानंलोकतत्वेतिसार्द्धेन २० २१ मुक्तवन्नित्यमुक्तस्यापिमृषा-
बंधाभिप्रायवत्करणम् २२ २३ २४ २५ २६ २७ २८ अन्यत्रधर्मादन्यत्राधर्मादित्यात्मनोधर्माद्यतीतत्वाद्धर्माधर्मावेवफलतोनिंदतिवैराग्यार्थं विवि

गतागतेसुबहुशोज्ञानविज्ञानपारगम् लोकतत्वार्थकुशलंज्ञातारंसुखदुःखयोः २० जातीमरणतत्वज्ञंकोविदंपापपुण्ययोः
द्रष्टारमुच्चनीचानांकर्मभिर्देहिनांगतिम् २१ चरंतंमुक्तवत्सिद्धंप्रशांतंसंयतेंद्रियम् दीप्यमानंश्रियाब्राह्म्याक्रममाणंचस
र्वशः २२ अंतर्धानगतिज्ञंचश्रुत्वातत्वेनकाश्यपः तथैवांतर्हितैःसिद्धैर्यांतंचक्रधरैःसह २३ संभाषमाणमेकांतेसमासीनंचतैः
सह यदृच्छयाचगच्छंतमसक्तंपवनंयथा २४ तंसमासाद्यमेधावीसतदाद्विजसत्तमः चरणौधर्मकामोस्यतपस्वीसुसमाहितः
प्रतिपेदेयथान्यायंभक्त्यापरमयायुतः २५ विस्मितश्चाभवद्दृष्ट्वाकाश्यपस्तंद्विजोत्तमम् परिचारेणमहतागुरुंतंपर्यतोषयत्
२६ उपपन्नंचतत्सर्वंश्रुतचारित्रसंयुतम् भावेनतोषयच्चैनंगुरुवृत्त्यापरंतप २७ तस्मैतुष्टःसशिष्यायप्रसन्नोवाक्यमब्रवी
त् सिद्धिंपरामभिप्रेक्ष्यशृणुमत्तोजनार्द्दन २८ सिद्धउवाच विविधैःकर्मभिस्तातपुण्ययोगैश्चकेवलैः गच्छंतीह-
गतिंमर्त्यादेवलोकेच संस्थितिम् २९ नक्वचित्सुखमत्यंतंनक्वचिच्छाश्वतीस्थितिः स्थानाच्चमहतोभ्रंशोदुःखेलब्ध्वापुनःपु
नः ३० अशुभागतयःप्राप्ताःकष्टामेपापसेवनात् काममन्युपरीतेनतृष्णयामोहितेनच ३१ पुनःपुनश्चमरणंजन्मचैवपुनःपु
नः आहाराविविधाभुक्ताःपीतानानाविधास्तनाः ३२ मातरोविविधादृष्टाःपितरश्चपृथग्विधाः सुखानिचविचित्राणिदुःखा
निचमयानघ ३३ प्रियैर्विवासोबहुशःसंवासश्चाप्रियैःसह धननाशश्चसंप्राप्तोलब्ध्वादुःखेनतद्धनम् ३४ अवमानाःसुकष्टा
श्चराजतःस्वजनात्तथा शारीरामानसाश्चापिवेदनाभृशदारुणाः ३५ प्राप्ताविमाननाश्चोग्रावधबंधाश्चदारुणाः पतनंनिर
येचैवयातनाश्चयमक्षये ३६ जरारोगाश्चसततंव्यसनानिचभूरिशः लोकेस्मिन्ननुभूतानिद्वंद्वजानिभृशंमया ३७ ततःक-
दाचिन्निर्वेदान्निराकाराश्रितेनच लोकतंत्रंपरित्यक्तंदुःखार्त्तेनभृशंमया ३८

धेरित्यादिना २९ ३० ३१ ३२ ३३ ३४
३५ ३६ ३७ ततःकदाचिदितिनिर्वेदाख्यवैराग्यदोर्लभ्यमुक्तम् निराकाराश्रितेन असंप्रज्ञानसमाधिंसमधिगम्यब्रह्मभावाश्रितेन लोक्यतइ
तिलोकोद्वैतंतत्तंत्रम् तज्जंदुःखम् ३८ ५ १ ५ ५ ५ ५ ७ ५ ५

इमंमार्गंयोगमार्गंअनुभूयज्ञात्वा अनुष्ठितः अनुष्ठानंअभ्यासःसंजातोस्यसोनुष्ठितः ततोनुष्ठानात् इयंपूर्वोक्ताअंतर्धानादिशक्तिर्ज्ञानविज्ञानादि-
रूपा आत्मनः मनसः मनसोहिप्रसादेनहंतिकर्मशुभाशुभम् प्रसन्नात्मनिसंस्थित्वासुखमक्षय्यमश्नुतेइतिश्रुतेः ३९ विद्याफलंअपुनरावृत्तिं स
र्वज्ञत्वंचाह नाहमित्यादिना आसिद्धेः आमोक्षात् आप्रजासृष्टेः आत्मनः अपिशब्दाल्लोकानांचगतीरालोकयामीत्यन्वयः ४० इतःपरंसत्यलोकम्
परतरंकैवल्यं यदिप्रयास्यन्नृपपारमेष्ठ्यमितियोगिनामिच्छयासृष्टौवाक्रमिकंवाकैवल्यमस्तीतिस्मरणात् ४१ ४२ ४३ ४४ ४५ बहुमन्येभृशं

लोकेस्मिन्ननुभूयाहमिमंमार्गमनुष्ठितः ततःसिद्धिरियंप्राप्ताप्रसादादात्मनोमया ३९ नाहंपुनरिहागंतालोकानालोकया
म्यहम् आसिद्धेराप्रजासर्गादात्मनोपिगतीःशुभाः ४० उपलब्धाद्विजश्रेष्ठतथेयंसिद्धिरुत्तमा इतःपरंगमिष्यामिततःप
रतरंपुनः ४१ ब्रह्मणःपदमव्यक्तंमातेभूदत्रसंशयः नाहंपुनरिहागंतामर्त्यलोकंपरंतप ४२ प्रीतोऽस्मितेमहाप्राज्ञब्रूहिकिंक
रवाणिते यदीप्सुरुपपन्नस्त्वंतस्यकालोयमागतः ४३ अभिजानेचतदहंयदर्थंमामुपागतः अचिरात्तुगमिष्यामितेनाहं
त्वामचूचुदम् ४४ भृशंप्रीतोऽस्मिभवतश्चारित्रेणविचक्षण परिपृच्छस्वकुशलंभाषेयंयत्तवेप्सितम् ४५ बहुमन्येचतेबुद्धिं
भृशंसंपूजयामिच येनाहंभवताबुद्धोमेधावीह्यसिकाश्यप ४६ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणि अनुगीता-
सु षोडशोऽध्यायः १६ वासुदेवउवाच ततस्तस्योपसंगृह्यपादौप्रश्नान्सुदुर्वचान् पप्रच्छतांश्चध
र्मान्सप्राहधर्मभृतांवरः १ काश्यपउवाच कथंशरीरंच्यवतेकथंचैवोपपद्यते कथंकष्टाच्चसंसारात्संसरन्प
रिमुच्यते २ आत्मानंचप्रकृतिंमुक्त्वातच्छरीरंविमुंचति शरीरतश्चनिर्मुक्तःकथमन्यत्प्रपद्यते ३

पूजये अहं अंतर्धानगतोपियतस्त्वयाज्ञातः ४६ इत्याश्वमेधिकेपर्वणिटीकायांषोडशोऽध्यायः १६ ततः १ एवंनित्यानित्यविवेक
वैराग्यादयःशिष्यगुणाःज्ञानविज्ञानाद्योगुरुगुणाश्चोक्ताः तत्रपुनःपुनश्चमरणंजन्मचैवपुनःपुनरित्युक्तंतयोःप्राप्तिप्रकारोपृच्छति कथमिति
नाहंपुनरिहागंतेत्युक्तंतस्यापिप्रकारंपृच्छति कथंकष्टाच्चेति २ इतःपरंगमिष्यामिततःपरतरंपुनरित्युक्तंतत्रापिपृच्छति आत्मानंचेति
आत्माजीवःप्रकृतिंमूलाविद्याम् तच्छरीरंतज्जंस्थूलमिदंमुक्त्वाकथंपरंप्राप्नोतीत्यर्थः शरीरात् परस्मात् कथंअन्यत् परतरंब्रह्मप्रपद्यतइ-
तिपंचमःप्रश्नः ३ छ छ छ छ छ छ छ छ छ

एवंभूतस्यजीवतः कथंकर्मफलभोगइतिषष्ठः विदेहस्यसंसारबीजभूतंकर्मक्वावतिष्ठतीतिसप्तमः कथंशुभाशुभेइति ४ ५ तत्र आद्यस्यप्रश्नस्याद्येनाध्या

कथंशुभाशुभेचायंकर्मणोःस्वकृतेनरः उपभुंक्ते क्ववाकर्मविदेहस्यावतिष्ठते ४ ब्राह्मणउवाच एवंसंदेशितःसि
द्धःप्रश्नांस्तान्प्रत्यभाषत आनुपूर्व्येणवार्ष्णेयतन्मेनिगदतःशृणु ५ सिद्धउवाच आयुःकीर्तिकराणीहयानिकृत्या-
भिसेवते शरीरग्रहणेयस्मिंस्तेषुक्षीणेषुसर्वशः ६ आयुःक्षयपरीतात्माविपरीतानिसेवते बुद्धिर्व्यावर्ततेचास्यविनाशेप्र
त्युपस्थिते ७ सत्वंबलंचकालंचाविदित्वाचात्मनस्तथा अतिवेलमुपाश्नातिस्वविरुद्धान्यनात्मवान् ८ यदायमतिकष्टा
निसर्वाण्युपनिषेवते अत्यर्थमपिवाभुंक्तेनवाभुंक्तेकदाचन ९ दुष्टान्नामिषपानंचयदन्योन्यविरोधिच गुरुचाप्यमितंभु
क्तेनातिजीर्णेऽपिवापुनः १० व्यायाममतिमात्रंचव्यवायंचोपसेवते सततंकर्मलोभाद्वाप्राप्तंवेगंविधारयेत् ११ रसाभियु
क्तमन्नंवादिवास्वप्नंचसेवते अपक्वान्नागतेकालेस्वयंदोषान्प्रकोपयेत् १२ स्वदोषकोपनाद्रोगंलभतेमरणांतिकम् अपि-
वोद्बंधनादीनिपरीतानिव्यवस्यति तस्यतैःकारणैर्जंतोःशरीरंच्यवतेतदा जीवितंप्रोच्यमानंतद्यथावदुपधारय १४
ऊष्माप्रकुपितःकायेतीव्रवायुसमीरितः शरीरमनुपर्येत्यसर्वान्प्राणान्रुणद्धिवै १५ अत्यर्थंबलवानूष्माशरीरेपरिको
पितः भिनत्तिजीवस्थानानिमर्माणिविद्धितत्वतः १६ ततःसवेदनःसद्योजीवःप्रच्यवतेक्षरात् शरीरंत्यजतेजंतुश्छिद्य-
मानेषुमर्मसु १७ वेदनाभिःपरीतात्मातद्विद्धिद्विजसत्तम जातीमरणसंविग्नाःसततंसर्वजंतवः १८ दृश्यंतेसंत्यजं
तश्चशरीराणिद्विजर्षभ गर्भसंक्रमणेचापिकर्मणामातिसर्पणे १९ तादृशीमेवलभतेवेदनांमानवःपुनः भिन्नसंधिरथ
क्लेदमद्भिःसलभतेनरः २० यथापंचसुभूतेषुसंभूतत्वंनियच्छति शैत्यात्प्रकुपितःकायेतीव्रवायुसमीरितः २१ यःसपंच
सुभूतेषुप्राणापानेव्यवस्थितः सगच्छत्यूर्ध्वगोवायुःकृच्छ्रान्मुक्त्वाशरीरिणम् २२ शरीरंचजहत्येवंनिरुच्छ्वासश्चदृश्यते
सनिरूष्मानिरुच्छ्वासोनिःश्रीकोहतचेतनः २३ ब्रह्मणासंपरित्यक्तोमृतइत्युच्यतेनरः स्रोतोभिर्यैर्विजानातिइंद्रियार्था
न्शरीरभृत् २४ तैरेवचविजानातिप्राणानाहारसंभवान् तत्रैवकुरुतेकाययेयःसजीवःसनातनः २५

येनउत्तरम् ततोद्वितीय
स्यद्वितीयेन शेषाणांतृतीयेन आयुःकीर्तिकराणीहेत्यादिना ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४
२५

२६ २७ २८ २९ ३० ३१ ३२, ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ इत्याश्वमेधिके

तथायद्यद्वैद्युत्तंसन्निपातेक्वचित्क्वचित् तत्तन्मर्मविजानीहिशास्त्रदृष्टंहितत्तथा २६ तेषुमर्मसुभिन्नेषुततःससमुदीरयन्
आविश्यहृदयंजंतोःसत्वंचाशुरुणद्धिवै ततःसचेतनोजंतुर्नाभिजानातिकिंचन २७ तमसासंवृतज्ञानःसंवृत्तेष्वथमर्मसु स
जीवोनिरधिष्ठानश्चाल्यतेमातरिश्वना २८ ततःसतंमहोच्छ्वासंभृशमुच्छ्वास्यदारुणम् निष्क्रामन्कंपयत्याशुतच्छरीरमचे-
तनम् २९ सजीवःप्रच्युतःकायात्कर्मभिःस्वैःसमावृतः अभितःस्वैःशुभैःपुण्यैःपापैर्वाप्युपपद्यते ३० ब्राह्मणाज्ञानसंपन्नायथा
वच्छ्रुतनिश्चयाः इतरंकृतपुण्यंवातंविजानंतिलक्षणैः ३१ यथांधकारेखद्योतंलीयमानंततस्ततः चक्षुष्मंतःप्रपश्यंतितथाच
ज्ञानचक्षुषः ३२ पश्यंत्येवंविधंसिद्धाजीवंदिव्येनचक्षुषा च्यवंतंजायमानंचयोनिंचानुप्रवेशितम् ३३ तस्यस्थानानिदृष्टानि
त्रिविधानीहशास्त्रतः कर्मभूमिरियंभूमिर्यत्रतिष्ठंतिजंतवः ३४ ततःशुभाशुभंकृत्वालभंतेसर्वदेहिनः इहैवोच्चावचान्भो
गान्प्राप्नुवंतिस्वकर्मभिः ३५ इहैवाशुभकर्माणःकर्मभिर्निरयंगताः अवाग्गतिरियंकष्टायत्रपच्यंतिमानवाः ३६ तस्मात्सु
दुर्लभोमोक्षोरक्ष्यश्चात्माततोभृशम् ३७ ऊर्ध्वंतुजंतवोगत्वायेषुस्थानेष्ववस्थिताः कीर्त्यमानानितानीहतत्त्वतःसन्निबोध
मे ३८ तच्छ्रुत्वानैष्ठिकींबुद्धिंबुध्येथाःकर्मनिश्चयम् तारारूपाणिसर्वाणियत्रैतच्चंद्रमंडलम् ३९ यत्रविभ्राजतेलोकेस्वभा
सासूर्यमंडलम् स्थानान्येतानिजानीहिजनानांपुण्यकर्मणाम् ४० कर्मक्षयाच्चतेसर्वेच्यवंतेवैपुनःपुनः तत्रापिचविशेषो-
स्तिदिविनीचोच्चमध्यमः ४१ नचतत्रापिसंतोषोदृष्ट्वादीप्ततरांश्रियम् इत्येतागतयःसर्वाःपृथक्तेसमुदीरिताः ४२ उपपत्तिंतुव
क्ष्यामिगर्भस्याहमतःपरम् तथातन्मेनिगदतःशृणुष्वावहितोद्विज ४३ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिअ
नुगीतासुसप्तदशोऽध्यायः १७ ब्राह्मणउवाच शुभानामशुभानांचनेहनाशोस्तिकर्मणाम् प्राप्यप्राप्यानुप-
च्यंतेक्षेत्रंक्षेत्रंतथातथा १ यथाप्रसिच्यमानस्तुफलीदद्यात्फलंबहु तथास्याद्विपुलंपुण्यंशुद्धेनमनसाकृतम् २ पापंचापितथै
वस्यात्पापेनमनसाकृतम् पुरोधायमनोहीदंकर्मण्यात्माप्रवर्तते ३

पर्वणिटीकायांसप्तदशोऽध्यायः १७ शुभानाम्क्षेत्रंक्षेत्रंदेहंदेहं
प्राप्यप्राप्यासाद्यआसाद्यपच्यंतेफलंप्रयच्छंति १ चित्तशुद्ध्यशुद्धितारतम्येनाल्पादपिपुण्यात्पापाद्वाफलंबह्वस्तीत्याहसार्द्धेनयथेतिपुरोधायेतितस्मान्म-
नएवप्रधानंनकर्मेतिभावः २ ३

यथाकर्मेति मन्युरविद्यासंकल्पोवा तच्चापितत्रापिप्रश्ने ४ शक्रमिति ५ क्षेत्रंप्राप्तस्यनरस्य तात्विकंरूपमाह सोऽस्यादिति ब्राह्मणोब्रह्मवित् तस्मात्तच्छ
श्वतंब्रह्मज्ञात्वाकामंईप्सितंप्राप्यासंगोभवतीत्यर्थः ६ तद्बीजंब्रह्मैवकारणं तेनेति अस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः ७ सब्रह्मैव
सन्जीवः चेतसाउपाधिभूतेनप्राणस्थानेषुइंद्रियगोलकेषुदधातिधारयते अभिमानमित्यर्थः ततोधारणात् ८ ननुकथंसूक्ष्मोपिदेहंव्याप्नुयादव्यक्तोवाव्य
क्तिं असंगोवासंगमित्याशंक्यात्रिभिःपरिहरति यथाल्लोहस्येत्यादिभिः यथास्वर्णद्रवः स्वल्पोपिकृत्स्नांनाम्नप्रतिमांस्वर्णमयीमिवकरोति एवंगर्भेजीवप्रवे
शनंशरीरेसूक्ष्मस्यापिचेतनव्याप्तिरित्याद्यस्यपरिहारः यथैवबिंबंमृदयोपलिप्तमित्यादिश्रुत्यनुसारी ९ यथास्वयमव्यक्तोपिवह्निःकाष्ठलोहाद्युपाधावेवा

यथाकर्मसमाविष्टः काममन्युसमावृतः नरोगर्भंप्रविशतितच्चापिशृणुचोत्तरम् ४ शुक्रंशोणितसंसृष्टंस्त्रियागर्भाशयं
गतम् क्षेत्रंकर्मजमाप्नोति शुभंवायदिवाशुभम् ५ सोऽस्याद्व्यक्तभावाच्चनचक्वचनसज्जति संप्राप्यब्राह्मणःकामंतस्मा
त्तद्ब्रह्मशाश्वतम् ६ तद्बीजंसर्वभूतानांतेनजीवंतिजंतवः सजीवःसर्वगात्राणिगर्भस्याविश्यभागशः ७ दधातिचेतसासद्यः
प्राणस्थानेष्ववस्थितः ततःस्पंदयतेंगानिसगर्भश्चेतनान्वितः ८ यथाल्लोहस्यनिस्पंदोनिषिक्तोबिंबविग्रहम् उपैतितद्वि
जानीहिगर्भेजीवप्रवेशनम् ९ लोहपिंडंयथावह्निःप्रविश्यह्यतितापयेत् तथात्वमपिजानीहिगर्भेजीवोपपादनम् १० य
थाचदीपःशरणेदीप्यमानःप्रकाशते एवमेवशरीराणिप्रकाशयतिचेतना ११ यद्यच्चकुरुतेकर्मशुभंवायदिवाऽशुभम् पूर्व
देहकृतंसर्वमवश्यमुपभुज्यते १२ ततस्तत्क्षीयतेचैवपुनश्चान्यत्प्रचीयते यावत्तन्मोक्षयोगस्थंधर्मनैवावबुध्यते १३ तत्र
कर्मप्रवक्ष्यामिसुखीभवतियेनवै आवर्तमानोजातीषुयथान्योन्यासुसत्तम १४ दानंव्रतंब्रह्मचर्यंयथोक्तंब्रह्मधारणम् द
मःप्रशांतताचैवभूतानांचानुकंपनम् १५ संयमश्चानृशंस्यंचपरस्वादानवर्जनम् व्यलीकानामकरणंभूतानांमनसाभुवि १६

भिव्यज्यतेएवंगर्भेजीवोपपादनम् देहेचैतन्यस्याभिव्यक्तिरितिद्वितीयस्यपरिहारः अरणीषुचाग्निरित्यादिश्रुत्यनुसारी १० तृतीयस्यपरिहारमाह
यथाचेतिशरणेगृहेशरीराणिस्थूलसूक्ष्मकारणानि ११ दीपवदसंगायाअपिचेतनायाः दुःखादिसंप्रतीतौहेतुमाह यद्यच्चेति यथाप्रकाशोअतदा
कारोपिअंगुल्याद्युपाधिनाऋज्वक्राद्याकारइवप्रतीयतेएवंकर्मजदुःखप्रकाशिकायांचितिदुःखाकारतेवभातिवस्तुतस्तुनास्ति असंगोह्ययंपुरुषइतिश्रुतेः
अवस्थांतरगतस्यतेदुःखस्यावस्थांतरेनुवृत्त्यदर्शनाच्चेतिभावः १२ ततःउपभोगात् १३ कथंकष्टाच्चसंसारान्मुच्यतइत्यस्योत्तरमाह तत्रकर्मेत्यादिना जाती
षुयोनिषु १४ १५ संयमश्चित्तैकाग्र्यम् १६

१७ १८ १९ २० यश्चयोगीतिसर्पदंशोविषविद्याविदमिवकर्मसंगः प्रनीयमानोपियोगिनंनबाधतेयोगीइतरेभ्यः श्रेष्ठइत्यर्थः यतोयोगीअतोमुक्तःप्र
थमचकारःपादपूरणे परोचशब्दोहेत्ववधारणार्थौ यस्तुयोगीसहियोगबलान्मुक्तएवेत्यर्थः २१ कर्मिणांविलंबेनमुक्तिरित्याह वर्तमानस्येति २२ एवमि
नि अयंआत्माब्रह्मसन्विकृतःजीवत्वंप्राप्तः २३ २४ ननुस्वतंत्रएवचक्षुश्चेतनात्सङ्ब्रह्मविकाराद्त्याशंक्यशरीरमात्मनइत्यादिनापोर्विकीश्रुतिरित्यंते
श्लोकेः प्रत्याचष्टे सर्वलोकःकार्यसमष्टिः तस्याःपितामायाशबलंब्रह्म पितामहः शुद्धम् तद् आत्मनःशुद्धस्यशरीरं अव्याकृताकाशं आकाशशरीरंब्र
ह्मेतिश्रुतेः मायांकृत्वाउत्पाद्यतस्मादव्यक्तमुत्पन्नंत्रिगुणंद्विजसत्तमेति तदुत्पत्तिस्मृतेः नोव्योमापरोयदितिसृष्टेः प्राक्तनदभावश्रुतेश्च कृत्स्नंसूत्रात्मकं

मातापित्रोश्चशुश्रूषादेवतातिथिपूजनम् गुरुपूजाघृणाशौचंनित्यमिंद्रियसंयमः १७ प्रवर्तनंशुभानांचतत्सतांवृत्तमुच्यते त
तोधर्मःप्रभवतियःप्रजाःपातिशाश्वतीः १८ एवंसत्सुसदापश्येत्तत्राप्येषाध्रुवास्थितिः आचारोधर्ममाचष्टेयस्मिन्शांताव्यव
स्थिताः १९ तेषुतत्कर्मनिक्षिप्तंयःसधर्मःसनातनः यस्तंसमभिपद्येतनसदुर्गतिमाप्नुयात् २० अतोनियम्यतेलोकःप्रच्यवन्धर्म
वर्त्मसु यश्चयोगीचमुक्तश्चसएतेभ्योविशिष्यते २१ वर्तमानस्यधर्मेणशुभंयत्रयथातथा संसारतारणंह्यस्यकालेनमहताभवे
त् २२ एवंपूर्वकृतंकर्मनित्यंजंतुःप्रपद्यते सर्वंतत्कारणंयेनविकृतोऽयमिहागतः २३ शरीरग्रहणंचास्यकेनपूर्वंप्रकल्पितम् इ
त्येवंसंशयोलोकेतच्चवक्ष्याम्यतःपरम् २४ शरीरमात्मनःकृत्वासर्वलोकपितामहः त्रैलोक्यमसृजद्ब्रह्माकृत्स्नंस्थावरजंगमम्
२५ ततःप्रधानमसृजत्प्रकृतिंसशरीरिणाम् ययासर्वमिदंव्याप्तंयांलोकेपरमांविदुः २६ इदंतत्क्षरमित्युक्तंपरंत्वमृतमक्षरम्
त्रयाणांमिथुनंसर्वमेकैकस्यपृथक्पृथक् २७ असृजत्सर्वभूतानिपूर्वदृष्टःप्रजापतिः स्थावराणिचभूतानिइत्येषापोर्विकीश्रु
तिः २८ तस्यकालपरीमाणमकरोत्सपितामहः भूतेषुपरिवृत्तिंच पुनरावृत्तिमेवच २९

त्रैलोक्यम् २५ ततःप्रधानंसर्वेषुकार्येषुप्रधीयमानंतेजो
बन्नात्मकंजीवानांप्रकृतिंअभिव्यक्तिस्थानंदेहाद्याकारं ययाप्रकृत्या २६ क्षरंजडं अक्षरंतदवच्छिन्नंचैतन्यंजीवेशभावाक्रांतं त्रयाणांक्षराक्षरशुद्धानांमध्ये
मिथुनंक्षराक्षरंसर्वप्रतिपूरुषंपृथक्पृथगस्तिनतत्तन्मुक्तोतत्तत्कल्पितंतद्रज्जुसर्पवद्बाध्यतइत्यर्थः २७ उक्तोर्थःश्रोतव्यएवेत्याह असृजदिति पूर्वदृष्टःसृष्टेः
प्राक्सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिश्रुतोदृष्टः सर्वभूतानिवियदादीनि स्थावराणिचजंगमानि एतदात्म्यमितिश्रुतेः प्रत्यगात्मैवसर्वदृश्यरूपेण
भातीत्यर्थः २८ एवंश्रुतिबलेनचेतनभेदंनिरस्यब्रह्मविकारस्यजीवस्यविकारत्वंनित्यंचेत्कृतंसाधनैरित्याशंक्यतदनित्यत्वमाह तस्यकालेति तस्यशरीरग्रहण
स्यकालेत्यनेनांतवत्त्वं परिवृत्तिं सुरनरतिर्यगादिदेहेषुभ्रमणम् २९

यथात्रेति अत्रसंसारस्यांतवत्त्वेविषयेवेदे तद्वदहंजानिस्मरोयत्प्रवक्ष्यामीत्यध्याहृत्ययोज्यम् ३० ३१ ३२ चेतनावत्सुदेहेषुसमंएकम् ३३ एकात्म्यदृष्ट्याभि
विद्यतइत्यर्थः ३४ स्पष्टार्थमन्यत् ३५ इत्याश्वमेधिकेपर्वणिटीकायां अष्टादशोऽध्यायः १८ शरीरस्यनाशोत्पत्तिप्रकारावुक्तो पूर्वोपक्रांतंन-
नोमुक्तिप्रकारंप्रपंचयति यःस्यादिति तद्यथासर्वासामपांसमुद्रएकायनमित्यादिश्रुत्युक्तप्रकारेणसर्वलयाधिष्ठानंब्रह्मएकायनंतस्मिन्लीनःसयथासैंधवः
खिल्यउदकेप्रास्तउदकमेवानुविलीयतेतिश्रुत्युक्तरीत्याऐक्यंप्राप्तः तूष्णींअहमेवेदंसर्वमस्मीत्यभिमानमप्यकुर्वन् किंचिदचिंतयन्नित्यनेनास्मीत्यपिवारय

यथात्रकश्चिन्मेधावीदृष्टात्मापूर्वजन्मनि यत्प्रवक्ष्यामितत्सर्वंयथावदुपपद्यते ३० सुखदुःखेयथासम्यगनित्येयःप्रपश्यति
कायंचामेध्यसंघातंविनाशंकर्मसंहितं ३१ यच्चकिंचित्सुखंतच्चदुःखंसर्वमितिस्मरन् संसारसागरंघोरंतरिष्यतिसुदुस्त
रम् ३२ जरामरणरोगैश्चसमाविष्टःप्रधानवित् चेतनावत्सुचैतन्यंसमंभूतेषुपश्यति ३३ निर्विद्यतेततःकृत्स्नंमार्गमाणः
परंपदम् तस्योपदेशंवक्ष्यामियाथातथ्येनसत्तम ३४ शाश्वतस्याव्ययस्याथपदस्यज्ञानमुत्तमं प्रोच्यमानंमयाविप्रनिबोधेदमशे
षतः ३५ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणि अनुगीतासु अष्टादशोऽध्यायः १८ ब्राह्मणउवाच यः
स्यादेकायनेलीनस्तूष्णींकिंचिदचिंतयन् पूर्वंपूर्वंपरित्यज्यसतीर्णोबंधनाद्भवेत् १ सर्वमित्रःसर्वसहःशमेरक्तोजितेंद्रियः
व्यपेतभयमन्युश्चआत्मवान्मुच्यतेनरः २ आत्मवत्सर्वभूतेषुयश्चरेन्नियतःशुचिः अमानीनिरभीमानःसर्वतोमुक्तएवसः ३
जीवितंमरणंचोभेसुखदुःखेतथैवच लाभालाभेप्रियद्वेष्येयःसमःसचमुच्यते ४ नकस्यचित्स्पृहयतेनावजानातिकिंचन निर्द्वं
द्वोवीतरागात्मासर्वथामुक्तएवसः ५ अनमित्रश्चनिर्बंधुरनपत्यश्चयःक्वचित् त्यक्तधर्मार्थकामश्चनिराकांक्षीचमुच्यते ६ नै
वधर्मीनचाधर्मीपूर्वोपचितहायकः धातुक्षयप्रशांतात्मानिर्द्वंद्वःसविमुच्यते ७

ति पूर्वपूर्वंस्थूलसूक्ष्मकारणे परित्यज्यउत्तरस्मिन्नुत्तरस्मि
न्प्रविलाप्य १ सर्वमित्रः अद्रोहीसर्वसहःक्षमी शमेचित्तनिग्रहे भयंयोगभ्रंशभीतिर्योकर्मसंन्यासिनःकर्मब्रह्मोभयभ्रष्टताप्रयुक्तंमन्युःइयतापिकालेननयोगःसिद्धइ
तिदैन्यंतत्रद्वेषोवा आत्मवान्जितचित्तः २ ३ ४ ५ अनमित्रःशत्रुहीनः ६ ज्ञानफलमाह नैवेतिधर्माधर्मशून्यःपूर्वोपचितंप्रारब्धकर्मतस्यहायकःत्याजकःधातुक्षये
णशरीरारंभकभूतविनाशेनैवप्रशांतः अत्यंतसमुच्छिन्नआत्माचित्तंयस्यसः अतएवनिर्द्वंद्वः अद्वैतः यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिश्रुतेः ७ ५

अकर्मवान्संन्यासी ८ ९ अगंधंगंधादिहीनंचिन्मात्रम् १० पंचभूतगुणैर्हीनमितिस्थूलनिरासः अमूर्तिमदितिसूक्ष्मस्य अहेतुकमितिकारणस्य अतएवागुणंगुण
भोक्तृपूर्वैस्त्रिभीरूपैःगुणाविषयादयः ११ १२ एवंध्यानजसंस्कारैर्बाह्यसंस्कारानश्यंति तज्जःसंस्कारोन्यसंस्कारप्रतिबंधीतियोगसूत्रादित्याह सर्वसंस्कारे-
ति १३ १४ अतःपरंवक्ष्यामीति संक्षेपोक्त्यनंतरंविस्तरेणवक्ष्यामि युंजतःध्यायतःसिद्धम् आविद्यकभ्रांतिनिवृत्तौस्वतःसिद्धंनतुकीटभ्रमरन्यायेनध्यानसा-
ध्यम् १५ येर्द्वारैःचित्तनिग्रहोपायैः आत्मानंचित्तं आत्मनिदेहेचारयन् अंतर्मुखंकुर्वन् नित्यंआद्यंतशून्यंवस्तुपश्यतितन्निबोधेतिपूर्वेणान्वयः १६ संहृत्यस्व-

अकर्मवाननविकांक्षश्चपश्येज्जगदशाश्वतम् अश्वत्थसदृशंनित्यंजन्ममृत्युजरायुतम् ८ वैराग्यबुद्धिःसततमात्मदोषव्यपे-
क्षकः आत्मबंधविनिर्मोक्षंसकरोत्यचिरादिव ९ अगंधमरसस्पर्शमशब्दमपरिग्रहम् अरूपमनभिज्ञेयंदृष्ट्वात्मानंविमुच्यते १०
पंचभूतगुणैर्हीनममूर्तिमदहेतुकम् अगुणंगुणभोक्तारंयःपश्यतिसमुच्यते ११ विहायसर्वसंकल्पान्बुद्ध्याशारीरमानसा
न् शनैर्निर्वाणमाप्नोतिनिरिंधनइवानलः १२ सर्वसंस्कारनिर्मुक्तोनिर्द्वंद्वोनिष्परिग्रहः तपसाइंद्रियग्रामंयश्चरेन्मुक्तएवसः
१३ विमुक्तःसर्वसंस्कारैस्ततोब्रह्मसनातनम् परमाप्नोतिसंशांतमचलंनित्यमक्षरम् १४ अतःपरंप्रवक्ष्यामियोगशास्त्रमनुत्त
मम् युंजतःसिद्धमात्मानंयथापश्यंतियोगिनः १५ तस्योपदेशंवक्ष्यामियथावत्तंनिबोधमे यैर्द्वारैश्चारयन्नित्यंपश्यत्यात्मानमात्म
नि १६ इंद्रियाणितुसंहृत्यमनआत्मनिधारयेत् तीव्रंतप्त्वातपःपूर्वंमोक्षयोगंसमाचरेत् १७ तपस्वीसततंयुक्तोयोगशास्त्रमथा
चरेत् मनीषीमनसाविप्रःपश्यन्नात्मानमात्मनि १८ सचेच्छक्नोत्ययंसाधुर्योक्तुमात्मानमात्मनि ततएकांतशीलःसपश्यत्यात्मा
नमात्मनि १९ संयतःसततंयुक्तआत्मवान्विजितेंद्रियः तथायआत्मनात्मानंसंप्रयुक्तःप्रपश्यति २० यथाहिपुरुषःस्वप्नेदृष्ट्वा
पश्यत्यसाविति तथारूपमिवात्मानंसाधुयुक्तःप्रपश्यति २१ इषीकांचयथामुंजात्कश्चिन्निष्कृष्यदर्शयेत् योगीनिष्कृष्यचात्मानं
तथापश्यतिदेहतः २२

स्वविषयेभ्यःप्रत्यावर्त्य आत्मनिक्षेत्रज्ञे एतच्चतपआरव्यस्वधर्मानुष्ठानेनशुद्धेचेतस्येवभवतीत्याहतीव्रमिति १७ एतदेवान्व
यव्यतिरेकाभ्यांद्रढयतितपस्वीत्यादिना १८ १९ २० यथाहीतियथास्वप्नेस्थूलदेहासंगेनस्थितःसन्कंचिददृष्टचरंपुरुषंपश्यति उत्थेवआनिरुद्धं प्रबुद्धश्चपुन
स्तंदृष्ट्वासोयमितिप्रत्यभिजानाति तथात्मानंविश्वरूपंसमाधौदृष्ट्वाव्युत्थानेपिविश्वमात्मत्वेनैवपश्यतीत्यर्थः २१ तंस्वाच्छरीरात्प्रवहेन्मुंजादिवेषीकांधैर्येणेतिदेहा
संगेश्चोनंदृष्टांतमाह इषीकामिति २२

दृष्टांतं दार्ष्टांतिके योजयति मुंजमिति आत्मनिश्रितां मायां जगदाकारेण भासमानामिति शेषः २३ यतोऽयं सबाह्याभ्यंतरं प्रत्यगनन्यत्वेन वीक्षते अत एव चानन्याधिपतिरयमित्याह यदाहीति २४ स एकधा भवति त्रिधा भवतीत्यादिकायव्यूहकरणम् न तस्य रोगो न जरा न मृत्युः सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतिप्रसिद्धं योगफलमाह अन्यान्याइति अन्यान्या देवगंधर्वमनुष्याद्याः कामरूपी भवतीत्यर्थः २५ विदेहे कैवल्यावधिकमेवैश्वर्यमित्याह ब्रह्म चेति २६ २७ विनश्यत्स्विति विदेहमुक्तस्य न क्लेशाः संतीत्युक्तम् न त्वेकैमुतिकन्यायेन द्रढयितुं संदेहमुक्तस्यापि ते न संतीत्याह दुःखशोकेत्यादिना २८ २९ ३० अन्या

मुंजं शरीरमित्याहुरिषीकामात्मनिश्रिताम् एतन्निदर्शनं प्रोक्तं योगविद्भिरनुत्तमम् २३ यदा हि युक्तमात्मानं सम्यक्पश्यति देहभृत् न तस्येहेश्वरः कश्चित्त्रैलोक्यस्यापि यः प्रभुः २४ अन्यान्याश्चैव तनवो यथेष्टं प्रतिपद्यते विनिवृत्य जरामृत्यं न शोचति न हृष्यति २५ देवानामपि देवत्वं युक्तः कारयते वशी ब्रह्म चाव्ययमाप्नोति हित्वा देहमशाश्वतम् २६ विनश्यत्सु च भूतेषु न भयं तस्य जायते क्लिश्यमानेषु भूतेषु न स क्लिश्यति केनचित् २७ दुःखशोकमयैर्घोरैः संगस्नेहसमुद्भवैः नाविचाल्यति युक्तात्मा निःस्पृहः शांतमानसः २८ नैनं शस्त्राणि बध्यंते न मृत्युश्चास्य विद्यते नातः सुखतरं किंचिल्लोके क्वचन दृश्यते २९ सम्यग्युक्त्वा स आत्मानमात्मन्येव प्रतिष्ठिते विनिवृत्तजरादुःखः सुखं स्वपिति चापि सः ३० देहान्यथेष्टमभ्येति हित्वेमां मानुषीं तनुम् निर्वेदस्तु न कर्तव्यो भुंजानेन कथंचन ३१ सम्यग्युक्त्वा यदात्मानमात्मन्येव प्रपश्यति तदैव न स्पृहयते साक्षादपि शतक्रतोः ३२ योगमेकांतशीलस्तु यथा विंदति तच्छृणु दृष्टपूर्वां दिशं चिंत्य यस्मिन्सन्निवसेत्पुरे ३३ पुरस्याभ्यंतरे तस्य मनस्थाप्यं न बाह्यतः पुरस्याभ्यंतरे तिष्ठन्यस्मिन्नावसथे वसेत् तस्मिन्नावसथे धार्यं सबाह्याभ्यंतरे मनः ३४ प्रचिंत्यावसथे कृत्स्नं यस्मिन्काले स तिष्ठति तस्मिन्काले मनश्चास्य न कथंचन बाह्यतः ३५

न्याश्चेति पूर्वोक्तस्यैव विचारणं देहानिति भुंजानेन योगैश्वर्यमिति शेषः निर्वेदो योगात् वैराग्यं न कर्तव्यमित्यर्थः ३१ वस्तुतस्तु योगजसंस्कारप्राबल्याद्योगिनो भोगेच्छैव न भवतीत्याह सम्यगिति असम्यग्योगिविषयैव भोगेच्छा अधिकारिनिभावः ३२ एकांतशीलः एकं ब्रह्म अंत्यते प्राप्यते अनेनेति एकांतो ध्यानं तच्छीलं यस्य सः ततस्तु तं पश्यति निष्कलं ध्यायमान इति श्रुतेः दृष्टपूर्वां दिशं दृष्टं श्रुतिप्रामाण्यं प्रत्यनपेक्षत्वात् वेदांतश्रवणपूर्वकां दिशं उपदेशं चिंत्य युक्त्यापि पर्यालोच्य श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतेः यस्मिन्पुरे देहे ३३ आवसथे मूलाधाराद्यन्यतमस्मिन्चक्रे ३४ तदैव कृत्स्नं सर्वात्मकं यदा पश्यति तदास्य बाह्यतः प्रत्यग्रूपादन्यत्किंचन अस्ति यत्रास्य मनः सज्जेत् अतो निर्वासनतो मुच्यत इत्यर्थः ३५

उपसंहरतिसन्नियम्येति कायमभिदंहस्याभितः बहिःअंतरंमध्येचकृत्स्नंपरिपूर्णब्रह्मैवचिंतयेदित्यर्थः ३६ अस्ययोगस्यसाधनान्याह दंतांस्तालुंचजि
ह्वांचगलंग्रीवांतथैवचहृदयंचिंतयेच्चापितथाहृदयबंधनमिति दंतैरवखंड्यावखंड्यगृह्यमाणानाहारान्चिंतयेत् आहारशब्दोसत्वशब्दिःसत्वशब्दोध्रुवास्मृ
तिःस्मृतिलंभेसर्वग्रंथीनांविप्रमोक्षइति आहारशब्देमोक्षहेतुत्वश्रुतेः तथातालुआधारजिह्वांतन्नाधेयां यथोक्तमीश्वरप्रोक्ते लंबिकोर्ध्वस्थितेगर्तेरसनांविप
रीतगाम् संयोजयेत्प्रयत्नेनमुद्रासाखेचरीमतेति दत्तात्रेयः अतःकपालविवरेजिह्वांव्यावृत्यचारयेत् भ्रूमध्यदृष्टिरप्येषामुद्राभवतिखेचरीति भ्रुवोर्मध्येप्रा
णमावेश्यप्राणापानौसमौकृत्वानासाभ्यंतरचारिणाविति चेनदेवोक्तंगलंजिह्वामूलादधोभागःग्रीवानदधः कंठनालंताभ्यांकंठकूपस्ततोप्यधःस्थितोलक्ष्यते तत्र-

सन्नियम्येंद्रियग्रामंनिर्घोषेनिर्जनेवने कायमभ्यंतरंकृत्स्नमेकाग्रःपरिचिंतयेत् ३६ दंतांस्तालुंचजिह्वांचगलंग्रीवांतथैवच हृ
दयंचिंतयेच्चापितथाहृदयबंधनम् ३७ इत्युक्तःसमयाशिष्योमेधावीमधुसूदन पप्रच्छपुनरेवेमंमोक्षधर्मंसुदुर्वचम् ३८ भु
क्तंभुक्तमिदंकोष्ठेकथमन्नंविपच्यते कथंरसत्वंव्रजतिशोणितत्वंकथंपुनः ३९ तथामांसंचमेदश्चस्नायूस्थीनिचयोषिति कथमे
तानिसर्वाणिशरीराणिशरीरिणाम् ४० वर्द्धंतेवर्द्धमानस्यवर्द्धतेचकथंबलम् निरोधानांनिर्गमनंमलानांचपृथक्पृथक् ४१ कुतो
वायंप्रश्वसितिउच्छ्वसित्यपिवापुनः कंचदेशमधिष्ठायतिष्ठत्यात्मायमात्मनि ४२ जीवःकायंवहतिचेत्चेष्टमानःकलेवरम् किंव
र्णंकीदृशंचैवनिवेशयतिवैपुनः ४३ यायातथ्येनभगवन्वक्तुमर्हसिमेनघ इतिसंपरिपृष्टोहंतेनविप्रेणमाधव ४४ प्रत्यब्रुवंम
हाबाहोयथाश्रुतमरिंदम यथास्वकोष्ठेप्रक्षिप्यभांडंभांडमनाभवेत् ४५

धारणासद्यःफलायत्नादभ्यसनीया योगेविश्वासोत्पत्त्यर्थंतथाचसूत्रं
म् कंठकूपेक्षुत्पिपासानिवृत्तिरिति भाष्यमपिआसामेकस्याःफलंयावन्नभवतितावद्योगधर्मेनश्रद्धत्तेइति हृदयंहृदयायतनंब्रह्महृदयबंधनंशतंचैकाच
हृदयस्यनाड्यइतिश्रूयमाणंनाडीमार्गंतत्तल्लोकगत्युपयोगि.३७ मेधावीदंतादिशब्दैःपारोक्ष्येणोक्तमर्थंज्ञातवान् ३८ पंचस्वर्थेषुआद्यंविवृत्यपृच्छतित्रिभिः
भुक्तंभुक्तमिति ३९ ४० ४१ द्वितीयमर्द्धेनकुतोवेति तृतीयंयोगानुपकारित्वादपृष्ट्वाचतुर्थमेवपृच्छतिकंचेति ४२ पंचमंपृच्छतिजीवइति कथंजीवोनाडीमार्गैः
सूक्ष्मंकलेवरंवहति किंवर्णावातेनाडीमार्गाःतेश्चकीदृशंपुनर्वपुःप्राप्यमितिप्रश्नार्थः एतेषांमध्ये आद्ययोर्विवरणार्थाब्राह्मणगीता इतरयोर्गुरुशिष्यसंवादःप्रा
धान्येन अन्यत्तुतत्रतत्रोपसर्जनत्वेनप्रतिपाद्यतइतिविभागः ४३ ४४ कोष्ठेधनगृहेभांडंगृहोपस्करंनिक्षिप्तंयथागृहंप्रविष्टोविविच्यजानाति ४५

एवंस्वकायेदेहांतर्मनःप्रक्षिप्यअनिश्चलैः अनिश्चरद्भिः द्वारैरिंद्रियैः सर्वद्वाराणिसंयम्यमनोहृदिनिरुध्यचेतिस्मृतेः त्वयातत्पृष्टंतद्रूक्तयोगबलेनज्ञेयमित्य
र्थः ४६ एतदेवोपपादयति एवमिति प्रधानवित्प्रकृतिवित्सर्वविकारविद्भवतिविकाराणांप्रकृतेरनन्यत्वादिति ४७ चक्षुराद्यग्राह्यस्यामूर्तस्यरूपंसर्वतः
पाणिपादांतइत्यादिलक्षणम् ४८ तदेवजीवस्यस्वात्मभूतदेहात्निष्क्रांतंपृथक्भूतंमुंजेषीकावत् पश्यतिसंप्रज्ञाते ४९ तंसर्वतइत्युक्तलक्षणंउत्सृज्यप्र
विलाप्यदेहेस्वंस्वरूपंधारयन्मनोनिगृण्हन् केवलंनिर्गुणंब्रह्मपश्यति सएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्रम्यामुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वा

तथास्वकीयेप्रक्षिप्यमनोद्वारैरनिश्चलैः आत्मानंतत्रमार्गेतप्रमादंपरिवर्जयेत् ४६ एवंसततमुद्युक्तःप्रीतात्मानचिरादिव
आसादयतितद्ब्रह्मयद्दृष्ट्वास्यात्प्रधानवित् ४७ नत्वसौचक्षुषाग्राह्योनचसर्वैरपींद्रियैः मनसैवप्रदीपेनमहानात्माप्रदृश्यते
सर्वतःपाणिपादांतःसर्वतोक्षिशिरोमुखः ४८ सर्वतःश्रुतिमाँल्लोकेसर्वमावृत्यतिष्ठति जीवोनिष्क्रांतमात्मानंशरीरात्संप्रप
श्यति ४९ सतमुत्सृज्यदेहंस्वंधारयन्ब्रह्मकेवलम् आत्मानमालोकयतिमनसाप्रहसन्निव तदेवमाश्रयंकृत्वामोक्षंयातित
तोमयि ५० इदंसर्वंरहस्यंतेमयाप्रोक्तंद्विजोत्तम आपृच्छेधारयिष्यामिगच्छविप्रयथासुखम् ५१ इत्युक्तःसतदाकृष्णमया
शिष्योमहातपाः आगच्छतयथाकामंब्राह्मणःशंसितव्रतः ५२ वासुदेवउवाच इत्युक्त्वासतदावाक्यंमांपार्थद्विजस
त्तमः मोक्षधर्माश्रितःसम्यक्तत्रैवांतरधीयत ५३ कच्चिदेतत्त्वयापार्थश्रुतमेकाग्रचेतसा तदापिहिरथस्थस्त्वंश्रुतवानेतदेव
हि ५४ नैतत्पार्थसुविज्ञेयंव्यामिश्रेणेतिमेमतिः नरेणाकृतसंज्ञेनविशुद्धेनांतरात्मना ५५ सुरहस्यमिदंप्रोक्तंदेवानांभरत
र्षभ कच्चिन्नेदंश्रुतंपार्थमनुष्येणहकर्हिचित् ५६ नह्येतच्छ्रोतुमर्होन्योमनुष्यस्त्वामृतेनघ नैतदद्यसुविज्ञेयंव्यामिश्रेणांत
रात्मना ५७ क्रियावद्भिर्हिकौंतेयदेवलोकःसमावृतः नचैतदिष्टंदेवानांमर्त्यैरूपनिवर्तनम् ५८ पराहिसागतिःपार्थयत्तद्ब्र
ह्मसनातनम् यत्रामृतत्वंप्राप्नोतित्यक्त्वादेहंसदासुखी ५९ इमंधर्मंसमास्थाययेपिस्युःपापयोनयः स्त्रियोवैश्यास्तथाशूद्रा
स्तेपियांतिपरांगतिम् ६०

मृतःसमभवदिति देहाभिमानकृतंभेदंत्यक्त्वा ऊर्ध्वःकारणंब्रह्मभावंप्राप्तंतत्रैवसर्वकामभृग्भूत्वा अमृतास्त्वंकैवल्य
मस्मुतइतिश्रवणात् प्रहसन्निव अहोऽप्येवमरीचिकोदकतुल्येनसंसारेणाहंभ्रामितइतिविस्मयेनेतिभावः तदेवंततब्रह्म एवंउक्तरीत्या ५० ५१ ५२
५३ ५४ व्यामिश्रेणव्यग्रेणअकृतसंज्ञेन अज्ञातविद्यासंप्रदायेन ५५ ५६ ५७ ५८ ५९ इमंधर्मंआत्मदर्शनाख्यम् ६० ७ ६

६१ ६२ ६३ लोकसारंधनादि असारवत् तृणादिवत् यःपरित्यज्यते विवेकादिना परित्यागवान् क्रियते उपायैः शमादिभिः ६४ षण्मासानितिषड्भिर्मासैरेव
युक्तस्ययुक्तस्यदेहिनः आनंदःपरमोगुह्यःसम्यग्योगःप्रवर्ततइतिमैत्रायणीयश्रुतेः सुखसाध्यत्वादादरणीयोयोगइत्यर्थः ६५ इतिश्रीमहाभा
रतेआश्वमेधिकेपर्वणिभावदीपेएकोनविंशोऽध्यायः १९ भुक्तंभुक्तमिदंकोष्ठेइत्यादिनाकृतस्यप्रश्नस्यउत्तरं अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रि
तः प्राणापानसमायुक्तःपचाम्यन्नंचतुर्विधमितिगीतोक्तमेवविवृणोति अत्रापीत्यादिना अत्रप्रश्नेविषये इतिहासमपीतिसंबंधः १ २ कर्मअग्निहोत्रा

किंपुन र्ब्राह्मणाःपार्थक्षत्रियावाबहुश्रुताः स्वधर्मरतयोनित्यंब्रह्मलोकपरायणाः ६१ हेतुमच्चैतदुद्दिष्टमुपायाश्चास्यसाधने
सिद्धिःफलंचमोक्षश्चदुःखस्यचविनिर्णयः ६२ नातःपरंसुखंत्वन्यत्किंचित्स्याद्भरतर्षभ बुद्धिमान्श्रद्दधानश्चपराक्रांतश्चपांड
व ६३ यःपरित्यज्यतेमर्त्योलोकसारमसारवत् एतैरुपायैःसक्षिप्रंपरांगतिमवाप्नुते ६४ एतावदेववक्तव्यंनातोभूयोस्तिकिंचन
षण्मासान्नित्ययुक्तस्ययोगःपार्थप्रवर्तते ६५ इतिश्रीमहाभारतेआश्वमेधिकेपर्वणि अनुगीतायां एकोनविंशोऽध्यायः
१९ वासुदेवउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् दंपत्योःपार्थसंवादोयोभवद्भरतर्षभ १ ब्राह्मणीब्राह्मणं
कंचित्ज्ञानविज्ञानपारगम् दृष्ट्वाविविक्तआसीनंभार्याभर्तारमब्रवीत् २ कंनुलोकंगमिष्यामि त्वामहंपतिमाश्रिता न्यस्त-
कर्माणमासीनंकीनाशमविचक्षणम् ३ भार्याःपतिकृतांल्लोकानाप्नुवंतीतिनःश्रुतम् त्वामहंपतिमासाद्यकांगमिष्यामिवैगति
म् ४ एवमुक्तःसशांतात्मातामुवाचहसन्निव सुभगेनाभ्यसूयामिवाक्यस्यास्यतवानघे ५ ग्राह्यंदृश्यंचसत्यंवायदिदंकर्मावि
द्यते एतदेवव्यवस्यंतिकर्माकर्मेतिकर्मिणः ६ मोहमेवनियच्छंतिकर्मणाज्ञानवर्जिताः नैष्कर्म्यंनचलोकेस्मिन्मुहूर्तमपिल
भ्यते ७ कर्मणामनसावाचाशुभंवायदिवाशुभम् जन्मादिमूर्तिभेदानांकर्मभूतेषुवर्तते ८ रक्षोभिर्वध्यमानेषुदृश्यद्रव्ये
षुवर्त्मसु आत्मस्थमात्मनातेनदृष्टमायतनंमया ९

दिकंन्यस्तंयेनतंकीनाशंकर्कशमपिनिरनुक्रोशम् अविचक्षणंममअनन्य
गतित्वमजानंतम् ३ ४ ५ ग्राह्यंदीक्षाव्रतादिकम् अतएवदृश्यंलोकैः स्थूलत्वाद्दृष्टयोग्यम् ६ ७ कर्मणाशरीरायासेन जन्मादिजन्मास्थि
तिभंगम् मूर्तिभेदोयोनिनानात्वं ८ दृश्यानिसोमाज्यादीनिद्रव्याणियेषु वर्त्मसुकर्ममार्गेषु रक्षोभिर्दुर्जनैर्वध्यमानेषुवश्यमानेषु सत्सुतेभ्योविरक्ते
नमयेतिशेषः आयतनंभ्रूघ्राणमध्यस्थमविमुक्ताख्यम् ९

सोमः इडा अग्निः पिंगला वरणानासासंज्ञेसोविमुक्तेप्रतिष्ठितः सोविमुक्तः कस्मिन्प्रतिष्ठितइति वरणायांचनास्यांमध्येप्रतिष्ठितइत्यादि भ्रुवोर्घ्राणस्य
चयः संधिरितिजाबालश्रुतिप्रसिद्धेः व्यवायंसंचारम् धीरोबुद्धिप्रेरकोभूतानिधारयन्वायुः १० ११ नतदाघ्रेयम् तत् अक्षरम् १२ १३ तंत्रंसंसृष्ट्या
दिव्यापारः एतदेवाह प्राणोपानइत्यादिना १४ प्राणापानयोः प्रवृत्तिरेवसृष्टिः प्रवेशएव प्रलयश्चेतिभावः समानेति नाभिमंडलस्थः समानः कृत्स्न
देहव्यापीव्यानः १५ तस्मिन् अपानसहिते प्राणे लीने भ्रूघ्राणमध्ये निरुद्धेसति उदानः सर्वसंधिस्थइति वचनात् शंकुभिश्चर्मेवउदानेन प्राणापानावा
यतोयस्मात् कृतोतस्मात् अनुक्रांतेउदानेशयानंपुरुषंप्राणापानौनमुंचतः विमुंचतइतिपाठेशयानइत्यस्मृतमित्यर्थः १६ प्राणानामिति यतःप्रा

यत्रतद्ब्रह्मनिर्द्वंद्वंयत्रसोमःसहाग्निना व्यवायंकुरुतेनित्यंधीरोभूतानिधारयन् १० यत्रब्रह्मादयोयुक्तास्तदक्षरमुपा
सते विद्वांसःसुव्रतायत्रशांतात्मानोजितेंद्रियाः ११ घ्राणेननतदाघ्रेयंनास्वाद्यंचैवजिह्वया स्पर्शेननतदस्पृश्यंमनसात्व
वगम्यते १२ चक्षुषामविषह्यंचयत्किंचित्श्रवणात्परम् अगंधमरसस्पर्शमरूपंशब्दलक्षणम् १३ यतःप्रवर्ततेतंत्रंयत्रचप्र
तितिष्ठति प्राणोपानःसमानश्चव्यानश्चोदानएवच १४ ततएवप्रवर्तंतेतदेवप्रविशंतिच समानव्यानयोर्मध्येप्राणापानौ
विचेरतुः १५ तस्मिन्सुप्तेप्रलीयेतसमानोव्यानएवच अपानप्राणयोर्मध्येउदानोव्याप्यतिष्ठति तस्माच्छयानंपुरुषंप्राणा-
पानौनमुंचतः १६ प्राणानामायतत्वेनतमुदानंप्रचक्षते तस्मात्तपोव्यवस्यंतिमद्गतंब्रह्मवादिनः १७ तेषामन्योन्यभक्षाणांसर्वे
षांदेहचारिणाम् अग्निर्वैश्वानरोमध्येसप्तधादीव्यतेंतरा १८ घ्राणंजिह्वाचचक्षुश्चत्वक्चश्रोत्रंचपंचमम् मनोबुद्धिश्चस
प्तैताजिह्वावैश्वानरार्चिषः १९ घ्रेयंदृश्यंचपेयंचस्पृश्यंश्राव्यंतथैवच मंतव्यमथबोद्धव्यंताःसप्तसमिधोमम २० घ्राताभक्ष
यिताद्रष्टास्पृष्टाश्रोताचपंचमः मंताबोद्धाचसप्ततेभवंतिपरमर्त्विजः २१ घ्रेयेपेयेचदृश्येचस्पृश्येश्राव्येतथैवच मंतव्येथबो
द्धव्येसुभगेपश्यसर्वदा २२

णानामायतत्वं उदानाधीनं अतस्तं उदानं उत्कर्षेण आनयति चेष्टयते प्राणानितिनिर्वचनात् प्रचक्षते यस्मात्
प्राणानांजीवोपाधीनां एकस्मिन् उदानेंतर्भावः तस्मात् तपः प्राणजयाख्यं भ्रुवोर्मध्ये प्राणमावेश्यंत्यवंरूपम् आलोचनंवा आत्मनस्तत्तद्देहादिव्यति
रिक्तत्वस्य ब्रह्मवादिनोमद्गतंमयिमनश्चालकेमत्तंनिष्ठाप्राप्तं परात्मप्रापकंव्यवस्यंति निश्चिन्वंतीत्यर्थः १७ मद्गतमित्यत्रमच्छब्दार्थंवैश्वानरंदर्श-
यति तेषामितिमध्येसमानस्थानेनाभिमंडले अंतरातस्यापिमध्ये १८ घ्राणघ्रेयघ्रात्रादयः सप्तसप्तकरणविषयकर्तृरूपाः १९ २० २१ २२ ७

तेषांमध्येअग्निषुघ्राणाद्यभिमानिदेवतासु हवींषिघ्रेयादीनिहोतारोविषयाणामाव्हातारः तत्कल्पकाइत्यर्थः अमुमावहामुमावहेत्यावाहय तितदे
वहोतुर्होतृत्वमितिश्रौतनिर्वचनात् घ्राताहमित्यादयोभिमानाः तान्सर्वान्प्रक्षिप्यगुणागुणेषुवर्ततइतिमत्वायेनसज्जंतेतेविद्वांसोब्रह्मीभूता जनयं
तिपृथिव्यादीन्वक्ष्यमाणान् स्वयोनिषुस्वंब्रह्मतदेवयोनिर्येषांतेषु अग्निषु २३ पृथिव्यादयोपिसंघातापन्नाः योनिश्चैतन्याभिव्यक्तिस्थानम् २४ ह
विर्भूतागुणाः घ्रेयादयोविषयाः अग्निजंगुणं गंधादिज्ञानरूपांधीवृत्तिं प्रविशंति अंतर्वासमितिणमुलंतम् साचवृत्तिश्चसंस्कारात्मनाचेतस्युषित्वा
स्वासुयोनिषुघ्राणादिषुजायंते दृष्टंरूपादिकंसुप्तादौवासनारूपेणाचित्तेस्थितंपुनर्जागरेउत्पद्यतइत्यर्थः २५ एतदेवाहतत्रैव अंतरेव ततः अंतरएव
२६ संशयः संशयात्मकंमनः २७ निष्ठानिश्चयात्मिकाबुद्धिः २८ अनेनेति अनेनरूपादिग्रहणतत्संस्कारपरंपरयाप्रगृहीतंघ्राणादीनांरूपंपुरातनैर्न्नै

हवींष्यग्निषुहोतारःसप्तधासप्तसप्तसु सम्यक्प्रक्षिप्यविद्वांसोजनयंतिस्वयोनिषु २३ पृथिवीवायुराकाशमापो-
ज्योतिश्चपंचमम् मनोबुद्धिश्चसप्तैतायोनिरित्येवशब्दिताः २४ हविर्भूतागुणाःसर्वेप्रविशंत्यग्निजंगुणम् अंतर्वास
मुषित्वाचजायंतेस्वासुयोनिषु २५ तत्रैवचनिरुध्यंतेप्रलयेभूतभावने ततःसंजायतेगंधस्ततःसंजायतेरसः २६ त
तःसंजायतेरूपंततःस्पर्शोभिजायते ततःसंजायतेशब्दःसंशयस्तत्रजायते २७ अतःसंजायतेनिष्ठाजन्मैतत्सप्तधा-
विदुः २८ अनेनैवप्रकारेणप्रगृहीतंपुरातनैः पूर्णाहुतिभिरापूर्णास्त्रिभिःपूर्यंतितेजसा २९ इतिश्रीमहाभारते
आश्वमेधिकेपर्वणिब्राह्मणगीतायांविंशतितमोऽध्यायः २० ब्राह्मणउवाच अत्राप्युदाहरंतीममितिहा
संपुरातनम् निबोधदशहोतृणांविधानमथयादृशम् १

षिभिः वेदादितिशेषः त्रिभिर्मानमेयमातृभिः पूर्णंब्रह्मतस्य आहुतिराव्हानं आहु
नयोवैनामैतायदाहुतयएताभिर्वैदेवान्यजमानोव्हयतीतिश्रुतेः ततयेस्ते उपाधिभूतेदर्पणेरिवब्रह्मप्रज्ञापकैरित्यर्थः आपूर्णाः सर्वेलोकाइतिशेषः ने
त्रत्रयः तेजसास्वात्मज्योतिषापूर्यंतितेनैवसत्तावंतोभवंतीत्यर्थः एवंदृष्टिसृष्टिरनेनश्लोकेनसूचिता २९ इतिश्रीमहाभारतेआश्वमेधिकेपर्वणि
टीकायांविंशोऽध्यायः २० पूर्वत्रघ्राणाद्युपाधिर्भूतात्माघ्राताहमित्याद्यभिमानवान्घ्रेयादीन्प्रकल्प्यघ्राणादींस्तर्पयतीत्युक्तम् इदानींप्राणेभ्योदेवादेवे
भ्योलोकाइति श्रुत्यनुसारादिंद्रियाण्येवस्वकल्पितेषुदेवेषुदेवद्वारास्वकल्पितान्लोकान्तर्पयंतीत्युक्त्याभूतात्मनिकल्पकत्वंनास्तिअपितुजडस्यैव
तदितिविविनक्ति अत्रापीति अत्रदृष्टिसृष्टिप्रकारोविवेचनीयः १

श्रोत्रमिति अथातोविभूतयोस्यपुरुषस्यवाचासृष्टेपृथिवीचाग्निश्चेत्याद्येतरेयके श्रोत्रेणसृष्टादिशश्चचंद्रमाश्चेतिवचनात् श्रोत्रंसर्वैः शब्दैःसहोप्येतीतिकौ षीतकिवचनाच्चदिग्गाद्यात्मकेसूत्रात्मनिसविषयाणिश्रोत्रादीनिप्रविलापयेदित्यर्थः २ ३ ४ ५ चित्तमिति एतत्प्रविलापनंस्रुवस्थानीयेनाचित्तेनेवकर्तव्यंन वायुनिरोधादिनाहठेन मनसैवेंद्रियग्रामंविनियम्येतिगीताषष्ठोक्तेः चित्तंसंस्काराः पुण्यपापेवा यथास्रुवेण आज्यमग्नौहुत्वास्रुवमग्निदक्षिणार्थंवित्तंच त्यजंति एवंमनसासविषयाणींद्रियाणिकारणेप्रविलाप्यमनःकम्रणंसुकृतदुष्कृतेचत्यजेदितिरूपकद्वाराप्रपंचितं एवंकृतेयदवशिष्यतेतदाह पवित्रं ज्ञानमुत्तममिति पवित्रंअसंगं उत्तमंचरमम् नातःपरतरंकिंचिदस्तिपुरुषान्नपरंकिंचिदितिश्रुतेः स्रुविभक्तंज्ञानात्पृथक्भूतम् इदंचित्तादिशब्दाद्यंत म् ६ सर्वमिति अथेतिपक्षांतरे विज्ञेयंसर्वंचित्तमेवेतिसंबंधः ज्ञानंतुतत्प्रकाशकं अवेक्षतएवकेवलंनसज्जतइत्यर्थः नन्वेवंकथंस्रुविभक्तानामपिज्ञान-

श्रोत्रंत्वक्चक्षुषीजिह्वानासिकाचरणौकरौ उपस्थंपायुरितिवाहोतॄणिदशभामिनि २ शब्दस्पर्शौरूपरसौगंधोवाक्क्रि यागतिः रेतोमूत्रपुरीषाणांत्यागोदशहवींषिच ३ दिशोवायूरविश्चंद्रः पृथ्व्यग्नीविष्णुरेवच इंद्रःप्रजापतिर्मित्रमग्नयोद शभामिनि ४ दशेंद्रियाणिहोतॄणिहवींषिदशभामिनि विषयानामसमिधोहूयंतेतुदशाग्निषु ५ चित्तस्रुवश्चवित्तंच- पवित्रंज्ञानमुत्तमम् स्रुविभक्तमिदंसर्वंजगदासीदितिश्रुतम् ६ सर्वमेवाथविज्ञेयंचित्तंज्ञानमवेक्षते रेतःशरीरभृत्काये विज्ञातातुशरीरभृत् ७ शरीरभृत्गार्हपत्यस्तस्मादन्यःप्रणीयते मनश्चाहवनीयस्तत्रतस्मिन्प्रक्षिप्यतेहविः ८

ज्ञेयानां अविभागप्रत्यय इत्याशंक्यतमायःपिंडवत्सान्निध्यमात्रादित्याह रेतइत्यादिना रेतोजन्येशरीरेभिमानवान् तस्यकायेषाट्कौशिकेविज्ञा ताजीवः सूक्ष्मशरीरभृत् लिंगाभिमानीअस्ति ७ सोपिशरीरभृत्गार्हपत्यः हृदयंगार्हपत्यइति गृहपतेःक्षेत्रज्ञस्यायंदेशइतिव्युत्पन्नगार्हप त्यशब्देनहृदयशब्दस्यसामानाधिकरण्यश्रुतेः तस्मात्हृदयादन्योमन्वआख्यःहृदयंनिरभिद्यत हृदयान्मनोमनसश्चंद्रमाइतिश्रुतेः आहवनीयोमनः आयतनंतत्समुखमेव आस्यंमाहवनीयइतिश्रुतेः हविःतेजोबन्नात्मकंअदनीयम् अन्नमयंहिसोम्यमनआपोमयःप्राणस्तेजोमयीवागितिश्रुतेर्हवि षस्तेजोंशोजाठरंतेजः प्राप्यसद्योवाग्रूपेणपरिणमते ८

अतोवाचस्पतिः वेदः प्रथमंजज्ञे मनःपार्थिवंतदनंतरंजज्ञे अतोमनोमयः सूत्रात्मावाचमवेक्षतेसिसृक्षुःसन् योब्रह्माणंविदधाति पूर्वंयोवैवेदांश्च प्रहिणोतितस्मैतं हदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये मनसावाचंमिथुनंसमभवदितिश्रुतेः ततइत्यनुषज्यतेमनोनंतरंभवति रूप्यते- स्पर्शेनैवप्रथतेइतिरूपंप्राणवायुद्रव्यंउत्पद्यते अन्नापेक्षयाअपांजाड्यप्राधान्येनाचिरपाकित्वात् तच्चरूपंवैवर्णंवर्णोनीलपीतादिस्तद्रहितंस्वार्थेत- द्धितः तद्रूपंकर्तृमनः प्रतिसमनुद्रवति विपरीतंवा रुद्धेचित्तेनिलोरुद्धोरुद्धेरुद्धेनिलेमनइत्युक्तेः ९ अत्रमनएवपूर्वरूपंवागुत्तररूपंमनसावाइति ना वाग्वदंतीतिश्रुतिंलौकिकमनुभवंचानुरुध्यशंकतेकस्मादिति १० विज्ञानयोगेनप्रमाणेन मतिःप्राणःसमुन्नीतासुषुप्तेऊर्ध्वंउद्रिक्तासनीविषयान्कुतो नाध्यगच्छन् कोवैतांप्रतिबाधतेसुषुप्तोकोवा स्यज्ञानशक्तिमपहरतीत्यर्थः ११ स्वल्पत्वात्केनेत्यस्योत्तरमाद्यावाह्न तामपानइति अपानवशगःप्रा

ततोवाचस्यनिर्जज्ञेतंमनःपर्यवेक्षते रूपंभवतिवैवर्णंसमनुद्रवतेमनः ९ ब्राह्मण्युवाच कस्माद्वागभवत्पूर्वंक स्मात्पश्चान्मनोभवत् मनसाचिंतितंवाक्यंयदासमभिपद्यते १० केनविज्ञानयोगेनमतिश्चित्तंसमास्थिता समुन्नीतानाध्यगच्छत्कोवैतांप्रतिबाधते ११ ब्राह्मणउवाच तामपानःपतिर्भूत्वातस्मात्प्रेषत्यपानताम् तांगतिंमनसःप्राहुर्मनस्तस्मादपेक्षते १२ प्रश्नंतुवाङ्मनसोर्मांयस्मात्त्वमनुपृच्छसि तस्मात्तेवर्तयिष्यामितयोरेवसमाह्वयम् १३ उभेवाङ्मनसीगत्वाभूतात्मानमपृच्छताम् आवयोःश्रेष्ठमाचक्ष्वच्छिंधिनोसंशयंविभो १४ मनइत्येवभगवांस्तदाप्राहसरस्वती अहंवैकामधुक्तुभ्यमितितंप्राहवागथ १५ ब्राह्मणउवाच स्थावरंजंगमंचैवविद्ध्युभेमनसीमम स्थावरंमत्सकाशेवैजंगमंविषयेतव १६ यस्तुतेविषयंगच्छेन्मंत्रोवर्णःस्वरोपिवा तन्मनोजंगमंनामतस्मादसिगरीयसी १७

णोनसुषुप्तेमनोलयाल्लीयते अपानं तुस्ववशेकृत्वासमाधौमनोलयेसातिलीयतएवेत्यर्थः तस्मात्पतिभावाद्धेतोःप्रेषतिनयति तांगतिमितितांप्राणाख्यांगतिंमनसोगतिंबहिर्गमनसाधनं प्राहुः नहिवायुबलेनानुन्मीलितनयनेमनोवृत्तिर्भ्रूमंडलपर्यंतंगंतुंसमर्था तामतिमित्यपपाठः १२ कस्मादित्यस्योत्तरमाख्यायिकामुखेनाह प्रश्नंति- त्यादिना समाह्वयंसख्यंआह्वयंतेविजिगीषवोस्मिन्नितिसंवादः १३ भूतात्मानंजीवं १४ तन्मतेमनःश्रेष्ठंअनुभवसिद्धम् वाचोमतेदृष्टादृष्टेफलोपायो मय्येवबोद्धुंशक्यंइतिस्वस्यैवश्रेष्ठ्यम् १५ द्वयोर्विषयविभागेनसाम्यमापादयन्मनआख्योब्राह्मणउवाच स्थावरंबाह्येंद्रियग्राह्यम् जंगमंअतींद्रियंस्वर्गा दि १६ यद्यपिस्वर्गादिकमपिमनसोविषयः तथापिवाचैवद्वारीकृत्यतस्यतथात्वमस्तिअतोवागेवगरीयसीत्याह यस्त्विति मंत्रादिप्रकाशितंविषयंग च्छन्मनोपिजंगमंभवतीत्यर्थः १७

समाधिः कामधुगस्मीति स्वपक्षपुष्टिः तेनाहं मूर्च्छित इवास्मि यस्मात्तु उच्छ्वासमासाद्येति योजना १८ तथापि मनोवृत्तिविशेषयोः प्राणापानयोरंतरे एव वा
गस्ति स्वपिति वा प्राणेन तदा वाक् भवति प्राणस्तदा वाचं रेल्हीति श्रुतेरित्याह प्राणापानेति रेल्हि लेटि अपानतीति प्राणेन अनाप्यायिता सती तारमंद्रत्वा-
दिभावं व्युत्सृज्य अत्यंतं नीरस्तरा भवतीत्यर्थः १९ व्यतिरेकमुक्त्वान्वयमाह तत इति तस्मात्प्राणवन्नपानन्वाचमभिव्याहरतीति श्रुतेर्यस्मादेवं तस्मादुच्छ्वासं
प्राणव्यापारमासाद्य न वाग्वदति २० घोषिणीजाताः निर्घोषः घोषाभावो यस्याः सा अघोषेति यावत् तयोर्घोषिणी प्राणाप्यायनमपेक्षते तद्विना विच्छिद्य
ते निर्घोषा तु हंसमंत्ररूपा सर्वास्वप्यवस्थासु प्रवर्तत इति गरीयसी २१ घोषिण्यपि गुर्वीत्याह गौरिवेति वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाका
रः स्वधाकारो हंतकारो वषट्कार इति श्रुतेः स्तनैः तत्तत्कर्मफलरूपं रसं अथवा नूरसमिति समानाधिकरणे द्वितीया रस्यंदते प्रस्रवति ब्रह्मवादिनी उपनिष-
द्वाक् तु शाश्वतं मोक्षं स्यंदते प्रस्रवति सततं नित्यसिद्धम् २२ दिव्यं देवताद्याकर्षणादि अदिव्यं व्यहारादि सामर्थ्यम् तदुभयरूपोयः प्रभावस्तेन एत

यस्मादपि समाधिस्ते स्वयमभ्येत्य शोभने तस्मादुच्छ्वासमासाद्य प्रवक्ष्यामि सरस्वतीम् १८ प्राणापानांतरे देवी वाग्वै नित्यं
स्म तिष्ठति प्रेर्यमाणा महाभागे विना प्राणानपानती प्रजापतिमुपाधावत्प्रसीद भगवन्निति १९ ततः प्राणः प्रादुरभूद्वाचमा
प्याययत्पुनः तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित् २० घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते तयोरपि च घोषेण
निर्घोषैव गरीयसी २१ गौरिव प्रस्रवत्यर्थान्रसमुत्तमशालिनी सततं स्यंदते ह्येषा शाश्वतं ब्रह्मवादिनी २२ दिव्यादिव्यप्र
भावेन भारती गौः शुचिस्मिते एतयोरंतरं पश्य सूक्ष्मयोः स्यंदमानयोः २३ ब्राह्मण्युवाच अनुत्पन्नेषु वाक्येषु चोद्य
माना विवक्षया किन्नु पूर्वं तदा देवी व्याजहार सरस्वती २४ ब्राह्मण उवाच प्राणेन या संभवते शरीरे प्राणादपानं प्र
तिपद्यते च उदानभूता च विसृज्य देहं व्यानेन सर्वं दिवमावृणोति २५ योः वाङ्मनसयोः २३ व्याजहार स्वस्य हनिला भार्थे किं नु तत्त्वं सवि

शेषेण आजहार आहृतवती २४ आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया मनः कायाग्निमाहंति स प्रेरयति मारुतं इति शिक्षोक्तेर्मनः प्रवर्तिताः प्रा
णाद्या एव वाचं निर्वर्तयंतीत्याह प्राणेनेति प्रांतो हि विविक्षुर्बाह्यं वायुमाचालयति स पुनर्नाभिस्थाने प्राणापानग्रंथ्याधारे अपानेन सहैक्यं प्राप्य मनोनियम
नाभिहत कायाग्नि प्रेरितं ऊर्ध्वं मुत्प्लुत्य उरः कंठशिरः स्थानेष्वभिघातं प्राप्य मंद्रमध्यमतारभेदेन ध्वनिमुत्पाद्याधस्तान्मुखबिलमत्यंतात्त्वादिस्थानानु
रोधी मंद्रादिध्वनिधर्मवतो वर्णानभिव्यज्य वेगवत्त्वस्वाभाव्याद्बहिः प्रस्थितः श्रोत्रस्थानानि संस्कृत्य वर्णाननुभाव्य वेगक्षये पुनः समानस्थानमेव पूर्ववत्प्र
तिपद्यते सोयमर्थः श्रीभागवते प्युक्तः स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठ इति २५

इत्येव इत्थंमेव पूर्वंवाणीस्वोत्पत्तिप्रकारं प्रजजल्प वाचः प्राणाधीनत्वमपि वाचः प्रभावादेव विदितामित्यर्थः यत्रसोमः सहाग्निनेत्यक्तोसोमाग्नीड
उपिंगलाधिपतीमनोवाक्शब्दाभ्यामुपसंहरतितस्मादिति किमर्थंवयमध्येष्यामहे किमर्थंवयंयक्ष्यामहेवाचिहि प्राणंजुहुमः प्राणेवाचंयोह्येव प्रभवः
सा एवाप्यय इति श्रुतेः यथास्थंडिलस्थोवन्हिर्वायुनास्थालीस्थोवायुश्चवन्हिना सामिध्यते अन्यतरनाशे च द्वयोरपिनाशः एवंस्वर्गाद्यर्थवादे मनः संधुक्ष्य
नेनतोवागादीन्व्यापारयति तत्रवाचः प्रवर्तकस्यवायोर्निरोधे मनोनिरुध्यते मनोनिरोधेवन्हिर्निरुध्यते तावतैवसंसारादर्शनरूपेष्टार्थसिद्धेः किंयज्ञादि

ततः समानेप्रतितिष्ठतीह इत्येवपूर्वंप्रजजल्पवाणी तस्मान्मनःस्थावरत्वाद्विशिष्टंतथादेवीजंगमत्वाद्विशिष्टा २६ इ
तिश्री॰ आश्वमेधिकेपर्वणिगीतासु एकविंशोऽध्यायः २१ ब्राह्मणउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम्
सुभगेसप्तहोतॄणांविधानमिहयादृशम् १ घ्राणश्चक्षुश्चजिह्वाचत्वक्श्रोत्रंचैवपंचमम् मनोबुद्धिश्चसप्तैतेहोतारः पृथगा
श्रिताः २ सूक्ष्मेवकाशेतिष्ठंतोनपश्यंतीतरेतरम् एतान्वैसप्तहोतॄंस्त्वंस्वभावाद्विद्धिशोभने ३ ब्राह्मण्युवाच सू
क्ष्मेवकाशेसंतस्तेकथंनान्योन्यदर्शिनः कथंस्वभावाभगवन्नेतदाचक्ष्वमेप्रभो ४ ब्राह्मणउवाच गुणाज्ञानमवि
ज्ञानंगुणज्ञानमभिज्ञता परस्परंगुणानेतेनाभिजानंतिकर्हिचित् ५ जिह्वाचक्षुस्तथाश्रोत्रंवाङ्मनोबुद्धिरेवच नगंधा
नधिगच्छंतिघ्राणस्तानधिगच्छति ६ घ्राणंचक्षुस्तथाश्रोत्रंवाङ्मनोबुद्धिरेवच नरसानधिगच्छंतिजिह्वातानधिगच्छति ७
घ्राणंजिह्वातथाश्रोत्रंवाङ्मनोबुद्धिरेवच नरूपाण्यधिगच्छंतिचक्षुस्तान्यधिगच्छति ८ घ्राणंजिह्वातत्श्चक्षुः श्रोत्रंबुद्धिर्मन
स्तथा नस्पर्शानधिगच्छंतित्वक्चतानधिगच्छति ९ घ्राणंजिह्वाचचक्षुश्चत्वङ्मनोबुद्धिरेवच नशब्दानधिगच्छंतिश्रोत्रंता
नधिगच्छति १० घ्राणंजिह्वाचचक्षुश्चत्वक्श्रोत्रंबुद्धिरेवच संशयंनाधिगच्छंतिमनस्तमधिगच्छति ११

ना श्रुतेोतुवाक्शब्देन तत्कारणंमनोज्ञेयम् एवंचवाङ्मनसयोः प्रत्येकंपुरुषार्थहेतुत्वाद्विशिष्टत्वमविशिष्टत्वम् २६ इत्याश्वमेधिकेपर्वणि
टीकायांद्वितीयोऽध्यायः २ इदानींपूर्वोक्तघ्राणादिसप्तकस्य अन्वयव्यतिरेकाभ्यामितरेतरकार्यकारित्वंनास्तीत्युक्त्वाबुद्धिर्मनस्यंतर्भाव्यादितरेषां
पंचानांमनोधीनत्वंमनसोपिव्यावहारिकार्यप्रकाशकत्वमितराधीनमितींद्रियमनः संवादेनतेषामन्योन्यव्यतिरेकमुक्त्वापूर्वोक्तमेवान्यतरजयेनोभयज
फलंसिध्यतीति प्रतिपादनार्थोयंसप्तहोत्रध्यायआरभ्यते अत्रापीति अत्रवाङ्मनसयोः समप्राधान्येविवेचनीयम् १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २४ २५ २६ २७ अगारंहार्दाकाशंस्वप्नेमोक्षेचप्रविश्य यएषांतर्हृदयआकाशस्तस्मिन्शेतेत्रि
पादस्यामृतंदिवीतिश्रुतिभ्यां अद्वारमिवबाह्येंद्रियवर्जितमिवस्वप्नेप्रज्ञातयोरिवव्युत्थानेपिइंद्रियाणांवासनामात्ररूपलेपिस्मृतिसिद्धेःस्थौल्यंअपक्ष्य
इवशब्दः संकल्पजान् भोगान्विषयेनिबद्धान्विषयवासनानुविद्धान् भुक्त्वाप्राणक्षयेमनः प्रक्षयेस्वप्नेषुप्तावसंप्रज्ञातेवाशांतिंउपेति २८ एवंदंतानि

घ्राणंजिह्वाचचक्षुश्चत्वक्श्रोत्रंमनएवच नतिष्ठामधिगच्छंतिबुद्धिस्तामधिगच्छति १२ अत्राप्युदाहरंतीममितिहासंपुरा
तनम् इंद्रियाणांचसंवादंमनसश्चैवभामिनि १३ मनउवाच नघ्रातिमामृतेघ्राणंरसंजिह्वानवत्तिच रूपंचक्षुर्नगृण्हा
तित्वक्स्पर्शंनावबुध्यते १४ नश्रोत्रंबुध्यतेशब्दंमयाहीनंकथंचन प्रवरंसर्वभूतानामहमस्मिसनातनम् १५ अगाराणीवशू
न्यानिशांतार्चिषइवाग्नयः इंद्रियाणिनभासंतेमयाहीनानिनित्यशः १६ काष्ठानीवार्द्रशुष्काणियतमानैरपींद्रियैः गुणार्था-
न्नाधिगच्छंतिमामृतेसर्वजंतवः १७ इंद्रियाण्यूचुः एवमेतद्भवेत्सत्यंयथैतन्मन्यतेभवान् ऋतेस्मानस्मदर्थांस्तुभो
गान्भुंक्तेभवान्यदि १८ यद्यस्मासुप्रलीनेषुतर्पणंप्राणधारणम् भोगान्भुंक्तेभवान्सत्यंयथैतन्मन्यतेतथा १९ अथवास्मा-
सुलीनेषुतिष्ठत्सुविषयेषुच यदिसंकल्पमात्रेणभुंक्तेभोगानयथार्थवत् २० अथचेन्मन्यसेसिद्धिमस्मदर्थेषुनित्यदा घ्राणे
नरूपमादत्स्वरसानादत्स्वचक्षुषा २१ श्रोत्रेणगंधानादत्स्वस्पर्शानादत्स्वजिह्वया त्वचाचशब्दानादत्स्वबुद्ध्यास्पर्शमथा
पिच २२ बलवंतोह्यनियमानियमादुर्बलीयसाम् भोगानपूर्वानादत्स्वनोच्छिष्टंभोक्तुमर्हसि २३ यथाहिशिष्यःशास्तारंश्रु-
त्यर्थमभिधावति ततःश्रुतिमुपादायश्रुत्यर्थमुपतिष्ठति २४ विषयानेवमस्माभिर्दर्शितानभिमन्यसे अनागतानतीतांश्च
स्वप्नेजागरणेतथा २५ वैमनस्यगतानांचजंतूनामल्पचेतसाम् अस्मदर्थेकृतेकार्येदृश्यतेप्राणधारणम् २६ बहूनपिहिसं
कल्पान्मत्वास्वप्नानुपास्यच बुभुक्षयापीड्यमानोविषयानेवधावति २७ अगारमद्वारमिवप्रविश्यसंकल्पभोगान्विषयनिबद्धा
न् प्राणक्षयेशांतिमुपैतिनित्यंदारुक्षयेग्निर्ज्वलितोयथैव २८ कामंतुनःस्वेषुगुणेषुसंगःकामंचनान्योन्यगुणोपलब्धिः अस्मानृतेना
स्तितवोपलब्धिस्तावदृतेत्वांनभजेत्प्रहर्षः २९ इतिश्रीम० आश्वमेधिकपर्वणिब्राह्मणगीतायांद्वाविंशोऽध्यायः २२

त्यादिश्लोकंसूचितंअ
हारशुद्धेः सत्वशुद्धिर्हेतुत्वंतत् आदितः एवंस्वस्याकर्तृत्वभावनयात्मनस्ततःसिध्यतिशुद्धचित्तस्यत्वयमेवबोधप्रकारइत्यर्थः २९ इत्याश्वमेधिकटी
कायांद्वाविंशोऽध्यायः २२

२१. तालुजिह्वांचेत्यत्रस्पष्टेनस्यर्थंव्याकरोत्यध्यायद्वयेन अत्रापीति अत्रप्राणक्षयेवक्तव्ये तत्रच्छांदोग्येप्राणाग्निहोत्रविद्यायांप्राणापानव्यानोदानसमानाः
क्रमेणाधिलोकंद्युभूमिदिग्आकाशाविद्युद्रूपाःसमाम्नाताः तेषांप्राणापानौअन्योन्याधीनौपूरकेरेचकेवाक्रियमाणेपानक्रियानिरोधात् अपानेचाविरेच्य
मानेप्राणगतिनिरोधात् पार्ष्णिभागेनसंपीड्ययोनिमाकुंचयेद्दृढमित्यादिप्रकारेणमूलबंधेनतयोरेकीकृतयोरूर्ध्वगतिर्भवति तदंतःप्राणापानयोरुदा
नाधीनंप्रागेवोक्तं अपानंप्राणयोर्मध्येउदानोव्याप्यतिष्ठतीति एवंद्यभुवोःपर्जन्ययज्ञद्वारापरस्पराश्रितयोरपि आकाशाश्रितत्वम् तथानाभिदेशमात्र
वर्तीसमानःसर्वांगव्यापिनोव्यानस्यवशेऽस्ति व्यानोपिसर्वसंधिव्यापिनोदानेनसमुच्चलतितद्व्याप्यत्वात्समानोप्युच्चलति एवंविद्युद्दिगाश्रितादिकंच

ब्राह्मणउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् सुभगेपंचहोतॄणांविधानमिहयादृशम् १ प्राणापानावुदानश्च
समानोव्यानएवच पंचहोतॄंस्तथैतान्वैपरंभावंविदुर्बुधाः २ ब्राह्मण्युवाच स्वभावात्सप्तहोतारइतिमेपूर्विकामतिः
यथावैपंचहोतारःपरोभावस्तदुच्यताम् ३ ब्राह्मणउवाच प्राणेनसंभृतोवायुरपानोजायतेततः अपानेसंभृतोवा
युस्ततोव्यानःप्रवर्तते ४ व्यानेनसंभृतोवायुस्ततोदानःप्रवर्तते उदानेसंभृतोवायुःसमानोनामजायते ५ तेपृच्छंतपुरा
संतःपूर्वजातंपितामहम् योनोज्येष्ठस्तमाचक्ष्वसनःश्रेष्ठोभविष्यति ६ ब्रह्मोवाच यस्मिन्प्रलीनेप्रलयंव्रजंति
सर्वेप्राणाःप्राणभृतांशरीरे यस्मिन्प्रचीर्णेचपुनश्चरंतिसवैश्रेष्ठोगच्छतयत्रकामः ७ प्राणउवाच मयिप्रली
नेप्रलयंव्रजंतिसर्वेप्राणाःप्राणभृतांशरीरे मयिप्रचीर्णेचपुनश्चरंतिश्रेष्ठोह्यहंपश्यतमांप्रलीनम् ८ ब्राह्मणउवाच
प्राणःप्रलीयततः पुनश्चप्रचचारह समानश्चाप्युदानश्चवचोऽब्रुवन्पुनःशुभे ९

आकाशाश्रिता इदमेवसर्वेषामुदानाधीनत्वंश्रुत्या तद्यथास्वदयपड्वीशशंकून्संवृहेदितिदृष्टांतेनोपपादितम् उदानोपिभ्रूघ्राणसंधौनिरुध्यते
यदातदातत्स्थोब्रह्मणिद्युभूम्यादिसहित आकाशोनिरुध्यते एवंचतस्यामवस्थायांसर्वप्रपंचप्रविलयाद्योगीकृतकृत्योभवतीति पद्यकृतात्पर्यंत
त्रैवंसतित्रेधाभावनाप्रवर्तते प्राणायस्वाहेत्यादिभिर्मंत्रैः प्राणाग्निहोत्रंकुर्वन्नेवावदानेनसर्वंद्युप्रभृतितृप्यतीतिभावनयाश्रद्धाचित्तोभवत्यन्नदोषे
श्चनलिप्यते इत्येकःप्रकारः चपलंमनःपूर्वोक्तखेचरीमुद्रयाहठयोगेननिरोद्धव्यमितिद्वितीयः अनुपदोक्तःकृत्स्नप्रपंचविलयस्तृतीयः एषामधिकारि
भेदाद्व्यवस्था एवंसर्वापिविद्याधिदैवाधिभूताध्यात्मभेदेनत्रिविधाधिकारभेदाज्ज्ञेया १ २ ३ ४ ५ ६ ७ ८ ९ ५ ७

अक्षरार्थः स्पष्टएव पंचानामप्येषामेकस्यापिनिरन्वयोच्छेदे सर्वेषामुच्छेदोभवतीति १० सर्वेषांप्रत्येकमपिप्रलीनेप्रलयंव्रजंतीत्युक्तिःसंगच्छते ११
१२ १३ १४ १५ १६ १७ १८ १९ २० एवमेषांसत्यपिप्रत्येकंश्रैष्ठ्ये स्वातंत्र्याभावादश्रैष्ठ्यमप्यस्तीत्याशयेनाह सर्वेश्रेष्ठानवाश्रेष्ठाइति २१ २२ वस्तु
वृत्तंतुमनोमात्रत्वमेवप्राणानामित्याह एकएवममेवात्मेति २३ आख्यायिकातात्पर्यंतुयथाएकएवप्राणोध्यात्मंउपाधिभेदात्पंचधाभूतोन्योन्यस्मा

नत्वंसर्वमिदंव्याप्यतिष्ठसीहयथावयम् नत्वंश्रेष्ठोहिनःप्राणअपानोहिवशेतव प्रचचारपुनःप्राणस्तमपानोभ्यभाषत १०
अपानउवाच मयिप्रलीनेप्रलयंव्रजंतिसर्वेप्राणाःप्राणभृतांशरीरे मयिप्रचीर्णेचपुनश्चरंतिश्रेष्ठोह्यहंपश्यतमांप्रलीन
म् ११ ब्राह्मणउवाच व्यानश्चतमुदानश्चभाषमाणमथोचतुः अपाननत्वंश्रेष्ठोसिप्राणोहिवशगस्तव १२ अ
पानःप्रचचाराथव्यानस्तंपुनरब्रवीत् श्रेष्ठोहमस्मिसर्वेषांश्रूयतांयेनहेतुना १३ मयिप्रलीनेप्रलयंव्रजंतिसर्वेप्राणाःप्राणभृ
तांशरीरे मयिप्रचीर्णेचपुनश्चरंतिश्रेष्ठोह्यहंपश्यतमांप्रलीनम् १४ ब्राह्मणउवाच प्रालीयतततोव्यानःपुनश्चप्रचचा
रह प्राणापानावुदानश्चसमानश्चतमब्रुवन् १५ नत्वंश्रेष्ठोसिनोव्यानसमानस्तुवशेतव प्रचचारपुनर्व्यानःसमानःपुनरब्र
वीत् श्रेष्ठोहमस्मिसर्वेषांश्रूयतांयेनहेतुना १६ मयिप्रलीनेप्रलयंव्रजंतिसर्वेप्राणाःप्राणभृतांशरीरे मयिप्रचीर्णेचपुनश्चर
तिश्रेष्ठोह्यहंपश्यतमांप्रलीनम् १७ समानःप्रचचाराथउदानस्तमुवाचह श्रेष्ठोहमस्मिसर्वेषांश्रूयतांयेनहेतुना १८ मयि
प्रलीनेप्रलयंव्रजंतिसर्वेप्राणाःप्राणभृतांशरीरे मयिप्रचीर्णेचपुनश्चरंतिश्रेष्ठोह्यहंपश्यतमांप्रलीनम् १९ ततःप्रालीय-
तोदानःपुनश्चप्रचचारह प्राणापानौसमानश्चव्यानश्चैवतमब्रुवन् उदाननत्वंश्रेष्ठोसिव्यानएववशेतव २० ब्राह्मण
उवाच ततस्तानब्रवीद्ब्रह्मासमवेतान्प्रजापतिः सर्वेश्रेष्ठानवाश्रेष्ठाःसर्वेचान्योन्यधर्मिणः २१ सर्वेस्वविषयेश्रेष्ठाः
सर्वेचान्योन्यधर्मिणः इतितानब्रवीत्सर्वान्समवेतान्प्रजापतिः २२ एकःस्थिरश्चास्थिरश्चविशेषात्पंचवायवः एकए
वममेवात्माबहुधाप्युपचीयते २३ परस्परस्यसुहृदोभावयंतःपरस्परम् स्वस्तिव्रजतभद्रंवोधारयध्वंपरस्परम् २४
इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतासुत्रयोविंशोध्यायः २३

द्यावर्ततेएवंपरमात्मापिऔपाधिकमनेकधाभा
वंप्राप्यमिथोहर्षविषादभोक्तृभोग्यभावंभजतइति तस्मादेकात्म्यबुध्यासर्वेःसर्वत्रानुकंपाकार्येत्युपसंहरतिधारयध्वंपरस्परमिति २४ इत्याश्वमेधि
केटीकायांत्रयोविंशोध्यायः २३

उक्तमेकात्म्यं अध्यारोपापवादाभ्यां प्रपंचयति अत्रेति १ जंतोः समष्टिव्यष्टिशरीरिणः २ येनानिमित्तेनकारणेन ततोनिमित्तादन्योपिनंततप्रभृति पूर्व-
भाकृनिमित्तत्वेनएति ३ किंतद्द्वयं प्राणद्वंद्वंचविः तिर्यङ्मनुष्यादि ऊर्ध्वंदेवादिअधः पश्वादि एतेषांरूपंचयत्तद्विज्ञेयम् यद्वा तिर्यगित्यादिनाविभु
त्वमेवोच्यते ४ उत्तरंसंकल्पाज्जायते हर्ष इति आनंदः सएवसंकल्पात् जंतुरित्यनुकृष्यते जंतुरूपेणाविर्भवतीत्यर्थः आनंदाद्ध्येव खल्विमानिभूतानि
जायंते सोकामयतबहुस्यां प्रजायेयेतिसच्चत्यच्चाभवदित्यादिश्रुतिभ्यः आनंदमात्रंब्रह्मैवमाययाईक्षणपूर्वकंब्रह्मांडपिंडाकारत्वंप्राप्नोति रविरिव
सूर्यकांतद्वारावन्हिप्रदीपाकारत्वमितिभावः शब्दादपिचजायते वैदिकशब्दपूर्विकापिप्रलयाग्निदग्धभौतिकसृष्टिः प्रजापतिद्वाराजायते एतइतिवैप्र
जापतिर्देवानसृजतेत्यादिश्रुतेस्तक्षकदग्धोवटइवकाश्यपमंत्रादित्यर्थः रसात्रूपात्तत्तद्विषयवासनातः इदंचपर्जन्यवदीश्वरस्यसाधारणेपिका

ब्राह्मणउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् नारदस्यचसंवादमृषेर्देवमतस्यच १ देवमतउवाच
जंतोःसंजायमानस्यकिंनुपूर्वंप्रवर्तते प्राणोपानःसमानोवाव्यानोवोदानएवच २ नारदउवाच येनायंसृ
ज्यतेजंतुस्ततोन्यःपूर्वमेतितम् प्राणद्वंद्वंहिविज्ञेयंतिर्यगूर्ध्वमधश्चयत् ३ देवमतउवाच केनायंसृज्यते
जंतुःकश्चान्यःपूर्वमेतितम् प्राणद्वंद्वंचमेब्रूहितिर्यगूर्ध्वमधश्चयत् ४ नारदउवाच संकल्पाज्जायतेहर्षःश
ब्दादपिचजायते रसात्संजायतेचापिरूपादपिचजायते ५ शुक्रात्शोणितसंसृष्टात्पूर्वंप्राणःप्रवर्तते प्राणेनवि
कृतेशुक्रेतथापानःप्रवर्तते ६ शुक्रात्संजायतेचापिरूपादपिचजायते एतद्रूपमुदानस्यहर्षोमिथुनमंतरा ७ कामा
त्संजायतेशुक्रंकामात्संजायतेरजः समानव्यानजनितेसामान्यशुक्रशोणिते ८

रणत्वेबीजवदसाधारणंज्ञेयं ५ शुक्रंअदृष्टं शोणितंरागा
दिवासनामिश्रमदृष्टमवष्टभ्यप्राणोलिंगात्माप्रवर्ततेस्मपूर्वम् तेनप्राणेनविकृतेजन्माद्यपेक्षयातान्विकारान्प्रापिते शुक्रेसवासनकर्मजेदेहे अपानेमृत्युश्च
रमभावविकारोनाशाख्यःप्रवर्तते ६ एवंसतिपुनस्तस्मिन्जन्मन्युपनितात् शुक्रात्रसाद्वयथोक्ताज्जायते एतद्रूपंउदानस्यब्रह्मणःआरोपितंरूपमित्यर्थः किं
तदतआह हर्षोमिथुनमंतरेति मिथुनंशुक्ररूपंकारणंकार्यंच अंतरातयोर्मध्येहर्षोव्याप्यतिष्ठतीत्यर्थः नेयदंतरातद्ब्रह्मेतिश्रुतेः तेनामरूपेप्रवृत्तिमूलात्कामा
त् शुक्रंअदृष्टं अदृष्टाच्चरजः प्रवृत्तिरितिकामकर्मणीप्रवाहेणावर्तेतेइत्यर्थः ७ एतयोर्मूलंसमानव्यानोताभ्यांतदात्मकोविद्युच्छ्रोत्रेलक्ष्यते ततश्चदृश-
नुश्रविकविषयंविज्ञानंकामप्रवृत्त्योर्बीजमित्यर्थः तथाचाहुः जानातीच्छतिप्रयतनइति ८

प्राणापानाविति इदमेव काम प्रवृत्त्याख्यं द्वंद्वं प्राप्य प्राणापानावेव जीवोपाधिभूतौ ऊर्ध्वाधोगतिं गच्छतः ननु जीवः घटोनीयेन नाकाशं तद्वज्जीवो न भोपम- इति श्रुतेः विभोश्चिद्रूपस्य जीवस्याकाशवद्गत्ययोगात् समानव्यानौ उक्तौ रीत्या दृष्टं श्रुतं च तौ उभौ तिर्यक् अनूर्द्ध्व अब्रह्म अतत्प्रापकत्वात् अत एव द्वंद्वत्वं द्वैतभावः इति उच्यते वेद ९ ननु सर्वं दृष्टं श्रुतं च तिर्यग्द्वंद्वं नेत्याह अग्निर्वै इति अग्निः परमात्मा तस्यैव देवस्य शासनं आज्ञा निश्वसितमेतदृग्वेद इति श्रुतेः श्रुतिस्मृती ममैवाज्ञे इति स्मृतेश्च तदाज्ञारूपो वेदः इदं सर्वं यदयमात्मा सर्वं खल्विदं ब्रह्मेत्यादिरैकात्म्यं प्रतिपादयतीत्यर्थः तस्य च देवस्य ज्ञानं बुद्धिसमन्वितं परमर्थी शक्तियुक्तं तत एव वेदाज्जायत इत्यर्थः १० तदेवाह तस्येति यथा धूमभस्मनी अग्निरूपे बहिर्भूते एवं तमोरजसी लयविक्षेपहेतुतया चिद्रूपाद्बहिर्भूते इत्यर्थः सर्वमिति तस्य तस्मात् यत्र अग्नौ मुख्ये भोग्यं तस्मात् सर्वं संजायते इदं सर्वमित्याद्यद्वैतश्रुतेरित्यर्थः ११ सत्वादिति यज्ञो जीवब्रह्मणोः संगतिकरणरूपो योगः समानं व्यानाख्यं सर्वं दृष्टं श्रुतं च बुद्धिसत्वादेव भवतीति योगिनामनुभवसिद्धमित्यर्थः अयं भावः वेदे श्येनज्योतिष्टोमदह

प्राणापानाविदं द्वंद्वमवाक्चोर्ध्वं च गच्छतः व्यानः समानश्चैवोभौ तिर्यक् द्वंद्वत्वमुच्यते ९ अग्निर्वै देवताः सर्वा इति वेदस्य शासनम् संजायते ब्राह्मणस्य ज्ञानं बुद्धिसमन्वितम् १० तस्य धूमस्तपोरूपं रजो भस्म सुतेजसः सर्वं संजायते तस्य यत्र प्रक्षिप्यते हविः ११ सत्वात्समानो व्यानश्च इति यज्ञविदो विदुः प्राणापानावाज्यभागौ तयोर्मध्ये हुताशनः १२ एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः निर्द्वंद्वमिति यत्त्वेतत्तन्मे निगदतः शृणु १३ अहोरात्रमिदं द्वंद्वं तयोर्मध्ये हुताशनः एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः १४ सच्चासच्चैव तद्द्वंद्वं तयोर्मध्ये हुताशनः एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः १५

रोपासनादीनि तमोरजः सत्वप्रधानपुरुषयोग्यानि वर्तन्ते तेषु तेषु यज्ञविदां सात्विकमेव साधनं बहुमतं नेतरदिति प्राणापानाविति यथाग्निराज्यभागाभ्यां उद्दीप्यते एवं पूर्वोपाधिप्रविलापनरूप प्राणापानजयेन उदानाख्यं परं ब्रह्म भ्रूमध्ये दृष्ट्वा प्रकाशत इत्यर्थः एवं च केनायं सृज्यत इत्यस्योत्तरं संकल्पादिति कश्चान्य इत्यस्य तन्मूलभूते कामकर्मणी प्राण द्वंद्वं च सात्विकं तत द्वयं समानव्यानाख्यं तिर्यगित्यादेरुत्तरं हर्षो मिथुनं अंतरांतिच व्युत्क्रमम् १२ १३ अहोरात्रं विद्याविद्ये सुप्ति जागरौ उत्पत्ति प्रलयौ वा १४ सत्कार्यं असत्कारणं हुताशनः हुते प्रविलापिते कार्यकारणे अश्नाति निरन्वयेन गिलति न तु राहुवत्पुनरुद्गिलतीति हुताशनः शब्दं ब्रह्म उदानस्य उत् उत्कर्षेण आनयति चेष्टयतीत्युदानः परम आनंदः को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यादिति श्रुतेः १५

५ ५ ५ ५ ५ ५ ५ ५

ऊर्ध्वमिति ततऊर्ध्वंब्रह्मयेनहेतुनासंकल्पाख्येनसमानोव्यानश्चभवति व्यानेनसर्वोदिवमावृणोति ततःसमानेप्रतितिष्ठतीत्युक्तेः कारणंकार्यंचभ
वति तेनैवहेतुनाकर्मव्यस्यतेविस्तार्यते तस्मात्संकल्पोनिरोद्धव्यः निःसंकल्पस्तटस्थस्तिष्ठेदेतन्मोक्षलक्षणमितिश्रुतेरितिभावः ननुसुषुप्तावपि
संकल्पोनास्तीत्यतआह तृतीयमिति तृतीयंऊर्ध्वं तुशब्दःसमानवैलक्षण्यार्थः समानेनउपलक्षणंनव्यवस्यते निश्चीयतेशाखायामेवचंद्रः सोऽसुषुप्ता
कारणभावात्माहूलक्षणमित्यर्थः तथाचश्रुतिः द्वैतस्याग्रहणंतुल्यमुभयोः वीतनिद्रायुतःप्राज्ञःसातुतुर्येनविद्यतइति १६ निश्चयफलमाह शांतीति व्यानं
चकारात् समानंसनातनंब्रह्मचएतत्त्रयंएकंशांतिशब्दार्थः कार्यकारणशब्दानांसैंधवघनन्यायेनैक्यंमुक्तिर्नत्वाद्ययोर्निरोधमात्रंसांख्याभिमतमित्यर्थः
१७ इत्याश्वमेधिकेटीकायांचतुर्विंशोऽध्यायः २४ एवमुपदेशप्राधान्येनब्रह्माद्वैतमुक्त्वाउपपत्तिप्राधान्येनतत्प्रसाधयितुमध्यायांतरमारभते

ऊर्ध्वंसमानोव्यानश्चव्यस्यतेकर्मतेनतत् तृतीयंतुसमानेनपुनरेवव्यवस्यते १६ शांत्यर्थंव्यानमेकंचशांतिर्ब्रह्मसनातन
म् एतद्रूपमुदानस्यपरमंब्राह्मणाविदुः १७ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिब्राह्मणगीतायांचतुर्वि
शोऽध्यायः २४ ब्राह्मणउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् चातुर्होत्रविधानस्यविधानमिहया
दृशम् १ तस्यसर्वस्यविधिवद्विधानमुपदिश्यते शृणुमेगदतोभद्रेरहस्यमिदमद्भुतम् २ करणंकर्मकर्ताचमोक्षइत्येवभा
विनि चत्वारएतेहोतारोयैरिदंजगदावृतम् हेतूनांसाधनंचैवशृणुसर्वमशेषतः ३ घ्राणंजिह्वाचचक्षुश्चत्वक्चश्रोत्रंचपं
चमम् मनोबुद्धिश्चसप्तैतेविज्ञेयागुणहेतवः ४ गंधोरसश्चरूपंचशब्दःस्पर्शश्चपंचमः मंतव्यमथबोद्धव्यंसप्तैतेकर्महेतवः ५

अत्रापीति अत्रउदानस्वरूपेविवक्तव्ये चातुर्होत्रविधानंइतिहासनाम तस्यविधानं अपूर्वतयाज्ञापनम् १ शब्दतोज्ञातस्यपुनर्विधानंअनुष्ठानप्रकारं २ भा-
विनिविशब्दःभाववतिहेबुद्धे हेतूनामिति घ्राणादयोयद्यपिदशसप्तहोतारःउक्तास्तथाप्येतेषांकःकस्यहेतुरितितत्रनोक्तं अत्रतुयुक्तिबलेनतत्साधनंअधिक
मुच्यतइतिविशेषइतिभावः ३ तत्रगंधाद्यनुभवेप्रीत्यप्रीतिविषादाःसत्वरजस्तमोगुणकार्यभूताउत्पद्यंते तेयद्यात्मधर्माःस्युर्नतर्हितत्स्वरूपोच्छेदंविनातस्य
तद्वियोगआत्यंतिकोयुज्यते घटस्येवरूपसामान्येन यदिप्रकृतेस्तर्हिसापिआत्मसमसत्ताचेत्तर्हिविभुनोर्द्वयोर्योगात्पुरुषस्यचाल्पुसहरूपत्वादवश्यंभोगस्यप्राप्ते
रनिर्मोक्षएव तस्माद्रज्जूरगतुल्याप्रकृतिस्तत्कार्यंचसर्वंनाद्दृश्यमेवदृष्टिसमयोत्पत्तिकमित्याशयेनाह घ्राणमिति गुणाःअविद्यासैवहेतुर्येषांतेगुणहेतवः घ्रा
णादिकंसप्तदशकस्यलिंगस्योपलक्षणं ४ गंधादयोपिगुणहेतुत्वमत्सजं तएवकर्महेतवः कर्मजाअपिप्रभवंति स्थूलंसर्वंकर्मणएवफलमित्यर्थः ५ ७

कर्मकर्तव्यतत्फलभोक्तृरूपेण घ्रातादिरूपो भवतीति घ्रात्रादयः कर्तृहेतवः एतेनाकर्तृत्वं भोक्तृत्वं वांछन्सांख्योनिरस्तः भोक्तृत्वस्यापि भोगकर्तृत्वरूपत्वात् ६ एतेषां भेदमाह स्वगुणमिति एते घ्रात्रादयः गुणा औपाधिकरूपं घ्राणादि तद्वंतः तत्साधनाःसंतः स्वगुणं गंधादिकं भुंजते अयंभावः यथा आकाशः कर्णशष्कुलीरूपमुपाधिं प्राप्यं श्रोत्रभावं गतः सन् तेनैव स्वगुणं शब्दं प्रकाशयति एवं घ्रात्रादयोपि अथयोवेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमिति श्रुतेः स्वोपादानकघ्राणादिमंतः स्वोपादानकमेव शब्दादिकं भुंजते तथा च प्रयोगः मेयमानरौ एकोपादानकौ भास्यभासकत्वात् शब्दश्रोत्रवदित्यात्माहेतुसाधकः सूचितोभवति किंतन्मेयमात्रोर्गुणरूपयो रुपादानं तत्राह अहंचनिर्गुणोनंत इति अस्मदर्थ एव घ्राणादिगुणरहितो गंधघ्रातृत्वादिपरिच्छेदरहितस्तयोरुपादानमित्यर्थः एवं पृथिवीहोता द्यौरध्वर्युः रुद्राग्नी बृहस्पतिरुपवक्तेति चातुर्होतृमंत्रो व्याख्यातः तथा पृथिवीशब्दोक्तं घ्राणादिकं अतींद्रियत्वसामान्यात् होतृप्रकाश्यदेवतातुल्यं होतृशब्देनोक्तम् सुखसाधनतया द्युशब्दोक्तं गंधादिकं दृश्यत्वसामान्यादध्वर्युकर्तृकनिर्वापावद्यानादितुल्यम् अध्वर्युशब्देनोक्तम् लब्धेरलब्धेश्च गंधादि भिः रोध्यमानो रोध्यमानो वा रुद्रशब्दोक्तो घ्रात्रादिः कामाग्नींधकत्वसामान्यादग्निशब्देनोक्तः कारणब्रह्मणोप्यधिष्ठानत्वेन पालकत्वाद्बृहस्पतिशब्दोक्तो निर्गुणः साक्षिमात्ररूपत्वादुपवक्ता न मुख्यो वक्ता एतदुपद्रष्टृत्वादेरप्युपलक्षणं तेन सर्गादौ ईक्षणस्याप्ययं कर्ता न भवति एवं चित्तिः स्रुगित्यादयो दशहोत्रादिमंत्रा अपि व्याख्येयाः विस्तरभयात्तु नेह व्याख्यायते चित्तं चित्तादिः सर्वोप्यात्मन एव व्यूह्ना दशहोत्रादि शब्दानामात्ममात्रवाचकत्वस्य आत्मन्नात्मन्नित्यामंत्रयत तस्मै दशमः हूतः प्रत्यशृणोत् स दशहूतो ह वै नामैषः तं वा एतं दशहूतं संतं दशहोतेत्याचक्षते इति श्रवणात् आमंत्रणमुपसंधानम् प्रतिश्रवणमुपवक्तुः साक्षात्कार इति दिक् कथं तर्हि निर्गुणस्यानंतस्य प्रतिपत्तिरिति तत्राह सप्तैते मोक्षहेतव इति इंद्रियाणां विषयाणां च ग्रहातिग्रहसंज्ञकबंधरूपत्वात् तेषां वियोगे शब्दशष्कुल्यभावेन नभसः स्वतन्मात्रत्ववदात्मनः निरुपाधेर्भेदकाभावाच्चिन्मात्ररूपेणावस्थिता एते अव्यवहिता घ्रात्रादय एव मोक्षहेतवः स्युः घ्रातृत्वाद्यभिमानत्याग एव मोक्ष इत्यर्थः ७ ७ ७ ७ ७ ७

घ्राता भक्षयिता द्रष्टा वक्ता श्रोता च पंचमः मंता बोद्धा च सप्तैते विज्ञेयाः कर्तृहेतवः ६ स्वगुणं भक्षयंत्येते गुणवंतः शुभाशुभम् अहंच निर्गुणोनंतः सप्तैते मोक्षहेतवः ७

तत्त्वविदांतुनभक्षणमस्तीत्याह विदुषामिति स्वंस्वंस्थानं प्राणादीनामधिष्ठानं अविद्यादि गुणागुणेषुवर्तंतइतिमत्वानसज्जत इत्युक्तेः प्राणादयएव-ग्रेयादिषुवर्तंतेनत्वात्मेति जानतांनप्रातृत्वाद्यभिमानकृतोबंधोस्तीत्यर्थः ८ अदन्निति अविद्वानितिच्छेदः अन्नानिग्रंयादीनि अदन् भोक्तृत्वाभिमानंकुर्वन् भोग्येममतयायुज्यतेततश्चनश्यतीत्यर्थः अन्नकेवलाघोभवतिकेवलादीतिश्रौतंदृष्टांतमाह आत्मार्थेइति ९ एकाकीमिष्टभुक्केवलपापरूपएवभवति यस्मादतः सचान्नंहंतिनाशयतितंचान्नंहंति मृत्युपरंपरया संहृत्वान्नंहन्यते १० यइदंविद्वान् अन्नहंता अत्रभोक्ताअन्नोपलक्षितस्यकृत्स्नप्रपंचस्यात्मनिप्रविलापनेत्यर्थः सईश्वरःसन् एवंपुनरन्नादेर्जनकोभवति यस्यानुवित्तः प्रतिबुद्ध आत्मायस्मिन्संदेहे गहनेप्रविष्टः सविश्वकृत्सहिविश्वस्यकर्तातस्यलोकः सउलोकएवेतिश्रुतेः नचेति नकर्मणालिप्यतेपापकेनेतिश्रुतेः सर्वभोगभुजोपिविदुषोनभोगकृतोलेपोस्तीत्यर्थः ११ अन्नशब्दार्थमाह मन

विदुषांबुध्यमानानांस्वंस्वंस्थानंयथाविधि गुणास्तेदेवताभूताः सततंभुंजतेहविः ८ अदन्विद्वानथान्नानिममत्वेनोपपद्यते
आत्मार्थेपाचयन्नन्नंममत्वेनोपपद्यते ९ अभक्ष्यभक्षणंचैवमद्यपानंचहंतितम् सचान्नंहंतितंचान्नंसहत्वाहन्यतेपुनः १०
हंताह्यन्नमिदंविद्वान्पुनर्जनयतीश्वरः नचान्नाज्जायतेतस्मिन्सूक्ष्मोनामव्यतिक्रमः ११ मनसागम्यतेयच्चयच्चवाचानिगद्यते श्रोत्रेणश्रूयतेयच्चचक्षुषायच्चदृश्यते १२ स्पर्शेनस्पृश्यतेयच्चघ्राणेनघ्रायतेचयत् मनःषष्ठानिसंयम्यहवींष्येतानिसर्वशः १३ स्पर्शेनस्पृश्यतेयच्चघ्राणेनघ्रायतेचयत् गुणवत्पावकोमह्यंदीव्यतेंतःशरीरिणः १४ योगयज्ञःप्रवृत्तोमेज्ञानवह्निप्रदोभवः
प्राणस्तोत्रोपानशस्त्रः सर्वत्यागसुदक्षिणः १५ कर्तानुमंताब्रह्मात्मानताध्वर्युकृतस्तुतिः ऋतप्रशास्तातच्छस्त्रमपवर्गोस्यदक्षिणा
१६ ऋचश्चाप्यत्रशंसंतिनारायणविदोजनाः नारायणायदेवाययदविंदन्पशून्पुरा १७

सेत्यादिना १२ मंतव्यादीनांहोमः मन आदिनिग्रहेणेवेत्यर्थः १३ होमाधिष्ठानं गुणवत्पावकः कारणंब्रह्ममह्यंमम १४ योगंयज्ञत्वेनस्तौति ज्ञानमेववह्निः सर्वकर्मदाहकत्वात्तत्प्रदउद्भवोयस्ययोगयज्ञस्यसतथा प्राणःस्तोत्रं अपानःशस्त्रम् अपानसत्रइत्यपपाठः सर्वत्यागसुदक्षिणः सर्वत्यागेनैवसुतरांदक्षिणः फलजननसमर्थः १५ कर्ताहंकारः अनुमंतामनः आत्माबुद्धिः एतत्त्रयंब्रह्मैवसत्क्रमेणहोत्रध्वर्यूद्गातृरूपयोगिनइत्यर्थः प्रशास्तातच्छस्त्रं प्रशास्तुः शंसनं ऋतंसत्यवचनमेवेत्यर्थः अपवर्गःकैवल्यं १६ ऋचःतपआसीद्गृहपतिरित्याद्याः चकारात्तस्यैवंविदुषोयज्ञस्यात्माजमानःश्रद्धापत्नीशरीरमिध्ममुरोवेदिरित्यादिब्राह्मणंच शंसंतियोगयज्ञेप्रमाणत्वेनकथयंतितेमैत्रीया दयः नारायणविदः वेदविद आत्मविदोवा नारायणाय आत्मप्राप्त्यर्थंयत् यदापशून् इंद्रियाणि अविंदन् वश्यत्वेनप्राप्तवंतः १७

तत्र तदा सामानि गायंति आत्मलाभेन हृष्टाः संतः तत्र चाहुः निदर्शनं तैत्तिरीयः एतत्साम गायन्नास्ते हा३ वु हा३ वु हा३ वु अहमन्नमहमन्नमहमन्न
मित्यादि यज्ज्ञानाय पशुजपः यस्मिन् ज्ञाते सामानानि गायंति तं नारायणं देवं निबोध जानीहि १८ इतिश्रीमन्महाभारते आश्वमेधिके पर्वणि टी
कायां पंचविंशोऽध्यायः २५ नारायणस्वरूपमेव कथयति एक इत्यादिना श्रवणादिवनीचादिव प्रणवादित्यपपाठः १ अंतर्यामिरूपेण तस्य शास्तृत्व-
मुक्त्वा गुरुबंधुरूपेणापि तदाह एको गुरुरिति द्वाभ्यां २ स एव शास्त्योपीत्याह एकः श्रोतेति ३ द्विष्टाः द्वेषवंतः ४ अत्र एकस्मिन्नपि शास्तरि शास्यानां
बुद्धिभेदम् ५ देवाश्च ऋषयश्चेति द्वंद्वः ६ प्राद्रवन् प्रतिपेदिरे दिशो बहून्मार्गान् ७ आत्मनः स्वस्य उपदेश ओमित्येकाक्षरं ब्रह्मेति वाक्यं तस्य अ

तत्र सामानि गायंति तत्र चाहुर्निदर्शनम् देवं नारायणं भीरु सर्वात्मानं निबोध तम् १८ इतिश्रीमन्महाभारते आ
श्वमेधिके पर्वणि ब्राह्मणगीतायां पंचविंशोऽध्यायः २५ ब्राह्मण उवाच एकः शास्ता न द्वितीयोऽस्ति शास्ता योहृ
च्छयस्तमहमनुब्रवीमि तेनैव युक्तः प्रवणादिवोदकं यथा नियुक्तोऽस्मि तथा वहामि १ एको गुरुर्नास्ति ततो द्वितीयो यो हृच्छ
यस्तमहमनुब्रवीमि तेनानुशिष्टा बांधवा बंधुमंतः सप्तर्षयः पार्थ दिवि प्रभांति २ एकः श्रोता नास्ति ततो द्वितीयो यो हृच्छय
स्तमहमनुब्रवीमि तस्मिन् गुरौ गुरुवासं निरुष्य शक्रो गतः सर्वलोकामरत्वम् ३ एको द्वेष्टा नास्ति ततो द्वितीयो यो हृच्छय
स्तमहमनुब्रवीमि तेनानुशिष्टा गुरुणा सदैव लोकद्विष्टाः पन्नगाः सर्व एव ४ अत्राप्युदाहरंतीममितिहासं पुरातनम् प्र
जापतौ पन्नगानां देवर्षीणां च संविदम् ५ देवर्षयश्च नागाश्चाप्यसुराश्च प्रजापतिम् पर्यपृच्छन्नुपासीनाः श्रेयो नः प्रोच्य
तामिति ६ तेषां प्रोवाच भगवान् श्रेयः समनुपृच्छताम् ओमित्येकाक्षरं ब्रह्म ते श्रुत्वा प्राद्रवन् दिशः ७ तेषां प्रद्रवमाणा-
नामुपदेशार्थमात्मनः सर्पाणां दंशने भावः प्रवृत्तः पूर्वमेव तु ८ असुराणां प्रवृत्तस्तु दंभभावः स्वभावजः दानं देवा व्यव-
सिता दममेव महर्षयः ९ एकं शास्तारमासाद्य शब्देनैकेन संस्कृताः नानाव्यवसिताः सर्वे सर्पदेवर्षिदानवाः १०

र्थं प्रद्रवमाणानाम् तात्पर्येणानुसरतां तेषां मध्ये सर्पाणां प्रणवोच्चारणे मुखस्य उन्मीलननिमीलनयोरेव दृष्टिं कृत्वा स्वीयस्वभावानुकूलं मुखोन्मी
लननिमीलनसाध्यं दंशनमेव श्रेय इति मन्वानानाम् ८ एवमसुराणामोष्ठचालनमात्रे दत्तदृष्टीनां दंभे जपाद्याभिनयप्रदर्शनरूपो भावो निश्चयः प्रवृत्तः देवा
नां लोके प्रार्थितं ओमित्यनुजानंतीति बुद्ध्या दानं श्रेय इति निश्चिताः महर्षयस्तु ओमित्यस्योच्चारणे ओष्ठप्रहृत्युपसंहारं दृष्ट्वा सर्वप्रवृत्त्युपसंहाररूपं
दमं श्रेयो मेनिरे ९।१०

तस्मात्स्वयमेवस्वस्य गुरुरित्याह शृणोतीति पृच्छतः शिष्यान् प्रतितत् श्रुतं गृहीतंच भूयः श्रावयति ग्राहयतीति च परिणामेणानुषज्ज्ययोज्यम् यए वंविधः अतोन्योगुरुर्नविद्यतेइति संबंधः ११ अयमेवस्वसंस्कार वशात्पापचर्यादिरूपो भवतीत्याह गुरुरित्यादिना १२ १३ १४ १५ तत्रमुख्यब्रह्मचा रिणः आश्रमधर्मलोपेपिनदोषइत्याह ब्रह्मैवसमिधइति १६ क्षेत्रज्ञेनतत्वदर्शिना अनुदर्शनंकारिताः अनुशिष्टाइत्यर्थः १७ इतिश्रीमन्म हाभारते आश्वमेधिकेपर्वणिटीकायांषड्विंशोऽध्यायः २६ ननुपापचर्यादिस्वभाव एवात्मातर्हिकिंब्रह्मचर्येणेत्याशंक्य आत्मनो असंगत्वंप्रतिपा दयितुंवनाध्यायमारभते अध्वानंअतीत्यतत्महादुर्गंवनंप्रविष्टोस्मीत्यन्वयः १ विशेषणबंधकः एकेनैवात्मेतव्योनपुत्र धनादिसहायवनेस्येतद्रूपे

शृणोत्ययंप्रोच्यमानंगृण्हातिचयथातथम् पृच्छतस्तदतोभूयोगुरुरन्योनविद्यते ११ तस्यचानुमतेकर्मततः पश्चात्प्रव र्तते गुरुर्बोद्धाचश्रोताचद्वेष्टाचहृदिनिःसृतः १२ पापेनविचरन्लोकेपापचारीभवत्ययम् १३ कामचारीतुकामेनयदिं द्रियसुखेरतः ब्रह्मचारीसदैवेषयइंद्रियजयेरतः १४ अपेतव्रतकर्मातुकेवलंब्रह्मणिस्थितः ब्रह्मभूतश्चरंल्लोकेब्रह्मचा रीभवत्ययम् १५ ब्रह्मैवसमिधस्तस्यब्रह्माग्निर्ब्रह्मसंभवः आपोब्रह्मगुरुर्ब्रह्मसब्रह्मणिसमाहितः १६ एतदेवेदृशंसूक्ष्मं ब्रह्मचर्यंविदुर्बुधाः विदित्वाचान्वपद्यंतक्षेत्रज्ञेनानुदर्शिताः १७ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणि ब्राह्म णगीतायांषड्विंशोऽध्यायः २६ ब्राह्मणउवाच संकल्पदंशमशकंशोकहर्षहिमातपम् मोहांधकारतिमिरं लोभव्याधिसरीसृपम् १ विषयैकात्ययाध्वानंकामक्रोधविरोधकम् तदतीत्यमहादुर्गंप्रविष्टोस्मिमहद्वनम् २ ब्रा ह्मण्युवाच क्वतद्वनंमहाप्राज्ञकेवृक्षाःसरितश्चकाः गिरयःपर्वताश्चैवकियत्यध्वनितद्वनम् ३ ब्राह्मणउवाच नैतदस्तिपृथक्भावःकिंचिदन्यत्ततःसुखं नतदस्त्यपृथग्भावःकिंचिद्दुःखतरंततः ४

अध्वासंसारमार्गः तांविषयैकात्ययाध्वानं हृतंब्रह्म किंस्विद्वनंकउतवृक्षआसेतिश्रुतोवनवृक्षशब्दयोर्ब्रह्मदेहमदिवाचित्वदर्शनात् २ वनोक्त्यैवाक्षिप्तावृक्षादयोपिपृच्छ्यंतेक्वेति ३ षट्सुप्रश्नेषु आद्यस्योत्तरं नैतदिति ततः पृथग्भावोस्तीतियत् एतन्न ततोन्यत्किंचित्सुखमस्तीतियत् एतन्नेतियोजना सत्तासुखंचसर्वंब्राह्ममेवकार्येषुदृश्यतेनतत्रतद्रूपंपृथगस्ती त्यर्थः ननुब्रह्मैवकार्याकारमभून्नेत्याह नैतदिति ततःअपृथक् अभेदेनभावःवियदादिपदार्थोस्तीतियत् एतन्न ब्रह्मजगतोर्नमृद्घटवद्धेतुहेतुमद्भावोपितुशुक्ति रजतवदित्यतस्तयोर्भेदएवनिषिध्यतेनत्वभेदोविधीयते नहिरजतंशुक्तेरतिरिक्तमस्ति नापितयासमानसत्ताकंयेनतदभिन्नंस्यादितिभावः तथाततोवनाद न्यत्स्वर्गादिदुःखतरंदुःखकारकंकर्मास्तीतियत् एतन्न आत्यंतिकदुःखनिवृत्तीच्छुनाश्रमेणापिसंसारमार्गमतीत्यतद्वनंप्रवेष्टव्यमितिभावः ४

५ केषांचित्पंचम्यर्थेषष्ठी ६ ब्रह्मवनंब्रह्मसवृक्ष आसीदिति वनवृक्षयोर्मुख्यामुख्य ब्रह्म भाव दृष्टेस्तयोरधिष्ठाना ध्यस्तभावंविवक्षन्नाह तस्मि
न्वनेइति एतदरण्यरूपमितिच अत्रमहदहंकारपंचतन्मात्राणिसप्तद्रुमास्ते स्तत्संघातरूपो देहोलक्ष्यते तस्य कारणंफलशब्दोदितंयागाद्यपूर्वम्
तस्यापिकारणंदेवतातिथिप्रीतिसाधनत्वादतिथिशब्दोक्तायागक्रिया तस्याः कारणमाश्रम शब्दोदितःक्रिया श्रयःकर्ता अस्यापिकारणंसमाधयः
सम्यगाधीयंतेकर्मस्वभिनिवेश्यंतेजनायेस्तेतथाभूताः रागादयः तेषांमूलंधर्मांतरपरिग्रहलक्षणादीक्षादेहादिधर्मस्वीकाररूपोध्यासः एवंदेहपूर्व-
कोध्यासस्तत्पूर्वकाश्चरागादिदेहांता एवमिदंचक्रमनिशमावर्तमानमात्मसत्तयास्फूर्जदपिनात्मातद्धर्मैरनुरज्यतेइत्यर्थः ७ पंचवर्णानीति पंच

तस्माद्ध्रस्वतरंनास्तिनततोस्तिमहत्तरम् नास्तितस्मात्सूक्ष्मतरंनास्त्यन्यत्तत्समंसुखम् ५ नतत्राविश्यशोचंतिन
प्रहृष्यंतिचद्विजाः नचबिभ्यतिकेषांचित्तेभ्योबिभ्यतिकेचन ६तस्मिन्वनेसप्तमहाद्रुमाश्चफलानिसप्तातिथयश्चसप्त
सप्ताश्रमाःसप्तसमाधयश्चदीक्षाश्चसप्तैतदरण्यरूपम् ७ पंचवर्णानिदिव्यानिपुष्पाणिचफलानिच सृजंतःपादपास्त
त्रव्याप्यतिष्ठंतितद्वनम् ८ सुवर्णानिद्विवर्णानिपुष्पाणिचफलानिच सृजंतःपादपास्तत्रव्याप्यतिष्ठंतितद्वनम् ९
सुरभीणिद्विवर्णानिपुष्पाणिचफलानिच सृजंतःपादपास्तत्रव्याप्यतिष्ठंतितद्वनम् १० सुरभीण्येकवर्णानिपुष्पा
णिचफलानिच सृजंतःपादपास्तत्रव्याप्यतिष्ठंतितद्वनम् ११ बहून्यव्यक्तवर्णानिपुष्पाणिचफलानिच विसृजंतोम
हावृक्षौतद्वनंव्याप्यतिष्ठतः १२

वर्णानि शब्दादिभेदात्पंचरूपाणि पुष्पाणिशब्दाद्यनुभवाः फलानितज्जाः प्रीत्यादयः पादपाः भवं
ति जीवभेदाइतिभेदाद्बहुवचनम् ८ सुवर्णानिश्वेतपीतादिशोभनवर्णवंति द्विवर्णानिसुखदुःखोभयहेतुत्वाद्द्विरूपाणिपादपाश्चसंत्रेष
इंद्रियांतरेष्वप्येतत्तुल्यम् ९ सुरभीणिस्वर्गादीनि द्विवर्णत्वंतत्राप्यविशिष्टम् पादपाः यज्ञादयः १० सुरभीण्येकवर्णानि सुखैकरूपाणि
पादपाः ध्यानादयः ११ बहूनि अतीतानागतवर्तमानानि अव्यक्तवर्णानि अव्यक्तःवर्णः स्वरूपंयेषांतानि मूढानांमनोरथमात्राणि योगिनां
तुसंकल्पात्प्रागव्यक्तवर्णानि महावृक्षौबुद्धिमनसी १२

शन्हिर्गात्मासकमनाइत्यत्रमनः शब्देनबुद्धिमनसीकक्रवस्थानीये इंद्रियाणिसमिधस्त्रहोम्यम् यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्ट-
तितामाहुः परमांगतिमितिश्रुतेः सर्वेषांप्रविलापनंहोमः तेभ्योमनआदिभ्योहुतेभ्यः सप्तमोक्षाःमुक्तिः अपादानबहुत्वस्यमोक्षेष्युपचारात्मोक्षाइतिब-
हुत्वम् ननुमुक्तस्यदीक्षास्थ्योध्यासोस्तिनवा नांत्यः ज्ञानसमकालमेवदेहपातापत्तेः आद्येअध्यासवत उत्क्रमेणदेहांतरोत्पत्तिरनिवार्येत्याशंक्याह फलंति
दीक्षाइति मुक्तानांदीक्षाः फलंस्वेवनतुदेहांतरमारभंते कुतएतत्रयमोगुणाः फलानिविदुषः सत्यपिदेहादिप्रतिभासेकर्तृत्वाभिनिवेशाभावात्दानादिना-
उत्पन्नमप्यपूर्वंनदेहांतरारंभकम् अतएवगुणभूतान्येव अपूर्वाणि कृतार्हितेषामुपयोगः आतिथयः फलाशाः आतिथयोदेवताएवफलाशाः ईश्वरस्येवते-
षांपरार्थेवक्रियानस्वार्थेत्यर्थः तथाचश्रुतिः तस्यपुत्रादायमुपयंतिसुहृदः साधुकृत्यांद्विषंतः पापकृत्यामिति तदाविद्वान्पुण्यपापेविधूयेत्यादि १३

एकोवन्हिःसमनाब्राह्मणोत्रपंचेंद्रियाणिसमिधश्चात्रसंति तेभ्योमोक्षाःसप्तफलंतिदीक्षागुणाः फलान्यतिथयःफलाशाः
१३ आतिथ्यंप्रतिगृण्हंतितत्रतत्रमहर्षयः अर्चितेषुप्रलीनेषुतेष्वन्यद्रोचतेवनम् १४ प्रज्ञावृक्षंमोक्षफलंशांतिच्छायास
मान्वितम् ज्ञानाश्रयंतृप्तितोयमंतःक्षेत्रज्ञभास्करम् १५ येधिगच्छंतितत्संतस्तेषांनास्तिभयंपुनः ऊर्ध्वंचाधश्चतिर्यक्चतस्यनां
तोधिगम्यते १६ सप्तस्त्रियस्तत्रवसंतिसद्यस्त्ववाङ्मुखाभानुमत्योजनित्र्यः ऊर्ध्वंरसानांददतेप्रजाभ्यःसर्वानयथासत्यम
नित्यताच १७ तत्रैवप्रतितिष्ठंतिपुनस्तत्रोपयांतिच सप्तसप्तर्षयःसिद्धावसिष्ठप्रमुखैःसह १८ यशोवर्चोभगश्चैवविजयः
सिद्धितेजसी एवमेवानुवर्ततेसप्तज्योतींषिभास्करम् १९

महर्षयइंद्रियाधिष्ठातारोदेवाः अन्यत्तेभ्योविलक्षणं द्वैतदर्शनाभावात् रो-
चतेदीप्यते १४ प्रज्ञासाक्षात्कारः ज्ञानंआगमाचार्योपदेशम् १५ भयाभावेहेतुमाह उर्ध्वमिति तस्यप्रज्ञावृक्षस्य सर्वस्यचिन्मात्रत्वंपश्यन्भेददर्शनाभावा-
न्नबिभेतीत्यर्थः द्वितीयाद्वैभयंभवतीतिश्रुतेः १६ जीवन्मुक्तस्यैश्वर्यमाह सप्तस्त्रियइति तत्रवृक्षाधिगंतरि स्त्रियोघ्राणादिवृत्तयः सद्योजनित्र्यइत्यस्यसंक-
ल्पसिद्धाइत्यर्थः संकल्पादेवास्यपितरः समुत्तिष्ठंतीतिश्रुतेः अवाङ्मुखाः पुरुषंवशीकर्तुमशक्तत्वेनलज्जिताः भानुमत्यश्चिज्ज्योतिर्मयाः प्रजाभ्यःप्रजाभ्यऊ-
र्ध्वंउत्कृष्टंयथास्यात्तथा सर्वान्रसान्विषयजाल्हादान् आददतेभुंजते ऊर्ध्वत्वमेवाह दृष्टांतेन यथासत्यमनित्यताचेति नित्यानित्ययोर्यावदंतरंतावद्धुद्धम्-
दसत्वयोरित्यर्थः १७ प्राणावाऋषयइतिश्रुतेः सप्तर्षीणामिंद्रियाणांलयोदयस्थानंविद्वानेवेत्याह तत्रैवेति तत्रोपयंतितत्रउद्यंति यः कश्चिद्भूतोभावीवर्त-
मानोवावसिष्ठोतिशयेनवसुमान् १८ यशोयशस्वीवर्चोदीप्तिस्तद्वानित्यादि तेसर्वेएतंभास्करंक्षेत्रज्ञभास्करंअनुवर्ततइत्यर्थः १९ ७ ७

यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यतीत्यस्याः श्रुतेरर्थंसंक्षिपतिगिरयइत्यादिना २० वितानोयोगयज्ञविस्तारः तस्येदंस्थानंवैतानंहार्दाकाशः समुपह्वरे अत्यंतमूढे २१ केयांतीत्यतआह कृशाशाइति २२ अरण्यंप्राप्यमभिप्रेत्यशमंशंसंतीनियोजना शममपिशममेव विद्यारण्यविदःविधैकप्राप्यब्रह्मविदः यथाधीरंबुद्धिगतिमनतिक्रम्येत्यर्थः २३ विदित्वाशास्त्रतोज्ञात्वाऽनुतिष्ठंतिशमादिपराभवंति तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः एवंवित्शांतोदांतउपरतस्तितिक्षुःसमाहितोभूत्वात्मन्येवात्मानंपश्येदित्यादिश्रुतिभ्योनशक्यज्ञानात्कृतकृत्यनेत्यर्थः २४ · इत्याश्वमेधिकेटीकायांसप्तविंशोऽध्यायः २७ एकोवह्निरितिश्लोकोविदुषांकर्तृत्वाभिमानाभावात्कृतेनापिकर्मणाबंधोनास्तीत्युक्तंतद्दृढयतिगंधानित्यादिना भिद्य तक्षेत्रस्था

गिरयःपर्वताश्चैवसंतितत्रसमासतः नद्यश्चसरितोवारिवहंत्योब्रह्मसंभवम् २० नदीनांसंगमश्चैववैतानंसमुपह्वरं स्वात्मतृप्तायतोयांतिसाक्षादेवपितामहम् २१ कृशाशाःसुव्रताशाश्चतपसादग्धकिल्बिषाः आत्मन्यात्मानमाविश्य ब्रह्माणंसमुपासते २२ शममप्यत्रशंसंतिविद्यारण्यविदोजनाः तदारण्यमभिप्रेत्ययथाधीरमजायत २३ एतदेवदृशंपुण्यमरण्यंब्राह्मणाविदुः विदित्वाचानुतिष्ठंतिक्षेत्रज्ञेनानुदर्शिना २४ · इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतायांसप्तविंशोऽध्यायः २७ ब्राह्मणउवाच गंधान्नजिघ्रामिरसान्नवेद्मिरूपंनपश्यामिनचस्पृशामि नचापिशब्दान्विविधान्शृणोमिनचापिसंकल्पमुपैमि किंचित् १ अर्थानिष्टान्कामयतेस्वभावःसर्वान्द्वेष्यान्प्रद्विषतेस्वभावः कामद्वेषावुद्भवतःस्वभावात्प्राणापानौजंतुदेहान्निवेश्य २

भ्यस्यक्षेत्रिकस्यक्षेत्रवृद्धिह्रासाभ्यांदृश्यमानाभ्यामपिनहर्षविषादौभवतएवंविविक्तात्मदर्शिनोगुणकृतैःकर्मभिर्नसंगोस्तीत्यर्थः १ अर्थानिति स्वभावोबुद्ध्यादीनाम् तत्रदृष्टांतःकामेति यथा कामद्वेषयोरुद्भवाभावेपिजंतूनांदेहान्प्राणापानौप्रवेश्यप्रवेशयितर्यनप्रसंधानेपिसुषुप्त्यादौस्वभावादेवप्राणापानौस्वकार्यंअन्नपाकादिकुरुतः एवंबुद्ध्यादेरपिजाग्रत्स्वप्नयोःस्वभावादेवअर्थेषुकामादिमान्भवतिनत्वहमित्यर्थः २

तेभ्यश्चेति बाह्यघ्राणघ्रेयादिभ्योन्यान्स्वाभान् वासनामयान् घ्राण घ्रेयादीन् स्वरूपसाम्येप्येतेषामन्यत्वं एकत्रानुभूतस्यस्मरणादेरन्यत्रप्रसंगा ज्ज्ञेयं तेषुस्वाभेषुनित्यानुगतान् अधिष्ठानगतान्भावान्तइमेसत्याःकामाइत्यादिश्रुतिप्रसिद्धान् तेभ्योन्यान् तेभ्योप्यन्यंभूतात्मानंशरीरे योगिनोलक्षयेरन् घ्राणादिदेवताभ्योप्यांतरमात्मानंजानंत: कथंबाह्येघ्राणादिधर्मैर्लिप्येरन्नित्यर्थः एतदेवस्पष्टयति तस्मिन्भूतात्मनितिष्ठन्शक्तःसक्तोनास्मि असंगोह्ययंपुरुषइतिश्रुतेः ३ ४ एतस्यप्रीताचित्तस्य सत्याःकामाइतिशेषःसत्यकामःसत्यसंकल्पइतिश्रुतेः निरीक्ष्यमाणस्यदृश्यरूपस्यभोगजालंबहूनांघ्राणादीनांस्वभावभूतंसत्विदुषिनसज्जतेसक्तंनभवति कर्मसुक्रियमाणेष्वपिसत्स्वितिशेषः ५ अत्रात्मनोसं

तेभ्यश्चान्यांस्तेषुनित्यांश्चभावान्भूतात्मानंलक्षयेरन्शरीरे तस्मिंस्तिष्ठन्नास्मिशक्तःकथंचित्कामक्रोधाभ्यांजरया मृत्युनाच ३ अकामयानस्यचसर्वकामानविद्विषाणस्यचसर्वदोषान् नमेस्वभावेषुभवंतिलेपास्तोयस्यबिंदोरिवपुष्करेषु ४ नित्यस्यचैतस्यभवंतिनित्यानिरीक्ष्यमाणस्यबहुस्वभावाः नसज्जतेकर्मसुभोगजालंदिवीवसूर्यस्यमयूखजालम् ५ अत्राप्युदाहरंतीममितिहासंपुरातनम् अध्वर्युयतिसंवादंतंनिबोधयशस्विनि ६ प्रोक्ष्यमाणंपशुंदृष्ट्वायज्ञकर्मण्यथाब्रवीत् यतिरध्वर्युमासीनोहिंसेयमितिकुत्सयन् ७ तमध्वर्युःप्रत्युवाचनायंछागोविनश्यति श्रेयसायोक्ष्यतेजंतुर्यदिश्रुतिरियंतथा ८ योह्यस्यपार्थिवोभागःपृथिवींसगमिष्यति यदस्यवारिजंकिंचिदपस्तत्संप्रवेक्ष्यति ९ सूर्यंचक्षुर्दिशःश्रोत्रंप्राणोस्यदिवमेवच आगमेवर्तमानस्यनमेदोषोस्तिकश्चन १० यतिरुवाच प्राणैर्वियोगे छागस्ययदिश्रेयःप्रपश्यसि छागार्थेवर्ततेयज्ञोभवतःकिंप्रयोजनम् ११ अत्रत्वांमन्यतांभ्रातापितामातासखेतिच मंत्रयस्वैनमुन्नीयपरवंतंविशेषतः १२ एवमेवानुमन्येरंस्तान्भवान्द्रष्टुमर्हति तेषामनुमतंश्रुत्वाशक्याकर्तुंविचारणा १३

गत्वे ६ ७ श्रुतिः पशुर्वैनीयमानःसमृत्युंप्रापश्यत्सदेवान्नान्वकामयतैतुंतंदेवा अब्रुवन्नेहिस्वर्गंवैत्वालोकंगमयिष्यामइतिसतथेत्यब्रवीदित्यादिः ८ योहीतिशब्देन सूर्यंतेचक्षुः वातंप्राणः द्यांपृष्ठं अंतरिक्षमात्मा अंगैर्यज्ञंपृथिवीं शरीरैरितिश्रौतिंप्रसिद्धिंद्योतयति आगमे अग्नीषोमीयपशुमालभेतेत्यादौ विधिस्पृष्टेनिषेधानवकाशान्नहिंस्यात्सर्वाभूतानीतिशास्त्रंकाम कृतहिंसाविषयमित्यर्थः १० ११ १२ अन्वे नंमातामन्यतामनुपितानुभ्रातासगर्भ्योनुसखासयूथ्यइतिमंत्रलिंगात्पशोर्मात्राद्यनुमतिरपेक्षितानचसासंभवति तदभावेच हिंसादोषःस्यादेवेत्यर्थः १३

स्वयोनिषुसूर्यंचक्षुर्गमयताद्द्यांश्रोत्रंप्राणमन्ववसृजतादितिलिंगात् १४ १५ अहिंसाप्यशक्यप्रतिज्ञासूक्ष्महिंसाया अपरिहार्यत्वात्तथापिदृष्टबीभत्सांहिंसांत्यजेदेवेत्याह द्वाभ्याम् अहिंसेति १६ १७ १८ उपपातकमभ्यस्तंमहापातकवद्भवेदितिस्मृतेः सूक्ष्मापिहिंसाभ्यासाद्बहुलीभूयबाधतेएवेत्याशयेनाध्वर्युराह भूमेरिति नानुपहत्य भूतानि भोगःसंभवतीतिन्यायाज्जीवतोऽपरिहार्यैवाहिंसेत्यर्थः १९ २० किंकथंत्वंमन्यसे

प्राणाअप्यस्यच्छागस्यप्रापितास्तेस्वयोनिषु शरीरंकेवलंशिष्टंनिश्चेष्टमितिमेमतिः १४ इंधनस्यतुतुल्येनशरीरेणाविचेतसा हिंसानिर्वेष्टुकामानामिंधनंपशुसंज्ञितम् १५ अहिंसासर्वधर्माणामितिवृद्धानुशासनम् यदहिंस्रंभवेत्कर्मतत्कार्यमितिविद्महे १६ अहिंसेतिप्रतिज्ञेयंयदिवक्ष्याम्यतःपरम् शक्यंबहुविधंकर्तुंभवताकार्यदूषणम् १७ अहिंसासर्वभूतानांनित्यमस्मासुरोचते प्रत्यक्षतःसाधयामोनपरोक्षमुपास्महे १८ अध्वर्युरुवाच भूमेर्गंधगुणान्भुंक्षेपिबस्यापोमयान्रसान् ज्योतिषांपश्यसेरूपंस्पृशस्यनिलजान्गुणान् १९ शृणोष्याकाशजान्शब्दान्मनसामन्यसेमतिम् सर्वाण्येतानिभूतानिप्राणाइतिचमन्यसे २० प्राणादाने निवृत्तोसिहिंसायांवर्ततेभवान् नास्तिचेष्टाविनाहिंसांकिंवात्वंमन्यसेद्विज २१ यतिरुवाच अक्षरंचक्षरंचैवद्वैधीभावोयमात्मनः अक्षरंतत्रसद्भावःस्वभावःक्षरउच्यते २२ प्राणोजिह्वामनःसत्त्वंसद्भावोरजसासह भावैरेतैर्विमुक्तस्यनिर्द्वंद्वस्यनिराशिषः २३ समस्यसर्वभूतेषुनिर्ममस्यजितात्मनः समंतात्परिमुक्तस्यनभयंविद्यतेक्वचित् २४ अध्वर्युरुवाच सद्भिरेवेहसंवासःकार्योमतिमतांवर भवतोहिमतंश्रुत्वाप्रतिभातिमतिर्मम २५ भगवन्भगवद्बुद्ध्याप्रतिपन्नोब्रवीम्यहम् अध्वर्युरुवाच व्रतंमन्त्रकृतंकर्तुर्नापराधोस्तिमेद्विज २६ ब्राह्मणउवाच उपपत्त्यायतिस्तूष्णींवर्तमानस्ततःपरम् अध्वर्युरपिनिर्मोहःप्रचचारमहामखे २७

हिंसामितिशेषः २१ यतिरहिंसाप्रकारमसंगिनामाह सद्भावःसद्रूपम् स्वभावः क्षरतरामभावःकालत्रयेप्यसत्त्वम् २२ प्राणादिव्यवहारस्तु रजसामायया सह स्थितः सद्भावएव भ्रांतिविशिष्टंसदेवव्यवहाररूपमित्यर्थः एतैः प्राणादिभिर्मुक्तस्य अतएवनिर्द्वंद्वस्य ज्ञानेनद्वैतकल्पकभ्रांतिबाधात् २३ भयंप्रेत्यखादंतितेचतानितिशास्त्रोक्तं २४ त्वदुपदेशादहमपिमंत्रकृतंव्रतंकुर्वन्नदुष्येइत्याह सद्भिरित्यादिना २५ २६ २७ ५ ५ ५ ५ ६

२८ इत्याश्वमेधिकेटीकायां अष्टाविंशोऽध्यायः २८ इंद्रियजयएवमहच्छौर्यमित्युपोद्घातयत्यध्यायेन अत्रापीति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ एकविंशतिमेधांते मेधोयुद्धयज्ञः यज्ञोवैमेधइतिश्रुतेः यान्येवसंग्रामनामानितानियज्ञनामा

एवमेतादृशंमोक्षंसुसूक्ष्मंब्राह्मणाविदुः विदित्वाचानुतिष्ठंतिक्षेत्रज्ञेनार्थदर्शिना २८ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतायांअष्टाविंशोऽध्यायः २८ ब्राह्मणउवाच अत्राप्युदाहरंतीममितिहासंपुरातनम् कार्तवीर्यस्यसंवादंसमुद्रस्यचभाविनि १ कार्तवीर्यार्जुनोनामराजाबाहुसहस्रवान् येनसागरपर्यंताधनुषानिर्जितामही २ सकदाचित्समुद्रांतेविचरन्बलदर्पितः अवाकिरच्छरशतैःसमुद्रमितिनःश्रुतम् ३ तंसमुद्रोनमस्कृत्यकृतांजलिरुवाचह मामुंचवीरनाराचान्ब्रूहिकिंकरवाणिते ४ मदाश्रयाणिभूतानित्वद्विसृष्टैर्महेषुभिः वध्यंतेराजशार्दूलतेभ्योदेह्यभयंविभो ५ अर्जुनउवाच मत्समोयदिसंग्रामेशरासनधरःक्वचित् विद्यतेतंसमाचक्ष्वयःसमासीतमांमृधे ६ समुद्रउवाच महर्षिर्जमदग्निस्तेयदिराजन्परिश्रुतः तस्यपुत्रस्तवातिथ्यंयथावत्कर्तुमर्हति ७ ततःसराजाप्रययौक्रोधेनमहतावृतः सतमाश्रममागम्यराममेवान्वपद्यत ८ सरामप्रतिकूलानिचकारसहबंधुभिः आयासंजनयामासरामस्यचमहात्मनः ९ ततस्तेजःप्रजज्वालरामस्यामिततेजसः प्रदहन्रिपुसैन्यानितदाकमललोचने १० ततःपरशुमादायसतंबाहुसहस्रिणम् चिच्छेदसहसारामोबहुशाखमिवद्रुमम् ११ तंहतंपतितंदृष्ट्वासमेताःसर्वबांधवाः असीनादायशक्तीश्चभार्गवंपर्यधावयन् १२ रामोपिधनुरादायरथमारुह्यसत्वरः विसृजन्शरवर्षाणिव्यधमत्पार्थिवंबलम् १३ ततस्तुक्षत्रियाःकेचिज्जामदग्न्यभयार्दिताः विविशुर्गिरिदुर्गाणिमृगाःसिंहार्दिताइव १४ तेषांस्वविहितंकर्मतद्भयान्नानुतिष्ठताम् प्रजावृषलतांप्राप्ताब्राह्मणानामदर्शनात् १५ एवंतेद्रविडाभीराःपुंड्राश्चशबरैःसह वृषलत्वंपरिगताव्युत्थानात्क्षत्रधर्मिणः १६ ततश्चहतवीरासुक्षत्रियासुपुनःपुनः द्विजैरुत्पादितंक्षत्रंजामदग्न्योन्यकृंतत १७ एकविंशतिमेधांतेरामंवागशरीरिणी दिव्याप्रोवाचमधुरासर्वलोकपरिश्रुता १८

रामरामनिवर्तस्वकंगुणंतातपश्यसि क्षत्रबंधूनिमान्प्राणैर्विप्रयोज्यपुनःपुनः १९

नीतिनैरुक्तवचनात्युद्धस्यैवनाममेधइति १८ १९

२० २१ २२ इत्याश्वमेधिकेटीकायांऊनत्रिंशोऽध्यायः २९ अत्रहिंसाया अकार्यत्वे १ २ सूक्ष्मेविचारे ३ कर्मशत्रुजयादि उत्सृज्यसूक्ष्म ब्रह्मप्र

तथैवतंमहाभागमृचीकप्रमुखास्तथा पितामहामहाभागोनिवर्तस्वेत्यथाब्रुवन् २० पितुर्वधममृष्यंस्तुरामःप्रोवाचतानृषीन्
नार्हंतीहभवंतोमांनिवारयितुमित्युत २१ पितरऊचुः नार्हसेक्षत्रबंधूंस्त्वंनिहंतुंजयतांवर नेहयुक्तंत्वयाहंतुंब्राह्मणे
नसतानृप २२ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिब्राह्मणगीतायांऊनत्रिंशोऽध्यायः २९ पितरऊचुः
अत्राप्युदाहरंतीममितिहासंपुरातनम् श्रुत्वाचतत्तथाकार्यंभवताद्विजसत्तम १ अलर्कोनामराजर्षिरभवत्सुमहातपाः
धर्मज्ञः सत्यवादीचमहात्मासुदृढव्रतः २ ससागरांतांधनुषाविनिर्जित्यमहीमिमाम् कृत्वासुदुष्करंकर्ममनःसूक्ष्मेसमादधे
३ स्थितस्यवृक्षमूलेषुतस्यचिंताबभूवह उत्सृज्यसुमहत्कर्मसूक्ष्मंप्रतिमहामते ४ अलर्कउवाच मनसोमेबलं
जातंमनोजित्वाध्रुवोजयः अन्यत्रबाणानस्यामिशत्रुभिःपरिवारितः ५ यदिदंचापलात्कर्मसर्वान्मर्त्यांश्चिकीर्षति मनः
प्रतिसुतीक्ष्णाग्रानहंमोक्ष्यामिसायकान् ६ मनउवाच नेमेबाणास्तरिष्यंतिमामलर्ककथंचन तवैवमर्मभेत्स्यंति
भिन्नमर्मामरिष्यसि ७ अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यसि तच्छ्रुत्वाथविचिंत्याथततोवचनमब्रवीत् ८ अल
र्कउवाच आघ्रायसुबहून्गंधांस्तानेवप्रतिगृध्यति तस्मात्घ्राणंप्रतिशरान्प्रतिमोक्ष्याम्यहंशितान् ९ घ्राणउवाच
नेमेबाणास्तरिष्यंतिमामलर्ककथंचन तवैवमर्मभेत्स्यंतिभिन्नमर्मामरिष्यसि १० अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्य
सि तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत् ११ अलर्कउवाच स्वयंस्वादून् रसान्भुक्त्वातानेवप्रतिगृध्यति त
स्माज्जिह्वांप्रतिशरान्प्रतिमोक्ष्याम्यहंशितान् १२ जिह्वोवाच नेमेबाणास्तरिष्यंतिमामलर्ककथंचन तवैवमर्मभे
त्स्यंतिभिन्नमर्मामरिष्यसि १३ अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यसि तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत् १४
अलर्कउवाच स्पृष्ट्वात्वग्विविधान्स्पर्शांस्तानेवप्रतिगृध्यति तस्मात्त्वचंपाटयिष्येविविधैःकंकपत्रिभिः १५

नियत्तुंचिंताबभूवेतिसंबंधः ४ अन्यत्रबाह्यशत्रुभ्यइतिशेषः शत्रुभिरिंद्रियवैरिभिः ५ चिकीर्षतिविक्षेप्तुमिच्छतीत्यर्थः मनःप्रतिहठयोगेन
वायुनिरोधादिनाजेष्यामीत्यर्थः ६ नेमेइतिहठयोगेमृत्युरवश्यंसंभवतीभावः ७ ८ ९ १० ११ १२ १३ १४ १५ ६५ ६५

१६ १७ १८ १९ २० २१ २२ २३ २४ एवंघ्राणादीनांहठेननिग्रहेतत्तदिंद्रियविकलोवासीदित्येवनतुकृतकृत्योभवतीत्यर्थः २५ तपआ

त्वगुवाच नेमेबाणास्तरिष्यंतिमामलर्ककथंचन तवैवमर्मभेत्स्यंतिभिन्नमर्मामरिष्यसि १६ अन्यान्बाणान्समीक्षस्व
येस्त्वंमांसूदयिष्यसि तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत् १७ अलर्कउवाच श्रुत्वातुविविधान्शब्दांस्तान्
वभ्रातिगृध्यति तस्माच्छ्रोत्रंप्रतिशरान्प्रतिमुंचाम्यहंशितान् १८ श्रोत्रंउवाच नेमेबाणास्तरिष्यंतिमामलर्ककथं
चन तवैवमर्मभेत्स्यंतिततोहास्यसिजीवितम् १९ अन्यान्बाणान्समीक्षस्वयेस्त्वंमांसूदयिष्यसि तच्छ्रुत्वासविचिंत्याथत
तोवचनमब्रवीत् २० अलर्कउवाच दृष्ट्वारूपाणिबहुशस्तान्येवप्रतिगृध्यति तस्माच्चक्षुर्हनिष्यामिनिशितैःसा
यकैरहम् २१ चक्षुरुवाच नेमेबाणास्तरिष्यंतिमामलर्ककथंचन तवैवमर्मभेत्स्यंतिभिंन्नमर्मामरिष्यसि २२ अ
न्यान्बाणान्समीक्षस्वयेस्त्वंमांसूदयिष्यसि तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत् २३ अलर्कउवाच इयंनिष्ठा
बहुविधाप्रज्ञयात्वध्यवस्यति तस्माद्बुद्धिंप्रतिशरान्प्रतिमोक्ष्याम्यहंशितान् २४ बुद्धिरुवाच नेमेबाणास्तरिष्यंति
मामलर्ककथंचन तवैवमर्मभेत्स्यंतिभिन्नमर्मामरिष्यसि अन्यान्बाणान्समीक्षस्वयेस्त्वंमांसूदयिष्यसि २५ ब्राह्म
णउवाच ततोलर्कस्तपोघोरंतत्रैवास्थायदुष्करम् नाध्यगच्छत्परंशक्त्याबाणमेतेषुसप्तसु २६ सुसमाहितचेतास्तुसत
तोचिंतयत्प्रभुः सविचिंत्यचिरंकालमलर्कोद्विजसत्तम २७ नाध्यगच्छत्परंश्रेयोयोगान्मतिमतांवरः सएकाग्रंमनः कृत्वानि
श्चलोयोगमास्थितः २८ इंद्रियाणिजघानाशुबाणेनैकेनवीर्यवान् योगेनात्मानमाविश्यसिद्धिंपरमिकांगतः २९ विस्मित
श्चापिराजर्षिरिमांगाथांजगादह अहोकष्टंयदस्माभिःसर्वंबाह्यमनुष्ठितम् ३० भोगतृष्णासमायुक्तैःपूर्वंराज्यमुपासितम्
इतिपश्चान्मयाज्ञातंयोगान्नास्तिपरंसुखम् ३१ इतित्वमनुजानीहिरामममाक्षत्रियान्जहि तपोघोरमुपातिष्ठततःश्रेयो
भिपत्स्यसे ३२ इत्युक्तःसतपोघोरंजामदग्न्यःपितामहैः आस्थितःसुमहाभागोययौसिद्धिंचदुर्गमाम् ३३ इ
तिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतायांत्रिंशोऽध्यायः ३०

लोचनं २६ २७ योगात्राजयोगात्चित्तमात्रनिग्रहरूपात् एकाग्रम् द्रष्टृदृश्योपरक्तंचित्तंसर्वार्थं तदभावेस्वरूपमात्रनिष्ठंत्वेकाग्रं २८ आ
त्मानंपरंब्रह्म २९ ३० ३१ अनुजानीहि अस्मदुपदेशमनुसाक्षात्कुरुयोगबलेन ३२ ३३ इत्याश्वमेधिकेटीकायांत्रिंशोऽध्यायः ३०

दंतास्तालुचेतिश्लोकोक्तं हृदयाख्यंब्रह्मप्रतिपाद्यहृदयबंधनाख्यंगुणत्रयंसुमुक्षूणांहेयमाह त्रयइत्यादिनागुणाइतिशेषः गुणतः वृत्तिभेदात् इष्टप्रा
प्तिनिश्चयेयत्सुखं सप्रहर्षः इष्टप्राप्तौयत् सुखंसाप्रीतिः इष्टभोगेयत् सुखंसआनंदः १ अभिसंरंभोद्वेषाभिनिवेशः २ निकृत्यच्छित्वा बाणसंघैः
शमादिभिः ३ ४ दोषुषुरागादिषु साधुषुशमादिषु ५ ६ ७ निम्नानिनीचकर्माणि ८ ९ १० ११ राज्यंआप्नोति इतिशेषः आप्नोतिस्वाराज्यमि

ब्राह्मणउवाच त्रयोवैरिपवोलोकेनवधागुणतःस्मृताः प्रहर्षःप्रीतिरानंदस्त्रयस्तेसात्विकागुणाः १ तृष्णाक्रोधो-
भिसंरंभोराजसास्तेगुणाःस्मृताः श्रमस्तंद्राचमोहश्चत्रयस्तेतामसागुणाः २ एतान्निकृत्यधृतिमान्बाणसंघैरतंद्रितः जेतुं
परानुत्सहते प्रशांतात्माजितेंद्रियः ३ अत्रगाथाःकीर्तयंतिपुराकल्पविदोजनाः अंबरीषेणयागीताराज्ञापूर्वंप्रशाम्यता ४ समु
दीर्णेषुदोषेषुबुध्यमानेषुसाधुषु जग्राहतरसाराज्यमंबरीषोमहायशाः ५ सन्निगृह्यात्मनोदोषान्साधून्समभिपूज्यच ज
गाममहतींसिद्धिंगाथाश्चेमाजगादह ६ भूयिष्ठंविजितादोषानिहताःसर्वशत्रवः एकोदोषोवरिष्ठश्चवध्यःसन्नहतोमया ७
यत्प्रयुक्तोजंतुरयंवैतृष्ण्यंनाधिगच्छति तृष्णार्तइहनिम्नानिधावमानोनबुध्यते ८ अकार्यमपियेनेहप्रयुक्तःसेवतेनरः तं
लोभमसिभिस्तीक्ष्णैर्निकृंतंतंनिकृंतत ९ लोभाद्धिजायतेतृष्णाततश्चिंताप्रवर्तते सलिप्समानोलभतेभूयिष्ठंराजसान्गु
णान् तदवाप्तौतुलभतेभूयिष्ठंतामसान्गुणान् १० सतैर्गुणैःसंहतदेहबंधनःपुनःपुनर्जायतिकर्मचेहते जन्मक्षये-
भिन्नविकीर्णदेहोमृत्युंपुनर्गच्छतिजन्मनेव ११ तस्मादेतंसम्यगवेक्ष्यलोभंनिगृह्यधृत्यात्मनिराज्यमिच्छेत् एतद्राज्यंनान्य
दस्तीहराज्यमात्मैवराजाविदितोयथावत् १२ इतिराज्ञांबरीषेणगाथागीतायशस्विना आधिराज्यंपुरस्कृत्यलोभमेकंनिकृंत
ता १३ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतासुएकत्रिंशोऽध्यायः ३१ ब्राह्मणउवाच अ
त्राप्युदाहरंतीममितिहासंपुरातनम् ब्राह्मणस्यचसंवादंजनकस्यचभाविनि १ ब्राह्मणंजनकोराजासन्नंकस्मिंश्चिदागसि
विषयेमेनवस्तव्यमितिशिष्ट्यर्थमब्रवीत् २ इत्युक्तःप्रत्युवाचाथब्राह्मणोराजसत्तमम् आचक्ष्वविषयंराजन्यावांस्तववशे
स्थितः ३

निश्रुतेःस्वराज्याख्यं परमानंदम् १२ १३ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीकायांएकत्रिंशोऽध्यायः ३१ ममे
तिद्व्यक्षरोमृत्युरित्युक्तंतत्रममतायाविषयएवनास्तीति जनकब्राह्मणसंवादेनाहात्रापीत्यादिना अत्रलोभेनिकृंतनीये १ २ ३

४ ५ ६ ७ धिन्नितिविषयंविशेषेणसिनोतिबध्नाति तंबंधकंममतास्पदंनाभिगच्छामिविचिन्वन् अन्वेषमाणोपि अयंभावः पृथिवीमिथिलाप्र-
जोपलक्षितंराज्यंशरीरस्कस्मादिकंअवस्थांतरेषुव्यभिचरन्सन् नात्मसंबंधितामश्नुते यथानीलपीतलोहितोपाधिषुसंचरन्स्फटिकः नीलादिवर्जि-
नः तद्वत् तस्माद्विचारतोदृश्यत्वादिनास्वमवन्निस्था लाद्व्यभिचारित्वाच्चनात्मातैः संबंध्यत इत्यर्थः ८ ९ १० आत्मापिदेहोपीतिप्राचः वस्तुतस्तु
अयमपिममआत्मानभवतीतिसंबंधः अयमितिसाभासोहंकारःसर्वेषामात्मत्वेनप्रसिद्धोममआत्मास्वरूपंनभवतिमुकुरमुखवत् आभासत्वात् स

सोन्यस्यविषयेराज्ञोवस्तुमिच्छाम्यहंविभो वचस्तेकर्तुमिच्छामियथाशास्त्रंमहीपते ४ इत्युक्तस्तदाराज्ञाब्राह्मणे
नयशस्विना मुहूरुष्णंविनिश्वस्यनकिंचित्प्रत्यभाषत ५ तमासीनंध्यायमानंराजानममितौजसम् कश्मलंसहसागच्छ-
द्भानुमंतमिवग्रहः ६ समाश्वास्यततोराजाविगतेकश्मलेतदा ततोमुहूर्तादिवतंब्राह्मणंवाक्यमब्रवीत् ७ जनकउवा-
च पितृपैतामहेराज्येवश्येजनपदेसति विषयंनाधिगच्छामिविचिन्वन्पृथिवीमहम् ८ नाध्यगच्छंयथापृथ्व्यांमिथिला
मार्गितामया नाध्यगच्छंयदातस्यांस्वप्रजामार्गितामया ९ नाध्यगच्छंयदातस्यांतदामेकश्मलोभवत् ततोमेकश्मलस्यांतेम
तिःपुनरुपस्थिता १० तदानविषयंमन्येसर्वोवाविषयोमम आत्मापिचायंनममसर्वावापृथिवीमम ११ यथाममतथान्येषा
मितिमन्येद्विजोत्तम उष्यतांयावदुत्साहोभुज्यतांयावदिष्यते १२ ब्राह्मणउवाच पितृपैतामहेराज्येवश्येजनपदेस
ति ब्रूहिकांमतिमास्थायममत्वंवर्जितंत्वया १३ कांवैबुद्धिंसमाश्रित्यसर्वोवैविषयस्तव नावैषिविषयंयेनसर्वोवाविषयस्तव
१४ जनकउवाच अंतवंतइहावस्थाविदिताःसर्वकर्मसु नाध्यगच्छमहंतस्मान्ममेदमितियद्भवेत् १५ कस्येदमिति
कस्यस्वमितिवेदवचस्तथा नाध्यगच्छमहंबुद्ध्याममेदमितियद्भवेत् १६ एतांबुद्धिंसमाश्रित्यममत्वंवर्जितंमया शृणुबुद्धिंच
यांज्ञात्वासर्वत्रविषयोमम १७

र्वावापृथिवीसर्वंदृश्यंमम आत्मामदनन्यत्वात् मुकुरमुखवदेव अयमेवन्यायोब्रह्मादिषुत्रिकांतेष्वित्याह यथेति
मायामनइंद्रियदर्पणेषुहिप्रतिबिंबितोह्यदृश्य आत्माईशसूत्रविराडात्मनादृश्योनात्माचभवतिनवस्तुत इत्यर्थः ११ १२ १३ १४ आढ्यत्वदरिद्रत्वादयोव
स्थाः १५ कस्येदमितिनकस्यचिदित्यर्थः अत्रमागृधः कस्यस्विद्धनमितिश्रुतिंप्रमाणयति १६ आद्यत्वादेरंतवत्त्वाद्गंधादिषुममतामयात्यक्तेत्याह एता
मिति देवाद्यर्थमेवविष्टिगृहीतस्यचममगंधादीनामिच्छानात्मभोगार्थं अतोभूम्यादयएवममवशोतिभ्रांतिनत्वहंतेषामित्याहश्रृणुइत्यादिना १७ ७

१८ १९ २० २१ २२ २३ २४ २५ त्वमस्येति अस्यचक्रस्य आत्मापि नायंनमम सर्वावापृथिवीममेत्येवंरूपस्य धीसा धनवलापस्यब्रह्मलाभहेतोः दु
र्वारस्य अनेकांतिकस्य अनिवर्तिनः आत्यंतिकस्य सत्वनेमिनासत्वगुणरूपेणावरणेनचक्रधारास्थानीयेननिरुद्धस्यप्रवर्तकोमुख्यानुष्ठानं। २६ इ
त्याश्वमेधिकेपर्वणिटीकायांद्वात्रिंशोऽध्यायः ३२ समासाब्रह्मविद्यासमाधनांजीवन्मुक्तस्यवस्थामाह नाहमित्यादिना तथेतियथादेहात्मवादिनः

नाहमात्मार्थमिच्छामिगंधान्घ्राणगतानपि तस्मान्मेनिर्जिताभूमिर्वशेतिष्ठतिनित्यदा १८ नाहमात्मार्थमिच्छामिरसाना
स्येपि वर्तनः आपोमेनिर्जितास्तस्माद्वशेतिष्ठंतिनित्यदा १९ नाहमात्मार्थमिच्छामिरूपंज्योतिश्चचक्षुषः तस्मान्मेनिर्जितं
ज्योतिर्वशेतिष्ठतिनित्यदा २० नाहमात्मार्थमिच्छामिस्पर्शान्त्वचिगतांश्चये तस्मान्मेनिर्जितोवायुर्वशेतिष्ठतिनित्यदा २१ ना
हमात्मार्थमिच्छामिशब्दान्श्रोत्रगतानपि तस्मान्मेनिर्जिताःशब्दावशेतिष्ठंतिनित्यदा २२ नाहमात्मार्थमिच्छामिमनोनित्यं
मनोंतरे मनोमेनिर्जितंतस्माद्वशेतिष्ठतिसर्वदा २३ देवेभ्यश्चपितृभ्यश्चभूतेभ्योऽतिथिभिःसह इत्यर्थंसर्वएवेतिसमारंभाभ
वंतिवै २४ ततःप्रहस्यजनकंब्राह्मणःपुनरब्रवीत् त्वज्जिज्ञासार्थमद्येहविद्धिमांधर्ममागतम् २५ त्वमस्यब्रह्मलाभस्यदुर्वा
रस्यानिवर्तिनः सत्वनेमिनिरुद्धस्यचक्रस्यैकःप्रवर्तकः २६ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिब्राह्मणगीतायां
द्वात्रिंशोऽध्यायः ३२ ब्राह्मणउवाच नाहंतथाभीरुचरामिलोकेयथात्वंमांतर्जयसेस्वबुध्द्या विप्रोस्मिमुक्तोस्मिव
नेचरोस्मिगृहस्थधर्माव्रतवांस्तथास्मि १ नाहमस्मियथामांत्वंपश्यसेचक्षुषाशुभम् मयाव्याप्तमिदंसर्वंयत्किंचिज्जगतीगतिम्
२ येकेचिज्जंतवोलोकेजंगमास्थावराश्चह तेषामामंतकंविद्धिदारूणामिवपावकम् ३ राज्यंपृथिव्यांसर्वस्यामथवापित्रिविष्ट
पे तथाबुद्धिरियंवेत्तिबुद्धिरेवधनंमम ४ एकःपंथाब्राह्मणानांयेनगच्छंतितद्विदः गृहेषुवनवासेषुगुरुवासेषुभिक्षुषु ५
लिंगैर्बहुभिरव्यग्रैरेकाबुद्धिरुपास्यते नानालिंगाश्रमस्थानांयेषांबुद्धिःशमात्मिका ६ तेभावमेकमायांतिसरितःसाग
रंयथा बुध्द्यायंगम्यतेमार्गःशरीरेणनगम्यते ७ आद्यंतवंतिकर्माणिशरीरंकर्मबंधनम् ८

पश्यसेकर्मव्यतिहारेतङ् त्वदृष्ट
रंमांत्वंस्वदृष्ट्यायथासंगिनंपश्यसितथानाहमस्मीत्यर्थः १ आत्मनःसर्वात्मत्वंसर्वस्यचात्ममात्रत्वंज्ञानफलंप्रतिपादयतिसार्द्धेनमयेति २ ३
आप्नोतिस्वाराज्यमित्यादिश्रुत्यर्थंसंगृण्हातिराज्यमिति ४ एकःपंथाःज्ञानरूपोनान्यः ब्राह्मणानांब्रह्मविदाम ५ ६ ७ ८ ५ ७

स्मभगेईश्वरि शरीरबंधनिर्मुक्तत्वात् परलोकः अनात्मलोकः तद्भावोमदात्मभावः तस्यभावोभावना ९ इत्याश्वमेधिकेटीकायांत्रयस्त्रिंशोऽध्यायः ३३. उक्तमर्थंसंक्षिपतिनेदमिति १ मन्येजानीयाम् २ ब्राह्मणींबुद्धिंतपः मनननिदध्यासनात्मकमालोचनम् श्रुतंवेदांतश्रवणम् आत्मावा अरेद्रष्टव्यः श्रोतव्योमंतव्योनिदध्यासितव्यइति आत्मदर्शनानुवादेनश्रवणादिविधानात् ३ आक्षेपपूर्वकंज्ञेयस्वरूपमाह यदिदमित्यादिना यदिदमपरोक्षंक्षेत्रज्ञइतिसंज्ञितंजीवाख्यंससंगंरूपंनतत्ब्रह्मणोऽसंगस्य लिंगंस्वरूपमितियत्तत्क्व नुनकथंचनजीवस्यब्रह्मभावःसंभवतीत्यर्थः अत्रोपपत्तिमाह ग्रहीतुमितियत् येननिग्रहीतुंशक्यंतत् नियाम्यंतस्यानिग्रहीतुर्लक्षणंस्वरूपंइतिक्वनुदृष्टंनक्वापीत्यर्थः यआत्मानमंतरोयमयतीतिजीवेशयोर्नियम्यनियामकत्वश्रवणात् भृत्यमंत्रोरिवनतयोरभेदसंभावनापीतिभावः ४ उत्तरमाह अलिंगइति योयंक्षेत्रज्ञउक्तः

तस्मात्तेसुभगेनास्तिपरलोककृतंभयम् तद्भावभावनिरतामेवात्मानमेष्यसि ९ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतायांत्रयस्त्रिंशोऽध्यायः ३३ ब्राह्मण्युवाच नेदमल्पात्मनाशक्यंवेदितुंनाकृतात्मना बहुचाल्पंचसंक्षिप्तंविप्लुतंचमतंमम १ उपायंतंममब्रूहियेनैषालभ्यतेमतिः तन्मन्येकारणंत्वत्तो यतएषाप्रवर्तते २ ब्राह्मणउवाच अरणींब्राह्मणींविद्धिगुरुरस्योत्तरारणिः तपःश्रुतेऽभिमथ्नीतोज्ञानाग्निर्जायतेततः ३ ब्राह्मण्युवाच यदिदंब्रह्मणोलिंगंक्षेत्रज्ञइतिसंज्ञितम् ग्रहीतुंयेनयच्छक्यंलक्षणंतस्यतत्क्वनु ४ ब्राह्मणउवाच अलिंगोनिर्गुणश्चैवकारणंनास्यलक्ष्यते उपायमेववक्ष्यामियेनगृह्येतवानवा ५ सम्यगुपायोदृष्टश्चभ्रमरैरिवलक्ष्यते कर्मबुद्धिरबुद्धत्वाज्ज्ञानलिंगैरिवाश्रितम् ६

सःलिंगएवंरूपइतिनिर्देशयोग्यंस्वरूपंतद्रहितःयतोनिर्गुणः अस्यसगुणत्वंसालिंगत्वंचविनैवकारणंभ्रांत्यैवभातिनसत्यंविद्यतइत्यर्थः भ्रांत्यपगमेनतदधिगमेउपायमेववक्ष्यामि नवेतिचित्तशल्यभावे ५ सम्यगुपायोदृष्टश्चपूर्वोक्ताःश्रवणादयः तैःभ्रमरैरुपरिभ्रमद्भिरधःस्थंअगृहीतमपिस्फुरभिद्रव्यंलक्ष्यते एवंश्रवणादिभिरात्मालक्षणद्वारेणलक्ष्यतइत्यर्थः कोसावुपायःकर्मबुधिः कर्मशोधिताबुद्धिः कर्मभिरशोधितायांबुद्धौश्रवणाद्यभ्याससहस्रेणापिनगम्यतइतिभावः अबुद्धित्वादुक्तविधबुद्धिराहित्यात् मूढाअसंगमपिक्षेत्रज्ञंज्ञानलिंगैर्बुद्ध्यादिभिराश्रितंसंगिनमिवमन्यंते तद्रूक्तउपायेनश्रवणादिजन्ययाबुद्ध्यालक्ष्यतइतिसंबंधः ६ छ छ

नेदंब्रह्मज्ञानंविधिनिषेधप्रधानं अहेयानुपादेयप्रत्यगात्मविषयत्वात् तथात्वेवास्वरूपनाशानित्यत्वेदुरपन्हवेस्यातां अपितुरज्जुदर्शनप्रशमत्वश्रव
णाभ्यांसर्पादर्शनत्वयोरिवबुध्यावावाक्येनवाविद्याध्यारोपितकार्यकारणप्रपंचस्यनिराकरणसापेक्षमित्याह इदंकार्यमितिमोक्षेष्विति बहुवचनंमुमुक्ष
प्रादानंभूतबुध्यादितत्त्वभेदात् ७ तेचयावंतः पंचसप्तएकादशत्रयोदशवातेषांप्रत्येकंव्यक्तिभेदात् शतशः सहस्रशोवाकल्पनीयाइत्याह यावंतइति अ
व्यक्तान्मायाविद्यादिरूपान् व्यक्तरूपान् शब्दादीन् उपेयप्रतिपत्त्यर्थाउपायाअव्यवस्थिताइतिन्यायेनशिष्यबोधार्थंमंदमध्यमोत्तमाधिकारिभेदेनव्य
ष्टिमात्रकल्पनयावासमष्टिमात्रकल्पनयावातत्त्वमर्थयोरभेदंप्रत्यापयेन्नात्रवस्तुतोनानात्मपदार्थाः संति येनमोक्षापादानानितार्किकादिवत्संख्यया

इदंकार्यमिदंनेतिनमोक्षेषूपदिश्यते पश्यतःशृण्वतोबुद्धिरात्मनोयेषुजायते ७ यावंतइहशक्येरंस्तावतोंशा
न्प्रकल्पयेत् अव्यक्तान्व्यक्तरूपांश्चशतशोथसहस्रशः ८ सर्वान्नानार्थयुक्तांश्चसर्वान्प्रत्यक्षहेतुकान् यतःपरंन-
विद्येततोभ्यासेभविष्यति ९ श्रीभगवानुवाच ततस्तुतस्याब्राह्मण्यामतिःक्षेत्रज्ञसंक्षये क्षेत्रज्ञानेनपरतः
क्षेत्रज्ञेभ्यःप्रवर्तते १० अर्जुनउवाच क्वनुसाब्राह्मणीकृष्णक्वचासौब्राह्मणर्षभः याभ्यांसिद्धिरियंप्राप्ताता
वुभौवदमेच्युत ११ श्रीभगवानुवाच मनोमेब्राह्मणंविद्धिबुद्धिंमेविद्धिब्राह्मणीं क्षेत्रज्ञइतियश्चोक्तःसो
हमेवधनंजय १२ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतायांचतुस्त्रिंशोऽध्यायः ३४ ७

परिच्छिंद्येरन्नित्यर्थः ८ ९ ततइतिप्रथमार्थेतसिः यतःपरंअन्यन्नास्तितद्रूपःभविष्यत्याधिकारी अभ्यासेशमाद्यभ्यासेपुष्कलेसति अत्रकं
ठगतविस्मृतचामीकरवद्ब्रह्मप्राप्तिः भवनंनोत्पाद्यत्वेनानित्यत्वापत्तेः ब्रह्मैवसन्ब्रह्माप्येतितत्त्वमसीत्यादिवाक्येभ्यः सिद्धवद्ब्रह्मभावश्रव
णादित्यर्थः क्षेत्रज्ञसंक्षयेजीवस्यपरमात्मनि प्रविलापनेक्षेत्रज्ञानेनैवक्षेत्रज्ञात्परं ज्ञायतइत्याह क्षेत्रेति क्षेत्रज्ञएवोपाधिविलयाद्ब्रह्मैवा
स्तीत्यर्थः १० ११ मनोमेचित्प्रतिबिंबगर्भंमनोजीव इत्यर्थः मनोमुक्तःक्षेत्रज्ञोहमेवब्रह्मैवेत्यर्थः १२ इतिश्रीमन्महाभारतेआश्व
मेधिकेपर्वणिनीलकंठकृतोभावार्थप्रकाशटीकायांचतुस्त्रिंशोऽध्यायः ३४ ५ ५ ५ ५ ५

पूर्वाध्यायांतेमनोमेब्राह्मणंविद्धिबुद्धिंमेविद्धिब्राह्मणीं क्षेत्रज्ञइतियश्चोक्तः सोहमेवधनंजयेतिमनोबुद्ध्योर्ब्रह्मवित्त्वेनतदुपलक्षितसकल
करणप्रकाश्यमर्थजातंब्रह्मेत्युक्तंयश्चतयोः साक्षीसच्चिदात्माहमितिचदर्शितम् तत्रप्रपंचःसाक्षिचित्स्फुभयमपिपरंब्रह्मउततयोरन्यतरंयत्परं
ब्रह्मतन्मेवदेत्यर्जुनउवाच ब्रह्मयदिति आद्येपक्षेसप्रपंचंब्रह्मज्ञेयंद्वितीयेनिष्प्रपंचमिति तत्रसूक्ष्मेनिष्प्रपंचेएवमेमनोरमतइतिस्वनिष्ठां
कथयति तेनसतांहिसंदेहपदेषुवस्तुषुप्रमाणमंतःकरणस्यप्रवृत्तयइति न्यायेननिष्प्रपंचमेवशास्त्रार्थइतिज्ञापयति १ मोक्षसंयुक्तंयस्मि

अर्जुनउवाच ब्रह्मयत्परमंज्ञेयंतन्मेव्याख्यातुमर्हसि भवतोहिप्रसादेनसूक्ष्मेमेरमतेमतिः १ वासुदेवउवाच
अत्राप्युदाहरंतीममितिहासंपुरातनम् संवादंमोक्षसंयुक्तंशिष्यस्यगुरुणासह २ कश्चिद्ब्राह्मणमासीनमाचार्यंसंशि
तव्रतम् शिष्यःपप्रच्छमेधावीकिंस्विच्छ्रेयःपरंतप ३ भगवंतंप्रपन्नोहंनिःश्रेयसपरायणः याचेत्वांशिरसाविप्रयद्ब्रूयां
ब्रूहितन्मम ४ तमेवंवादिनंपार्थशिष्यंगुरुरुवाचह सर्वंतुतेप्रवक्ष्यामियत्रवैसंशयोद्विज ५ इत्युक्तःसकुरुश्रेष्ठगुरुणा
गुरुवत्सलः प्रांजलिःपरिपप्रच्छयत्तच्छृणुमहामते ६ शिष्यउवाच कुतश्चाहंकुतश्चत्वंतत्सत्यंब्रूहियत्परम्
कुतोजातानिभूतानिस्थावराणिचराणिच ७ केनजीवंतिभूतानितेषामायुश्चकिंपरम् किंसत्यंकिंतपोविप्रकेगुणाः
सद्भिरीरिताः ८ केपंथानःशिवाश्चस्युःकिंसुखंकिंचदुष्कृतम् एतान्मेभगवन्प्रश्नान्याथातथ्येनसुव्रत ९ वक्तुमर्ह
सिविप्रर्षेयथावदिहतत्त्वतः त्वदन्यःकश्चनप्रश्नानेतान्वक्तुमिहार्हति १० ब्रूहिधर्मविदांश्रेष्ठपरंकौतूहलंमम मोक्ष
धर्मार्थकुशलोभवाँल्लोकेषुगीयते ११ सर्वसंशयसंछेत्तात्वदन्योनचविद्यते संसारभीरवश्चैवमोक्षकामास्तथावयम् १२
वासुदेवउवाच तस्मैसंप्रतिपन्नाययथावत्परिपृच्छते शिष्यायगुणयुक्तायशांतायप्रियवर्तिने १३ छायाभूताय
दांताययततेब्रह्मचारिणे तान्प्रश्नानब्रवीत्पार्थमेधावीसधृतव्रतः गुरुःकुरुकुलश्रेष्ठसम्यक्सर्वानरिंदम १४

न्नश्रुतेसद्योमुक्तिरे
वलभ्यतइत्यर्थः २ ३ ब्रूयांपृच्छामि ४ ५ ६ अहंत्वंइतिशास्यशासनकर्त्रोर्जीवेश्वरयोःप्रश्नः यत्त्वताभ्यांपरंअन्यत्सत्यंअबाधितंवस्तुतदपिब्रूहि
भूतानिवियदादीनिस्थावरादीनिभौतिकानि ७ भूतानिउभयविधानि किंपरमवसानंयस्यतत् किंतेषांलयस्थानमित्यर्थः किंसत्यंअबाधितफ
लंकर्म तपःक्रियारूपंकायिकादिभेदेनात्रिविधं गुणाःसत्वादयःकिंस्वरूपाइत्यर्थः ८ सुखंमुख्यं प्रश्नान्वक्तुमर्हसीतिसंबंधः ९ कश्चकोपि १० ११
१२ १३ १४

स्ववाक्येश्रद्धोत्पादनार्थमारव्यांयिकामुखेन उत्तरयति ब्रह्मणेति इदंत्वयापृष्टं वेदविद्यांसमाश्रित्य नतुस्वकल्पितां तत्वभूतस्य अबाधितस्यार्थस्य
भावनंविचारोयस्मिन्नतत् १५ ज्ञानंपरंब्रह्मविषयंउत्तमं तथातपःसंन्यासाख्यंउत्तमं ज्ञानतत्वंज्ञानस्य तत्त्वंयाथार्थ्यंघटादितत्वज्ञानव्यावृत्तये
निराबाध्यमितिनिर्गतः आसमंतात् बाधोयस्मात् तद्धिब्रह्मज्ञानबाध्यंनतथेतादित्यर्थः यश्चएतत्सर्वंसर्वभूतस्थंचआत्मानंसंप्रज्ञातावस्थायांवे
दससर्वगतिः सर्वकामभाक्भवति तेषांसर्वेषुलोकेषुकामचारोभवतीतिश्रुतेः सार्द्धश्लोकवाक्यं १६सहसंवासंनिर्ज्जडयोरेकलोलीभावंसंप्रज्ञातंवि-
वासंतयोः पृथक्त्वंशब्दत्वंपदार्थदर्शने एकत्वंईश्वरादभेदंतस्यैवनानात्वंतयोर्भिन्नत्वव्यवहारे १७ नकामयतेइतिममकाराभावः नाभिमन्यतइ-
त्यभिमानाहंकारस्तदभावः तयोःसतोःजीवन्नेवमुच्यतइत्यर्थः १८ प्रधानंमाया गुणाःसत्वादयः तेषांतत्वंकल्पिततत्वस्वरूपयाथात्म्यं सर्वभूतानां

गुरुरुवाच ब्रह्मणोक्तमिदंसर्वमृषिप्रवरसेवितम् वेदविद्यांसमाधायतत्वभूतार्थभावनम् १५ ज्ञानंत्वेवपरंब्र
ह्मसंन्यासंतपउत्तमम् यस्तुवेदनिराबाधंज्ञानतत्वंविनिश्चयात् सर्वभूतस्थमात्मानंससर्वगतिरिष्यते १६ योविद्वा
न्सहसंवासंविवासंचैवपश्यति तथैवैकत्वनानात्वंसदुःखात्परिमुच्यते १७ योनकामयतेकिंचिन्नकिंचिदभिमन्यते इ
हलोकस्थएवैषब्रह्मभूयायकल्पते १८ प्रधानगुणतत्वज्ञःसर्वभूतविधानवित् निर्ममोनिरहंकारोमुच्यतेनात्रसंश
यः १९ अव्यक्तबीजप्रभवोबुद्धिस्कंधमयोमहान् महाहंकारविटपइंद्रियांकुरकोटरः २० महाभूतविशेषश्चविशेषप्रति
शाखवान् सदापर्णःसदापुष्पःसदाशुभफलोदयः २१ आजीवःसर्वभूतानांब्रह्मबीजःसनातनः एतज्ज्ञात्वाचतत्वेनज्ञा
नेनपरमासिना छित्वाचामरतांप्राप्यजहातिमृत्युजन्मनी २२

विधानंविधीयते उत्पाद्यतेनेनेतिविधानंकारणम् तदुभय-
तोमुच्यते १९ अव्यक्तंअज्ञानं तदेवबीजप्रभवोमूलं अंकुरश्चयस्य बुद्धिर्महत्तत्वं तदेवस्कंधायस्य अहंकारोविटपाः पल्लवायस्य इंद्रियाण्ये
व अंकुरा अनर्थवल्लीपूर्वरूपभूताः कोटरेषुच्छिद्रेषुयस्य २० महाभूतानिवियदादीनिविशेषस्तिलकपुष्पकोरकस्थानीयोयस्येत्यर्थः
विशेषाः स्थूलकार्याणितान्येवप्रतिशाखाउपशाखाः तद्वान् पर्णंउत्पद्यपतनशीलःसंकल्पः पुष्पंकर्मफलंसुखादि २१ एततबीजभूतंब्रह्म
ज्ञात्वातत्वानि अव्यक्तादीनिज्ञानेनच्छित्वेतिनेषामज्ञानकार्यत्वंरज्जूरगवदुक्तं जहातित्यजतिसार्द्धश्लोकः एतेनऊर्ध्वमूलार्थःस्मारि
तः २२

भूतेतिभूरादय आदिपदार्थाः तेषामर्थानांनिश्चयः स्वरूपावधारणंयस्मिन् तंपुराकल्पंबहुकर्तृकमन्वाख्यानं २३ पदंपदनीयं अधिगंतव्यंसंसिद्धाः
मुक्ताः २४ पुराकल्पमेवाह उपगम्येति २५ मार्गान् कर्मगतीः परिक्रम्य पुनःपुनर्गत्वा २६ २७ २८ क्रियात्कुर्वीत केनोस्माकं २९ प्रलयोदेहंदिनादि
भूतलयः अपवर्गः आत्यंतिकोभूतोच्छेदः मोक्षाख्यः प्रभवाप्ययोजन्ममृत्यू ३० यथागमंवेदानुसारि ३१ सत्वात्त्रैकालिकबाधरहितात् ब्रह्मणः भू
तानि अव्यक्तादीनिस्थावराणिवियदादीनिचराणिजरायुजादीनि एतेनकुतश्चाहमितिश्लोकोक्तप्रश्नानामुत्तरमुक्तम् तपसाकर्मणाजीवंतिइतिहेतोः हि

भूतभव्यभविष्यादिधर्मकामार्थनिश्चयम् सिद्धसंघपरिज्ञातं पुराकल्पंसनातनम् २३ प्रवक्ष्येहंमहाप्राज्ञपदमुत्तममद्यते
बुध्वायदिहसंसिद्धाभवंतीहमनीषिणः २४ उपगम्यर्षयःपूर्वंजिज्ञासंतःपरस्परम् प्रजापतिर्भरद्वाजोगौतमोभार्गवस्तथा २५
वसिष्ठःकश्यपश्चैवविश्वामित्रोत्रिरेवच मार्गान्सर्वान्परिक्रम्यपरिश्रांताःस्वकर्मभिः २६ ऋषिमांगिरसंवृद्धंपुरस्कृत्यतुतेद्वि
जाः ददृशुर्ब्रह्मभवनेब्रह्माणंवीतकल्मषं २७ तंप्रणम्यमहात्मानंसुखासीनंमहर्षयः पप्रच्छुर्विनयोपेतानैःश्रेयसमिदंपरम् २८
कथंकर्मक्रियात्साधुःकथंमुच्येतकिल्बिषात् केनोमार्गाःशिवाश्चस्युःकिंसत्यंकिंचदुष्कृतम् २९ कोचोभौकर्मणांमार्गौप्राप्नुयु
र्दक्षिणोत्तरौ प्रलयंचापवर्गंचभूतानांप्रभवाप्ययौ ३० इत्युक्तःसमुनिश्रेष्ठैर्यदाहप्रपितामहः तत्तेहंसंप्रवक्ष्यामिशृणुशिष्य
यथागमं ३१ ब्रह्मोवाच सत्याद्भूतानिजातानिस्थावराणिचराणिच तपसातानिजीवंतिइतितद्वित्तसुव्रताः स्वांयो
निंसमतिक्रम्यवर्तंतेस्वेनकर्मणा ३२ सत्यंहिगुणसंयुक्तंनियतंपंचलक्षणम् ३३ ब्रह्मसत्यंतपःसत्यंसत्यंचैवप्रजापतिः स
त्याद्भूतानिजातानिसत्यंभूतमिदंजगत् ३४ तस्मात्सत्यमयाविप्रानित्यंयोगपरायणाः अतीतक्रोधसंतापानियताधर्मसेतवः
३५ अन्योन्यनियतान्वैधान् धर्मसेतुप्रवर्तकान् तानहंसंप्रवक्ष्यामिशाश्वतान्लोकभावनान् ३६

जाः स्वांयोनिंब्रह्म समतिक्रम्य ध्यान्याच्च्युताः विक्षेपावस्थां प्राप्य स्वकर्मणावर्तंत इतिसार्द्धः ३२ किंसत्यमित्यस्योत्तरमाह गुणसंयुक्तमित्यनेन
निर्गुणंसत्यं एकमेवतत्रभेदहेतोर्गुणस्यैवाभावादितिदर्शितम् ३३ ब्रह्मईश्वरः तपोधर्मः प्रजापतिर्जीवः भूतानिखादीनि जगत् जरायुजादि
एतत् व्यावहारिकंगुणमयंसत्यपंचकम् ३४ यस्मात्तस्मात् सत्यमयाः सत्यप्रधानाः धर्मसेविनोभवंति ३५ अन्योन्यनियतान् परस्परभ
येनधर्मातिक्रमशून्यान् वैधान् विधिवतः तान् विप्रान् प्रतीतिशेषः ३६ ५ ५ ५ ५ ५

चतस्रो धर्मार्थकाममोक्षप्रदा विद्याश्चतुर्विधास्ता एव चातुर्विध्यं तत्र प्रतिवर्णं प्रत्याश्रमं च पृथक् प्रवक्ष्यामीत्यनुषज्यते ३७ ३८ गदतः भोः प्रवक्तारः
मया वक्ष्यमाणं पंथानं निबोधत तेन च पथा परं पदं निबोधत ३९ आत्मानमधिकृत्य प्रवृत्तमाश्रमं अध्यात्मं संन्यासं परं पदं प्राहुरिति पूर्वेणान्वयः ४०
ज्योतिरादिकं विश्वं तावत् पश्यति यावत् अध्यात्मं संन्यासपूर्वकं नोपैति न लभते ४१ ४२ ४३ श्रद्धा आस्तिक्यबुद्धिः सैव धर्मस्य मुख्यं लक्षणं ज्ञाप-

चातुर्विध्यं तथा वर्णं चातुराश्रमिकान्पृथक् धर्ममेकं चतुष्पादं नित्यमाहुर्मनीषिणः ३७ पंथानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्वि
जाः नियतं ब्रह्मभावाय गतं पूर्वं मनीषिभिः ३८ गदंतं तं मयाद्येह पंथानं दुर्विदं परम् निबोधत महाभागा निखिलेन परं पदम् ३९
ब्रह्मचारिकमेवाहुराश्रमं प्रथमं पदम् गार्हस्थ्यं तु द्वितीयं स्याद्वानप्रस्थमतः परम् ४० ततः परं तु विज्ञेयमध्यात्मं परमं पदम्
ज्योतिराकाशमादित्यो वायुरिंद्रः प्रजापतिः नोपैति यावदध्यात्मं तावदेतान्न पश्यति ४१ तस्योपायं प्रवक्ष्यामि पुरस्तात्तं निबोधत
फलमूलानिलभुजां मुनीनां वसतां वने ४२ वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्यते सर्वेषामेव वर्णानां गार्हस्थ्यं तद्विधीयते ४३
श्रद्धालक्षणमित्येवं धर्मं धीराः प्रचक्षते इत्येवं देवयाना वः पंथानः परिकीर्तिताः सद्भिरध्यासिता धीरैः कर्मभिर्धर्मसेतवः ४४ ए
तेषां पृथगध्यास्ते यो धर्मं संशितव्रतः कालात्पश्यति भूतानां सदैव प्रभवाप्ययौ ४५ अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना वि
षयस्थानि सर्वाणि वर्तमानि विभागशः ४६ महानात्मा तथाव्यक्तमहंकारस्तथैव च इंद्रियाणि दशैकं च महाभूतानि पंच च ४७ विशे
षाः पंचभूतानामिति सर्गः सनातनः चतुर्विंशतिरेका च तत्त्वसंख्या प्रकीर्तिता ४८ तत्त्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ स धी
रः सर्वभूतेषु न मोहमधिगच्छति ४९ तत्त्वानि यो वेदयते यथातथं गुणांश्च सर्वानखिलाश्च देवताः विधूतपाप्मा प्रविमुच्य बंधनं
स सर्वलोकानमलान्समश्नुते ५० इति श्रीमन्महाभारते आश्वमेधिके पर्वणि गुरुशिष्यसंवादे पंचत्रिंशोऽध्यायः ३५

कं श्रद्धाहीनं सर्वं व्यर्थमित्यर्थः देवयानाः देवयानमार्गप्राप्त्युपायाः ४४ एतेषां अन्यतमं धर्मं यः पृथक् भिन्नं एकमेव अध्यास्ते दृढमाश्रयति सः कालात् क्रमे
णाचित्तशुद्धिपरिपाके सति भूतानां प्रभवाप्ययौ स्वनिष्ठाविति सदैव निमेषोन्मेषणमात्रे काले निरंतरं पश्यति एतेन दृष्टिरेव सृष्टिरित्युक्तं भवति ४५
हेतुना युक्त्या विषयस्थानि बुद्धिगोचराणि बुद्धिस्थानीत्यर्थः ४६ ४७ विशेषाः शब्दादयो विशेषगुणाः एका चेति पुरुषग्रहणं ४८ ४९ सर्वलोकान्समश्
नुते सार्वात्म्यं लभते य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति श्रुतेः ५० इत्याश्वमेधिके टीकायां पंचत्रिंशोऽध्यायः ३५ ६ ७

उक्तान्येवतत्वानिविवरीतुमुत्तरोग्रंथआरभ्यतेतादितिनत् तत्रतेषुतत्वेषु व्याख्यातेषु मध्ये अनुद्रिक्तां त्रिगुणं अव्यक्तं विद्यात् साम्योपेतंगुणत्रयंअव्य क्तंपदार्थः तच्चसर्वकार्यव्यापि ध्रुवंअविनाशि स्थिरंअचंचलंनिरारंभमितियावत् तदेवाव्यक्तंउद्रिक्तंसत् पंचधातुकंभूतपंचकंनवद्वारपुरंचविंद्या त्तेषांतत्कार्यत्वात्पंचखादीनि नवतुभोक्तारंप्रतिविषयप्रवेशद्वाराणिपंच श्रोत्रादीनिमनोबुद्धिःप्राणोभिमानाख्योहंकारश्च पुरंशरीरम् १ परितःक्षि प्यतेविषयभोगवासनयाजीवात्मायैस्तेपरिक्षेपाइंद्रियाणि मनसेवव्याकरणंव्यक्तीभावोयेषांतेसंकल्पयोनयोविषयाः तदात्मकंपुरं बुद्धिस्वामिकंचपुरं म् एतदेवपुरंपरंब्रह्म तत्राध्यस्तत्वात् एकादशंइंद्रियंमनः तन्मात्रंच नकेवलंभोग्यमेवमनः कल्पितंअपितुभोक्ताभोग्यंभोगोपकरणंचसर्वंमनोमात्र मित्यर्थः तद्वाइदंमनस्येवपरमंप्रतिष्ठितंयदिदंकिंचेतिश्रुतेः २ स्रोतांसिचित्तनद्याःप्रवाहाः त्रीणिशुक्लंहिंसाशून्यंधर्मप्रावण्यं कृष्णंहिंसाप्रावण्यम्

ब्रह्मोवाच तदव्यक्तमनुद्रिक्तंसर्वव्यापिध्रुवंस्थिरम् नवद्वारंपुरंविंद्यात्त्रिगुणंपंचधातुकम् १ एकादशपरिक्षेपंमनो-
व्याकरणात्मकम् बुद्धिस्वामिकमित्येतत्परमेकादशंभवेत् २ त्रीणिस्रोतांसियान्यस्मिन्नाप्यायंतेपुनःपुनः प्रनाड्यस्ति
स्र एवैताः प्रवर्तंतेगुणात्मिकाः ३ तमोरजस्तथासत्वंगुणानेतान्प्रचक्षते अन्योन्यमिथुनाःसर्वेतथान्योन्यानुजीविनः ४
अन्योन्यापाश्रयाश्चापितथान्योन्यानुवर्तिनः अन्योन्यव्यतिषक्ताश्चत्रिगुणाःपंचधातवः ५ तमसोमिथुनंसत्वंसत्वस्यमि
थुनंरजः रजसश्चापिसत्वंस्यात्सत्वस्यमिथुनंतमः ६ नियम्यतेतमोयत्ररजस्तत्रप्रवर्तते नियम्यतेरजोयत्रसत्वंतत्रप्रवर्त
ते ७. नैशात्मकंतमोविद्यात्त्रिगुणंमोहसंज्ञितम् अधर्मलक्षणंचैवनियतंपापकर्मसु ८

शुक्लकृष्णांहिंसायुक्तप्रवृत्तिधर्मप्रावण्यंचेति ए तानियस्मिन्चित्तेविद्यमानानितिसृभिः प्रनाडीभिः संस्काररूपाभिःस्त्रिगुणात्मिकाभिराप्यायंतेपूर्यंतेताश्चतथैवपुनःपुनर्बध्यंते ३ तत्रत्रीन्गुणान् अव्यक्ता वयवभूतान्व्याख्यास्तितमइत्यादिना अन्योन्यमिथुनत्वंदंपतीवदेककार्योत्पादनं अन्योन्योपजीवित्वंबीजांकुरवत् ४ अन्योन्यापाश्रयत्वंत्रिदंडविष्टंभवत् अन्यो न्यानुवर्तित्वंप्रधानगुणभावेनराजभृत्यवत् अन्योन्यव्यतिषिक्तत्वंतेजोन्नवत् त्रिगुणाःगुणत्रयमयाःपंचधातवःपंचमहाभूतानिभौतिकानिचेत्यर्थः ५ मिथुनं मथ्नतीतियोगात् अभिभावकंतमसउद्रेकेसत्वंनश्यतिसत्वस्योद्रेकेतमः एवंरजसउद्रेकेसत्वंनिवर्ततेसत्वस्योद्रेकेरजइतिज्ञेयं रजस्तमसोस्तु परस्परोद्दीपक त्वान्नान्योन्यमभिभावकत्वंभवतीतितत्मिथुनद्वयंप्रोक्तं ६ नियम्यतेकर्मकर्तरिप्रयोगःतिरोधीयतेइत्यर्थः रजसितिरोधानेतुतमोनवर्ततेअपितुसत्वमेव अ प्रवृत्तिर्हितमसः कार्यंनतुप्रवृत्तिनिरोधइत्यर्थः ७ नैशात्मकमिति त्रिगुणमितीतरयोरविशेषणंत्रयाणामन्योन्यव्यतिषिक्तत्वस्योक्तत्वात् ८ ७

पर्यायोवैपरीत्यम् ९ लाघवंधर्मज्ञानादिरूपंसौष्टवम् १० गुणतत्वंकार्यस्वरूपं ११ स्वप्नोनिद्रास्तंभोगर्वः १२ निर्विशेषत्वंयुक्तायुक्तपरीक्षयाअभावः अंधत्वंसर्वेषांकरणानामयथावत्प्रतिपत्तिः जघन्यगुणः चांडालादिधर्मोहिंस्रत्वाशुचित्वादिः भिन्नवृत्तिताशीलभंगः १३ विकृताभावः विकृतस्यविविधक्रियारूपस्याभावः अप्रवृत्तिः १४ अचेतनाअबोधः गुरुत्वंआलस्यादिनागात्राणांजडत्वं सन्नभावत्वंनष्टभाक्तित्वंदेवादिषु अवशित्वंअजितेंद्रि-

प्रकृत्यात्मकमेवाहूरजः पर्यायकारकम् प्रवृत्तंसर्वभूतेषुदृश्यमुत्पत्तिलक्षणम् ९ प्रकाशंसर्वभूतेषुलाघवंश्रद्दधानता सात्विकरूपमेवंतुलाघवंश्रद्दधानता सात्विकरूपमेवंतुलाघवंसाधुसंमितम् १० एतेषांगुणतत्वानिवक्ष्यंतेतत्वहेतुभिः समासव्यासयुक्तानितत्वतस्तान्निबोधत ११ संमोहोज्ञानमत्यागः कर्मणामविनिर्णयः स्वप्नस्तंभोभयंलोभः स्वप्नः स्वकृतदूषणम् १२ अस्मृतिश्चाविपाकश्चनास्तिक्यंभिन्नवृत्तिता निर्विशेषत्वमंधत्वंजघन्यगुणवृत्तिता १३ अकृतेकृतमानित्वमज्ञानेज्ञानमानिता अमैत्रीविकृताभावोह्यश्रद्धामूढभावना १४ अनार्जवमसंज्ञत्वंकर्मपापमचेतना गुरुत्वंसन्नभावत्वमवशित्वमवाग्गतिः १५ सर्वएतेगुणावृत्तास्तामसाः संप्रकीर्तिताः येचान्येविहिताभावालोकेस्मिन्भावसंज्ञिताः तत्रतत्रानियम्यंतेसर्वेतेतामसागुणाः १६ परिवादकथानित्यंदेवब्राह्मणनिंदकाः अत्यागश्चाभिमानश्चमोहोमन्युस्तथाक्षमा १७ मत्सरश्चैवभूतेषुतामसंवृत्तमिष्यते वृथारंभाहियेकेचिद्वृथादानानियानिच १८ वृथाभक्षणमित्येतत्तामसंवृत्तमिष्यते अतिवादोतितिक्षान्वमात्सर्यमभिमानिता १९ अश्रद्दधानताचैवतामसंवृत्तमिष्यते एवंविधाश्चयेकेचिल्लोकेस्मिन्पापकर्मिणः २० मनुष्याभिन्नमर्यादास्तेसर्वेतामसाःस्मृताः तेषांयोनीःप्रवक्ष्यामिनियताःपापकर्मिणाम् २१ अवाङ्निरयभावायातिर्यङ्निरयगामिनः स्थावराणिचभूतानिपशवोवाहनानिच २२ क्रव्यादादंदशूकाश्चकृमिकीटविहंगमाः अंडजाजंतवश्चैवसर्वेचापिचतुष्पदाः २३ उन्मत्ताबधिरामूकायेचान्येपापरोगिणः मग्नास्तमसिदुर्वृत्ताः स्वकर्मकृतलक्षणाः २४ अवाक्स्रोतसइत्येतेमग्नास्तमसितामसाः २५ तेषामुत्कर्षमुद्रेकंवक्ष्याम्यहमतः परम् यथातेसुकृतांल्लोकांल्लभंतेपुण्यकर्मिणः २६

यत्वंअवाग्गतिः नीचकर्मानुरागः १५ नियम्यंतेइंद्रियमेनउपतिष्ठंते १६ देवब्राह्मणवेदिका देवादिविषयिणी पाठांतरेस्पष्टोर्थः अक्षमेतिच्छेदः १७ १८ १९ २० २१ २२ अंडजाः अंडंअपांस्वभावःतज्जाः २३ २४ अवाक्स्रोतसः अधोगमनार्हः चित्तप्रवाहोयेषांतेनतथा २५ उत्कर्षं आरोहक्रमं उद्रेकंपुण्याविर्भावम् २६

अन्यथांप्रतिपन्नाः तिर्यक्स्थावरादियोनिंप्राप्ताः ब्राह्मणानांब्राह्मणैःकर्मिणः आग्निहोत्राद्यर्थं विहृद्धाः हिंसिताः संतः २७ वैदिकेनसंस्कारेण ऊर्ध्वमायांति ततश्च्युताश्च ब्राह्मणादिजातिंलब्ध्वायतमानाइत्यादिद्वयोःसंबंधः २८ एतदेवस्पष्टयति अन्यथेति २९ चूचुकाःस्खलद्गिरः ३० शूद्रेति वैश्यादियोनि प्राप्तोक्रोधमदयस्तामसगुणास्तमोगुणस्रोतसि आयांतितेभ्य आत्मानंरक्षेदित्यर्थः ३१ कामेषुस्त्र्याद्यर्थेषु अभिष्वंगआसक्तिः ३२ अविद्यास्मितारा-गद्वेषाभिनिवेशाः पंचक्लेशा अत्रतमआदिशब्देनाभिधीयंते तेषुतामिस्रश्चतुर्थः क्रोधसंज्ञितो ननुद्वेषइत्यर्थः एवंअंधतामिस्रोपिनाभिनिवेशः किंतुम रणमेव तामिस्रः क्रोधउच्यतइतिपुनर्वचनंपरिभाषितार्थनिराकरणार्थम् तामिस्रांधतामिस्रपदाभ्यांक्रोधमरणेएवग्राह्येनतुग्रजसोद्वेषाभिनिवेशा

अन्यथाप्रतिपन्नास्तुविवृद्धायेचकर्मिणः स्वकर्मनिरतानांचब्राह्मणानांशुभैषिणाम् २७ संस्कारेणोर्ध्वमायांतियत-मानाःसलोकताम् स्वर्गंगच्छंतिदेवानामित्येषावैदिकीश्रुतिः २८ अन्यथाप्रतिपन्नास्तेविबुधाःस्वेषुकर्मसु पुनरावृत्तिधर्मा णस्तेभवंतीहमानुषाः २९ पापयोनिंसमापन्नाश्चांडालामूकचूचुकाः वर्णान्पर्यायशश्चापिप्राप्नुवंत्युत्तरोत्तरम् ३० शूद्रयो निमातिक्रम्ययेचान्येतामसागुणाः स्रोतोमध्येसमागम्यवर्ततेतामसेगुणे ३१ अभिषंगस्तुकामेषुमहामोहइतिस्मृतः ऋष योमुनयोदेवामुह्यंत्यत्रसुखेप्सवः ३२ तमोमोहोमहामोहस्तामिस्रःक्रोधसंज्ञितः मरणंत्वंधतामिस्रस्तामिस्रःक्रोधउच्य ते ३३ वर्णतोगुणतश्चैवयोनितश्चैवतत्वतः सर्वमेतत्तमोविप्राःकीर्तितंवोयथाविधि ३४ कोन्वेतद्बुध्यतेसाधुकोन्वेतत्साधु पश्यति अतत्वेतत्वदर्शीयस्तमसस्तत्वलक्षणम् ३५ तमोगुणाबहुविधाःप्रकीर्तितायथावदुक्तंचतमःपरावरम् नरोहि- योवेदगुणानिमान्सदासतामसैःसर्वगुणैःप्रमुच्यते ३६ इतिश्रीमन्महाभारते आश्व॰णिगुरुशिष्यसंवादेषट्त्रिंशोऽध्यायः ३६ ब्रह्मोवाच रजोहिवःप्रवक्ष्यामियाथातथ्येनसत्तमाः निबोधतमहाभागागुणवृत्तंचराजसम् १

वित्यर्थः ३३

तदेवाह वर्णइति एतत्तमआदिशब्दितमविद्यादिकंसर्वंतमएवज्ञेयंनतुतत्ररजोंशोस्ति तत्रयथा अविद्या एतस्मिंस्तद्बुद्धिरूपएवविपर्यायरूपंतमः ए वंतत्प्रभवा अस्मितादयोपितमएव तत्रापिअनात्मनिमहत्त्वेस्मीत्यात्मबुद्धेःसत्वात् एवंरागोपि अप्रियेप्रियत्वाध्यासः क्रोधःशांतेप्रतीतिः अभिज्वलना ध्यासः एवंअमृतेनित्येमरिष्यामीति बुद्धिरित्येतेवर्णतःस्वरूपतः पाकतइतिपाठे फलतः गुणतः विपर्ययत्वतः योनितस्तामसत्वतश्चतमएव ३४ एतत्तु दुर्बोधमित्युक्तिपूर्वकंसामान्यतस्तमसोलक्षणमाह कइति ३५ तमोविकारागुणास्तमोगुणाः ३६ इत्याश्वमेधिकेटी॰ षट्त्रिंशोऽध्यायः ३६ रजोहीति १

२ ३ ४ उग्रंनिष्ठुरं दारुणंहिंस्रत्वपरिभाषणंधिक्कृत्यभाषणम् ५ ६ व्यूहः व्यवहाररचनाकौशलम् ७ शरणेषुरक्षितृषु ८ अप्रत्ययः अविश्वासः ९ १०

संतापोरूपमायासः कस्वंदुःखंहिमातपो ऐश्वर्यंविग्रहःसंधिर्हेतुवादोरतिःक्षमा २ बलंशौर्यंमदोरोषोव्यायामकलहावपि
ईर्ष्येप्सापिशुनंयुद्धंममत्वंपरिपालनम् ३ वधबंधपरिक्लेशाःक्रयोविक्रयएवच निकृंतछिंधिभिंधीतिपरमर्मावकर्तनम् ४
उग्रंदारुणमाक्रोशःपरचित्तानुशासनम् लोकचिंतानुचिंताचमत्सरःपरिपालनम् ५ मृषावादोमृषादानंविकल्पःपरिभाषण
म् निंदास्तुतिःप्रशंसाचप्रतापःपरिधर्षणम् ६ परिचर्यानुशुश्रूषासेवातृष्णाव्यपाश्रयः व्यूहोनयःप्रमादश्चपरिवादःपरिग्रहः
७ संस्कारायेचलोकेषुप्रवर्ततेपृथक्पृथक् नृषुनारीषुभूतेषुद्रव्येषुशरणेषुच ८ संतापोप्रत्ययश्चैवव्रतानिनियमाश्चये
आशीर्युक्तानिकर्माणिपौर्तानिविविधानिच ९ स्वाहाकारोनमस्कारःस्वधाकारोवषट्क्रिया याजनाध्यापनेचोभेयजनाध्ययने
अपि १० दानंप्रतिग्रहश्चैवप्रायश्चित्तानिमंगलम् इदंमेस्यादिदंमेस्यात्स्नेहोगुणसमुद्भवः ११ अभिद्रोहस्तथामायानिकृतिर्मा
नएवच स्तैन्यंहिंसाजुगुप्साचपरितापःप्रजागरः १२ दंभोदर्पोथरागश्चभक्तिःप्रीतिःप्रमोदनम् द्यूतंचजनवादश्चसंबंधाःस्त्रीकृता
श्चये १३ नृत्यवादित्रगीतानांप्रसंगायेचकेचन सर्वएतेगुणाविप्राराजसाःसंप्रकीर्तिताः १४ भूतभव्यभविष्याणांभावानांभवि
भावनाः त्रिवर्गनिरतानित्यंधर्मोर्थःकामइत्यपि १५ कामवृत्ताःप्रमोदंतेसर्वकामसमृद्धिभिः अर्वाक्स्रोतसइत्येतेमनुष्यारज
सावृताः १६ अस्मिन्लोकेप्रमोदंतेजायमानाःपुनःपुनः प्रेत्यभाविकमीहंतेऐहलौकिकमेवच १७ ददतिप्रतिगृण्हंतितर्पयं-
त्यथजुव्हति १८ रजोगुणावोबहुधानुकीर्तितायथावदुक्तंगुणवृत्तमेवच नरोपियोवेदगुणानिमान्सदासराजसैःसर्वगुणैर्वि
मुच्यते १९ इतिश्रीमन्महाभारतेआश्वमेधिकपर्वणिगुरुशिष्यसंवादसप्तत्रिंशोऽध्यायः ३७ ब्रह्मोवाच
अतःपरंप्रवक्ष्यामितृतीयंगुणमुत्तमम् सर्वभूतहितंलोकेसतांधर्ममनिंदितम् १ आनंदःप्रीतिरुद्रेकःप्राकाश्यंसुखमेवच
अकार्पण्यमसंरंभःसंतोषःश्रद्दधानता २ क्षमाधृतिरहिंसाचसमतासत्यमार्जवम् अक्रोधश्चानसूयाचशौचंदाक्ष्यंपरा
क्रमः ३

११ परिनापस्वजनवेकल्पानिमिमोदाहः पाठांतरेपरिवादःसर्वनिंदा १२ १३ १४ १५ अर्वाक्स्वर्गादधःभूमेरूपरिप्रवाहोयेषांतेनथा
१६ प्रेत्यभाविकंजन्मांतरीयंकुशलम् १६ १७ १८ १९ इत्याश्वमेधिकेटीकायांसप्तत्रिंशोऽध्यायः ३७ अतइति १ उद्रेकउन्नतिः असंरंभःनिर्म
यत्नम् २ ३

मुधेतिशास्त्रीयज्ञानादेर्वैयर्थ्यंज्ञात्वायुक्तधर्मोयोगिधर्मोयोभवतिसामुत्रात्मनि अत्यंतंअविनाशिपदमश्नुते ४ ५ ६ हर्षःपुत्रजन्मादिजंस्फुरत्वम् तुष्टिः अलंबुद्धिः शांतिकर्मणिमुमुक्षुपविशङ्किः आर्जवेनप्रवृत्तिः ७ उपेक्षा औदासीन्यम् ८ ९ दानादीनांवैयर्थ्यंजानंतः येब्रह्मयोनिस्थाः वेदकारणब्रह्मणिनिष्ठावंतः तएवसाधुदर्शिनोनान्ये १० पापानिकर्माणिराजसतामसानि तनूःशरीराणिकुर्वंतेयोगबलेमानेकशरीरस्रष्टारोभवंति ११ ईशित्वादिकं अणिमादीनामप्युपलक्षणम् मनःविकुर्वते अनेकाकारंकुर्वंतिनतुनिगृह्णंतीत्यर्थः १२ ऊर्ध्वस्रोतसऊर्ध्वगमनपराः प्रकृत्याभो-

मुधाज्ञानंमुधावृत्तंमधासेवामुधाश्रमः एवंयोयुक्तधर्मःस्यात्सोमुत्रात्यंतमश्नुते ४ निर्ममोनिरहंकारोनिराशीःसर्वतःसमः अ
काममूतइत्येवसतांधर्मःसनातनः ५ विश्रंभोन्ह्रीस्तितिक्षाचत्यागःशौचमतंद्रिता आनृशंस्यमसंमोहोदयाभूतेष्वपैशुनम् ६ ह
र्षस्तुष्टिर्विस्मयश्चविनयःसाधुवृत्तिता शांतिकर्मणिशुद्धिश्चशुभाबुद्धिर्विमोचनं ७ उपेक्षाब्रह्मचर्यंचपरित्यागश्चसर्वशः नि
र्ममत्वमनाशीस्त्वमपरिरक्षतधर्मता ८ मुधादानंमुधायज्ञोमुधाधीतंमुधाव्रतम् मुधाप्रतिग्रहश्चैवमुधाधर्मोमुधातपः ९ एवं
वृत्तास्तुयेकेचिल्लोकेस्मिन्सत्वसंश्रयाः ब्राह्मणाब्रह्मयोनिस्थास्तेधीराःसाधुदर्शिनः १० हित्वासर्वाणिपापानिनिःशोकाह्यथमान
वाः दिवंप्राप्यतुतेधीराःकुर्वतेवैततस्तनूः ११ ईशित्वंचवशित्वंचलघुत्वंमनसश्चते येकुर्वंतिमहात्मानोदेवास्त्रिदिवगाइव १२
ऊर्ध्वस्रोतसइत्येतेदेवावैकारिकाःस्मृताः विकुर्वंतःप्रकृत्यावैदिवंप्राप्तास्ततस्ततः १३ यद्यदिच्छंतितत्सर्वंभजंतेविभजंतिच इत्ये
तत्सात्विकंवृत्तंकथितंवोद्विजर्षभाः १४ प्रकीर्तिताःसत्वगुणाविशेषतोयथावदुक्तंगुणवृत्तमेवच नरस्तुयोवेदगुणानिमान्सदागु
णानुसंभुंक्तेनगुणैःसयुज्यते १५ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिगुरुशिष्यसंवादेअष्टत्रिंशोऽध्यायः ३८
ब्रह्मोवाच नैवशक्यागुणावक्तुंपृथक्त्वेनैवसर्वशः अविच्छिन्नानिदृश्यंतेरजःसत्वंतमस्तथा १ अन्योन्यमथरज्यं-
तेह्यन्योन्यंचार्थजीविनः अन्योन्यमाश्रयाःसर्वेतथान्योन्यानुवर्तिनः २

गजसंस्कारेणपुनर्भोगार्थंचित्तंविकुर्वंतः नानाकारेणपरिणामयंतः भजंतेस्वयंप्राप्नुवंतिविभजंतिसंकल्पितं अन्येभ्योपिप्रयच्छंतीतिसार्धः १३ १४ १५ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीकायांअष्टत्रिंशोऽध्यायः ३८. नैवेतिअविच्छिन्नानि अपृथक्भूतानि इदंसात्विकमिदं राजसमिदंतामसंकार्यमितिव्यपदेशस्तुतत्तद्गुणप्राधान्यमात्रादित्यर्थः १ २ ७ ७ ७ ७ ७

यावदिति कियदपि विवृद्धं सत्त्वं तमसेनानियम्यते अतो नियम्यनियामकयोस्तयोः साम्यं भवतीत्यर्थः एवं प्रवर्तनात्मकं रजो मोहप्रकाशात्मकाभ्यां तमःसत्त्वाभ्यां उद्रिक्ते सतितेउभे रुणद्धि ३ संहत्य मिश्रीभूय यात्रां व्यवहारं कुर्वतेयतः संघचारिणः संहतस्वभावाश्चरंति एवंविधा अपि हेत्वहेतुभिर्वर्तंते वैषम्येणेति शेषः ४ एतदेवाह उद्रेकेति उद्रेकउद्बोधकसामग्रीसत्त्वे यदाधिक्यं तदभावे अन्यूनं व्यतिरिक्तं अनधिकं च सर्वशः सर्वेषां रूपं समानं भवतीत्यर्थः ५ व्यतिरिक्तं अधिकं यत्र श्वसूकरादौ तिर्यग्भावं च आधिक्यम् ६ ७ ८ सत्त्वं इंद्रियाणां योनिः सा च वैकारिकी वैकारिकाहंकारसंबंधिनी प्रकाशिका इंद्रियद्वारा शब्दादीनामिति शेषः धर्मो धर्महेतुः विधीयते शास्त्रे प्रकाश्यते ९।१०।११ दूरादिति नाम से श्रूद्रेपि रजःसत्त्वयोर्दर्शनात् गुणाः संघचारिण एव एयमन्यत्र १२ स्वतः प्रकाशकस्याप्यादित्यादेः तमोरजःकार्यभयसंतापहेतुत्वात्तत्रापि त्रिगुणात्मकत्वं वर्तत इत्यर्थः कुत्सितं कर्म चरंतिति कुचरा गृध्राः १३ १४ तत्स्वरूपमपि त्रिगुणात्मकमित्याह प्राकाश्यमिति १५ न तदस्ति पृथिव्यां चेत्यादि श्लोकस्यायं प्रपंचः एवमित्यादि १६ स्थावराणामतिमूढत्वात्तत्र तमस्तिर्यग्भावं आधिक्यं गतं दृश्यते राजसाः मरणाय त्वकद्वम्लत्वादयः विवर्तंते कालेन द्रव्यांतरयोगेन पाकादिना वा सात्विकस्तु स्नेहः वन्ह्यादेरुद्दीपकत्वेन प्रकाशकत्वात् १७

यावत्सत्त्वं रजस्तावद्वर्ततेनात्र संशयः यावत्तमश्च सत्त्वं च रजस्तावदिहोच्यते ३ संहत्य कुर्वते यात्रां सहिताः संघचारिणः संघातवृत्तयो ह्येते वर्तंते हेत्वहेतुभिः ४ उद्रेकव्यतिरिक्तानां तेषामन्योन्यवर्तिनाम् वक्ष्यते तद्यथान्यूनं व्यतिरिक्तं च सर्वशः ५ व्यतिरिक्तं तमो यत्र तिर्यग्भावगतं भवेत् अल्पं तत्र रजो ज्ञेयं सत्त्वमल्पतरं तथा ६ उद्रिक्तं च रजो यत्र मध्यस्रोतोगतं भवेत् अल्पं तत्र तमो ज्ञेयं सत्त्वमल्पतरं तथा ७ उद्रिक्तं च यदा सत्त्वमूर्ध्वस्रोतोगतं भवेत् अल्पं तत्र तमो ज्ञेयं रजश्चाल्पतरं तथा ८ सत्त्वं वैकारिकी योनिरिंद्रियाणां प्रकाशिका नहि सत्त्वात्परो धर्मः कश्चिदन्यो विधीयते ९ ऊर्ध्वं गच्छंति सत्त्वस्था मध्ये तिष्ठंति राजसाः जघन्यगुणसंयुक्ता यांत्यधस्तामसा जनाः १० तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्त्वमुत्तमम् इत्येवं त्रिषु वर्णेषु विवर्तंते गुणास्त्रयः ११ दूरादपि हि दृश्यंते सहिताः संघचारिणः तमः सत्त्वं रजश्चैव पृथक्त्वेनानुशुश्रुम १२ दृष्ट्वा त्वादित्यमुद्यंतं कुचराणां भयं भवेत् अध्वगाः परितप्येयुरुष्णतो दुःखभागिनः १३ आदित्यः सत्त्वमुद्रिक्तं कुचरास्तु तथा तमः परितापोऽध्वगानां च राजसो गुण उच्यते १४ प्राकाश्यं सत्त्वमादित्यः संतापो राजसो गुणः उपप्लवस्तु विज्ञेयस्तामसस्तस्य पर्वसु १५ एवं ज्योतिःषु सर्वेषु निवर्तंते गुणास्त्रयः पर्यायेण च वर्तंते तत्र तत्र तथा तथा १६ स्थावरेषु तु भावेषु तिर्यग्भावगतं तमः राजसास्तु विवर्तंते स्नेहभावस्तु सात्विकः १७

१८ १९ २० २१ २२ तमआदीनिद्वाविंशतिरव्यक्तस्यनामधेयानि २३ २४ २५ २६ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीकायांऊनचत्वारिंशो
ध्यायः ३९ एवंचतुर्भिरध्यायैःव्यस्तसमस्तगुणानिरूपणद्वारा तत्साम्यावस्थारूपमव्यक्तंप्रपंचितंइदानींमहत्तत्वंनिरूपयति अव्यक्तादित्यध्यायेन

अहस्त्रिधातुविज्ञेयंत्रिधारात्रिर्विधीयते मासार्द्धमासवर्षाणिऋतवःसंधयस्तथा १८ त्रिधादानानिदीयंतेत्रिधायज्ञःप्रवर्तते
स्त्रिधालोकास्त्रिधादेवास्त्रिधाविद्यास्त्रिधागतिः १९ भूतंभव्यंभविष्यंचधर्मोर्थःकामएवच प्राणापानावुदानश्चाप्येतएवत्रयोगु
णाः २० पर्यायेणप्रवर्तंते तत्रतत्रतथातथा यत्किंचिदिहलोकेस्मिन्सर्वमेतत्त्रयोगुणाः २१ त्रयोगुणाःप्रवर्तंतेह्यव्यक्तानित्यमेव
तु सत्वंरजस्तमश्चैवगुणसर्गःसनातनः २२ तमोव्यक्तंशिवंधामरजोयोनिःसनातनः प्रकृतिर्विकारःप्रलयःप्रधानंप्रभवाप्ययौ २३
अनुद्रिक्तमनूनंवाप्यकंपमचलंध्रुवम् सदसच्चैवतत्सर्वमव्यक्तंत्रिगुणंस्मृतम् २४ ज्ञेयानिनामधेयानिनरैरध्यात्मचिंतकैः २५ अ
व्यक्तनामानिगुणांश्चतत्त्वतोयोवेदसर्वाणिगतीश्चकेवलाः विमुक्तदेहःप्रविभागतत्ववित्समुच्यतेसर्वगुणैर्निरामयः २६
इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिगुरुशिष्यसंवादेऊनचत्वारिंशोऽध्यायः ३९ ब्रह्मोवाच अव्यक्तात्पूर्वमु
त्पन्नोमहानात्मामहामतिः आदिर्गुणानांसर्वेषांप्रथमःसर्गउच्यते १ महानात्मामतिर्विष्णुर्जिष्णुःशंभुश्चवीर्यवान् बुद्धिःप्र
ज्ञोपलब्धिश्चतथाख्यातिर्धृतिःस्मृतिः २ पर्यायवाचकैःशब्दैर्महानात्माविभाव्यते तंजानन्ब्राह्मणोविद्वान्प्रमोहंनाधिगच्छ-
ति ३ सर्वतःपाणिपादश्चसर्वतोक्षिशिरोमुखः सर्वतःश्रुतिमांल्लोकेसर्वंव्याप्यसतिष्ठति ४ महाप्रभावःपुरुषःसर्वस्यहृदिनि
श्रितः अणिमालघिमाप्राप्तिरीशानोज्योतिरव्ययः ५ तत्रबुद्धिविदोलोकेसद्भावनिरताश्चये ध्यानिनोनित्ययोगाश्चसत्य
संधाजितेंद्रियाः ६ ज्ञानवंतश्चयेकेचिदलुब्धाजितमन्यवः प्रसन्नमनसोधीरानिर्ममानिरहंकृताः ७ विमुक्ताःसर्वएवैतेम
हत्त्वमुपयांत्युत आत्मनोमहतोवेदयःपुण्यांगतिमुत्तमाम् ८ अहंकारात्प्रसूतानिमहाभूतानिपंचवै पृथिवीवायुराकाश
मापोज्योतिश्चपंचमम् ९

गुणानांगुणकार्याणां १ २ ३ सर्वतइतिगीतास्वयत्ज्ञेयमुक्तंतन्महानात्मेवेतिव्यनक्ति मुख्यंतुज्ञेयमव्यक्ता
परमेवेतिज्ञापयितुम् ४ ५ अयमेवदहराद्युपासकानामुपास्यइत्याह तत्रेत्यादिना तत्रमहत्यात्मनिलोकाअतीता आनागतावर्तमानाश्चसंति य
च्चास्येहास्तियच्चनास्तिसर्वंतदत्रगत्वाविंदतइतिश्रुतेः ६ सद्भावंनिरताश्चयेतेमहत्त्वमुपयांतीत्यन्वयः ७ ८ ९ ५ ५ ५ ३

१० ११ १२ १३ इत्याश्वमेधिके पर्वणि टीकायां चत्वारिंशोऽध्यायः ४० कार्यस्य कारणादनन्यत्वं वदन् महांतमेवाहंकारतामापन्नं विवृणो
तियइति १ भूतादिरितितस्यैवाहंकारस्य तामसस्यान्वर्था संज्ञा वैकारिकइति विकारात् महतो जातइति व्युत्पत्तेः तस्यैव राजसो नाम सचतैजसः प्र
वृत्त्यात्मकस्य विकारः चेतनार्थीयतेऽस्मिन्निति चेतनाधातुश्चेतना पुरुषइत्यर्थः प्रजानां सर्गो यस्मात् अतः प्रजासर्गत्वात्प्रजापतिरप्ययमेव २ देवानां इंद्रिया
णां श्रोत्रादीनां मनसश्च प्रभवउत्पत्तिस्थानं स्वयमपि देवोदीव्यन्क्रीडन्त्रिलोककृत् अहमितियोऽभिमन्यते सोऽहंकारः ३ एषः समष्टिरूपोऽनिरुद्धाख्यः

तेषु भूतानि युज्यंते महाभूतेषु पंचसु तेशब्दस्पर्शरूपेषु रसगंधक्रियासु च १० महाभूतविनाशांते प्रलये प्रत्युपस्थिते स
र्वप्राणभृतां धीरा महदुत्पद्यते भयम् ११ सधीरः सर्वलोकेषु नमोहमधिगच्छति विष्णुरेवादिसर्गेषु स्वयंभूर्भवति प्रभुः १२ ए
वं हि यो वेद गुहाशयं प्रभुं परं पुराणं पुरुषं विश्वरूपम् हिरण्मयं बुद्धिमतां परां गतिं सबुद्धिमान्बुद्धिमतीत्य तिष्ठति १३ इ
ति श्रीमन्महाभारते आश्वमेधिके पर्वणि गुरुशिष्यसंवादे चत्वारिंशोऽध्यायः ४० ब्रह्मोवाच यउत्पन्नो महान्पूर्वम
हंकारः सउच्यते अहमित्येव संभूतो द्वितीयः सर्गउच्यते १ अहंकारश्च भूतादिर्वैकारिकइति स्मृतः तेजसश्चेतनाधातुः प्रजा
सर्गः प्रजायते २ देवानां प्रभवो देवो मनसश्च त्रिलोककृत् अहमित्येव तत्सर्वमभिमंता सउच्यते ३ अध्यात्मज्ञानतृप्तानां मु
नीनां भावितात्मनाम् स्वाध्यायक्रतुसिद्धानामेष लोकः सनातनः ४ अहंकारेणाहरतो गुणानिमान् भूतादिरेवं सृजते सभूतकृ
त् वैकारिकः सर्वमिदं विचेष्टते स्वतेजसा रंजयते जगत्तथा ५ इति श्रीमन्महाभार० आश्व० गुरु० द्वे एकचत्वारिंशोऽ
ध्यायः ४१ ब्रह्मोवाच अहंकारात्प्रसूतानि महाभूतानि पंच वै पृथिवी वायुराकाशमापो ज्योतिश्च पंचमम् १ ते
षु भूतानि मुह्यंति महाभूतेषु पंचसु शब्दस्पर्शनरूपेषु रसगंधक्रियासु च २

सर्वेषां सिद्धानां लोकः प्राप्यं स्थानम् ४ अहंकारेण त्रिगुणमयेन गुणान् शब्दादीन् आदरतो भोक्तुमिच्छतः पुरुषस्य भूतादिस्तामसोऽहंकारः सृज
ते भूतानि व्योमादीनि अतएव सभूतकृत् वैकारिकः सर्वाणि इंद्रियाणि सृष्ट्वा तैः दर्शनस्पर्शनादिकां क्रियां करोति तैजसः कर्मेंद्रियाणि पंच प्राणांश्च सृ
ष्ट्वा तद्द्वारा सर्वं भोक्तृवर्गं रंजयतीति ५ इति श्रीमन्महाभारते आश्वमेधिके पर्वणि टीकायां एकचत्वारिंशोऽध्यायः ४१ अहंकारात्तामसात् पृ
थिव्यादीनां पाठक्रमो न विवक्षितः १ एतेषु ये शब्दादयः संति तेषु निमित्तभूतेषु भूतानि मानुषादीनि मुह्यंति ते प्रसिद्धाः योगिनोऽपि मुह्यंतीत्यध्याहृत्य योज्यं

३

महाभूतानांदेहाकाराणांविनाशोमरणंतदंतेभयंनारकं तथाप्रलयेचदेवेनंदिनादौप्रत्युपस्थितेदाहशोषादिजंमहत्प्राणिनांभयम् ३ तत्रमरणस्यसर्वप्रत्यक्षत्वात्तदुपेक्ष्यप्रलयमाह यद्यदिति उत्तरोत्तरंअनुलोमं आकाशवाय्वग्निसलिलपृथिवीक्रमेण ४ ततइतिद्विविधानिभूतानिस्थूलानिसूक्ष्माणिचतत्र येःयोगबलेनसूक्ष्मेषुस्थूलानांप्रविलापनंकृतंतेतन्मात्रशरीराःसंतोनस्थूलेषुभूतेषुनश्यत्सुविनश्यंतीत्यर्थः ५ ननुकोशनाशेकोशकारइवस्थूलनाशेसूक्ष्माणिकथंननश्यंतीत्याशंक्याह शब्दइतिशब्दादयोविषयाः क्रियाश्वतद्ग्रहणरूपाः करणनित्याः करणात्मनामनोमात्रेणरूपेणनित्याः अविनाशिन्यः कारणनित्याइतिपाठेपिकारणंदहराकाशाख्यंसोपाधिब्रह्मतद्रूपेणनित्याः मोहसंज्ञिताः स्थूला अनित्या अनृतत्वात् तइमेसत्याः कामा अनृतापिधानाइतिश्रुतिर्हिसूक्ष्माणांसत्यत्वंतत्पिधायकानांस्थूलानामनृतत्वंचाह तस्माद्धर्मसुक्तंधीरानलीयंतेकदाचनेति ६ अनित्यानांलक्षणमाहसार्द्धेनलो

महाभूतविनाशांते प्रलये प्रत्युपस्थिते सर्वप्राणभृतांधीरामहदभ्युद्यतेभयम् ३ यद्यस्माज्जायतेभूतंतत्रतत्प्रविलीयते
लीयंतेप्रतिलोमानिजायंतेचोत्तरोत्तरम् ४ ततःप्रलीनेसर्वस्मिन् भूतेस्थावरजंगमे स्मृतिमंतस्तदाधीरानलीयंतेकदाच-
न ५ शब्दस्पर्शस्तथारूपंरसोगंधश्चपंचमः क्रियाकरणनित्यास्यु रनित्यामोहसंज्ञिताः ६ लोभप्रजनसंभूतानिर्विशेषा
ह्यकिंचनाः मांसशोणितसंघाताअन्योन्यस्योपजीविनः ७ बहिरात्मानइत्येतेदीनाःकृपणजीविनः ८ प्राणापानावुदान-
श्चसमानोव्यानएवच अंतरात्मानिचाप्यतेनियताःपंचवायवः वाङ्मनोबुद्धिभिःसार्द्धमिदमष्टात्मकंजगत् ९

भेति लोभोलब्धुमिच्छातस्यप्रजनंप्रजाफललोभपूर्वकंकर्मेत्यर्थः तस्मात्संभूताः सयुक्ताइतिपाठेकर्मबद्धाः निर्विशेषाःसर्वेषांपांचभौतिकत्वाविशेषात् अकिंचनाःनास्तिकिंचनवस्तुसत्यासुताः रज्जूरगवत्तुच्छाइत्यर्थः अन्योन्येतुजीवोजीवस्यजीवनमित्यर्थात्नश्वराः ७ बहिरात्मानःस्थूलशरीराणि दीनाःक्षुद्राधर्मपटुताःकृपणाजीविनःबाह्यस्वधनजीवनाः ८ नित्यानियावन्मोक्षस्थायीनिभूतान्याहसार्द्धेन प्राणेति अंतरात्माचितिच्छायायुक्तोहंकाराख्योजीवःप्राणादिपंचकंवाङ्मनोबुद्धित्रयंचेत्यष्टौउपाधित्वेननियतानियमेनसंबद्धाः एतदष्टकात्मकंजगत् अयंभावःमनसाह्येवपश्यतिमनसाशृणोतीत्यादिश्रुतेःचक्षुःश्रोत्रात्मकंमनएव सर्वकरणरूपम् करणानांचप्राणेभ्योदेवादेवेभ्योलोकाइतिचक्षुरादिभ्यःसूर्यादीनांतेभ्योरूपादीनांचोत्पत्तिश्रवणेनसर्वहेतुतयासर्वात्मकत्वादेतावन्मात्रंजगदितियुक्तमेवोक्तंअष्टात्मकंजगदिति ९ छ ॰ छ

त्वगिति एतेयंनदहंतिसविद्वान् ब्रह्मयातियस्मादन्यत् भूयोधिः कतरंनास्ति १० ११ एतदेवविस्तरेणप्रपंचयाति एकादशेत्यादिना १२ १३ १४ १५ उभ
यत्रउभयेष्वपिइंद्रियेषुमनोनुगतमितिशेषः मन्यंतेकृतकृत्याभवंतीत्यर्थः १७ सर्वेसर्वाणींद्रियाणि प्रत्येकंविविधानि भूतं आकाशादिः इंद्रियमध्यात्म

त्वक्घ्राणश्रोत्रचक्षूंषिरसनावाक्संयताः विशुद्धंचमनोयस्यबुद्धिश्चाव्यभिचारिणी १० अष्टौयस्याग्नयोह्येतेनदहंतेमनःस
दा सतद्ब्रह्मशुभंयातितस्माद्भूयोनविद्यते ११ एकादशचयान्याहुरिंद्रियाणिविशेषतः अहंकारात्प्रसूतानितानिवक्ष्याम्यहंद्विजाः
श्रोत्रंत्वक्चक्षुषीजिह्वानासिकाचैवपंचमी पादौपायुरुपस्थश्चहस्तौवाग्दशमीभवेत् १३ इंद्रियग्रामइत्येषमनएकादशंभवेत्
एतंग्रामंजयेत्पूर्वंततोब्रह्मप्रकाशते १४ बुद्धींद्रियाणिपंचाहुःपंचकर्मेंद्रियाणिच श्रोत्रादीन्यपिपंचाहुर्बुद्धियुक्तानितत्वतः १५
अविशेषाणिचान्यानिकर्मयुक्तानियानितु उभयत्रमनोज्ञेयंबुद्धिस्तद्द्वादशीभवेत् १६ इत्युक्तानींद्रियाण्या त्मन्येकादशयथा
क्रमम् मन्यंतेकृतमित्येवंविदित्वातानिपंडिताः १७ अतःपरंप्रवक्ष्यामिसर्वंविविधमिंद्रियम् आकाशंप्रथमंभूतंश्रोत्रमध्यात्म
मुच्यते १८ अधिभूतंतथाशब्दादिशस्तत्राधिदैवतम् द्वितीयंमारुतोभूतंत्वगध्यात्मंचविश्रुता १९ स्प्रष्टव्यमधिभूतंचविद्यु
त्तत्राधिदैवतम् तृतीयंज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते २० अधिभूतंततोरूपंसूर्यस्तत्राधिदैवतम् चतुर्थमापोविज्ञेयांजि
ह्वाचाध्यात्ममुच्यते २१ अधिभूतंरसश्चात्रसोमस्तत्राधिदैवतम् पृथिवीपंचमंभूतंघ्राणश्चाध्यात्ममुच्यते २२ अधिभूतंतथा
गंधोवायुस्तत्राधिदैवतम् एषुपंचसुभूतेषुत्रिषुयश्चविधिःस्मृतः २३ अतःपरंप्रवक्ष्यामिसर्वंविविधमिंद्रियम् पादावध्यात्म
मित्याहुर्ब्राह्मणास्तत्वदर्शिनः २४ अधिभूतंतुगंतव्यंविष्णुस्तत्राधिदैवतम् अवाग्गतिरपानश्चपायुरध्यात्ममुच्यते २५ अधि
भूतंविसर्गश्चमित्रस्तत्राधिदैवतम् प्रजनःसर्वभूतानामुपस्थोध्यात्ममुच्यते २६ अधिभूतंयथाशुक्रंदैवतंचप्रजापतिः हस्ता
वध्यात्ममित्याहुरध्यात्मविदुषोजनाः २७ अधिभूतंचकर्माणिशक्रस्तत्राधिदैवतम् वैश्वदेवीततःपूर्वावागध्यात्ममिहोच्यते
२८ वक्तव्यमधिभूतंचवन्हिस्तत्राधिदैवतम् अध्यात्ममनइत्याहुःपंचभूतात्मचारकम् २९ अधिभूतंचसंकल्पश्चंद्रमाश्चाधि
दैवतम् अहंकारस्तथाध्यात्मंसर्वसंसारकारकम् ३०

मं भूतगुणःशब्दादिरधिभूतम् इंद्रियानुग्राहिकोदेवतादिगादिरधिदैवंसर्वत्र
ज्ञेयम् १८ १९ २० २१ २२ त्रिषु अध्यात्माधिभूताधिदैवेषु २३ सर्वकर्मेंद्रियम् २४ २५ २६ २७ २८ २९ ३० ६५ ६५

महार्णवंमहार्णवसमंघोरम् एतदेवनिमित्तभूतंसत्सृष्टिसंहारबोधानांहेतुर्भवति ५९ इंद्रियाणांनिरोधेनइदंशरीरंत्यजन्सतःनित्यंविद्यमानानपिका मादींस्त्यजति ६० एतेस्थूलदेहरूपाःप्रकाशप्रवृत्तिमोहानिमित्तत्वेनत्रिगुणाःनिर्जिताःयोगबलेनातिक्रामिताःपरंब्राह्मम् ६१ ६२ मनसिहृदयपुंडरीके आत्मनिशरीरे ६३ एकधात्वंपदार्थसाक्षात्कारेणबहुधावैश्वरूपेण ६४ रूपाणिस्वशरीराणिशतशःपश्यति दीपाद्दीपशतंयथासद्यःवर्ततेएवंयोगिसंक

एतन्महार्णवंघोरमगाधंमोहसंज्ञितम् विक्षिपेत्संक्षिपेच्चैवबोधयेत्सामरंजगत् ५९ कामंक्रोधंभयंलोभमभिद्रोहमथानृतम् इंद्रियाणांनिरोधेनसतस्त्यजतिदुस्त्यजान् ६० यस्यैतेनिर्जितालोकेत्रिगुणाःपंचधातवः व्योम्नितस्यपरंस्थानमानंत्यमथलक्ष्यते ६१ पंचेंद्रियमहाकूलांमनोवेगमहोदकाम् नदींमोहह्रदांतीर्त्वाकामक्रोधावुभौजयेत् ६२ ससर्वदोषनिर्मुक्तस्ततः पश्यतितत्परम् मनोमनसिसंधायपश्यन्नात्मानमात्मनि ६३ सर्ववित्सर्वभूतेषुविंदत्यात्मानमात्मनि एकधाबहुधाचैवविकुर्वाणस्ततस्ततः ६४ ध्रुवंपश्यतिरूपाणिदीपाद्दीपशतंयथा सवैविष्णुश्चमित्रश्चवरुणोग्निःप्रजापतिः ६५ सहिधाताविधाताचसप्रभुःसर्वतोमुखः हृदयंसर्वभूतानांमहानात्माप्रकाशते ६६ तंविप्रसंघाश्चसुरासुराश्चयक्षाःपिशाचाःपितरोवयांसि रक्षोगणाभूतगणाश्चसर्वेमहर्षयश्चैवसदास्तुवंति ६७ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिगुरुशिष्यसंवादेद्विचत्वारिंशोऽध्यायः ४२ ब्रह्मोवाच मनुष्याणांतुराजानःक्षत्रियोमध्यमोगुणः कुंजरोवाहनानांचसिंहश्चारण्यवासिनाम् १ आविःपशूनांसर्वेषामहिस्तुबिलवासिनाम् गवांगोवृषभश्चैवस्त्रीणांपुरुषएवच २ न्यग्रोधोजंबुवृक्षश्चपिप्पलःशाल्मलिस्तथा शिंशपामेषशृंगश्चतथाकीचकवेणवः ३ एतेद्रुमाणांराजानोलोकेस्मिन्नात्रसंशयः हिमवान्पारियात्रश्चसह्योविंध्यस्त्रिकूटवान् ४ श्वेतोनीलश्चभासश्चकोष्ठवांश्चैवपर्वतः गुरुस्कंधोमहेंद्रश्चमाल्यवान्पर्वतस्तथा ५ एतेपर्वतराजानोगणानांमहतांतथा सूर्योग्रहाणामधिपोनक्षत्राणांचचंद्रमाः ६

ल्पमात्रादनेकानिशरीराणिप्रवर्तंते तएकधाभवतित्रिधाभवतीत्यादिश्रुतेः प्रदीपवदावेशइतिन्यायाच्च ६५ कथमेकंयोगिनःसामर्थ्यमुदेतीत्याशंक्यतस्यैवेश्वरत्वान्नैवमित्याह सहीति अतएवचानन्याधिपतिरितिन्यायश्चात्रानुसंधेयः ६६ ६७ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीकायांद्विचत्वारिंशोऽध्यायः ४२ अस्यैवानन्याधिपतेर्योगिनःईश्वरत्वसमर्थनार्थंविभूतीराह मनुष्याणामित्यादिना ब्राह्मणाधर्मसेतवइत्यंतेन मध्यमोगुणःरजोगुणप्रधानः १ २ ३ ४ ५ ६

७ ८ ९ १० ११ १२ ईश्वरत्वंऐश्वर्यंनरादीनांहरिरेवेत्यर्थः १३ १४ भगदेवाःकामुकाः तैरनुस्मृतानांस्त्रीणांसर्वासांमध्येमाहेश्वरीवामलोचनेतिसंबंधः १५ रतीनांप्रीतिसुखानांवसुमत्यः धनवत्यः धनलाभगर्वितंयत्प्रीतिसुखंतदेवंमहदित्यर्थः १६ १७ १८ १९ एवंविद्वान्विश्वैश्वर्यंप्राप्नोतीत्युक्तम् इदानींविद्वत्वप्राप्तिसाधनान्याह अहिंसेति २० २१ शब्दलक्षणमित्यादयोदृष्टांताः २२ भारतीपरकीयाविद्यास्वरव्यंजनसंस्कारवतीशब्देनैवलक्ष्यते २३ विधेयमा

यमःपितृणामधिपःसरितामथसागरः अंभसांवरुणोराजामरुतामिंद्रउच्यते ७ अर्कोधिपतिरुष्णानांज्योतिषामिंदुरुच्यते अग्निर्भूतपतिर्नित्यंब्राह्मणानांबृहस्पतिः ८ ओषधीनांपतिःसोमोविष्णुर्बलवतांवरः त्वष्टाधिराजोरूपाणांपशूनामीश्वरःशिवः ९ दीक्षितानांतथायज्ञोदेवानांमघवातथा दिशामुदीचीविप्राणांसोमोराजाप्रतापवान् १० कुबेरःसर्वरत्नानांदेवतानांपुरंदरः एष भूताधिपःसर्गःप्रजानांचप्रजापतिः ११ सर्वेषामेवभूतानामहंब्रह्ममयोमहान् भूतंपरतरंमत्तोविष्णोर्वापिनविद्यते १२ राजाधिराजःसर्वेषांविष्णुर्ब्रह्ममयोमहान् ईश्वरत्वंविजानीध्वंकर्तारमकृतंहरिम् १३ नरकिंनरयक्षाणांगंधर्वोरगरक्षसाम् देवदानवनागानांसर्वेषामीश्वरोहिसः १४ भगदेवानुयातानांसर्वासांवामलोचना माहेश्वरीमहादेवीप्रोच्यतेपार्वतीहिसा १५ उमांदेवींविजानीध्वंनारीणामुत्तमांशुभां रतीनांवसुमत्यस्तुस्त्रीणामप्सरसस्तथा १६ धर्मकामाश्चराजानोब्राह्मणाधर्मसेतवः तस्माद्राजाद्विजातीनांप्रयतेतस्यरक्षणे १७ राज्ञांहिविषयेयेषामवसीदंतिसाधवः हीनास्तेस्वगुणैःसर्वैःप्रेत्यचोन्मार्गगामिनः १८ राज्ञांहिविषयेयेषांसाधवःपरिरक्षिताः तेस्मिँल्लोकेप्रमोदंतेसुखंप्रेत्यचभुंजते १९ प्राप्नुवंतिमहात्मानइतिवित्तद्विजर्षभाः अतऊर्ध्वंप्रवक्ष्यामिनियतंधर्मलक्षणम् २० अहिंसापरमोधर्मोहिंसाचाधर्मलक्षणा प्रकाशलक्षणादेवामनुष्याःकर्मलक्षणाः २१ शब्दलक्षणमाकाशंवायुस्तुस्पर्शलक्षणः ज्योतिषांलक्षणंरूपमापश्चरसलक्षणाः २२ धारिणीसर्वभूतानांपृथिवीगंधलक्षणा स्वरव्यंजनसंस्काराभारतीशब्दलक्षणा २३ मनसोलक्षणंचिंताचिंतोक्ताबुद्धिलक्षणा मनसाचिंतितानर्थान्बुद्ध्याचेहव्यवस्यति २४ बुद्धिर्हिव्यवसायेनलक्ष्यतेनात्रसंशयः लक्षणंमनसोध्यानमव्यक्तंसाधुलक्षणम् २५ प्रवृत्तिलक्षणोयोगोज्ञानंसंन्यासलक्षणम् तस्मात्ज्ञानंपुरस्कृत्यसंन्यसेदिहबुद्धिमान् २६

हमनसइति इदंकर्तव्यंनवेत्यादिविचाराश्चिंतातयामनोनामकंतत्वंलक्ष्यते चिंतितानपिबुद्ध्या परीक्ष्यतेव्यवस्यतिनिश्चिनोति २४ एतदेवाहबुद्धिर्हीति व्यवसायेनइदमित्थमेवेतिनिश्चयेन मनसाश्चित्तस्यध्यानंलोकतःशास्त्रतोवानुभूतस्यविषयस्यपुनःपुनःउद्बोधकेसतिअसतिवाय त्स्फुरणंतत्चित्तस्यलक्षणं एवंमनोबुद्धिचित्तानांव्यक्तानिलक्षणान्युक्तानि साध्नोतीतिसाधुःपुरुषः तस्यलक्षणंअव्यक्तंनकेनचिदसौव्यज्यतेअपितुस्वयंप्रकाशतइत्यर्थः २५ एवंमनआदिभ्योविवेचितस्यपुरुषस्याधिगमोपायंकर्मनिंदापूर्वकमाह प्रवृत्तीति योगःकर्माणि २६

द्वंद्वंमानापमानादि अतीतोतिक्रांतः २७ गुणानांभूतेंद्रियादीनां धर्मस्वरूपंलक्षणानिसंयुक्तंसंयोगश्च तेषांसमाहारः धर्मलक्षणसंयुक्तंउक्तम् धर्मः कठिनत्वादिकंलक्षणंशब्दादिकंसंयुक्तं अन्योन्यंव्यतिरिक्तं इदानींतेषांग्रहणंकयादेवतयानुगृहीतेनकेनकरणेन कोवागुणोगृह्यतेइतिवक्ष्यते २८ पार्थिवइति विधीयतेअनुग्रहंकार्यते २९ धातुःसारः रसरूपः ३० ३१ ३२ ३३ मनसइति यथातेजोगुणोरूपंस्वाश्रयसहितंसूर्यानुगृहीतेनचक्षुषा गृह्यते एवंमनोगुणश्चितास्वाश्रयसहिता चेतनाधातुनाजीवेनानुगृहीतयाप्रज्ञयाप्रकृष्टज्ञस्थाधीइतिविशेषेणगृह्यतेमनोज्ञाने इतिगुणगुणिनोर्मनश्चिंतयोरभेदाभिप्रायेणोक्तम् ३४ एवंबुद्धिरध्यवसायेनस्वरूपेणगृह्यते एवंमहान्ज्ञानेनशुद्धसत्वरूपेणस्वरूपेणैवगृह्यते नतुकरणांतरेणइंद्रियवत्तत्रहेतुःनिश्चित्यग्रहणादिति यथारूपदर्शनेनकार्येणचक्षुरिंद्रियमस्तीतिज्ञायतेनतुतद्दृश्यतेऽतींद्रियत्वात् एवंबुद्धिमहांतो इदमित्थमेवेति अस्मीति

संन्यासीज्ञानसंयुक्तः प्राप्नोतिपरमांगतिम् अतीतोद्वंद्वमभ्येतितमोमृत्युजरातिगः २७ धर्मलक्षणसंयुक्तमुक्तंवोविधिवन्मया गुणानांग्रहणंसम्यग्वक्ष्याम्यहमतःपरम् २८ पार्थिवोयस्तुगंधोवैघ्राणेनहिसगृह्यते घ्राणस्थश्चतथावायुर्गंधज्ञानेविधीयते २९ अपांधातूरसोनित्यंजिह्वयासतुगृह्यते जिह्वास्थश्चतथासोमोरसज्ञानेविधीयते ३० ज्योतिषश्चगुणोरूपंचक्षुषातच्चगृह्यते चक्षुस्थश्चतदादित्योरूपज्ञानेविधीयते ३१ वायव्यस्तुसदास्पर्शस्त्वचाप्रज्ञायतेचसः त्वक्स्थश्चैवसदावायुःस्पर्शनेसविधीयते ३२ आकाशस्यगुणोघोषःश्रोत्रेणचसगृह्यते श्रोत्रस्थाश्चदिशःसर्वाःशब्दज्ञानेप्रकीर्तिताः ३३ मनसश्चगुणश्चिंताप्रज्ञयासतुगृह्यते हृदिस्थश्चेतनाधातुर्मनोज्ञानेविधीयते ३४ बुद्धिरध्यवसायेनज्ञानेनचमहांस्तथा निश्चित्यग्रहणंव्यक्तमव्यक्तेनात्रसंशयः ३५ अलिंगग्रहणोनित्यःक्षेत्रज्ञोनिर्गुणात्मकः तस्मादलिंगःक्षेत्रज्ञःकेवलंज्ञानलक्षणः ३६ अव्यक्तंक्षेत्रलिंगस्थंगुणानांप्रभवाप्ययम् सदापश्याम्यहंलीनंविजानामिशृणोमिच ३७ पुरुषस्तद्विजानीतेतस्मात्क्षेत्रज्ञउच्यते गुणवृत्तंतथाकृत्स्नंक्षेत्रज्ञःपरिपश्यति ३८

चैवंरूपेणनिश्चयेनलिंगेनैवतयोःस्वरूपंव्यक्तंवस्तुतस्त्वव्यक्तमेवइंद्रियत्वेनातींद्रियत्वात् ३५ एवंबुद्धेश्चक्षुर्वदतींद्रियत्वंसूर्यवत्स्वप्रकाश्यत्वंचोक्तंयस्तुतांगृण्हातितमाह अलिंगेति लिंगद्वारांग्रहणंबुद्ध्यादेरुक्तंक्षेत्रज्ञस्यतुनतथास्वयंज्योतिष्ट्वादित्यर्थः ज्ञानलक्षणः उपलब्धिमात्रस्वरूपः नतूपलब्धिलिंगः अलिंगत्वात् ३६ क्षेत्रज्ञपदमपिक्षेत्रोपलब्धिमात्रवाचिनतुतदुपलब्धिवाचीत्याह अव्यक्तमिति अव्यक्तांतंक्षेत्रम् तथागुणानां कार्यरूपाणांउत्पत्तिप्रलयंचप्रभवाप्ययमिति समाहारः अहंसाक्षी लीनःस्वाध्यस्तेनकर्ताछादितत्वात् अग्राह्यः क्षेत्रलिंगस्थमिति पाठेक्षेत्रलिंगेस्थूलसूक्ष्मशरीरेस्थितंगुणानांसत्वादीनांउत्पत्त्यादिनाज्ञेयं अव्यक्तंलीनमप्यहंपश्यामि ३७ गुणवृत्तंप्रकाशप्रवृत्तिमोहादि ३८ ७ ७

नदेवआदिमध्यावसानांतं उत्पत्यादिनाबद्धम् अंतशब्दोबद्धत्ववाची अतिअदिबंधनेइत्यस्यरूपं उह्यमानंचगुणवृत्तमेव सृज्यमानाइति परिणामि
नः कूटस्थंनपश्यंत्यपितुकूटस्थएवतान्प्रकाशयतीत्यर्थः ३९ सत्वं आत्मानं गुणभूतानांभोग्यानां पचम्यर्थेषष्ठी परंसत्यमितिसंबंधः ४० गुणान्दूरस्था
न् सत्वंबुद्धिंदर्शनेकरणभूतांपरित्यज्यक्षेत्रज्ञंपरमात्मानंविशति ४१ ४२ इत्याश्वमेधिकेपर्वणिटीकायांत्रिचत्वारिंशोऽध्यायः ४३ क्षेत्रज्ञ
प्रवेशरूपस्यमोक्षस्यनित्यत्वंस्वरूपमात्रत्वंचवक्तुंयज्जन्मादिमत्तदनित्यंकर्मप्राप्यंचेतिततसर्वमनुक्रामति यदादीति आदिमध्यपर्यंतम् जन्मादिमत्

आदिमध्यावसानांतंसृज्यमानमचेतनम् नगुणाविदुरात्मानंसृज्यमानाःपुनःपुनः ३९ नसत्वंविंदतेकाश्चित्क्षेत्रज्ञस्त्वेवविंद-
ति गुणानांगुणभूतानांयत्परंपरममहत् ४० तस्माद्गुणांश्चतत्वज्ञःपरित्यज्यहृदयर्थवित् क्षीणदोषोगुणातीतः क्षेत्रज्ञःप्रविशत्यथ ४१
निर्द्वंद्वोनिर्नमस्कारोनिःस्वाहाकारएवच अचलश्चानिकेतश्चक्षेत्रज्ञःसपरोविभुः ४२ इतिश्रीमन्महाभारते आश्वमेधिके
पर्वणिगुरुशिष्यसंवादेत्रिचत्वारिंशोऽध्यायः ४३ ब्रह्मोवाच यदादिमध्यपर्यंतंग्रहणोपायमेवच नामलक्षणसंयुक्तंस
र्वंवक्ष्यामितत्वतः १ अहःपूर्वंततोरात्रिर्मासाःशुक्लादयःस्मृताः श्रवणादीनिऋक्षाणिऋतवःशिशिरादयः २ भूमिरादिस्तुगंधानां
रसानामापएवच रूपाणांज्योतिरादित्यःस्पर्शानांवायुरुच्यते ३ शब्दस्यादिस्तथाकाशमेषभूतकृतोगुणः अतःपरंप्रवक्ष्यामिभूताना
मादिमुत्तमं ४ आदित्योज्योतिषामादिरग्निर्भूतादिरुच्यते सावित्रीसर्वविद्यानांदेवतानांप्रजापतिः ५ ॐकारःसर्ववेदानांवच
सांप्राणएवच यदस्मिन्नियतंलोकेसर्वंसावित्रिरुच्यते ६ गायत्रीछंदसामादिःप्रजानांसर्गउच्यते गावश्चतुष्पदामादिर्मनुष्याणां
द्विजातयः ७ श्येनःपतत्रिणामादिर्यज्ञानांहुतमुत्तमम् सरीसृपाणांसर्वेषांज्येष्ठःसर्पोद्विजोत्तमाः ८ कृतमादिर्युगानांचसर्वेषां-
नात्रसंशयः हिरण्यंसर्वरत्नानांमोषधीनांयवास्तथा ९ सर्वेषांभक्ष्यभोज्यानामन्नंपरममुच्यते द्रवाणांचैवसर्वेषांपेयानामाप-
उत्तमाः १० स्थावराणांतुभूतानांसर्वेषामविशेषतः ब्रह्मक्षेत्रंसदापुण्यंप्लक्षःप्रथमतःस्मृतः ११ अहंब्रह्मापतीनांचसर्वेषांनात्रसं
शयः ममविष्णुरचिंत्यात्मास्वयंभूरितिसःस्मृतः १२ पर्वतानांमहामेरुःसर्वेषामग्रजःस्मृतः दिशांचप्रदिशांचोर्ध्वादिक्पूर्वा
प्रथमातथा १३ तथात्रिपथगागंगानदीनामग्रजास्मृता तथासरोदपानानांसर्वेषांसागरोग्रजः १४ ग्रहणेउपायोस्त्यस्यतत् ग्रहणो
पायंकर्मसाध्यं तत्सर्ववक्ष्यामि १ २ ३ ४ अग्निर्जाठररूपीभूतानांजरायुजांडजानांयऊष्मारूपीप्रस्वेदवृष्टिहेतुतयास्वेदजोद्भिज्जानां ५ सिंहावलोक-
नेनसावित्रींव्याचष्टे उपासनार्थं नियतंजप्यं ब्राह्मणक्षत्रियादिम्लेच्छांतानांतत्सर्वंसावित्रिपदवाच्यम् ६ सर्गःसृष्ट्यादिकालः ७ हुतं अग्नौब्राह्मणे वा
देवतोद्देशेनदत्तम् सर्पोवासुकिः ८ ९ १० ११ १२ १३ सरोदपानानांसरसांकूपादीनांचसंधिरार्षः १४ ७ ७ ७

ईश्वरः रुद्रः १५ १६ १७ १८ १९ २० २१ २२ इत्याश्वमेधिकेपर्वणिटीकायांचतुश्चत्वारिंशोऽध्यायः ४४ अध्यायद्वयेनज्ञानोपायान् धर्मान्विव
क्षुरज्ञानांकालचक्राधीनत्वंदर्शयति बुद्धीत्यादिना अन्यूनानत्वपुराणत्वादिवदतीतत्वानागतत्वादिरपिद्रव्यस्यैवधर्मइत्यतीतानागतादिव्यवहारहेतुर्द्र
व्यमेवनतुकालोनामषष्ठःपदार्थस्तदर्थमेष्टव्यइतिमन्वानोदेहरूपंद्रव्यमेवकालचक्रत्वेनवर्णयति बुद्धिसारमित्यादिविशेषणयुक्तंकालचक्रंप्रवर्ततइति
नवमेनान्वयः बुद्धिरेवसारउपादेयांशोयस्मिन् मनस्तंभमनसास्तंभेनेवधृतम् महाभूतपरिस्कंधंपंचभूतसमूहात्मकम् स्कंधःस्यान्नृप तोवंशेसांपरा
यसमूहयोरितिमेदिनी निवेशपरिवेशनंरूप्येवयन्त्रनेमिवदावरणभूता १ संभवउत्पत्तिस्थानम् देशकालाभ्यांविचरतितथाश्रमःखेदःव्यायामस्तद्धेतुः

·देवदानवभूतानांपिशाचोरगरक्षसाम् नरकिंनरयक्षाणांसर्वेषामीश्वरः प्रभुः १५ आदिर्विश्वस्यजगतोविष्णुर्ब्रह्ममयोम
हान् भूतंपरतरंयस्मात्त्रैलोक्येनेहविद्यते १६ आश्रमाणांचसर्वेषांगार्हस्थ्यंनात्रसंशयः लोकानामादिरव्यक्तंसर्वस्यांत
स्तदेवच १७ अहान्यस्तमयांतानिउदयांताचशर्वरी सुखस्यांतंसदादुःखंदुःखस्यांतंसदासुखम् १८ सर्वेक्षयांतानिच
याःपतनांताःसमुच्छ्रयाः संयोगाश्चवियोगांतामरणांतंचजीवितम् १९ सर्वंकृतंविनाशांतंजातस्यमरणंध्रुवम् अशाश्वतंहि
लोकेस्मिन्सदास्थावरजंगमम् २० इष्टंदत्तंतपोधीतंव्रतानिनियमाश्चये सर्वमेतद्विनाशांतंज्ञानस्यांतोनविद्यते २१ तस्मात्
ज्ञानेनशुद्धेनप्रशांतात्माजितेंद्रियः निर्ममोनिरहंकारोमुच्यतेसर्वपाप्मभिः २२ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्व
णिगुरुशिष्यसंवादेचतुश्चत्वारिंशोऽध्यायः ४४ ब्रह्मोवाच बुद्धिसारंमनस्तंभमिंद्रियग्रामबंधनम् महाभूतपरिस्कं
धंनिवेशपरिवेशनम् १ जराशोकसमाविष्टंव्याधिव्यसनसंभवम् देशकालविचारीदंदमव्यायामनिस्वनम् २ अहोरात्रपरि
क्षेपंशीतोष्णपरिमंडलम् सुखदुःखार्तिसंक्लेशंक्षुत्पिपासावकीलनम् ३ छायातपविलेखंचनिमेषोन्मेषविह्वलम् घोरमो
हजनाकीर्णंवर्तमानमचेतनम् ४ मासार्द्धमासगणितंविषमंलोकसंचरम् तमोनियमपंकंचरजोवेगप्रवर्तकम् ५

दुर्गगमनादिः २ परिक्षेपश्चालकःपरिमंडलंपरिवेषः अंतःसंश्लेषःसंधिः अवकीलकाः अंतःप्रविष्टाःशंकवः ३ छायातपोमेघसंतापोविलेखोउत्खाता
रोयत्रतत् छायातपविलेखम् निमेषमात्रेणउन्मेषमात्रेणचविह्वलंव्याकुलं घोरंबीभत्संमोहजलंअश्रु शोकव्याप्तमित्यर्थः वर्तमानंसदागति अ
चेतनंजडं ४ मासादिनाकालेनपरिमितम् विषमंकदाचिन्मनुष्याकारम् कदाचित्पश्वाकारंकदाचिदन्याकारमिति लोकेषुऊर्ध्वम धोगतेषुसंच
रः संचरणंयस्य तमोनियमपंकंतमोगुणेनयोनियमःकर्मज्ञानयोर्निरोधः सएवपंकवत् मालिन्याख्यपापहेतुर्यस्मिन् रजोवेगप्रवर्तकं तमःसत्व
संमिश्रस्यरजसोवेगःविहितनिषिद्धकर्मसुप्रवर्तकोयत्र ५ छ छ छ छ छ छ

अहंकारोदर्पः सत्वाहंकारेति पाठेबुध्य हंकाराभ्यांचेतिततमित्यर्थः गुणैः सत्वादिभिः संजातंवर्तनमवस्थानंयस्य पाठांतरेमंडलंसंघातः अरतयः इष्टालाभजाः
परितापाः तान्यवग्रहणानीकानिबंधपाट्टिकाः समूहोयत्र शोकः संहारोमृत्युदुःखंताभ्यामेवर्तनंजीवनंयस्य ६ लोभः ईप्सातृष्णातेएवपरिविक्षोभाः निम्नो
न्नतदेशस्थानीयश्चक्रस्यास्फालनहेतुर्यत्र विचित्रंत्रिगुणात्मकत्वात्तच्चतदज्ञानंमायाततः संभवउत्पत्तिर्यस्य ७ आनंदप्रीतिचारबाह्यसुखासक्त्याच
रतीतितया ८ विशेषाः स्थूलपिंडादयः असक्तंक्वचिदपिक्षणमनिरुद्धम्प्रभवातिसंसरत्यनेनततप्रभवं तच्चतदव्ययंचेति अव्ययंसंसारकारणमित्यर्थः

महाहंकारदीप्तंचगुणसंजातवर्तनम् अरतिग्रहणानीकंशोकसंहारवर्तनम् ६ क्रियाकारणसंयुक्तंरागविस्तारमायतम् लो
भेप्सापरिविक्षोभंविचित्राज्ञानसंभवम् ७ भयमोहपरीवारंभूतसंमोहकारकम् आनंदप्रीतिचारंचकामक्रोधपरिग्रहम् ८
महदादिविशेषांतमसक्तप्रभवाव्ययम् मनोजवंमनःकांतंकालचक्रंप्रवर्तते ९ एतद्द्वंद्वसमायुक्तंकालचक्रमचेतनम् विसृ
जेत्संक्षिपेच्चापिबोधयेत्सामरजगत् १० कालचक्रप्रवृत्तिंचनिवृत्तिंचैवतत्वतः यस्तुवेदनरोनित्यंनसभूतेषुमुह्यति ११ वि
मुक्तः सर्वसंस्कारैः सर्वद्वंद्वविवर्जितः विमुक्तः सर्वपापेभ्यः प्राप्नोतिपरमांगतिम् १२ गृहस्थोब्रह्मचारीचवानप्रस्थोथभिक्षु
कः चत्वारआश्रमाः प्रोक्ताः सर्वेगार्हस्थ्यमूलकाः १३ यः कश्चिदिहलोकेस्मिन्नागमः परिकीर्तितः तस्यांतगमनंश्रेयः कीर्तिरे
षासनातनी १४ संस्कारैः संस्कृतः पूर्वंयथावच्चरितव्रतः जातोगुणविशिष्टायांसमावर्तेतनत्ववित् १५ स्वदारनिरतोनित्यंशिष्टा
चारोजितेंद्रियः पंचभिश्चमहायज्ञैः श्रद्दधानोयजेदिह १६ देवतातिथिशिष्टाशीनिरतोवेदकर्मसु इज्याप्रदानयुक्तश्चयथाश
क्तियथासुखम् १७ नपाणिपादचपलोननेत्रचपलोमुनिः नचवागंगचपलइतिशिष्टस्यगोचरः १८ नित्ययज्ञोपवीतीस्यात्शु
क्लवासाः शुचिव्रतः नियतोयमदानाभ्यांसदाशिष्टैश्चसंविशेत् १९ जितशिश्नोदरोमैत्रः शिष्टाचारसमन्वितः वैणवींधारयेद्यष्टिं
सोदकंचकमंडलुम् २० अधीत्याध्यापनंकुर्यात्तथायजनयाजने दानंप्रतिग्रहंवापिषड्गुणांवृत्तिमाचरेत् २१

९ द्वंद्वानिमानापमानादीनि तन्मयंदेहेंद्रियादिसंघातचक्रंरजस्तमः सत्वप्रधानंसत्सृष्टिसंहारतत्वज्ञानानांहेतुर्भवति १० प्रवृत्तिंप्रवृत्तिहेतुं
निवृत्तिंनिवृत्तिहेतुंवेदविदित्यहानोपादानकृतंनमुह्यति ११ १२ १३ आगमः विधिनिषेधशास्त्रम् १४ १५ १६ १७ गोचरः विषयोलक्षणमितिया
वत् १८ संविदइति पाठेकुर्यादितिशेषः १९ २० पाठांतरआप्लवनंव्रतसमाप्तिस्नानंसमावर्तनाख्यं वृत्तिंवर्तनम् २१

२२ २३ २४ २५ इत्याश्वमेधिकेटीकायांपंचचत्वारिंशोऽध्यायः ४५ एवमेतेनमार्गेणेत्यादिरध्यायोनिगदव्याख्यातः १ २ ३ ४ ५ ६ ७ ८

त्रीणिकर्माणिजानीतब्राह्मणानांतुजीविका याजनाध्यापनेचोभेशुद्धाच्चापिप्रतिग्रहः २२ अथशेषाणिचान्यानित्रीणिक
र्माणियानितु दानमध्ययनंयज्ञोधर्मयुक्तानितानितु २३ तेषुप्रमादंकुर्वीतत्रिषुकर्मसुधर्मवित् दांतोमैत्रःक्षमायुक्तःसर्वभूतस
मोमुनिः २४ सर्वमेतद्यथाशक्तिविप्रोनिर्वर्तयन्शुचिः एवंयुक्तोजयेत्स्वर्गंगृहस्थःसंशितव्रतः २५ इतिश्रीमन्महाभारते
आश्वमेधिकेपर्वणिगुरुशिष्यसंवादेपंचचत्वारिंशोऽध्यायः ४५ ब्रह्मोवाच एवमेतेनमार्गेणपूर्वोक्तेनयथाविधि अ
धीतवान्यथाशक्तितथैवब्रह्मचर्यवान् १ स्वधर्मनिरतोविद्वान्सर्वेंद्रिययतोमुनिः गुरोःप्रियहितेयुक्तःसत्यधर्मपरःशुचिः २ गु
रुणासमनुज्ञातोभुंजीतान्नमकुत्सयन् हविष्यभैक्ष्यभुक्चापिस्थानासनविहारवान् ३ द्विकालमग्निंजुह्वानःशुचिर्भूत्वासमाहि
तः धारयीतसदादंडंबैल्वंपालाशमेववा ४ क्षौमंकार्पासिकंचापिमृगाजिनमथापिवा सर्वंकाषायरक्तंवावासोवापिद्विजस्यह
५ मेखलाचभवेन्मौंजीजटानित्योदकस्तथा यज्ञोपवीतीस्वाध्यायीह्यलुब्धोनियतव्रतः ६ पूताभिश्चतथैवाद्भिःसदादेवततर्पणम्
भावेननियतःकुर्वन्ब्रह्मचारीप्रशस्यते ७ एवंयुक्तोजयेल्लोकान्वानप्रस्थोजितेंद्रियः नससरतिजातीषुपरमंस्थानमाश्रितः ८ सं
स्कृतःसर्वसंस्कारैस्तथैवब्रह्मचर्यवान् ग्रामान्निष्क्रम्यचारण्येमुनिःप्रव्रजितोवसेत् ९ चर्मवल्कलसंवासीसायंप्रातरुपस्पृशेत् अ
रण्यगोचरोनित्यंनग्रामंप्रविशेत्पुनः १० अर्चयन्नतिथीन्कालेदद्याच्चापिप्रतिश्रयम् फलपत्रावरैर्मूलैःश्यामाकेनचवर्तयन् ११
प्रवृत्तमुदकंवायुंसर्वंवानेयमाश्रयेत् प्राश्नीयादानुपूर्व्येणयथादीक्षमतंद्रितः १२ समूलफलभिक्षाभिरर्चेदतिथिमागतम् य
द्भक्ष्यंस्यात्ततोदद्याद्भिक्षांनित्यमतंद्रितः १३ देवतातिथिपूर्वंचसदाप्राश्नीतवाग्यतः अस्पर्द्धितमनाश्चैवलघ्वाशीदेवताश्रयः
१४ दांतोमैत्रःक्षमायुक्तःकेशान्श्मश्रुचधारयन् जुह्वन्स्वाध्यायशीलश्चसत्यधर्मपरायणः १५ शुचिदेहःसदादक्षोवाननित्यः
समाहितः एवंयुक्तोजयेत्स्वर्गंवानप्रस्थोजितेंद्रियः १६ गृहस्थोब्रह्मचारीचवानप्रस्थोथवापुनः यइच्छेन्मोक्षमास्थातुमुत्तमां
वृत्तिमाश्रयेत् १७ अभयंसर्वभूतेभ्योदत्वानैष्कर्म्यमाचरेत् सर्वभूतसुखोमैत्रःसर्वेंद्रिययतोमुनिः १८ अयाचितमसंक्लृप्तमु
पपन्नंयदृच्छया कृत्वाप्राह्णेचरेद्भैक्ष्यंविधूमेभुक्तवज्जने १९ वृत्तेशरावसंपातेभैक्ष्यंलिप्सेतमोक्षवित् लाभेनचनहृष्येत
नालाभेविमनाभवेत् २०

९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ७ ७

२१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

यात्रार्थीकालमाकांक्षन्चरेद्भैक्ष्यंसमाहितः लाभंसाधारणंनेच्छेन्नभुंजीताभिपूजितम् २१ अभिपूजितलाभाद्धिविजुगुप्से
तभिक्षुकः भुक्तान्यन्नानितिक्तानिकषायकटुकानिच २२ नास्वादयीतभुंजानोरसांश्चमधुरांस्तथा यात्रामात्रंचभुंजीतकेवलंप्रा
णधारणम् २३ असंरोधेनभूतानांवृत्तिंलिप्सेतमोक्षवित् नचान्यमन्नंलिप्सेतभिक्षमाणःकथंचन २४ नसन्निकाशयेद्धर्मंविमुक्ते
चारजाश्चरेत् शून्यागारमरण्यंवावृक्षमूलंनदींतथा २५ प्रतिश्रयार्थंसेवेतपार्वतींवापुनर्गुहाम् ग्रामैकरात्रिकंग्रीष्मवर्षास्वे
कत्रवावसेत् २६ अध्वासूर्येणनिर्दिष्टःकीटवच्चचरेन्महीम् दयार्थंचैवभूतानांसमीक्ष्यपृथिवींचरेत् २७ संचयांश्चनकुर्वीतस्ने
हवासंचवर्जयेत् पूताभिरद्भिर्नित्यंवैकार्यंकुर्वीतमोक्षवित् २८ उपस्पृशेदुद्धृताभिरद्भिश्चपुरुषःसदा अहिंसाब्रह्मचर्यंच
सत्यमार्जवमेवच २९ अक्रोधश्चानसूयाचदमोनित्यमपैशुनम् अष्टस्वेतेषुयुक्तःस्याद्व्रतेषुनियतेंद्रियः ३० अपापमशठंवृ
त्तमजिह्मंनित्यमाचरेत् जोषयेतसदाभोज्यंग्रासमागतमस्पृहः ३१ यात्रामात्रंचभुंजीतकेवलंप्राणयात्रिकम् धर्मलब्धमथा
श्नीयान्नकाममनुवर्तयेत् ३२ ग्रासादाच्छादनादन्यन्नगृण्हीयात्कथंचन यावदाहारयेत्तावत्प्रतिगृण्हीतनाधिकम् ३३ परे
भ्योनप्रतिग्राह्यंनचदेयंकदाचन दैन्यभावाच्चभूतानांसंविभज्यसदाबुधः ३४ नाददीतपरस्वानिनगृण्हीयादयाचितः नकिंचि
द्विषयंभुक्त्वास्पृहयेत्तस्यवैपुनः ३५ मृदमापस्तथान्नानिपत्रपुष्पफलानिच असंवृतानिगृण्हीयात्प्रवृत्तानिचकार्यवान् ३६
नशिल्पजीविकांजीवेद्धिरण्यंनोतकामयेत् नद्वेष्टानोपदेष्टाचभवेतनिरुपस्कृतः ३७ श्रद्धापूतानिभुंजीतनिमित्तानिचवर्ज-
येत् स्वधावृत्तिरसक्तश्चसर्वभूतैरसंविदम् ३८ आशीर्युक्तानिसर्वाणिहिंसायुक्तानियानिच लोकसंग्रहधर्मंचनैवकुर्यान्नकार
येत् ३९ सर्वभावानतिक्रम्यलघुमात्रःपरिव्रजेत् समःसर्वेषुभूतेषुस्थावरेषुचरेषुच ४० परंनोद्वेजयेत्कंचिन्नचकस्यचिदुद्वि-
जेत् विश्वास्यःसर्वभूतानामग्र्योमोक्षविदुच्यते ४१ अनागतंचनध्यायेन्नातीतमनुचिंतयेत् वर्तमानमुपेक्षेतकालाकांक्षीसमा
हितः ४२ नचक्षुषानमनसानवाचादूषयेत्क्वचित् नप्रत्यक्षंपरोक्षंवाकिंचिद्दुष्टंसमाचरेत् ४३ इंद्रियाण्युपसंहृत्यकूर्मोंगा
नीवसर्वशः क्षीणेंद्रियमनोबुद्धिर्निरीहःसर्वतत्त्ववित् ४४ निर्द्वंद्वोनिर्नमस्कारोनिःस्वाहाकारएवच निर्ममोनिरहंकारोनि
र्योगक्षेमआत्मवान् ४५ निराशीर्निर्गुणःशांतोनिरासक्तोनिराश्रयः आत्मसंगीचतत्त्वज्ञोमुच्यतेनात्रसंशयः ४६

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६

४७ ४८ ४९·५० ५१ ५२ ५३ ५४ ५५ ५६·५७ ५८ इत्याश्वमेधिकेपर्वणिटीकायांषट्चत्वारिंशोऽध्यायः ४६ संन्यासमित्यध्यायोपि

अपादपाणिपृष्ठंतदशिरस्कमनूदरम् प्रहीनगुणकर्माणंकेवलंविमलंस्थिरम् ४७ अगंधरसमस्पर्शमरूपाशब्दमेवच अनु
गम्यमनासक्तमसांसमापिचैवयत् ४८ निश्चितमव्ययंदिव्यंकूटस्थमपिसर्वदा सर्वभूतस्थमात्मानंयेपश्यंतिनतेमृताः ४९ न
तत्रकर्मतंबुद्धिर्नेंद्रियाणिनदेवताः वेदायज्ञाश्चलोकाश्चनतपोनव्रतानिच ५० यत्रज्ञानवतांप्राप्तिरलिंगग्रहणास्मृता तस्मा
दलिंगधर्मज्ञोधर्मतत्वमुपाचरेत् ५१ गूढधर्माश्रितोविद्वानज्ञानचरितंचरेत् अमूढोमूढरूपेणचरेद्धर्ममदूषयन् ५२ यथैव
मवमन्येरन्परेसततमेवहि तथावृत्तश्चरेच्छांतःसतांधर्मानकुत्सयन् ५३ यएवंवृत्तसंपन्नःसमुनिश्रेष्ठउच्यते इंद्रियाणीं
द्रियार्थांश्चमहाभूतानिपंचच ५४ मनोबुद्धिरहंकारमव्यक्तंपुरुषंतथा एतत्सर्वंसमाख्याययथावत्तत्वनिश्चयात् ५५ ततः
स्वर्गमवाप्नोतिविमुक्तःसर्वबंधनैः एतावदात्मवेलायांपरिसंख्यायतत्वविद् ५६ ध्यायेदेकांतमास्थायमुच्यतेथनिराश्रयः निर्मु
क्तःसर्वसंगेभ्योवायुराकाशगोयथा ५७ क्षीणकोशोनिरातंकःप्राप्नोतिपरमंपदम् ५८ इतिश्रीमन्महाभारते आश्वमेधिके
पर्वणिब्राह्मणगीतासुगुरुशिष्यसंवादेषट्चत्वारिंशोऽध्यायः ४६ ब्रह्मोवाच संन्यासंतपइत्याहुर्वृद्धानिश्चितदर्शि
नः ब्राह्मणाब्रह्मयोनिस्थाज्ञानंब्रह्मपरंविदुः १ अतिदूरात्मकंब्रह्मवेदविद्याव्यपाश्रयम् निर्द्वंद्वंनिर्गुणंनित्यमचिंत्यगुणमुत्त
मम् २ ज्ञानेनतपसाचैवधीराःपश्यंतितत्परम् निर्णिक्तमनसःपूताव्युत्क्रांतरजसोमलाः ३ तपसाक्षेममध्वानंगच्छंतिपरमेश्व
रम् संन्यासनिरतानित्यंयेचब्रह्मविदोजनाः ४ तपःप्रदीपइत्याहुराचाराधर्मसाधकः ज्ञानंवैपरमंविद्यात्संन्यासस्तपउत्तमम्
५ यस्तुवेदनिराबाधज्ञानंतत्वविनिश्चयात् सर्वभूतस्थमात्मानंससर्वगतिरिष्यते ६ योविद्वान्सहवासंचविवासंचैवपश्यति
तथैवैकत्वनानात्वेसदुःखात्प्रतिमुच्यते ७ योनकामयतेकिंचिन्नकिंचिदवमन्यते इहलोकस्थएवैषब्रह्मभूयायकल्पते ८ प्र
धानगुणतत्वज्ञःसर्वभूतप्रधानवित् निर्ममोनिरहंकारोमुच्यतेनात्रसंशयः ९ निर्द्वंद्वोनिर्नमस्कारोनिःस्वधाकारएवच
निर्गुणंनित्यमद्वंद्वंप्रशमेनैवगच्छति १० हित्वागुणमयंसर्वंकर्मजंतुःशुभाशुभम् उभेसत्यानृतेहित्वामुच्यतेनात्रसंशयः ११
अव्यक्तयोनिप्रभवोबुद्धिस्कंधमयोमहान् महाहंकारविटपइंद्रियांकुरकोटरः १२ महाभूतविशालश्चविशेषप्रतिशाखिनः
सदापत्रःसदापुष्पःशुभाशुभफलोदयः १३

मुच्यतेनात्रसंशयइत्यंतोग्रंथः पूर्वमेवगतार्थः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

१४ १५ द्वाविमाविति पक्षिणौजीवेश्वरौ संक्षिप्येतेययोस्तौसंक्षेपौनयोरूपाधीबुद्धिमायेतौ अचेतनौ सत्वायाविितिपाठेतु अचेतनौप्रतिबिंबत्वेन दृश्यौय-
क्तनाभ्यांप्रतिबिंबरूपाभ्यामन्यःबिंबस्थानीयः सचेतनामात्रशरीरोपिचेतनावानित्युच्यते साक्ष्यसंसर्गान्साक्षीतिवत् १६ अचेतनइति अचेतनइ
बाह्यधिगम्योदृश्योजीवइतियावत् सत्वसंख्याविमुक्तः सत्वानिप्राणिनः संख्यायंतेपृथक्त्वेनगण्यंतेयैस्तेदेहाद्युपाधयस्तैर्विमुक्तः सन्सत्वात्बुद्धेः
परंयद्वस्तुपरंचेतयतेबुद्ध्यादीन् अचेतनानपिचैतन्ययुक्तान्कुरुते सएवक्षेत्रज्ञसंज्ञअंतरात्मा कोसौसर्वसंख्यातबुद्धिः सर्वाः संख्याताः बुद्धयोयेन सर्वासांबुद्धीनांसाक्षित्वेनसंख्यातापरिच्छेदकइत्यर्थः सएषगुणगुंफितःसन् सर्वैर्दोषैर्युज्यतेगुणातिगस्तुतैर्मुच्यतेइति १७ इत्याश्वमेधिके
पर्वणिटीकायांसप्तचत्वारिंशोऽध्यायः ४७ एवंससाधनांब्रह्मविद्यांसमाप्यशिष्यबुद्धिपरीक्षार्थंव्यामिश्रैर्वाक्यैस्तामेवानुवदति केचिदित्या

आजीव्यःसर्वभूतानांब्रह्मवृक्षःसनातनः एवंछित्वाचभित्वाचतत्वज्ञानासिनाबुधः १४ हित्वासंगमयान्पाशान्मृत्युजन्मज
रोदयान् निर्ममोनिरहंकारोमुच्यतेनात्रसंशयः १५ द्वाविमौपक्षिणौनित्यौसंक्षेपौचाप्यचेतनौ एताभ्यांतुपरोयोन्यश्चेतनावान्सउ-
च्यते १६ अचेतनःसत्वसंख्याविमुक्तःसत्वात्परंचेतयतेंतरात्मा सक्षेत्रवित्सर्वसंख्यातबुद्धिर्गुणातिगोमुच्यतेसर्वपापैः १७ इ
तिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतासुगुरुशिष्यसंवादेसप्तचत्वारिंशोऽध्यायः ४७ ब्रह्मोवाच केचिद्ब्र
ह्ममयंवृक्षंकेचिद्ब्रह्मवनंमहत् केचित्तुब्रह्मचाव्यक्तंकेचित्परमनामयम् मन्यंतेसर्वमप्येतदव्यक्तप्रभवाव्ययम् १ उच्छ्वासमा
त्रमपिचेद्योंतकालेसमोभवेत् आत्मानमुपसंगम्यसोमृतत्वायकल्पते २

दिना केचित्सप्रपंचंब्रह्मेतिवदंतोवृक्षंसंसारंब्रह्ममयंब्रह्मणोविकारमाहुः ब्रह्मैवजगदाकारेणपरिणमतेइतिनदात्मानंस्वयमकुरुतसच्चत्यच्चाभव
न् आत्मकृतेःपरिणामादित्यादिश्रुतयःस्मृतयश्च केचित्परंवस्तु अनामयंनिर्विकारं तत्रजगत्स्वप्नवत्कल्पितं सयदास्वपितितदेनंवाक्सर्वैर्नामभिः
सहाप्येतिचक्षुःसर्वैरूपैःसहाप्येतिसयदाप्रतिबुध्यतेयथाग्नेर्ज्वलतःसर्वादिशोविस्फुलिंगाविप्रतिष्ठेरन्नेवमेवैतस्मादात्मनःसर्वेप्राणायथायतनंविप्रतिष्ठंतेप्राणेभ्योदेवादेवेभ्योलोकाइतिस्वप्नप्रबोध
योर्नामरूपात्मकस्यात्मन्येवलयोदयौश्रूयेतेमायामात्रंतुकार्त्स्न्येनआत्मनिचैवंविचित्राश्चहीतिस्मर्यतेच एवंश्रौतंमतद्वयमुक्त्वासांख्यमतमाह मन्यंतइति
१ तत्रप्रथमपक्षेउपासकानां आप्रायणादितिन्यायेन अंत्यप्रत्ययस्यावश्यकत्वमाह उच्छ्वासमात्रंतावन्मात्रकालंसमोनिर्विशेषःसर्वोवा समशब्द-
स्यसर्वपर्यायत्वात् सइदंसर्वंभवतीतिश्रुतेश्च आत्मानंहार्दंब्रह्मसंसम्यगुपास्य अमृतत्वायकल्पतेब्रह्मलोकप्राप्तिद्वारेत्यर्थः २ ५ ५

द्वितीयपक्षे अंतकालादन्यत्रापि सार्वणिकानिर्विकल्पसाक्षात्काराम्मुच्यत इत्याह निमेषेति विदुषांप्राप्तिंप्राप्तंकैवल्यं ३ तृतीयपक्षेपिमनोनिरोधेनमुच्यत
इत्याह प्राणायामैरिति द्वाभ्याम् प्राणाः इंद्रियाणिबुद्धिमनः सहितानिद्वादशैते आयम्यंतेनिगृह्यंते यैस्तैः प्राणायामैः यमानियमादिभिः तेचयमासन-
प्राणायामप्रत्याहार धारणाध्यानसमाधयस्तर्कवैराग्याभ्यांसहदशवामैत्रीकरणादिभिःसह द्वादशवायमाः पंचनियमाः पंच प्राणायामादयः षट्मैत्र्या
दयश्चतत्रतर्कवैराग्ये चेतिद्वाविंशतिर्वा संयम्याभिरोध्य पुनःपुनरिति यावज्जीवमेवंकार्यंनतुसकृत्प्रत्ययेनात्रसिद्धिरस्तीतिदर्शितम् चतुर्विंशात्
अव्यक्तात्परं अन्यंपंचविंशंपुरुषंलभते ४ यद्यदिच्छतितदापिलभतेयोगसामर्थ्यात् प्रसन्नात्मा विशुद्धसत्वः यदातु अव्यक्तात् अव्यक्तंप्राप्यसत्वंस
त्वगुणः उद्रिक्तंउत्कृष्टतरंभवति तदामृतत्वायकल्पते पूर्णशतसहस्रंचातिष्ठंत्यव्यक्ताचिंतकाइत्यव्यक्तमात्रनिष्ठानांस्वर्गकालावधिस्मरणात् चतुर्विं
शादव्यक्तात्परमितिवासंबंधः ५ धर्मज्ञानवैराग्यैश्वर्यादीनां आत्मप्राप्तिसाधनानांसत्वोत्कर्षलभ्यत्वात्सत्वमेवस्तौतिसार्द्धेनसत्वादिति सत्वसंश्रयंतं

निमेषमात्रमपिचेत्संयम्यात्मानमात्मनि गच्छत्यात्मप्रसादेनविदुषांप्राप्तिमव्ययाम् ३ प्राणायामैरथप्राणान्संयम्यसपुनः
पुनः दशद्वादशभिर्वापिचतुर्विंशात्परंततः ४ एवंपूर्वंप्रसन्नात्मालभतेयद्यदिच्छति अव्यक्तात्सत्वमुद्रिक्तममृतत्वायकल्पते
५ सत्वात्परतरंनान्यत्प्रशंसंतीहतद्विदः अनुमानाद्विजानीमःपुरुषंसत्वसंश्रयम् नशक्यमन्यथागंतुपुरुषंद्विजसत्तमाः
६ क्षमाधृतिरहिंसाचसमतासत्यमार्जवम् ज्ञानंत्यागोथसंन्यासःसात्विकंवृत्तमिष्यते ७ एतेनैवानुमानेनमन्यंतेथमनीषि-
णः सत्वंचपुरुषंचैवतत्रनास्तिविचारणा ८ आहुरेकत्वविद्वांसोयेज्ञानपरिनिष्ठिताः क्षेत्रज्ञसत्वयोरैक्यमित्येतन्नोपप
द्यते ९ पृथग्भूतंततःसत्वमित्येतदविचारितम् पृथग्भावश्चविज्ञेयःसहजश्चापितत्वतः १०

पुरुषंअन्यथासत्वासंश्रयइति-
गंतुंनशक्यंइतियोजना ६ वृत्तंपरिपाकः ७ पुरुषवत्स्वस्थत्वात्पुरुषोपकारित्वाच्चसत्वंपुरुषादभिन्नमितिमन्यंतेतार्किकाः अतएवते आत्मनि
सत्वधर्मान्कर्तृत्वादीन्वास्तवान्मन्यंतेइत्याह एतेनेतिद्वाभ्यांतत्रापिमन्यंतेप्रातीतिकंएकत्वंसांख्यादयः ८ तार्किकास्तुतदेववास्तवमित्याहुरितिविवे
कः एतद्दूषयति आहुरिति ९ सांख्यंप्रत्याह पृथगिति यदिसत्वंततःपुरुषात्पृथक् अन्यत् भूतंनित्यनिर्वृत्तंचस्यात् तर्हिमुक्तमप्यात्मानंनजह्यात् भूतत्वे
नतस्यानिरन्वयनाशायोगात् तस्मादनिर्मोक्षप्रसक्तिः इदंमतमविचारितं एतेन एकत्वपक्षोपिप्रत्युक्तएव कर्तृत्वादेर्वास्तवत्वेधर्मिनाशमंतरेणानिवृत्तेर्नै
रात्म्यमनिर्मोक्षोवाप्रसज्यतइतिभावः सिद्धांतमाह पृथग्भावश्चविज्ञेयःसहजश्चापितत्वतः सत्वपुरुषयोः समुद्रतरंगयोरिवशब्दतः प्रतीतितश्चपृथग्भावो
स्तिसत्वंचसमुद्रेतरंगइवपुरुषेसहजं एवंचविलीनतरंगस्येवमुक्तसत्वस्यपुनरुत्पत्त्ययोगान्नाविमोक्षइतिकल्पितभेदेनसंसारयात्रानिर्वाहः अकल्पिता
भेदेनमोक्षोपपत्तिरित्यर्थः १०

एवमपिसत्वपुरुषयोरेकजात्यापत्तेर्जडाजडविभागोनस्यादित्याशंक्याह तथैवेति नयःयुक्तिः नयइतिपाठे आलोचनपूर्वकोनिश्चयः यथाउदुंबरफलो
दरेबाह्यस्यान्यस्यप्रवेशायोगात्तदवयवएवमशकदेहस्ततोविजातीयःसन्नाविर्भवति एवंचिद्विलासएवसत्वंततःपृथग्भूयजडत्वेनाविर्भवतीत्यर्थः ११ सत्व
पुरुषयोःसंबंधेदृष्टांतःपर्णेइति असंगत्वात्पुरुषःसत्वधर्मैर्नलिप्यतेतत्रलेपप्रतीतिस्त्वाध्यासिकीतिभावः १२ उक्तेविद्यतेयेषुतेउक्तवंतःउक्तमर्थंस
म्यगवधृतवंतइत्यर्थः सहजस्यापिसत्वस्यपुरुषासंसर्गित्वंदुर्घटंब्राह्मणश्चवचनंप्रमिष्वेति तर्कश्रद्धाभ्यामुभयतोविरुद्धत्वात्संशयमापन्नाः १३ इ
त्याश्वमेधिकेपर्वणिटीकायांअष्टचत्वारिंशोऽध्यायः ४८ एवंसंदिहानाःप्रथमंवेदशास्त्रेषुमतभेदंदर्शयंति कोवेति निवृत्तिःधर्मोवाःपृष्ठेयःनक
र्मणेति कुर्वन्नेवहकर्माणीत्युभयविधश्रुतिदर्शनान्मुह्यामहेइतिभावः १ ऊर्ध्वंदेहात् देहनाशादूर्ध्वमपिआत्मास्तीत्येकेवदंतीतिसंबंधः नैतदितिलो

तथैवैकत्वनानात्वमिष्यतेविदुषांनयः मशकोदुंबरेचैक्यंपृथक्त्वमपिदृश्यते ११ मत्स्योयथान्यःस्यादप्सुसंप्रयोगस्तथातयोः
संबंधस्तोयबिंदूनांपर्णेकोकनदस्यच १२ गुरुरुवाच इत्युक्तवंतस्तेविप्रास्तदालोकपितामहम् पुनःसंशयमापन्नाः
पप्रच्छुर्मुनिसत्तमाः १३ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतासुगुरुशिष्यसंवादेअष्टचत्वारिंशोऽध्या
यः ४८ ऋषयऊचुः कोवास्विदिहकर्माणामनुष्ठेयतमोमतः व्याहतामिवपश्यामोधर्मस्यविविधांगतिम् १
ऊर्ध्वंदेहाद्वदंत्येकेनैतदस्तीतिचापरे केचित्संशयितंसर्वंनिःसंशयमथापरे २ अनित्यंनित्यमित्येकेनास्त्यस्तीत्यपिचापरे एकरू
पंद्विधेत्येकेव्यामिश्रमितिचापरे ३ मन्यंतेब्राह्मणाएवंब्रह्मज्ञास्तत्वदर्शिनः एवमेतेपृथक्चान्येबहुत्वमितिचापरे ४ देशका
लावुभौकेचिन्नैतदस्तीतिचापरे जटाजिनधराश्चान्येमुंडाःकेचिदसंवृताः ५ अस्नानंकेचिदिच्छंतिस्नानमप्यपरेजनाः मन्यंतेब्रा
ह्मणादेवब्रह्मज्ञास्तत्वदर्शिनः ६ आहारंकेचिदिच्छंतिकेचिच्चानशनेरताः कर्मकेचित्प्रशंसंतिप्रशांतिंचापरेजनाः ७

कायतिकाः सर्वंसंशयितमितिस्याद्वादिनःसप्तभंगानयज्ञाः निःसंशयमितिप्रातिस्विकंसर्वतैर्थिकाः २ अनित्यंसर्वंसृष्टिप्रलययुक्तमितिनार्किका
दयः नित्यंप्रवाहनित्यमितिमीमांसकाः नास्तीतिशून्यवादिनः अस्तिपरंतुक्षणिकमितिसौगताः एकरूपंविज्ञानमेवाद्विधाइदमर्थाकारमहमर्थाका
रमिति योगाचाराः व्यामिश्रंभिन्नमभिन्नंचेत्युडुलोमाः ३ एकेब्रह्मज्ञाःशास्त्रज्ञाःतत्वदर्शिनोपरोक्षज्ञानवंतः ब्राह्मणास्तुब्रह्मैवैकमस्तीतिमन्यंते
सगुणोपासकाः पृथक् असाधारणानिकर्माण्येवकारणानीत्यन्येमीमांसकाः बहुत्वमपिकारणानांप्राहुःपरमाणुवादिनः ४ देशकालावितिज्योतिर्वि
दः एतदृश्यंसर्वंकालत्रयेपिनास्तिस्वप्नराज्यवच्चिद्विलासमात्रमितिवृद्धाः ५ अस्नानंनैष्ठिकब्रह्मचर्यंस्नानंगार्हस्थ्यम् ६ ७ ५ ५

८ साधनं ध्यानादिकमुपास्य कृत्वापि नैतदस्तीति पश्चात्सर्वमपवदंतितथाचश्रुतिः नंनिरोधो नचोत्पत्तिर्नबद्धोनचसाधकः नमुमुक्षुर्नवैमुक्त इत्येषापर
मार्थतेति ९ पुण्येनपुण्यार्थमेवयतनेनेत्यन्ये एतत्पुण्यंनास्त्येवेत्यन्येलोकायताः १० संशयितेकु तमासिनवेतिसंदिग्धेपथि दुःखात्दुःखनिवृत्त्यर्थं
सुखात्सुखप्राप्त्यर्थं ध्यानंकर्तव्यम् निष्काममेवेत्यपरे ११ १२ ज्ञानंसन्यासंसंन्यासैकप्राप्यम् भूतचिंतकाः वस्तुतत्वविकारकाः स्वभावंसाधनपो

देशकालावुभौकेचिन्नैतदस्तीतिचापरे केचिन्मोक्षंप्रशंसंतिकेचिद्भोगान्पृथग्विधान् ८ धनानिकेचिदिच्छंतिनिर्धनत्वमथा
परे उपास्यसाधनंत्वेकेनैतदस्तीतिचापरे ९ अहिंसानिरताश्चान्येकेचिद्धिंसापरायणाः पुण्येनयशसाचान्येनैतदस्तीति
चापरे १० सद्भावनिरताश्चान्येकेचित्संशयमास्थिताः दुःखादन्येसुखादन्येध्यानमित्यपरेजनाः ११ यज्ञमित्यपरेविप्राःप्रदान
मितिचापरे तपस्त्वन्येप्रशंसंतिस्वाध्यायमपरेजनाः १२ ज्ञानंसंन्यासमित्येकेस्वभावंभूतचिंतकाः सर्वमेकेप्रशंसंतिनसर्वमितिचा
परे १३ एवंव्युत्थापितेधर्मेबहुधाविप्रबाधिते निश्चयंनाधिगच्छामःसंमूढाःसुरसत्तम १४ इदंश्रेयइदंश्रेयइत्येवंव्युत्थितोज
नः योहियस्मिन्रतोधर्मेसतंपूजयतेसदा १५ तेननोविहताप्रज्ञामनश्चबहुलीकृतम् एतद्विज्ञातुमिच्छामःश्रेयःकिमिति
सत्तम १६ अतःपरंतुयद्गुह्यंतद्भवान्वक्तुमर्हति सत्वक्षेत्रज्ञयोश्चापिसंबंधःकेनहेतुना १७ एवमुक्तःसतैर्विप्रैर्भगवाल्लोकभा
वनः तेभ्यःशशंसधर्मात्मायाथातथ्येनबुद्धिमान् १८ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिब्राह्मणगीतासुगुरुशि
ष्यसंवादेएकोनपंचाशत्तमोऽध्यायः ४९ ब्रह्मोवाच हंतवःसंप्रवक्ष्यामियन्मांपृच्छथसत्तमाः गुरुणाशिष्यमासा
द्ययदुक्तंतन्निबोधत १ समस्तमिहतच्छ्रुत्वासम्यगेवावधार्यताम् अहिंसासर्वभूतानामेतत्कृत्यतमंमतम् २ एतत्पदमनु
द्विग्नंवरिष्ठंधर्मलक्षणम् ज्ञानंनिःश्रेयइत्याहुर्वृद्धानिश्चितदर्शिनः ३ तस्माज्ज्ञानेनशुद्धेनमुच्यतेसर्वकिल्बिषैः हिंसापराश्चये
लोकेयेचनास्तिकवृत्तयः लोभमोहसमायुक्तास्तेवैनिरयगामिनः ४ आशीर्युक्तानिकर्माणिकुर्वतेयेत्वतंद्रिताः तेस्मिँल्लो
केप्रमोदंतेजायमानाःपुनःपुनः ५ कुर्वतेयेतुकर्माणिश्रद्दधानाविपश्चितः अनाशीर्योगसंयुक्तास्तेधीराःसाधुदर्शिनः ६ अतःप
रंप्रवक्ष्यामिसत्वक्षेत्रज्ञयोर्यथा संयोगोविप्रयोगश्चतन्निबोधतसत्तमाः ७

कृत्यस्वाभाव्यादेवज्ञानमुत्पद्यते आश्रमांतरेपिनसं
न्यासमात्रेणेत्याहुः १३ १४ १५ अविहिताआशिक्षिता आख्यातंत्वयेतिशेषः १६ मुख्यंप्रष्टव्यमाह अतःपरमिति १७ १८ इतिश्रीमन्महा
भारते आश्वमेधिकेपर्वणिटीकायांएकोनपंचाशत्तमोऽध्यायः ४९ पृष्टेष्वेतेषुपक्षेषुयद्धेयमुपादेयंचतत्संक्षेपेणाह हंतवइति १ २ ३ ४ ५ ६ ७

८ विषयविषयिभावो घटचक्षुषोरिवन केवलं प्रकाश्यप्रकाशकभावः अपितु भोज्यभोक्तृभावोप्यस्तीत्याह व्याख्यातमिति सार्द्धेन उदुंबरवत् सत्वंस्वात्मानंभोक्तारंचनवेत्ति भोक्तातुमशकवदुभयंवेत्तीत्यर्थः योविजानीतेसक्षेत्रज्ञइत्युत्तरेणान्वयः ९ सत्वपुरुषयोः संबंधस्याध्यासिकत्वमाह नित्यमिति नित्यंसर्वदासत्वंद्वंद्वैः सुखदुःखादिपरिणामैर्युक्तंगुणात्मकत्वात्सुखदुःखमोहात्मकंसंहतंचतद्विपरीतत्वात् निर्द्वंद्वः नित्यः निष्कलोनिर्गुणश्चपुरुषः अतस्तयोर्विषमस्वभावत्वान्नजतुकाष्ठादिवत् संबंधोयुज्यते यथोक्तम् निःसंगस्यससंगेनकूटस्थस्यविकारिणा आत्मनोनात्मनायोगोवास्तवोनोपपद्यतइति १० कोयंतर्हितयोर्विषयविषयिभावसंबंधउक्तइत्याह समइति यथासर्वत्रस्वप्नमायेंद्रजालरज्जूरगादौ अध्यस्तं अधिष्ठानेनसमंतुल्यंतदावरकमित्यर्थः अधिष्ठानंचाध्यस्तसंज्ञानुगतंतत्रस्वकीयसत्तास्फूर्तिसमर्पकंनथातदीयांसंज्ञामनुसरत् दृश्यतेतथासत्वंपुरुषेणसमंसत्वसंज्ञानुगतः पुरु

विषयोविषयित्वंचसंबंधोयमिहोच्यते विषयीपुरुषोनित्यंसत्वंचविषयःस्मृतः ८ व्याख्यातंपूर्वकल्पेनमशकोदुंबरंयथा भुज्यमानंनजानीतेनित्यंसत्वमचेतनम् यस्त्वेवंतंविजानीतेयोभुक्तेयश्चभुज्यते ९ नित्यंद्वंद्वसमायुक्तंसत्वमाहुर्मनीषिणः निर्द्वंद्वोनिष्कलोनित्यःक्षेत्रज्ञोनिर्गुणात्मकः १० समःसंज्ञानुगश्चैवसससर्वत्रव्यवस्थितः उपभुंक्तेसदासत्वमपःपुष्करपर्णवत् ११ सर्वैरपिगुणैर्विद्वान्व्यतिषिक्तोनलिप्यते जलबिंदुर्यथालोलःपद्मिनीपत्रसंस्थितः १२ एवमेवाप्यसंयुक्तःपुरुषःस्यान्नसंशयः द्रव्यमात्रमभूत्सत्वंपुरुषस्येतिनिश्चयः १३ यथाद्रव्यंचकर्ताचसंयोगोप्यनयोस्तथा यथाप्रदीपमादायकश्चित्तमसिगच्छति तथासत्वप्रदीपेनगच्छंतिपरमैषिणः १४ यावद्द्रव्यगुणस्तावत्प्रदीपःसंप्रकाशते क्षीणेद्रव्यगुणेज्योतिरंतर्धानायगच्छति १५

षः उपभुंक्ते तत्रदृष्टांतः अपइतियथापुष्करपर्णंआर्द्रैरसंसक्तमपिअपोभुंक्ते ताभिस्तस्याप्यायनात् एवंसत्वेनावृतः पुरुषःसत्वसमानत्वंगतःसत्वधर्मान् आत्मन्यभिमन्वानःसत्वंभुंक्ते तथाचैवंकूटस्थविकारिणोरपिपुंप्रकृत्योराध्यासिकःसंबंधउपपादितोभवति ११ प्रकारांतरेणदृष्टांतंविवृणोतिसर्वैरिति १२ समत्वमुपपादयतिएवमिति सर्पेणरज्जुरिवसत्वेन असंयुक्तोपिपुरुषःसइतिनिश्चितमेव तथापिसत्वंपुरुषश्चउभयंमिलित्वाद्रव्यमात्रंसत्वमात्रमभूत् यथारज्जुभुजंगौमिलित्वाभुजंगमात्रंभवतितद्वत् इतिनिश्चयः इदमेवनत्वंकल्पनांतरंतुष्णींनिमात्रमितिभावः १३ इदमेवद्वयोःसत्वमात्रत्वमनुसृत्यसत्वमेवात्मेतिमन्यमानाबौद्धाःपुरुषमपलपंतितन्नेत्याह यथेति सत्वंपुरुषश्चेत्युभयंयथाद्रव्यमात्रमभूत्तथाद्रव्यंइदमर्थःकर्ताहमर्थः तयोःसंयोगोदर्शनंचेतिकृत्स्नान्निष्ठापिद्रव्यमभूदित्यर्थः कुतस्तर्हिद्रव्यात्पुरुषस्यपृथक्त्वमतआह प्रदीपेति यथादीपेनैवदीपमन्यंचजानंतिएवंसत्त्वस्यपरिणामविशेषेणविद्याख्येनसत्वंपुरुषंचपृथक्जानीयादित्यर्थः १४ द्रव्यंतैलंगुणोवर्तिः १५ ५ ५ ५ ५

दार्ष्टांतिकमाह व्यक्तइति यथातैलवर्तिभ्यामवष्टब्धोदीपआत्मानंभवनाकाशंचव्याप्नोतितदभावेतुस्वयमेवांतर्द्धीयतेनतुभवनाकाशः एवंकर्मावष्टब्धः सत्वगुणश्चस्वमहिम्निरूपोऽभिव्यक्तःसन्स्वंचपुरुषंचपृथगवभासयति कर्मोपरमेतुस्वयमेवांतर्धीयतेपुरुषस्तुअव्यक्तःसमाधिसुषुप्तिसुखसाक्षीकेवलइष्यते १६ १७ १८ १९ कर्मसुज्ञानसाधनेषु आत्मनिचित्ते श्रेयोविषयेशुभाशुभदृष्टांतः पूर्णपुण्यपापेयः बहुपुण्यःसःपूर्णयोगमाप्नोति अल्पपुण्यस्त्वतितरांम्रियतेइतिभावः २० यथाचेति शास्त्ररथेनैवसंसाराध्वातिलंघनीयइतिभावः २१ २२ ऊर्ध्वमिति परपदमारुह्य शास्त्रमपित्याज्यमितिभावः २३ यावदिति चित्तशुद्धिपर्यंतंविधिशास्त्रंकैंकर्यंततस्तुयोगतत्वंजानन् उत्तरोत्तरंहंसंपरमहंसंवाश्रमंसम्यगवबुध्यगच्छेदित्यर्थः २४ २५

व्यक्तःसत्वगुणस्त्वेवंपुरुषोऽव्यक्तइष्यते एताहिंश्राविजानीतहंतभूयोब्रवीमिवः १६ सहस्रेणापिदुर्मेधानबुद्धिमधिगच्छति
चतुर्थेनाप्यथांशेनबुद्धिमान्सुखमेधते १७ एवंधर्मस्यविज्ञेयंसंसाधनमुपायतः उपायज्ञोहिमेधावीसुखमत्यंतमश्नुते १८ य
थाध्वानमपाथेयःप्रपन्नोमनुजःक्वचित् क्लेशेनयातिमहताविनश्यत्यंतरापिच १९ तथाकर्मसुविज्ञेयंफलंभवतिवानवा पु
रुषस्यात्मनिश्रेयःशुभाशुभनिदर्शनम् २० यथाचदीर्घमध्वानंपद्भ्यामेवप्रपद्यते अदृष्टपूर्वंसहसातत्वदर्शनवर्जितः २१
तमेवचयथाध्वानंरथेनेहाशुगामिना गच्छत्यश्वप्रयुक्तेनतथाबुद्धिमतांगतिः २२ ऊर्ध्वंपर्वतमारुह्यनान्ववेक्षेतभूतलम्
रथेनरथिनंपश्यन्क्लिश्यमानमचेतनम् २३ यावद्रथपथस्तावद्रथेनसतुगच्छति क्षीणेरथपथेविद्वान्रथमुत्सृज्यगच्छति २४
एवंगच्छतिमेधावीतत्वयोगविधानवित् परिज्ञायमहाबुद्धिरुत्तरादुत्तरोत्तरम् २५ यथार्णवंमहाघोरमप्लवःसंप्रगाहते बा
हुभ्यामेवसंमोहाद्वधंवांछत्यसंशयम् २६ नावाचापियथाप्राज्ञोविभागज्ञःस्वरित्रया अश्रांतःसलिलंगच्छेच्छीघ्रंसंतरे
त्तैर्ह्रदम् २७ तीर्णोगच्छेत्परंपारंनावमुत्सृज्यनिर्ममः व्याख्यातंपूर्वकल्पेनयथारथपदातिनोः २८ स्नेहात्संमोहमापन्नो
नाविदाशोयथातथा ममत्वेनाभिभूतःसंस्तत्रैवपरिवर्तते २९ नावंनशक्यमारुह्यस्थलेविपरिवर्तितुम् तथैवरथ-
मारुह्यनाप्सुचर्याविधीयते ३०

आचार्यरूपांनावंश्रयेदित्याह त्रिभिःश्लोकैःयथेति २६ स्वरित्रयाशोभनानि अरित्राणि कैनिपातनानियस्यांतया २७ तीर्णइतिसमावृत्तवत्निदिध्यासनार्थंगुरुमपित्यजेदितिभावः तावद्गुरुंसेवतेयावद्योगारूढोनभवतिरथमिवपर्वतारूढइतिपूर्वदृष्टांतंस्मारयति व्याख्यातमिति पदातिदृष्टांतोपिगुर्वभावेमार्गप्राप्तिरेवनभवतीत्यत्रबोध्यः २८ स्नेहादिति नात्यंतंगुरावेवस्थेयंसतिध्यानयोग्यत्वेइतिभावः २९ नावमिति कर्माधिकारिणायोगोयोगाधिकारिणाचकर्मनानुष्ठातुंयुक्तंइतिभावः ३० ५ ५ ५

कर्मह्रतंकर्मफलंचित्रंनानाविधंविषयस्थंपृथक्पृथक् एवंकर्मगृहस्थस्यश्लाघ्यंपरिव्राजस्यपातित्यहेतुः एवंव्यतिरेकोपिज्ञेयः विषयः आश्र-
मः तत्स्थम् एनान्कर्तॄन् ३१ एवंज्ञानसाधनान्युक्त्वाज्ञेयमाह यदिति गंधिगंधवत् रस्यंरसवत् ३२ गुणः कार्यंमहद्रूपंयत्प्रधानकार्यंतस्यापि
गुणोहंकारः ३३ महाभूतह्रतः वियदादिरूपत्वेनकल्पितः तेषांगुणास्तविषयाः शब्दादयएव ३४ बीजधर्मत्वंकारणत्वंप्रसवात्मकंकार्यरूपत्वं जी
वेतिपाठेपिजीवतोधान्यादेवधर्मोबीजत्वंनतुभर्जितधान्यादेरितिसएवार्थः यद्यपितेषांमते अव्यक्तस्यबीजत्वमेवास्तिनतुकार्यत्वंतथापि अहंतेतश्च

एवंकर्मकृतंचित्रंविषयस्थंपृथक्पृथक् यथाकर्मकृतंलोकेतथातदुपपद्यते ३१ यन्नैवगंधिनोरस्यंनरूपस्पर्शशब्दवत्
मन्यंतेमुनयोबुध्यातत्प्रधानप्रचक्षते ३२ तत्त्रप्रधानमव्यक्तमव्यक्तस्यगुणोमहान् महत्प्रधानभूतस्यगुणोहंकारएवच ३३
अहंकारात्तुसंभूतोमहाभूतकृतोगुणः पृथक्त्वेनहिभूतानांविषयावैगुणाःस्मृताः ३४ बीजधर्मंतथाव्यक्तंप्रसवात्मकमेवच
३५ बीजधर्मामहानात्माप्रसवश्चेतिनःश्रुतम् बीजधर्मस्त्वहंकारःप्रसवश्चपुनःपुनः ३६ बीजप्रसवधर्माणिमहाभूतानिपंच
वै बीजधर्माणिइत्याहुःप्रसवंचप्रकुर्वते विशेषाःपंचभूतानांतेषांचित्तंविशेषणम् ३७ तत्रैकगुणमाकाशंद्विगुणोवायुरुच्यते
त्रिगुणंज्योतिरित्याहुरापश्चापिचतुर्गुणाः ३८ पृथ्वीपंचगुणाज्ञेयाचरस्थावरसंकुला सर्वभूतकरीदेवीशुभाशुभनिदर्शना ३९
शब्दःस्पर्शस्तथारूपंरसोगंधश्चपंचमः एतेपंचगुणाभूमेर्विज्ञेयाद्विजसत्तमाः ४० पार्थिवश्चसदागंधोगंधश्चबहुधास्मृतः त
स्यगंधस्यवक्ष्यामिविस्तरेणबहून्गुणान् ४१ इष्टश्चानिष्टगंधश्चमधुरोम्लःकटुस्तथा निर्हारीसंहतःस्निग्धोरूक्षोविशदएव
च ४२ एवंदशविधोज्ञेयःपार्थिवोगंधइत्युत शब्दःस्पर्शस्तथारूपंद्रवश्चापांगुणाःस्मृताः ४३ रसज्ञानंतुवक्ष्यामिरसस्तुबहुधास्मृ
तः मधुरोम्लःकटुस्तिक्तःकषायोलवणस्तथा ४४ एवंषड्विधविस्तारोरसोवारिमयःस्मृतः शब्दःस्पर्शस्तथारूपंत्रिगुणंज्योतिरु
च्यते ४५ ज्योतिषश्चगुणोरूपंरूपंचबहुधास्मृतम् शुक्लंकृष्णंतथारक्तंनीलंपीतारुणंतथा ४६ ह्रस्वंदीर्घंकृशंस्थूलंचतुरस्रंतु
वृत्तवत् एवंद्वादशविस्तारंतेजसोरूपमुच्यते ४७

तिविरोधात्तदुपेक्ष्यमितिभावः ३५ पुनःपुनरितिदृष्टिसृष्टिरुक्ता ३६ बीजधर्मिणइ-
तितामेवोपपादयति विशेषाः शब्दादयः प्रसवंभोगकाले कार्यरूपेण उपस्थिता अपि संस्काररूपेणकालांतरेभोगदातृकारणात्मनावतिष्ठंते अत
एतेकारणरूपाश्चकार्यंसर्वदाकुर्वंति पूर्वेषांमृद्घटन्यायेनकार्यकारणभावः विशेषाणांतुबीजांकुरन्यायेनेतिभेदः तेषांविशेषाणामपिविशेषणंव्यावर्त
कंचित्तमेवचित्तएवविशेषाः सर्वेसंतिनबहिरित्यर्थः ३७ पंचभूतानांतेषांचित्तंविशेषणं ३७ तत्रैकगुणमित्यादिग्रंथोव्याख्यातःमोक्षधर्मेषुस्पष्टार्थश्च
३८ ३९ ४० ४० ४२ ४३ ४४ ४५ ४६ ४७ ५

४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ इत्याश्वमेधिकेटीकायांपंचाशोऽध्यायः ५० विशेषाएवंचभूतानामित्यत्रसूत्रितांसकलशास्त्ररहस्य
भूतांदृष्टिसृष्टिंप्रपंचयति भूतानामित्यादिनानियमेसंहारे विसर्गेउत्पत्तौचभूतानांमनएवईश्वरंसमर्थंयथातथा वक्ष्यतइति शेषः भूतात्मास्थिरि

कालेपिमनएवभूतानामात्मास्वरूपंकनकमिवकुंडलादेः १ अधिष्ठातानिमित्तकारणमपिकुंडलादिस्थानीयंमनएव क्षेत्रज्ञोजीवोपिमनएव एवंम
नसऐश्वर्यंबुद्धिर्विवेकजाप्रज्ञेवआचष्टे स्वप्रतीतिग्राह्यंमनसऐश्वर्यमित्यर्थः २ मनसऐश्वर्यंयोगैकगम्यमितितदधिगमार्थंयोगमाह इंद्रियाणी

विज्ञेयंब्राह्मणैर्वृद्धैर्धर्मज्ञैःसत्यवादिभिः शब्दस्पर्शौचविज्ञेयौद्विगुणोवायुरुच्यते ४८ वायोरप्यपिगुणःस्पर्शःस्पर्शश्चब
हुधास्मृतः रूक्षःशीतस्तथैवोष्णःस्निग्धोविशदएवच ४९ कठिनश्चिक्कणःश्लक्ष्णःपिच्छलोदारुणोमृदुः एवंद्वादशविस्तारो
वायव्योगुणउच्यते ५० विधिवद्ब्राह्मणैःसिद्धैर्धर्मज्ञैस्तत्वदर्शिभिः ५१ तत्रैकगुणमाकाशंशब्दइत्येवचस्मृतः तस्यशब्दस्यवक्ष्या
मिविस्तरेणबहून्गुणान् ५२ षड्जर्षभःसगांधारोमध्यमःपंचमस्तथा अतःपरंतुविज्ञेयोनिषादोधैवतस्तथा इष्टश्चानिष्टशब्द
श्चसंहतःप्रविभागवान् ५३ एवंदशविधोज्ञेयःशब्दआकाशसंभवः आकाशमुत्तमंभूतमहंकारस्ततःपरः ५४ अहंकारात्परा
बुद्धिर्बुद्धेरात्माततःपरः तस्मात्तुपरमव्यक्तमव्यक्तात्पुरुषःपरः ५५ परापरज्ञोभूतानांविधिज्ञःसर्वकर्मणाम् सर्वभूतात्मभू
तात्मागच्छत्यात्मानमव्ययम् ५६ इतिश्रीमन्महाभारतेआश्वमेधिकपर्वणिब्राह्मणगीतासुगुरुशिष्यसंवादेपंचाशो
ऽध्यायः ५० ब्रह्मोवाच भूतानामथपंचानांयथैषामीश्वरंमनः नियमेचविसर्गेचभूतात्मामनएवच १ अधिष्ठा
तामनोनित्यंभूतानांमहतांतथा बुद्धिरैश्वर्यमाचष्टेक्षेत्रज्ञश्चसउच्यते २ इंद्रियाणिमनोयुंक्तेसदश्वानिवसारथिः इंद्रि
याणिमनोबुद्धिःक्षेत्रज्ञेयुज्यतेसदा ३ महदश्वसमायुक्तंबुद्धिसंयमनंरथम् समारुह्यसभूतात्मासमंतात्परिधावति ४
इंद्रियग्रामसंयुक्तोमनःसारथिरेवच बुद्धिसंयमनोनित्यंमहान्ब्रह्ममयोरथः

तिमनःकर्तृयुंक्तेप्रयुंक्ते आत्मेंद्रियमनोयुक्तंभोक्तेतिश्रुतिंव्याचष्टे इंद्रियाणीति आत्मपदस्यप्रतिपदंबुद्धिपदंभोक्तेत्यस्यप्रतिपदंक्षेत्रइति
३ महांतःइंद्रियाश्वास्तैःसमायुक्तंबुद्ध्यासारथिभूतयासंयमनंनिग्रहोयस्यतम् रथंब्रह्ममयंकारणविकारभूतंशरीरस्थंभूतात्मा देहाभिमा
नीसर्वतःस्खलितःसन्धावति ४ अयमेवरथःइंद्रियग्रामेणवशीकृतेनसंयुक्तः सम्यक्समाहितःमनसाचसारथिनासंयुक्तःबुद्धिःसंयमःबुद्धि
प्रतोदश्चेत् महान्भवति बहिर्मुखार्नोद्रियबुद्धिमनांसि आत्मनोजीवत्वमापादयंति अंतर्मुखानि त्वस्यब्रह्ममयत्वंआविष्कुर्वंतीत्यर्थः ५

एवंनिग्राह्यत्वेनयोवेदसधीरोध्यानशीलः ६ अव्यक्ताद्यात्मकेब्रह्मवनेस्मिन्चेतनःसंचरतीत्याह अव्यक्तेतित्रिभिः ७ ८ ९ अस्मिन्नात्मनोलोके अग्रेनि
मेषमात्रेणस्थावरादिकंबाह्यंसर्वंलीयते नेत्रनिमीलनमात्रेणभूतानिप्रलीयंतेदृष्टिसृष्ट्यधिकारादित्यर्थः तदनंतरंभूतकृताःगुणाःशब्दादयोलीयंते ने
त्रवत्श्रोत्रादीनामपियुक्त्यानिमीलनेकृतेसतीत्यर्थः गुणेभ्यःलीनेभ्योनंतरंपंचभूतानिसूक्ष्मदेहारंभकाणिप्रलीयंते स्थूलानांप्रत्याहारेणैवसंहृत-
त्वात् एषदेहद्वयरूपोभूतसमुच्छ्रयइतिपंचभूतानीत्यस्यव्याख्याभूतानांलयेतुनिर्विशेषचिन्मात्रेणैवरूपेणावतिष्ठतइत्यर्थः सार्द्धश्लोकः १० देवा

एवंयोवेत्तिविद्वान्वैसदाब्रह्ममयंरथम् सधीरःसर्वभूतेषुनमोहमधिगच्छति ६ अव्यक्तादिविशेषांतंसहस्थावरजं
गमम् सूर्यचंद्रप्रभालोकंग्रहनक्षत्रमंडितम् ७ नदीपर्वतजालैश्चसर्वतःपरिभूषितम् विविधाभिस्तथाचाद्भिःसततंसम
लंकृतम् ८ आजीवंसर्वभूतानांसर्वप्राणभृतांगतिं एतद्ब्रह्मपरंनित्यंतस्मिंश्चरतिक्षेत्रवित् ९ लोकेस्मिन्यानिसत्वानिचरा
णिस्थावराणिच तान्येवाग्रेप्रलीयंतेपश्चाद्भूतकृतागुणाः गुणेभ्यःपंचभूतानिएषभूतसमुच्छ्रयः १० देवामनुष्यागंधर्वाःपिशाचासु
रराक्षसाः सर्वेस्वभावतःसृष्टानक्रियाभ्योनकारणात् ११ एतेविश्वसृजोविप्राजायंतीहपुनःपुनः तेभ्यःप्रसूतास्तेष्वेवमहाभूते
षुपंचसु १२ प्रलीयंतेयथाकालमूर्मयःसागरेयथा १२ विश्वसृग्भ्यस्तुभूतेभ्योमहाभूतास्तुसर्वशः भूतेभ्यश्चापिपंचभ्योमुक्तो
गच्छेत्परांगतिम् १३ प्रजापतिरिदंसर्वंमनसैवासृजत्प्रभुः तथैववेदानृषयस्तपसाप्रतिपेदिरे १४ तपसश्चानुपूर्व्येणफल
मूलाशिनस्तथा त्रैलोक्यंतपसासिद्धाःपश्यंतीहसमाहिताः १५ ओषधान्यगदादीनिनानाविधाश्चसर्वशः तपसैवप्रसि
ध्यंतितपोमूलंहिसाधनम् १६ यद्दुरापंदुराम्नायंदुराधर्षंदुरन्वयम् तत्सर्वंतपसासाध्यंतपोहिदुरतिक्रमम् १७ सुरापोब्र
ह्महास्तेयीभ्रूणहागुरुतल्पगः तपसैवसुतप्तेनमुच्यतेकिल्बिषात्ततः १८ मनुष्याःपितरोदेवाःपशवोमृगपक्षिणः यानिचा
न्यानिभूतानित्रसानिस्थावराणिच १९ तपःपरायणानित्यंसिध्यंतेतपसासदा तथैवतपसादेवामहामायादिवंगताः २०

दयः स्वाभदेवादिवत्स्वभावत एवउत्पन्नाःनयज्ञादिनानापिब्रह्मादिनेत्याह देवाइति ११ विश्वसृजोमरीच्यादयोपिभौतिकत्वाद्भूतलयेलीयंत इत्याह ए
तइतिसार्द्धेन १२ विश्वसृग्भ्यःस्थूलभूतेभ्यः परेमहाभूताःसूक्ष्मभूतानि तेभ्योपिपरांगतिंयुक्तोगच्छेत् पाठांतरेभूतानांयोविश्वसृड्विराट्स्मःस्वापादानभू
तानिप्रतिगच्छतीतिसर्वेत्यर्थः १३ मनसश्चेंद्रियाणांचएकाग्र्यंपरमंतपइत्युक्तलक्षणतपोबलेनसर्वंमनसैवसृज्यत इत्याहप्रजापतिरित्यादिना १४ तपसःसं
कल्पस्यआनुपूर्व्येणक्रमेण समाहिताःसमाधियुक्ताः १५ दुरापंइंद्रपदादिदुराम्नायंवेदादिदुराधर्षंवन्ह्यादिदुरन्वयंअसमाधेयंमहा
प्रलयादि १६ १७ १८ १९ २०

२१ २२ सुखोपचयम् लौकिकानां सुखानां उपचयो वृद्धिर्यस्मात्तं सुखोपचयं अखंडमानंदं एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतिप्र सिद्धम् २३ उपगम्य परावृत्य पूर्णं ध्यानयोगमप्राप्य ये म्रियंते ते प्रकृतिलीना भवंतीति २४ स्वमसंज्ञां गतः स्वयमव्यक्तत्वं प्राप्त इत्यर्थः २५ यः कारणत्वं प्राप्तः सर्वं सृजति तमेव निष्कलं क्षेत्रज्ञं ईश्वरमिति विद्यात् २६ चित्तं सम्यक्ज्ञानं चित्तसंज्ञानं इत्यस्माद्धेर्निष्ठा चित्तात् मनसा हेतुना उपागम्य प्राप्य संयतः सततं आसीत ततश्च यच्चित्तस्तन्मयो भवति कीटकभृंगन्यायेन यद्रूपं भावयति तद्देवायं भवतीत्यर्थः मन इति पाठे यच्चित्तं तदेव ईश्वरस्त द्व्यं दातुं समर्थ इत्यर्थः २७ तत्र दानार्थमाह अव्यक्तादीति यत्किंचिन्मदीयत्वेन कल्पितं तत्सर्वमविद्यात्मा निष्कलमात्मानमेव ध्यायेदित्यर्थः २८ २९

आशीर्युक्तानि कर्माणि कुर्वते ये त्वतंद्रिताः अहंकारसमायुक्तास्ते सकाशे प्रजापतेः २१ ध्यानयोगेन शुद्धेन निर्ममा निरहंकृताः प्राप्नुवंति महात्मानो महांतं लोकमुत्तमम् २२ ध्यानयोगमुपागम्य प्रसन्नमतयः सदा सुखोपचयमव्यक्तं प्रविशंत्यात्मवित्तमाः २३ ध्यानयोगादुपागम्य निर्ममा निरहंकृताः अव्यक्तं प्रविशंतीह महांतं लोकमुत्तमम् २४ अव्यक्तादेव संभूतः स्वमसंज्ञां गतः पुनः तमोरजोभ्यां निर्मुक्तः सत्वमास्थाय केवलम् २५ निर्मुक्तः सर्वपापेभ्यः सर्वं सृजति निष्कलम् क्षेत्रज्ञ इति तं विद्याद्यस्तं वेद स वेदवित् २६ चित्तं चित्तादुपागम्य मुनिरासीत संयतः यच्चित्तं तन्मयो वश्यं गुह्यमेतत्सनातनम् २७ अव्यक्तादि विशेषांतमविद्यालक्षणं स्मृतम् निबोधत तथा हीदं गुणलक्षणमित्युत २८ द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् २९ कर्म केचित्प्रशंसंति मंदबुद्धिरता नराः ये तु वृद्धा महात्मानो न प्रशंसंति कर्म ते ३० कर्मणा जायते जंतुर्मूर्तिमान्षोडशात्मकः पुरुषं ग्रसते विद्या तद्ग्राह्यममृताशिनाम् ३१ तस्मात्कर्मसु निःस्नेहा ये केचित्पारदर्शिनः विद्यामयोऽयं पुरुषो न तु कर्ममयः स्मृतः ३२ य एवममृतं नित्यमग्राह्यं शश्वदक्षरम् वश्यात्मानमसंश्लिष्टं यो वेद न मृतो भवेत् ३३ अपूर्वमकृतं नित्यं य एनमपराजितम् य एवं विंदेदात्मानमग्राह्यममृताशनम् अग्राह्योऽमृतो भवति स एभिः कारणैर्ध्रुवः ३४

३० षोडशात्मकः पंचमहाभूतानि एकादश विकाराश्च तदात्मकः तमेव षोडशात्मकं पुरुषं विद्या ग्रसते तदेव च ग्राह्यं उपादेयम् अमृतं देवानां विशेषं अश्नंति अमृताशिनस्तेषां अशिताशनमिति पाठे तृप्तानामपि तृप्तिकरं ३१ ३२ शश्वदक्षरं सर्वदा अपचयहीनं वश्यात्मा जितचित्तः असंश्लिष्टं असंगम् ३३ अपूर्वं मानांतरानवगतं अकृतं अकृत्रिमम् अविचारिणं कूटस्थं पाठांतरे स्पष्टोऽर्थः अमृताशनं ईश्वरग्रासकरीय इति श्रुतेः ईश्वरस्यापि संहर्तारं एभिर्वक्ष्य माणैः कारणैः ३४

चेनसः संस्कारामेत्याद्यस्तान् आयोज्य दृढान् कृत्वा आत्मानं चित्तं आत्मनि हृदयपुंडरीके संयम्य निरुध्य ३५ प्रसादेनैर्मल्ये प्रसादे शांतिं चित्तप्रसा
दस्य लक्षणं तु यथा स्वप्ने देहासंगेनावस्थानमस्ति तथा यदा योगयुक्त्या चित्तं बहिः संज्ञाशून्यं अंतः प्रचारि भवति तदेव प्रसादचिन्हम् ३६ एषा प्रसादरूपा
गतिर्मार्गः प्रवर्तते ताः प्रवृत्तयः त्रैकालिकाः पदार्थाः तान् परिणामजान् अतीताननागतांश्च त्रपश्यंति योगिनः ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५

आयोज्य सर्वसंस्कारान् संयम्यात्मानमात्मनि संतद्ब्रह्मशुभंवेत्ति यस्माद्भूयो न विद्यते ३५ प्रसादं चैव सत्वस्य प्रसादं समवाप्नु
यात् लक्षणं हि प्रसादस्य यथा स्यात्स्वप्नदर्शनम् ३६ गतिरेषा तु मुक्तानां ये ज्ञानपरिनिष्ठिताः प्रवृत्तयश्च याः सर्वाः पश्यंति परि
णामजाः ३७. एषा गतिर्विरक्तानामेष धर्मः सनातनः एषा ज्ञानवतां प्राप्तिरेतद्वृत्तमनिंदितम् ३८ समेन सर्वभूतेषु निस्पृहेण निरा
शिषा शक्या गतिरियं गंतु सर्वत्र समदर्शिना ३९ एतद्वः सर्वमाख्यातं मया विप्रर्षिसत्तमाः एवमाचरत क्षिप्रं ततः सिद्धिमवाप्स्य
थ ४० गुरुरुवाच इत्युक्तास्ते तु मुनयो गुरुणा ब्रह्मणा तथा कृतवंतो महात्मानस्ततो लोकमवाप्नुवन् ४१ त्वमप्ये
तन्महाभाग मयोक्तं ब्रह्मणो वचः सम्यगाचर शुद्धात्मंस्ततः सिद्धिमवाप्स्यसि ४२ वासुदेव उवाच इत्युक्तः स त
दा शिष्यो गुरुणा धर्ममुत्तमम् चकार सर्वं कौंतेय ततो मोक्षमवाप्तवान् ४३ कृतकृत्यश्च स तदा शिष्यः कुरुकुलोद्वह तत्प
दं समनुप्राप्तो यत्र गत्वा न शोचति ४४ अर्जुन उवाच को न्वसौ ब्राह्मणः कृष्ण कश्च शिष्यो जनार्दन श्रोतव्यं चे
न्मयैतद्वै तत्त्वमाचक्ष्व मे विभो ४५ वासुदेव उवाच अहं गुरुर्महाबाहो मनः शिष्यं च विद्धि मे त्वत्प्रीत्या गुह्यमेतच्च
कथितं मे धनंजय ४६ मयि चेदस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह अध्यात्ममेतच्छ्रुत्वा त्वं सम्यगाचर सुव्रत ४७ ततस्त्वं सम्य
गाचीर्णे धर्मेऽस्मिन्नरिकर्षण सर्वपापविनिर्मुक्तो मोक्षं प्राप्स्यसि केवलम् ४८ पूर्वमप्येतदेवोक्तं युद्धकाल उपस्थिते मया त
व महाबाहो तस्मादत्र मनः कुरु ४९ मया तु भरतश्रेष्ठ चिरदृष्टः पिता प्रभुः तमहं द्रष्टुमिच्छामि संमते तव फाल्गुन ५०
वैशंपायन उवाच इत्युक्तवचनं कृष्णं प्रत्युवाच धनंजयः गच्छावो नगरं कृष्ण गजसाह्वयमद्य वै ५१

अहमिति अहं क्षेत्रज्ञो गुरुः मनो मदीयं मया बोधनीयम् एतेन आत्मनो गुरुरात्मैवेत्युक्तं भवति ४६ सम्यगाचर यमनियमादिनिष्ठो भ
व ४७ केवलमिति क्रममुक्तिव्यावृत्तिः ४८ प्रागुक्तं स्मारयति अस्य च तस्य च एकवाक्यतां कारयितुम् पूर्वमिति ४९ कथमनुसंधत्ते
मयात्वित्यादिना ५० ५१ श्रीकृष्णार्पणमस्तु

५२ इत्याश्वमेधिकेपर्वणिटीकायांएकपंचाशोऽध्यायः ५१ ततोऽभ्यनोदयत् रथमित्यर्थद्वयेपिशेषः १ २ ३ ४ ५ ६ ७ विश्वकर्मन्नित्य

समेत्यतत्रराजानंधर्मात्मानंयुधिष्ठिरं समनुज्ञाप्यराजानंस्वांपुरींयातुमर्हसि ५२ इतिश्रीमन्महाभारतेआश्वमेधिके पर्वणिअनुगीतासुगुरुशिष्यसंवादेएकपञ्चाशोऽध्यायः ५१ वैशंपायनउवाच ततोऽभ्यनोदयत्कृष्णोयुज्यता मितिदारुकम् मुहूर्तादिववाचथयुक्तमित्येवदारुकः १ तथैवचानुयात्राणिचोदयामासपांडवः सज्जयध्वंप्रयास्यामोनगरंग जसाह्वयम् २ इत्युक्ताःसैनिकास्तेतुसज्जीभूताविशांपते आचख्युःसज्जमित्येवपार्थायामिततेजसे ३ ततस्तौरथमास्था यप्रयातौकृष्णपांडवौ विकुर्वाणौकथाश्चित्राःप्रीयमाणौविशांपते ४ रथस्थंतुमहातेजावासुदेवंधनंजयः पुनरेवाब्रवीद्वाक्यमि दंभरतसत्तम ५ त्वत्प्रसादाज्जयःप्राप्तोराज्ञावृष्णिकुलोद्वह निहताःशत्रवश्चापिप्राप्तंराज्यमकंटकम् ६ नाथवंतश्चभवता पांडवामधुसूदन भवंतंप्लवमासाद्यतीर्णाःस्मकुरुसागरम् ७ विश्वकर्मन्नमस्तेस्तुविश्वात्मन्विश्वसत्तम तथात्वामभिजाना मियथाचाहंभवान्मतः ८ त्वत्तेजःसंभवोनित्यंभूतात्मामधुसूदन रतिःक्रीडामयीतुभ्यंमायातेरोदसीविभो ९ त्वयिसर्वमि दंविश्वंयदिदंस्थाणुजंगमम् त्वंहिसर्वंविकुरुषेभूतग्रामंचतुर्विधम् १० पृथिवींचांतरिक्षंचद्यांचैवमधुसूदन हसितंतेऽम लाज्योत्स्नाऋतवश्चेंद्रियाणिच ११ प्राणोवायुःसततगःक्रोधोमृत्युःसनातनः प्रसादेचापिपद्माश्रीर्नित्यंत्वयिमहामते १२ रति स्तुष्टिर्धृतिःक्षान्तिर्मतिःकान्तिश्चराचरम् त्वमेवेहयुगांतेषुनिधनंप्रोच्यसेनघ १३ सुदीर्घेणापिकालेननतेशक्यागुणामया आत्माचपरमात्माचनमस्तेनलिनेक्षण १४ विदितोमेसुदुर्धर्षनारदाद्देवलात्तथा कृष्णद्वैपायनाच्चैवतथाकुरुपितामहात् १५ त्वयिसर्वंसमासक्तंत्वमेवैकोजनेश्वरः यच्चानुग्रहसंयुक्तमेतदुक्तंत्वयानघ १६ एतत्सर्वमहंसम्यगाचरिष्येजनार्दन इदंचा द्भुतमित्यर्थंकृतमस्मत्प्रियेप्सया १७ यत्पापोनिहतःसंख्येकौरव्योधृतराष्ट्रजः त्वयादग्धंहितत्सैन्यंमयाविजितमाहवे १८ भ वतातत्कृतंकर्मयेनवाप्तोजयोमया दुर्योधनस्यसंग्रामेतवबुद्धिपराक्रमैः १९ कर्णस्यचवधोपायोयथावत्संप्रदर्शितः सैंधवस्य चपापस्यभूरिश्रवसएवच २० अहंचप्रीयमाणेनत्वयादेवकिनंदन यदुक्तस्तत्करिष्यामिनहिमेत्रविचारणा २१ राजा नंचसमासाद्यधर्मात्मानंयुधिष्ठिरम् चोदयिष्यामिधर्मज्ञगमनार्थंतवानघ २२

दिनास्वबोधमाविष्करोति ८ रतिःरमणंक्रीडा मयीस्वर्गस्थित्यंतनलीलारूपातेतुभ्यंतवरोदसीद्यावापृथिवीतेतवमाया ९ १० ११ १२ १३ १४ १५ अनुग्रहः एतत्सम्यगाचरेत्याज्ञारूपः १६ दृष्टोपकार रमप्यभिनंदतिइदंचेति शेषंस्पष्टम् १७ १८ १९ २० २१ २२

२३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७

रुचिरंहिममैतत्तेद्वारकागमनंप्रभो अचिरादेवद्रष्टात्वंमातुलंमेजनार्दन २३ बलदेवंचदुर्धर्षंतथान्यान्वृष्णिपुंगवान् ए
वंसंभाषमाणौतौप्राप्तौवारणसाह्वयम् २४ तथाविविशतुश्चोभौसंप्रहृष्टनराकुलम् तौगत्वाधृतराष्ट्रस्यगृहंशक्रगृहोपमम्
२५ ददृशातेमहाराजधृतराष्ट्रंजनेश्वरम् विदुरंचमहाबुद्धिंराजानंचयुधिष्ठिरम् २६ भीमसेनंचदुर्धर्षंमाद्रीपुत्रौचपांडवौ
धृतराष्ट्रमुपासीनंयुयुत्सुंचापराजितम् २७ गांधारींचमहाप्रज्ञांपृथांकृष्णांचभामिनीम् सुभद्राद्याश्चताःसर्वाभरतानांस्त्रिय
स्तथा २८ ददृशतुस्त्रियःसर्वागांधारीपरिचारिकाः ततःसमेत्यराजानंधृतराष्ट्रमरिंदमौ २९ निवेद्यनामधेयस्वंतस्यपादावगृ
ह्णताम् . गांधार्याश्चपृथायाश्चधर्मराजस्यचैवहि ३० भीमस्यचमहात्मानौतथापादावगृह्णताम् क्षत्तारंचापिसंगृह्यपृष्ट्वाकुश
लमव्ययम् ३१ तैःसार्द्धंनृपतिंवृद्धंततस्तौपर्युपासताम् ततोनिशिमहाराजोधृतराष्ट्रःकुरूद्वहान् ३२ जनार्दनंचमेधावीव्यसर्जं
यतवैगृहान् तेऽनुज्ञातानृपतिनाययुःस्वंस्वंनिवेशनम् ३३ धनंजयगृहानेवययौकृष्णस्तुवीर्यवान् तत्रार्चितोयथान्याय
सर्वकामैरुपस्थितः ३४ कृष्णःसुष्वापमेधावीधनंजयसहायवान् प्रभातायांतुशर्वर्यांकृत्वापौर्वाह्णिकींक्रियां ३५ धर्मराज
स्यभवनंजग्मतुःपरमार्चितौ यत्रास्तेसहसामात्योधर्मराजोमहाबलः ३६ तौप्रविश्यमहात्मानौतद्गृहंपरमार्चितम् धर्मराज
ददृशातुर्देवराजमिवाश्विनौ ३७ समासाद्यतुराजानंवार्ष्णेयकुरुपुंगवौ निषेदतुरनुज्ञातौप्रीयमाणेनतेनतौ ३८ ततःसराजा
मेधावीविवक्षूप्रेक्ष्यतावुभौ प्रोवाचवदतांश्रेष्ठोवचनंराजसत्तमः ३९ युधिष्ठिरउवाच विवक्षूहियुवांमन्ये
वीरौयदुकुरूद्वहौ ब्रूतकर्तास्मिसर्वंवांनचिरान्माविचार्यताम् ४० इत्युक्तःफाल्गुनस्तत्रधर्मराजानमब्रवीत् विनीतवदुपाग
म्यवाक्यंवाक्यविशारदः ४१ अयंचिरोषितोराजन्वासुदेवःप्रतापवान् भवंतंसमनुज्ञाप्यपितरंद्रष्टुमिच्छति ४२ सगच्छे
दभ्यनुज्ञातोभवतायदिमन्यसे आनर्तनगरींवीरस्तदनुज्ञातुमर्हसि ४३ युधिष्ठिरउवाच पुंडरीकाक्षभद्रंते
गच्छत्वंमधुसूदन पुरींद्वारवतीमद्यद्रष्टुंशूरसुतंप्रभो ४४ रोचतेमेमहाबाहोगमनंतवकेशव मातुलश्चिरदृष्टोमेत्वयादेवीच
देवकी ४५ समेत्यमातुलंगत्वाबलदेवंचमानद पूजयेथामहाप्राज्ञमद्वाक्येनयथार्हतः ४६ स्मरेथाश्चापिमांनित्यंभीमंचबलि
नांवरम् फाल्गुनंसहदेवंचनकुलंचैवमानद ४७ आनर्तानवलोक्यत्वंपितरंचमहाभुज वृष्णींश्चपुनरागच्छेहयमेधममा
नघ ४८

३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८

४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ इत्याश्वमेधिकेपर्वणिटीकायांद्विपंचाशोऽध्यायः ५२ त
थाप्रयांतंवार्ष्णेयमित्यादिग्रंथः पूर्वोक्तास्तूपनिषत्सु विद्याफलंविश्वरूपदर्शनंविद्यासाधनंगुरोराराधनंचेतिद्वयमिहोक्तं विवरीतुंउतंकोपाख्यानव्या

संगच्छरत्नान्यादायविविधानिवसूनिच यच्चाप्यन्यन्मनोज्ञंतेतद्ध्यादत्स्वसात्वत ४९ इयंचवसुधाकृत्स्नाप्रसादात्तवकेशव
अस्मानुपगतावीरनिहताश्चापिशत्रवः ५० एवंब्रुवतिकौरव्येधर्मराजेयुधिष्ठिरे वासुदेवोवरःपुंसामिदंवचनमब्रवीत् ५१
तवैवरत्नानिधनंचकेवलंधरातुकृत्स्नातुमहाभुजाद्यवै यदस्तिचान्यद्द्रविणंगृहेममत्वमेवतस्येश्वरनित्यमीश्वरः ५२ तथेत्य
थोक्तःप्रतिपूजितस्तदागदाग्रजोधर्मसुतेनवीर्यवान् पितृष्वसारंत्ववदद्यथाविधिसंपूजितश्चाप्यगमत्प्रदक्षिणम् ५३ तया
ससम्यक्प्रतिनंदितस्ततस्तथैवसर्वैर्विदुरादिभिस्तथा विनिर्ययौनागपुराद्गदाग्रजोरथेनदिव्येनचतुर्भुजःस्वयम् ५४ रथे
सुभद्रामधिरोप्यभाविनींयुधिष्ठिरस्यानुमतेजनार्दनः पितृष्वसुश्चापितथामहाभुजोविनिर्ययौराजजनाभिसंवृतः ५५ तम-
न्वयाद्वानरवर्यकेतनःससात्यकिर्माद्रवतीसुतावपि अगाधबुद्धिर्विदुरश्चमाधवंस्वयंचभीमोगजराजविक्रमः ५६ निवर्त
यित्वाकुरुराष्ट्रवर्धनांस्ततःससर्वान्विदुरंचवीर्यवान् जनार्दनोदारुकमाहसत्वरः प्रचोदयाश्वानितिसात्यकिंतथा ५७ ततो
ययौशत्रुगणप्रमर्दनःशिनिप्रवीरानुगतोजनार्दनः यथानिहत्यारिगणंशतक्रतुर्दिवंतथानर्तपुरींप्रतापवान् ५८ इ
तिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिकृष्णप्रयाणेद्विपंचाशोऽध्यायः ५२ वैशंपायनउवाच तथाप्रयां-
तंवार्ष्णेयंद्वारकांभरतर्षभाः परिष्वज्यन्यवर्तंतसानुयात्राःपरंतपाः १ पुनःपुनश्चवार्ष्णेयंपर्यष्वजतफाल्गुनः आचक्षुर्विष
याच्चैनंसददर्शपुनःपुनः २ कृच्छ्रेणैवतुतांपार्थोगोविंदेविनिवेशिताम् संजहारततोदृष्टिंकृष्णश्चाप्यपराजितः ३ तस्यप्रयाणे
यान्यासन्निमित्तानिमहात्मनः बहून्यद्भुतरूपाणितानिमेगदतःशृणु ४ वायुर्वेगेनमहतारथस्यपुरतोववौ कुर्वन्निःशर्कर
मार्गंविरजस्कमकंटकम् ५ ववर्षवासवश्चैवतोयंशुचिसुगंधिच दिव्यानिचैवपुष्पाणिपुरतःशार्ङ्गधन्वनः ६ सप्रयातोम
हाबाहुःसमेषुमरुधन्वसु ददर्शाथमुनिश्रेष्ठमुतंकममितौजसम् ७ सतंसंपूज्यतेजस्वीमुनिंपृथुललोचनः पूजितस्तेन
चतदापर्यपृच्छदनामयम् ८ सपृष्टःकुशलंतेनसंपूज्यमधुसूदनम् उतंकोब्राह्मणश्रेष्ठस्ततःपप्रच्छमाधवम् ९

जेनप्रवर्ततेतत्तउपरिष्टादश्वमेधव्याजेनकर्मणामप्याराद्उपकारकत्वंविद्यायामुच्यतइतिसंगतिः १ २ ३ ४ ५ ६ ७ ८ ९

१० ११ १२ १३ १४ सोशाम्येसोरस्य १५ १६ १७ १८ १९ २० २१ मिथ्याचारेणकपटपूर्वकं अधिरोधच्छलेन

कच्चिच्छौरेत्वयागत्वाकुरुपांडवसद्मतत् कृतंसौभ्रात्रमचलंतन्मेव्याख्यातुमर्हसि १० अपिसंधायतान्वीरानुपावृत्तोसिकेश
व संबंधिनःस्वदयितान्सततंवृष्णिपुंगव ११ कच्चित्पांडुसुताःपंचधृतराष्ट्रस्यचात्मजाः लोकेषुविहरिष्यंतित्वयासहपरंतप १२
स्वराष्ट्रेषुचराजानःकच्चित्प्राप्स्यंतिवैसुखम् कौरवेषुप्रशांतेषुत्वयानाथेनकेशव १३ यामेसंभावनातातत्वयिनित्यमवर्तत अ
पिसासफलातातकृतातेभरतान्प्रति १४ श्रीभगवानुवाच कृतोयत्नोमयापूर्वंसौशाम्येकौरवान्प्रति नाशक्यंतयदा
शाम्येतेस्थापयितुमंजसा १५ ततस्तेनिधनंप्राप्ताःसर्वेससुतबांधवाः नदिष्टमप्यतिक्रांतुंशक्यंबुद्ध्याबलेनवा १६ महर्षेविदि
तंभूयःसर्वमेतत्तवानघ तेऽत्यक्रामन्मतिंमह्यंभीष्मस्यविदुरस्यच १७ ततोयमक्षयंजग्मुःसमासाद्येतरेतरम् पंचैवपांडवाःशि
ष्टाहतामित्राहतात्मजाः १८ धार्तराष्ट्राश्चनिहताःसर्वेससुतबांधवाः इत्युक्तवचनेकृष्णेभृशंक्रोधसमन्वितः उत्तंकइत्युवाचैनंरो
षादुत्फुल्ललोचनः १९ उत्तंकउवाच यस्माच्छक्तेनतेकृष्णनत्राताःकुरुपुंगवाः संबंधिनःप्रियास्तस्माच्छप्स्येहंत्वामसं
शयम् २० नचतेप्रसभंयस्मात्तेनिगृह्यनिवारिताः तस्मान्मन्युपरीतस्त्वांशप्स्यामिमधुसूदन २१ त्वयाशक्तेनहिसतामिथ्या
चारेणमाधव तेपरीताःकुरुश्रेष्ठानश्यंतस्मह्युपेक्षिताः २२ वासुदेवउवाच शृणुमेविस्तरेणेदंयद्वक्ष्येभृगुनंदन गृ
हाणानुनयंचापितपस्वीह्यसिभार्गव २३ श्रुत्वाचमेतदध्यात्मंमुंचेथाःशापमद्यवै नचमांतपसाल्पेनशक्तोभिभवितुंपुमान् २४
नचत्वांतपसोनाशमिच्छामितपतांवर तपस्तेसुमहद्दीप्तंगुरवश्चापितोषिताः २५ कौमारंब्रह्मचर्यंतेजानामिद्विजसत्तम दुः
खार्जितस्यतपसस्तस्मान्नेच्छामितेव्ययम् २६ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणि उत्तंकोपाख्यानेत्रिपंचाशोऽ
ध्यायः ५३ उत्तंकउवाच ब्रूहिकेशवतत्त्वेनत्वमध्यात्ममनिंदितम् श्रुत्वाश्रेयोऽभिधास्यामिशापंवातेजनार्दन १
वासुदेवउवाच तमोरजश्चसत्त्वंचविद्धिभावान्मदाश्रयान् तथारुद्रान्वसूंश्चापिविद्धिमत्प्रभवान्द्विज २ मयिसर्वाणिभू
तानिसर्वभूतेषुचाप्यहम् स्थितइत्यभिजानीहिमातेभूदत्रसंशयः ३ तथादैत्यगणान्सर्वान्यक्षगंधर्वराक्षसान् नागानप्स
रसश्चैवविद्धिमत्प्रभवान्द्विज ४ सदसच्चैवयत्प्राहुरव्यक्तंव्यक्तमेवच अक्षरंचक्षरंचैवसर्वमेतन्मदात्मकम् ५

विरोधहढंया-
नाःपरीताःपरितःप्राप्ताः २२ अनुनयंशिक्षाम् २३ मेमत्तः २४ २५ २६ इत्याश्वमेधिकेपर्वणिटीकायांत्रिपंचाशोऽध्यायः ५३ ब्रूहीति १ २
३ ४ ५

६ असत् शशशृंगादि सदसत् घटादि सदसत्परं अव्यक्तम् एतत् उभयमपि मत्तः परं नास्तीत्यर्थः ७ ८ ९ १० ११ १२ १३ १४ १५

येचाश्रमेषुवैधर्माश्चतुर्धाविदितामुने वैदिकानिचसर्वाणिविद्धिसर्वंमदात्मकम् ६ असच्चसदसच्चैवयद्विश्वंसदसत्परम्
मत्तःपरतरंनास्तिदेवदेवात्सनातनात् ७ ओंकारप्रमुखान्वेदान्विद्धिमांत्वंभृगूद्वह यूपसोमंचरुंहोमंत्रिदशाप्यायनंमखे
८ होतारमपिहव्यंचविद्धिमांभृगुनंदन अध्वर्युःकल्पकश्चापिहविःपरमसंस्कृतम् ९ उद्गाताचापिमांस्तौतिगीतघोषैर्महाध्व
रे प्रायश्चित्तेषुमांब्रह्मन्शांतिमंगलवाचकाः १० स्तुवंतिविश्वकर्माणंसततंद्विजसत्तम ममविद्धिसुतंधर्मंमग्रजंद्विजसत्तम ११
मानसंदयितंविप्रसर्वभूतदयात्मकम् तत्राहंवर्तमानैश्चनिवृत्तैश्चैवमानवैः १२ बह्वीःसंसरमाणोवैयोनीर्वर्तामिसत्तम ध
र्मसंरक्षणार्थायधर्मसंस्थापनायच १३ तैस्तैर्वेषैश्चरूपैश्चत्रिषुलोकेषुभार्गव अहंविष्णुरहंब्रह्माशक्रोथप्रभवाप्ययः १४
भूतग्रामस्यसर्वस्यस्रष्टासंहारएवच अधर्मेवर्तमानानांसर्वेषामहमच्युतः १५ धर्मस्यसेतुंबध्नामिचलितेचलितेयुगे ता
स्तायोनीःप्रविश्याहंप्रजानांहितकाम्यया १६ यदात्वहंदेवयोनौवर्तामिभृगुनंदन तदाहंदेववत्सर्वमाचरामिनसंशयः १७ य
दागंधर्वयोनौवावर्तामिभृगुनंदन तदागंधर्ववत्सर्वमाचरामिनसंशयः १८ नागयोनौयदाचैववर्तामिनागवत् यक्षराक्ष
सयोन्योस्तुयथावद्विचराम्यहम् १९ मानुष्येवर्तमानेतुकृपणंयाचितामया नचतेजातसंमोहावचोगृण्हंतमोहिताः २० भयंच
महदुद्दिश्यत्रासिताःकुरवोमया क्रुद्धेनभूत्वाचपुनर्यथावदनुदर्शिताः २१ तेत्वधर्मेणसंयुक्ताःपरीताःकालधर्मिणा धर्मेण
निहतायुद्धेगतास्वर्गंनसंशयः २२ लोकेषुपांडवाश्चैवगताःख्यातिंद्विजोत्तम एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि २३
इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिउतंकोपाख्यानेचतुःपंचाशोऽध्यायः ५४ उतंकउवाच अभिजानामि
जगतःकर्तारंत्वांजनार्दन नूनंभवत्प्रसादोयमितिमेनास्तिसंशयः १ चित्तंचसुप्रसन्नंमेत्वद्भावगतमच्युत विनिवृत्तंचमेशा
पादितिविद्धिपरंतप २ यदित्वनुग्रहंकंचित्त्वत्तोर्हामिजनार्दन द्रष्टुमिच्छामितेरूपमैश्वरंत्वंनिदर्शय ३ वैशंपायन
उवाच ततःसतस्मैप्रीतात्मादर्शयामासतद्वपुः शाश्वतंवैष्णवंधीमान्ददृशेयद्धनंजयः ४ सददर्शमहात्मानंविश्वरूपंम
हाभुजम् सहस्रसूर्यप्रतिमंदीप्तिमत्पावकोपमम् ५

१६ १७ १८ १९ अधर्मेणेतिच्छेदः २० २१ २२ २३ इत्याश्वमेधिकेपर्वणिटीका ५
यांचतुःपंचाशोऽध्यायः ५४ यद्भगवतास्वस्यविश्वरूपत्वमुक्तंतदेवद्रष्टुमिच्छन्नुतंकउवाच अभिजानामीत्यादिना १ २ ३ ४ ५

६ ७ ८ ९ १० ११ १२ १३ एष्टव्येजलेपेक्षितेसति १४ १५ मातंगंचांडालविशेषम् १६ अधःपाददेशेस्रोतसोहृतेवारीतिसंबंधः तस्यसमीपेअधः

सर्वमाकाशमावृत्यतिष्ठंतंसर्वतोमुखम् तंदृष्ट्वापरमंरूपंविष्णोर्वैष्णवमद्भुतम् विस्मयंचययोविप्रस्तंदृष्ट्वापरमेश्वरम् ६ उ
तंकउवाच विश्वकर्मन्नमस्तेस्तुविश्वात्मन्विश्वसंभवः पद्भ्यांतेपृथिवीव्याप्ताशिरसाचावृतंनभः ७ द्यावापृथिव्योर्य
न्मध्यंजठरेणतदावृतम् भुजाभ्यामावृताश्चाशास्त्वमिदंसर्वमच्युत ८ संहरस्वपुनर्देवरूपमक्षय्यमुत्तमम् पुनस्त्वांस्वेन
रूपेणद्रष्टुमिच्छामिशाश्वतम् ९ वैशंपायनउवाच तमुवाचप्रसन्नात्मागोविंदोजनमेजय वरंवृणीष्वेतितदोत
तंकंब्रवीदिदम् १० पर्याप्तएषएवाद्यवरस्त्वत्तोमहाद्युते यत्तेरूपमिदंकृष्णपश्यामिपुरुषोत्तम ११ तमब्रवीत्पुनःकृष्णो
मात्वमत्रविचारय अवश्यमेतत्कर्तव्यममोघंदर्शनंमम १२ उतंकउवाच अवश्यकरणीयंचयद्येतन्मन्यसेविभो
तोयमिच्छामियत्रेष्टंमरुष्वेतद्धिदुर्लभम् १३ ततःसंहृत्यतत्तेजःप्रोवाचोतंकमीश्वरः एष्टव्येसतिचिंत्योहमित्युक्त्वाद्वारकांय
यौ १४ ततःकदाचिद्भगवानुतंकस्तोयकांक्षया तृषितःपरिचक्राममरौसस्मारचाच्युतम् १५ ततोदिग्वाससंधीमान्मातंगंमलपं
किनम् अपश्यत्तमरौतस्मिन्श्वयूथपरिवारितम् १६ भीषणंबद्धनिस्त्रिंशंबाणकार्मुकधारिणम् तस्याधःस्रोतसोपश्यद्वा
रिभूरिद्विजोत्तमः १७ स्मरन्नेवचतंप्राहमातंगःप्रहसन्निव एह्युतंकप्रतीच्छस्वमत्तोवारिभृगूद्वह १८ कृपाहिमेसुमहतीत्वांदृष्ट्वातृट्
समाश्रितं इत्युक्तस्तेनसमुनिस्तत्तोयंनाभ्यनंदत १९ चिक्षेपचसतंधीमान्वाग्भिरुग्राभिरच्युतम् पुनःपुनश्चमातंगःपिबस्व
तितमब्रवीत् २० नचापिबत्ससक्रोधःक्षुभितेनांतरात्मना सतथानिश्चयात्तेनप्रत्याख्यातोमहात्मना २१ श्वभिःसहमहाराजत
त्रैवांतरधीयत उतंकस्तंतथादृष्ट्वाततोव्रीडितमानसः २२ मेनेप्रलब्धमात्मानंकृष्णेनामित्रघातिना अथतेनैवमार्गेणशंखच
क्रगदाधरः २३ आजगाममहाबुद्धिरुतंकश्चैनमब्रवीत् नयुक्तंतादृशंदातुंत्वयापुरुषसत्तम २४ सलिलंविप्रमुख्येभ्योमातं
गस्रोतसाविभो इत्युक्तवचनंतंतुमहाबुद्धिर्जनार्दनः २५ उतंकंश्लक्ष्णयावाचासांत्वयन्निदमब्रवीत् यादृशेनेहरूपेणया
म्यदातुंधृतंनवै २६ तादृशंखलुतेदत्तंतच्चत्वंनावबुध्यथाः मयात्वदर्थमुक्तोवैवज्रपाणिःपुरंदरः २७ उतंकायामृतंदीयतां
रूपमितिप्रभुः समामुवाचदेवेंद्रोनमर्त्योऽमर्त्यतांव्रजेत् २८ अन्यमस्मैवरंदेहीत्यसकृद्भृगुनंदन अमृतंदेयमित्येवमयोक्तःसश
चीपतिः २९

स्रोतसोभोगवत्याइतिवा १७ १८ १९ चिक्षेपनिंदितवान् अच्युतंवरप्रदंकृष्णं २० २१ २२ प्रलब्धंवंचितं २३ २४ २५ २६ २७ २८ २९

समांप्रसाद्यदेवेंद्रः पुनरेवेदमब्रवीत् यादृदेयमवश्यंवैमातंगोहंमहामते ३० भूत्वाऽमृतंप्रदास्यामिभार्गवायमहात्मने यद्येवंप्र
तिगृण्हातिभार्गवोमृतमद्यवै ३१ प्रदातुमेषगच्छामिभार्गवस्यामृतंविभो प्रत्याख्यातस्त्वहंतेनदास्यामिनकथंचन ३२ सतथास
मयंकृत्वातेनरूपेणवासवः उपस्थितस्त्वयाचापिप्रत्याख्यातोमृतंददत् ३३ चांडालरूपीभगवान्सुमहांस्तेव्यतिक्रमः यत्तुशक्यंमया
कर्तुंभूयएवतवेप्सितम् ३४ तोयेप्सांतवदुर्धर्षांकरिष्येसफलामहम् येष्वहःसुचतेब्रह्मन्सलिलेप्साभविष्यति ३५ तदामरौभ
विष्यंतिजलपूर्णाःपयोधराः रसवच्चप्रदास्यंतितेतोयंभृगुनंदन ३६ उत्तंकमेघाइत्युक्ताःख्यातिंयास्यंतिचापिते इत्युक्तःप्रीतिमा
न्विप्रःकृष्णेनसबभूवह अद्याप्युत्तंकमेघाश्चमरौवर्षंतिभारत ३७ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिउत्तंकोपाख्या
नेपंचपंचाशोऽध्यायः ५५ जनमेजयउवाच उत्तंकःकेनतपसासंयुक्तोवैमहामनाः यःशापंदातुकामोभूद्विष्णावे
प्रभविष्णवे १ वैशंपायनउवाच उत्तंकोमहतायुक्तस्तपसाजनमेजय गुरुभक्तःसतेजस्वीनान्यत्किंचिदपूजयत्
२ सर्वेषामृषिपुत्राणामेषआसीन्मनोरथः औत्तंकींगुरुवृत्तिंवैप्राप्नुयामेतिभारत ३ गौतमस्यतुशिष्याणांबहूनांजनमेजय
उत्तंकेभ्यधिकाप्रीतिःस्नेहश्चैवाभवत्तदा ४ सतस्यदमशौचाभ्यांविक्रांतेनचकर्मणा सम्यक्चैवोपचारेणगौतमःप्रीतिमान
भूत् ५ अथशिष्यसहस्राणिसमनुज्ञातवानृषिः उत्तंकंपरयाप्रीत्यानाभ्यनुज्ञातमिच्छत ६ तंक्रमेणजरातातप्रतिपेदेमहा
मुनिम् नचान्वबुध्यततदासमुनिर्गुरुवत्सलः ७ ततःकदाचिद्राजेंद्रकाष्ठान्यानयितुंययौ ८ उत्तंकःकाष्ठभारंचमहांतं
समुपानयत् सतद्भाराभिभूतात्माकाष्ठभारमरिंदम ९ निष्पिपेषक्षितौराजन्परिश्रांतोबुभुक्षितः तस्यकाष्ठेविलग्नाभू
जटारूप्यसमप्रभा १० ततःकाष्ठैःसहतदापपातधरणीतले ततःसभारनिष्पिष्टःक्षुधाविष्टश्चभारत ११ दृष्ट्वातांवय
सोवस्थांरुरोदार्तस्वरस्तदा ततोगुरुसुतातस्यपद्मपत्रनिभानना १२ जग्राहाश्रूणिसुश्रोणीकरेणपृथुलोचना पितुर्नियोगाद्ध
र्मज्ञाशिरसावनतातदा १३ तस्यानिपेततुर्दग्धौकरौतेरश्रुबिंदुभिः नहितानश्रुपातांस्तुशक्ताधारयितुंमही १४ गौतमस्त्वब्रवीद्वि
प्रमुत्तंकंप्रीतमानसः कस्मात्तातनवाद्यहशोकोत्तरमिदंवचः सस्वरंब्रूहिविप्रर्षेश्रोतुमिच्छामितत्त्वतः १५ उत्तंकउवाच
भवद्गतेनमनसाभवत्प्रियचिकीर्षया भवद्भक्तिगतेनेहभवद्भावानुगेनच १६

अभ्यनुजानियाः अभ्यजानीया अभ्यनुज्ञातवानसि अडभावो ह्रस्वत्वमार्षं १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०

जरयेयंनावबुद्धामेनाभिज्ञातंस्मरवंचमे शतवर्षोषितंमांहिनत्वमभ्यनुजानियाः १७ भवतात्वभ्यनुज्ञाताःशिष्याःप्रत्यवरामम उ
पपन्नाद्विजश्रेष्ठाःशतशोथसहस्रशः १८ गौतमउवाच त्वत्प्रीतियुक्तेनमयागुरुशुश्रूषयातव व्यतिक्रामन्महान्
कालोनावबुद्धोद्विजर्षभ १९ किंत्वद्ययदितेश्रद्धागमनंप्रतिभार्गव अनुज्ञांप्रतिगृह्णीष्वस्वगृहान्गच्छमाचिरम् २० उतंक
उवाच गुर्वर्थंकंप्रयच्छामिब्रूहित्वंद्विजसत्तम तमुपाहृत्यगच्छेयमनुज्ञातस्त्वयाविभो २१ गौतमउवाच दक्षि
णापरितोषोवैगुरूणांसद्भिरुच्यते त्वयाह्याचरताब्रह्मंस्तुष्टोहंवैनसंशयः २२ इत्थंचपरितुष्टंमांविजानीहिभृगूद्वह युवाषोड
शवर्षोहियद्यद्यभविताभवान् २३ ददानिपत्नींकन्यांचस्वांतेदुहितरंद्विज एतामृतेंगनानान्यात्वत्तेजोर्हतिसेवितुम् २४ तत
स्तांप्रतिजग्राहयुवाभूत्वायशस्विनीम् गुरुणाचाभ्यनुज्ञातोगुरुपत्नीमथाब्रवीत् २५ किंभवत्यैप्रयच्छामिगुर्वर्थंविनियुंक्ष्वमाम्
प्रियंहितंचकांक्षामिप्राणैरपिधनैरपि २६ यद्दुर्लभंहिलोकेस्मिन्रत्नमत्यद्भुतंमहत् तदानयेयंतपसानहिमेत्रास्तिसंशयः २७
अहल्योवाच परितुष्टास्मितेविप्रनित्यंभक्त्यानघानघ पर्याप्तमेतद्भद्रंतेगच्छतातयथेप्सितम् २८ वैशंपायनउ
वाच उतंकस्तुमहाराजपुनरेवाब्रवीद्वचः आज्ञापयस्वमांमातःकर्तव्यंचतवप्रियम् २९ अहल्योवाच सौ
दासपत्नीविधृतेदिव्येयेमणिकुंडले तेसमानयभद्रंतेगुर्वर्थःसुकृतोभवेत् ३० सतथेतिप्रतिश्रुत्यजगामजनमेजय गु
रुपत्नीप्रियार्थंवैतेसमानयितुंतदा ३१ सजगामततःशीघ्रमुतंकोब्राह्मणर्षभः सौदासंपुरुषादंवैभिक्षितुंमणिकुंडले ३२
गौतमस्त्वब्रवीत्पत्नीमुतंकोनाद्यदृश्यते इतिपृष्टातमाचष्टेकुंडलार्थंगतंचसा ३३ ततःप्रोवाचपत्नींसनतेसम्यगिदंकृ
तम् शप्तःसपार्थिवोनूनंब्राह्मणंतंवधिष्यति ३४ अहल्योवाच अजानंत्यानियुक्तःसभगवन्ब्राह्मणोमया
भवत्प्रसादान्नभयंकिंचित्तस्यभविष्यति ३५ इत्युक्तःप्राहतांपत्नीमेवमस्त्वितिगौतमः उतंकोपिवनेशून्येराजानंतंद
दर्शह ३६ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिउतंकोपाख्यानेषट्पंचाशोऽध्यायः ५६ वैशंपायन
उवाच सतंदृष्ट्वातथाभूतंराजानंघोरदर्शनम् दीर्घश्मश्रुधरंनृणांशोणितेनसमुक्षितम् १

३१ ३२ ३३ ३४ ३५ ३६ इत्याश्वमेधिकेटीकायांषट्पंचाशोऽध्यायः ५६ सतमिति १ ७० ७१

२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ २० २१ छिद्रेष्वेतेविमेइतिपूर्वान्वयि २२

चकारनव्यर्थांविप्रोराजात्वेनमथाब्रवीत् प्रत्युत्थायमहातेजाभयकर्तायमोपमः २ दिष्ट्यात्वमसिकल्याणषष्ठेकालेममांतिकम्
भक्ष्यंमृगयमाणस्यसंप्राप्तोद्विजसत्तम ३ उतंकउवाच राजन्गुर्वर्थिनंविद्धिचरंतंमामिहागतम् नचगुर्वर्थमु
द्यन्तंहिंस्यमाहुर्मनीषिणः ४ राजोवाच षष्ठकालेममाहारोविहितोद्विजसत्तम नशक्यस्त्वंसमुत्स्रष्टुंक्षुधितेनमे
याद्यव ५ उतंकउवाच एवमस्तुमहाराजसमयःक्रियतांतुमे गुर्वर्थमभिनिर्वर्त्यपुनरेष्यामितेवशम् ६ संश्रुतश्च
मयायोर्थोगुरवेराजसत्तम त्वदधीनःसराजेन्द्रतंत्वांभिक्षेनरेश्वर ७ ददासिविप्रमुख्येभ्यस्त्वंहिरत्नानिनित्यदा दाताचत्वं
नरव्याघ्रपात्रभूतःक्षिताविह पात्रंप्रतिग्रहेचापिविद्धिमांनृपसत्तम ८ उपाहृत्यगुरोरर्थंत्वदायत्तमरिंदम समयेनेहरा
जेन्द्रपुनरेष्यामितेवशम् ९ सत्यंतेप्रतिजानामिनात्रमिथ्याकथंचन अनृतंनोक्तपूर्वंमेस्वैरेष्वपिकुतोन्यथा १० सौदासउ
वाच यदिमत्तस्त्वायत्तोगुर्वर्थःकृतएवसः यदिचास्मिप्रतिग्राह्यःसांप्रतंतद्वदस्वमे ११ उतंकउवाच प्रतिग्रा
ह्योमतोमेत्वंसदैवपुरुषर्षभ सोहंत्वामनुसंप्राप्तोभिक्षितुंमणिकुंडले १२ सौदासउवाच पत्न्यास्तेममविप्रर्षेउचिते
मणिकुंडले वरयार्थंत्वमन्यंवैतत्तेदास्यामिसुव्रत १३ उतंकउवाच अलंतेव्यपदेशेनप्रमाणायदितेवयम् प्रयच्छ
कुंडलेमह्यंसत्यवाग्भवपार्थिव १४ वैशंपायनउवाच इत्युक्तस्त्वब्रवीद्राजातमुतंकंपुनर्वचः गच्छमद्वचनाद्देवींब्रूहिदे
हीतिसत्तम १५ सैवमुक्तात्वयानूनंमद्वाक्येनशुचिव्रता प्रदास्यतिद्विजश्रेष्ठकुंडलेतेनसंशयः १६ उतंकउवाच
क्वपत्नीभवतःशक्यामयाद्रष्टुंनरेश्वर स्वयंवापिभवान्पत्नींकिमर्थंनोपसर्पति १७ सौदासउवाच तांद्रक्ष्यतिभ
वानद्यकस्मिंश्चिद्वननिर्झरे षष्ठकालेनहिमयासाशक्याद्रष्टुमद्यवै १८ वैशंपायनउवाच उतंकस्तुतथोक्तःसजग्
गामभरतर्षभ मदयंतींचदृष्ट्वासोज्ञापयत्स्वप्रयोजनम् १९ सौदासवचनंश्रुत्वाततःसापृथुलोचना प्रत्युवाचमहाबुद्धिमुतंकं
जनमेजय २० एवमेतद्द्विजब्रह्मन्नानृतंवदसेनघ अभिज्ञानंतुकिंचित्त्वंसमानयितुमर्हसि २१ इमेहिदिव्येमणिकुंडलेमे
देवाश्चयक्षाश्चमहर्षयश्च तैस्तैरुपायैरपहर्तुकामाश्छिद्रेषुनित्यंपरितर्कयंति २२ निक्षिप्तमेतद्भुविपन्नगास्तुरत्नंसमासा
द्यपरामृषेयुः यक्षास्तथोच्छिष्टधृतंसुराश्चनिद्रावशाद्वापरिधर्षयेयुः २३ ५

नागानांभोगेः न्हियतइतिसंबंधः २४ २५ २६ २७ २८ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिटीकायांसप्तपंचाशोऽध्यायः ५७
समित्रसहमिति अभिज्ञानंश्लोकरूपंज्ञापकम् १ तदेवाहनंवेति एषारक्षोयोनिरूपा अन्याइतः मुक्तिरूपा अतोममइतोगतेमुक्त्यर्थंप्रयच्छ

छिद्रेष्वेतेषिमेनित्यंन्हियेतेद्विजसत्तम देवराक्षसनागानामप्रमत्तेनधार्यते २४ स्यंदतेहिदिवारुक्मंरात्रौचद्विजसत्तम न
क्तंनक्षत्रताराणांप्रभामाक्षिप्यवर्तते २५ एतेह्यामुच्य भगवन्क्षुत्पिपासाभयंकुतः विषाग्निभयदंष्ट्रस्यभयंजातुनविद्यते २६
ह्रस्वेनचैतेआमुक्तेभवतोन्हस्वकेतदा आनुरूपेणचामुक्तेजायतेतत्प्रमाणके २७ एवंविधममैतेवैकुंडलेपरमार्चिते त्रिषुलोकेषु
विज्ञातेतदभिज्ञानमानय २८ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिउतंकोपाख्यानेसप्तपंचाशोऽध्यायः ५७ वै
शंपायनउवाच समित्रसहमासाद्यअभिज्ञानमयाचत तस्मैददावभिज्ञानंसचेक्ष्वाकुवरस्तथा १ सौदासउवा
च नचैवैषागतिःक्षेम्यानचान्याविद्यतेगतिः एतन्मेमतमाज्ञायप्रयच्छमणिकुंडले २ इत्युक्तस्तामुतंकस्तुभर्तुर्वाक्यमथा
ब्रवीत् श्रुत्वाचसातदाप्रादात्ततस्तेमणिकुंडले ३ अवाप्यकुंडलेतेतुराजानंपुनरब्रवीत् किमेतद्गुह्यवचनंश्रोतुमिच्छामिपार्थिव
४ सौदासउवाच प्रजानिसर्गाद्विप्रान्वैक्षत्रियाःपूजयंतिहि विप्रेभ्यश्चापिबहवोदोषाःप्रादुर्भवंतिवै ५ सोहंद्विजे
भ्यःप्रणतोविप्राद्दोषमवाप्तवान् गतिमन्यांनपश्यामिमदयंतीसहायवान् ६ नचान्यामपिपश्यामिमार्तिंगतिमतांवर स्वर्गद्वार
स्यगमनेस्थानेचेहद्विजोत्तम ७ नहिराज्ञाविशेषेणविरुद्धेनद्विजातिभिः शक्यंहिलोकेस्थातुंवैप्रेत्यवासुखमेधितुम् ८ तदिष्टेते
मयादत्तेएतेस्वेमणिकुंडले यःकृतस्तेद्यसमयःसफलंतंकुरुष्वमे ९ उतंकउवाच राजंस्तथेहकर्तास्मिपुनरेष्यामितव
शम् प्रश्नंचकंचित्पृष्ट्वात्वानिवृत्तोस्मिपरंतप १० सौदासउवाच ब्रूहिविप्रयथाकामंप्रतिवक्तास्मितेवचः छेत्तास्मिसं
शयंतेद्यनमेत्रास्तिविचारणा ११ उतंकउवाच प्राहुर्वाक्संयतंविप्रंधर्मनैपुणदर्शिनः मित्रेषुयश्चविषमस्तेनइत्येववि
विदुः १२ सभवान्मित्रतामद्यसंप्राप्तोममपार्थिव समेबुद्धिंप्रयच्छस्वसंमतांपुरुषर्षभ १३ अवाप्तार्थोहमद्येहभवांश्चपुरुषादकः
भवत्सकाशमागंतुंक्षमंममनवातिवै १४ सौदासउवाच क्षमंचेदिहवक्तव्यंतवद्विजवरोत्तम मत्समीपंद्विजश्रेष्ठनागं
तव्यंकथंचन १५ एवंतवप्रपश्यामिश्रेयोभृगुकुलोद्वह आगच्छतोहितेविप्रभवेन्मृत्युर्नसंशयः १६

देहिमणिमयेकुंडले २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

१७ १८ १९ २० २१ २२ २३ २४ २५ आस्येनकुंडलेविदश्यधृत्वावल्मीकंविवेशेतिसंबंधः २६ २७ २८

वैशंपायनउवाच इत्युक्तःसतदाराज्ञासंबुद्धिमताहितम् अनुज्ञाप्यसराजानमहल्यांप्रतिजग्मिवान् १७ गृहीत्वाकुंड
लेदिव्येगुरुपत्न्याःप्रियंकरः जवेनमहताप्रायाद्गौतमस्याश्रमंप्रति १८ यथानयोरक्षणंचमदयंत्याभिभाषितम् तथातंकुंडलेब
ध्वातदाकृष्णाजिनमयंत् १९ सकस्मिंश्चित्क्षुधाविष्टःफलभारसमन्वितम् बिल्वंददर्शविप्रर्षिरारुरोहचतंततः २० शाखामासज्य
तस्यैवकृष्णाजिनमरिंदम पातयामासबिल्वानितदासद्विजपुंगवः २१ अथपातयमानस्यबिल्वापहृतचक्षुषः न्यपतंस्तानिबि
ल्वानितस्मिन्नेवाजिनेविभो २२ यस्मिंस्तत्कुंडलंबद्धंतदाद्विजवरेणवै बिल्वप्रहारैस्तस्याथव्यशीर्यद्बंधनंततः २३ सकुंडलंतद
जिनंपपातसहसातरोः विशीर्णबंधनंतस्मिन्गतंकृष्णाजिनंमहीम् २४ अपश्यद्भुजगःकश्चित्तेतत्रमणिकुंडले ऐरावतकुलो
द्भूतःशीघ्रोभूत्वातदाहिसः २५ विदश्यास्येनवल्मीकंविवेशाथसकुंडले ह्रियमाणेतुदृष्ट्वासकुंडलेभुजगेनह २६ पपातवृ
क्षात्सोद्विग्नोदुःखात्परमकोपनः सदंडकाष्ठमादायवल्मीकमखनत्तदा २७ अहानित्रिंशदव्यग्रःपंचचान्यानिभारत क्रोधामर्षा
भिसंतप्तस्तदाब्राह्मणसत्तमः २८ तस्यवेगमसह्यंतमसहंतीवसुंधरा दंडकाष्ठाभिनुन्नांगीचचालभृशमाकुला ततःखनतएवा
थविप्रर्षेर्धरणीतलम् नागलोकस्यपंथानंकर्तुकामस्यनिश्चयात् २९ रथेनहरियुक्तेनतंदेशमुपजग्मिवान् वज्रपाणिर्महा
तेजास्तंददर्शद्विजोत्तमम् ३० वैशंपायनउवाच सतुतंब्राह्मणोभूत्वातस्यदुःखेनदुःखितः उतंकमब्रवीद्वाक्यंनैत
च्छक्यंत्वयेतिवै ३१ इतोहिनागलोकोवैयोजनानिसहस्रशः नदंडकाष्ठसाध्यंचमन्येकार्यमिदंतव ३२ उतंकउवाच
नागलोकेयदिब्रह्मन्नशक्यंकुंडलंमया प्राप्तुंप्राणान्विमोक्ष्यामिपश्यतस्तेद्विजोत्तम ३३ वैशंपायनउवाच यदा
सनाशकत्तस्यनिश्चयंकर्तुमन्यथा वज्रपाणिस्तदादंडंवज्रास्त्रेणयुयोजह ३४ ततोवज्रप्रहारैस्तैर्दार्यमाणावसुंधरा नाग
लोकस्यपंथानमकरोज्जनमेजय ३५ सतेनमार्गेणतदानागलोकंविवेशह ददर्शनागलोकंचयोजनानिसहस्रशः ३६ प्राकार
निचयैर्दिव्यैर्मणिमुक्तास्वलंकृतैः उपपन्नंमहाभागशातकुंभमयैस्तथा ३७ वापीःस्फाटिकसोपानानदीश्चविमलोदकाः ददर्शवृ
क्षांश्चबहून्नानाद्विजगणायुतान् ३८ तस्यलोकस्यचद्वारंसददर्शभृगूद्वहः ३९ पंचयोजनविस्तारमायतंशतयोजनम् नाग
लोकमुतंकस्तुप्रेक्ष्यदीनोभवत्तदा ४०

४१ ४२ ४३ ४४ ४५ ४६ ४७ धम्यतः धम्यमानस्य ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

निराशश्चाभवत्तत्र कुंडलाहरणेपुनः तत्रप्रोवाचतुरगस्तंकृष्णश्वेतवालधिः ४१ ताम्रास्यनेत्रःकौरव्यप्रज्वलन्निवतेजसा ध
मस्वापानमेतन्मेततस्त्वंविप्रलप्स्यसे ४२ ऐरावतसुतेनेहतवानीतंहिकुंडले माजुगुप्सांकृथाःपुत्रत्वमत्रार्थेकथंचन त्वयैतद्धि
समाचीर्णंगौतमस्याश्रमेतदा ४३ उतंकउवाच कथंभवंतंजानीयामुपाध्यायाश्रमंप्रति यन्मयाचीर्णपूर्वंहिश्रो
तुमिच्छामितदप्यहम् ४४ अश्वउवाच गुरोर्गुरुंमांजानीहिज्वलनंजातवेदसं त्वयाह्यहंसदाविप्रगुरोरर्थेभिपूजितः
४५ विधिवत्सततंविप्रशुचिनाकुरुनंदन तस्माच्छ्रेयोविधास्यामितवैवकुरुमाचिरम् ४६ इत्युक्तस्तुतथाकार्षीदुतंकश्चित्रभानु
ना शृतार्चिःप्रीतिमांश्चापिप्रजज्वालदिधक्षया ४७ ततोस्यरोमकूपेभ्योधम्यतस्तत्रभारत घनःप्रादुरभूद्धूमोनागलोकभयावहः ४८
तेनधूमेनमहतावर्द्धमानेनभारत नागलोकेमहाराजनप्राज्ञायतकिंचन ४९ हाहाकृतमभूत्सर्वमैरावतनिवेशनम् वासुकिप्र
मुखानांचनागानांजनमेजय ५० नप्रकाशंतवेश्मानिधूमरुद्धानिभारत नीहारसंवृतानीववनानिगिरयस्तथा ५१ तेधूमरक्त
नयनावह्नितेजोभितापिताः आजग्मुर्निश्चयंज्ञातुंभार्गवस्यमहात्मनः ५२ श्रुत्वाचनिश्चयंतस्यमहर्षेरतितेजसः संभ्रांतनयनाः
सर्वेपूजांचक्रुर्यथाविधि ५३ सर्वेप्रांजलयोनागावृद्धबालपुरोगमाः शिरोभिःप्रणिपत्योचुःप्रसीदभगवन्निति ५४ प्रसाद्यब्राह्मणं
तेतुपाद्यमर्घ्यंनिवेद्यच प्रायच्छन्कुंडलेदिव्येपन्नगाःपरमार्चिते ५५ ततःसपूजितोनागैस्तदोतंकःप्रतापवान् अग्निंप्रदक्षिणं
कृत्वाजगामगुरुसद्मतत् ५६ सगत्वात्वरितोराजन्गौतमस्यनिवेशनम् प्रायच्छत्कुंडलेदिव्येगुरुपत्न्यास्तदानघ ५७ वासुकिप्रमु
खानांचनागानांजनमेजय सर्वंशशंससगुरवेयथावद्द्विजसत्तमः ५८ एवंमहात्मनातेनत्रीन्लोकान्जनमेजय परिक्रम्याहृतेदिव्ये
ततस्तेमणिकुंडले ५९ एवंप्रभावःसमुनिरुतंकोभरतर्षभ परेणतपसायुक्तोयन्मात्वंपरिपृच्छसि ६० इतिश्रीमन्महाभा
रतेआश्वमेधिकेपर्वणिउत्तंकोपाख्यानेअष्टपंचाशोऽध्यायः ५८ जनमेजयउवाच उतंकस्यवरंदत्वागोविंदोद्विज
सत्तम् अतऊर्ध्वंमहाबाहुःकिंचकारमहायशाः १ वैशंपायनउवाच दत्वावरमुतंकायप्रायात्सात्यकिनासह द्वा
रकामेवगोविंदःशीघ्रवेगैर्महाहयैः २ सरांसिसरितश्चैववनानिचगिरींस्तथा अतिक्रम्याससादाथरम्यांद्वारवतींपुरीम् ३

वमिति गुरुभक्तेषुदेवा अप्यनुग्रहंकुर्वंतीतिभावः ६० इत्याश्वमेधिकेपर्वणिटीकायां अष्टपंचाशोऽध्यायः ५८ उतंकस्येति १ २ ३

वर्तमानेमहाराजमहेरैवतकस्यच उपायात्पुंडरीकाक्षोयुयुधानानुगस्तदा ४ अलंकृतस्तुसगिरिर्नानारूपैर्विचित्रितैः बभौर
त्नमयैः कोशैः संवृतः पुरुषर्षभ ५ कांचनस्रग्भिरग्र्याभिः सुमनोभिस्तथैवच वासोभिश्चमहाशैलः कल्पवृक्षैस्तथैवच ६ दीपवृ
क्षैश्चसौवर्णैरभीक्ष्णमुपशोभितः गुहानिर्झरदेशेषुदिवाभूतोबभूवह ७ पताकाभिर्विचित्राभिः सघंटाभिःसमततः पुंभिःस्त्री
भिश्चसंघुष्टः प्रगीतइवचाभवत् ८ अतीवप्रेक्षणीयोभून्मेरुर्मुनिगणैरिव मत्तानांहृष्टरूपाणांस्त्रीणांपुंसांचभारत ९ गायतांप
र्वतेंद्रस्यदिवस्पृगिवनिस्वनः प्रमत्तमत्तसंमत्तक्ष्वेडितोत्कृष्टसंकुलः १० तथाकिलकिलाशब्दैर्भूधरोभून्मनोहरः विपणापणवान्
रम्योभक्ष्यभोज्यविहारवान् ११ वस्त्रमाल्योत्करयुतोवीणावेणुमृदंगवान् सुरामैरेयमिश्रेणभक्ष्यभोज्येनचैवह १२ दीनांधकृ
पणादिभ्योदीयमानेनचानिशम् बभौपरमकल्याणोमहस्तस्यमहागिरेः १३ पुण्यावसथवान्वीरपुण्यकृद्भिर्निषेवितः विहारोवृष्णि
वीराणांमहेरैवतकस्यह १४ सनगोवेश्मसंकीर्णोदेवलोकइवाबभौ तदाचकृष्णसान्निध्यमासाद्यभरतर्षभ १५ शक्रसद्मप्रती
काशोबभूवसहिशैलराट् ततःसंपूज्यमानःसविवेशभवनंशुभम् १६ गोविंदः सात्यकिश्चैवजगामभवनंस्वकम् विवेशचप्रहृष्टात्माचि
रकालप्रवासतः १७ कृत्वानसुकरंकर्मदानवेष्विववासवः उपयांतंतुवार्ष्णेयंभोजवृष्ण्यंधकास्तथा १८ अभ्यगच्छन्महात्मानंदे
वाइवशतक्रतुम् सतानभ्यर्च्यमेधावीपृष्ट्वाचकुशलंतदा १९ अभ्यवादयतप्रीतःपितरंमातरंतदा १९ ताभ्यांससंपरिष्वक्तःसांत्वितश्च
महाभुजः उपोपविष्टःसर्वैस्तैर्वृष्णिभिःपरिवारितः २० सविश्रांतोमहातेजाः कृतपादावनेजनः कथयामासतत्सर्वंपृष्टःपित्रामहा
हवम् २१ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिरैवतकवर्णने ऊनषष्टितमोऽध्यायः ५९ वसुदेवउवाच
श्रुतवानस्मिवार्ष्णेयसंग्रामंपरमाद्भुतम् नराणांवदतांतत्रकथयोद्भवेषुनित्यशः १ त्वंतुप्रत्यक्षदर्शीचभूतज्ञश्चमहाभुजः तस्मात्प्रब्रू
हिसंग्रामंयाथातथ्येनमेनघ २ यथातदभवद्युद्धंपांडवानांमहात्मनाम् भीष्मकर्णकृपद्रोणशल्यादिभिरनुत्तमम् ३ अन्येषां
क्षत्रियाणांचकृतास्त्राणामनेकशः नानादेशाकृतिमतांनानादेशनिवासिनां ४ वैशंपायनउवाच इत्युक्तः पुंडरीका
क्षः पित्रामातुस्तदंतिके शशंसकुरुवीराणांसंग्राममनिधनंयथा ५

दिनासंमत्ताःहृष्टाः क्ष्वेडितंकूर्दनं उत्कृष्टं अन्योन्यमाकर्षणंतैःसंकु

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३

वासुदेवउवाच अत्यद्भुतानिकर्माणिक्षत्रियाणांमहात्मनाम् बहुलत्वान्नसंख्यातुंशक्यान्यब्दशतैरपि ६ प्राधान्यतस्तु
गदतःसमासेनैवमेशृणु कर्माणिपृथिवीशानांयथावदमरप्रभ ७ भीष्मःसेनापतिरभूदेकादशचमूपतिः कौरव्यःकौरवेंद्रा
णांदेवानामिववासवः ८ शिखंडीपांडुपुत्राणांनेतासप्तचमूपतिः बभूवरक्षितोधीमान्श्रीमतासव्यसाचिना ९ तेषांतदभव
द्युद्धंदशाहानिमहात्मनाम् कुरूणांपांडवानांचसुमहल्लोमहर्षणम् १० ततःशिखंडीगांगेयंयुध्यमानंमहाहवे जघानबहु
भिर्बाणैःसहगांडीवधन्वना ११ अकरोत्सततःकालंशरतल्पगतोमुनिः अयनंदक्षिणंहित्वासंप्राप्तेचोत्तरायणे १२ ततःसेनाप
तिरभूद्द्रोणोस्त्रविदुषांवरः प्रवीरःकौरवेंद्रस्यकाव्योदैत्यपतेरिव १३ अक्षौहिणीभिःशिष्टाभिर्नवभिर्द्विजसत्तमः संवृतःस
मरश्लाघीगुप्तःकृपवृषादिभिः १४ धृष्टद्युम्नस्त्वभून्नेतापांडवानांमहास्त्रवित् गुप्तोभीमनमेधावीमित्रेणवरुणोयथा १५
सचसेनापरिवृतोद्रोणप्रेप्सुर्महामनाः पितुर्निकारान्संस्मृत्यरणेकर्माकरोन्महत् १६ तस्मिंस्तेपृथिवीपालाद्रोणपार्षतसंगरे
नानादिगागतावीराःप्रायशोनिधनंगताः १७ दिनानिपंचतद्युद्धमभूत्परमदारुणम् ततोद्रोणःपरिश्रांतोधृष्टद्युम्नवशंगतः
१८ ततःसेनापतिरभूत्कर्णोदौर्योधनेबले अक्षौहिणीभिःशिष्टाभिर्वृतःपंचभिराहवे १९ तिस्रस्तुपांडुपुत्राणांचम्वोबीभत्सुपा
लिताः हतप्रवीरभूयिष्ठाबभूवुःसमवस्थिताः २० ततःपार्थंसमासाद्यपतंगइवपावकं पंचत्वमगमत्सौतिर्द्वितीयेहनिदारुणः २१
हतेकर्णेतुकौरव्यानिरुत्साहाहतौजसः अक्षौहिणीभिस्तिसृभिर्मद्रेशंपर्यवारयन् २२ हतवाहनभूयिष्ठाःपांडवापियुधिष्ठिरम्
अक्षौहिण्यानिरुत्साहाःशिष्टयापर्यवारयन् २३ अवधीन्मद्रराजानंकुरुराजोयुधिष्ठिरः तस्मिंस्तदार्धदिवसेकृत्वाकर्मसुदुष्करम्
२४ हतेशल्येचशकुनिंसहदेवोमहामनाः आहर्तारंकलेस्तस्यजघानामितविक्रमः २५ निहतेशकुनौराजाधार्तराष्ट्रःसुदुर्मनाः
अपाक्रामद्गदापाणिर्हतभूयिष्ठसैनिकः २६ तमन्वधावत्संक्रुद्धोभीमसेनःप्रतापवान् ह्रदेद्वैपायनेचापिसलिलस्थंददर्शतं २७
हतशिष्टेनसैन्येनसमंतात्परिवार्यतम् अथोपविविशुर्हृष्टाह्रदस्थंपंचपांडवाः २८ विगाह्यसलिलंत्वाशुवाग्बाणैर्भृशविक्षतः
उत्थायसगदापाणिर्युद्धायसमुपस्थितः २९ ततःसनिहतोराजाधार्तराष्ट्रोमहारणे भीमसेनेनविक्रम्यपश्यतांपृथिवीक्षिताम् ३०

२४ २५ २६ २७ २८ २९ ३० ५ ५ ५ ५ ५

ततस्तत्पांडवंसैन्यंप्रसुप्तंशिबिरेनिशि । निहतंद्रोणपुत्रेणपितुर्वधममृष्यता ३१ हतपुत्राहतबलाहतमित्रामयासह । युयुधा
नसहायेनपंचशिष्टाःस्मपांडवाः ३२ सहैवकृपभोजाभ्यांद्रौणिर्युद्धादमुच्यत । युयुत्सुश्चापिकौरव्योमुक्तःपांडवसंश्रयात् ३३
निहतेकौरवेंद्रेतुसानुबंधेसुयोधने । विदुरःसंजयश्चैवधर्मराजमुपस्थितौ ३४ एवंतदभवद्युद्धमहान्यष्टादशप्रभो । यतत्रपृथिवी
पालानिहताःस्वर्गमावसन् ३५ वैशंपायनउवाच । शृण्वतांतुमहाराजकथांतांलोमहर्षणाम् । दुःखशोकपरिक्लेशाद्वृ
ष्णीनामभवंस्तदा ३६ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिवासुदेववाक्येषष्टितमोऽध्यायः ६० वैशंपायनउ
वाच । कथयन्नेवतुतदावासुदेवःप्रतापवान् । महाभारतयुद्धंतत्कथांतेपितुरग्रतः १ अभिमन्योर्वधंवीरःसोत्यक्रामन्महाम
तिः । अप्रियंवसुदेवस्यमाभूदितिमहामतिः २ मादौहित्रवधंश्रुत्वावसुदेवोमहात्ययम् । दुःखशोकाभिसंतप्तोभवेदितिमहामतिः
३ सुभद्रातुतमुत्क्रांतमात्मजस्यवधंरणे । आचक्ष्वकृष्णसौभद्रवधमित्यपतद्भुवि ४ तामपश्यन्निपतितांवसुदेवःक्षितौतदा । दृ
ष्ट्वैवचपपातोर्व्यांसोपिदुःखेनमूर्च्छितः ५ ततःसदौहित्रवधदुःखशोकसमाहतः । वसुदेवोमहाराजकृष्णंवाक्यमथाब्रवीत् ६ ननु
त्वंपुंडरीकाक्षसत्यवाग्भुविविश्रुतः । यद्दौहित्रवधंमेद्यनरव्यापयसिशत्रुहन् ७ तद्भागिनेयनिधनंतत्वेनाचक्ष्वमेप्रभो । सदृशाक्षस्त
वकथंशत्रुभिर्निहतोरणे ८ दुर्मरंबतवार्ष्णेयकालेप्राप्तेनृभिःसह । यत्रमेहृदयंदुःखाच्छतधानविदीर्यते ९ किमब्रवीत्त्वांसंग्रामेसुभ
द्रांमातरंप्रति । मांचापिपुंडरीकाक्षचपलाक्षःप्रियोमम १० आहवंपृष्ठतःकृत्वाकच्चिन्ननिहतःपरैः । कच्चिन्मुखंनगोविंदतेनाजौ
विकृतंकृतम् ११ सहिकृष्णमहातेजाःश्लाघन्निवममाग्रतः । बालभावेनविनयमात्मनोकथयत्प्रभुः १२ कच्चिन्ननिकृतोबालोद्रोण
कर्णकृपादिभिः । धरण्यांनिहतःशेतेतन्ममाचक्ष्वकेशव १३ सहिद्रोणंचभीष्मंचकर्णंचबलिनांवरम् । स्पर्द्धतेस्मरणेनित्यंदुहितुः
पुत्रकोमम १४ एवंविधंबहुतदाविलपंतंसुदुःखितम् । पितरंदुःखिततरोगोविंदोवाक्यमब्रवीत् १५ नतेनविकृतंवक्त्रंकृतंसंग्राम
मूर्धनि । नपृष्ठतःक्षतश्चापिसंग्रामस्तेनदुस्तरः १६ निहत्यपृथिवीपालान्सहस्रशतसंघशः । खेदितोद्रोणकर्णाभ्यांदौःशासनिव
शंगतः १७ एकोह्येकेनसततंयुध्यमानोयदिप्रभो । नसशक्येत संग्रामेनिहंतुमपिवज्रिणा १८ समाहूतेचसंग्रामात्पार्थेसंसप्तकै
स्तदा । पर्यवार्यतसंक्रुद्धैःसद्रोणादिभिराहवे १९

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

२० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४

ततः शत्रुवधंकृत्वा सुमहांतंरणेपितः दौहित्रस्तववार्ष्णेयदौःशासनिवशंगतः २० नूनंचसगतःस्वर्गंजहिशोकंमहामते नहि
व्यसनमासाद्यसीदंतिकृतबुद्धयः २१ द्रोणकर्णप्रभृतयोयेनप्रतिसमासिताः रणेमहेंद्रप्रतिमाः सकथंनाप्नुयाद्दिवम् २२ सशोकं
जहिदुर्धर्षमाचमन्युवशंगमः शस्त्रपूतांहिसगतिंगतःपरपुरंजयः २३ तस्मिंस्तुनिहतेवीरेसुभद्रेयंस्वसामम दुःखार्तार्थोसु
तंप्राप्यकुररीवननादह २४ द्रौपदींचसमासाद्यपर्यपृच्छत्सुदुःखिता आर्येक्वदारकाःसर्वेद्रष्टुमिच्छामितानहम् २५ तस्यास्तुवच
नंश्रुत्वासर्वास्ताःकुरुयोषितः भुजाभ्यांपरिगृह्यैनांचुक्रुशुःपरमार्तवत् २६ उत्तरांचाब्रवीद्भद्रे भर्तासक्वनुतेगतः क्षिप्रमागमनंम
ह्यं तस्यत्वंवेदयस्वह २७ ननुनामाद्यवैराटिःश्रुत्वाममगिरंतदा भवनान्निष्पतत्याशुकस्मान्नाभ्येतितेपतिः २८ अभिमन्योकु
शलिनोमातुलास्तेमहारथाः कुशलंचाब्रुवन्सर्वेत्वांयुयुत्सुमिहागतं २९ आचक्ष्वमेद्यसंग्राम्ंयथापूर्वमरिंदम कस्मादेवंविलपतीं
नाद्येहमतिभाषसे ३० एवमादितुवार्ष्णेय्यास्तस्यास्तत्परिदेवितम् श्रुत्वापृथासुदुःखार्ताशनैर्वाक्यमथाब्रवीत् ३१ सुभद्रेवासुदेवे
नतथासात्यकिनारणे पित्राचलालितोबालःसहतःकालधर्मणा ३२ ईदृशोमर्त्यधर्मोऽयंमाशुचोयादुनंदिनि पुत्रोहितवदुर्धर्षःसंप्रा
प्तःपरमांगतिम् ३३ कुलेमहतिजातासिक्षत्रियाणांमहात्मनाम् माशुचश्चपलाक्षित्वंपद्मपत्रनिभेक्षणे ३४ उत्तरांत्वमवेक्षस्वगुर्वि
णींमाशुचःशुभे पुत्रमेषाहितस्याशुजनयिष्यतिभाविनि ३५ एवमाश्वासयित्वैनांकुंतीयदुकुलोद्वह विहायशोकंदुर्धर्षश्राद्धम
स्यप्रकल्पयत् ३६ समनुज्ञाप्यधर्मज्ञाराजानंभीममेवच यमौयमोपमौचैवददौदानान्यनेकशः ३७ ततःप्रदायबह्वीर्गाब्राह्मणायश्य
दूद्वह समाहृष्यतुवार्ष्णेयीवैराटीमब्रवीदिदम् ३८ वैराटिनेहसंतापस्त्वयाकार्योऽनिंदिते भर्तारंप्रतिसुश्रोणिगर्भस्थंरक्षवैशि
शुम् ३९ एवमुक्त्वाततःकुंतीविररामहाद्युते तामनुज्ञाप्यचैवेमांसुभद्रांसमुपानयम् ४० एवंसनिधनंप्राप्तोदौहित्रस्तवमानद
संतापंत्यजदुर्धर्षमाचशोकेमनःकृथाः ४१ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिवासुदेववाक्येएकषष्टितमोऽध्या-
यः ६१ वैशंपायनउवाच एतच्छ्रुत्वातुपुत्रस्यवचःशूरात्मजस्तदा विहायशोकंधर्मात्माददौश्राद्धमनुत्तमम्
१ तथैववासुदेवश्चस्वस्रीयस्यमहात्मनः दयितस्यपितुर्नित्यमकरोदौर्ध्वदैहिकम् २

३५ ३६ ३७ ३८ ३९ ४० ४१

इत्याश्वमेधिकेपर्वणिटीकायांएकषष्टितमोऽध्यायः ६१ एतच्छ्रुत्वातुपुत्रस्येतिचाध्यायत्रयंस्पष्टार्थम् १ २ ६ ७

२ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ इत्याश्वमेधिकेपर्वणि टीकायांद्विषष्टि

षष्टिंशतसहस्राणिब्राह्मणानांमहौजसाम् विधिवद्भोजयामासभोज्यंसर्वगुणान्वितम् ३ आच्छाद्यचमहाबाहुर्धनतृष्णामपानुद
त् ब्राह्मणानांतदाकृष्णस्तदभूल्लोमहर्षणम् ४ सुवर्णंचैवगाश्चैववशयनाच्छादनानिच दीयमानंतदाविप्रावर्धतामितिचाब्रुवन्
५ वासुदेवोथदाशार्हो बलदेवःससात्यकिः अभिमन्योस्तदाश्राद्धमकुर्वन्सत्यकस्तदा ६ अतीवदुःखसंतप्तानशमंचोपलेभिरे
तथैवपांडवावीरानगरेनागसाह्वये ७ नोपागच्छंतवैशांतिमभिमन्युविनाकृताः सुबहूनिचराजेंद्र दिवसानिविराटजा ८
नाभुंक्तपतिदुःखार्तातदभूत्करुणंमहत् कुक्षिस्थएवतस्याथगर्भोवैसंप्रलीयत ९ आजगामततोव्यासोज्ञात्वादिव्येनचक्षुषा
समागम्याब्रवीद्धीमान् पृथांपृथुललोचनाम् १० उत्तरांचमहातेजाःशोकःसंत्यज्यतामयम् भविष्यतिमहातेजाःपुत्रस्तवयश
स्विनि ११ प्रभावाद्वासुदेवस्यममव्याहरणादपि पांडवानामयंचांतेपालयिष्यतिमेदिनीम् १२ धनंजयंचसंप्रेक्ष्य धर्मराजस्यशृ
ण्वतः व्यासोवाक्यमुवाचेदंहर्षयन्निवभारत १३ पौत्रस्तवमहाभागोजनिष्यतिमहामनाः पृथ्वींसागरपर्यंतांपालयिष्यतिधर्मतः
१४ तस्माच्छोकंकुरुश्रेष्ठजहित्वमरिकर्षण विचार्यमत्रनह्येतत्सत्यमेतद्भविष्यति १५ यच्चापिवृष्णिवीरेणकृष्णेनकुरुनंदन पु
रोक्तंतत्तथाभाविमात्रास्तुविचारणा १६ विबुधानांगतोलोकानक्षयानात्मनिर्जितान् नसशोच्यस्त्वयावीरोनचान्यैःकुरुभि
स्तथा १७ एवंपितामहेनोक्तोधर्मात्मासधनंजयः त्यक्त्वाशोकंमहाराजहृष्टरूपोभवत्तदा १८ पितापितवधर्मज्ञगर्भस्तस्मिन्महामते
अवर्द्धतयथाकामंशुक्लपक्षेयथाशशी १९ ततःसंचोदयामासव्यासोधर्मात्मजंनृपम् अश्वमेधंप्रतितदाततःसोंतर्हितोभवत् २०
धर्मराजोपिमेधावीश्रुत्वाव्यासस्यतद्वचः वित्तस्यानयनेतातचकारगमनेमतिम् २१ इतिश्रीमन्महाभारतेआश्वमेधिके
पर्वणिद्विषष्टोध्यायः ६२ जनमेजयउवाच श्रुत्वैतद्वचनंब्रह्मन्व्यासेनोक्तंमहात्मना अश्वमेधंप्रतितदाकिं
भूयःप्रचकारह १ रत्नंचयन्मरुत्तेननिहितंवसुधातले तदेवापकथंचेतितन्मेब्रूहिद्विजोत्तम २ वैशंपायनउवाच
श्रुत्वाद्वैपायनवचोधर्मराजोयुधिष्ठिरः भ्रातॄन्सर्वान्समानाय्यकालेवचनमब्रवीत् ३ अर्जुनंभीमसेनंचमाद्रीपुत्रौयमावपि श्रु
तंवोवचनंवीराःसौहृदाद्यन्महात्मना ४ कुरूणांहितकामेनप्रोक्तंकृष्णेनधीमता तपोवृद्धेनमहतासुहृदामभूतिमिच्छता ५ ६

नमोऽध्यायः ६२ प्रासंगिकींकथांसमाप्यपरमप्रकृतमश्वमेधमनुवर्तयतिजनमेजयप्रश्नमुखेन श्रुत्वैतद्वचनंब्रह्मन्नित्यादिना १ २ ३ ४ ५

६ ७ ८ ९ १० ११ आविक्षितंआविक्षितः पुत्रआविक्षितोमरुत्तः तस्येदमाविक्षितं १२ १३ १४ १५ १६ १७ ध्रुवेनक्षत्रेरोहि
ण्यामुत्तरात्रयेच अहनिवारेध्रुवेरविवारेउत्तरार्के ऽमृतसिद्धियोगेइत्यर्थः १८ १९ २० २१ २२ २३ मूलेवंशस्याद्ये कुंतीधृतराष्ट्रसमी

गुरुणाधर्मशीलेनव्यासेनाद्भुतकर्मणा भीष्मेणचमहाप्राज्ञगोविंदेनचधीमता ६ संस्मृत्यतदहंसम्यक्कर्तुमिच्छामिपांडवाः
आयत्यांचतदात्वेचसर्वेषांतोहिनोहितं ७ अनुबंधेचकल्याणंयद्वचोब्रह्मवादिनः इयंहिवसुधासर्वाक्षीणरत्नाकुरूद्वह ८
तच्चाचष्टतदाव्यासोमरुत्तस्यधनंनृपाः यद्येतद्वोबहुमतंमन्यध्वंवाक्षमंयदि ९ तथायथाहधर्मेणकथंवाभीममन्यसे इत्युक्त
वाक्येनृपतौतदाकुरुकुलोद्वह १० भीमसेनोनृपश्रेष्ठंप्रांजलिर्वाक्यमब्रवीत् रोचतेमेमहाबाहोयदिदंभाषितंत्वया ११ व्या
सारव्यातस्यवित्तस्यसमुपानयनंप्रति यदितत्प्राप्नुयामेहधनमाविक्षितंप्रभो १२ कृतमेवमहाराजभवेदितिमतिर्मम तेवयं
प्रणिपातेनगिरीशस्यमहात्मनः १३ तदानयामभद्रंतेसमभ्यर्च्यकपर्दिनम् तद्वित्तंदेवदेवेशंतस्यैवानुचरांश्चतान् १४ प्रसाद्यार्थ
मवाप्स्यामोनूनंवाक्बुद्धिकर्मभिः रक्षंतेयेचतद्द्रव्यंकिंनरारौद्रदर्शनाः १५ तेचवश्याभविष्यंतिप्रसन्नेवृषभध्वजे श्रुत्वैवंवदतस्त
स्यवाक्यंभीमस्यभारत १६ प्रीतोधर्मात्मजोराजाबभूवातीवभारत अर्जुनप्रमुखाश्चापितथेत्येवाब्रुवन्वचः १७ कृत्वातुपांड
वाःसर्वेरत्नाहरणनिश्चयं सेनामाज्ञापयामासुर्नक्षत्रेहनिचध्रुवे १८ ततोययुःपांडुसुताब्राह्मणान्स्वस्तिवाच्यच अर्चयित्वा
सुरश्रेष्ठंपूर्वमेवमहेश्वरम् १९ मोदकैःपायसेनाथमांसपूपैस्तथैवच आशास्यचमहात्मानंप्रययुर्मुदिताभृशम् २० तेषांप्रयास्य
तांतत्रमंगलानिशुभान्यथ प्राहुःप्रहृष्टमनसोद्विजाग्र्यानागराश्चते २१ ततःप्रदक्षिणीकृत्यशिरोभिःप्रणिपत्यच ब्राह्मणानग्नि
सहितान्प्रययुःपांडुनंदनाः २२ समनुज्ञाप्यराजानंपुत्रशोकसमाहतम् धृतराष्ट्रंसभार्यंवैपृथांचपृथुलोचनां २३ मूलेनिक्षिप्यकौ
रव्यंयुयुत्सुंधृतराष्ट्रजम् संपूज्यमानापौरैश्चब्राह्मणैश्चमनीषिभिः २४ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणित्रिष
ष्टोऽध्यायः ६३ वैशंपायनउवाच ततस्तेप्रययुर्हृष्टाःप्रहृष्टनरवाहनाः रथघोषेणमहतापूरयंतोवसुंधराम् १ सं
स्तूयमानाःस्तुतिभिःसूतमागधवंदिभिः स्वेनसैन्येनसंवीतायथादित्याःस्वरश्मिभिः २ पांडुरेणातपत्रेणध्रियमाणेनमूर्द्धनि बभौ
युधिष्ठिरस्तत्रपौर्णमास्यामिवोडुराट् ३ जयाशिषःप्रहृष्टानांनराणांपथिपांडव प्रत्यगृह्णाद्यथान्याययथावत्पुरुषर्षभः ४

पे २४ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिटीकायांत्रिषष्टोऽध्यायः ६३ ततस्ते १ २ ३ ४ ५ ६

५ ६ ७ अग्निवेश्यंधौम्यम् ८ ९ षट्पदंषट्पदानिपदनीयानिराजमार्गाःषट् एकोदक्षिणोत्तरःतस्योभयतोद्वौद्वौमार्गावेव एवंपूर्वपश्चिमेए
कःतस्योभयतोपिद्वावेवेतिषट्राजमार्गाःसंख्यानानिसंस्थानानिनवखंडानीतियावत् यथेष्टंनवसंस्थानेइतिप्राचीनपाठःस्पष्टार्थः१०।११।

तथैवसैनिकाराजन्राजानमनुयांतिये तेषांहलहलाशब्दोदिवंस्तब्ध्वाव्यतिष्ठत ५ सरांसिसरितश्चैववनान्युपवनानिच अ
त्यक्रामन्महाराजोगिरिंचाप्यन्वपद्यत ६ तस्मिन्देशेनराजेंद्रयत्रतद्रव्यमुत्तमम् चक्रेनिवेशनंराजापांडवःसहसैनिकैः शिवेदे
शेसमेचैवतदाभरतसत्तम ७ अग्रतोब्राह्मणान्कृत्वातपोविद्यादमान्वितान् पुरोहितंचकौरव्यवेदवेदांगपारगम् आग्निवेश्यंच
राजानोब्राह्मणाःसपुरोधसः ८ कृत्वाशांतिंयथान्यायंसर्वशःपर्यवारयन् कृत्वातुमध्येराजानममात्यांश्चयथाविधि ९ षट्पदंनव
संख्यानंनिवेशंचक्रिरेद्विजाः मत्तानांवारणेंद्राणांनिवेशंचयथाविधि १० कारयित्वासराजेंद्रोब्राह्मणानिदमब्रवीत् अस्मिन्का
र्येद्विजश्रेष्ठानक्षत्रेदिवसेशुभे ११ यथाभवंतोमन्यंतेकर्तुमर्हंतितत्तथा ननःकालात्ययावस्यादिहवैपरिलंबताम् १२ इतिनिश्चि
त्यविप्रेंद्राःक्रियतांयदनंतरम् श्रुत्वैतद्वचनंराज्ञोब्राह्मणाःसपुरोधसः इदमूचुर्वचोहृष्टाधर्मराजप्रियेप्सवः १३ अद्यैवनक्षत्रमह
श्चपुण्यंयतामहेश्रेष्ठतमंक्रियासु अंभोभिरद्येहवसामराजन्नुपोष्यतांचापिभवाद्भिरद्य १४ श्रुत्वातुतेषांद्विजसत्तमानांकृतो
पवासारजनींनरेंद्राः ऊषुःप्रतीताःकुशसंस्तरेषुयथाध्वरेप्रज्वलिताहुताशाः १५ ततोनिशासाव्यगमन्महात्मनांसंशृण्वतांवि
प्रसमीरितागिरः ततःप्रभातेविमलेद्विजर्षभावचोब्रुवन्धर्मसुतंनराधिपम् १६ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्व
णिचतुःषष्टोऽध्यायः ६४ ब्राह्मणाऊचुः क्रियतामुपहारोस्यत्र्यंबकस्यमहात्मनः दत्वोपहारंनृपतेततःस्वार्थंय
तामहे १ श्रुत्वातुवचनंतेषांब्राह्मणानांयुधिष्ठिरः गिरीशस्ययथान्यायमुपहारमुपाहरत् २ आज्येनतर्पयित्वाग्निंविधिवत्संस्कृ
तेनच मंत्रसिद्धंचरुंकृत्वापुरोधाःसययौतदा ३ सगृहीत्वासुमनसोमंत्रपूताजनाधिप मोदकैःपायसेनाथमांसैश्चोपाहरद्ब
लिम् ४ सुमनोभिश्चचित्राभिर्लाजैरुच्चावचैरपि सर्वंस्विष्टतमंकृत्वाविधिवद्वेदपारगः ५ किंकराणांततःपश्चाच्चकारबलिमुत्त
मम् यक्षेंद्रायकुबेरायमणिभद्रायचैवह ६ तथान्येषांचयक्षाणांभूतानांपतयश्चये कृशरेणचमांसेननिवापैस्तिलसंयुतैः
७ ओदनंकुंभशःकृत्वापुरोधाःसमुपाहरत् ब्राह्मणेभ्यःसहस्राणिगवांदत्वातुभूमिपः ८

१२ १३ १४ १५ १६

इतिश्रीमन्महाभारतेआश्वमे॰प॰टीकायांचतुःषष्टोऽध्यायः ६४ क्रियतामिति १ २ ३ ४ ५ ६ ७ ८ ९ ९

९ १० ११ १२ १३ पात्रीः महांति ओदनोद्धरणपात्राणि करकाः अल्पघटाः १४ भृंगाराणि गडकान् वर्द्धमानकान् शरावाणि १५ करपुटः करसंपुटा
कारं द्विदलभाजनं उष्ट्रादिवाह्यम् संदूख इति प्रसिद्धम् १६ नद्धं उष्ट्रादीनामुपरिबद्धं तुलार्द्धं यत्र पुरुषस्यार्द्धं भाति उभयतो मिलित्वा तुलामा
त्रं भारः वाहनं भारस्येति शेषः १७ १८ षोडशाष्टाविति यथायोग्यं उष्ट्रस्य भारोऽष्टौ सहस्रं सुवर्णाः शकटस्य षोडश गजस्य चतुर्विंशतिरित्ये

नक्तंचराणां भूतानां व्यादिदेश बलिं तदा धूपगंधनिरुद्धं तत् सुमनोभिश्च संवृतम् ९ शुशुभे स्थानमत्यर्थं देवदेवस्य पार्थिव कृ
त्वा पूजां तु रुद्रस्य गणानां चैव सर्वशः १० ययौ व्यासं पुरस्कृत्य नृपो रत्ननिधिं प्रति पूजयित्वा धनाध्यक्षं प्रणिपत्याभिवाद्य च ११
सुमनोभिर्विचित्राभिरपूपैः कृशरेण च शंखादींश्च निधीन्सर्वान्निधिपालांश्च सर्वशः १२ अर्चयित्वा द्विजाग्र्यान्स स्वस्ति वाच्य च वी
र्यवान् तेषां पुण्याहघोषेण तेजसा समवस्थितः १३ प्रीतिमान्स कुरुश्रेष्ठः खानयामास तद्धनम् ततः पात्रीः सकरकाः बहुरूपा मनोरमाः
१४ भृंगाराणि कटाहानि कलशान्वर्द्धमानकान् बहूनि च विचित्राणि भाजनानि सहस्रशः उद्धारयामास तदा धर्मराजो युधिष्ठिरः ते
षां रक्षणमप्यासीन्महान्करपुटस्तदा १६ नद्धं च भाजनं राजन्तुलार्द्धमभवन्नृप वाहनं पांडुपुत्रस्य तत्रासीत्तु विशांपते १७ षष्टि
रुष्ट्रसहस्राणि शतानि द्विगुणा हयाः वारणाश्च महाराज सहस्रशतसंमिताः १८ शकटानि रथाश्चैव तावदेव करेणवः खराणां पु
रुषाणां च परिसंख्या न विद्यते १९ एतद्वित्तं तदभवद्यदुद्दध्रे युधिष्ठिरः षोडशाष्टौ चतुर्विंशत्सहस्रं भारलक्षणम् २० एतद्वादाय
तद्द्रव्यं पुनरभ्यर्च्य पांडवः महादेवं प्रति ययौ पुरं नागाह्वयं प्रति २१ द्वैपायनाभ्यनुज्ञातः पुरस्कृत्य पुरोहितम् गोयुते गोयुते चैव न्य
वसत्पुरुषर्षभः २२ सा पुराभिमुखा राजन्जगाम महती चमूः कृच्छ्राद्द्रविणभारार्ता हर्षयंती कुरूद्वहान् २३ इति श्रीमन्महा
भारते आश्वमेधिके पर्वणि सुवर्णकोषप्राप्तौ पंचषष्टोऽध्यायः ६५ । वैशंपायन उवाच एतस्मिन्नेव काले तु वासुदेवोऽपि वीर्यवा
न् उपायाद्वृष्णिभिः सार्द्धं पुरं वारणसाह्वयम् १ समयं वाजिमेधस्य विदित्वा पुरुषर्षभः यथोक्तो धर्मपुत्रेण प्रव्रजन्स्वपुरीं प्रति २
रौक्मिणेयेन सहितो युयुधानेन चैव हि चारुदेष्णेन सांबेन गदेन कृतवर्मणा ३ सारणेन च वीरेण निशठेनोल्मुकेन च बलदेवं पु
रस्कृत्य सुभद्रासहितस्तदा ४ द्रौपदीमुत्तरां चैव पृथां चाप्यवलोककः समाश्वासयितुं चापि क्षत्रिया निहतेश्वराः ५

वंभारलक्षणं

एवं हयखरमनुष्याणां यथासंभवं योज्यम् २० २१ गोयुते गोयुते भाराक्रांतवाहनत्वात् गव्यूतौ गव्यूतौ प्रत्यहं क्रोशद्वयप्रमाणमित्यर्थः २२ २३
इति श्रीमन्महाभारते आश्वमेधिके पर्वणि टीकायां पंचषष्टोऽध्यायः ६५ एतस्मिन्निति १ २ ३ ४ क्षत्रियाः स्त्रियः ५ ६ ७

तानागतान्समीक्ष्यैवधृतराष्ट्रोमहीपतिः प्रतिगृह्णद्यथान्यायंविदुरश्चमहामनाः ६ तत्रैवन्यवसत्कृष्णःस्वर्चितःपुरुषोत्तमः विदु
रेणमहातेजास्तथैवचयुयुत्सुना ७ वसत्सुवृष्णिवीरेषुतत्राथजनमेजय जज्ञेतवपिताराजन्परीक्षित्परवीरहा ८ सतुराजामहारा
जब्रह्मास्त्रेणावपीडितः शवोबभूवनिश्चेष्टोहर्षशोकविवर्धनः ९ हृष्टानांसिंहनादेनजनानांतत्रनिस्वनः प्रविश्यप्रदिशःसर्वाःपु
नरेवव्युपारमत् १० ततःसोतित्वरःकृष्णोविवेशांतःपुरंतदा युयुधानद्वितीयोवैव्यथितेंद्रियमानसः ११ ततस्त्वरितमायांतींददर्श
स्वांपितृष्वसाम् क्रोशंतीमभिधावेतिवासुदेवंपुनःपुनः १२ पृष्ठतोद्रौपदींचैवसुभद्रांचयशस्विनीम् सविक्रोशंसकरुणंबांधवाना
स्त्रियोनृप १३ ततःकृष्णंसमासाद्यकुंतीभोजसुतातदा प्रोवाचराजशार्दूलबाष्पगद्गदयागिरा १४ वासुदेवमहाबाहोसुप्रजादेवकी
त्वया त्वंनोगतिःप्रतिष्ठाचत्वदायत्तमिदंकुलम् १५ यदुप्रवीरयोप्येतस्वस्रीयस्यात्मजःप्रभो अश्वत्थाम्नाहतोजातस्तमुज्जीव
यकेशव १६ त्वयाह्येतत्प्रतिज्ञातमैषीकेयदुनंदन अहंसंजीवयिष्यामिमृतंजातमितिप्रभो १७ सोयंजातोमृतस्तातपश्यैनंपुरु
षर्षभ उत्तरांचसुभद्रांचद्रौपदींमांचमाधव १८ धर्मपुत्रंचभीमंचफाल्गुनंनकुलंतथा सहदेवंचदुर्धर्षसर्वान्नस्त्रातुमर्हसि १९ अ
स्मिन्प्राणाःसमायत्ताःपांडवानांममैवच पांडोश्चपिंडोदाशार्हतथैवश्वशुरस्यमे २० अभिमन्योश्चभद्रंतेप्रियस्यसदृशस्यच प्रि
यमुत्पादयाद्यत्वंप्रेतस्यापिजनार्दन २१ उत्तराहिपुरोक्तंवैकथयत्यरिसूदन अभिमन्योर्वचःकृष्णप्रियत्वात्तेनसंशयः २२ अब्र
वीत्किलदाशार्हवैराटीमार्जुनिस्तदा मातुलस्यकुलंभद्रेतवपुत्रोगमिष्यति २३ गत्वावृष्ण्यंधककुलंधनुर्वेदंग्रहीष्यति अस्त्रा
णिचविचित्राणिनीतिशास्त्रंचकेवलम् २४ इत्येतत्प्रणयात्तातसौभद्रःपरवीरहा कथयामासदुर्धर्षस्तथाचैतन्नसंशयः २५ ता
स्त्वांवयंप्रणम्येहयाचामोमधुसूदन कुलस्यास्यहितार्थंत्वंकुरुकल्याणमुत्तमम् २६ एवमुक्त्वातुवार्ष्णेयंपृथापृथुललोचना उ
च्छ्रित्यबाहूदुःखार्तास्ताश्चान्याःप्रापतन्भुवि २७ अब्रुवंश्चमहाराजसर्वाःसास्राविलेक्षणाः स्वस्रीयोवासुदेवस्यमृतोजातइतिप्र
भो २८ एवमुक्तेततःकुंतींपर्यगृह्णाज्जनार्दनः भूमौनिपतितांचैनांसांत्वयामासभारत २९ इतिश्रीमन्महाभारतेआश्व
मेधिकेपर्वणिपरीक्षिज्जन्मकथनेषट्षष्टोऽध्यायः ६६

तुलस्यकृष्णास्य तत्तुल्यपराक्रमस्तदधीनश्चेत्यर्थः २३ २४ २५ २६
२७ २८ २९ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीकायांषट्षष्टोऽध्यायः ६६

उत्थितायामिति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ इतिश्री

वैशंपायनउवाच   उत्थितायांपृथायांतुसुभद्राभ्रातरंतदा दृष्ट्वाचुक्रोशदुःखार्तावचनंचेदमब्रवीत् १ पुंडरीकाक्षपश्य
त्वंपौत्रंपार्थस्यधीमतः परिक्षीणेषुकुरुषुपरिक्षीणंगतायुषम् २ इषीकाद्रोणपुत्रेणभीमसेनार्थमुद्यता सोत्तरायांनिपातितावि
जयेमयिचैवह ३ सेयंविदीर्णहृदयामयितिष्ठतिकेशव यन्नपश्यामिदुर्धर्षसहपुत्रंतुतंप्रभो ४ किंनुवक्ष्यतिधर्मात्माधर्मराजो
युधिष्ठिरः भीमसेनार्जुनौचापिमाद्रवत्याःसुतौचतौ ५ श्रुत्वाभिमन्योस्तनयंजातंचमृतमेवच मुषिताइववार्ष्णेयद्रोणपुत्रेणपां
डवाः ६ अभिमन्युःप्रियःकृष्णभ्रातॄणांनात्रसंशयः तेश्रुत्वाकिंनुवक्ष्यंतिद्रोणपुत्रास्त्रनिर्जिताः ७ भवितातःपरंदुःखंकिंतदन्यज्ज
नार्दन अभिमन्योःसुतात्कृष्णमृताज्जातादरिंदम ८ साहंप्रसादयेकृष्णत्वामद्यशिरसानता पृथेयंद्रौपदीचैवताःपश्यपुरुषोत्तम
९ यदाद्रोणसुतोगर्भान्पांडूनांहंतिमाधव तदाकिलत्वयाद्रौणिःक्रुद्धेनोक्तोरिमर्दन १० अकामंत्वांकरिष्यामिब्रह्मबंधोनराधम
अहंसंजीवयिष्यामिकिरीटितनयात्मजम् ११ इत्येतद्वचनंश्रुत्वाजानानाहंबलंतव प्रसादयेत्वांदुर्धर्षजीवतामभिमन्युजः १२
यद्येतत्त्वंप्रतिश्रुत्यनकरोषिवचःशुभम् सफलंवृष्णिशार्दूलमृतांमामवधारय १३ अभिमन्योःसुतोवीरनसंजीवतियद्ययम्
जीवतित्वयिदुर्धर्षकिंकरिष्याम्यहंत्वया १४ संजीवयैनंदुर्धर्षमृतंत्वमभिमन्युजम् सदृशाक्षसुतंवीरसस्यंवर्षन्निवांबुदः १५ त्वं
हिकेशवधर्मात्मासत्यवान्सत्यविक्रमः सतांवाचमृतांकर्तुमर्हसित्वमरिंदम १६ इच्छन्नपिहिलोकांस्त्रीन्जीवयेथामृतानिमान्
किंपुनर्दयितंजातंस्वस्रीयस्यात्मजंमृतम् १७ प्रभावज्ञास्मितेकृष्णतस्मादेतद्ब्रवीम्यहम् कुरुष्वपांडुपुत्राणामिमंपरमनुग्रहम् १८
स्वसेतिवामहाबाहोहतपुत्रेतिवापुनः प्रपन्नामामियंचेतिदयांकर्तुमिहार्हसि १९   इतिश्रीमन्महाभारतेआश्वमेधिकेप
र्वणिपरीक्षिज्जन्मकथनेसप्तषष्टोऽध्यायः ६७   वैशंपायनउवाच   एवमुक्तस्तुराजेंद्रकेशिहादुःखमूर्छितः तथेति
व्याजहारोच्चैर्ह्लादयन्निवतंजनम् १ वाक्येनैतेनहितदातंजनंपुरुषर्षभः ह्लादयामाससविभुर्घर्मार्तंसलिलैरिव २ ततःस
प्राविशत्तूर्णंजन्मवेश्मपितुस्तव अर्चितंपुरुषव्याघ्रसितैर्माल्यैर्यथाविधि ३ अपांकुंभैःसुपूर्णैश्चविन्यस्तैःसर्वतोदिशम् घृतेन
तिंदुकालातैःसर्षपैश्चमहाभुज ४ अस्त्रैश्चविमलैर्न्यस्तैःपावकैश्चसमंततः वृद्धाभिश्चाभिरामाभिःपरिचारार्थमावृतम् ५

न्महाभारतेआश्वमेधिकेपर्वणिटीकायांसप्तषष्टोऽध्यायः ६७   एवमुक्तइति १ २ ३ ४ ५ ६ ७

दक्षैश्च परितोधीरभिषग्भिःकुशलैस्तथा ददर्शचसतेजस्वीरक्षोघ्नान्यपिसर्वशः ६ द्रव्याणिस्थापितानिस्मविधिवत्कुशलैर्जनैः
तथायुक्तंचनहृष्टात्माजन्मवेश्मपितुस्तव ७ हृष्टोऽभवद्धृषीकेशःसाधुसाध्वितिचाब्रवीत् तथाब्रुवतिवार्ष्णेयेप्रहृष्टवदनेतदा ८ द्रौप
दीत्वरितागत्वावैराटींवाक्यमब्रवीत् अयमायातितेभद्रेश्वशुरोमधुसूदनः ९ पुराणर्षिरचिंत्यात्मासमीपमपराजितः सापिबा
ष्पकलांवाचंनिगृह्याश्रूणिचैवह १० सुसंवीताभवद्देवीदेववत्कृष्णमीयुषी सातथादूयमानेनहृदयेनतपस्विनी ११ दृष्ट्वागोविंद
मायांतंकृपणंपर्यदेवयत् पुंडरीकाक्षपश्यावांबालेनेहविनाकृतौ अभिमन्युंचमांचैवहतौतुल्यंजनार्दन १२ वार्ष्णेयमधुहन्
वीरशिरसात्वांप्रसादये द्रोणपुत्रास्त्रनिर्दग्धंजीवयैनंममात्मजम् १३ यदिस्मधर्मराज्ञावाभीमसेनेनवापुनः त्वयावापुंडरीका
क्षवाक्यमुक्तमिदंभवेत् १४ अजानतीमिषीकेयंजनित्रींहंत्वितिप्रभो अहमेवविनष्टास्यांनेतदेवंगतेभवेत् १५ गर्भस्थस्यास्यबा
लस्यब्रह्मास्त्रेणनिपातनम् कृत्वानृशंसंदुर्बुद्धिर्द्रौणिःकिंफलमश्नुते १६ सात्वांप्रसाद्यशिरसायाचेशत्रुनिबर्हण प्राणांस्त्यक्ष्या
मिगोविंदनायंसंजीवतेयदि १७ अस्मिन्हिबहवःसाधोयेममासन्मनोरथाः तेद्रोणपुत्रेणहताःकिंनुजीवामिकेशव १८ आसीन्म
ममतिःकृष्णपूर्णोत्संगाजनार्दनम् अभिवादयिष्यत्वाकृष्णातदिदंवितथीकृतम् १९ चपलाक्षस्यदायादमृतास्मिन्पुरुषर्षभ वि
फलामेकृताकृष्णहृदिसर्वेमनोरथाः २० चपलाक्षःकिलातीवप्रियस्तेमधुसूदन सुतंपश्यत्वमस्येनंब्रह्मास्त्रेण निपा
तितम् २१ कृतघ्नोयंनृशंसोयंयथास्यजनकस्तथा यःपांडवीःश्रियंत्यक्त्वागतोद्ययमसादनम् २२ मयाचैतत्प्रतिज्ञातंरणमूर्द्धनिके
शव अभिमन्योहतेवीरत्वामेष्याम्यचिरादिव २३ तच्चनाकरवंकृष्णनृशंसाजीवितप्रिया इदानींमांगतांतत्रकिन्नुवक्ष्यतिफाल्गु
निः २४ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिअष्टषष्टितमोऽध्यायः ६८ वैशंपायनउवाच सैवंवि
लप्यकरुणंसोन्मादेवतपस्विनी उत्तरान्यपतद्भूमौकृपणापुत्रगृद्धिनी १ तांतुदृष्ट्वानिपतितांहतपुत्रपरिच्छदाम् चुक्रोश
कुंतीदुःखार्तासर्वाश्चभरतस्त्रियः २ मुहूर्तमिवराजेंद्रपांडवानांनिवेशनम् अप्रेक्षणीयमभवदार्तस्वनविनादितम् ३ सा
मुहूर्तंचराजेंद्रपुत्रशोकाभिपीडिता कश्मलाभिहतावीरवैराटीत्वभवत्तदा ४ प्रतिलभ्यतुसासंज्ञामुत्तराभरतर्षभ अंक
मारोप्यतंपुत्रमिदंवचनमब्रवीत् ५

इत्याश्वमेधिकेपर्वणिटीकायांअष्टषष्टितमोऽध्यायः ६८ सैवंविलप्येति १ २ ३ ४ ५

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ इतिश्रीम

धर्मज्ञस्यसुतःसन्त्वमधर्मंनावबुध्यसे यस्त्वंवृष्णिप्रवीरस्यकुरुषेनाभिवादनम् ६ पुत्रगत्वाममवचोब्रूयास्त्वंपितरंत्विदम् दुर्मरं
प्राणिनांवीरकालेप्राप्तेकथंचन ७ याहंत्वयाविनाद्येहपत्यापुत्रेणचैवह मर्तव्येसतिजीवामिहतस्वस्तिरकिंचना ८ अथवाध
र्मराज्ञाहमनुज्ञातामहाभुज भक्षयिष्येविषंघोरंप्रवेक्ष्येवाहुताशनम् ९ अथवादुर्मरंतातयदिदंमेसहस्रधा पतिपुत्रविहीना
याहृदयंनविदीर्यते १० उत्तिष्ठपुत्रपश्येमांदुःखितांप्रपितामहीम् आर्तामुपप्लुतांदीनांनिमग्नांशोकसागरे ११ आर्यांचपश्यपां
चालींसात्वतींचतपस्विनीम् मांचपश्यसुदुःखार्तांव्याधविद्धांमृगीमिव १२ उत्तिष्ठपश्यवदनंलोकनाथस्यधीमतः पुंडरीकपला
शाक्षंपुरेवचपलेक्षणम् १३ एवंविप्रलपंतींतांदृष्ट्वानिपतितांपुनः उत्तरांतांस्त्रियःसर्वाःपुनरुत्थापयंस्ततः १४ उत्थायचपुनर्धैर्या
त्तदामत्स्यपतेःसुता प्रांजलिःपुंडरीकाक्षंभूमावेवाभ्यवादयत् १५ श्रुत्वासतस्याविपुलंविलापंपुरुषर्षभः उपस्पृश्यततःकृष्णो
ब्रह्मास्त्रंप्रत्यसंहरत् १६ प्रतिजज्ञेचदाशार्हस्तस्यजीवितमच्युतः अब्रवीच्चविशुद्धात्मासर्वंविश्रावयञ्जगत् १७ नब्रवीम्युत्तरे
मिथ्यासत्यमेतद्भविष्यति एषसंजीवयाम्येनंपश्यतांसर्वदेहिनाम् १८ नोक्तपूर्वंमयामिथ्यास्वैरेष्वपिकदाचन नचयुद्धात्परावृत्त
स्तथासंजीवतामयम् १९ यथामेदयितोधर्मोब्राह्मणश्चविशेषतः अभिमन्योःसुतोजातोमृतोजीवत्वयंतथा २० यथाहंनाभिजा
नामिविजयेतुकदाचन विरोधंतेनसत्येनमृतोजीवत्वयंशिशुः २१ यथासत्यंचधर्मश्चमयिनित्यंप्रतिष्ठितौ तथामृतःशिशुरयं
जीवतामभिमन्युजः २२ यथाकंसश्चकेशीचधर्मेणनिहतौमया तेनसत्येनबालोद्यपुनःसंजीवतामयम् २३ इत्युक्तोवासुदेवेनस
बालोभरतर्षभ शनैःशनैर्महाराजप्रास्पंदतसचेतनः २४ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिपरीक्षित्संजीवनेऊन
सप्ततोऽध्यायः ६९ वैशंपायनउवाच ब्रह्मास्त्रंतुयदाराजन्कृष्णेनप्रतिसंहृतम् तदातद्वेश्मत्वात्पित्रातेजसाभिवि
दीपितम् १ ततोरक्षांसिसर्वाणिनेशुस्त्यक्त्वागृहंतुतत् अंतरिक्षेचवागासीत्साधुकेशवसाध्विति २ तदस्त्रंज्वलितंचापिपिताम
हमगात्तदा ततःप्राणान्पुनर्लेभेपितातवनरेश्वर ३ व्यचेष्टतचबालोसौयथोत्साहंयथाबलम् बभूवुर्मुदिताराजंस्ततस्ताभरत
स्त्रियः ४ ब्राह्मणान्वाचयामासुर्गोविंदस्यचशासनात् ततस्तामुदिताःसर्वाःप्रशशंसुर्जनार्दनम् ५

णिटीकायांऊनसप्ततोऽध्यायः ६९ ब्रह्मास्त्रमिति १ २ ३ ४ वाचयामासुःस्वस्तीतिशेषः ५ ५ ५ ५

६ ग्रंथिकाः दैवज्ञाः ग्रंथिकस्तुकरीरेस्याद्दैवज्ञेगुग्गुलुद्रुमेइतिविश्वलोचनःसुखावहंसौरव्यंशयनंइतिपृच्छंतितेसौरव्यशायनिकाः पृच्छतोसुस्ना

स्त्रियोभरतसिंहानांनावलब्ध्वेवपारगः कुंतीद्रुपदपुत्रीचसुभद्राचोत्तरातथा ६ स्त्रियश्चान्यान्नृसिंहानांबभूवुर्हृष्टमानसाः तत्र
मल्लानटाश्चैवग्रंथिकाःसौरव्यशायिकाः ७ सूतमागधसंघाश्चाप्यस्तुवंस्तजनार्दनम् कुरुवंशस्तवाख्याभिराशीर्भिर्भरतर्षभ ८
उत्थायतुयथाकालमुत्तरायदुनंदनम् अभ्यवादयतप्रीतासहपुत्रेणभारत ९ तस्यकृष्णोददौहृष्टोबहुरत्नंविशेषतः तथान्येवृष्णि
शार्दूलानामचास्याकरोत्प्रभुः १० पितुस्तवमहाराजसत्यसंधोजनार्दनः परिक्षीणेकुलेयस्माज्जातोयमभिमन्युजः ११ परिक्षिदितिना
मास्यैभवत्वित्यब्रवीत्तदा सोवर्धतयथाकालंपितातवजनाधिप १२ मनःप्रल्हादनश्चासीत्सर्वलोकस्यभारत मासजातस्तुतेवीरपि
ताभवतिभारत १३ अथाजग्मुःसुबहुलंरत्नमादायपांडवाः तान्समीपगताञ्श्रुत्वानिर्ययुर्वृष्णिपुंगवाः १४ अलंचक्रुश्चमाल्यौघैः
पुरुषानागसाह्वयम् पताकाभिर्विचित्राभिर्ध्वजैश्चविविधैरपि १५ वेश्मानिसमलंचक्रुःपौराश्चापिजनेश्वराः देवतायतनानांचपू
जासुविविधास्तथा १६ संदिदेशाथविदुरःपांडुपुत्रप्रियेप्सया राजमार्गाश्चतत्रासन्सुमनोभिरलंकृताः १७ शुशुभेतत्पुरंचापि
समुद्रौघनिभस्वनम् नर्तकैश्चापिनृत्यद्भिर्गायकानांचनिःस्वनैः १८ आसीद्वैश्रवणस्येवनिवासस्तत्पुरंतथा बंदिभिश्चनरैराजन्
स्त्रीसहायैश्चसर्वशः १९ तत्रतत्रविविक्तेषुसमंतादुपशोभितम् पताकाधूयमानाश्चसमंतान्मातरिश्वना २० अदर्शयन्निवतदाकुरू
न्वैदक्षिणोत्तरान् अघोषयंस्तदाचापिपुरुषाराजधूर्गताः सर्वरात्रंविहारोद्यरत्नाभरणलक्षणः २१ इतिश्रीमन्महाभारते
आश्वमेधिकेपर्वणिपांडवागमनेसप्ततितमोऽध्यायः ७० वैशंपायनउवाच तान्समीपगताञ्श्रुत्वापांडवाञ्शत्रुक
र्षणः वासुदेवःसहामात्यःप्रयातःससुहृद्गणः १ तेसमेत्ययथान्यायंप्रत्युद्याताद्दिदृक्षया तेसमेत्ययथाधर्मंपांडवावृष्णिभिःसह
२ विविशुःसहिताराजन्पुरंवारणसाह्वयम् महतस्तस्यसैन्यस्यखुरनेमिस्वनेनह ३ द्यावापृथिव्योरवंचैवसर्वमासीत्समावृतं
म् तेकोशानग्रतःकृत्वाविविशुःस्वपुरंतदा ४ पांडवाःप्रीतमनसःसामात्याःससुहृद्गणाः तेसमेत्ययथान्यायंधृतराष्ट्रंजनाधिपं
५ कीर्तयंतःस्वनामानितस्यपादौववंदिरे धृतराष्ट्रादनुचतेगांधारींसुबलात्मजाम् ६ कुंतींचराजशार्दूलतदाभरतसत्तम विदुरं
पूजयित्वाचवैश्यापुत्रंसमेत्यच ७

नादिष्यइतिद्दकु ७ कुरुवंशस्यस्तवं आचक्षतेताभिः कुरुवंशस्तवाख्याभिः ८ ९ १० ११ ६४
१२ १३ १४ १५ १६ १७ १८ १९ २० २१ इत्याश्वमेधिकेपर्वणिटीकायांसप्ततितमोऽध्यायः ७० तान्समीपगतानिति १
२ ३ ४ ५ ६ वैश्यापुत्रंयुयुत्सुम् ७ छ

८ ९ १० ११ १२ १३ १४ १५ पावनःनाशकः १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ ३

पूज्यमानाःस्मतेवीराव्यसोचंतविशांपते ततस्तत्परमाश्चर्यंविचित्रंमहदद्भुतम् ८ शश्रुवुस्तेतदावीराःपितुस्तेजन्मभारत नदुपश्रु
त्यतत्कर्मवासुदेवस्यधीमतः ९ पूजार्हंपूजयामासुःकृष्णंदेवकिनंदनम् ततःकतिपयाहस्यव्यासःसत्यवतीसुतः १० आजगाममम-
हातेजानगरंनागसाह्वयम् तस्यसर्वेयथान्यायंपूजांचक्रुःकुरूद्वहाः ११ सहवृष्ण्यंधकव्याघ्रैरुपासांचक्रिरेतदा तत्रनानाविधाकाराः
कथाःसमभिकीर्त्यवै १२ युधिष्ठिरोधर्मसुतोव्यासंवचनमब्रवीत् भवत्प्रसादाद्भगवन्यदिदंरत्नमाहृतम् १३ उपयोक्तुंतदिच्छामि
वाजिमेधेमहाक्रतौ तमनुज्ञातुमिच्छामिभवतामुनिसत्तम त्वदधीनावयंसर्वेकृष्णस्यचमहात्मनः १४ व्यासउवाच अ
नुजानामिराजंस्त्वांक्रियतांयदनंतरम् यजस्ववाजिमेधेनविधिवद्दक्षिणावता १५ अश्वमेधोहिराजेंद्रपावनःसर्वपाप्मनाम् तेने
ष्ट्वात्वंविपाप्मावैभवितानात्रसंशयः १६ वैशंपायनउवाच इत्युक्तःसतुधर्मात्माकुरुराजोयुधिष्ठिरः अश्वमेधस्यकौ
रव्यचकाराहरणेमतिम् १७ समनुज्ञाप्यतत्सर्वंकृष्णद्वैपायनंनृपः वासुदेवमथाभ्येत्यवाग्मीवचनमब्रवीत् १८ देवकीसुप्रजादे
वीत्वयापुरुषसत्तम यद्ब्रूयांत्वांमहाबाहोतत्कृथास्त्वमिहाच्युत १९ त्वत्प्रभावार्जितान्भोगानश्नीमयदुनंदन पराक्रमेणबुद्ध्याचत्व
येयंनिर्जितामही २० दीक्षयस्वत्वमात्मानंत्वंहिनःपरमोगुरुः त्वयीष्टवतिदाशार्हविपाप्माभवितास्म्यहम् २१ त्वंहियज्ञोऽक्षरःसर्व
स्त्वंधर्मस्त्वंप्रजापतिः त्वंगतिःसर्वभूतानामितिमेनिश्चितामतिः २२ वासुदेवउवाच त्वमेवैतन्महाबाहोवक्तुमर्हस्यरि
दम त्वंगतिःसर्वभूतानामितिमेनिश्चितामतिः २३ त्वंचाद्यकुरुवीराणांधर्मेणहिविराजसे गुणीभूताःस्मतेराजंस्त्वंनोराजागुरु
र्मतः २४ यजस्वमदनुज्ञातःप्राप्यएषक्रतुस्त्वया युनक्तुनोभवान्कार्येयत्रवांछसिभारत २५ सत्यंतेप्रतिजानामिसर्वंकर्तास्मितेन
घ भीमसेनार्जुनौचैवतथामाद्रवतीसुतौ इष्टवंतोभविष्यंतित्वयीष्टवतिपार्थिव २६ इतिश्रीमन्महाभारतेआश्वमेधिके
पर्वणिव्यासागमनेएकसप्ततोऽध्यायः ७१ वैशंपायनउवाच एवमुक्तस्तुकृष्णेनधर्मपुत्रोयुधिष्ठिरः व्यासमामंत्र्य
मेधावीततोवचनमब्रवीत् १ यदाकालंभवान्वेत्तिहयमेधस्यतत्त्वतः दीक्षयस्वतदामांत्वंत्वय्यायत्तोहिमेक्रतुः २ व्यासउ
वाच अहंपैलोथकौंतेययाज्ञवल्क्यस्तथैवच विधानंयद्यथाकालंतत्कर्तारोनसंशयः ३ चैत्र्यांहिपौर्णमास्यांतुतवदीक्षाभवि
ष्यति संभाराःसंभ्रियंतांचयज्ञार्थंपुरुषर्षभ ४

स्याश्वमेधिकेपर्वणिटीकायांएकसप्ततोऽध्यायः ७१ एवमुक्तः १ २ ३ ४

५ ६ ७ ८ ९ स्फ्यः काष्टखड्गः सचात्रसौवर्णः कूर्चआसनार्थंकुशमुष्टिः सोप्यत्रसौवर्णः १० ११ सुगुप्तंसुरक्षितंयथास्यात्तथा १२ १३

अश्वविद्याविदश्चैवसूताविप्राश्चतद्विदः मेध्यमश्वंपरीक्षंतांतवयज्ञार्थसिद्धये ५ तमुत्सृज्ययथाशास्त्रंपृथिवींसागरांबराम्
सपर्येतुयशोदीप्तंतवपार्थिवदर्शयन् ६ वैशंपायनउवाच इत्युक्तःसतथेत्युक्त्वापांडवःपृथिवीपतिः चकारसर्वं
राजेंद्रयथोक्तंब्रह्मवादिना ७ संभाराश्चैवराजेंद्रसर्वेसंकल्पिताभवन् ससंभारान्समाहृत्यनृपोधर्मसुतस्तदा ८ न्यवेदयद्मे
यात्माकृष्णद्वैपायनायवै ततोब्रवीन्महातेजाव्यासोधर्मात्मजंनृपम् ९ यथाकालंयथायोगंसज्जाःस्मतवदीक्षणे स्फ्यश्वकूर्चश्च
सौवर्णोयच्चान्यदपिकौरव १० तत्रयोग्यंभवेत्किंचित्तद्रौक्मंतत्क्रियतामिति अश्वश्चोत्सृज्यतामद्यपृथ्व्यामथयथाक्रमम् ११ सुगु
प्तश्चरतांचापियथाशास्त्रंयथाविधि १२ युधिष्ठिरउवाच अयमश्वोयथाब्रह्मन्नुत्सृष्टःपृथिवीमिमाम् चरिष्यति
यथाकामंतत्रवैसंविधीयताम् १३ पृथिवींपर्यटंतंहितुरगंकामचारिणम् कःपालयेदितिमुनेतद्भवान्वक्तुमर्हति १४ वै
शंपायनउवाच इत्युक्तःसतुराजेंद्रकृष्णद्वैपायनोब्रवीत् भीमसेनादवरजःश्रेष्ठःसर्वधनुष्मताम् १५ जिष्णुःसहिष्णुर्धृ
ष्णुश्चसएनंपालयिष्यति शक्तःसहिमहींजेतुंनिवातकवचांतकः १६ तस्मिन्ह्यस्त्राणिदिव्यानिदिव्यंसंहननंतथा दिव्यंधनुश्चे
षुधीचसएनमनुयास्यति १७ सहिधर्मार्थकुशलःसर्वविद्याविशारदः यथाशास्त्रंनृपश्रेष्ठचारयिष्यतितेहयम् १८ राजपुत्रोमहा
बाहुःश्यामोराजीवलोचनः अभिमन्योःपितावीरःसएनंपालयिष्यति १९ भीमसेनोपितेजस्वीकौंतेयोमितविक्रमः समर्थोरक्षितुंरा
ष्ट्रंनकुलश्चविशांपते २० सहदेवस्तुकौरव्यसमाधास्यतिबुद्धिमान् कुटुंबतंत्रंविधिवत्सर्वमेवमहायशाः २१ तत्तुसर्वंयथान्याय-
मुक्तःकुरुकुलोद्वहः चकारफाल्गुनंचापिसंदिदेशहयंप्रति २२ युधिष्ठिरउवाच एह्यर्जुनत्वयावीरहयोयंपरिपाल्य
ताम् त्वमर्होरक्षितुंह्येनंनान्यःकश्चनमानवः २३ येचापित्वांमहाबाहोप्रत्युद्यांतिनराधिपाः तैर्विग्रहोयथानस्यात्तथाकार्यंत्व
यानघ २४ आख्यातव्यश्चभवतायज्ञोयंममसर्वशः पार्थिवेभ्योमहाबाहोसमयेगम्यतामिति २५ वैशंपायनउवाच
एवमुक्त्वासधर्मात्माभ्रातरंसव्यसाचिनम् भीमंचनकुलंचैवपुरगुप्तौसमादधत् २६ कुटुंबतंत्रेचतदासहदेवंयुधांपतिम् अ
नुमान्यमहीपालंधृतराष्ट्रंयुधिष्ठिरः २७ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिद्विसप्ततोऽध्यायः ७२

१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ इत्याश्वमेधिकेपर्वणिटीकायांद्विसप्ततोध्यायः ७२

दीक्षेति १ पशुबंधान् अश्वमेधस्यारंभणीयरूपान् २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

वैशंपायनउवाच दीक्षाकालेतुसंप्राप्तेततस्तेसुमहर्त्विजः विधिवद्दीक्षयामासुरश्वमेधायपार्थिवम् १ कृत्वासपशुबं-
धांश्चदीक्षितःपांडुनंदनः धर्मराजोमहातेजाःसहर्त्विग्भिर्व्यरोचत २ हयश्चहयमेधार्थंस्वयंचब्रह्मवादिना उत्सृष्टःशास्त्रवि-
धिनाव्यासेनामिततेजसा ३ सराजाधर्मराड्राजन्दीक्षितोविबभौतदा हेममालीरुक्मकंठःप्रदीप्तइवपावकः ४ कृष्णाजिनीद-
डपाणिःक्षौमवासाःसधर्मजः विबभौद्युतिमान्भूयःप्रजापतिरिवाध्वरे ५ तथैवास्यर्त्विजःसर्वेतुल्यवेषाविशांपते बभूवुरर्जुन-
श्चापिप्रदीप्तइवपावकः ६ श्वेताश्वःकृष्णसारंतंससाराश्वंधनंजयः स्वस्तितेऽस्तुव्रजाव्यग्रंपुनश्चेहीतिभारत अथापरमनुष्येंद्रपु-
रुषावाक्यमब्रुवन् नेनपश्यामस्संमर्दंधनुरेतत्सदृश्यते ८ एतद्धिभीमनिर्ह्रादंविश्रुतंगांडिवंधनुः ब्राह्मणाश्चमहीपालबहवोवेद-
पारगाः ९ विधिवत्पृथिवीपालाधर्मराजस्यशासनात् विक्षिपन्गांडिवंराजन्बद्धगोधांगुलित्रवान् १० तमश्वंपृथिवीपालमुदा
युक्तःससारच आकुमारंतदाराजन्नागमत्तत्पुरंविभो ११ द्रष्टुकामकुरुश्रेष्ठंप्रयास्यंतंधनंजयम् तेषामन्योन्यसंमर्दादूष्मेवसम-
जायत १२ दिदृक्षूणांहयंतंचतंचैवहयसारिणम् ततःशब्दोमहाराजदिशःखंप्रतिपूरयन् १३ बभूवप्रेक्षतांनॄणांकुंतीपुत्रंधनं-
जयम् एषगच्छतिकौंतेयस्तुरगश्चैवदीप्तिमान् यमन्वेतिमहाबाहुःसंस्पृशन्धनुरुत्तमम् १४ एवंशुश्रावबदतांगिरंजिष्णुरु-
दारधीः स्वस्तितेऽस्तुव्रजारिष्टंपुनश्चेहीतिभारत १५ अथापरमनुष्येंद्रपुरुषावाक्यमब्रुवन् नेनपश्यामसंमर्दंधनुरेतत्प्रदृश्य-
ते १६ एतद्धिभीमनिर्ह्रादंविश्रुतंगांडिवंधनुः स्वस्तिगच्छत्वरिष्टंवैपंथानमकुतोभयम् १७ निवृत्तमेनंद्रक्ष्यामःपुनरेष्यति
चध्रुवम् एवमाद्यामनुष्याणांस्त्रीणांचभरतर्षभ १८ शुश्रावमधुरावाचःपुनःपुनरुदारधीः याज्ञवल्क्यस्यशिष्यश्चकुशलोय-
ज्ञकर्मणि १९ प्रायात्पार्थेनसहितःशांत्यर्थंवेदपारगः ब्राह्मणाश्चमहीपालबहवोवेदपारगाः अनुजग्मुर्महात्मानंक्षत्रियाश्चविशां-
पते २० विधिवत्पृथिवीपालधर्मराजस्यशासनात् पांडवैःपृथिवीमस्त्रैर्निर्जितामस्त्रतेजसा चचारसमहाराजयथादेशंचस-
त्तम २१ तत्रयुद्धानिवृत्तानियान्यासन्पांडवस्यह तानिवक्ष्यामितेवीरविचित्राणिमहांतिच २२ सहयःपृथिवींराजन्प्रद-
क्षिणमवर्तत ससारोत्तरतःपूर्वंतन्निबोधमहीपते २३ अवमृद्नन्सराष्ट्राणिपार्थिवानांहयोत्तमः शनैस्तदापरिययौश्वेताश्वश्च
महारथः २४

१७ १८ शिष्यःसोमश्रवाः १९ २० २१ २२ २३ २४ ५ ५ ५

२५ २६ २७ २८ उभयतइति क्षुद्राणिचेतिपाठे क्षुद्राणिउपेक्षितानीत्यर्थः २९ इत्याश्वमेधिकेपर्वणिटीकायांत्रिसप्ततोऽध्यायः ७३

तत्रसंगणनानास्तिराज्ञामयुतशस्तदा येऽयुध्यंतमहाराजक्षत्रियाहतबांधवाः २५ किरातायवनाराजन्बहवोपिधनुर्धराः म्ले
च्छाश्चान्येबहुविधाः पूर्वयेनिकृतारणे २६ आर्याश्चपृथिवीपालाः प्रहृष्टनरवाहनाः समीयुः पांडुपुत्रेणबहवोयुद्धदुर्मदाः २७ ए
वंवृत्तानियुद्धानितत्रतत्रमहीपते अर्जुनस्यमहीपालैर्नानादेशसमागतैः २८ यानितुभयतोराजन्प्रतप्तानिमहांतिच तानि
युद्धानिवक्ष्यामिकौंतेयस्यतवानघ २९ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिअश्वानुसारेत्रिसप्ततोऽध्यायः ७३
वैशंपायनउवाच त्रिगर्तैरभवद्युद्धंकृतवैरैःकिरीटिनः महारथसमाज्ञातैर्हतानांपुत्रनप्तृभिः १ तेसमाज्ञायसंप्राप्तंय
ज्ञियंतुरगोत्तमम् विषयांतेततोवीरादंशिताःपर्यवारयन् २ रथिनोबद्धतूणीराःसदश्वैःसमलंकृतैः परिवार्यहयंराजन्ग्र
हीतुंसंप्रचक्रमुः ३ ततःकिरीटीसंचिंत्यतेषांतत्रचिकीर्षितम् वारयामासतान्वीरान्सांत्वपूर्वमरिंदम ४ तदनादृत्यतेसर्वेशरैरभ्य
हनंस्तदा तमोरजोभ्यांसंछन्नास्तान्किरीटीन्यवारयत् ५ तानब्रवीत्ततोजिष्णुःप्रहसन्निवभारत निवर्तध्वमधर्मज्ञाःश्रेयोजी
वितमेवच ६ सहिवीरःप्रयास्यन्वैधर्मराजेनवारितः हतबांधवानतेपार्थहंतव्याःपार्थिवाइति ७ सतदातद्वचःश्रुत्वाधर्मराजस्य
धीमतः तान्निवर्तध्वमित्याहनन्यवर्ततचापिते ८ ततस्त्रिगर्तराजानंसूर्यवर्माणमाहवे विजित्यशरजालेनप्रजहासधनंजयः ९
ततस्तेरथघोषेणरथनेमिस्वनेनच पूरयंतोदिशःसर्वाधनंजयमुपाद्रवन् १० सूर्यवर्माततःपार्थेशराणांनतपर्वणाम् शतान्यमुंचद्रा
जेंद्रलब्धलक्ष्यमभिदर्शयन् ११ तथैवान्येमहेष्वासायेचतस्यानुयायिनः मुमुचुःशरवर्षाणिधनंजयवधैषिणः १२ सतान्ज्यामुख
निर्मुक्तैर्बहुभिःसुबहूञ्शरान् चिच्छेदपांडवोराजंस्तेभूमौन्यपतंस्तदा १३ केतुवर्मातुतेजस्वीतस्यैवावरजोयुवा युयुधेभ्रातु
रर्थायपांडवेनयशस्विना १४ तमापतंतंसंप्रेक्ष्यकेतुवर्माणमाहवे अभ्यघ्नन्निशितैर्बाणैर्बीभत्सुःपरवीरहा १५ केतुवर्मण्यभि
हतेधृतवर्मामहारथः रथेनाशुसमुत्पत्यशरैर्जिष्णुमवाकिरत् १६ तस्यतांशीघ्रतामीक्ष्यतुतोषातीववीर्यवान् गुडाकेशोमहाते
जाबालस्यधृतवर्मणः १७ नसदद्दर्शनदृशनाददानंचततदा किरंतमेवसशरान्ददृशेपाकशासनिः १८ सतुतंपूजयामासधृतव
र्माणमाहवे मनसासुमुहूर्तंवैरणेसमभिहर्षयन् १९ तंपन्नगमिवक्रुद्धंकुरुवीरःस्मयन्निव प्रीतिपूर्वंमहाबाहुःप्राणैर्नव्यपरोप
यत् २०

त्रिगर्तैरिति महारथत्वेनसम्यगाज्ञातैःपांडवीयैः हतानांपुत्रनप्तृभिस्त्रिगर्तैः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८
१९ २०

सतथारक्ष्यमाणोवैपार्थेनामिततेजसा धृतवर्माशरंदीप्तंमुमोचविजयेतदा २१ सतेनविजयस्तूर्णमासीद्दुःकरेभृशम् मुमोचगां
डिवमोहात्तत्पपाताथभूतले २२ धनुषःपततस्तस्यसव्यसाचिकराद्विभो अभूद्वर्णसदृशंरूपंशक्रचापस्यभारत २३ तस्मिन्निप
तितेदिव्येमहाधनुषिपार्थिव जहाससस्वनंहासंधृतवर्मामहाहवे २४ ततोरोषार्दितोजिष्णुःप्रमृज्यरुधिरंकरात् धनुरादत्ततद्दि
व्यंशरवर्षैर्ववर्षच २५ ततोहलहलाशब्दोदिवस्पृगभवत्तदा नानाविधानांभूतानांतत्कर्माणिप्रशंसताम् २६ ततःसंप्रेक्ष्यसंक्रु
द्धंकालान्तकयमोपमम् जिष्णुंत्रैगर्तकायोधाःपरीताःपर्यवारयन् २७ अभिसृत्यपरीप्सार्थंततस्तेधृतवर्मणः परिवव्रुर्गुडाकेशंतत्रा
क्रुध्यद्धनंजयः २८ ततोयोधान्जघानाशुतेषांसदशचाष्टच महेन्द्रवज्रप्रतिमैरायसैर्बहुभिःशरैः २९ तान्संप्रभग्नांस्त्वरमा
णोधनंजयः शरैराशीविषाकारैर्जघानस्वनवद्धसन् ३० तेभग्नमनसःसर्वेत्रैगर्तकमहारथाः दिशोभिदुद्रुवुराजन्धनंजयश
रार्दिताः ३१ तमूचुःपुरुषव्याघ्रंसंशप्तकनिषूदनम् तेवास्माकिंकराःसर्वेसर्वेवेवशगास्तव ३२ आज्ञापयस्वनःपार्थप्रह्वान्प्रेष्या
नवस्थितान् करिष्यामःप्रियंसर्वंतवकौरवनंदन ३३ एतदाज्ञायवचनंसर्वांस्तानब्रवीत्तदा जीवितंरक्षतनृपाःशासनंप्रतिगृह्य
ताम् ३४ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिअश्वानुसारेचतुःसप्ततोऽध्यायः ७४ वैशंपायनउवाच
प्राग्ज्योतिषमथाभ्येत्यव्यचरत्सहयोत्तमः भगदत्तात्मजस्तत्रनिर्ययौरणकर्कशः १ सहयंपांडुपुत्रस्यविषयांतमुपागतम् युयु
धेभरतश्रेष्ठवज्रदत्तोमहीपतिः २ सोभिनिर्यायनगराद्भगदत्तसुतोनृपः अश्वमायांतमुन्मथ्यनगराभिमुखोययौ ३ तथालक्ष्य
महाबाहुःकुरूणामृषभस्तदा गांडीवंविक्षिपंस्तूर्णंसहसासमुपाद्रवत् ४ ततोगांडीवनिर्मुक्तैरिषुभिर्मोहितोनृपः हयमुत्सृज्य
तंवीरस्ततःपार्थमुपाद्रवत् ५ पुनःप्रविश्यनगरंदंशितःसनृपोत्तमः आरुह्यनागप्रवरंनिर्ययौरणकर्कशः ६ पांडुरेणातपत्रेणोध्रि
यमाणेनमूर्धनि दोधूयताचामरेणश्वेतेनचमहारथः ७ ततःपार्थंसमासाद्यपांडवानांमहारथम् आह्वयामासबीभत्सुंबाल्यान्मो
हाच्चसंयुगे ८ सवारणेनगप्रख्यंप्रभिन्नकरटामुखम् प्रेषयामाससंक्रुद्धःश्वेताश्वंप्रतिपार्थिवः ९ विक्षरंतंमहामेघंपरवारणवार
णम् शास्त्रवत्कल्पितंसंख्येविवशंयुद्धदुर्मदं १० प्रचोद्यमानःसगजस्तेनराज्ञामहाबलः तदांकुशेनविबभावुत्पतिष्यन्निवांब
रम् ११

आश्वमेधिकेपर्वणिटीकायांचतुःसप्ततोऽध्यायः ७४ प्राग्ज्योतिषमितिस्पष्टार्थोऽध्यायः १ २ ३ ४ ५ ६ ७ ८ ९ १० ०२ १४ १५

१२ १३ १४ १५ १६ १७ १८ १९ २० इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणि टीकायां पंचसप्ततोऽध्यायः ७३

तमापतंतं संप्रेक्ष्य क्रुद्धो राजन्धनंजयः भूमिष्ठो वारणगतं योधयामास भारत १२ वज्रदत्तस्ततः क्रुद्धो मुमोचाशु धनंजये तोमरानग्निसंकाशान्शलभानिव वेगितान् १३ अर्जुनस्तानसंप्राप्तान्गांडीवप्रभवैः शरैः द्विधा त्रिधा च चिच्छेद ख एव खगमैस्तदा १४ स तान्दृष्ट्वा तथा छिन्नांस्तोमरान्भगदत्तजः इषूनसक्तांस्त्वरितः प्राहिणोत्पांडवं प्रति १५ ततोऽर्जुनस्तूर्णतरं रुक्मपुंखानजिह्मगान् प्रेषयामास संक्रुद्धो भगदत्तात्मजं प्रति १६ स तैर्विद्धो महातेजा वज्रदत्तो महामृधे भृशाहतः पपातोर्व्यां न त्वेनमजहात्स्मृतिः १७ ततः स पुनरारुह्य वारणप्रवरं रणे अव्यग्रः प्रेषयामास जयार्थी विजयं प्रति १८ तस्मै बाणांस्ततो जिष्णुर्निर्मुक्ताशीविषोपमान् प्रेषयामास संक्रुद्धो ज्वलितज्वलनोपमान् १९ स तैर्विद्धो महानागो विस्रवन्रुधिरं बभौ गैरिकाक्तमिवांभोद्रिर्बहुप्रस्रवणं तदा २० इति श्रीमन्महाभारते आ॰ अश्वानुसारे पञ्चसप्ततितमोऽध्यायः ७५ वैशंपायन उवाच एवं त्रिरात्रमभवत्तद्युद्धं भरतर्षभ अर्जुनस्य नरेंद्रेण वृत्रेणेव शतक्रतोः १ ततश्चतुर्थे दिवसे वज्रदत्तो महाबलः जहास सस्वनं हासं वाक्यं चेदमथाब्रवीत् २ अर्जुनार्जुन तिष्ठस्व न मे जीवन्विमोक्ष्यसे त्वां निहत्य करिष्यामि पितुस्तोयं यथाविधि ३ त्वया वृद्धो मम पिता भगदत्तः पितुः सखा हतो वृद्धोपचायित्वाच्छिशुं मामद्य योधय ४ इत्येवमुक्त्वा संक्रुद्धो वज्रदत्तो नराधिपः प्रेषयामास संक्रुद्धो वारणं पांडवं प्रति ५ संप्रेष्यमाणो नागेंद्रो वज्रदत्तेन धीमता उत्पतिष्यन्निवाकाशमभिदुद्राव पांडवम् ६ अग्रहस्तसमुक्तेन स शीकरेण स नागराट् समुक्षत गुडाकेशं शैलं नीलमिवांबुदः ७ स तेन प्रेषितो राज्ञा मेघवन्निनदन्मुहुः मुखाडंबरसंह्रादैरभ्यद्रवत फाल्गुनम् ८ स नृत्यन्निव नागेंद्रो वज्रदत्तप्रचोदितः आससाद द्रुतं राजन्कौरवाणां महारथम् ९ तमायांतमथालक्ष्य वज्रदत्तस्य वारणम् गांडीवमाश्रित्य बली न व्यकंपत शत्रुहा १० चुक्रोध बलवच्चापि पांडवस्तस्य भूपते कार्यविघ्नमनुस्मृत्य पूर्ववैरं च भारत ११ ततस्तं वारणं क्रुद्धः शरजालेन पांडवः निवारयामास तदा वेलेव मकरालयम् १२ स नागप्रवरः श्रीमानर्जुनेन निवारितः तस्थौ शरैर्वितुन्नांगः श्वाविच्छललितो यथा १३ निवारितं गजं दृष्ट्वा भगदत्तसुतो नृपः उत्ससर्ज शितान्बाणानर्जुने क्रोधमूर्छितः १४ अर्जुनस्तु महाबाहुः शरैररिनिघातिभिः वारयामास तान्बाणांस्तदद्भुतमिवाभवत् १५ ततः पुनरभिक्रुद्धो राजा प्राग्ज्योतिषाधिपः प्रेषयामास नागेंद्रं बलवत्पर्वतोपमम् १६

एवमिति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ श्वावित् शल्यः मृगविशेषः शललितः शलाकाप्रोतः १३
१४ १५ १६

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीका

नमापतंतंसंप्रेक्ष्यबलवत्पाकशासनिः नाराचमग्निसंकाशंप्राहिणोद्वारणंप्रति १७ सतेनवारणोराजन्मर्मस्वभिहतोभृशम् प
पातसहसाभूमौवज्ररुग्णइवाचलः१८ सपतन्शुशुभेनागोधनंजयशराहतः विशन्निवमहाशैलोमहींवज्रप्रपीडितः १९ तस्मि-
न्निपतितेनागेवज्रदत्तस्यपांडवः तंनभेतव्यमित्याहततोभूमिगतंनृपम् २० अब्रवीद्धिमहातेजाःप्रस्थितंमांयुधिष्ठिरः राजा
नस्तेनहंतव्याधनंजयकथंचन २१ सर्वमेतन्नरव्याघ्रभवत्वेतावताकृतम् योधाश्चापिनहंतव्याधनंजयरणेत्वया २२ वक्तव्या
श्चापिराजानःसर्वेसहसुहृज्जनैः युधिष्ठिरस्याश्वमेधोभवद्भिरनुभूयताम् २३ इतिभ्रातृवचःश्रुत्वानहन्मित्वांनराधिप उत्ति
ष्ठनभयंतेस्तिस्वस्तिमान्गच्छपार्थिव २४ आगच्छेथामहाराजपरांचैत्रीमुपस्थिताम् यदाश्वमेधोभविताधर्मराजस्यधीमतः २५
एवमुक्तःसराजातुभगदत्तात्मजस्तदा तथेत्येवाब्रवीद्वाक्यंपांडवेनाभिनिर्जितः २६ इतिश्रीमन्महाभारतेआश्वमेधिकेप
र्वणिवज्रदत्तपराजयेषट्सप्ततितमोऽध्यायः ७६ वैशंपायनउवाच सैंधवैरभवद्युद्धंततस्तस्यकिरीटिनः हतशेषैर्म
हाराजहतानांचसुतैरपि १ तेवतीर्णमुपश्रुत्यविषयंश्वेतवाहनम् प्रत्युद्ययुरमृष्यंतोराजानःपांडवर्षभम् २ अश्वंचतंप
रामृष्यविषयांतेविषोपमाः नभयंचक्रिरेपार्थाद्भीमसेनादनंतरात् ३ तेविदूराद्धनुष्पाणिंयाज्ञियस्यहयस्यच बीभत्सुंप्रत्यपद्यं
तपदातिनमवस्थितम् ४ ततस्तंतुमहावीर्याराजानःपर्यवारयन् जिगीषंतोनरव्याघ्रंपूर्वंविनिकृतायुधि ५ तेनामान्यपिगो
त्राणिकर्माणिविविधानिच कीर्तयंतस्तदापार्थंशरवर्षैरवाकिरन् ६ तेकिरंतःशरव्रातान्वारणप्रतिवारणान् रणेजयमभी
प्संतःकौंतेयंपर्यवारयन् ७ तेसमीक्ष्यचतंकृष्णमुग्रकर्माणमाहवे सर्वेयुयुधिरेवीरारथस्थास्तंपदातिनम् ८ ततस्तेजघ्निरेवीरं
निवातकवचांतकम् संशप्तकनिहंतारंहंतारंसैंधवस्यच ९ ततोरथसहस्रेणहयानामयुतेनच कोष्ठकीकृत्यबीभत्सुंप्रहृष्टमन
सोऽभवन् १० संस्मरंतोवधंवीराःसिंधुराजस्यचाहवे जयद्रथस्यकौरव्यसमरेसव्यसाचिनः ११ ततःपर्जन्यवत्सर्वेशरवृष्टीरवासृ
जन् तैःकीर्णःशुशुभेपार्थोरविर्मेघांतरेयथा १२ सशरैःसमवच्छन्नश्चकाशेपांडवर्षभः पंजरांतरसंचारीशकुंतइवभारत १३
ततोहाहाकृतंसर्वंकौंतेयेशरपीडिते त्रैलोक्यमभवद्राजन्रविरासीच्चनिष्प्रभः १४ ततोववौमहाराजमारुतोलोमहर्षणः राहु
रग्रसदादित्यंयुगपत्सोममेवच १५

यांषट्सप्ततितमोऽध्यायः ७६ सैंधवैरिति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५

त्वामागतंचसंश्रुत्ययुद्धायहयसारिणं पितुश्चमृत्युदुःखार्तोजहात्प्राणान्धनंजय ३० प्राप्तोबीभत्सुरित्येवनामश्रुत्वैवतेऽनघ
विषादार्तःपपातोर्व्यांममारचममात्मजः ३१ तंदृष्ट्वापतितंतत्रततस्तस्यात्मजंप्रभो गृहीत्वासमनुप्राप्तात्वामद्यशरणैषिणी ३२ इ
त्युक्त्वार्तस्वरंसातुमुमोचधृतराष्ट्रजा दीनादीनंस्थितंपार्थमब्रवीच्चाप्यधोमुखम् ३३ स्वसारंसमवेक्षस्वस्वस्रीयात्मजमेवच कर्तु
मर्हसिधर्मज्ञदयांकुरुकुलोद्वह ३४ विस्मृत्यकुरुराजानंतंचमंदंजयद्रथम् अभिमन्योर्यथाजातःपरिक्षित्परवीरहा ३५ तथा
यंसुरथाज्जातोममपौत्रोमहाभुजः तमादायनरव्याघ्रसंप्राप्तास्मितवांतिकम् ३६ शमार्थंसर्वयोधानांशृणुचेदंवचोमम आगतो
यंमहाबाहोतस्यमंदस्यपुत्रकः ३७ प्रसादमस्यबालस्यतस्मात्त्वंकर्तुमर्हसि एषप्रसाद्यशिरसाप्रशमार्थमरिंदम ३८ याचतेत्वां
महाबाहोशमंगच्छधनंजय बालस्यहतबंधोश्चपार्थकिंचिदजानतः ३९ प्रसादंकुरुधर्मज्ञमामन्युवशमन्वगाः तमनार्यंनृशंसं
चविस्मृत्यास्यपितामहम् ४० अगस्कारिणमत्यर्थंप्रसादंकर्तुमर्हसि एवंब्रुवत्यांकरुणंदुःशलायांधनंजयः ४१ संस्मृत्यदेवीं
गांधारींधृतराष्ट्रंचपार्थिवम् उवाचदुःखशोकार्तःक्षत्रधर्मंव्यगर्हयन् ४२ यत्कृतेबांधवाःसर्वेमयानीतायमक्षयम् इत्युक्त्वाब
हुसांत्वादिप्रसादमकरोज्जयः ४३ परिष्वज्यचतांप्रीतोविससर्जगृहान्प्रति ४४ दुःशलाचापितान्योधान्निवार्यमहतोरणात्
संपूज्यपार्थंप्रययौगृहान्प्रतिशुभानना ४५ एवंनिर्जित्यतान्वीरान्सैंधवान्सधनंजयः अन्वधावतधावंतंहयंकामविचारिणम् ४६
ततोमृगमिवाकाशेयथादेवःपिनाकधृक् ससारतंतथावीरोविधिवद्याज्ञियंहयम् ४७ सचवाजीयथेष्टेनतांस्तान्देशान्यथाक्रमम्
विचचारयथाकामंकर्मपार्थस्यवर्धयन् ४८ क्रमेणसहयस्त्वेवंविचरन्पुरुषर्षभ मणिपूरपतेर्देशमुपायात्सहपांडवः ४९
इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिअश्वानुसारेसैंधवपराजयोनामअष्टसप्ततोऽध्यायः ७८ वैशंपायनउवाच
श्रुत्वातुनृपतिःप्राप्तंपितरंबभ्रुवाहनः निर्ययौविनयेनाथब्राह्मणार्थपुरःसरः १ मणिपूरेश्वरंत्वेवमुपायातंधनंजयः नाभ्य
नंदत्समेधावीक्षत्रधर्ममनुस्मरन् २ उवाचचसधर्मात्मासमन्युःफाल्गुनस्तथा प्रक्रियेयंनतेयुक्ताबहिस्त्वंक्षत्रधर्मतः ३ संरक्ष्य
माणंतुरगंयौधिष्ठिरमुपागतम् यज्ञियंविषयांतेमांनायोत्सीःकिन्नुपुत्रक ४ धिक्त्वामस्तुसुदुर्बुद्धिंक्षत्रधर्मबहिःकृतम् योमां
युद्धायसंप्राप्तंसाम्नैवप्रत्यगृण्हथाः ५

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ प्रमीतइवमृतइव २२ दिव्यंतेजोहार्दोकाशारत्वंमोक्षरं

नत्वयापुरुषार्थोहिकश्चिदस्तीहजीवता यस्त्वंस्त्रीवद्यथाप्राप्तंमांसाम्नाप्रत्यगृह्णथाः यद्यहंन्यस्तशस्त्रस्त्वामागच्छेयंसुदुर्मते
६ प्रक्रियेयंभवेद्युक्तातावत्तवनराधम तमेवमुक्तंभर्त्रातुविदित्वापन्नगात्मजा ७ अमृष्यमाणाभित्त्वोर्वीमुलूपीसमुपागमत् सा
ददर्शततःपुत्रंविमृश्यन्तमधोमुखम् ८ सन्तर्ज्यमानमसकृत्पित्रायुद्धार्थिनाप्रभो ततःसाचारुसर्वाङ्गीसमुपेत्योरगात्मजा ९ उलू
पीप्राहवचनंधर्म्यंधर्मविशारदम् उलूपींमांनिबोधत्वंमातरंपन्नगात्मजाम् १० कुरुष्ववचनंपुत्रधर्मस्तेभवितापरः युध्यस्वैनंकु
रुश्रेष्ठंपितरंयुद्धदुर्मदम् ११ एवमेषहितेप्रीतोभविष्यतिनसंशयः एवंदुर्मर्षितोराजासमात्राबभ्रुवाहनः १२ मनश्चक्रेमहाते
जायुद्धायभरतर्षभ संनह्यकाञ्चनंवर्मशिरस्त्राणंचभानुमत् १३ तूणीरशतसंबाधमारुरोहरथोत्तमम् सर्वोपकरणोपेतंयुक्त
मश्वैर्मनोजवैः १४ सचक्रोपस्करंश्रीमान्हेमभाण्डपरिष्कृतम् परमार्चितमुच्छ्रित्यध्वजंसिंहंहिरण्मयम् १५ प्रययौपार्थमुद्दि
श्यसराजाबभ्रुवाहनः ततोऽभ्येत्यहयंवीरोयज्ञियंपार्थरक्षितम् १६ ग्राहयामासपुरुषैर्हयशिक्षाविशारदैः गृहीतंवाजिनंदृ
ष्ट्वाप्रीतात्मासधनंजयः १७ पुत्रंरथस्थंभूमिष्ठःसंन्यवारयदाहवे सतत्रराजातंवीरंशरसंघैरनेकशः १८ अर्दयामासनिशितैरा
शीविषविषोपमैः तयोःसमभवद्युद्धंपितुःपुत्रस्यचातुलम् १९ देवासुररणप्रख्यमुभयोःप्रीयमाणयोः किरीटिनंप्रविव्याधशरेण
नतपर्वणा २० जत्रुदेशेनरव्याघ्रंप्रहसन्बभ्रुवाहनः सोऽभ्यगात्सहपुङ्खेनवल्मीकमिवपन्नगः २१ विनिर्भिद्यचकौन्तेयंप्रविवेशमही
तलम् सगाढवेदनोधीमानालम्ब्यधनुरुत्तमम् २२ दिव्यंतेजःसमाविश्यप्रमीतइवसोऽभवत् २२ ससंज्ञामुपलभ्याथप्रशस्यपुरुष
र्षभः पुत्रंशक्रात्मजोवाक्यमिदमाहमहाद्युतिः २३ साधुसाधुमहाबाहोवत्सचित्राङ्गदात्मज सदृशंकर्मणोदृष्ट्वाप्रीतिमानस्मिपुत्रक २४
विमुञ्चाम्येषतेबाणान्पुत्रयुद्धेस्थिरोभव इत्येवमुक्त्वानाराचैरभ्यवर्षदमित्रहा २५ तान्सगाण्डीवनिर्मुक्तान्वज्राशनिसमप्रभान्
नाराचानच्छिनद्राजाभल्लैःसर्वांस्त्रिधाद्विधा २६ तस्यपार्थःशरैर्दिव्यैर्ध्वजंहेमपरिष्कृतम् सुवर्णतालप्रतिमंक्षुरेणापाहरद्रथा
त् २७ हयांश्चास्यमहाकायान्महावेगानरिंदम चकारराजन्निर्जीवान्प्रहसन्निवपाण्डवः २८ सरथादवतीर्याथराजापरमकोपनः
पदातिःपितरंक्रुद्धोयोधयामासपाण्डवम् २९ संप्रीयमाणःपार्थानामृषभःपुत्रविक्रमात् अत्यर्थंपीडयामासपुत्रंवज्रधरात्मजः
३०

प्राणस्येतिपूर्वेणसंबंधः २३ २४ २५ २६ २७ २८ २९ ३० ७९ ७

समन्यमानोविमुखंपितरंबभ्रुवाहनः शरैराशीविषाकारैःपुनरेवार्दयद्बली ३१ ततःसबाल्यात्पितरंविव्याधहृदिपत्रिणा नि
शितेनसुपुंखेनबलवद्बभ्रुवाहनः ३२ विवेशपांडवराजन्मर्मभित्वातिदुःखकृत् सतेनातिभृशंक्रुद्धःपुत्रेणकुरुनंदनः ३३ म
हीजगाममोहार्तस्ततोराजन्धनंजयः तस्मिन्निपतितेवीरेकौरवाणांधुरंधरे ३४ सोपिमोहंजगामाथततश्चित्रांगदासुतः व्या
यम्यसंयुगेराजादृष्ट्वाचपितरंहतम् ३५ पूर्वमेवसबाणौघैर्गाढविद्धोऽर्जुनेनह पपातसोपिधरणीमालिंग्यरणमूर्द्धनि ३६ भर्ता
रंनिहतंदृष्ट्वापुत्रंचपतितंभुवि चित्रांगदापरित्रस्ताप्रविवेशरणाजिरे ३७ शोकसंतप्तहृदयारुदतीवेपतीभृशम् मणिपूरपतेर्मा
तादर्शनिहतंपतिम् ३८ इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिअश्वानुसारेअर्जुनपराजयेऊनाशीतोध्यायः ७९
वैशंपायनउवाच ततोबहुविधंभूरिविलप्यकमलेक्षणा मुमोहदुःखसंतप्तापपातचमहीतले १ प्रतिलभ्यचसासं
ज्ञांदेवीदिव्यवपुर्धरा उलूपींपन्नगसुतांदृष्ट्वेदंवाक्यमब्रवीत् २ उलूपिपश्यभर्तारंशयानंनिहतंरणे त्वत्कृतेममपुत्रेणबाणे
नसमितिंजयम् ३ ननुत्वमार्यधर्मज्ञाननुचासिपतिव्रता यत्त्वत्कृतेयंपतितःपतिस्तेनिहतोरणे ४ किंतुसर्वापराधोयंयदितेद्यधनं
जयः क्षमस्वयाच्यमानावैजीवयस्वधनंजयम् ५ ननुत्वमार्यधर्मज्ञात्रैलोक्यविदिताशुभे यद्घातयित्वापुत्रेणभर्तारंनानुशो
चसि ६ नाहंशोचामितनयंहतंपन्नगनंदिनि पतिमेवतुशोचामियस्यातिथ्यमिदंकृतम् ७ इत्युक्त्वासातदादेवीमुलूपींपन्न
गात्मजाम् भर्तारमभिगम्येदमित्युवाचयशस्विनी ८ उत्तिष्ठकुरुमुख्यस्यप्रियमुख्योसिमेप्रिय अयमश्वोमहाबाहोमयाते
परिमोक्षितः ९ ननुत्वयानामविभोधर्मराजस्ययज्ञियः अयमश्वोनुसर्तव्यःसशेषेकिंमहीतले १० त्वयिप्राणाममायत्ताःकुरू
णांकुरुनंदन सकस्मात्प्राणदोन्येषांप्राणान्संत्यक्तवानसि ११ चित्रांगदोवाच उलूपिसाधुपश्येमंपतिंनिपातितं
भुवि पुत्रंचमेसमुत्साह्यघातयित्वानशोचसि १२ कामंस्वपितुबालोयंभूमौमृत्युवशंगतः लोहिताक्षोगुडाकेशोविजयःसाधुजी
वतु १३ नापराधोस्तिसुभगेनराणांबहुभार्यता प्रमदानांभवत्येषमातेभूद्बुद्धिरीदृशी १४ सख्यंचैतत्कृतंधात्राशाश्वदव्ययमेव
तु सख्यंसमभिजानीहिसत्यंसंगतमस्तुते १५ पुत्रेणघातयित्वेमंपतिंयदिनमेद्यवै जीवंतंदर्शयस्यद्यपरित्यक्ष्यामिजीवितम्
१६

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०

साहंदुःखान्वितादेविपतिपुत्रविनाकृता इहैवप्रायमासिष्येप्रेक्षंत्यास्तेनसंशयः १७ इत्युक्त्वापन्नगसुतांसपत्नींचैत्रवाहिनी
ततःप्रायमुपासीनातूष्णीमासीज्जनाधिप १८ वैशंपायनउवाच ततोविलप्यविरताभर्तुःपादौप्रगृह्यसा उपविष्टाभव
द्दीनासोच्छ्वासंपुत्रमिच्छती १९ ततःसंज्ञांपुनर्लब्ध्वासराजाबभ्रुवाहनः मातरंतामथालोक्यरणभूमावथाब्रवीत् २० इतोदुः
खतरंकिन्नुयन्मेमातासुखेधिता भूमौनिपतितंवीरमनुशेतेमृतंपतिम् २१ निहंतारंरणेऽरीणांसर्वशस्त्रभृतांवरम् मयाविनि-
हतंसंख्येप्रेक्ष्यतेदुर्मरंबत २२ अहोस्याहृदयंदेव्याहृदयन्नविदीर्यते व्यूढोरस्कंमहाबाहुंप्रेक्षंत्यानिहतंपतिम् २३ दुर्मरंपुरुषे
णेहमन्येह्यध्वन्यनागते यत्रनाहंनमेमाताविप्रयुज्येतजीवितात् २४ हाहाधिक्कुरुवीरस्यसन्नाहंकांचनंभुवि अपविद्धंहतस्ये
हमयापुत्रेणपश्यत २५ भोभोपश्यतमेवीरंपितरंब्राह्मणाभुवि शयानंवीरशयनेमयापुत्रेणपातितम् २६ ब्राह्मणाःकुरुमुख्य
स्ययेमुक्ताहयसारिणः कुर्वंतिशांतिकामस्यरणेयायंमयाहतः २७ व्यादिशंतुचकिंविप्राःप्रायश्चित्तमिहाद्यमे आनृशंसस्यपापस्य
पितृहंतूरणाजिरे २८ दुश्चराद्वादशसमाहत्वापितरमद्यवै ममेहसुनृशंसस्यसंवीतस्यास्यचर्मणा २९ शिरःकपालेचास्यैवयुंजतः
पितुरद्यमे प्रायश्चित्तंहिनास्त्यन्यद्धत्वाद्यपितरंमम ३० पश्यनागोत्तमसुतेभर्तारंनिहतंमया कृतंप्रियंमयातेद्यनिहत्यसमरेऽर्जु-
नम् ३१ सोऽहमद्यगमिष्यामिगतिंपितृनिषेविताम् नशक्नोम्यात्मनात्मानमहंधारयितुंशुभे ३२ सात्वंमयिमृतेमातस्तथागांडी
वधन्वनि भवप्रीतिमतीदेविसत्येनात्मानमालभे ३३ इत्युक्त्वासततोराजादुःखशोकसमाहतः उपस्पृश्यमहाराजदुःखादुवचनम
ब्रवीत् ३४ शृण्वंतुसर्वभूतानिस्थावराणिचराणिच त्वंचमातर्यथासत्यंब्रवीमिभुजगोत्तमे ३५ यदिनोत्तिष्ठतिजयःपितामेनरस
त्तमः अस्मिन्नेवरणोद्देशेशोषयिष्येकलेवरम् ३६ नहिमेपितरंहत्वानिष्कृतिर्विद्यतेक्वचित् नरकंप्रतिपत्स्यामिध्रुवंगुरुवधार्दितः
३७ वीरंहिक्षत्रियंहत्वागोशतेनप्रमुच्यते पितरंतुनिहत्यैवंदुर्लभानिष्कृतिर्मम ३८ एषह्येकोमहातेजाःपांडुपुत्रोधनंजयः पितावै
ममधर्मात्मातस्यमेनिष्कृतिःकुतः ३९ इत्येवमुक्त्वानृपतेधनंजयसुतोनृपः उपस्पृश्याभवत्तूष्णींप्रायोपेतोमहामतिः ४० वै
शंपायनउवाच प्रायोपविष्टेनृपतौमणिपूरेश्वरेतदा पितृशोकसमाविष्टेसहमात्रापरंतप ४१ उलूपीचिंतयामासतदासं
जीवनंमणिम् सचोपातिष्ठततदापन्नगानांपरायणम् ४२

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९

तं गृहीत्वा तु कौरव्य नागराजपतेः सुता मनः प्रल्हादनीं वाचं सैनिकानामथाब्रवीत् ४३ उत्तिष्ठ मा शुचः पुत्र नैव जिष्णुस्त्वया-
जितः अजेयः पुरुषैरेष तथा देवैः सवासवैः ४४ मया तु मोहिनी नाम मायैषा संप्रदर्शिता प्रियार्थं पुरुषेंद्रस्य पितुस्तेऽद्य यशस्विनः
४५ जिज्ञासुर्ह्येष पुत्रस्य बलस्य तव कौरव संग्रामे युध्यतो राजन्नागतः परवीरहा ४६ तस्मादसि मया पुत्र युद्धाय परिचोदितः मा पा
पमात्मनः पुत्र शंकेथा ह्यण्वपि प्रभो ४७ ऋषिरेष महानात्मा पुराणः शाश्वतोऽक्षरः नैनं शक्तो हि संग्रामे जेतुं शक्रोऽपि पुत्रक ४८
अयं तु मे मणिर्दिव्यः समानीतो विशांपते मृतान्मृतान्पन्नगेंद्रान्यो जीवयति नित्यदा ४९ एनमस्योरसि त्वं च स्थापयस्व पितुः प्रभो
संजीवितं तदा पार्थं स त्वं द्रष्टासि पांडवम् ५० इत्युक्तः स्थापयामास तस्योरसि मणिं तदा पार्थस्यामिततेजाः स पितुः स्नेहाद्दुपापकृ
त् ५१ तस्मिन्न्यस्ते मणौ वीरो जिष्णुरुज्जीवितः प्रभुः चिरसुप्त इवोत्तस्थौ मृष्टलोहितलोचनः ५२ तमुत्थितं महात्मानं लब्धसंज्ञं मन-
स्विनं समीक्ष्य पितरं स्वस्थं ववंदे बभ्रुवाहनः ५३ उत्थिते पुरुषव्याघ्रे पुनर्लक्ष्मीवति प्रभो दिव्याः सुमनसः पुण्या ववृषे पाकशासनः
५४ अनाहता दुंदुभयो विनेदुर्मेघनिस्वनाः साधु साध्विति चाकाशे बभूव सुमहान्स्वनः ५५ उत्थाय च महाबाहुः पर्याश्वस्तो धनंजयः
बभ्रुवाहनमालिंग्य समाजिघ्रत मूर्धनि ५६ ददर्श चापि दूरस्थ मातरं शोककर्षितां उलूप्या सह तिष्ठंतीं ततोऽपृच्छद्धनंजयः ५७ कि
मिदं लक्ष्यते सर्वं शोकविस्मयहर्षवत् रणाजिरममित्रघ्न यदि जानासि शंस मे ५८ जननी च किमर्थं ते रणभूमिमुपागता नागेंद्रदु-
हिता चेयमुलूपी किमिहागता ५९ जानाम्यहमिदं युद्धं त्वया मद्वचनात्कृतम् स्त्रीणामागमने हेतुमहमिच्छामि वेदितुम् ६० तमुवा
च तथा पृष्टस्तु मणिपूरपतिस्तदा प्रसाद्य शिरसा विद्वानुलूपी पृच्छ्यतामियम् ६१ इति श्रीमन्महाभारते आश्वमेधिके पर्वणि अ
श्वानुसारे अर्जुनप्रत्युज्जीवने अशीतितमोऽध्यायः ८० अर्जुन उवाच किमागमनकृत्यं ते कौरव्यकुलनंदिनि मणिपूरप
तेर्मातुस्तथैव च रणाजिरे १ कच्चित्कुशलकामासि राज्ञोऽस्य भुजगात्मजे मम वा चपलापांगि कच्चित्त्वं शुभमिच्छसि २ कच्चित्ते पृथु
लश्रोणि नाप्रियं प्रियदर्शने अकार्षमहमज्ञानादयं वा बभ्रुवाहनः ३ कच्चिन्नु राजपुत्री ते सपत्नी चैत्रवाहिनी चित्रांगदा वरारोहा
नापराध्यति किंचन तमुवाचोरगपतेर्दुहिता प्रहसन्निव न मे त्वमपराद्धोऽसि न नहि मे बभ्रुवाहनः ५

६० ६१ इति श्रीमन्महाभार
ते आश्वमेधिके पर्वणि टीकायां अशीतितमोऽध्यायः ८० किमागमनेति स्पष्टार्थो १ २ ३ ४ ५ ६ ७ ८

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५

नजनित्रीनथास्येयंममयापेक्ष्यवस्थिता श्रूयतांयद्यथावेदंमयासर्वंविचेष्टितम् ६ नमेकोपस्त्वयाकार्यःशिरसात्वांप्रसादये त्व
त्प्रियार्थंहिकौरव्यकृतमेतन्मयाविभो ७ यत्तच्छृणुमहाबाहोनिखिलेनधनंजय महाभारतयुद्धेयत्त्वयाशांतनवोनृपः ८ अधर्मेण
हतःपार्थतस्यैषानिष्कृतिःकृता नहिभीष्मस्त्वयावीरयुध्यमानोहिपातितः ९ शिखंडिनातुसंयुक्तस्तमाश्रित्यहतस्त्वया तस्यशां
तिमकृत्वात्वंत्यजेथायदिजीवितम् १० कर्मणातेनपापेनपतेथानिरयंध्रुवम् एषातुविहिताशांतिःपुत्राद्यांप्राप्तवानसि ११ वसुभि
र्वसुधापालगंगायांचमहामते पुराहिश्रुतमेतत्तवसुभिःकथितंमया गंगायास्तीरमाश्रित्यहतेशांतनवेनृप १२ आप्लुत्यदेवाव
सवःसमेत्यचमहानदीम् इदमूचुर्वचोघोरंभागीरथ्यामतेनदा १३ एषशांतनवोभीष्मोनिहतःसव्यसाचिना अयुध्यमानःसंग्रा
मेसंसक्तोन्येनभाविभि तेदनेनानुषंगेणवयमद्यधनंजयम् १४ शापेनयोजयामेतितथास्त्वितिचसाब्रवीत् तदहंपितुरावेद्य
प्रविश्यव्यथितेंद्रिया १५ अभवंसचतच्छ्रुत्वाविषादमगमत्परम् पितातुमेवसून्गत्वात्वदर्थेसमयाचत १६ पुनःपुनःप्रसाद्यैता
स्तएनमिदमब्रुवन् पुत्रस्तस्यमहाभागमणिपूरेश्वरोयुवा १७ सएनंरणमध्यस्थःशरैःपातयिताभुवि एवंकृतेत्वनागेंद्रमुक्तःशापा
द्भविष्यति १८ गच्छेतिवसुभिश्चोक्तोममचेदंशशंससः तच्छ्रुत्वात्वंमयातस्माच्छापादसिविमोक्षितः १९ नहित्वांदेवराजोपिसमरे
षुपराजयेत् आत्मापुत्रःस्मृतस्तस्मात्तेनेहासिपराजितः २० नहिदोषोममेमतःकथंवामन्यसेविभो इत्येवमुक्तोविजयःप्रसन्नात्मा
ब्रवीदिदम् २१ सर्वमेसुभृशंदेवियद्भूतंत्कृतवत्यसि इत्युक्त्वासाब्रवीत्पुत्रंमणिपूरपतिंजयः २२ चित्रांगदायाःशृण्वन्त्याःकौरव्यद
हितुस्तदा युधिष्ठिरस्याश्वमेधःपरांचैत्रीभविष्यति २३ तत्रागच्छेःसहामात्यैर्मातृभ्यांसहितोनृप इत्येवमुक्तःपार्थेनसराजाबभ्रुवा
हनः उवाचपितरंधीमानिदमस्राविलेक्षणः २४ उपयास्यामिधर्मज्ञभवतःशासनादहम् अश्वमेधेमहायज्ञेद्विजातिपरिवेषकः २५
ममत्वनुग्रहार्थायप्रविशस्वपुरंस्वकम् भार्याभ्यांसहधर्मज्ञमाभूत्तेत्रविचारणा २६ उषित्वेहनिशामेकांसुखंस्वभवनेप्रभो पुनर
श्वानुगमनंकर्तासिजयतांवर २७ इत्युक्तःसतुपुत्रेणतदावानरकेतनः स्मयन्प्रोवाचकौंतेयस्तदाचित्रांगदासुतम् २८ विदितंतेमहा
बाहोयथादीक्षांचराम्यहम् नसतावत्प्रवेक्ष्यामिपुरंतेपृथुलोचन २९ यथाकामंव्रजत्येषयज्ञियाश्वोनरर्षभ स्वस्तितेस्तुगमिष्या
मिनस्थानंविद्यतेमम ३०

२६ २७ २८ २९ ३० ५ ५ ५ ५

सतत्रविधिवत्तेनपूजितःपाकशासनिः भार्याभ्यामभ्यनुज्ञातः प्रायाद्भरतसत्तमः ३१ इतिश्रीमन्महाभारतेआश्वमेधिकेप
र्वणि अश्वानुसारे एकाशीतितमोऽध्यायः ८१ वैशंपायनउवाच सतुवाजीसमुद्रान्तांपर्येत्यवसुधामिमाम् निवृत्तोभि
मुखोराजन्येनवारणसाव्हयम् १ अनुगच्छंश्चतुरगंनिवृत्तोथकिरीटभृत् यदृच्छयासमापेदेपुरंराजगृहंतदा २ तमभ्याशगतंद
ष्ट्वासहदेवात्मजः प्रभो क्षत्रधर्मेस्थितोवीरःसमरायाजुहावह ३ ततःपुरात्सनिष्क्रम्यरथीधन्वीशरीतली मेघसंधिःपदातिस्तंध
नंजयमुपाद्रवत् ४ आसाद्यचमहातेजामेघसंधिर्धनंजयम् बालभावान्महाराजप्रोवाचेदंनकौशलात् ५ किमयंचार्यतेवाजीस्त्री
मध्यइवभारत हयमेनंहरिष्यामिप्रयतस्वविमोक्षणे ६ अदत्तानुनयोयुद्धेयदित्वंपितृभिर्मम करिष्यामितवातिथ्यंप्रहरप्रहरा
मिच ७ इत्युक्तःप्रत्युवाचैनंप्रहसन्निवपांडवः विघ्नकर्त्तामयावार्यइतिमेव्रतमाहितम् ८ भ्रात्राज्येष्ठेननृपतेतदापिविदितंध्रुवं
प्रहरस्वयथाशक्तिनमन्युर्विद्यतेमम ९ इत्युक्तःप्राहरत्पूर्वंपांडवंमगधेश्वरः किरन्शरसहस्राणिवर्षाणीवसहस्रदृक् १० ततोगां
डीवभृच्छूरोगांडीवप्रहितैःशरैः चकारमोघांस्तान्बाणान्सयत्नान्भरतर्षभ ११ समोघंतस्यबाणौघंकृत्वावानरकेतनः शरान्मुमो
चज्वलितान्दीप्तास्यानिवपन्नगान् १२ ऊर्ध्वेपताकादंडेषुरथयंत्रेहयेषुच अन्येषुचरथांगेषुनशरीरेनसारथौ १३ संरक्ष्यमा
णःपार्थेनशरीरेसव्यसाचिना मन्यमानःस्ववीर्यंतन्मागधःप्राहिणोच्छरान् १४ ततोगांडीवधन्वातुमागधेनभृशाहतः बभौवसंत
समयेपलाशःपुष्पितोयथा १५ अवध्यमानःसोभ्यघ्नन्मागधःपांडवर्षभम् तेनतस्थौसकौरव्यलोकवीरस्यदर्शने १६ सव्यसाचीतु
संक्रुद्धोविकृष्यबलवद्धनुः हयांश्चकारनिर्जीवान्सारथेश्चाशिरोहरत् १७ धनुश्चास्यमहच्चित्रंक्षुरेणप्रचकर्तह हस्तावापंपताकांच
ध्वजंचास्यन्यपातयत् १८ सराजाव्यथितोव्यश्वोविधनुर्हतसारथिः गदामादायकौंतेयमभिदुद्राववेगवान् १९ तस्यापततएवाशुग
दांहेमपरिष्कृताम् शरैश्चकर्तबहुधाबहुभिर्गृध्रवाजितैः २० सागदाशकलीभूताविशीर्णमणिबंधना व्यालीविमुच्यमानेवपपातधर
णीतले २१ विरथंविधनुष्कंचगदयापरिवर्जितम् सांत्वपूर्वमिदंवाक्यमब्रवीत्कपिकेतनः २२ पर्याप्तःक्षत्रधर्मोयंदर्शितःपुत्रगम्यताम्
बह्वेतत्समरेकर्मतवबालस्यपार्थिव २३ युधिष्ठिरस्यसंदेशोनहंतव्यानृपाइति तेनजीवसिराजंस्त्वमपराद्धोपिमहारणे २४

२५ २६ २७ २८ २९ ३० इतिश्रीमन्महाभारतेआश्वमेधिकेपर्वणिटीकायांद्व्यशीतितमोऽध्यायः ८२ मागधेनेति १ २ ३ ४ ५ ६

इतिमत्वातदात्मानंमत्वादिष्टंस्ममागधः तथ्यमित्यभिगम्यैनंप्रांजलिःप्रत्यपूजयत् २५ पराजितोस्मिभद्रंतेनाहंयोद्धुमिहोत्सवे
यद्यत्कृत्यंमयातेद्यतद्ब्रूहिकृतमेवतु २६ तमर्जुनःसमाश्वास्यपुनरेवेदमब्रवीत् आगंतव्यंपरांचैत्रीमश्वमेधेनृपस्यनः २७ इत्युक्तः
सतथेत्युक्त्वापूजयामासतंहयम् फाल्गुनंचयुधिश्रेष्ठंविधिवत्सहदेवजः २८ ततोयथेष्टमगमत्पुनरेवसकेसरी ततःसमुद्रतीरेण
वंगान्पुंड्रान्सकोशलान् २९ तत्रतत्रचभूरीणिम्लेच्छसैन्यान्यनेकशः विजिग्येधनुषाराजन्गांडीवेनधनंजयः ३० इतिश्रीम
न्महाभारते आश्वमेधिकेपर्वणि अश्वानुसारेमागधपराजये द्व्यशीतितमोऽध्यायः ८२ वैशंपायनउवाच मागधेनार्चि
तोराजन्पांडवःश्वेतवाहनः दक्षिणांदिशिमास्थायचारयामासतंहयम् १ ततःसपुनरावर्त्यहयःकामचरोबली आससादपुरींर
म्यांचेदीनामृषभसाह्वयाम् २ शरभेणार्चितस्तत्रशिशुपालसुतेनसः युद्धपूर्वंतदातेनपूजयाचमहाबलः ३ ततोर्चितोययौराजं
स्तदासतुरगोत्तमः काशीनंगान्कोशलांश्चकिरातानथतंगणान् ४ पूजांतत्रयथान्यायंप्रतिगृह्यधनंजयः पुनरावृत्यकौंतेयोद-
शार्णानगमत्तदा ५ तत्रचित्रांगदोनामबलवानरिमर्दनः तेनयुद्धमभूत्तस्यविजयस्यातिभैरवम् ६ तंचापिवशमानीयकिरीटी
पुरुषर्षभः निषादराज्ञोविषयमेकलव्यस्यजग्मिवान् ७ एकलव्यसुतश्चैनंयुद्धेनजगृहेतदा ततश्चक्रेनिषादैःससंग्रामंलोमह
र्षणम् ८ ततस्तमपिकौंतेयःसमरेष्वपराजितः जिगाययुधिदुर्धर्षोयज्ञविघ्नार्थमागतम् ९ सतंजित्वामहाराजनैषादिंपाकशास
निः अर्चितःप्रययौभूयोदक्षिणंसलिलार्णवम् १० तत्रापिद्राविडैरंध्रैरौद्रैर्माहिषकैरपि तथाकोल्लगिरेयैश्चयुद्धमासीत्किरीटिनः
११ तांश्चापिविजयोजित्वानातितीव्रेणकर्मणा तुरंगमवशेनाथसुराष्ट्रानभितोययौ १२ गोकर्णमथचासाद्यप्रभासमपिजग्मिवान्
ततोद्वारवतींरम्यांवृष्णिवीराभिपालिताम् १३ आससादहयःश्रीमान्कुरुराजस्ययज्ञियः तमुन्मथ्यहयश्रेष्ठंयादवानांकुमारकाः
१४ प्रययुस्तांस्तदाराजन्नुग्रसेनोन्यवारयत् ततःपुराद्विनिष्क्रम्यवृष्ण्यंधकपतिस्तदा १५ सहितोवसुदेवेनमातुलेनकिरीटिनः तौस
मेत्यकुरुश्रेष्ठंविधिवत्प्रीतिपूर्वकम् १६ परयाभारतश्रेष्ठंपूजयासमवस्थितौ ततस्ताभ्यामनुज्ञातोययौयेनहयोगतः १७ ततः
सपश्चिमंदेशंसमुद्रस्यतदाहयः क्रमेणव्यचरत्स्फीतंततःपंचनदंययौ १८ तस्मादपिसकौरव्यगांधारविषयंहयः विचचारयथा
कामंकौंतेयानुगतस्तदा १९

७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

२० इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिटीकायांत्र्यशीतितमोऽध्यायः ८३ शकुनेस्तनयइतिस्पष्टार्थः १ २ ३ ४ ५ ६ ७ ८ ९ १०

ततोगांधारराजेनयुद्धमासीत्किरीटिनः घोरंशकुनिपुत्रेणपूर्ववैरानुसारिणा २० इतिश्रीमन्महाभारते आ॰ अश्वानुसारे
त्र्यशीतितमोऽध्यायः ८३ वैशंपायनउवाच शकुनेस्तनयोवीरोगांधाराणांमहारथः प्रत्युद्ययौगुडाकेशंसैन्येनमहतावृतः १
हस्त्यश्वरथयुक्तेनपताकाध्वजमालिना अमृष्यमाणास्तेयोधानृपस्यशकुनेर्वधम् २ अभ्ययुःसहिताःपार्थंप्रगृहीतशरासनाः स
तानुवाचधर्मात्माबीभत्सुरपराजितः ३ युधिष्ठिरस्यवचनंनचतेजगृहुर्हितम् वार्यमाणापिपार्थेनसांत्वपूर्वममर्षिताः ४ परिवा
र्यहयंजग्मुस्ततश्चुक्रोधपांडवः ततःशिरांसिदीप्ताग्रैस्तेषांचिच्छेदपांडवः ५ क्षुरैर्गांडीवनिर्मुक्तैर्नातियत्नादिवार्जुनः तेवध्यमा
नाःपार्थेनहयमुत्सृज्यसंभ्रमात् ६ न्यवर्तंतमहाराजशरवर्षार्दिताभृशम् निरुध्यमानस्तेजस्वीगांधारैःपांडुनंदनः ७ आदिश्या
दिश्यतेजस्वीशिरांस्येषांव्यपातयत् वध्यमानेषुतेष्वाजौगांधारेषुसमंततः ८ सराजाशकुनेःपुत्रःपांडवंप्रत्यवारयत् तंयुध्यमानंरा
जानंक्षत्रधर्मेव्यवस्थितम् ९ पार्थोब्रवीन्नमेवध्याराजानोराजशासनात् अलंयुद्धेनतेवीरनतेस्त्वद्यपराजयः १० इत्युक्तस्तदना
दृत्यवाक्यमज्ञानमोहितः सशक्रसमकर्माणंसमवाकिरदाशुगैः ११ तस्यपार्थःशिरस्त्राणमर्धचंद्रेणपत्रिणा अपाहरदमेयात्माजय
द्रथशिरोयथा १२ तंदृष्ट्वाविस्मयंजग्मुर्गांधाराःसर्वएवते इच्छतातेननहतोराजेत्यपिचतंविदुः १३ गांधारराजपुत्रस्तुपलायनकृत
क्षणः ययौतैरेवसहितस्त्रस्तैःक्षुद्रमृगैरिव १४ तेषांतुतरसापार्थस्तत्रैवपरिधावताम् प्रजहारोत्तमांगानिभल्लैःसन्नतपर्वभिः १५
उच्छ्रितांस्तुभुजान्केचिन्नाबुध्यंतशरैर्हृतान् शरैर्गांडीवनिर्मुक्तैःपृथुभिःपार्थचोदितैः १६ संभ्रांतनरनागाश्वमपतद्विद्रुतंबलम् हत
विध्वस्तभूयिष्ठमावर्ततमुहुर्मुहुः १७ नाभ्यदृश्यंतवीरस्यकेचिदग्र्येग्र्यकर्मणः रिपवःपात्यमानावैयेसहेयुर्धनंजयम् १८ ततो
गांधारराजस्यमंत्रिवृद्धपुरःसरा जननीनिर्ययौभीतापुरस्कृत्यार्घ्यमुत्तमम् १९ सान्यवारयदव्यग्रातंपुत्रंयुद्धदुर्मदम् प्रसादयामा
सचतंजिष्णुमक्लिष्टकारिणम् २० तांपूजयित्वाबीभत्सुःप्रसादमकरोत्प्रभुः शकुनेश्चापितनयंसांत्वयन्निदमब्रवीत् २१ नमेप्रियं
महाबाहोयत्तेबुद्धिरियंकृता प्रतियोद्धुममित्रघ्नभ्रातैवत्वंममानघ २२ गांधारींमातरंस्मृत्वाधृतराष्ट्रकृतेनच तेनजीवसिराजंस्त्वं
निहतास्त्वनुगास्तव २३ मैवंभूःशाम्यतांवैरंमातेभूद्बुद्धिरीदृशी गच्छेथास्त्वंपरांचैत्रीमश्वमेधेनृपस्यनः २४ इत्याश्वमे॰ अश्वा॰
चतुरशीतितमोऽध्यायः ८४

११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ इत्याश्वमे॰ टीकायांचतुरशीतितमोऽध्याय: ८४

इत्युक्त्वेति १ २ ३ इष्टंनक्षत्रंपुष्यम् ४ ५ ६ ७ ८ प्रस्थाप्यंतुप्रस्थापयंतुस्वार्थेणिच् प्रतिष्ठंत्वित्यर्थः ९ १० ११ १२ १३ १४

वैशंपायनउवाच इत्युक्त्वानुययौपार्थोहयंकामविहारिणम् न्यवर्तततत्तोवाजीयेननागाह्वयंपुरम् १ निवृत्तंतुतमश्रौषीच्चा
रेणैवयुधिष्ठिरः श्रुत्वार्जुनंकुशलिनंसचहृष्टमनाभवत् २ विजयस्यचतत्कर्मगांधारविषयेतदा श्रुत्वान्येषुदेशेषुसंसप्रीतोभ
वत्तदा ३ एतस्मिन्नेवकालेतुद्वादशीमाघपाक्षिकीम् इष्टंगृहीत्वानक्षत्रंधर्मराजोयुधिष्ठिरः ४ समानाय्यमहातेजाःसर्वान्भ्रातॄन्म
हीपतिः भीमंचनकुलंचैवसहदेवंचकौरव ५ प्रोवाचेदंवचःकालेतदाधर्मभृतांवरः आमंत्र्यवदतांश्रेष्ठोभीमंप्रहरतांवरम् ६ आ
यातिभीमसेनासौसहाश्वेनतवानुजः यथामेपुरुषाःप्राहुर्येधनंजयसारिणः ७ उपस्थितश्चकालोयमभितोवर्ततेहयः माघीच
पौर्णमासीयंमासःशेषोवृकोदर ८ तत्प्रस्थाप्यंतुविद्वांसोब्राह्मणावेदपारगाः वाजिमेधार्थसिद्ध्यर्थंदेशंपश्यंतुयज्ञियम् ९ इत्युक्तः
सतुतच्चक्रेभीमोनृपतिशासनम् हृष्टःश्रुत्वागुडाकेशमायांतंपुरुषर्षभम् १० ततोययौभीमसेनःप्राज्ञैःस्थपतिभिःसह ब्राह्मणान
ग्रतःकृत्वाकुशलान्यज्ञकर्मणि ११ तंसशालचयंश्रीमत्संप्रतोलीसुघट्टितम् मापयामासकौरव्योयज्ञवाटंयथाविधि १२ प्रासाद
शतसंबाधंमणिप्रवरकुट्टिमम् कारयामासविधिवद्धेमरत्नविभूषितम् १३ स्तंभान्कनकचित्रांश्चतोरणानिबृहंतिच यज्ञायतनदे
शेषुदत्वाशुद्धंचकांचनम् १४ अंतःपुराणिराज्ञांचनानादेशसमीयुषाम् कारयामासधर्मात्मातत्रतत्रयथाविधि १५ ब्राह्मणानांचवे
श्मानिनानादेशसमीयुषाम् कारयामासकौंतेयोविधिवत्तान्यनेकशः १६ तथासंप्रेषयामासदूतान्नृपतिशासनात् भीमसेनोमहा
बाहोराज्ञामक्लिष्टकर्मणाम् १७ तेप्रियार्थंकुरुपतेराययुर्नृपसत्तम रत्नान्यनेकान्यादायस्त्रियोश्वानायुधानिच १८ तेषांनिविशतांते
षुशिबिरेषुमहात्मनाम् नर्दतःसागरस्येवदिवस्पृगभवत्स्वनः १९ तेषामभ्यागतानांचसराजाकुरुवर्धनः व्यादिदेशान्नपानानि
शय्याश्चाप्यतिमानुषाः २० वाहनानांचविविधाःशालाःशालीक्षुगोरसैः उपेताभरतश्रेष्ठोव्यादिदेशसधर्मराट् २१ तथातस्मिन्महाय
ज्ञेधर्मराजस्यधीमतः समाजग्मुर्मुनिगणाबहवोब्रह्मवादिनः २२ येचद्विजातिप्रवरास्तत्रासन्पृथिवीपते समाजग्मुःसशिष्यांस्तान्प्र
तिजग्राहकौरवः २३ सर्वांश्चताननुययौयावदावसथान्प्रति स्वयमेवमहातेजादंभंत्यक्त्वायुधिष्ठिरः २४ ततःकृत्वास्थपतयःशिल्पि
नोन्येचयेतदा कृत्स्नंयज्ञविधिंराज्ञोधर्मराज्ञेन्यवेदयन् २५ तच्छ्रुत्वाधर्मराजस्तुकृतंसर्वमतंद्रितः हृष्टरूपोभवद्राजासहभ्रातृभि
राहतः २६

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६

वैशंपायनउवाच   तस्मिन्यज्ञेप्रवृत्तेतुवाग्मिनोहेतुवादिनः हेतुवादान्बहूनाहुः परस्परजिगीषवः २७ ददृशुस्तंनृपतयो
यज्ञस्यविधिमुत्तमम् देवेंद्रस्येवविहितंभीमसेनेनभारत २८ ददृशुस्तोरणान्यत्रशातकुंभमयानिते शय्यासनविहारांश्चसुबहू
न्रत्नसंचयान् २९ घटान्पात्रीःकटाहानिकलशान्वर्धमानकान् नहिकिंचिदसौवर्णमपश्यन्वसुधाधिपाः ३० यूपांश्चशास्त्रपठिता
न्दारवान्हेमभूषितान् उपकॢप्तान्यथाकालंविधिवद्भूरिवर्चसः ३१ स्थलजाजलजायेचपशवःकेचनप्रभो सर्वानेवसमानीतानपश्य
स्तत्रतेनृपाः ३२ गाश्चैवमहिषीश्चैवतथावृद्धस्त्रियोपिच औदकानिचसत्त्वानिश्वापदानिवयांसिच ३३ जरायुजाण्डजातानिस्वेदजा
न्युद्भिदानिच पर्वतानूपजातानिभूतानिददृशुश्चते ३४ एवंप्रमुदितंसर्वंपशुगोधनधान्यतः यज्ञवाटंनृपादृष्ट्वापरंविस्मयमाग
ताः ३५ ब्राह्मणानांविशांचैवबहुमृष्टान्नमृद्धिमत् पूर्णेशतसहस्रेतुविप्राणांतत्रभुंजतां ३६ दुंदुभिर्मेघनिर्घोषोमुहुर्मुहुरताड्य
त विननादासकृच्चापिदिवसेदिवसेगते ३७ एवंसववृतेयज्ञोधर्मराजस्यधीमतः अन्नस्यसुबहून्राजन्नुत्सर्गान्पर्वतोपमान् ३८
दधिकुल्याश्चददृशुःसर्पिषश्चह्रदाञ्जनाः जंबुद्वीपोहिसकलोनानाजनपदायुतः ३९ राजन्नदृश्यतैकस्थोराज्ञस्तस्यमहामखे त
त्रजातिसहस्राणिपुरुषाणांततस्ततः ४० गृहीत्वाभाजनाञ्जग्मुर्बहूनिभरतर्षभ स्रग्विणश्चापितेसर्वेसुमृष्टमणिकुंडलाः ४१ पर्य
वेषन्द्विजातींस्तान्शतशोथसहस्रशः विविधान्यन्नपानानिपुरुषायेनुयायिनः तेवैनृपोपभोज्यानिब्राह्मणानांददुश्चह ४२   इ
तिश्रीमन्महाभारते आ॰णि युधिष्ठिराश्वमेधेपंचाशीतितमोऽध्यायः ८५   वैशंपायनउवाच   समागतान्वेदविदोराज्ञ
श्चपृथिवीश्वरान् दृष्ट्वायुधिष्ठिरोराजाभीमसेनमभाषत १ उपायातानरव्याघ्रायएतेपृथिवीश्वराः एतेषांक्रियतांपूजापूजार्हा
हिनराधिपाः २ इत्युक्तःसतथाचक्रेनरेंद्रेणयशस्विना भीमसेनोमहातेजायमाभ्यांसहपांडवः ३ अथाभ्यगच्छद्गोविंदोवृष्णिभिः
सहधर्मजम् बलदेवंपुरस्कृत्यसर्वप्राणभृतांवरः ४ युयुधानेनसहितःप्रद्युम्नेनगदेनच निशठेनाथसांबेनतथैवकृतवर्मणा ५
तेषामपिपरांपूजांचक्रेभीमोमहारथः विविशुस्तेचवेश्मानिरत्नवंतिचसर्वशः ६ युधिष्ठिरसमीपेतुकथांतेमधुसूदनः अर्जुनंक
थयामासबहुसंग्रामकर्षितम् ७ सतंपप्रच्छकौंतेयःपुनःपुनररिंदमम् धर्मजःशक्रजंजिष्णुंसमाचष्टजगत्पतिः ८

७०

१. १० ११ १२ १३ १४ १५. १६ १७ . १८ १९ २० २१ इतिश्रीमन्महाभारते आश्वमेधिकेपर्वणिटी

आगम द्वारकावासीसमाप्तः पुरुषोनृपः योद्राक्षीत्पांडवश्रेष्ठंबहुसंग्रामकर्षितम् ९ समीपेचमहाबाहुमाचष्टचममप्रभो कुरुकार्या
णिकौंतेयेहयमेधार्थसिद्धये १० इत्युक्तःप्रत्युवाचेदंधर्मराजायुधिष्ठिरः दिष्ट्यासकुशलीजिष्णुरुपायातिचमाधव ११ यदिदंसंदि
देशास्मिन्पांडवानांबलाग्रणीः तदाज्ञातुमिहेच्छामिभवतायदुनंदन १२ इत्युक्तोधर्मराजेनवृष्ण्यंधकपतिस्तदा प्रोवाचेदंवचोवा
ग्मीधर्मात्मानंयुधिष्ठिरं १३ इदमाहमहाराजपार्थवाक्यंस्मरन्नरः वाच्योयुधिष्ठिरःकृष्णकालेवाक्यमिदंमम १४ आगमिष्यंतिरा
जानःसर्वेवैकौरवर्षभ प्राप्तानांमहतांपूजाकार्याह्येतत्क्षमंहिनः १५ इत्येतद्वचनाद्राजाविज्ञाप्योममसानद यथाचात्ययिकंनस्याद्यद
र्थाहरणेऽभवत् १६ कर्तुमर्हतितद्राजाभवांश्चाप्यनुमन्यताम् राजद्वेषान्नपश्येयुरिमाराजन्पुनःप्रजाः १७ इदमन्यच्चकौंतेयवचःसपु
रुषोऽब्रवीत् धनंजयस्यनृपतेतन्मेनिगदतःशृणु १८ उपयास्यतियज्ञंनोमणिपूरपतिर्नृपः पुत्रोममहातेजादयितोबभ्रुवाहनः १९
तंभवान्मदपेक्षार्थंविधिवत्प्रतिपूजयेत् सतुभक्तोनुरक्तश्चममनित्यमितिप्रभो २० इत्येतद्वचनंश्रुत्वाधर्मराजोयुधिष्ठिरः अभिनं
द्यास्यतद्वाक्यमिदंवचनमब्रवीत् २१ इत्याश्वमेधिकेपर्वणियुधिष्ठिराश्वमेधेषट्शीतितमोऽध्यायः ८६ युधिष्ठिरउवाच
श्रुतंप्रियमिदंकृष्णयत्त्वमर्हसिभाषितुम् तन्मेऽमृतरसंपुण्यंमनोह्लादयतिप्रभो १ बहूनिकिलयुद्धानिविजयस्यनराधिपः पुनरास
न्हृषीकेशतत्रतत्रचमेश्रुतम् २ किंनिमित्तमनित्यंहिपार्थःसुखविवर्जितः अतीवविजयोधीमानितिमेदूयतेमनः ३ संचिंतयामिकौं
तेयंरहोजिष्णुंजनार्दन अतीवदुःखभागीससततंपांडुनंदनः ४ किंनुतस्यशरीरेस्तिसर्वलक्षणपूजितं अनिष्टंलक्षणंकृष्णयेनदुः
खान्युपाश्नुते ५ अतीवासुखभोगीससततंकुंतिनंदनः नहिपश्यामिबीभत्सोर्निंद्यंगात्रेषुकिंचन श्रोतव्यंचेन्मयैतद्वैतन्मेव्याख्यातु
मर्हसि ६ इत्युक्तःसहृषीकेशोध्यात्वासुमहद्धृतरम् राजानंभोजराजन्यवर्द्धनोविष्णुरब्रवीत् ७ नह्यस्यनृपतेकिंचित्संश्लिष्टमुपलक्ष
ये ऋतेपुरुषसिंहस्यपिंडिकेस्याधिकायतः ८ सताभ्यांपुरुषव्याघ्रोनित्यमध्वसुवर्तते नचान्यदनुपश्यामियेनासौदुःखभाजनम् ९
इत्युक्तःपुरुषश्रेष्ठस्तदाकृष्णेनधीमता प्रोवाचवृष्णिशार्दूलमेवमेतदितिप्रभो १०

कार्यापषट्पंचाशीतितमोऽध्यायः ८६ श्रुतमिति १ २ ३
४ ५ ६ भोजराजन्यानांवर्द्धनः ७ संश्लिष्टं अविविक्तं संदृष्टमिति पाठेपि अतिपुष्टत्वादितरलोपादविविक्तत्वंभवतितद्राहित्यं पिंडिके जानुनोरधस्थः
पश्चाद्भागयोर्मांसलः प्रदेशः पिंडिका तेउभे अस्याधिकेस्वदेशादधोभागपर्यंतंबहुत्वं आलंबमाने पाठांतरे आयतः शरीरात् अतिप्रमाणं ८ ९ १०

कृष्णानुद्रौपदीकृष्णोतिर्दिकृमास्तृतं, [illegible] प्रतिजग्राहतस्यास्तंप्रणयंचापिकेशिहा ११ सख्युःसखाहृषीकेशःसाक्षादिवधनंजयः
तत्रभीमादयस्तेतुकुरवोयाजकाश्चये १२ रेमुःश्रुत्वाविचित्रांतांधनंजयकथांशुभाम् तेषांकथयतामेवपुरुषार्जुनसंकथाम् १३ उपा
याद्वचनाद्दूतोविजयस्यमहात्मनः सोभिगम्यकुरुश्रेष्ठंनमस्कृत्यचबुद्धिमान् १४ उपायातंनरव्याघ्रंफल्गुनंप्रतिवेदयत् तच्छ्रुत्वानृपति
स्तस्यहर्षबाष्पाकुलेक्षणः १५ प्रियाख्यानाभिमित्तंवैददौबहुधनंतदा ततोद्वितीयदिवसेमहान्शब्दोव्यवर्द्धत १६ आगच्छतिनरव्याघ्रे
कौरवाणांधुरंधरे ततोरेणुःसमुद्भूतोविबभौतस्यवाजिनः १७ अभितोवर्तमानस्ययथोच्चैःश्रवसस्तदा तत्रहर्षकरीर्वाचोनराणांशुश्रुवे
र्जुनः १८ दिष्ट्यासिपार्थकुशलीधन्योराजायुधिष्ठिरः कोन्योहिपृथिवींकृत्स्नांजित्वाहियुधिपार्थिवान् १९ चारयित्वाहयश्रेष्ठमुपागच्छे
दृतेर्जुनात् येव्यतीतामहात्मानोराजानःसगरादयः २० तेषामपीदृशंकर्मनकदाचनशुश्रुमः नैतदन्येकरिष्यंतिभविष्याःवसुधाधिपाः
२१ यत्त्वंकुरुकुलश्रेष्ठदुष्करंकृतवानसि इत्येवंवदतांतेषांपुंसांकर्णसुखागिरः २२ शृण्वन्विवेशधर्मात्माफाल्गुनोयज्ञसंस्तरम् ततो
राजासहामात्यःकृष्णश्चयदुनंदनः २३ धृतराष्ट्रंपुरस्कृत्यतेभ्यगच्छंतुस्तदा सोभिवाद्यपितुःपादौधर्मराजस्यधीमतः २४ भीमादींश्चा
पिसंपूज्यपर्यष्वजतकेशवम् तैःसमेत्यार्चितस्तांश्चप्रत्यर्च्यार्थयथाविधि २५ विशश्रामसमहाबाहुस्तीरंलब्ध्वेवपारगः एतस्मिन्नेवका
लेतुसराजावभ्रुवाहनः २६ मातृभ्यांसहितोधीमान्कुरूनेवजगामह तत्रवृद्धान्यथावत्सकुरूनन्यांश्चपार्थिवान् २७ अभिवाद्यमहाबा
हुस्तैश्चापिप्रतिनंदितः प्रविवेशपितामह्याःकुंत्याभवनमुत्तमम् २८ इतिश्रीमन्महाभारते आ० णिबभ्रुवाहनागमने सप्ताशीति
तमोऽध्यायः ८७ वैशंपायनउवाच सप्रविश्यमहाबाहुःपांडवानांनिवेशनम् पितामहीमभ्यवंदत्साम्नापरमवल्गुना
१ ततश्चित्रांगदादेवीकौरवस्यात्मजापिच पृथांकृष्णांचसहितेविनयेनोपजग्मतुः २ सुभद्रांचयथान्यायंयाश्चान्याःकुरुयोषितः
ददौकुंतीसुतस्ताभ्यांरत्नानिविविधानिच ३ द्रौपदीचसुभद्राचयाश्चाप्यन्यायदुस्त्रियः ऊषतुस्तत्रतेदेव्यौमहार्हशयनासने ४ सु
पूजितेस्वयंकुंत्यापार्थस्यहितकाम्यया सचराजामहातेजाःपूजितोबभ्रुवाहनः ५ धृतराष्ट्रंमहीपालमुपतस्थेयथाविधि युधिष्ठिरं
चराजानंभीमादींश्चापिपांडवान् ६ उपगम्यमहातेजाविनयेनाभ्यवादयत् सतैःप्रेम्णापरिष्वक्तःपूजितश्चयथाविधि ७

८ ९ १० ११ १२ अहीनः अन्हांसोमयागानांबहूनांसमूहे अहीनः नहीनः द्रव्यादिनाइतिवा १३ १४ १५ १६ १७ १८ १९ २० अभिषवंसोमव-
ल्याः कंडनम् २१ सोमंसोमवल्लीरसं सवनानिप्रातःसवनादीनि २२ २३ २४संस्तरेइष्टकानांचयनाख्येस्थंडिलरचने २५ २६ वर्णिनः पलाशकाष्ठ

धनंचास्मैददुर्भूरिप्रीयमाणामहारथाः तथैवचमहीपालाःकृष्णंचक्रगदाधरम् ८ प्रद्युम्नइवगोविंदंविनयेनोपतस्थिवान् तस्मैकृ
ष्णोददौराज्ञेमहार्हमतिपूजितम् ९ रथंहेमपरिष्कारंदिव्याश्वयुजमुत्तमम् धर्मराजश्चभीमश्चफल्गुनश्चयमौतथा १० पृथक्पृथक्
चतेचैनंमानार्थाभ्यामयोजयन् ततस्तृतीयदिवसेसत्यवत्यात्मजोमुनिः ११ युधिष्ठिरंसमेभ्येत्यवाग्मीवचनमब्रवीत् अद्यप्रभृतिकौंते
ययजस्वसमयोहिते मुहूर्तोयज्ञियःप्राप्तश्चोदयंतीहयाजकाः १२ अहीनोनामराजेंद्रक्रतुस्तेऽयंचकल्पताम् बहुत्वात्कांचनाख्यस्यख्या
तोबहुसुवर्णकः १३ एवमत्रमहाराजदक्षिणांत्रिगुणांकुरु त्रित्वंव्रजतुतेराजन्ब्राह्मणाह्यत्रकारणम् १४ त्रीनश्वमेधानत्रत्वंसंप्राप्यब
हुदक्षिणाम् ज्ञातिवध्याकृतंपापंप्रहास्यसिनराधिप १५ पवित्रंपरमंचैतत्पावनंचैतदुत्तमम् यदश्वमेधावभृथंप्राप्स्यसेकुरुनंदन १६
इत्युक्तःसतुतेजस्वीव्यासेनामितबुद्धिना दीक्षांविवेशधर्मात्मावाजिमेधाप्तयेततः १७ ततोयज्ञंमहाबाहुर्वाजिमेधंमहाक्रतुम् बह्
वन्नदक्षिणंराजासर्वकामगुणान्वितं १८ तत्रवेदविदोराजंश्चक्रुः कर्माणियाजकाः परिक्रमंतःसर्वज्ञाविधिवत्साधुशिक्षितम् १९ नतेषां
स्खलितंकिंचिदासीच्चाप्यकृतंतथा क्रममुक्तंचयुक्तंचचक्रुस्तत्रद्विजर्षभाः २० कृत्वाप्रवर्ग्यंधर्मास्थ्यंयथावद्द्विजसत्तमाः चक्रुस्तेविधि
वद्राजंस्तथैवाभिषवंद्विजाः २१ अभिषूयततोराजन्सोमंसोमपसत्तमाः सवनान्यानुपूर्व्येणचक्रुःशास्त्रानुसारिणः २२ नतत्रकृपणः
कश्चिन्नदरिद्रोबभूवह क्षुधितोदुःखितोवापिप्राकृतोवापिमानवः २३ भोजनंभोजनार्थिभ्योदापयामासशत्रुहा भीमसेनोमहातेजाः
सततंराजशासनात् २४ संस्तरेकुशलाश्चापिसर्वकार्याणियाजकाः दिवसेदिवसेचक्रुःयथाशास्त्रानुदर्शनात् २५ नाषडंगविदत्रासीत्स
दस्यस्तस्यधीमतः नाव्रतोनानुपाध्यायोनचावादाविचक्षणः २६ ततोयूपोच्छ्रयेप्राप्तेषड्बैल्वान्भरतर्षभ खादिरान्बिल्वसंमितांस्ता
वतःसर्ववर्णिनः २७ देवदारुमयौद्वौतुयूपौकुरुपतेर्मखे श्लेष्मातकमयंचैकंयाजकाःसमकल्पयन् २८ शोभार्थंचापरान्यूपान्कांचना
न्भरतर्षभ सभीमःकारयामासधर्मराजस्यशासनात् २९ तेव्यराजंतराजर्षेवासोभिरुपशोभिताः महेंद्रानुगतादेवायथासप्तर्षिभिर्दि
वि ३० इष्टिकाःकांचनीश्चापिचयनार्थंकृताभवन् शुशुभेचयनंतत्रदक्षस्येवप्रजापतेः ३१ चतुश्चित्यश्चतस्यासीदष्टादशकरात्मकः स
रुक्मपक्षोनिचितस्त्रिकोणोगरुडाकृतिः ३२

मया: २७ २८ २९ ३० ३१ ३२ ५ ५ ५

३३ ३४ ३५ ३६ ३७ ३८ ३९ इत्याश्वमेधिकेपर्वणिटीकायांअष्टाशीतितमोऽध्यायः ८८ श्रपयित्वेति १ संज्ञाप्येति पाठं हिंसित्वा तुरंगं
तस्यसमीपेतिसृभिःकलाभिः कल्याणचयनाख्यस्थंडिलरचनाभिः मंत्रद्रव्यश्रद्धाख्याभिरुपेतांद्रौपदींउपसंवेशयन् सार्द्धश्लोकः २ ३ ४ अं

ततोनियुक्ताःपशवोयथाशास्त्रंमनीषिभिः तंतंदेवंसमुद्दिश्यपक्षिणःपशवश्चये ३३ ऋषभाःशास्त्रपठितास्तथाजलचराश्चये सर्वा
स्तानभ्ययुंजस्तेतत्राग्निचयकर्मणि ३४ यूपेषुनियतास्त्रासीत्पशूनांत्रिशतीतथा अश्वरत्नोत्तरायज्ञेकौंतेयस्यमहात्मनः ३५ सयज्ञः
शुशुभेतस्यसाक्षाद्देवस्यसंकुलः गंधर्वगणसंगीतःप्रनृत्याप्सरसांगणैः ३६ सकिंपुरुषसंकीर्णःकिंनरैश्चोपशोभितः सिद्धविप्रनिवासैश्च
समंतादभिसंवृतः तस्मिन्सदसिनित्यास्तुव्यासशिष्याद्विजर्षभाः सर्वशास्त्रप्रणेतारःकुशलायज्ञसंस्तरे ३८ नारदश्चबभूवात्रतु
बुरुश्चमहाद्युतिः विश्वावसुश्चित्रसेनस्तथान्येगीतकोविदाः ३९ रमयंतिस्मतान्विप्रान्यज्ञकर्मांतरेषुवै ३९ इतिश्रीमन्महाभा
रतेआ॰णिअश्वमेधेअष्टाशीतितमोऽध्यायः ८८ वैशंपायनउवाच श्रपयित्वापशूनन्यान्विधिवद्द्विजसत्तमाः तंतु
रंगंयथाशास्त्रमालभंतद्विजातयः १ ततःसंज्ञाप्यतुरगंविधिवद्याजकास्तदा उपसंवेशयन्राजंस्ततस्तांद्रुपदात्मजाम् कलाभि
स्तिसृभीराजन्यथाविधिमनस्विनीम् २ उद्धृत्यतुवपांतस्ययथाशास्त्रंद्विजातयः श्रपयामासुरव्यग्राविधिवद्भरतर्षभ ३ तंवपाधूमगं
धंतुधर्मराजःसहानुजैः ४ उपाजिघ्रद्यथाशास्त्रंसर्वपापहनंतदा शिष्टान्यंगानियान्यासंस्तस्याश्वस्यनराधिप ५ तान्यग्नौजुहुवु
र्धीराःसमस्ताःषोडशर्त्विजः संस्थाप्यैवंतस्यराज्ञस्तंयज्ञंशक्रतेजसः ६ व्यासःसशिष्योभगवान्वर्धयामासतंनृपम् ततोयुधिष्ठिरःप्रादा
द्ब्राह्मणेभ्योयथाविधि ७ कोटीःसहस्रंनिष्काणांव्यासायतुवसुंधराम् प्रतिगृह्यधरांराजन्व्यासःसत्यवतीसुतः ८ अब्रवीद्भरतश्रेष्ठ
धर्मराजंयुधिष्ठिरम् वसुधाभवतस्त्वेषासंन्यस्ताराजसत्तम ९ निष्क्रयोदीयतांमह्यंब्राह्मणाहिधनार्थिनः युधिष्ठिरस्तुतान्विप्रान्
प्रत्युवाचमहामनाः १० भ्रातृभिःसहितोधीमान्मध्येराज्ञांमहात्मनाम् अश्वमेधेमहायज्ञेपृथिवीदक्षिणास्मृताम् ११ अर्जुनेनजिता
चेयंऋत्विग्भ्यःप्रापितामया वनंप्रवेक्ष्येविप्राग्र्याविभजध्वंमहीमिमां १२ चतुर्धापृथिवींकृत्वाचातुर्होत्रप्रमाणतः नाहमादातुमिच्छामि
ब्रह्मस्वंद्विजसत्तमाः १३ इदंनित्यंमनोविप्राभ्रातॄणांचैवमेसदा इत्युक्तवतितस्मिंस्तुभ्रातरोद्रौपदीचसा १४ एवमेतदितिप्राहुस्तदभू
ल्लोमहर्षणम् ततोंतरिक्षेवागासीत्साधुसाध्वितिभारत १५ तथैवद्विजसंघानांशंसतांविबभौस्वनः द्वैपायनस्तथाकृष्णःपुनरेवयुधि
ष्ठिरम् १६ ७

गानिहृदयजिह्वावक्षआदीनि ५ संस्थाप्यसमाप्यं ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ ६२

१७ १८ १९ २० २१ २२ २३ २४ २५ अनंतरं द्विजातिभ्यः विप्रेषु गृहीत्वा निवृत्तेषु शिष्टान् क्षत्रियादयो गृहीतवंतः

प्रोवाच मध्ये विप्राणामिदं संपूजयन्मुनिः दत्तैषा भवता मह्यं तां ते प्रतिददाम्यहम् १७ हिरण्यं दीयतामेभ्यो ब्राह्मणेभ्यो धरास्तु ते त
तोऽब्रवीद्वासुदेवो धर्मराजं युधिष्ठिरम् १८ यथाह भगवान्व्यासस्तथा त्वं कर्तुमर्हसि इत्युक्तः स कुरुश्रेष्ठः प्रीतात्मा भ्रातृभिः सह १९ को
टिकोटिकृतां प्रादाद्दक्षिणां त्रिगुणां क्रतोः न करिष्यति तल्लोके कश्चिदन्यो नराधिपः २० यत्कृतं कुरुराजेन मरुत्तस्यानुकुर्वता प्रतिगृह्य
तु तद्रत्नं कृष्णद्वैपायनो मुनिः २१ ऋत्विग्भ्यः प्रददौ विद्वांश्चतुर्धा व्यभजंश्च ते धरण्या निष्क्रयं दत्त्वा तद्धिरण्यं युधिष्ठिरः २२ धूतपा
पो जितस्वर्गो मुमुदे भ्रातृभिः सह ऋत्विजस्तमपर्यंतं सुवर्णनिचयं तथा २३ व्यभजंत द्विजातिभ्यो यथोत्साहं यथासुखम् यज्ञवाटे
च यत्किंचिद्धिरण्यं सविभूषणम् २४ तोरणानि च यूपांश्च घटाः पात्रीस्तथेष्टकाः युधिष्ठिराभ्यनुज्ञाताः सर्वं तद्व्यभजन्द्विजाः २५ अ
नंतरं द्विजातिभ्यः क्षत्रिया जह्रिरे वसु तथा विट्शूद्रसंघाश्च तथान्ये म्लेच्छजातयः २६ ततस्ते ब्राह्मणाः सर्वे मुदिता जग्मुरालयान्
तर्पिता वसुना तेन धर्मराजेन धीमता २७ स्वमंशं भगवान्व्यासः कुंत्यै प्रादात्सुमानतः प्रददौ तस्य महतो हिरण्यस्य महाद्युतिः २८ श्व
श्रूः प्रीतिदायं तं प्राप्य सा प्रीतमानसा चकार पुण्यकं तेन सुमहत्संघशः पृथा २९ गत्वा त्ववभृथं राजा विपाप्मा भ्रातृभिः सह सभा
ज्यमानः शुशुभे महेंद्रस्त्रिदशैरिव ३० पांडवाश्च महीपालैः समेतैरभिसंवृताः अशोभंत महाराज ग्रहास्तारागणैरिव ३१ राजभ्योऽपि
ततः प्रादाद्रत्नानि विविधानि च राजानश्वानलंकारान्स्त्रियो वासांसि कांचनम् ३२ तद्धनौघमपर्यंतं पार्थः पार्थिवमंडले विसृजन्सुशु
भे राजन्यथा वैश्रवणस्तथा ३३ आनीय च तथा वीरं राजानं बभ्रुवाहनम् प्रादाय विपुलं वित्तं गृहान्प्रास्थापयत्तदा ३४ दुःशलायाश्च तं पौ
त्रं बालकं भरतर्षभ स्वराज्येऽथ पितुर्धीमान्स्वसुः प्रीत्या न्यवेशयत् ३५ नृपतींश्चैव तान्सर्वान्सुविभक्तान्सुपूजितान् प्रस्थापयामा
स वशी कुरुराजो युधिष्ठिरः ३६ गोविंदं च महात्मानं बलदेवं महाबलम् तथान्यान्वृष्णिवीरांश्च प्रद्युम्नाद्यान्सहस्रशः ३७ पूजयित्वा म
हाराज यथाविधि महाद्युतिः भ्रातृभिः सहितो राजा प्रस्थापयदरिंदमः ३८ एवं बभूव यज्ञः स धर्मराजस्य धीमतः बह्वन्नधनरत्नौघः सु
रामैरेयसागरः ३९ सर्पिःपंकान्ह्रदा यत्र बभूवुश्चान्नपर्वताः रसालाकर्दमा नद्यो बभूवुर्भरतर्षभ ४० भक्ष्यखांडवरागाणां क्रियतां भुज्य
तां तथा पशूनां वध्यतां चैव नांतं ददृशिरे जनाः ४१ मत्तप्रमत्तमुदितं सुप्रीतयुवतीजनम् मृदंगशंखनादैश्च मनोरममभूत्तदा ४२

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ मैरेयं वसजं मद्यं ३९ ४० खांडवरागः पिप्पलीशुंठियुक्तो मुद्गयूषः खांडवः स एव शर्करायुक्तो रागखांडवः ४१ ४२

४३ ४४ इत्याश्वमेधिकेपर्वणिटीकायांऊननवतितमोऽध्यायः ८९ पितामहस्येत्यादिर्ग्रंथः क्लेशार्जितंन्यायतः श्रद्धयासत्पात्रेर्पितं अश्वमेधादप्यधि

दीयतांभुज्यतांश्चेवंदिवारात्रमवारितम् तंमहोत्सवसंकाशंहृष्टपुष्टजनाकुलम् ४३ कथयंतिस्मपुरुषानानादेशनिवासिनः वर्षि
त्वाधनधाराभिःकामैरत्नैरसैस्तदा विपाप्माभरतश्रेष्ठः कृतार्थःप्राविशत्पुरम् ४४ इतिश्रीमन्महाभारतेआ॰णि अश्वमेधस
मासोऊननवतितमोऽध्यायः ८९ जनमेजयउवाच पितामहस्यमेयज्ञेधर्मराजस्यधीमतः यदाश्चर्यमभूत्किंचित्तद्भ
वान्वक्तुमर्हति १ वैशंपायनउवाच श्रूयतांराजशार्दूलमहदाश्चर्यमुत्तमं अश्वमेधेमहायज्ञेनिर्वृत्तेयदभूत्प्रभो २
तर्पितेषुद्विजाग्र्येषुज्ञातिसंबंधिबंधुषु दीनांधकृपणेवापितदाभरतसत्तम ३ घुष्यमाणेमहादानेदिक्षुसर्वासुभारत पतत्सुपुष्प
वर्षेषुधर्मराजस्यमूर्द्धनि ४ नीलाक्षस्तत्रनकुलोरुक्मपार्श्वस्तदानघ वज्राशनिसमंनादममुंचद्दृष्टधाधिप ५ सकृदुत्सृज्यतंना
दंत्रासयन्मृगद्विजान् मानुषंवचनंप्राहधृष्टोबिलशयोमहान् ६ सक्तुप्रस्थेनवोनायंयज्ञस्तुल्योनराधिपाः उंछवृत्तेर्वदान्यस्यकुरु
क्षेत्रनिवासिनः ७ तस्यतद्वचनंश्रुत्वानकुलस्यविशांपते विस्मयंपरमंजग्मुःसर्वेतेब्राह्मणर्षभाः ८ ततःसमेत्यनकुलंपर्यपृच्छंतते
द्विजाः कुतस्त्वंसमनुप्राप्तोयज्ञंसाधुसमागमम् ९ किंबलंपरमंतुभ्यंकिंश्रुतंकिंपरायणम् कथंभवंतंविद्यामयोनोयज्ञंविगर्हसे १०
अविलुप्यागमंकृत्स्नंविविधैर्याज्ञिकैःकृतम् यथागमंयथान्यायंकर्तव्यंचतथाकृतम् ११ पूजार्हाःपूजिताश्चात्रविधिवच्छास्त्रदर्शना
त् मंत्राहुतिहुतश्चाग्निर्दत्तंदेयममत्सरं १२ तुष्टाद्विजातयश्चात्रदानैर्बहुविधैरपि क्षत्रियाश्चसुयुद्धेनश्राद्धैश्चापिपितामहाः १४
पालनेनविशस्तुष्टाःकामैस्तुष्टावरस्त्रियः अनुक्रोशैस्तथाशूद्रादानशेषैःपृथग्जनाः १५ ज्ञातिसंबंधिनस्तुष्टाःशौचेनचनृपस्यनः
देवाहविर्भिःपुण्यैश्चरक्षणैःशरणागताः १६ यदत्रतथ्यंतद्ब्रूहिसत्यंसत्यंद्विजातिषु यथाश्रुतंयथादृष्टंपृष्टोब्राह्मणकाम्यया १७ श्रद्धेयवा
क्यःप्राज्ञस्त्वंदिव्यंरूपंबिभर्षिच समागतश्चविप्रैस्त्वंतद्भवान्वक्तुमर्हति १८ इतिपृष्टोद्विजैस्तैःसप्रहसन्नकुलोब्रवीत् नैषामृषाम
यावाणीप्रोक्तादर्पेणवाद्विजाः १९ यन्मयोक्तमिदंवाक्यंयुष्माभिश्चाप्युपश्रुतम् सक्तुप्रस्थेनवोनायंयज्ञस्तुल्योद्विजर्षभाः २० इत्यव
श्यंमयैतद्वोवक्तव्यंद्विजसत्तमाः शृणुताव्यग्रमनसःशंसतोमेयथातथम् २१ अनुभूतंचदृष्टंचयन्मयाद्भुतमुत्तमम् उंछवृत्तेर्वदा
न्यस्यकुरुक्षेत्रनिवासिनः २२ स्वर्गंयेनद्विजःप्राप्तःसभार्यःससुतस्नुषः यथार्धंचशरीरस्यममेदंकांचनीकृतम् २३

कमिति क्रोधजयःसर्वथाकर्तव्यः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ ममेदंयत्रेतिशेषः २३ ७

२४ कापोतिः कपोतवदेकैकंकणंआदत्तेसकापोतिः २५ २६ २७ २८ २९ ३० उंच्छंकणशआदानंकर्तुमितिशेषः ३१ ३२ ३३ ३४ ३५ ३६

नकुलउवाच   हंतवोवर्तयिष्यामिदानस्यफलमुत्तमम् न्यायलब्धस्यसूक्ष्मस्यविप्रलब्धस्यतद्द्विजाः २४ धर्मक्षेत्रेकुरुक्षेत्रेथ
मज्ञैर्बहुभिर्वृते उंछवृत्तिर्द्विजःकश्चित्कापोतिरभवत्तदा २५ सभार्यःसहपुत्रेणसस्नुषस्तपसिस्थितः बभूवशक्कवृत्तःसधर्मात्मा
नियतेंद्रियः २६ षष्ठेकालेसदाविप्रोभुंक्तेतैःसहसुव्रतः षष्ठेकालेकदाचित्तुतस्याहारोनविद्यते २७ भुंक्तेन्यस्मिन्कदाचित्सषष्ठेकाले
द्विजोत्तमः कदाचिद्धर्मिणस्तस्यदुर्भिक्षेसातिदारुणे २८ नविद्यतेतदाविप्राःसंचयस्तन्निबोधत क्षीणौषधिसमावेशोद्रव्यहीनोभव
त्तदा २९ कालेकालेस्यसंप्राप्तेनैवविद्यतभोजनम् क्षुधापरिगताःसर्वेप्रातिष्ठंततदातुते ३० उंछस्तदाशुक्कपक्षेमध्यंतपतिभास्करे उ
ष्णार्तश्चक्षुधार्तश्चसविप्रस्तपसिस्थितः ३१ उंच्छमप्राप्तवानेवब्राह्मणःक्षुच्छ्रमान्वितः सतथैवक्षुधाविष्टःसार्द्धंपरिजनेनह ३२
क्षपयामासतंकालंकृच्छ्रप्राणोद्विजोत्तमः अथषष्ठेगतेकालेयवप्रस्थमुपार्जयन् ३३ यवप्रस्थंतुतंसक्तूनकुर्वंततपस्विनः कृतज
प्याह्निकास्तेतुहुत्वाचाग्निंयथाविधि ३४ कुडवंकुडवंसर्वेव्यभजंततपस्विनः अथागच्छद्द्विजःकश्चिदतिथिर्भुंजतांतदा ३५ तेतंदृ
ष्ट्वातिथिंप्राप्तंप्रहृष्टमनसाभवन् तेभिवाद्यसुखप्रश्नंपृष्ट्वातमतिथिंतदा ३६ विशुद्धमनसोदांताःश्रद्धादमसमन्विताः अनसूय
वोविक्रोधाःसाधवोवीतमत्सराः ३७ त्यक्तमानमदक्रोधाधर्मज्ञाद्विजसत्तमाः सब्रह्मचर्यंगोत्रंतेतस्याख्यात्वापरस्परम् ३८ कुटींप्रवे
शयामासुःक्षुधार्तमतिथिंतदा इदमर्घ्यंचपाद्यंचबृषीचेयंतवानघ ३९ शुचयःसक्तवश्चेमेनियमोपार्जिताःप्रभो प्रतिगृह्णीष्वभद्रं
तेमयादत्ताद्विजर्षभ ४० इत्युक्तःपरिगृह्याथसक्तूनांकुडवंद्विजः भक्षयामासराजेंद्रनचतुष्टिंजगामसः ४१ सउंछवृत्तस्तंप्रेक्ष्य
क्षुधापरिगतंद्विजः आहारंचिंतयामासकथंतुष्टोभवेदिति ४२ तस्यभार्याब्रवीद्वाक्यंमद्भागोदीयतामिति गच्छत्वेषयथाकामप
रितुष्टोद्विजोत्तमः ४३ इतिब्रुवतींतांसाध्वींभार्यांसद्विजसत्तमः क्षुधापरिगतांज्ञात्वातान्सक्तून्नाभ्यनंदत ४४ आत्मानुमानतो
विद्वान्सतुविप्रर्षभस्तदा जानन्वृद्धांक्षुधार्तांचश्रांतांग्लानांतपस्विनीम् ४५ त्वगस्थिभूतांवेपंतींततोभार्यामुवाचह अपिकीटप
तंगानांमृगाणांचैवशोभने ४६ स्त्रियोरक्ष्याश्चपोष्याश्चनत्वेवंवक्तुमर्हसि अनुकंप्योनरःपत्न्यापुष्टोरक्षितएवसः ४७ धर्मकामा
र्थकार्याणिशुश्रूषाकुलसंततिः दारेष्वधीनोधर्मश्चपितृणामात्मनस्तथा नवेत्तिकर्मतोभार्यारक्षणेयोऽक्षमःपुमान् ४८

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८

४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३

अयशोमहदाप्नोतिनरकांश्चैवगच्छति प्रपतेद्यशसोदीप्तात्सर्वलोकान्नवाप्नुयात् इत्युक्तासाततःप्राह धर्मार्थौनौसमोद्विज ४९ मम
प्रस्थचतुर्भागंगृहाणेमंप्रसीदमे सत्यंरतिश्चधर्मश्चस्वर्गश्चगुणवर्जितः ५० स्त्रीणांपतिसमाधानंकांक्षितंचद्विजर्षभ ऋतुर्मातुःपितु
बीजंदैवतंपरमंपतिः ५१ भर्तुःप्रसादान्नारीणांरतिपुत्रफलंतथा पालनाद्धिपतिस्त्वंमेभर्तासिभरणाच्चमे ५२ पुत्रप्रदानाद्वरदस्तस्मा
त्सक्तून्प्रयच्छमे जरापरिगतोवृद्धःक्षुधार्तोदुर्बलोभृशम् ५३ उपवासपरिश्रांतोयदात्वमपिकर्षितः इत्युक्तःसतयासक्तून्प्रगृह्येदं
वचोब्रवीत् द्विजसक्तूनिमान्भूयःप्रतिगृह्णीष्वसत्तम सतान्प्रगृह्यभुक्त्वाचनतुष्टिमगमद्द्विजः ५५ तमुञ्छवृत्तिरालक्ष्यततश्चिंतापरो
भवत् ५६ पुत्रउवाच सक्तूनिमान्प्रगृह्यत्वंदेहिविप्रायसत्तम इत्येवसुकृतंमन्येतस्मादेतत्करोम्यहम् ५७ भवान्हिपरिपा
ल्योमेसर्वदेवप्रयत्नतः साधूनांकांक्षितंयस्मात्पितुर्वृद्धस्यपालनम् ५८ पुत्रार्थोविहितोह्येषवार्द्धकेपरिपालनं श्रुतिरेषाहिविप्रर्षे
त्रिषुलोकेषुशाश्वती ५९ प्राणधारणमात्रेणशक्यंकर्तुंतपस्त्वया प्राणोहिपरमोधर्मःस्थितोदेहेषुदेहिनाम् ६० पितोवाच
अपिवर्षसहस्रीत्वंबालएवमतोमम उत्पाद्यपुत्रंहिपिताकृतकृत्योभवेत्सुतात् ६१ बालानांक्षुद्बलवतीजानाम्येतदहंप्रभो वृद्धो
हंधारयिष्यामित्वंबलीभवपुत्रक ६२ जीर्णेनवयसापुत्रनमेक्षुद्बाधतेपिच दीर्घकालंतपस्तप्तंनमेमरणतोभयम् ६३ पुत्रउवा
च अपत्यमस्मितेपुत्रस्त्राणात्पुत्रइतिश्रुतिः आत्मापुत्रःस्मृतस्तस्मात्त्राह्यात्मानमिहात्मना ६४ पितोवाच रूपेण
सदृशस्त्वंमेशीलेनचदमेनच परीक्षितश्चबहुधासक्तूनाददमितेसुत ६५ इत्युक्त्वादायतान्सक्तून्प्रीतात्माद्विजसत्तमः प्रहसन्निव
विप्रायसतस्मैप्रददौतदा ६६ भुक्त्वातानपिसक्तून्सनैवतुष्टोबभूवह उंछवृत्तस्तुधर्मात्माव्रीडामनुजगामह ६७ तंवैवधूःस्थितासा
ध्वीब्राह्मणप्रियकाम्यया सक्तूनादायसंहृष्टाश्वशुरंवाक्यमब्रवीत् ६८ संतानात्तवसंतानंममविप्रभविष्यति सक्तूनिमानतिथयेगृ
हीत्वासंप्रयच्छमे ६९ तवप्रसादान्निर्वृत्तामममलोकाःकिलाक्षयाः पौत्रेणतानवाप्नोतियत्रगत्वानशोचति ७० पितृनृणात्तारय
तिपुत्रइत्यनुशुश्रुमः पुत्रपौत्रैश्चनियतंसाधुलोकानुपाश्नुते ७२ श्वशुरउवाच वातातपविशीर्णांगींत्वांविवर्णांनिरीक्ष्यवै
कर्शितांसुव्रताचारेक्षुधाविह्वलचेतसाम् ७३ कथंसक्तून्ग्रहीष्यामिभूत्वाधर्मोपघातकः कल्याणवृत्तेकल्याणिनैवंत्वंवक्तुमर्हसि ७४

६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५

षष्ठेकालेव्रतवतींशौचशीलतपोन्विताम् कृच्छ्रवृत्तिंनिराहारांद्रक्ष्यामित्वांकथंशुभे ७५ बालाक्षुधार्तानारीचरक्ष्यात्वंसततंमया उ
पवासपरिश्रांतात्वंहिबांधववर्धिनी ७६ स्नुषोवाच गुरोर्ममगुरुस्त्वंवैयतोदैवतदैवतम् देवातिदेवस्तस्मात्त्वंसक्तूनादत्स्वमे
प्रभो ७७ देहःप्राणश्चधर्मश्चशुश्रूषार्थमिदंगुरोः तवविप्रप्रसादेनलोकान्प्राप्स्यामहेशुभान् ७८ अवेक्ष्याइतिकृत्वाहदृढभक्त्यातिवाहि
ज चिंत्यामनेयमितिवासक्तूनादातुमर्हसि ७९ श्वशुरउवाच अनेननित्यंसाध्वित्वंशीलवृत्तेनशोभसे यात्वंधर्मव्रतोपेतागु
रुवृत्तिमवेक्षसे तस्मात्सक्तून्ग्रहीष्यामिवधुनार्हसिवंचनाम् ८० गणयित्वामहाभागेत्वद्विधर्मभृतांवर इत्युक्त्वातानुपादायसक्तून्प्रा
दाद्द्विजातये ८१ ततस्तुष्टोभवद्विप्रस्तस्यसाधोर्महात्मनः प्रीतात्मासतुतंवाक्यमिदंमाहद्विजर्षभम् ८२ वाग्मीतदाद्विजश्रेष्ठोधर्मःपुरुष
विग्रहः शुद्धेनतवदानेनन्यायोपात्तेनधर्मतः ८३ यथाशक्तिविसृष्टेनप्रीतोस्मिद्विजसत्तम अहोदानंघुष्यतेतेस्वर्गेस्वर्गनिवासिभिः
८४ गगनात्पुष्पवर्षंचपश्यदंपातितंभुवि सुरर्षिदेवगंधर्वायेचदेवपुरःसराः ८५ स्तुवंतोदेवदूताश्चस्थितादानेन विस्मिताः ब्रह्म
र्षयोविमानस्थाब्रह्मलोकचराश्चये ८६ कांक्षंतोदर्शनंतुभ्यंदिवंव्रजद्विजर्षभ पितृलोकगताःसर्वेतारिताःपितरस्त्वया ८७ अनागताः
श्चबहवःसुबहूनियुगान्युत ब्रह्मचर्येणदानेनयज्ञेनतपसातथा ८८ असंकरेणधर्मेणतस्माद्गच्छदिवंद्विज श्रद्धयापरयायस्त्वंतप
श्चरसिसुव्रत ८९ तस्माद्देवास्त्वदानेनप्रीताब्राह्मणसत्तम सर्वमेतद्धियस्मात्तेदत्तंशुद्धेनचेतसा ९० कृच्छ्रकालेततःस्वर्गोविजितः
कर्मणात्वया क्षुधानिर्नुदतिप्रज्ञांधर्मबुद्धिंव्यपोहति ९१ क्षुधापरिगतज्ञानोधृतिंत्यजतिचैवहि बुभुक्षांजयतेयस्तुसस्वर्गंजयते
ध्रुवम् ९२ यदादानरुचिःस्यात्तदेनदाधर्मोनसीदति अनवेक्ष्यसुतस्नेहंकलत्रस्नेहमेवच ९३ धर्ममेवगुरुंज्ञात्वातृष्णानगणितात्वया
द्रव्यागमोनृणांसूक्ष्मःपात्रेदानंततःपरम् ९४ कालःपरतरोदानात्श्रद्धाचैवततःपरा स्वर्गद्वारंसुसूक्ष्मंहिनरैर्मोहान्नदृश्यते ९५
स्वर्गार्गलंलोभबीजंरागगुप्तंदुरासदम् नंतुपश्यंतिपुरुषाजितक्रोधाजितेंद्रियाः ९६ ब्राह्मणास्तपसायुक्तायथाशक्तिप्रदायिनः स
हस्रशक्तिश्चशतंशतशक्तिर्दशापिच ९७ दद्यादपश्चयःशक्त्यासर्वेतुल्यफलाःस्मृताः रंतिदेवोहिनृपतिरपःप्रादादकिंचनः ९८ शुद्धेन
मनसाविप्रनाकपृष्ठंततोगतः नधर्मःप्रीयतेतातदानैर्दत्तैर्महाफलैः ९९ न्यायलब्धैर्यथासूक्ष्मैःश्रद्धापूतैःसतुष्यति गोप्रदानसह
स्राणिद्विजेभ्योदान्नृगोनृपः १००

एकांदत्वासपारक्यांनरकंसमपद्यत आत्ममांसप्रदानेनशिबिरौशीनरोनृपः १०१ प्राप्यपुण्यकृतांल्लोकान्मोदतेदिविसुव्रतः विभ
वोननृणांपुण्यंस्वशक्त्यास्वर्जितंसतां १०२ नयज्ञैर्विविधैर्विप्रयथान्यायेनसंचितैः क्रोधाद्दानफलंहंतिलोभात्स्वर्गंनगच्छति १०३ न्याय
वृत्तिर्हितपसादानवित्स्वर्गमश्नुते नराजसूयैर्बहुभिरिष्ट्वाविपुलदक्षिणैः १०४ नचाश्वमेधैर्बहुभिः फलंसममिदंतव सक्तुप्रस्थेनवि
जितोब्रह्मलोकस्त्वयाक्षयः विरजोब्रह्मसदनंगच्छविप्रयथासुखम् सर्वेषांवोद्विजश्रेष्ठदिव्यंयानमुपस्थितम् १०६ आरोहतयथा
कामंधर्मोस्मिद्विजपश्यमां तारितोहित्वयादेहोलोकेकीर्तिःस्थिराचते १०७ सभार्यःसहपुत्रश्चसस्नुषश्चदिवंव्रज इत्युक्तवाक्येधर्मे
तुयानमारुह्यसद्विजः १०८ सदारःससुतश्चैवसस्नुषश्चदिवंगतः तस्मिन्विप्रेगतेस्वर्गंससुतेसस्नुषेतदा १०९ भार्याचतुर्थेधर्म
ज्ञेततोहंनिःसृतोबिलात् ततस्तुसक्तुगंधेनक्लेदेनसलिलस्यच ११० दिव्यपुष्पावमर्दाच्चसाधोर्दानलवैश्चतैः विप्रस्यतपसातस्य
शिरोमेकांचनीकृतम् १११ तस्यसत्याभिसंधस्यसक्तुदानेनचैवह शरीरार्धंचमेविप्राःशातकुंभमयंकृतम् ११२ पश्यतेमंसुविपुलं
तपसातस्यधीमतः कथमेवंविधंस्यादेपार्श्वमन्यदितिद्विजाः ११३ तपोवनानियज्ञांश्चहृष्टोभ्येमिपुनःपुनः यज्ञंत्वहमिमंश्रुत्वाकु
रुराजस्यधीमतः ११४ आशयापरयाप्राप्तोनचाहंकांचनीकृतः ततोमयोक्तंतद्वाक्यंप्रहस्यब्राह्मणर्षभाः ११५ सक्तुप्रस्थेनयज्ञोयंसं
मितोनेतिसर्वथा सक्तुप्रस्थलवैस्तैर्हितदाहंकांचनीकृतः ११६ नहियज्ञोमहानेषसदृशस्तैर्मतोमम इत्युक्त्वानकुलःसर्वान्यज्ञाद्द्विजव-
रांस्तदा ११७ जगामादर्शनंतेषांविप्रास्तेचययुर्गृहान् ११७ वैशंपायनउवाच एतत्तेसर्वमाख्यातंमयापरपुरंजय यदा
श्चर्यमभूत्तत्रवाजिमेधेमहाक्रतौ ११८ नविस्मयस्तेनृपतेयज्ञेकार्यःकथंचन ऋषिकोटिसहस्राणितपोभिर्येदिवंगताः ११९ अद्रोहः
सर्वभूतेषुसंतोषःशीलमार्जवम् तपोदमश्चसत्यंचप्रदानंचेतिसंमितम् १२० इतिश्रीमन्महाभारतेआश्व०पर्वणिनकुलाख्यानेन
वतितमोऽध्यायः ९० जनमेजयउवाच यज्ञेसक्तानृपतयस्तपःसक्तामहर्षयः शांतिव्यवस्थिताविप्राःशमोदमइतिप्रभो
१ तस्माद्यज्ञफलैस्तुल्यंनकिंचिदिहदृश्यते इतिमेवर्ततेबुद्धिस्तथाचैतदसंशयम् २ यज्ञैरिष्ट्वातुबहवोराजानोद्विजसत्तम इ
हकीर्तिंपरांप्राप्यप्रेत्यस्वर्गमवाप्नुयुः ३ देवराजःसहस्राक्षःक्रतुभिर्भूरिदक्षिणैः देवराज्यंमहातेजाःप्राप्तवानखिलंविभुः ४

५ ६ ७ ८ ९ १० ११ १२ १३ हिंसामिश्रस्यधर्मस्यनिंदार्थं१४ १५ १६ १७ १८ १९ रसैःपयोघृतादिभिः २० २१ वितथंहिंसाहिंसयोःफलोःतुल्यत्वादनृ

यदायुधिष्ठिरोराजाभीमार्जुनपुरःसरः सदृशोदेवराजेनसमृद्ध्याविक्रमेणच ५ अथकस्मात्सनकुलोगर्हयामासतंक्रतुम् अश्वमेधंमहा
यज्ञंराज्ञस्तस्यमहात्मनः ६ वैशंपायनउवाच यज्ञस्यविधिमग्र्यंवैफलंचापिनराधिप गदतःशृणुमेराजन्यथावदिहभारत ७
पुराशक्रस्ययजतःसर्वऊचुर्महर्षयः ऋत्विक्षुकर्मव्यग्रेषुविततेयज्ञकर्मणि ८ हूयमानेतथावह्नौहोत्रेगुणसमन्विते देवेष्वाहूयमाने
षुस्थितेषुपरमर्षिषु ९ सुप्रतीतैस्तथाविप्रैःस्वागमैःसुस्वरैर्नृप अश्रांतैश्चापिलघुभिरध्वर्युवृषभैस्तथा १० आलंभसमयेतस्मिन्गृहीते
षुपशुष्वथ महर्षयोमहाराजबभूवुःकृपयान्विताः ११ ततोदीनान्पशून्दृष्ट्वाऋषयस्तेतपोधनाः ऊचुःशक्रंसमागम्यनायंयज्ञविधिःशुभः १२
अपरिज्ञानमेतत्तेमहान्तंधर्ममिच्छतः नहियज्ञेपशुगणाविधिदृष्टाःपुरंदर १३ धर्मोपघातकस्त्वेषसमारंभस्तवप्रभो नायंधर्मकृतोयज्ञोन
हिंसाधर्मउच्यते आगमेनैवतेयज्ञंकुर्वंतुयदिचेच्छसि १४ विधिदृष्टेनयज्ञेनधर्मस्तेसुमहान्भवेत् यजबीजैःसहस्राक्षत्रिवर्षपरमो
षितैः १५ एषधर्मोमहान्शक्रमहागुणफलोदयः शतक्रतुस्तुतद्वाक्यमृषिभिस्तत्त्वदर्शिभिः १६ उक्तंनप्रतिजग्राहमानान्मोहवशंगतः
तेषांविवादःसुमहान्शक्रयज्ञेतपस्विनाम् १७ जंगमैःस्थावरैर्वापियष्टव्यमितिभारत तेतुखिन्नाविवादेनऋषयस्तत्त्वदर्शिनः १८ त
दासंधायशक्रेणपप्रच्छुर्नृपतिंवसुम् १९ महाभागकथंयज्ञेष्वागमोनृपसत्तमः यष्टव्यंपशुभिर्मुख्यैरथोबीजैरसैरिति २० तच्छ्रुत्वातुवसु
स्तेषामविचार्यबलाबलम् यथोपनीतैर्यष्टव्यमितिप्रोवाचपार्थिवः २१ एवमुक्त्वासनृपतिःप्रविवेशरसातलम् उक्त्वाथवितथंप्रश्नंचेदी
नामीश्वरःप्रभुः २२ तस्मान्नवाच्यंह्येकेनबहुज्ञेनापिसंशये प्रजापतिमपाहायस्वयंभुवमृतेप्रभुम् २३ तेनदत्तानिदानानिपापेनाशुद्धबु
द्धिना तानिसर्वाण्यनादृत्यनश्यंतिविपुलान्यपि २४ तस्याधर्मप्रवृत्तस्यहिंसकस्यदुरात्मनः दानेनाकीर्तिर्भवतिनप्रेत्येहचदुर्मतेः २५ अ
न्यायोपगतंद्रव्यमभीक्ष्णंयोह्यपंडितः धर्माभिशंकीयजतेनसधर्मफलंलभेत् २६ धर्मवैतंसिकोयस्तुपापात्मापुरुषाधमः ददातिदानंविप्रे
भ्योलोकविश्वासकारणम् २७ पापेनकर्मणाविप्रोधनंप्राप्यनिरंकुशः रागमोहान्वितःसोंतेकलुषांगतिमश्नुते २८ अपिसंचयबुद्धिर्हि
लोभमोहवशंगतः उद्वेजयतिभूतानिपापेनाशुद्धबुद्धिना २९ एवंलब्ध्वाधनंमोहाद्योहिदद्याद्यजेतवा नतस्यसफलंप्रेत्यभुंक्तेपापधना
गमात् ३० उंछंमूलंफलंशाकमुदपात्रंतपोधनाः दानंविभवतोदत्त्वानराःस्वर्यांतिधार्मिकाः ३१ एषधर्मोमहायोगोदानंभूतदयातथा
ब्रह्मचर्यंतथासत्यमनुक्रोशोधृतिःक्षमा ३२ सनातनस्यधर्मस्यमूलमेतत्सनातनम् श्रूयंतेहिपुराराज्ञाविश्वामित्रादयोनृपाः ३३ विश्वा
मित्रोसितश्चैवजनकश्चमहीपतिः कक्षसेनार्ष्टिषेणौचसिंधुद्वीपश्चपार्थिवः ३४

तम् २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४

३५ ३६ इत्याश्वमेधिकेपर्वणिटीकायांएकनवतितमोऽध्यायः ९१ धर्मागतेनेत्यध्यायःसर्वसाधनहीना अपिमहांतोयज्ञंनिवर्तयंत्येवेतिवक्तुंआरभ्यते १ २ ३ ४ ५ म
रीचिपाश्चंद्रमरीचिपा नमात्रनृप्ताः ६ परिपृष्टंनंदेवगृण्हंतिनान्यथातेपरिपृष्टिकाःपाठांतरेपरिगृष्टिका अपितएव प्रक्षालास्तत्कालमात्रसंग्रहाः अप्रक्षालाइतिपा
ठेशेषहीनाः ७ ८ ९ १० ११ १२ १३ १४ १५ १६ चिंतायज्ञंमानसंयज्ञं संकल्पमात्रेणैवदेवानृषींश्चतर्पयिष्यामीत्यर्थः १७ स्पर्शयज्ञंउपाहृतद्रव्यस्यव्ययमकृत्वातत्स्प

एतेचान्येचबहवःसिद्धिंपरमिकांगताः नृपाःसत्यैश्चदानैश्चन्यायलब्धैस्तपोधनाः ३५ ब्राह्मणाःक्षत्रियावैश्याःशूद्रायेचाश्रितास्तपः दानध
र्माग्निनाशुद्धास्तेस्वर्गंयांतिभारत ३६ इत्याश्वमेधिकेपर्वणिएकनवतितमोऽध्यायः ९१ जनमेजयउवाच धर्मागतेनत्यागेनभगवन्
स्वर्गमस्तिचेत् एतन्मेसर्वमाचक्ष्वकुशलोह्यसिभाषितुं १ तस्योंछवृत्तेर्यद्वृत्तंसक्तुदानेफलंमहत् कथितंतुममब्रह्मंस्तथ्यमेतदसंशयम् २ कथं
हिसर्वयज्ञेषुनिश्चयःपरमोभवेत् एतदर्हसिमेवक्तुंनिखिलेनद्विजर्षभ ३ वैशंपायनउ॰ अत्राप्युदाहरंतीममितिहासंपुरातनं अ
गस्त्यस्यमहायज्ञेपुरावृत्तमरिंदम ४ पुरागस्त्योमहातेजादीक्षांद्वादशवार्षिकीं प्रविवेशमहाराजसर्वभूतहितेरतः ५ तत्राग्निकल्पाहोतार आसन्
सत्रेमहात्मनः मूलाहाराःफलाहाराःसाश्मकुट्टामरीचिपाः ६ परिपृष्टिकावैघसिकास्तप्रक्षालास्तथैवच यतयोभिक्षवश्चात्रबभूवुःपर्यवस्थिताः ७ स
र्वेप्रत्यक्षधर्माणोजितक्रोधाजितेंद्रियाः दमेस्थिताश्चसर्वेतेदंभद्रोहविवर्जिताः ८ वृत्तेशुद्धेस्थितानित्यमिंद्रियैश्चाप्यबाधिताः उपातिष्ठंततंयज्ञंयज्
तस्तेमहर्षयः ९ यथाशक्त्याभगवतातदन्नंसमुपार्जितं तस्मिन्सत्रेतुयद्वृत्तंयद्योग्यंचतदाभवत् १० तथाह्यनेकैर्मुनिभिर्महांतःक्रतवःकृताः एवंविधे
त्वगस्त्यस्यवर्तमानेतथाध्वरे नववर्षसहस्राक्षस्तदाभरतसत्तम ११ ततःकर्मांतरेराजन्नगस्त्यस्यमहात्मनः कथेयमभिनिर्वृत्तामुनीनांभावितात्म
नाम् १२ अगस्त्योयजमानोसौददात्यन्नंविमत्सरः नचवर्षतिपर्जन्यःकथमन्नंभविष्यति सत्रंचेदंमहद्विप्रामुनेर्द्वादशवार्षिकम् १३ नवर्षिष्यतिदे
वश्चवर्षाण्येतानिद्वादश एतद्भवंतःसंचिंत्यमहर्षेरस्यधीमतः अगस्त्यस्यातितपसःकर्तुमर्हंत्यनुग्रहम् १४ इत्येवमुक्तेवचनेततोगस्त्यःप्रताप
वान् १५ प्रोवाचवाक्यंसतदाप्रसाद्यशिरसामुनीन् यदिद्वादशवर्षाणिनवर्षिष्यतिवासवः १६ चिंतायज्ञंकरिष्यामिविधिरेषसनातनः यदि
द्वादशवर्षाणिनवर्षिष्यतिवासवः १७ स्पर्शयज्ञंकरिष्यामिविधिरेषसनातनः यदिद्वादशवर्षाणिनवर्षिष्यतिवासवः १८ ध्येयात्मनाहरिष्यामियज्ञा
नन्यानतिव्रतान् बीजयज्ञोमयायंवैबहुवर्षसमाचितः १९ बीजैर्हितंकरिष्यामिनात्रविघ्नोभविष्यति नेदंशक्यंवृथाकर्तुंममसत्रंकथंचन २० व
र्षिष्यतीहवादेवोनवादेवोभविष्यति २१ अथवाभ्यर्थनामिंद्रोनकरिष्यतिकामतः स्वयमिंद्रोभविष्यामिजीवयिष्यामिचप्रजाः योयदाहारजात
श्चसतथैवभविष्यति २२ विशेषंचैवकर्तास्मिपुनःपुनरतीवहि अद्येहस्वर्णमभ्येतुयच्चान्यद्वसुकिंचन २३ त्रिषुलोकेषुयच्चास्तितदिहागम्यतांस्व
यं दिव्याश्चाप्सरसांसंघागंधर्वाश्चसकिन्नराः २४

र्शेनैवतांस्तर्पयिष्यामि एवंदृष्टियज्ञोपिज्ञेयः १८ सिद्धद्रव्याभावेध्यानमात्रेणद्रव्याण्याहरिष्यामीत्याह
ध्येयात्मनेति पाठांतरेध्यायामेनशरीरक्लेशेन १९ २० २१ ध्येयात्मनेत्यस्यप्रपंचोथवेत्यादि २२ २३ २४

२५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ कोसावित्यादि विशेषकं कथाक्रोधजयस्योत्कर्षवर्णनार्था ३९ ४० ४१ पिठरं पात्रं धर्म आविशत् तत्पयः पीतवानित्यर्थः ४२ ४३

विश्वावसुश्च येचान्ये गन्धर्वाप्सरसांगणाः सर्वे ऽन्तरेभ्यः कुरुश्रेष्ठ यत्किंचिद्वसु विद्यते २५ सर्वं तदिह यज्ञे वः स्वयमेवोपतिष्ठतु स्वर्गः स्वर्गसदश्चैव धर्मश्च
स्वयमेव तु २६ इत्युक्ते सर्वमेवैतदभवत्तपसा मुनेः ततो दीप्ताग्निमनसस्त्वगस्त्यस्यातितेजसः २७ ततस्ते मुनयो दृष्ट्वा ददृशुस्तपसो बलम् विस्मिता व
चनं प्राहुरिदं सर्वं महार्थकम् २८ ऋषय ऊचुः प्रीताः स्मस्तव वाक्येन नत्विच्छामस्तपोव्ययम् तैरेव यज्ञैस्तुष्टाः स्मो न्यायेनेच्छामहे वयं २९ यज्ञान्दीक्षां
तथा होमान्यच्चान्यन्मृगयामहे न्यायेनोपार्जिताहाराः स्वकर्माभिरता वयं ३० वेदांश्च ब्रह्मचर्येण न्यायतः प्रार्थयामहे न्यायेनोत्तरकालं च गृहेभ्यो निः
सृता वयम् ३१ धर्मदृष्टेन विधिना तपस्तप्स्यामहे वयं भवतः सम्यगेषा तु बुद्धिर्हिंसाविवर्जिता ३२ एतामहिंसां यज्ञेषु ब्रूयास्त्वं सततं प्रभो प्रीता
स्ततो भविष्यामो वयं तु द्विजसत्तम ३३ विसर्जिताः समाप्तौ च सत्रादस्माद्व्रजामहे तथा कथयतां तेषां देवराजः पुरंदरः ३४ ववर्ष सुमहातेजा दृष्ट्वा
तस्य तपोबलं आसमाप्तेश्च यज्ञस्य तस्यामितपराक्रमः ३५ निकामवर्षी पर्जन्यो बभूव जनमेजय प्रसादयामास च तमगस्त्यं त्रिदशेश्वरः ३६ स्वयमभ्ये
त्य राजर्षे पुरस्कृत्य बृहस्पतिम् ३७ ततो यज्ञसमाप्तौ तान्विससर्ज महामुनीन् अगस्त्यः परमप्रीतः पूजयित्वा यथाविधि ३८ जनमेजय उवाच
कोसौ नकुलरूपेण शिरसा काञ्चनेन वै प्राह मानुषवद्वाचमेतन्मे शंस पृच्छतः ३९ वैशंपायन उवाच एतत्पूर्वं न पृष्टोऽहं न चास्माभिः प्रभाषितं श्रूयतां न
कुलो योऽसौ यथा वाक्तस्य मानुषी ४० श्राद्धं संकल्पयामास जमदग्निः पुरा किल होमधेनुस्तमागाच्च स्वयमेव दुदोह ताम् ४१ तत्पयः स्थापयामास नवे भा
ण्डे दृढे शुचौ तच्च क्रोधः स्वरूपेण पिठरं धर्म आविशत् ४२ जिज्ञासुस्तमृषिश्रेष्ठं किं कुर्याद्विप्रियं कृते इति संचिन्त्य धर्मः स धर्षयामास तत्पयः ४३ त
माज्ञाय मुनिः क्रोधं नैवास्य समकोपयत् स तु क्रोधस्ततो राजन्ब्राह्मणीं मूर्तिमास्थितः ४४ जिते तस्मिन्भृगुश्रेष्ठमभ्यभाषदमर्षणः ४५ जितोऽस्मीति
भृगुश्रेष्ठ भृगवो ह्यतिरोषणाः लोके मिथ्याप्रवादोऽयं यत्त्वयास्मि विनिर्जितः ४६ वशे स्थितोऽहं त्वय्यद्य क्षमावति महात्मनि बिभेमि तपसः साधो प्रसा
दं कुरु मे प्रभो ४७ जमदग्निरुवाच साक्षाद्दृष्टोऽसि मे क्रोध गच्छ त्वं विगतज्वरः न त्वयापकृतं मेऽद्य न च मे मन्युरस्ति वै ४८ यानुद्दिश्य संकल्पः
पयसोऽस्य कृतो मया पितरस्ते महाभागास्तेभ्यो बुध्यस्व गम्यताम् ४९ इत्युक्तो जातसंत्रासस्तत्रैवान्तरधीयत पितॄणामभिषङ्गाच्च नकुलत्वमुपा
गतः ५० स तान्प्रसादयामास शापस्यान्तो भवेदिति तैश्चाप्युक्तः क्षिपन्धर्मं शापस्यान्तमवाप्स्यसि ५१ तैश्चोक्तो यज्ञियान्देशान्धर्मारण्ये त
थैव च जुगुप्समानो धावन्स तं यज्ञं समुपासदत् ५२ धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः मुक्तः शापात्ततः क्रोधो धर्मो ह्यासीद्युधिष्ठिरः ५३
एवमेतत्तदा वृत्तं यज्ञे तस्य महात्मनः पश्यतां चापि नस्तत्र नकुलोऽन्तर्हितस्तदा ५४ इति श्रीमन्महाभारते आश्वमेधिके नकुलोपाख्याने द्विनवतित
मोऽध्यायः ९२ अत्र व्यासोक्ताध्यायश्लोकसंख्यान्यूनाधिक्यं लिपिकरप्रमादाद्बोध्यं श्रीकृष्णार्पणमस्तु शुभं भवतु अश्वमेधपर्व समाप्तम्

४४ ४५ रोषणत्वमेव मिथ्या यतः परस्याजितत्वान्मया ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ इति श्रीपदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोर्नी
लकण्ठस्य कृतौ भारतभावदीपे आश्वमेधिकपर्वणि टीकायां द्विनवतितमोऽध्यायः ९२

इतिश्रीमन्महाभारतेआश्वमेधिकंपर्वसमाप्तम्

अथ श्रीमन्महाभारते आश्रमवासिकपर्वप्रारंभः

श्रीगणेशायनमः श्रीनारायणलक्ष्मणौनतपदंधरेशगंगाधरौगोपालंर्चानिधायचेतसिशिवंचिंतामणिंचादरात् पूर्वस्याश्रमवासिकादिषुचतुर्थारभ्यतेभारतेपूर्वाचार्यमतानुगेनविदुषाभावप्रदीपोद्भुतः१ पूर्वत्रअंगोपांगसहिताब्रह्मविद्यासमापितातत्रसर्वभोगत्यागपूर्वकशमाद्युपपत्तिर्वनवासिनामेवभवतीतिधृतराष्ट्राद्याचारप्रदर्शनेनसूचयन् ततोधिगंतव्यंजगज्जन्मविश्वेश्वरतत्त्वाश्चर्यप्रदर्शनव्याजेनप्रतिपादयिष्यन्ननरग्रंथमारभते प्राप्यराज्यंमहात्मानइत्यादिना १ २ ३ ४ ६

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत १ जनमेजयउवाच प्राप्यराज्यंमहात्मानःपांडवामेपितामहाः कथमासन्महाराज्ञिधृतराष्ट्रेमहात्मनि १ सतुराजाहतामात्योहतपुत्रोनिराश्रयः कथमासीद्धतैश्वर्योगांधारीचयशस्विनी २ कियंतंचैवकालंतेममपूर्वपितामहाः स्थिताराज्येमहात्मानस्तन्मेव्याख्यातुमर्हसि ३ वैशंपायनउवाच प्राप्यराज्यंमहात्मानःपांडवाहतशत्रवः धृतराष्ट्रंपुरस्कृत्यपृथिवींपर्यपालयन् ४ धृतराष्ट्रमुपातिष्ठद्विदुरःसंजयस्तथा वैश्यापुत्रश्चमेधावीयुयुत्सुःकुरुसत्तम ५ पांडवाःसर्वकार्याणिसंपृच्छंतिस्मतंनृपं चक्रुस्तेनाभ्यनुज्ञातावर्षाणिदशपंचच ६ सदाहिगत्वाते वीराःपर्युपासंततंनृपं पादाभिवादनंकृत्वाधर्मराजमतेस्थिताः ७ तेमूर्ध्निसमुपाघ्रातासर्वकार्याणिचक्रिरे कुंतिभोजसुताचैवगांधारीमन्ववर्त्तत ८ द्रौपदीचसुभद्राचयाश्चान्याःपांडवस्त्रियः समांवृत्तिमवर्त्तंततयोःश्वश्र्वोर्यथाविधि ९ शयनानिमहार्हाणिवासांस्याभरणानिच राजार्हाणिचसर्वाणिभक्ष्यभोज्यान्यनेकशः १० युधिष्ठिरोमहाराजधृतराष्ट्रेभ्युपाहरत् तथैवकुंतीगांधार्यांगुरुवृत्तिमवर्त्तत ११ विदुरःसंजयश्चैवयुयुत्सुश्चैवकौरव उपास्मतेस्मतंवृद्धंहतपुत्रंजनाधिपं १२ श्यालोद्रोणस्ययश्चासीद्दयितोब्राह्मणोमहान् सचतस्मिन्महेष्वासःकृपःसमभवत्तदा १३ व्यासश्चभगवान्नित्यमासांचक्रेनृपेणह कथाःकुर्वन्पुराणर्षिर्देवर्षिपितृरक्षसां १४ धर्मयुक्तानिकार्याणिव्यवहारान्वितानिच धृतराष्ट्राभ्यनुज्ञातोविदुरस्तान्यकारयत् १५ सामंतेभ्यःप्रियाण्यस्यकार्याणिसुबहून्यपि प्राप्यंतेर्थैःसुलघुभिःप्रनयाद्विदुरस्यवै १६ अकरोद्बंधमोक्षंचवध्यानांमोक्षणंतथा नचधर्मसुतोराजाकदाचित्किंचिदब्रवीत् १७ विहारयात्रासुपुनःकुरुराजोयुधिष्ठिरः सर्वान्कामान्महातेजाःप्रददावंबिकासुते १८ आरालिकाःसूपकारारागखांडविकास्तथा उपातिष्ठंतराजानंधृतराष्ट्रंयथापुरा १९ ६ ७

उपातिष्ठत्आराधितवान् ५ ६ ७ ८ ९ १० ११ १२तस्मिन्समभवत् १३ १४ १५ १६ १७ १८आरालिकाः आरयाशस्त्रविशेषेणलूनंछिन्नंशाकादिअशलुततत्संस्कुर्वंतितेआरालिकाःशाकविशेषकर्त्तारः रागखांडवेतिपिप्पलीशुंठीशर्करोपेतामुद्गयूषस्तत्कर्त्तारः रागखांडविकाः १९ ६ ७

२० २१ २२ २३ २४ २५ अन्वशात् अनुशिष्टवान् २६ २७ इतिश्रीनैलकंठीयेभारतभावदीपे आश्रमवासिकपर्वणिटीकायां प्रथमोऽध्यायः १

वासांसिचमहार्हाणिमाल्यानिविविधानिच उपाजह्रुर्यथान्यायंधृतराष्ट्रस्यपांडवाः २० मैरेयमत्स्यमांसानिपानकानिमधूनिच
चित्रान्भक्ष्यविकारांश्चचक्रुस्तस्ययथापुरा २१ येचापिपृथिवीपालाःसमाजग्मुस्ततस्ततः उपातिष्ठंतितेसर्वेकौरवेंद्रंयथापुरा २२
कुंतीचद्रौपदीचैवसात्वतीचयशस्विनी उलूपीनागकन्याचदेवीचित्रांगदातथा २३ धृष्टकेतोश्चभगिनीजरासंधसुतास्तथा ए
ताश्चान्याश्चबह्व्योवैयोषितःपुरुषर्षभ २४ किंकराःपर्युपातिष्ठन्सर्वाःसुबलजांतदा यथापुत्रविमुक्तोयंनकिंचिद्दुःखमाप्नुया
त् २५ इतितानन्वशाद्भ्रातॄन्नित्यमेवयुधिष्ठिरः एवंतेधर्मराजस्यश्रुत्वावचनमर्थवत् २६ सविशेषमवर्तंतभीममेकंतदाविना
नहितत्तस्यवीरस्यहृदयादपसर्पति धृतराष्ट्रस्यदुर्बुद्धेर्यद्वृत्तंद्यूतकारितं २७ इतिश्रीमहाभारतेआश्रमवासिकेपर्वणिप्रथमोऽध्यायः १
वैशंपायनउवाच एवंसपूजितोराजापांडवैरंबिकासुतः विजहारयथापूर्वमृषिभिःपर्युपासितः १ ब्रह्मदेयाग्रहारांश्चप्रददौ-
सकुरूद्वहः तच्चकुंतीसुतोराजासर्वमेवान्वपद्यत २ आनृशंस्यपरोराजाप्रीयमाणोयुधिष्ठिरः उवाचसतदाभ्रातॄनमात्यांश्चम
हीपतिः ३ मयाचैवभवद्भिश्चमान्यएषनराधिपः निदेशेधृतराष्ट्रस्ययस्तिष्ठतिसमेसुहृत् ४ विपरीतश्चमेशत्रुर्नियम्यश्च
भवेन्नरः पितृवृत्तेषुचाहःसुपुत्राणांश्राद्धकर्मणि ५ सुहृदांचैवसर्वेषांयावदस्यचिकीर्षितं ततःसराजाकौरव्योधृतराष्ट्रोम
हामनाः ६ ब्राह्मणेभ्योयथार्हेभ्योददौवित्तान्यनेकशः धर्मराजश्चभीमश्चसव्यसाचीयमावपि ७ तत्सर्वमन्ववर्तंततस्यप्रि
यचिकीर्षया कथंनुराजावृद्धःसपुत्रपौत्रवधार्दितः ८ शोकमस्मत्कृतंप्राप्यनम्रियेतेतिचिंत्यते यावद्धिकुरुवीरस्यजीवत्पुत्र
स्यवैसुखं ९ बभूवतदवाप्नोतुभोगांश्चेतिव्यवस्थिताः ततस्तेसहिताःपंचभ्रातरःपांडुनंदनाः १० तथाशीलाःसमातस्थुर्धृत-
राष्ट्रस्यशासने धृतराष्ट्रश्चतान्सर्वान्विनीतान्नियमेस्थितान् ११ शिष्यवृत्तिंसमापन्नान्गुरुवत्प्रत्यपद्यत गांधारीचैवपुत्राणां
विविधैःश्राद्धकर्मभिः १२ आनृण्यमगमत्कामान्विप्रेभ्यःप्रतिपाद्यसा एवंधर्मभृतांश्रेष्ठोधर्मराजोयुधिष्ठिरः १३ भ्रातृभिः
सहितोधीमान्पूजयामासतंनृपं वैशंपायनउवाच सराजातुमहातेजावृद्धःकुरुकुलोद्वहः नददर्शतदाकिंचिदप्रियंपांडुनंदने
१४ वर्तमानेषुसद्वृत्तिंपांडवेषुमहात्मसु प्रीतिमानभवद्राजाधृतराष्ट्रोंबिकासुतः १५ सौबलेयीचगांधारीपुत्रशोकमपास्य
तं सदैवप्रीतिमत्यासीत्तनयेषुनिजेष्विव १६

एवमिति १ २ ३ ४ पितृ
वृत्तेषुमितावृतःप्रमीतोयेषुतेषुसुयोद्धेषु ५ ६ ७ ८ चिंत्यतेविचिंत्यतेव्यवस्थिता इत्यग्रिमेणान्वयः ९ १० ११
१२ १३ १४ १५ १६

प्रियाण्येवतुकौरव्योनाप्रियाणिकुरूद्वहः वैचित्रवीर्येनृपतौसमाचरतवीर्यवान १७ यद्यद्ब्रूतेचकिंचित्सधृतराष्ट्रोजनाधिपः गुरुवाल
घुवाकार्यंगांधारीचतपस्विनी १८ तेसराजामहाराजपांडवानांधुरंधरः पूजयित्वावचस्तत्तदकार्षीत्परवीरहा १९ तेनतस्याभवत्प्रीतो
वृत्तेनसनराधिपः अन्वतप्यच्चसंस्मृत्यपुत्रंतंमंदचेतसं २० सदाचप्रातरुत्थायकृतजप्यःशुचिर्नृपः आशास्तेपांडुपुत्राणांसमरेष्वपरा
जयं २१ ब्राह्मणान्स्वस्तिवाच्याथहुत्वाचैवहुताशनं आयूंषिपांडुपुत्राणामाशंसतनराधिपः २२ नतांप्रीतिंपरामापपुत्रेभ्यःसकु
रूद्वहः यांप्रीतिंपांडुपुत्रेभ्यःसदावापनदानृपः २३ ब्राह्मणानांयथावृत्तःक्षत्रियाणांयथाविधः तथाविट्शूद्रसंघानामभवत्संप्रि
यस्तदा २४ यच्चकिंचित्तदापापंधृतराष्ट्रसुतैःकृतं अकृत्वाहृदितत्पापंतंनृपंसोन्ववर्तत २५ यश्चकश्चिन्नरःकिंचिदप्रियंचा
विकुसुते कुरुते द्वेष्यतामेतिसकौंतेयस्यधीमतः २६ नराज्ञोधृतराष्ट्रस्यनचदुर्योधनस्यवै उवाचदुष्कृतंकश्चिद्युधिष्ठिरभया
न्नरः २७ धृत्यातुष्टोनरेंद्रस्यगांधारीविदुरस्तथा शौचेनचाजातशत्रोर्नतुभीमस्यशत्रुहन् २८ अन्ववर्तततंचापिनिश्चितोधः
र्मजोनृपं धृतराष्ट्रंचसंप्रेक्ष्यसदाभवतिदुर्मनाः २९ राजानमनुवर्त्ततंधर्मपुत्रममित्रहा अन्ववर्ततकौरव्योहृदयेनपराजितः ३०
इतिश्रीमहाभारतेआश्रमवासिकेपर्वणिद्वितियोऽध्यायः २ वैशंपायनउवाच युधिष्ठिरस्यनृपतेर्दुर्योधनपितुस्तथा नांतरं
ददृशूराज्येपुरुषाःप्रणयंप्रति १ यदातुकौरवोराजापुत्रंसस्मारदुर्मतिं तदाभीमंहृदाराजन्नपध्यातिसपार्थिवः २ तथैवभीमसे
नोपिधृतराष्ट्रंजनाधिपं नामर्षयतराजेंद्रसदैवदुष्टवद्धृदा ३ अप्रकाशान्यप्रियाणिचकारास्यवृकोदरः आज्ञांप्रत्यहरच्चापिकृत
कैःपुरुषैःसदा ४ स्मरन्दुर्मंत्रितंतस्यवृत्तान्यप्यस्यकानिचित् अथभीमःसुहृन्मध्येबाहुशब्दंतथाकरोत् ५ संश्रवेधृतराष्ट्र
स्यगांधार्याश्चाप्यमर्षणःस्मृत्वादुर्योधनंशत्रुंकर्णदुःशासनावपि ६ प्रोवाचेदंसुसंरब्धोभीमःसपरुषंवचः अंधस्यनृपतेःपुत्रा
मयापरिघबाहुना ७ नीतालोकममुंसर्वेनानाशस्त्रास्त्रयोधिनः इमौतौपरिघप्रख्यौभुजौममदुरासदौ ८ ययोरंतरमासाद्य
धार्त्तराष्ट्राःक्षयंगताः ताविमौचंदनेनाक्तौचंदनार्हौचमेभुजौ ९ याभ्यांदुर्योधनोनीतःक्षयंससुतबांधवः एताश्चान्याश्चविवि
धाःशल्यभूतानराधिप १० वृकोदरस्यतावाचःश्रुत्वानिर्वेदमागमत् साचबुद्धिमतीदेवीकालपर्यायवेदिनी ११ ६ ६

गांधार्याःसर्वधर्मज्ञातान्यलीकानिशुश्रुवे ततःपंचदशेवर्षेसमतीतेनराधिपः १२ राजानिर्वेदमापेदेभीमवाग्बाणपीडितः नान्वबुध्यत
तद्राजाकुंतीपुत्रोयुधिष्ठिरः १३ श्वेताश्वोवाथकुंतीवाद्रौपदीवायशस्विनी माद्रीपुत्रौचधर्मज्ञौचित्ततस्यान्ववर्ततां १४ राज्ञस्तुचित्तं
रक्षंतौनोचतुःकिंचिदप्रियं ततःसमानयामासधृतराष्ट्रःसुहृज्जनं १५ बाष्पसंदिग्धमत्यर्थमिदमाहवचोभृशं धृतराष्ट्रउवाच
विदितंभवतामेतद्यथावृत्तःकुरुक्षयः ममापराधात्तत्सर्वमनुज्ञातंचकौरवैः १६ योहंदुष्टमतिंमंदोज्ञातीनांभयवर्धनं दुर्योधनंकौरवा
णामाधिपत्येभ्यषेचयं १७ यच्चाहंवासुदेवस्यनाश्रौषंवाक्यमर्थवत् वध्यतांसाध्वयंपापःसामात्यइतिदुर्मतिः १८ पुत्रस्नेहाभिभू
तस्तुहितमुक्तोमनीषिभिः विदुरेणाथभीष्मेणद्रोणेनचकृपेणच १९ पदेपदेभगवताव्यासेनचमहात्मना संजयेनाथगांधार्यात
दिदंतप्यतेचमां २० यच्चाहंपांडुपुत्रेषुगुणवत्सुमहात्मसु नदत्तवान्श्रियंदीप्तांपितृपैतामहीमिमां २१ विनाशंपश्यमानोहिसर्वरा
ज्ञांगदाग्रजः एतच्छ्रेयस्तुपरममममन्यतजनार्दनः २२ सोहमेतान्यलीकानिनिवृत्तान्यात्मनस्तदा हृदयेशल्यभूतानिधारयामिसहस्र
शः २३ विशेषतस्तुपश्यामिवर्षेपंचदशेद्यवै अस्यपापस्यशुध्यर्थंनियतोस्मिसुदुर्मतिः २४ चतुर्थेनियतेकालेकदाचिदपिचाष्टमे
तृष्णाविनयनंभुंजेगांधारीवेदतन्मम २५ करोत्याहारमितिमांसर्वःपरिजनःसदा युधिष्ठिरभयाद्वेत्तिभृशंतप्यतिपांडवः २६
भूमौशयेजप्यपरोदर्भेष्वजिनसंवृतः नियमव्यपदेशेनगांधारीचयशस्विनी २७ हतंशतंतुपुत्राणांययोर्युद्धेपलायिनां नानुतप्या
मितच्चाहंक्षत्रधर्मंहिमेविदुः २८ इत्युक्त्वाधर्मराजानमभ्यभाषतकौरवः भद्रंतेयादवीमातर्वचश्चेदंनिबोधमे २९ सुखमस्म्युषि
तःपुत्रत्वयासुपरिपालितः महादानानिदत्तानिश्राद्धानिचपुनःपुनः ३० प्रकृष्टंचमयापुत्रपुण्यंचीर्णंयथाबलं गांधारीहतपुत्रेयंधैर्ये
णोदीक्षतेचमां ३१ द्रौपद्याह्यपकर्तारस्तवचैश्वर्यहारिणः समतीतानृशंसास्तेस्वधर्मेणहतायुधि ३२ नतेषुप्रतिकर्तव्यंपश्यामि
कुरुनंदन सर्वेशस्त्रकृतान्लोकान्गतास्तेभिमुखंहताः ३३ आत्मनस्तुहितंपुण्यंप्रतिकर्तव्यमद्यवै गांधार्याश्चैवराजेंद्रतदनुज्ञातुमर्ह
सि ३४ त्वंतुधर्मभृतांश्रेष्ठःसततंधर्मवत्सलः राजागुरुःप्राणभृतांतस्मादेतद्ब्रवीम्यहं ३५ अनुज्ञातस्त्वयावीरसंश्रयेयंवनान्यहं
चीरवल्कलभृद्राजन्गांधार्यासहितोनया ३६ तवाशिषःप्रयुंजानोभविष्यामिवनेचरः उचितंनःकुलेतातसर्वेषांभरतर्षभ ३७

३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५०

पुत्रेष्वैश्वर्यमाधायवयसोंतेवनंनृप तत्राहंवायुभक्षोवानिराहारोपिवावसन् ३८ पत्न्यासहानयावीरचरिष्यामितपःपरं त्वंचापिफलभा
क्तातनपसःपार्थिवोह्यसि फलभाजोहिराजानःकल्याणस्येतरस्यवा ३९ युधिष्ठिरउवाच नमांप्रीणयतेराज्यंत्वय्येवंदुःखितेनृप
धिङ्मामस्तुसुदुर्बुद्धिंराज्यसक्तंप्रमादिनं ४० योहंभवंतंदुःखार्त्तमुपवासकृशंभृशं जिताहारंक्षितिशयंनविंदेभ्रातृभिःसह ४१
अहोस्मिवंचितोमूढोभवतागूढबुद्धिना विश्वासयित्वापूर्वंमांयदिदंदुःखमश्नुथाः ४२ किंमेराज्येनभोगैर्वाकिंयज्ञैःकिंसुखेनवा य
स्यमेत्वंमहीपालदुःखान्येतान्यवाप्तवान् ४३ पीडितंचापिजानामिराज्यमात्मानमेवच अनेनवचसातुभ्यंदुःखितस्यजनेश्वर ४४
भवान्पिताभवान्माताभवान्नःपरमोगुरुः भवताविप्रहीनाहिक्वनुतिष्ठामहेवयं ४५ औरसोभवतःपुत्रोयुयुत्सुर्नृपसत्तम अस्त्वा
जामहाराजयमन्यंमन्यसेभवान् ४६ अहंवनंगमिष्यामिभवान्राज्यंप्रशासतु नमामयशसादग्धंभूयस्त्वंदग्धुमर्हसि ४७ नाहंराजाभवान्
राजाभवतःपरवानहं कथंगुरुंत्वांधर्मज्ञमनुज्ञातुमिहोत्सहे ४८ नमन्युर्हृदिनःकश्चित्सुयोधनकृतेनघ भावितव्यंतथातद्धिवयंचान्ये
चमोहिताः ४९ वयंपुत्राहिभवतोयथादुर्योधनादयः गांधारीचैवकुंतीचनिर्विशेषामतिर्मम ५० समांत्वंयदिराजेंद्रपरित्यज्यगमि
ष्यसिपृष्ठतस्त्वानुयास्यामिसत्यमात्मानमालभे ५१ इयंहिवसुसंपूर्णामहीसागरमेखला भवताविप्रहीणास्यनमेप्रीतिकरीभवेत् ५२
भवदीयमिदंसर्वंशिरसात्वांप्रसादये त्वदधीनाःस्मराजेंद्रव्येतुतेमानसोज्वरः ५३ भवितव्यमनुप्राप्तोमन्येत्वंवसुधाधिप दिष्ट्याशुश्रूष-
माणस्त्वांमोक्षिष्येमनसोज्वरं ५४ धृतराष्ट्रउवाच तापस्येमेमनस्तातवर्त्ततेकुरुनंदन उचितंचकुलेस्माकमरण्यगमनंप्रभो ५५ चि
रमस्म्युषितःपुत्रचिरंशुश्रूषितस्त्वया वृद्धंमामप्यनुज्ञातुमर्हसित्वंनराधिप ५६ वैशंपायनउवाच इत्युक्त्वाधर्मराजानंवेपमानःकृतांजलिं
उवाचवचनंराजाधृतराष्ट्रोंबिकासुतः ५७ संजयंचमहात्मानंकृपंचापिमहारथं अनुनेतुमिहेच्छामिभवद्भिर्वसुधाधिपं ५८ ग्लायतेमे
मनोहीदंमुखंचपरिशुष्यति वयसाचप्रकृष्टेनवाग्व्यायामेनचैवह ५९ इत्युक्त्वासतुधर्मात्मावृद्धोराजाकुरूद्वहः गांधारींशिश्रियेधीमा
न्सहसैवगतासुवत् ६० तंतुदृष्ट्वासमासीनंविसंज्ञमिवकौरवं आर्त्तिंराजागमत्तीव्रांकौंतेयःपरवीरहा ६१ युधिष्ठिरउवाच
यस्यनागसहस्रेणशतसंख्येनवैबलं सोयंनारीव्यपाश्रित्यशेतेराजागतासुवत् ६२ ५ ५ ५ ५ ५

५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२

६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७

आयसीप्रतिमायेनभीमसेनस्यसापुरा चूर्णीकृत्वाबलवतासोबलामाश्रितःस्त्रियं ६३ धिगस्तुमामधर्मज्ञंधिग्बुद्धिंधिक्चमेश्रुतं य
त्कृतेपृथिवीपालःशेतेयमतथोचितः ६४ अहमप्युपवत्स्यामियथैवायंगुरुर्मम यदिराजानभुंक्तेयंगांधारीचयशस्विनी ६५ वैशं
पायनउवाच ततोस्यपाणिनाराजन्जलशीतेनपांडवः उरोमुखंचशनकैःपर्यमार्जतधर्मवित् ६६ तेनरत्नौषधिमतापुण्येनचसुगंधि
ना पाणिस्पर्शेनराज्ञःसराजासंज्ञामवापह ६७ धृतराष्ट्रउवाच स्पृशमांपाणिनाभूयःपरिष्वजचपांडव जीवामीवातिसंस्पर्शा
त्तवराजीवलोचन ६८ मूर्द्धानंचतवाघ्रातुमिच्छामिमनुजाधिप पाणिभ्यांचपरिस्प्रष्टुंप्रीणनंहिमहन्मम ६९ अष्टमोह्यद्यका
लोयमाहारस्यकृतस्यमे येनाहंकुरुशार्दूलशक्तोमिनविचेष्टितुं ७० व्यायामश्चायमत्यर्थंकृतस्त्वामभियाचता ततोग्लानमना
स्तातनष्टसंज्ञइवाभवं ७१ तवामृतरसप्रख्यंहस्तस्पर्शमिमंप्रभो लब्ध्वासंजीवितोस्मीतिमन्येकुरुकुलोद्वह ७२ वैशंपायनउवा
चएवमुक्तस्तुकौंतेयःपित्राज्येष्ठेनभारत पस्पर्शसर्वगात्रेषुसौहार्दात्तंशनैस्तदा ७३ उपलभ्यततःप्राणान्धृतराष्ट्रोमहीपतिः बाहुभ्यां
संपरिष्वज्यमूर्ध्न्याजिघ्रतपांडवं ७४ विदुरादयश्चतेसर्वेरुरुदुर्दुःखिताभृशं अतिदुःखात्तुराजानंनोचुःकिंचनपांडवं ७५ गांधा
रीत्वेवधर्मज्ञामनसोद्वहतीभृशं दुःखान्यधारयद्राजन्मैवमित्येवचाब्रवीत् ७६ इतरास्तुस्त्रियःसर्वाःकुंत्यासहसुदुःखिताः नेत्रै
रागतविक्लेदैःपरिवार्यस्थिताभवन् ७७ अथाब्रवीत्पुनर्वाक्यंधृतराष्ट्रोयुधिष्ठिरं अनुजानीहिमांराजंस्तापस्येभरतर्षभ ७८ ग्ला
यतेमेमनस्तातभूयोभूयःप्रजल्पतः नमामतःपरंपुत्रपरिक्लेष्टुमिहार्हसि ७९ तस्मिंस्तुकौरवेंद्रेतंतथाब्रुवतिपांडवं सर्वेषाम
वरोधानामार्त्तनादोभवन्महान् ८० दृष्ट्वाकृशंविवर्णंचराजानमतथोचितं उपवासपरिश्रांतंत्वगस्थिपरिवारणं ८१ धर्मपुत्रः
स्वपितरंपरिष्वज्यमहाप्रभुं शोकजंबाष्पमुत्सृज्यपुनर्वचनमब्रवीत् ८२ नकामयेनरश्रेष्ठजीवितंपृथिवींतथा यथातवप्रियंराज
न्चिकीर्षामिपरंतप ८३ यदिचाहंमनुष्येषुभवतोदयितोपिवा क्रियतांतावदाहारस्ततोवेत्स्याम्यहंपरं ८४ ततोब्रवीन्महातेजा
धृतराष्ट्रोयुधिष्ठिरं अनुज्ञातस्त्वयापुत्रभुंजीयामितिकामये ८५ इतिब्रुवतिराजेंद्रेधृतराष्ट्रेयुधिष्ठिरं ऋषिःसत्यवतीपुत्रोव्यासो
भ्येत्यवचोब्रवीत् ८६ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांआश्रमवासिकेपर्वणितृतीयोध्यायः ३ ६१, ७,

७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकपर्वणिटीकायांतृतीयोध्यायः ३

युधिष्ठिरेति १ २ ३ ४ ५ ६ ७ अहमिति पौत्रोपि आत्मावैपुत्रनामासीतिपुत्राभिन्नत्वात्पुत्रएवाहंतेनत्वंतुमेममपितागुरुश्च ८ ९ परंम

व्यासउवाच युधिष्ठिरमहाबाहोयथाहकुरुनंदन धृतराष्ट्रोमहातेजास्तत्कुरुष्वाविचारयन् १ अयंहिवृद्धोनृपतिर्हतपुत्रोविशेषतः ने
दंकृच्छ्रंचिरंसोढुंसमुत्सहेदितिमतिर्मम २ गांधारीचमहाभागाप्राज्ञाकरुणवेदिनी पुत्रशोकंमहाराजधैर्येणोद्वहतेभृशं ३ अहमप्येतदे
वत्वांब्रवीमिकुरुमेवचः अनुज्ञांलभतांराजामावृथेहमरिष्यति ४ राजर्षीणांपुराणानामनुयातुगतिंनृपः राजर्षीणांनसर्वेषामंतेवन
मुपाश्रयः ५ वैशंपायनउवाच इत्युक्तःसतदाराजाव्यासेनाद्भुतकर्मणा प्रत्युवाचमहातेजाधर्मराजोमहामुनिं ६ भगवानेवनोमान्यो
भगवानेवनोगुरुः भगवानस्यराज्यस्यकुलस्यचपरायणं ७ अहंतुपुत्रोभगवान्पितासराजागुरुश्चमे निदेशवर्त्तीचपितुःपुत्रोभवतिध
र्मतः ८ वैशंपायनउवाच इत्युक्तःसतुतंप्राहव्यासोवेदविदांवरः युधिष्ठिरंमहातेजाःपुनरेवमहाकविः ९ एवमेतन्महाबाहोयथावद
सिभारत राजायंवृद्धतांप्राप्तःप्रमाणेपरमेस्थितः १० सोयंमयाभ्यनुज्ञातस्त्वयाचपृथिवीपतिः करोतुस्वमभिप्रायंमास्यविघ्नकरो
भव ११ एषएवपरोधर्मोराजर्षीणांयुधिष्ठिर समरेवाभवेन्मृत्युर्वनेवाविधिपूर्वकं १२ पित्रातुतवराजेंद्रपांडुनापृथिवीक्षिता शिष्य
वृत्तेनराजायंगुरुवत्पर्युपासितः १३ क्रतुभिर्दक्षिणावद्भिरत्नपर्वतशोभितैः भवद्भिरिष्टंगौर्भुक्ताप्रजाश्चपरिपालिताः १४ पुत्रसंस्थंच
विपुलंराज्यंविप्रोषितेत्वयि त्रयोदशसमाभुक्तंदत्तंचाविविधंवसु १५ त्वयाचायंनरव्याघ्रगुरुशुश्रूषयानघ आराधितःसभृत्येनगां
धारीचयशस्विनी १६ अनुजानीहिपितरंसमयोस्यतपोविधौ नमृत्युर्विद्यतेचास्यसुसूक्ष्मापियुधिष्ठिर १७ वैशंपायनउवाच ए
तावदुक्त्वावचनमनुमान्यचपार्थिवं तथास्त्वितिचतेनोक्तःकौंतेयेनययौवनं १८ गतेभगवतिव्यासेराजापांडुसुतस्तदा प्रोवाचपित
रंवृद्धंमंदंमंदमिवाननतः १९ यदाहभगवान्व्यासोयच्चापिभवतोमतं यथाहचमहेष्वासःकृपोविदुरएवच २० युयुत्सुःसंजयश्चैवत
त्कर्तास्म्यहमंजसा सर्वएवहिमान्यामेकुलस्यास्यहितैषिणः २१ इदंतुयाचेनृपतेत्वामहंशिरसाननतः क्रियतांतावदाहारस्ततो
गच्छाश्रमंप्रति २२ इत्याश्रमवासिकेपर्वणिचतुर्थोऽध्यायः ४ वैशंपायनउवाच ततोराजाभ्यनुज्ञातोधृतराष्ट्रःप्रतापवान् य
यौस्वभवनंराजागांधार्यानुगतस्तदा १ मंदप्राणगतिर्धीमान्कृच्छ्रादिवसमुद्वहन् पदानिसमहीपालोजीर्णोगजपतिर्यथा २
तमन्वगच्छद्विदुरोविद्वान्सूतश्चसंजयः सचापिपरमेष्वासःकृपःशारद्वतस्तथा ३

प्रमाणेउषनिपन्मते १० ११ १२ १३ १४ १५ १६ समयोविधौतपःकरणे १७ १८ १९ २० २१ २२ इ॰टी॰-चतुर्थोऽध्यायः ४ १ २ ३

४ ५ ६ ७ अष्टांगेस्वाम्यमात्यादियुते ८ ९ १० ११ १२ १३ कर्मसुशुचीन् जन्मनाचपुण्यान्अमात्यान्चारयेथाइत्युत्तरेणान्वयः १४ १५
अट्टःदुर्गोपरिभागःस्थानानिषट्पदंषड्भिःपदैः पदनीयैःस्थानैः युक्तंतेनसप्राकारमितिगम्यतेतत्रसप्तमस्थानंः पुरत्वाततन्मध्येदेवान्येषांस्थानानि १६ १७ १८ १९

संप्रविश्यगृहंराजन्कृतपूर्वाह्णिकक्रियः तर्पयित्वाद्विजश्रेष्ठानाहारमकरोत्तदा ४ गांधारीचैवधर्मज्ञाकुंत्यासहमनस्विनी वधूभिरुपचारेण पूजिताभुक्तभारत ५ कृताहारंकृताहाराःसर्वेतेविदुरादयः पांडवाश्चकुरुश्रेष्ठमुपातिष्ठंततंनृपं ६ ततोब्रवीन्महाराजकुंतीपुत्रमुपह्वरे नि षण्णंपाणिनापृष्ठेसंस्पृशन्नंबिकासुतः ७ अप्रमादस्त्वयाकार्यःसर्वथाकुरुनंदन अष्टांगेराजशार्दूलराज्येधर्मपुरस्कृते ८ तत्तुशक्यंमहारा जरक्षितुंपांडुनंदन राज्यंधर्मेणकौंतेयविद्वानसिनिबोधतत् ९ विद्यावृद्धान्सदैवत्वमुपासीथायुधिष्ठिर शृणुयास्तेचयद्ब्रूयुःकुर्याश्चैवाविचा रयन् १० प्रातरुत्थायतान्राजन्पूजयित्वायथाविधि कृत्यकालेसमुत्पन्नेपृच्छेथाःकार्यमात्मनः ११ तेतुसंमानितारांजस्त्वयाकार्यहितार्थिना प्रवक्ष्यंतिहितंतातसर्वथातवभारत १२ इंद्रियाणिचसर्वाणिवाजिवत्परिपालयेः हितायवस्तेभविष्यंतिरक्षितंद्रविणंयथा १३ अमात्यानुपधा तीतान्पितृपैतामहान्शुचीन् दांतान्कर्मसुपुण्यांश्चपुण्यान्सर्वेषुयोजयेः १४ चारयेथाश्चसततंचारैरविदितैःपरैः परीक्षितैर्बहुविधैः स्वराष्ट्रप्रतिवासिभिः १५ पुरंचतेसुगुप्तंस्याद्दृढप्राकारतोरणं अट्टाट्टालकसंबाधंषट्पदंसर्वतोदिशं १६ तस्यद्वाराणिसर्वाणिपर्याप्ता निबृहंतिच सर्वतःसुविभक्तानियंत्रैरारक्षितानिच १७ पुरुषैरलमर्थज्ञैर्विदितैःकुलशीलतः आत्माचरक्ष्यःसततंभोजनादिषुभारत १८ विहाराहारकालेषुमाल्यशय्यासनेषुच स्त्रियश्चतेसुगुप्ताःस्युर्वृद्धैराप्तैरधिष्ठिताः १९ शीलवद्भिःकुलीनैश्चविद्वद्भिश्चयुधिष्ठिर मंत्रिणश्चैवकुर्वी थाद्विजान्विद्याविशारदान् २० विनीतांश्चकुलीनांश्चधर्मार्थकुशलानृजून् तैःसार्धंमंत्रयेथास्त्वंनात्यर्थंबहुभिःसह २१ समस्तैरपिचव्य स्तैर्व्यपदेशेनकेनचित् सुसंवृतंमंत्रगृहंस्थलंचारुह्यमंत्रयेः २२ अरण्येनिःशलाकेवानचरात्रौकथंचन वानराःपक्षिणश्चैवयेमनुष्यानु सारिणः २३ सर्वेमंत्रगृहेवर्ज्यायेचापिजडपंगवः मंत्रभेदेहियेदोषाभवंतिपृथिवीक्षितां २४ नतेशक्याःसमाधातुंकर्हिचिदितिमेमतिः दोषांश्चमंत्रभेदस्यब्रूयास्त्वंमंत्रिमंडले २५ अभेदेचगुणाराजन्पुनःपुनररिंदम पौरजानपदानांचशौचाशौचंयुधिष्ठिर २६ यथास्या द्विदितंराजंस्तथाकार्यंकुरूद्वह व्यवहारश्चतेतातनित्यमाप्तैरधिष्ठितः परिमाणविदिताश्चदंडदंड्येषुभारत २७ प्रणयेयुर्यथान्यायंपुरु षास्तेयुधिष्ठिर आदानरुचयश्चैवपरदारावमर्षिणः २८ उग्रदंडप्रधानाश्चमिथ्याव्याहारिणस्तथा आक्रोष्टारश्चलुब्धाश्चहर्तारःसाहस प्रियाः २९ सभाविहारभेत्तारोवर्णानांचप्रदूषकाः हिरण्यदंड्यावध्याश्चकर्तव्यादेशकालतः ३०

२० २१ २२ निःशलाके अतृणेत्यासन्नःपरिवारेज्ञातुमशक्यइति २३ २४ २५ २६ परिमाणंदंड्यधनस्यापराधस्यच २७ अदानरुचयः उत्कोचरुचीनां नश्चौरादयः २८ २९ हिरण्यदंड्यं अवध्याःपूर्वोक्ताःसर्वेदेशकालानुरोधेनदंड्याःवध्याः श्चेतिनयः ३०

३१ प्रदोषेरजनीमुखेदूतानांदर्शनकालः तेभ्यःश्रुतानामर्थानांनिर्णयेअपररात्रांतःचराअपिआहारमात्रवेतनाःनिर्दिष्टगृहीतानामप्याहारमात्रंदेयमित्यर्थः ३२ ३३
३४ ३५ ३६ ३७३८ ३९व्यवहारिणःकारुशिल्पिप्रभृतयः ४० ४१ ४२ ४३ इतिश्रीनैलकंठीये आश्रमवासिके भारतभावदीपेटीकायांपंचमोऽध्यायः ५ ६५

प्रातरेवहिपश्येथायेकुर्युर्व्ययकर्मते अलंकारमथोभोज्यमतऊर्ध्वंसमाचरेः ३१ पश्येथाश्चततोयोधान्सदात्वंप्रतिहर्षयन् दूतानांचचराणां
चप्रदोषस्तेसदाभवेत् ३२ सदाचापररात्रंतेभवेत्कार्यार्थनिर्णयः मध्यरात्रेविहारस्तेमध्याह्नेचसदाभवेत् ३३ सर्वेत्वौपयिकाःकालाः
कार्याणांभरतर्षभ तथैवालंकृतःकालेतिष्ठेथाभूरिदक्षिण ३४ चक्रवत्तातकार्याणांपर्यायोदृश्यतेसदा. कोशस्यनिचयेयत्नंकुर्वीथा
न्यायतःसदा ३५ विविधस्यमहाराजविपरीतंविवर्जयेः चारैर्विदित्वाशत्रूंश्चयेराज्ञामंतरैषिणः ३६ तानाप्तैःपुरुषैर्दूराद्घातयेथानरा
धिपकर्मदृष्ट्वाथभृत्यांस्त्वंवरयेथाःकुरूद्वह ३७ कारयेथाश्चकर्माणियुक्तायुक्तैरधिष्ठितैः सेनाप्रणेताचभवेत्तवतातदृढव्रतः ३८
शूरःक्लेशसहश्चैवहितोभक्तश्चपूरुषः सर्वेजनपदाश्चैवतवकर्माणिपांडव ३९ गोवद्रासभवच्चैवकुर्युर्येव्यवहारिणः स्वरंध्रंपररंध्रंस्वेषुचैवपरेषु
च ४० उपलक्षयितव्यंतेनित्यमेवयुधिष्ठिर देशजाश्चैवपुरुषाविक्रांताःस्वेषुकर्मसु ४१ यात्राभिरनुरूपाभिरनुग्राह्याहितास्त्वया
गुणार्थिनांगुणःकार्योविदुषावैजनाधिप ४२ अविचाल्याश्चतेतेस्युरचलाइवनित्यशः ४३ इत्याश्रमवासिकेपर्वणिपंचमोऽध्यायः५ धृत
राष्ट्रउवाच मंडलानिचबुध्येथाःपरेषामात्मनस्तथा उदासीनगणानांचमध्यस्थानांचभारत १ चतुर्णांशत्रुजातानांसर्वेषामाततायिनां
मित्रंचामित्रमित्रंचबोद्धव्यंतेरिकर्शन २ तथामात्याजनपदादुर्गाणिविविधानिच बलानिचकुरुश्रेष्ठ भवंत्येषांयथेच्छकं ३ तेचद्वादश
कौंतेयराज्ञांवैविषयात्मकाः मंत्रिप्रधानाश्चगुणाःषष्टिर्द्वादशचप्रभो ४ एतन्मंडलमित्याहुराचार्यानीतिकोविदाः तत्रषाड्गुण्यमायत्तंयु
धिष्ठिरनिबोधतत् ५ वृद्धिक्षयौचविज्ञेयौस्थानंचकुरुसत्तम द्विसप्तत्यांमहाबाहोततःषाड्गुण्यजागुणाः ६ यदास्वपक्षोबलवान्पर
पक्षस्तथाबलः विगृह्यशत्रून्कौंतेयजेयःक्षितिपतिस्तदा ७ यदापरेतुबलिनःस्वपक्षश्चैवदुर्बलः सार्धंविद्वांस्तदाक्षीणःपरैःसंधिंसमाश्रये
त ८ द्रव्याणांसंचयश्चैवकर्तव्यःस्यान्महांस्तथा यदासमर्थोयानायनचिरेणेवभारत ९ तदासर्वंविधेयंस्यात्स्थानेनसविचारयेत् भूमिर
ल्पफलादेयाविपरीतस्यभारत १० हिरण्यंकुप्यभूयिष्ठंमित्रंक्षीणमथोबलं विपरीतान्निगृह्णीयान्स्वयंसंधिविशारदः ११ संध्यर्थं
राजपुत्रंवालिप्सेथाभरतर्षभ विपरीतंनतच्छ्रेयःपुत्रकस्यांचिदापदि १२

मंडलानिअरिमित्रमित्यादीनि उदासीनादन्यःमध्यमोद्वयोरपिइच्छाक्षी ५
क्षीचतुर्णांशत्रुपक्षजातानांशत्रुमित्राणांउभयोर्जयीपरायीच १ २ यथेच्छकंपरैर्भेद्यत्वाभेद्यत्वंचभवतितस्मादवहितस्तिष्ठेतयथाभेदोनभवेदितिः ४ ५ ६ ७
८ ९ १० ११ संध्यर्थमिति यःसंधिंकरोतितस्यपुत्रंविश्वासार्थंस्वनिकटेस्थापयेदित्यर्थःतदकरणेमहदापदायाति कदाचित् १२ ६५ ६६

तस्यामप्यागतायां प्रमोक्षेन तरिह्वारे यत्नोपि कर्तव्यः दीनान् अधबधिरादीन् भावयन् पूजयत १३ युगपद्वा तदिनशः १४ १५ ...
१६ १७ एनंत्वां १८।१९ असंभवे उपायातस्य मुख्येनैव शरीरेणैव युद्धाय निष्पतेत् निष्टेनापशरीरमोक्षणं मुक्तिः शरीरस्यस्यादित्यर्थः

तस्य प्रमोक्षे यत्नंच कुर्यात् सोपायमंत्रवित् प्रकृतीनांच राजेंद्र राजा दीनान्विभावयेत् १३ क्रमेण युगपत्सर्वं व्यवसायं महाबलः पीडनं स्तंभनं चैव कोषभंगस्तथैव च १४ कार्यं यत्नेन शत्रूणां स्वराज्यं रक्षितास्वयं नचहिंस्योऽभ्युपगतः सामंतो वृद्धिमिच्छता १५ कौंतेय तंन हिंसेत यो महीं विजिगीषते गणानां भेदने योगं गच्छेथाः सहमंत्रिभिः १६ साधुसंग्रहणाच्चैव पापनिग्रहणात्तथा दुर्बलाश्चापि सततं नावेष्टव्या बलीयसा १७ तिष्ठेथा राजशार्दूल वैतसीं वृत्तिमास्थितः यद्येनमभियायाच्च बलवान्दुर्बलं नृपः १८ सामादिभिरुपायैस्तं क्रमेण विनिवर्तयेः अशक्नुवंश्च युद्धाय निष्पतेत्सह मंत्रिभिः १९ कोशेन पौरैर्दंडेन ये चान्ये प्रियकारिणः असंभवे तु सर्वस्य यथामुख्येन निष्पतेत् क्रमेणानेन मुक्तिः स्याच्छरीरमपि केवलं २० इति श्री आश्रमवासिके षष्ठोऽध्यायः ६ धृतराष्ट्र उवाच संधिविग्रहमप्यत्र पश्येथा राजसत्तम द्वयोनिं त्रिविधोपायं बहुकल्पं युधिष्ठिर १ राजेंद्र पर्युपासीथास्थित्वा द्वैविध्यमात्मनः तुष्टपुष्टबलः शत्रुरात्मवानिति च स्मरेत् २ पर्युपासनकालेतु विपरीतं विधीयते आमर्दकालेराजेंद्र व्यपसर्पस्ततः परं ३ व्यसनं भेदनंचैव शत्रूणां कारयेत्ततः कर्षणं भीषणंचैव युद्धेचैव बलक्षयं ४ प्रयास्यमानो नृपतिस्त्रिविधां परिचिंतयेत् आत्मनश्चैव शत्रोश्च शक्तिं शास्त्रविशारदः ५ उत्साहप्रभुशक्तिभ्यां मंत्रशक्त्या च भारत उपपन्नो नृपो यायाद्विपरीतं च वर्जयेत् ६ आददीत बलं राजा मौलं मित्रबलं तथा अटवीबलं भृतं चैव तथा श्रेणीबलं प्रभो ७ तत्र मित्रबलं राजन्मौलं चैव विशिष्यते श्रेणीबलं भृतं चैव तुल्ये एवेति मे मतिः ८ तथा चारबलं चैव परस्परसमं नृप विज्ञेयं बहुकालेषु राज्ञा काल उपस्थिते ९ आपदश्चापि बोद्धव्या बहुरूपा नराधिप भवंति राज्ञां कौरव्य यास्ताः पृथग्गतः शृणु १० विकल्पा बहुधा राजन्नापदां पांडुनंदन सामादिभिरुपन्यस्य गणयेत्तान्नृपः सदा ११ यात्रां गच्छेद्बलैर्युक्तो राजा सद्भिः परंतप युक्तश्च देशकालाभ्यां बलैरात्मगुणैस्तथा १२ हृष्टपुष्टबलो गच्छेद्राजा वृद्ध्युदये रतः अकृशश्चाप्ययो यायादनृतावपि पांडव १३ तूणाश्मानं वाजिरथप्रवाहां ध्वजद्रुमैः संवृतकूलरोधसं पदातिनागैर्बहुकर्दमां नदीं सपत्ननाशे नृपतिः प्रयोजयेत् १४ अथोपपत्त्या शकटं पद्मं वज्रं च भारत उशना वेद यच्छास्त्रं तत्रैतद्विहितं विभो १५ ७

संधिः प्रबलप्रतियोगिके दुर्बलप्रतियोगिके विग्रहः द्वैविध्यमिति द्वियोनिं संधिविग्रहौ २ स्थित्वा म्रियो राभूत्वा द्वैविध्यं बलाबलं ज्ञात्वा शत्रुं पर्युपासीतेति भावः स्मरेत् जयोपायं विचारयेत् २ विपरीतं अपुष्टबलः प्रयायादित्यर्थः ३ अरेः दिव्यक्तानिष्प्रयपतित्यसनमिति ४ त्रिविध शक्तिं ५ तामेवाहोत्साहेति ६ मौलं धनबलं ७ ८ ९ १० विकल्पाः इति प्रभृतयः तानन्यस्य गणयेत
ननु गोपयितामसत्कृत् ११ १२ अनृतौ अकाले पि शिशिरादौ १३ १४ शकटादयो व्यूहविशेषाः १५ ७

धारयित्वापरबलेकृत्वासबलदर्शनं स्वभूमौयोजयेद्युद्धंपरभूमौतथैवच १६ बलंप्रसादयेद्राजानिक्षिपेत्बलिनोनरान् ज्ञात्वास्वविष
यंतत्रसामादिभिरुपक्रमेत् १७ सर्वथैवमहाराजशरीरंधारयेदिह प्रेत्यचेहचकर्तव्यमात्मनिश्रेयसंपरं १८ एवमेतन्महाराजराजासम्य
कसमाचरन् प्रेत्यस्वर्गमवाप्नोतिप्रजाधर्मेणपालयन् १९ एवंत्वयाकुरुश्रेष्ठवर्तितव्यंप्रजाहितं उभयोर्लोकयोस्तातप्राप्तयेनित्य
मेवहि २० भीष्मेणसर्वमुक्तोसिकृष्णेनविदुरेणच ममाप्यवश्यंवक्तव्यंप्रीत्यातेनृपसत्तम २१ एतत्सर्वंयथान्यायंकुर्वीयाभूरिदक्षि
ण प्रियस्तथाप्रजानांत्वंस्वर्गेसुखमवाप्स्यसि २२ अश्वमेधसहस्रेणयोजयेत्पार्थिवोपतिः पालयेद्वापिधर्मेणप्रजासम्यक्फलंभ
भवेत् २३ इतिश्रीआश्रमवासिकेपर्वणिसप्तमोऽध्यायः ७ युधिष्ठिरउवाच एवमेतत्करिष्यामियथात्थपृथिवीपते भूयश्चैवानुशा
स्योहंभवतापार्थिवर्षभ १ भीष्मेस्वर्गमनुप्राप्तेगतेचमधुसूदने विदुरेसंजयेचैवकोन्योमांवक्तुमर्हति २ यत्तुमामनुशास्तीहभ
वान्ध्यहितेस्थितः कर्तास्मितन्महीपालनिर्वृतोभवपार्थिव ३ वैशंपायनउवाच एवमुक्तःसराजर्षिर्धर्मराजेनधीमता कौंतेयंसम
नुज्ञातुमियेषभरतर्षभ ४ पुत्रसंशाम्यतांतावन्ममापिबलवान्श्रमः इत्युक्त्वाप्राविशद्राजागांधार्याभवनंतदा ५ तमासनगतंदे
वीगांधारीधर्मचारिणी उवाचकालेकालज्ञाप्रजापतिसमंपतिं ६ अनुज्ञातःस्वयंतेनव्यासेनत्वंमहर्षिणा युधिष्ठिरस्यानुमतेक
दारण्यंगमिष्यसि ७ धृतराष्ट्रउवाच गांधार्यहमनुज्ञातःस्वयंपित्रामहात्मना युधिष्ठिरस्यानुमतेगंतास्मिनचिराद्वनं ८ अहंहिता
वत्सर्वेषांतेषांदुर्धूतदेविनां पुत्राणांदातुमिच्छामिप्रेतभावानुगंवसु सर्वप्रकृतिसांनिध्यंकारयित्वास्ववेश्मनि ९ वैशंपायनउवाच
इत्युक्त्वाधर्मराजायप्रेषयामाससवैतदा सचतद्वचनात्सर्वंसमानिन्येमहीपतिः १० ततःप्रतीतमनसोब्राह्मणाःकुरुजांगलाः क्ष
त्रियाश्चैववैश्याश्चशूद्राश्चैवसमाययुः ११ ततोनिष्क्रम्यनृपतिस्तस्मादंतःपुरात्तदा ददृशेतंजनंसर्वंसर्वाश्चप्रकृतीस्तथा १२
समवेतांश्चतान्सर्वान्पौरान्जानपदांस्तथा तानागतानभिप्रेक्ष्यसमस्तांश्चसुहृज्जनं १३ ब्राह्मणांश्चमहीपालनानादेशसमागता
न् उवाचमतिमान्राजाधृतराष्ट्रोविशांपते १४ भवंतःकुरवश्चैवचिरकालंसहोषिताः परस्परस्यसुहृदःपरस्परहितेरताः १५
यदिदानीमहंब्रूयामस्मिन्कालउपस्थिते तथाभवद्भिःकर्तव्यमविचार्यवचोमम १६ ७ ७ ७ ७ ७

१७ १८ १९ २० २१ २२ २३ इतिश्रीनैलकंठीये भारतभावदीपे आश्रमवासिकेपर्वणि टीकायां अष्टमोऽध्यायः ८ १ २ ३ ४

अरण्यगमनेबुद्धिर्गांधारीसहितस्यमे व्यासस्यानुमतेराजंस्तथाकुंतीसुतस्यमे १७ भवंतोप्यनु जानंतुमाचवोभूद्विचारणा अस्माकं
भवतांचैवयेयंप्रीतिर्हिशाश्वती १८ नचसान्येषुदेशेषुराज्ञामितिमतिर्मम श्रांतोस्मिवयसानेनतथापुत्रविनाकृतः १९ उपवासकृशोऽस्मि
गांधारीसहितोनघाः युधिष्ठिरगतेराज्येप्राप्तश्चास्मिसुखंमहत् २० मन्येदुर्योधनैश्वर्याद्विशिष्टमितिसत्तमाः ममचांधस्यवृद्धस्यहत
पुत्रस्यकागतिः २१ ऋतेवनंमहाभागास्तन्मानुज्ञातुमर्हथ तस्यतद्वचनंश्रुत्वासर्वेतेकुरुजांगलाः २२ बाष्पसंदिग्धयावाचारुरुदुर्भरत
र्षभ तानविब्रुवतःकिंचित्सर्वान्शोकपरायणान् पुनरेवमहातेजाधृतराष्ट्रोब्रवीदिदं २३ इतिआश्रमवासिकेपर्वणि अष्टमोऽध्यायः ८
धृतराष्ट्रउवाच शांतनुःपालयामासयथावद्वसुधामिमां तथाविचित्रवीर्यश्चभीष्मेणपरिपालितः १ तथापालयनस्तातोविदितार्थोनसंश
यः यथाचपांडुर्भ्रातामेदयितोभवतामभूत् २ सचापिपालयामासयथावत्तच्चवेत्थह मयाचभवतांसम्यक्शुश्रूषायाकृतानघाः ३ अ
सम्यग्वामहाभागाःक्षंतव्यमतंद्रितैः यदादुर्योधनेनेदंभुक्तंराज्यमकंटकं ४ अपितत्रनवोमंदोदुर्बुद्धिरपराद्धवान् तस्यापराधाद्
बुद्धेरभिमानान्महीक्षितां ५ विमर्दःसुमहानासीदनयात्स्वकृतादथ तन्मयासाधुवापीदंयदिवासाधुवैकृतं ६ तद्वोहृदिनकर्तव्यंमयाब
द्धोयमंजलिः वृद्धोयंहतपुत्रोयंदुःखितोयंनराधिपः ७ पूर्वराज्ञांचपुत्रोयमितिकृत्वानुजानथ इयंचकृपणावृद्धाहतपुत्रातपस्विनी ८
गांधारीपुत्रशोकार्तायुष्मान्याचतिवैमया हतपुत्राविमौवृद्धौविदित्वादुःखितौतथा ९ अनुजानीतभद्रंवोव्रजावःशरणंचवः अयंचकौरवो
राजाकुंतीपुत्रोयुधिष्ठिरः १० सर्वैर्भवद्भिर्द्रष्टव्यःसमेषुविषमेषुच नजातुविषमंचैवगमिष्यतिकदाचन ११ चत्वारःसचिवायस्यभ्रा
तरोविपुलौजसः लोकपालसमाह्येतेसर्वधर्मार्थदर्शिनः १२ ब्रह्मेवभगवानेष सर्वभूतजगत्पतिः युधिष्ठिरोमहातेजाभवतःपालयि
ष्यति १३ अवश्यमेववक्तव्यमितिकृत्वाब्रवीमिवः एषन्यासोमयादत्तःसर्वेषांवोयुधिष्ठिरः १४ भवंतोस्यचवीरस्यन्यासभूताःकृतामया
यद्येवंतैःकृतंकिंचिद्व्यलीकंवःसुतैर्मम १५ यदन्येनमदीयेनतदनुज्ञातुमर्हथ भवद्भिर्नहिमेमन्युःकृतपूर्वःकथंचन १६ अत्यंतगु
रुभक्तानामेषोंजलिरिदंनमः तेषामस्थिरबुद्धीनांलुब्धानांकामचारिणां १७ कृतेयाचेद्यवःसर्वान्गांधारीसहितोनघाः इत्युक्तास्ते
नतेसर्वेपौरजानपदाजनाः नोचुर्बाष्पकलाःकिंचिद्वीक्षांचक्रुःपरस्परं १८ इत्याश्रमवासिकेपर्वणिनवमोऽध्यायः ९ ७ ७

५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ इतिश्रीनैलकंठीये भारतभावदीपे आश्रमवासिकेपर्वणि टी॰ नवमोऽध्यायः ९

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

वैशंपायनउवाच एवमुक्तास्ततस्तेन पौरजानपदाजनाः वृद्धेनराज्ञाकौरव्यनष्टसंज्ञाइवाभवन् १ तूष्णीभूतांस्ततस्तांस्तुबाष्पकंठा
न्महीपतिः धृतराष्ट्रोमहीपालःपुनरेवाभ्यभाषत २ वृद्धंचहतपुत्रंचधर्मपत्न्यासहानया विलपंतंबहुविधंकृपणंचैवसत्तमाः ३
पित्रास्वयमनुज्ञातंकृष्णद्वैपायनेनवै वनवासायधर्मज्ञाधर्मज्ञेननृपेणह ४ सोहंपुनःपुनर्याचे शिरसावनतोनघाः गांधार्यासहितं
तन्मांसमनुज्ञातुमर्हथ ५ वैशंपायनउवाच तच्छ्रुत्वाकुरुराजस्यवाक्यानिकरुणानिते रुरुदुःसर्वशोराजन्समेताःकुरुजांगलाः ६
उत्तरीयैःकरैश्चापिसंछाद्यवदनानिते रुरुदुःशोकसंतप्तामुहूर्तंपितृमातृवत् ७ हृदयैःशून्यभूतैस्तेधृतराष्ट्रप्रवासजं दुःखंसंधार
यन्तोहिनष्टसंज्ञाइवाभवन् ८ तेविनीयतमायासंधृतराष्ट्रवियोगजं शनैःशनैस्तदान्योन्यमब्रुवन्स्वमतान्युत ९ ततःसंधायतेसर्वेवा
क्यान्यथसमासतः एकस्मिन्ब्राह्मणेराजन्निवेश्योचुर्नराधिप १० ततःस्वाचरणोविप्रःसंमतोर्थविशारदः शंबाख्योबह्वृचोराजन्वक्तुं
समुपचक्रमे ११ अनुमान्यमहाराजंतत्सदःसंप्रसाद्यच विप्रःप्रगल्भोमेधावीस राजानमुवाचह १२ राजन्वाक्यंजनस्यास्यम
यिसर्वंसमर्पितं वक्ष्यामितदहंवीरतज्जुषस्वनराधिप १३ यथावदसिराजेंद्रसर्वमेतत्तथाविभो नात्रमिथ्यावचःकिंचित्सुहृत्त्वंनः
परस्परं १४ नजात्वस्यतुवंशस्यराज्ञांकश्चित्कदाचन राजासीद्यःप्रजापालःप्रजानामप्रियोभवत् १५ पितृवद्भ्रातृवच्चैवभवंतः
पालयन्तिनः नचदुर्योधनःकिंचिदयुक्तंकृतवान्नृपः १६ यथाब्रवीतिधर्मात्मामुनिःसत्यवतीसुतः तथाकुरुमहाराजसहिनःप
रमोगुरुः त्यक्तावयंतुभवतादुःखशोकपरायणाः भविष्यामश्चिरंराजन्भवद्गुणशतैर्युताः १८ यथाशान्तनुनागुप्ताराज्ञाचित्रांगदे
नच भीष्मवीर्योपगूढेनपित्रातवचपार्थिव १९ भवद्बुद्धियुजाचैवपांडुनापृथिवीक्षिता तथादुर्योधनेनापिराज्ञासुपरिपालिताः
२० नस्वल्पमपिपुत्रस्तेव्यलीकंकृतवान्नृप पितरीवसुविश्वस्तास्तस्मिन्नपिनराधिप २१ वयमास्मयथासम्यक्भवतोविदितंतथा
तथावर्षसहस्राणिकुन्तीपुत्रेणधीमता २२ पाल्यमानाधृतिमतासुखंविन्दामहेनृप राजर्षीणांपुराणानांभवतांपुण्यकर्मणां २३
कुरुसंवरणादीनांभरतस्यचधीमतः वृत्तंसमनुयात्येषधर्मात्माभूरिदक्षिणः २४ नात्रवाच्यंमहाराजसुसूक्ष्ममपिविद्यते उषितास्मसु
खंनित्यंभवतापरिपालिताः सुसूक्ष्मंचव्यलीकंतेसपुत्रस्यनविद्यते यत्तुज्ञातिविमर्देस्मिन्नात्थदुर्योधनंप्रति २६ ७ ७

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ ७ ७ ७ ७ ७

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४

अतोतमहं नमन्यामि तन्नापि कुलनंदन ब्राह्मण उवाच न तद्दुर्योधनकृतं न च तद्भवता कृतं न कर्णसौबलाभ्यां वा कुरवो यत्क्षयं गताः २७ दैव
तत्तु विजानीमो यन्न शक्यं प्रबाधितुं दैवं पुरुषकारेण न शक्यमपि बाधितुं २८ अक्षौहिण्यो महाराज दशाष्टौ च समागताः अष्टादशाहेन हता
दशभिर्योधपुंगवैः २९ भीष्मद्रोणकृपाद्यैश्च कर्णेन च महात्मना युयुधानेन वीरेण धृष्टद्युम्नेन चैव ह ३० चतुर्भिः पांडुपुत्रैश्च भीमार्जु
नयमैस्तथा न च क्षयोयं नृपते ऋते दैवबलादभूत् ३१ अवश्यमेव संग्रामे क्षत्रियेण विशेषतः कर्तव्यं निधनं काले मर्तव्यं क्षत्रबंधुना ३२
तैरियं पुरुषव्याघ्रैर्विद्याबाहुबलान्वितैः पृथिवी निहता सर्वा सहया सरथद्विपा ३३ न स राजापराध्नोति पुत्रस्तव महात्मना न भवान्
न च ते भृत्या न कर्णो न च सौबलः ३४ यद्विनष्टाः कुरुश्रेष्ठा राजानश्च सहस्रशः सर्वं दैवकृतं विद्धि कोत्र किं वक्तुमर्हति ३५ गुरुर्मतो
भवानस्य कृत्स्नस्य जगतः प्रभुः धर्मात्मानमतस्तुभ्यमनुजानीमहे सुतं ३६ लभतां वीरलोकान्स ससहायो नराधिपः द्विजाग्र्यैः समनुज्ञा
तस्त्रिदिवे मोदतां सुखं ३७ प्राप्स्यते च भवान्पुण्यं धर्मे च परमां स्थितिं वेद पुण्यं च कृत्स्नेन सम्यक् भवतः सुव्रत ३८ दृष्टापदानमपि
च पांडवान्प्रति नो नृप समर्थास्त्रिदिवस्यापि पालने किं पुनः क्षितेः ३९ अनुवर्त्स्यंति चाप्येवं समेषु विषमेषु च प्रजाः कुरुकुलश्रेष्ठ
पांडवाञ्शीलभूषणान् ४० ब्रह्मदेयाग्रहारांश्च परिबर्हांश्च पार्थिवः पूर्वराजातिसर्गांश्च पालयत्येव पांडवः ४१ दीर्घदर्शी मृदु
र्दांतः सदा वैश्रवणो यथा अक्षुद्रसचिवश्चायं कुंतीपुत्रो महामनाः ४२ अनुक्रोशी दयावांश्च शुचिश्च भरतर्षभ ऋजु पश्यति मेधावी पुत्रवत्
पालितः सदा ४३ विप्रियं च जनस्यास्य संसर्गाद्धर्मजस्य वै न करिष्यंति राजर्षे तथा भीमार्जुनादयः ४४ मंदा मृदुषु कौरव्य तीक्ष्णेष्वा
शीविषोपमाः वीर्यवंतो महात्मानः पौराणां च हिते रताः ४५ न कुंती न च पांचाली न चोलूपी न सात्वती अस्मिञ्जने करिष्यंति प्रतिकूला
नि कर्हिचित् ४६ भवत्कृतमिमं स्नेहं युधिष्ठिरविवर्द्धितं न पृष्ठतः करिष्यंति पौरजानपदा जनाः ४७ अधर्मिष्ठानपि सतः कुंतीपुत्रा
महारथाः मानवान्पालयिष्यंति भूत्वा धर्मपरायणाः ४८ स राजन्मानसं दुःखमपनीय युधिष्ठिरात् कुरु कार्याणि धर्म्याणि नमस्ते पुरु
षर्षभ ४९ वैशंपायन उवाच तस्य तद्वचनं धर्म्यमनुबंधगुणोत्तरं साधु साध्विति सर्वः स जनः प्रतिगृहीतवान् ५० धृतराष्ट्रश्च तद्वाक्य
मभिपूज्य पुनः पुनः विसर्जयामास तदा सर्वास्तु प्रकृतीः शनैः ५१ स तैः संपूजितो राजा शिवेनावेक्षितस्तथा प्रांजलिः पूजयामास तं जनं भ
रतर्षभ ५२ ततो विवेश भवनं गांधार्या सहितो निजं व्युष्टायां चैव शर्वर्यां यच्चकार निबोध तत् ५३ इति आश्रमवासिकपर्वणि दशमोऽध्यायः १०

४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ इति श्रीनैलकंठीये भारतभावदीपे आश्रमवासिकपर्वणि टीकायां दशमोऽध्यायः १०

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

वैशंपायनउवाच ततोरजन्यांव्युष्टायांधृतराष्ट्रोंबिकासुतः विदुरंप्रेषयामासयुधिष्ठिरनिवेशनं १ सगत्वाराजवचनादुवाचाच्युतमीश्वरं यु
धिष्ठिरंमहातेजाःसर्वबुद्धिमतांवरः २ धृतराष्ट्रोमहाराजोवनवासायदीक्षितः गमिष्यतिवनंराजन्नागतांकार्त्तिकीमिमां ३ सत्वांकुरुकुलश्रेष्ठ
किंचिदर्थमभीप्सति श्राद्धमिच्छतिदातुंसगांगेयस्यमहात्मनः ४ द्रोणस्यसोमदत्तस्यबाल्हीकस्यचधीमतः पुत्राणांचैवसर्वेषां
येचास्यसुहृदोहताः ५ यदिचाप्यनुजानीषेसैंधवापसदस्यच एतच्छ्रुत्वातुवचनंविदुरस्ययुधिष्ठिरः ६ हृष्टःसंपूजयामासगुडाकेशश्च
पांडवः नतुभीमोदृढक्रोधस्तद्वचोजगृहेतदा ७ विदुरस्यमहातेजादुर्योधनकृतंस्मरन् अभिप्रायंविदित्वातुभीमसेनस्यफाल्गुनः ८
किरिटीकिंचिदानम्यतमुवाचनरर्षभं भीमराजापितावृद्धोवनवासायदीक्षितः ९ दातुमिच्छतिसर्वेषांसुहृदामौर्ध्वदेहिकं भवतानिर्जितं
वित्तंदातुमिच्छतिकौरवः १० भीष्मादीनांमहाबाहोतदनुज्ञातुमर्हसि दिष्ट्यात्वद्यमहाबाहोधृतराष्ट्रःप्रयाचते ११ याचितोयःपुरास्मा
भिःपश्यकालस्यपर्ययं योसौपृथिव्याःकृत्स्नायाभर्त्ताभूत्वानराधिपः १२ परैर्विनिहतामात्योवनंगंतुमभीप्सति मातेन्यत्पुरुषव्याघ्रदाना
द्भवतुदर्शनं १३ अयशस्यमतोन्यत्स्यादधर्मश्चमहाभुजराजानमुपशिक्षस्वज्येष्ठंभ्रातरमीश्वरं १४ अर्हस्त्वमसिदातुंवैनादातुंभरतर्षभ
एवंब्रुवाणंबीभत्सुंधर्मराजोप्यपूजयत् १५ भीमसेनस्तुसक्रोधःप्रोवाचेदंवचस्तदा वयंभीष्मस्यदास्यामःप्रेतकार्यंतुफाल्गुन १६ सोमद
त्तस्यनृपतेर्भूरिश्रवसएवच बाल्हीकस्यचराजर्षेर्द्रोणस्यचमहात्मनः १७ अन्येषांचैवसर्वेषांकुंतीकर्णायदास्यति श्राद्धानिपुरुषव्याघ्रमा
प्रदात्कौरवोनृपः १८ इतिमेवर्त्ततेबुद्धिर्मानोनंदंतुशत्रवः कष्टात्कष्टतरंयांतुसर्वेदुर्योधनादयः १९ यैरियंपृथिवीकृत्स्नाघातिताकुलपांस
नैः कुतस्त्वमसिविस्मृत्यवैरंद्वादशवार्षिकं २० अज्ञातवासंगहनंद्रौपदीशोकवर्धनं क्वतदाधृतराष्ट्रस्यस्नेहोस्मानभवत्तदा २१ कृ
ष्णाजिनोपसंवीतोहृताभरणभूषणः सार्धंपांचालपुत्र्यात्वंराजानमुपजग्मिवान् २२ क्वतदाद्रोणभीष्मौतौसोमदत्तोपिवाभवत् य
त्त्रयोदशसमावनेवन्येनजीवथ २३ नतदात्वांपिताज्येष्ठःपितृत्वेनाभिवीक्षते किंतेतद्विस्मृतंपार्थयदेषकुलपांसनः २४ दुर्बु.
द्धिर्विदुरंप्राहद्यूतेकिंजितमित्युत तमेवंवादिनंराजाकुंतीपुत्रोयुधिष्ठिरः उवाचवचनंधीमान्जोषमास्वेतिभर्त्सयन् २५ इतिआश्र
मवासिकेपर्वणिएकादशोऽध्यायः ११ अर्जुनउवाच भीमज्येष्ठोगुरुर्मेत्वंनातोन्यद्वक्तुमुत्सहे धृतराष्ट्रस्तुराजर्षिःसर्वथामानमर्हति १

२२ २३ २४ २५ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांएकादशोऽध्यायः ११ १ ६७ ६७ ६७ ६७

नस्मरंत्यपराद्धानिस्मरंतिसुकृतान्यपि असंभिन्नार्यमर्यादाःसाधवःपुरुषोत्तमाः २ इतितस्यवचःश्रुत्वाफाल्गुनस्यमहात्मनः विदुरंप्राह
धर्मात्माकुंतीपुत्रोयुधिष्ठिरः ३ इदंमद्वचनात्क्षत्तःकौरवंब्रूहिपार्थिवं यावदिच्छतिपुत्राणांश्राद्धंतावद्ददाम्यहं ४ भीष्मादीनांचसर्वेषांसु
हृदामामुपकारिणां ममकोशादितिविभोमाभूद्भीमःसुदुर्मनाः ५ वैशंपायनउवाच इत्युक्त्वाधर्मराजस्तमर्जुनंप्रत्यपूजयत् भीमसे
नःकटाक्षेणवीक्षांचक्रेधनंजयं ६ ततःसविदुरंधीमान्वाक्यमाहयुधिष्ठिरः भीमसेनेनकोपंसनृपतिःकर्तुमर्हति ७ परिक्लिष्टोहिभी
मोयंहिमवृष्ट्यातपादिभिः दुःखैर्बहुविधैर्धीमानरण्येविदितंतव ८ किंतुमद्वचनाद्ब्रूहिराजानंभरतर्षभ यद्यदिच्छसियावच्चगृह्यतां
मद्गृहादिति ९ यन्मात्सर्यमयंभीमःकरोतिभृशदुःखितः नतन्मनसिकर्तव्यमितिवाच्यःसपार्थिवः १० यन्ममास्तिधनंकिंचिदर्जुनस्य
चवेश्मनि तस्यस्वामीमहाराजइतिवाच्यःसपार्थिवः ११ ददातुराजाविप्रेभ्योयथेष्टंक्रियतांव्ययः पुत्राणांसुहृदांचैवगच्छत्वानृण्यमद्य
सः १२ इदंचापिशरीरंमेतवायत्तंजनाधिप धनानिचेतिविद्धित्वंनमेत्रास्तिसंशयः १३ इत्याश्रमवासिकेपर्वणिद्वादशोऽध्यायः १२
वैशंपायनउवाच एवमुक्तस्तुराज्ञासविदुरोबुद्धिसत्तमः धृतराष्ट्रमुपेत्येदंवाक्यमाहमहार्थवत् १ उक्तोयुधिष्ठिरोराजा भवद्वचनमादि
तः सचसंश्रुत्यवाक्यंतेप्रशशंसमहाद्युतिः २ बीभत्सुश्चमहातेजानिवेदयतितेगृहान् वसुतस्यगृहेयच्चप्राणानपिचकेवलान् ३
धर्मराजश्चपुत्रस्तेराज्यंप्राणान्धनानिच अनुजानातिराजर्षेयच्चान्यदपिकिंचन ४ भीमस्तुसर्वदुःखानिसंस्मृत्यबहुलान्युत दुःखादि
वमहाबाहुरनुज्ञांविनिश्वसन् ५ सराजन्धर्मशीलेनराज्ञाबीभत्सुनातथा अनुनीतोमहाबाहुःसौहृदेस्थापितोपिच ६ नचमन्युस्त्वया
कार्यइतित्वांप्राहधर्मराट् संस्मृत्यभीमस्तद्वैरयदन्यायवदाचरत् ७ एवंप्रायोहिधर्मोयंक्षत्रियाणांनराधिप युद्धेक्षत्रियधर्मेच
निरतोयंवृकोदरः ८ वृकोदरकृतेचाहमर्जुनश्चपुनःपुनः प्रसीदयावनृपतेभवान्प्रभुरिहास्तियत् ९ तद्ददातुभवान्वित्तंयावदिच्छ
सिपार्थिव त्वमीश्वरोस्यराज्यस्यप्राणानामपिभारत १० ब्रह्मदेयाग्रहारांश्चपुत्राणांचौर्ध्वदेहिकं इतोरत्नानिगाश्चैवदासीदासम
जाविकं ११ आनयित्वाकुरुश्रेष्ठोब्राह्मणेभ्यःप्रयच्छतु दीनांधकृपणेभ्यश्चतत्रतत्रनृपाज्ञया १२ बह्वन्नरसपानाढ्याःसभाविदुरका
रय गवांनिपानान्यन्यच्चविविधंपुण्यकर्मकुरु १३ इतिमामब्रवीद्राजापार्थश्चैवधनंजयः यदत्रानंतरंकार्यंतद्भवान्वक्तुमर्हति १४

१५ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांत्रयोदशोऽध्यायः १३ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

इत्युक्तोविदुरेणाथधृतराष्ट्रोऽभिनंद्यतान् मनश्चक्रेमहादानेकार्तिक्यांजनमेजय १५ इतिआश्रमवासिकेपर्वणित्रयोदशोऽध्यायः १३ वैशंपायन
उवाच विदुरेणैवमुक्तस्तुधृतराष्ट्रोनराधिपः प्रीतिमानभवद्राजन्राज्ञोजिष्णोश्चकर्मणि १ ततोभिरूपान्भीष्मायब्राह्मणानृषिसत्तमान् पु
त्रार्थेसुहृदश्चैवससमीक्ष्यसहस्रशः २ कारयित्वान्नपानानियानान्याच्छादनानिच सुवर्णमणिरत्नानिदासीदासमजाविकं ३ कंबलानि
चरत्नानिग्रामान्क्षेत्राण्यजाविकं सालंकारान्गजानश्वान्कन्याश्चैववरस्त्रियः ४ उद्दिश्योद्दिश्यसर्वेभ्योददौसनृपसत्तमः द्रोणंसंकीर्त्यभीष्मंच
सोमदत्तंचबाह्लिकं ५ दुर्योधनंचराजानंपुत्रांश्चैवपृथक्पृथक् जयद्रथपुरोगांश्चसुहृदश्चापिसर्वशः ६ सश्राद्धयज्ञोववृतेबहुगोधनदक्षि
णः अनेकधनरत्नौघोयुधिष्ठिरमतेतदा ७ अनिशंयत्रपुरुषागणकालेखकास्तथा युधिष्ठिरस्यवचनात्पृच्छंतिस्मतंनृप ८ आज्ञापयकि
मेतेभ्यःप्रदेयंदीयतामिति तदुपस्थितमेवात्रवचनांतेददुस्तदा ९ शतदेयेदशशतंसहस्रेचायुतंतथा दीयतेवचनाद्राज्ञःकुंतीपुत्रस्यधी
मतः १० एवंसवसुधाराभिर्वर्षमाणोनृपांबुदः तर्पयामासविप्रांस्तान्वर्षन्सस्यमिवांबुदः ११ ततोनंतरमेवात्रसर्ववर्णान्महामते अन्नपा
नरसौघेनप्लावयामासपार्थिवः १२ सवस्त्रधनरत्नौघोमृदंगनिनदोमहान् गवाश्वमकरावर्तोनानारत्नमहाकरः १३ ग्रामाग्रहारद्वीपाढ्योम
णिहेमजलार्णवः जगत्संप्लावयामासधृतराष्ट्रोडुपोद्भुतः १४ एवंसपुत्रपौत्राणांपितृणामात्मनस्तथा गांधार्याश्चमहाराजप्रददावौर्ध्वदैहिकं
१५ परिश्रांतोयदासीत्सददद्दानान्यनेकशः निवर्तयामासतदादानयज्ञंनराधिपः १६ एवंसराजाकौरव्यश्चक्रेदानमहाक्रतुं नटनर्तकला
स्याढ्यंबह्वन्नरसदक्षिणं १७ दशाहमेवंदानानिदत्वाराजांबिकासुतः बभूवपुत्रपौत्राणामनृणोभरतर्षभ १८ इतिआश्रमवासिकेपर्वणि
चतुर्दशोऽध्यायः १४ वैशंपायनउवाच ततःप्रभातेराजासधृतराष्ट्रोंबिकासुतः आहूयपांडवान्वीरान्वनवासेकृतक्षणः १ गांधारी
सहितोधीमानभ्यनंदद्यथाविधि कार्तिक्यांकारयित्वेष्टिंब्राह्मणैर्वेदपारगैः २ अग्निहोत्रंपुरस्कृत्यवल्कलाजिनसंवृतः वधूजनवृतोरा
जानिर्ययौभवनात्ततः ३ ततःस्त्रियःकौरवपांडवानांयाश्चापराःकौरवराजवंश्याः तासांनादःप्रादुरासीत्तदानींवैचित्रवीर्येनृपतौप्रयाते ४
ततोलाजैःसुमनोभिश्चराजाविचित्राभिस्तद्गृहंपूजयित्वा संपूज्यार्थैर्भृत्यवर्गंचसर्वंततःसमुत्सृज्यययौनरेंद्रः ५ ततोराजाप्रांजलिर्वेपमा
नोयुधिष्ठिरःसस्वरंबाष्पकंठः विमुच्योच्चैर्महानादंहसाधोक्वयास्यसीत्यपतत्तातभूमौ ६ ७ ७ ७ ७ ७ ७

१३ १४ १५ १६ १७ १८ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटी॰चतुर्दशोऽध्यायः १४ १ २ ३ ४ ५ ६ ७ ७ ७

७ ८ ९ १० ११ १२ १३ इति श्रीनैलकण्ठीये भारतभावदीपे आश्रमवासिके पर्वणि टीकायां पञ्चदशोऽध्यायः १५ १ २ ३ ४

तथार्जुनस्तीव्रदुःखाभितप्तो मुहुर्मुहुर्निश्वसन्भारताग्र्यः युधिष्ठिरं सर्वमेवैवमुक्त्वा निगृह्याथो दीनवत्सीदमानः ७ वृकोदरः फाल्गुनश्चैव
वीरौ माद्रीपुत्रौ विदुरः संजयश्च वैश्यापुत्रः सहितो गौतमेन धौम्यो विप्राश्चान्वयुर्बाष्पकण्ठाः ८ कुन्ती गान्धारीं बद्धनेत्रां व्रजन्तीं स्कन्धासक्तं हस्त-
मथोद्वहन्ती राजा गान्धार्याः स्कन्धदेशेऽवसज्य पाणिं ययौ धृतराष्ट्रः प्रतीतः ९ तथा कृष्णा द्रौपदी सात्वती च बालापत्या चोत्तरा कौरवी च चित्रा-
ङ्गदा याश्च काश्चित्स्त्रियोऽन्याः सार्धं राज्ञा प्रस्थितास्ता वधूभिः १० तासां नादो रुदतीनां तदासीद्राजन्दुःखात्कुररीणामिवोच्चैः ततो निष्पेतु-
र्ब्राह्मणक्षत्रियाणां विशां शूद्राणां चैव भार्याः समन्तात् ११ तन्निर्याणे दुःखितः पौरवर्गो गजाह्वये चैव बभूव राजन् यथापूर्वं गच्छतां पाण्डवानां
द्यूते राजन्कौरवाणां सभायाः १२ या नापश्यंश्चन्द्रमसं न सूर्यं रामाः कदाचिदपि तस्मिन्नरेन्द्रे महावनं गच्छति कौरवेन्द्रे शोकेनार्ता राज-
मार्गं प्रपेदुः १३ इत्याश्रमवासिके पर्वणि पञ्चदशोऽध्यायः १५ वैशम्पायन उवाच ततः प्रासादहर्म्येषु वसुधायां च पार्थिव नारीणां च
नराणां च निःस्वनः सुमहानभूत् १ स राजा राजमार्गेण नृनारीसंकुलेन च कथंचिन्निर्ययौ धीमान्वेपमानः कृताञ्जलिः २ स वर्धमान-
द्वारेण निर्ययौ गजसाह्वयात् विसर्जयामास च तं जनौघं स मुहुर्मुहुः ३ वनं गन्तुं च विदुरो राज्ञा सह कृतक्षणः संजयश्च महामात्रः सूतो
गावल्गणिस्तथा ४ कृपं निवर्तयामास युयुत्सुं च महारथम् धृतराष्ट्रो महीपालः परिदाप्य युधिष्ठिरे ५ निवृत्ते पौरवर्गे च राजा सान्तः-
पुरस्तदा धृतराष्ट्राभ्यनुज्ञातो निवर्तितुमियेष ह ६ सोऽब्रवीन्मातरं कुन्तीं वनं तमनुजग्मुषीम् अहं राजानमन्वेष्ये भवती विनिवर्तता-
७ वधूपरिवृता राज्ञि नगरं गन्तुमर्हसि राजा यात्वेष धर्मात्मा तापस्ये कृतनिश्चयः ८ इत्युक्ता धर्मराजेन बाष्पव्याकुललोचना जगा-
मैव तदा कुन्ती गान्धारीं परिगृह्य ह ९ कुन्त्युवाच सहदेवे महाराज मा प्रमादं कृथाः क्वचित् एष मामनुरक्तो हि राजंस्त्वां चैव सर्वदा १०
कर्णं स्मरेथाः सततं संग्रामेष्वपलायिनम् अवकीर्णो हि स मया वीरो दुष्प्रज्ञया तदा ११ आयसं हृदयं नूनं मन्दाया मम पुत्रक यत्सूर्यजम-
पश्यन्त्याः शतधा न विदीर्यते १२ एवं गते तु किं शक्यं मया कर्तुमरिंदम मम दोषोऽयमत्यर्थं ख्यापितो यन्न सूर्यजः १३ तन्निमित्तं महा-
बाहो दानं दद्यास्त्वमुत्तमम् सदैव भ्रातृभिः सार्धं सूर्यजस्यारिमर्दन १४ द्रौपद्याश्च प्रिये नित्यं स्थातव्यमरिकर्शन भीमसेनार्जुनश्चैव
नकुलश्च कुरूद्वह १५ समाधेयास्त्वया राजंस्त्वय्यद्य कुलधूर्गता श्वश्रूश्वशुरयोः पादाञ्छुश्रूषन्ती वने त्वहम् १६ २ ३ ४

५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १ २ ३ ४ ५

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ इतिश्रीनैलकंठीये

गांधारीसहितावत्स्येतापसीमलपंकिनी वैशंपायनउवाच एवमुक्तःसधर्मात्माभ्रातृभिःसहितोवशी विषादमगमत्तीमान्नचकिंचिदु
वाचह १७ मुहूर्तमिवतुध्यात्वाधर्मराजोयुधिष्ठिरः उवाचमातरंदीनश्चिंताशोकपरायणः १८ किमिदंतेव्यवसितंनैवंत्वंवक्तुमर्हसि न
त्वामभ्यनुजानामिप्रसादंकर्तुमर्हसि १९ पुरोद्यतान्पुराह्यस्मानुत्साह्यप्रियदर्शने विदुलायावचोभिस्त्वंनास्मान्संत्यक्तुमर्हसि २० नि
हत्यपृथिवीपालान्राज्यंप्राप्तमिदंमया तवप्रज्ञामुपश्रुत्यवासुदेवान्नरर्षभात् २१ क्वसाबुद्धिरियंचाद्यभवत्यायच्छ्रुतंमया क्षत्र
धर्मेस्थितंचोक्त्वातस्यच्यवितुमर्हसि २२ अस्मानुत्सृज्यराज्यंचस्नुषांचेमांयशस्विनीं कथंवत्स्यसिदुर्गेषुवनेष्वद्यप्रसीदमे २३ इ
तिबाष्पकलांवाचःकुंतीपुत्रस्यशृण्वती साजगामाश्रुपूर्णाक्षीभीमस्तामिदमब्रवीत् २४ यदाराज्यमिदंकुंतिभोक्तव्यंपुत्रनिर्जितं प्राप्त
व्याराजधर्माश्चतदेयंतेकुतोमतिः २५ किंवयंकारिताःपूर्वंभवत्यापृथिवीक्षयं कस्यहेतोःपरित्यज्यवनंगंतुमभीप्ससि २६ वना
च्चापिकिमानीताभवत्याबालकावयं दुःखशोकसमाविष्टौमाद्रीपुत्राविमौतथा २७ प्रसीदमातर्मागास्त्वंवनमद्ययशस्विनि श्रियं
यौधिष्ठिरींमातर्भुंक्ष्वतावद्बलार्जितां २८ इतिसानिश्चितैवाथवनवासायभाविनी लालप्यतांबहुविधंपुत्राणांनाकरोद्वचः २९
द्रौपदीचान्वयाच्छ्वश्रूंविषण्णवदनातदा वनवासायगच्छंतींरुदतीभद्रयासह ३० सापुत्रान्रुदतःसर्वान्मुहुर्मुहुरवेक्षती ज
गामैवमहाप्राज्ञावनायकृतनिश्चया ३१ अन्वयुःपांडवास्तांतुसभृत्यांतःपुरास्तथा ततःप्रगृह्यसाश्रूणिपुत्रान्वचनमब्रवीत् ३२
इत्याश्रमवासिकेपर्वणिषोडशोऽध्यायः १६ कुंत्युवाच एवमेतन्महाबाहोयथावदसिपांडव कृतमुद्धर्षणंपूर्वंमयावःसीदतांनृपाः
१ द्यूतापहृतराज्यानांपतितानांसुखादपि ज्ञातिभिःपरिभूतानांकृतमुद्धर्षणंमया २ कथंपांडोर्ननश्येतसंततिःपुरुषर्षभाः
यशश्चवोननश्येतइतिचोद्धर्षणंकृतं ३ यूयमिंद्रसमाःसर्वेदेवतुल्यपराक्रमाः मापरेषांमुखप्रेक्षाःस्थेत्येवंतत्कृतंमया ४ कथं
धर्मभृतांश्रेष्ठोराजात्वंवासवोपमः पुनर्वनेनदुःखीस्यादितिचोद्धर्षणंकृतं ५ नागायुतसमप्राणःख्यातविक्रमपौरुषः नायंभी
मोत्ययंगच्छेदितिचोद्धर्षणंकृतं ६ भीमसेनादवरजस्तथायंवासवोपमः विजयोनावसीदेतइतिचोद्धर्षणंकृतं ७ नकुलःसहदे
वश्चतथेमौगुरुवर्तिनौ क्षुधाकथंनसीदेतामितिचोद्धर्षणंकृतं ८ इयंचबृहतीश्यामातथात्यायतलोचना वृथासभातलेक्लिष्टामाभूदि
तिचतत्कृतं ९ प्रेक्षतामेववोभीमःवेपंतींकदलीमिव स्त्रीधर्मिणीमरिष्टांगींतथाद्यूतपराजितां १० ५ ५ ५ ५

भारतभावदीपे आश्रमवासिकेपर्वणिटीकायांषोडशोऽध्यायः १६ १ २ ३ ४ ५ ६ ७ ८ ९ १० ५ ५ ५ ५

११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायां

दुःशासनोयदाभीरुर्व्याद्दासीवत्पर्यकर्षत तदैवविदितंमह्यंपराभूतमिदंकुलं ११ निषण्णाःकुरवश्चैवतदामेश्वशुरादयः यदैवनाथमिच्छंती
व्यलपत्कुररीयथा १२ केशपक्षेपरामृष्टापापेनहतबुद्धिना यदादुःशासनेनैषातदामुह्याम्यहंनृपः १३ युष्मत्तेजोविवृध्यर्थंमया
ह्युद्धर्षणंकृतं तदानींविदुलावाक्यैरितितद्वित्तपुत्रकाः १४ कथंनराजवंशोयंनश्येत्प्राप्यसुतान्मम पांडोरितिमयापुत्रास्तस्मा
दुद्धर्षणंकृतं १५ नतस्यपुत्राःपौत्रावाकुरवस्तेचपार्थिवाः लभंतेसुकृताल्लोकान्यस्माद्वंशःप्रणश्यति १६ भुक्तंराज्यफलंपुत्राभ
र्तुर्मेविपुलंपुरा महादानानिदत्तानिपीतःसोमोयथाविधि १७ नाहमात्मफलार्थंवैवासुदेवमचूचुदं विदुलायाःप्रलापैस्तैःपाल
नार्थंचतत्कृतं १८ नाहंराज्यफलंपुत्राःकामयेपुत्रनिर्जितं पतिलोकानहंपुण्यान्कामयेतपसाविभो १९ श्वश्रूश्वशुरयोःकृत्वा
शुश्रूषांवनवासिनोः तपसाशोषयिष्यामियुधिष्ठिरकलेवरं २० निवर्तस्वकुरुश्रेष्ठभीमसेनादिभिःसह धर्मेतेधीयतांबुद्धिर्म
नस्तेमहदस्तुच २१ इतिश्रीआश्रमवासिकेपर्वणिसप्तदशोऽध्यायः १७ वैशंपायनउवाच कुंत्यास्तुवचनंश्रुत्वापांडवाराजसत्तम व्रीडि
ताःसंन्यवर्तंतपांचाल्यासहितानघाः १ ततःशब्दोमहानेवसर्वेषामभवत्तदा अंतःपुराणांरुदतांदृष्ट्वाकुंतींतथागतां २ प्रदक्षिण
मथावृत्यराजानंपांडवास्तदा अभिवाद्यन्यवर्तंतपृथांतामनिवर्त्यवै ३ ततोब्रवीन्महातेजाधृतराष्ट्रोंबिकासुतः गांधारींविदुरंचैव
समाभाष्यावगृह्यच ४ युधिष्ठिरस्यजननीदेवीसाधुनिवर्त्यतां यथायुधिष्ठिरःप्राहतत्सर्वंसत्यमेवहि ५ पुत्रैश्वर्यंमहदिदमपा
स्यचमहाफलं कानुगच्छेद्वनंदुर्गंपुत्रानुत्सृज्यमूढवत् ६ राज्यस्थयातपस्तप्तुंदानव्रतंकृतंमहत् अनयाशक्यमेवाद्यश्रूयतांच
वचोमम ७ गांधारिपरितुष्टोस्मिवध्वाःशुश्रूषणेनवै तस्मात्त्वमेनांधर्मज्ञेसमनुज्ञातुमर्हसि ८ इत्युक्तासौबलेयीतुराज्ञाकुंती
मुवाचह तत्सर्वंराजवचनंस्वंचवाक्यंविशेषवत् ९ नचसावनवासाययदेवंकृतमतिस्तदा शक्नोत्युपावर्तयितुंकुंतींधर्मप
रांसतीं १० तस्यास्तांतुस्थितिंज्ञात्वाव्यवसायंकुरुस्त्रियः निवृत्तांश्चकुरुश्रेष्ठान्दृष्ट्वाप्ररुरुदुस्तदा ११ उपावृत्तेषुपार्थेषुसर्वास्व
ववधूषुच ययौराजामहाप्राज्ञोधृतराष्ट्रोवनंतदा १२ पांडवाश्चापिदीनास्तेदुःखशोकपरायणाः यानैःस्त्रीसहिताःसर्वेपुरंप्रविवि
शुस्तदा १३ तदहृष्टमिवानंदंगतोत्सवमिवाभवत् नगरंहास्तिनपुरंसस्त्रीवृद्धकुमारकं १४ ७ ७ ७ ७

सप्तदशोऽध्यायः १७ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ ७ ७ ७ ७ ७

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायां

सर्वेचासन्निरुत्साहाः पांडवायातमन्यवः कुंत्याहीनाः सुदुःखार्त्तावत्साइवविनाकृताः १५ धृतराष्ट्रस्तुतेनान्हागत्वासुमहदंतरं
ततोभागीरथीतीरेनिवासमकरोत्प्रभुः १६ प्रादुष्कृतायथान्यायमग्नयोवेदपारगैः व्यराजंतद्विजश्रेष्ठैस्तत्रतत्रतपोवने १७
प्रादुष्कृताग्निरभवत्सचवृद्धोनराधिपः सराजाग्नीन्पर्युपास्यहुत्वाचविधिवत्तदा संध्यागतंसहस्रांशुमुपातिष्ठतभारत विदुरःसं
जयश्चैवराज्ञःशय्यांकुशैस्तथा १९ चक्रतुःकुरुवीरस्यगांधार्याश्चाविदूरतः गांधार्याःसंनिकर्षेतुनिषसादकुशेसुखं २० युधिष्ठिरस्यजननीकुंतीसाधुव्र
तेस्थिता तेषांसंश्रवणेचापिनिषेदुर्विदुरादयः २१ याजकाश्चयथोद्देशंद्विजायेचानुयायिनः प्राधीतद्विजमुख्यासासंप्रज्वलित
पावका २२ बभूवतेषांरजनीब्राह्मीप्रीतिविवर्धिनी ततोरात्र्यांव्यतीतायांकृतपूर्वाह्णिकक्रियाः २३ हुत्वाग्निंविधिवत्सर्वेप्रययु
स्तेयथाक्रमं उदङ्मुखानिरीक्षंतउपवासपरायणाः २४ सतेषामतिदुःखोभून्निवासःप्रथमेहनि शोचतांशोच्यमानानां
पौरजानपदैर्जनैः २५ इत्याश्रमवासिकेपर्वणिअष्टादशोऽध्यायः १८ वैशंपायनउवाच ततोभागीरथीतीरेमेध्येपुण्यजनोचिते
निवासमकरोद्राजाविदुरस्यमतेस्थितः १ तत्रैनंपर्युपातिष्ठन्ब्राह्मणावनवासिनः क्षत्रविट्शूद्रसंघाश्चबहवोभरतर्षभ २
सतैःपरिवृतोराजाकथाभिःपरिनंद्यतान् अनुजज्ञेसशिष्यान्वैविधिवत्प्रतिपूज्यच ३ सायाह्नेसमहीपालस्ततोगंगामुपेत्यच च
कारविधिवच्छौचंगांधारीचयशस्विनी ४ तेचैवान्येपृथक्सर्वेतीर्थेष्वाप्लुत्यभारत चक्रुःसर्वाःक्रियास्तत्रपुरुषाविदुरादयः ५
कृतशौचंततोवृद्धंश्वशुरंकुंतिभोजजा गांधारींचपृथाराजन्गंगातीरमुपानयत् ६ राज्ञस्तुयाजकैस्तत्रकृतोवेदीपरिस्तरः जुहा
वतत्रवन्हिंसनृपतिःसत्यसंगरः ७ ततोभागीरथीतीरात्कुरुक्षेत्रंजगामसः सानुगोनृपतिर्वृद्धोनियतःसंयतेंद्रियः ८ तत्राश्र
मपदंधीमानभिगम्यसपार्थिवः आससादाथराजर्षिंशतयूपंमनीषिणं ९ सहिराजामहानासीत्केकयेषुपरंतप सपुत्रंमनुजैश्व
र्येनिवेश्यवनमाविशत् १० तेनासौसहितोराजाययौव्यासाश्रमंप्रति तत्रैनंविधिवद्राजाप्रत्यगृह्णात्कुरूद्वहं ११ सदीक्षांतत्रसं
प्राप्यराजाकौरवनंदनः शतयूपाश्रमेतस्मिन्निवासमकरोत्तदा १२ तस्मैसर्वंविधिंराज्ञेराजाचख्यौमहामतिः आरण्यकंमहाराज
व्यासस्यानुमतेतदा १३ एवंसतपसाराजाधृतराष्ट्रोमहामनाः योजयामासचात्मानंतांश्चाप्यनुचरांस्तदा १४ ७ ७ ७

मष्टदशोऽध्यायः १८ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ ७ ७ ७ ७ ७

१५ १६ १७ १८ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायामेकोनविंशोऽध्यायः १९ १ २ ३ ४ ५

तथैवदेवीगांधारीवल्कलाजिनधारिणी कुंत्यासहमहाराजसमानव्रतचारिणी १५ कर्मणामनसावाचाचक्षुषाचैवतेनृप संनि
यम्येंद्रियग्राममास्थितेपरमंतपः १६ त्वगस्थिभूतःपरिशुष्कमांसोजटाजिनीवल्कलसंवृतांगः सपार्थिवस्तत्रतपश्चचारमहर्षिव
त्तीव्रमपेतमोहः १७ क्षत्ताचधर्मार्थविदग्र्यबुद्धिःससंजयस्तंनृपतिंसदारं उपाचरद्घोरतपोजितात्मा तदाकृशोवल्कलचीरवासाः
१८ इत्याश्रमवासिकेपर्वणिएकोनविंशोऽध्यायः १९ वैशंपायनउवाच ततस्तत्रमुनिश्रेष्ठाराजानंद्रष्टुमभ्ययुः नारदःपर्वतश्चैवदेवलश्चमहा
तपाः १ द्वैपायनःसशिष्यश्चसिद्धाश्चान्येमनीषिणः शतयूपश्चराजर्षिर्वृद्धःपरमधार्मिकः २ तेषांकुंतीमहाराजपूजांचक्रेयथा
विधि तेचापितुतुषुस्तस्यास्तापसाःपरिचर्यया ३ तत्रधर्म्याःकथास्तातचक्रुस्तेपरमर्षयः रमयंतोमहात्मानंधृतराष्ट्रंजनाधि
पं ४ कथांतरेतुकस्मिंश्चिद्देवर्षिर्नारदस्ततः कथामिमामकथयत्सर्वप्रत्यक्षदर्शिवान् ५ नारदउवाच केकयाधिपतिःश्रीमान्
राजासीदकुतोभयः सहस्रचित्यइत्युक्तःशतयूपपितामहः ६ सपुत्रेराज्यमासज्यज्येष्ठेपरमधार्मिके सहस्रचित्योधर्मात्माप्र
विवेशवनंनृपः ७ सगत्वातपसःपारंदीप्तस्यसनराधिपः पुरंदरस्यसंस्थानंप्रतिपेदेमहाद्युतिः ८ दृष्टपूर्वःसबहुशोराजन्संपत
तामया महेंद्रसदनेराजातपसादग्धकिल्बिषः ९ तथाशैलालयोराजाभगदत्तपितामहः तपोबलेनैवनृपोमहेंद्रसदनंगतः १०
तथापृषध्रोराजासीद्राजन्वज्रधरोपमः सचापितपसालोकान्नाकपृष्ठमितोनृपः ११ अस्मिन्नरण्येनृपतेमांधातुरपिचात्मजः पु
रुकुत्सोनृपःसिद्धिंमहतींसमवाप्तवान् १२ भार्यासमभवद्यस्यनर्मदासरितांवरा सोऽस्मिन्नरण्येनृपतिस्तपस्तप्त्वादिवंगतः १३
शशलोमाचराजासीद्राजन्परमधार्मिकः सम्यगस्मिन्वनेतप्त्वाततोदिवमवाप्तवान् १४ द्वैपायनप्रसादाच्चत्वमपीदंतपोवनं रा
जन्नवाप्यदुष्प्रापांगतिमग्र्यांगमिष्यसि १५ त्वंचापिराजशार्दूलतपसोंतेश्रियावृतः गांधारीसहितोगंतागतिंतेषांमहात्मनां १६
पांडुःस्मरतिनित्यंबलहंतुःसमीपगः त्वांसदैवमहाराजश्रेयसासचयोक्ष्यति १७ तवशुश्रूषयाचैवगांधार्याश्चयशस्विनी भ
र्तुःसलोकतामेषागमिष्यतिवधूस्तव १८ युधिष्ठिरस्यजननीसाहिधर्मःसनातनः वयमेतत्प्रपश्यामोनृपतेदिव्यचक्षुषा १९ प्रवे
क्ष्यतिमहात्मानंविदुरश्चयुधिष्ठिरं संजयस्तदनुध्यानादितःस्वर्गमवाप्स्यति २० ५ ५ ६ ५ ६

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ७ ६

२१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३७ ३८

वैशंपायनउवाच एतच्छ्रुत्वाकौरवेंद्रोमहात्मासार्द्धंपत्न्याप्रीतिमान्संबभूव विद्वान्वाक्यंनारदस्यप्रशस्यचक्रेपूजांचातुलांनारदस्य
२१ ततःसर्वेनारदंविप्रसंघाःसंपूजयामासुरतीवराजन् राज्ञःप्रीत्याधृतराष्ट्रस्यतेवैपुनःपुनःसंप्रहृष्टास्तदानीं २२ वैशंपाय
नउवाच नारदस्यतुतद्वाक्यंप्रशशंसुर्द्विजसत्तमाः शतयूपस्तुराजर्षिर्नारदंवाक्यमब्रवीत् २३ अहोभगवताश्रद्धाकुरुराजस्यवर्धिता
सर्वस्यचजनस्यास्यममचैवमहाद्युते २४ अस्तिकाचित्तुविवक्षामेतांतांमेनिगदतःशृणु धृतराष्ट्रंप्रतिनृपंदेवर्षेलोकपूजित २५
सर्ववृत्तांततत्त्वज्ञोभवान्दिव्येनचक्षुषा युक्तःपश्यसिविप्रर्षेगतीर्याविविधानृणां २६ उक्तवान्नृपतीनांत्वंमहेंद्रस्यसलोकतां
नत्वस्यनृपतेर्लोकाःकथितास्तेमहामुने २७ स्थानमप्यस्यनृपतेःश्रोतुमिच्छाम्यहंविभो त्वत्तःकीदृक्कदाचेतितन्ममाख्याहितत्त्वतः
२८ इत्युक्तोनारदस्तेनवाक्यंसर्वमनोनुगं व्याजहारसभामध्येदिव्यदर्शीमहातपाः २९ नारदउवाच यदृच्छयाशक्रसदोगत्वा
शक्रंशचीपतिं दृष्टवानस्मिराजर्षेतत्रपांडुंनराधिपं ३० तत्रेयंधृतराष्ट्रस्यकथासमभवन्नृप तपसोदुष्करस्यास्ययदयंतप्यतेतपः
३१ तत्राहमिदमश्रौषंशक्रस्यवदतःस्वयं वर्षाणित्रीणिशिष्टानिराज्ञोस्यपरमायुषः ३२ ततःकुबेरभवनंगांधारीसहितोनृपः
प्रयाताधृतराष्ट्रोयंराजराजाभिसत्कृतः ३३ कामगेनविमानेनदिव्याभरणभूषितः ऋषिपुत्रोमहाभागस्तपसादग्धकिल्बिषः
३४ संचरिष्यतिलोकांश्चदेवगंधर्वरक्षसां स्वच्छंदेनेतिधर्मात्मायन्मांत्वमनुपृच्छसि ३५ देवगुह्यमिदंप्रीत्यामयावःकथितंमहत्
भवंतोहिश्रुतधनास्तपसादग्धकिल्बिषाः ३६ वैशंपायनउवाच इतितस्यवचःश्रुत्वादेवर्षेर्मधुरंवचः सर्वेसुमनसःप्रीताबभूवुः
सचपार्थिवः ३७ एवंकथाभिरन्वास्यधृतराष्ट्रंमनीषिणः विप्रजग्मुर्यथाकामंतेसिद्धगतिमास्थिताः ३८ इत्याश्रमवासिकेपर्वणि
विंशतितमोऽध्यायः २० वैशंपायनउवाच वनंगतेकौरवेंद्रेदुःखशोकसमन्विताः बभूवुःपांडवाराजन्मातृशोकेनचान्विताः १
तथापौरजनःसर्वःशोचन्नास्तेजनाधिपं कुर्वाणाश्चकथास्तत्रब्राह्मणानृपतिंप्रति २ कथंनुराजावृद्धःसवनेवसतिनिर्जने गांधारी
चमहाभागासाचकुंतीपृथाकथं ३ सुखार्हःसहिराजर्षिरसुखीतद्वनंमहत् किमवस्थःसमासाद्यप्रज्ञाचक्षुर्हतात्मजः ४
सुदुष्करंकृतवतीकुंतीपुत्रानपश्यती राजश्रियंपरित्यज्यवनवासमरोचयत् ५

इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांविंशतितमोऽध्यायः २० १ २ ३ ४ ५ ६ ६ ७

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ इतिश्रीनीलकंठीये भारतभावदीपे आश्रमवासिकपर्वणि टीकायां

विदुरःकिमवस्थश्च भ्रातुःश्वश्रूश्चुरान्भवान् मन्त्रगावल्गणिर्धीमान्भर्तृपिंडानुपालकः ६ आकुमारं च पौरास्ते चिंताशोकसमाहताः तत्रत
त्र कथाश्चक्रुः समासाद्य परस्परं ७ पांडवाश्चैव ते सर्वे भृशं शोकपरायणाः शोचंतो मातरं वृद्धामूषुर्नातिचिरं पुरं ८ तथैव वृद्धं पितरं हतपुत्रं ज
नेश्वरं गांधारीं च महाभागां विदुरं च महामतिं ९ नैषां बभूव संप्रीतिस्तान्विचिंतयतां तदा न राज्ये न च नारीषु न वेदाध्ययनेषु च १० परं निर्वे
दमगमंश्चिंतयंतो नराधिपं तं च ज्ञातिवधं घोरं संस्मरंतः पुनः पुनः ११ अभिमन्योश्च बालस्य विनाशं रणमूर्धनि कर्णस्य च महाबाहोः संग्रामे
ष्वपलायिनः १२ तथैव द्रौपदेयानामन्येषां सुहृदामपि वधं संस्मृत्य ते वीरा नातिप्रमनसोऽभवन् १३ हतप्रवीरां पृथिवीं हतरत्नां च भारत
सदैव चिंतयंतस्ते न शमं चोपलेभिरे १४ द्रौपदी हतपुत्रा च सुभद्रा चैव भाविनी नातिप्रीतियुते देव्यौ तदास्तामप्रहृष्टवत् १५ वैराट्या
स्तनयं दृष्ट्वा पितरं ते परीक्षितं धारयंति स्म ते प्राणांस्तव पूर्वपितामहाः १६ इत्याश्रमवासिकपर्वणि एकविंशोऽध्यायः २१ ६ ७
वैशंपायन उवाच एवं ते पुरुषव्याघ्राः पांडवा मातृनंदनाः स्मरंतो मातरं वीरा बभूवुर्भृशदुःखिताः १ ये राजकार्येषु पुरा व्यासक्ता नित्यशो
ऽभवन् ते राजकार्याणि तदा नाकार्षुः सर्वतः पुरे २ प्रविष्टा इव शोकेन नाभ्यनंदंत किंचन संभाष्यमाणा अपि ते न किंचित्प्रत्यपूजयन्
३ ते स्म वीरा दुराधर्षा गांभीर्ये सागरोपमाः शोकोपहतविज्ञाना नष्टसंज्ञा इवाभवन् ४ अचिंतयंश्च जननीं ततस्ते पांडुनंदनाः क
थं नु वृद्धमिथुनं वहत्यति कृशा पृथा ५ कथं च स महीपालो हतपुत्रो निराश्रयः पत्न्या सह वसत्येको वने श्वापदसेविते ६ सा च देवी महाभागा गां
धारी हतबांधवा पतिमंधं कथं वृद्धमन्वेति विजने वने ७ एवं तेषां कथयतामौत्सुक्यमभवत्तदा गमने चाभवद्बुद्धिर्धृतराष्ट्रदिदृक्षया
८ सहदेवस्तु राजानं प्रणिपत्येदमब्रवीत् अहो मे भवतो दृष्टं हृदयं गमनं प्रति ९ न हि त्वां गौरवेणाहमशकं वक्तुमंजसा गमनं प्रति रा
जेंद्र तदिदं समुपस्थितं १० दिष्ट्या द्रक्ष्यामि तां कुंतीं वर्तयंतीं तपस्विनीं जटिलां तापसीं वृद्धां कुशकाशपरिक्षतां ११ प्रासादहर्म्य
संवृद्धामत्यंतसुखभागिनीं कदा नु जननीं श्रांतां द्रक्ष्यामि भृशदुःखितां १२ अनित्याः खलु मर्त्यानां गतयो भरतर्षभ कुंती राजसुता
यत्र वसत्यसुखिता वने १३ सहदेववचः श्रुत्वा द्रौपदी योषितां वरा उवाच देवी राजानमभिपूज्याभिनंद्य च १४ कदा द्रक्ष्यामि तां देवीं यदि
जीवति सा पृथा जीवंत्या ह्यद्य मे प्रीतिर्भविष्यति जनाधिप १५ एषा तेऽस्तु मतिर्नित्यं धर्मे ते रमतां मनः यो ह्यद्य त्वमस्मान्राजेंद्र श्रेयसा योज
यिष्यसि १६

एकविंशोऽध्यायः २१ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

अग्रपादस्थितंचैवमंविदुरराजन्वधूजनं कांक्षंतंदर्शनंकुंत्यागांधार्याःश्वशुरस्यच १७ इत्युक्तःसनृपोदेव्याद्रौपद्याभरतर्षभ सेनाध्यक्षा
न्समानाय्यसर्वानिदमुवाचह १८ निर्यातयतमेसेनांप्रभूतरथकुंजरां द्रक्ष्यामिवनसंस्थंच धृतराष्ट्रंमहीपतिं १९ स्त्र्यध्यक्षांश्चाब्रवी
द्राजायानानिविविधानिमे सज्जीक्रियंतांसर्वाणिशिबिकाश्चसहस्रशः २० शकटापणवेशाश्चकोशाःशिल्पिनएवच निर्यांतुको
षपालाश्चकुरुक्षेत्राश्रमंप्रति २१ यश्चपौरजनःकश्चित् द्रष्टुमिच्छतिपार्थिवं अनावृतःसुविहितःसचयातुसुरक्षितः २२ सूदाःपौरो
गवाश्चैवसर्वंचैवमहानसं विविधंभक्ष्यभोज्यंचशकटैरुह्यतांमम २३ प्रयाणंघुष्यतांचैवश्वोभूतइतिमाचिरं क्रियंतांपथिचाप्यद्य
वेश्मानिविविधानिच २४ एवमाज्ञाप्यराजासभ्रातृभिःसहपांडवः श्वोभूतेनिर्ययौराजन्सस्त्रीवृद्धपुरःसरः २५ सबहिर्दिवसान्
वैजनौघंपरिपालयन् न्यवसन्नृपतिःपंचततोगच्छद्वनंप्रति २६ इत्याश्रमवासिकेपर्वणि द्वाविंशोऽध्यायः २२ ॥ ॥ ॥
वैशंपायनउवाच आज्ञापयामासततःसेनांभरतसत्तमः अर्जुनप्रमुखैर्गुप्तांलोकपालोपमैर्नरैः १ योगोयोगइतिप्रीत्याततःशब्दोमहा
नभूत् क्रोशतांसादिनांतत्रयुज्यतामितिभारत २ केचिद्यानैर्नराजग्मुःकेचिदश्वैर्महाजवैः कांचनैश्चरथैःकेचित्ज्वलितज्वलनोप
मैः ३ गजेंद्रैश्चतथैवान्येकेचिदुष्ट्रैर्नराधिप पदातिनस्तथैवान्येनखरप्रासयोधिनः ४ पौरजानपदाश्चैवयानैर्बहुविधैस्तथा
अन्वयुःकुरुराजानंधृतराष्ट्रदिदृक्षया ५ सचापिराजवचनादाचार्योगौतमःकृपः सेनामादायसेनानीःप्रययावाश्रमंप्रति ६ त
तोद्विजैःपरिवृतःकुरुराजोयुधिष्ठिरः संस्तूयमानोबहुभिःसूतमागधबंदिभिः ७ पांडुरेणातपत्रेणध्रियमाणेनमूर्धनि रथानीके
नमहतानिर्जगामकुरूद्वहः ८ गजैश्चाचलसंकाशैर्भीमकर्मावृकोदरः सज्जयन्त्रायुधोपेतैःप्रययौपवनात्मजः ९ माद्रीपुत्राव
पितथाहयारोहौसुसंवृतौ जग्मतुःशीघ्रगमनौसन्नद्धकवचध्वजौ १० अर्जुनश्चमहातेजारथेनादित्यवर्चसा वशीश्वेतैर्हयैर्युक्तेर्दि
व्येनान्वगमन्नृपं ११ द्रौपदीप्रमुखाश्चापिस्त्रीसंघाःशिबिकायुताः स्त्र्यध्यक्षयुताःप्रययुर्व्यसृजंतोमितंवसु १२ समृद्धरथहस्त्य
श्ववंवेणुवीणानुनादितं शुशुभेपांडवंसैन्यंतत्तदाभरतर्षभ १३ नदीतीरेषुरम्येषुसरःसुचविशांपते वासान्कृत्वाक्रमेणाथजग्मुस्ते
कुरुपुंगवाः १४ युयुत्सुश्चमहातेजाधौम्यश्चैवपुरोहितः युधिष्ठिरस्यवचनात्पुरगुप्तिंप्रचक्रतुः १५ ॥ ॥ ॥

१

१६ १७ १८ इतिश्रीनैलकंठीये भारतभावदीपे आश्रमवासिके पर्वणि टीकायां त्रयोविंशोऽध्यायः २३ १ २ ३ ४ ५ ६ ७ ८ ९-१०

ततोयुधिष्ठिरोराजाकुरुक्षेत्रमवातरत् क्रमेणोत्तीर्ययमुनांनदींपरमपावनीं १६ सददर्शाश्रमंदूराद्राजर्षेस्तस्यधीमतः शतयूपस्यकौरव्यधृ
तराष्ट्रस्यचैवह १७ ततःप्रमुदितःसर्वोजनस्तद्वनमंजसा विवेशसुमहानादैरापूर्यभरतर्षभ १८ इत्याश्रमवासिकेपर्वणित्रयोविंशोऽध्या
यः २३ वैशंपायनउवाच ततस्तेपांडवादूरादवतीर्यपदातयः अभिजग्मुर्नरपतेराश्रमंविनयानताः १ सचयोधजनःसर्वोयेचराष्ट्रनिवासि
नः स्त्रियश्चकुरुमुख्यानांपद्भिरेवान्वयुस्तदा २ आश्रमंतेततोजग्मुर्धृतराष्ट्रस्यपांडवाः शून्यंमृगगणाकीर्णंकदलीवनशोभितं ३ ततस्तत्रसमा
जग्मुस्तापसानियतव्रताः पांडवानागतान्द्रष्टुंकौतूहलसमन्विताः ४ तानपृच्छत्ततोराजाक्वासौकौरववंशभृत् पिताज्येष्ठोगतोऽस्माकमिति
बाष्पपरिप्लुतः ५ तेतमूचुस्ततोवाक्यंयमुनामवगाहितुं पुष्पाणामुदकुंभस्यचार्थेगतइतिप्रभो ६ तैराख्यातेनमार्गेणततस्तेजग्मुरंजसा
ददृशुश्चाविदूरेतान्सर्वानथपदातयः ७ ततस्तेसत्वराजग्मुःपितुर्दर्शनकांक्षिणः सहदेवस्तुवेगेनप्राधावद्यत्रसापृथा ८ सस्वरंरुरुदेधी
मान्मातुःपादावुपस्पृशन् साचबाष्पाकुलमुखीददर्शदयितंसुतं ९ बाहुभ्यांसंपरिष्वज्यसमुन्नाम्यचपुत्रकं गांधार्याःकथयामाससह
देवमुपस्थितं १० अनंतरंचराजानंभीमसेनमथार्जुनं नकुलंचपृथादृष्ट्वात्वरमाणोपचक्रमे ११ साह्यग्रेगच्छतितयोर्दंपत्योर्हतपुत्र-
योः कर्षंतीतौततस्तेतांदृष्ट्वासंन्यपतन्भुवि १२ राजातान्स्वरयोगेनस्पर्शेनचमहामनाः प्रत्यभिज्ञायमेधावीसमाश्वासयतप्रभुः १३ त
तस्तेबाष्पमुत्सृज्यगांधारीसहितंनृपं उपतस्थुर्महात्मानोमातरंचयथाविधि सर्वेषांतोयकलशान्जगृहुस्तेस्वयंतदा पांडवालब्धसंज्ञावैमा
त्राचाश्वासिताःपुनः १५ तथानार्योनृसिंहानांसोचयोधजनस्तदा पौरजानपदाश्चैवददृशुस्तंजनाधिपं १६ निवेदयामासतदाजनंतंनामगो
त्रतः युधिष्ठिरोनरपतिःसचैनंप्रत्यपूजयत् १७ सतैःपरिवृतोमेनेहर्षबाष्पाविलेक्षणः राजात्मानंगृहगतंपुरेवगजसाह्वये १८ अभि
वादितोवधूभिश्चकृष्णाद्याभिःसपार्थिवः गांधार्यासहितोधीमान्कुंत्याचप्रत्यनंदत १९ ततश्चाश्रममागच्छत्सिद्धचारणसेवितं दिदृ
क्षुभिःसमाकीर्णंनभस्तारागणैरिव २० इत्याश्रमवासिकेपर्वणिचतुर्विंशोऽध्यायः २४ वैशंपायनउवाच सतैःसहनरव्याघ्रैर्भ्रा
तृभिर्भरतर्षभ राजारुचिरपद्माक्षैरासांचक्रेतदाश्रमे १ तापसैश्चमहाभागैर्नानादेशसमागतैः द्रष्टुंकुरुपतेःपुत्रान्पांडवान्पृथुवक्षसः
२ तेऽब्रुवन्ज्ञातुमिच्छामःकतमोऽत्रयुधिष्ठिरः भीमार्जुनौयमौचैवद्रौपदीचयशस्विनी ३ ४ ५ ६ ७

११ १२ १३ १४ १५ १६ १७ १८ १९ इतिश्रीनैलकंठीये भारतभावदीपे आश्रमवासिके पर्वणि टीकायां चतुर्विंशोऽध्यायः २४ १ २ ३

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

तानाचख्यौतदासूतःसर्वांस्तानभिनामतः संजयोद्रौपदींचैवसर्वाश्चान्याःकुरुस्त्रियः ४ संजयउवाच यएषुजांबूनदशुद्धगौरस्तनुर्म
हासिंहइवप्रवृद्धः प्रचंडघोणःपृथुदीर्घनेत्रस्ताम्रायताक्षःकुरुराजएषः ५ अयंपुनर्मत्तगजेंद्रगामीप्रतप्तचामीकरशुद्धगौरः पृथ्वा
यतांसःपृथुदीर्घबाहुर्वृकोदरःपश्यतपश्यतेमं ६ यस्त्वेषपार्श्वेस्यमहाधनुष्मान्श्यामोयुवावारणयूथपाभः सिंहोन्नतांसोगजखेलगा
मीपद्मायताक्षोऽर्जुनएषवीरः ७ कुंतीसमीपेपुरुषोत्तमौतुयमाविमौविष्णुमहेंद्रकल्पौ मनुष्यलोकेसकलेसमोस्तिययोर्नरूपेनबलेन
शीले इयंपुनःपद्मदलायताक्षीमध्यंवयःकिंचिदिवस्पृशंती नीलोत्पलाभासुरदेवतेवकृष्णास्थितामूर्त्तिमतीवलक्ष्मीः ९ अस्यास्तु
पार्श्वेकनकोत्तमाभायैषाप्रभामूर्त्तिमतीवसौमी मध्येस्थितासाभगिनीद्विजाग्र्याचक्रायुधस्याप्रतिमस्यतस्य १० इयंचजांबूनदशुद्धगौ
रीपार्थस्यभार्याभुजगेंद्रकन्या चित्रांगदाचैवनरेंद्रकन्यायैषासवर्णाग्र्यमधूकपुष्पैः ११ इयंस्वसाराजचमूपतेश्चप्रवृद्धनीलोत्पलदा
मवर्णा पस्पर्द्धकृष्णेनसदानृपोयोवृकोदरस्यैषपरिग्रहोग्र्यः १२ इयंचराज्ञोमगधाधिपस्यसुताजरासंधइतिश्रुतस्य यवीयसोमा
द्रवतीसुतस्यभार्यामतांचंपकदामगौरी १३ इंदीवरश्यामतनुःस्थितातुयैषापरासीन्महीतलेच भार्यामतामाद्रवतीसुतस्यज्ये
ष्ठस्यसेयंकमलायताक्षी १४ इयंतुनिष्टप्तसुवर्णगौरीराज्ञोविराटस्यसुतासपुत्रा भार्याभिमन्योर्निहतोरणेयोद्रोणादिभिस्तैर्विरथो
रथस्थैः १५ एतास्तुसीमंतशिरोरुहायाःशुक्लोत्तरीयानरराजपत्न्यः राज्ञोस्यवृद्धस्यपरंशताख्याःस्नुषानृवीराहतपुत्रनाथाः १६
एतायथामुख्यमुदाहृतावोब्राह्मण्यभावादृजुबुद्धिसत्वाः सर्वाभवद्भिःपरिपृच्छतोयानरेंद्रपत्न्यःसुविशुद्धसत्वाः १७ वैशंपा
यनउवाच एवंसराजाकुरुवृद्धवर्यःसमागतस्तैर्नरदेवपुत्रैः पप्रच्छसर्वंकुशलंतदानींगतेषुसर्वेष्वथतापसेषु १८ योधेषुचाप्याश्र
ममंडलंतंमुक्त्वानिविष्टेषुविमुच्यपत्रं स्त्रीवृद्धबालेचसुसंनिविष्टेयथार्हतस्तान्कुशलान्यपृच्छत् १९ इत्याश्रमवासिकेपर्वणिपंचविंश
तितमोऽध्यायः २५ धृतराष्ट्रउवाच युधिष्ठिरमहाबाहोकच्चित्त्वंकुशलीह्यसि सहितोभ्रातृभिःसर्वैःपौरजानपदैस्तथा १ येचत्वा
मनुजीवंतिकच्चित्तेपिनिरामयाः सचिवाभृत्यवर्गाश्चगुरवश्चैवतेनृप २ कच्चित्तेपिनिरातंकावसंतिविषयेतव कच्चिद्वर्त्तसिकल्याणीं
वृत्तिंराजर्षिसेवितां ३ कच्चिन्न्यायानतुच्छिद्यकोशस्तेभिप्रपूर्यते अरिमध्यस्थमित्रेषुवर्त्तसेचानुरूपतः ४ ५ ६ ७

५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८

ब्राह्मणानग्रहारैर्वायथावदनुपश्यसि कच्चित्तेपरितुष्यंतिशीलेनभरतर्षभ ५ शत्रवोपिकुतःपौराभृत्यावास्वजनोपिवा कच्चिद्यजसिराजेंद्र
श्रद्धावान्पितृदेवताः ६ अतिथीनन्नपानेनकच्चिदर्चसिभारत कच्चिन्नयपथेविप्राःस्वकर्मनिरतास्तव ७ क्षत्रियावैश्यवर्गावाशूद्रा
वापिकुटुंबिनः कच्चित्स्त्रीबालवृद्धंतेनशोचतिनयाचते ८ जामयःपूजिताःकच्चित्तवगेहेनरर्षभ कच्चिद्राजर्षिवंशोयंत्वामासाद्यमहीप
तिं ९ यथोचितंमहाराजयशसानावसीदति वैशंपायनउवाच इत्येवंवादिनंतंसन्यायविन्नाभ्यभाषत कुशलप्रश्नसंयुक्तंकुशलोवाक्य
कर्मणि १० युधिष्ठिरउवाच कच्चित्तेवर्धतेराजंस्तपोदमशमश्चते अपिमेजननीचेयंशुश्रूषुर्विगतक्लमा ११ अथास्याःसफलोराजन्
वनवासोभविष्यति इयंचमाताज्येष्ठामेशीतवाताध्वकर्शिता १२ घोरेणतपसायुक्तादेवीकच्चिन्नशोचति हतान्पुत्रान्महावीर्यान्क्षत्रधर्म
परायणान् १३ नापध्यायतिवाकच्चिदस्मान्पापकृतःसदा क्वचासौविदुरोराजन्नैनंपश्यामहेवयं १४ संजयःकुशलीचायंकच्चिन्नुतप
सिस्थिरः वैशंपायनउवाच इत्युक्तःप्रत्युवाचेदंधृतराष्ट्रोजनाधिपं कुशलीविदुरःपुत्रतपोघोरंसमाश्रितः १५ वायुभक्षोनिराहारःकृशो
धमनिसंततः कदाचिद्दृश्यतेविप्रैःशून्येस्मिन्काननेक्वचित् १६ इत्येवंब्रुवतस्तस्यजटीवीटामुखःकृशः दिग्वासामलदिग्धांगोवनरेणु
समुक्षितः १७ दूरादालक्षितःक्षत्तातत्राख्यातोमहीपतेः निवर्तमानःसहसाराजन्दृष्ट्वाश्रमंप्रति १८ तमन्वधावन्नृपतिरेकएवयुधि
ष्ठिरः प्रविशंतंवनंघोरंलक्ष्यालक्ष्यंक्वचित्क्वचित् १९ भोभोविदुरराजाहंदयितस्तेयुधिष्ठिरः इतिब्रुवन्नरपतिस्तंयत्नादभ्यधावत् २० त
तोविविक्तएकांतेतस्थौबुद्धिमतांवरः विदुरोवृक्षमाश्रित्यकंचित्तत्रवनांतरे २१ तंराजाक्षीणभूयिष्ठमाकृतीमात्रसूचितं अभिज
ज्ञेमहाबुद्धिंमहाबुद्धिर्युधिष्ठिरः २२ युधिष्ठिरोहमस्मीतिवाक्यमुक्त्वाग्रतःस्थितः विदुरस्याश्रवेराजातंचप्रत्यभिपूजयत २३ ततःसो
निमिषोभूत्वाराजानंतमुदैक्षत संयोज्यविदुरस्तस्मिन्दृष्टिंदृष्ट्यासमाहितः २४ विवेशविदुरोधीमान्गात्रैर्गात्राणिचैवह प्राणान्प्रा
णेषुचदधदिंद्रियाणींद्रियेषुच २५ सयोगबलमास्थायविवेशनृपतेस्तनुं विदुरोधर्मराजस्यतेजसाप्रज्वलन्निव २६ विदुरस्यश
रीरंतुतथैवस्तब्धलोचनं वृक्षाश्रितंतदाराजाददर्शगतचेतनं २७ बलवंतंतथात्मानंमेनेबहुगुणंतदा धर्मराजोमहातेजास्तच्चसस्मा
रपांडवः २८ पौराणमात्मनःसर्वंविद्यावान्सविशांपते योगधर्मंमहातेजाव्यासेनकथितंयथा २९ ५ ७ ७

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९

३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ इतिश्रीनैलकंठीये भारतभावदीपे आश्रमवासिपर्वणि टीकायां षड्विंशोऽध्यायः २६ १

धर्मराजश्चतत्रैनंसंचस्कारयिषुस्तदा दग्धुकामोऽभवद्विद्वानथवागभ्यभाषत ३० भोभोराजन्नदग्धव्यमेतद्विदुरसंज्ञकं कलेवरमिहैवं
ते धर्मएषःसनातनः ३१ लोकाःसंतानिकानामभविष्यंत्यस्यभारत यतिधर्ममवाप्तोसौनैषशोच्यःपरंतप ३२ इत्युक्तोधर्मराजःसविनि
वृत्यततःपुनः राज्ञोवैचित्रवीर्यस्यतत्सर्वंप्रत्यवेदयत् ३३ ततःसराजाद्युतिमान्सचसर्वोजनस्तदा भीमसेनादयश्चैवपरंविस्मयमाग
ताः ३४ तच्छ्रुत्वाप्रीतिमान्राजाभूत्वाधर्मजमब्रवीत आपोमूलंफलंचैवममेदंप्रतिगृह्यतां ३५ यदन्नोहिनरोराजंस्तदन्नोस्यातिं
थिःस्मृतः इत्युक्तःसतथेत्येवंप्राहधर्मात्मजोनृप ३६ फलंमूलंचबुभुजेराज्ञादत्तंसहानुजः ततस्तेवृक्षमूलेषुकृतवासपरिग्रहाः
तांरात्रिमवसन्सर्वेफलमूलजलाशनाः ३७ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांआश्रमवासिकेपर्वणिषड
विंशोऽध्यायः २६ वैशंपायनउवाच ततस्तुराजन्नेतेषामाश्रमेपुण्यकर्मणां शिवानक्षत्रसंपन्नासाव्यतीताथशर्वरी १ ततस्तत्रकथा
श्चासन्तेषांधर्मार्थलक्षणाः विचित्रपदसंचारानानाश्रुतिभिरन्विताः २ पांडवास्त्वभितोमातुर्धरण्यांसुषुपुस्तदा उत्सृज्यचमहार्हाणि
शयनानिनराधिप ३ यदाहारोऽभवद्राजाधृतराष्ट्रोमहामनाः तदाहारानृवीरास्तेन्यवसंस्तांनिशांतदा ४ व्यतीतायांतुशर्वर्यांकृत
पूर्वाह्णिकक्रियः भ्रातृभिःसहितोराजाददर्शाश्रममंडलं ५ सांतःपुरपरीवारःसभृत्यःसपुरोहितः यथासुखंयथोद्देशंधृतराष्ट्राभ्य
नुज्ञया ६ ददर्शतत्रवेदीश्चसंप्रज्वलितपावकाः कृताभिषेकैर्मुनिभिर्हुताग्निभिरुपस्थिताः ७ वानेयपुष्पनिकरैराज्यधूमोद्ग
मैरपि ब्राह्मेणवपुषायुक्तायुक्तामुनिगणैस्तथा ८ मृगयूथैरनुद्विग्नैस्तत्रतत्रसमाश्रितैः अशंकितैःपक्षिगणैःप्रगीतैरिवचप्रभो ९
केकाभिर्नीलकंठानांदात्यूहानांचकूजितैः कोकिलानांचकुहुरवैःसुखरैःश्रुतिमनोहरैः १० प्राधीतद्विजघोषैश्चक्वचित्क्वचिदलंकृ
तं फलमूलसमाहारैर्महद्भिश्चोपशोभितं ११ ततःसराजाप्रददौतापसार्थमुपाहृतान् कलशान्कांचनान्राजंस्तथैवोदुंबरानपि
१२ अजिनानिप्रवेणीश्चस्रुक्स्रुवंचमहीपतिः कमंडलूंश्चस्थालीश्चपिठराणिचभारत १३ भाजनानिचलोहानिपात्रीश्चविविधा
नृप यद्यदिच्छतियावच्चयच्चान्यदपिभाजनं १४ एवंसराजाधर्मात्मापरीत्याश्रममंडलं वसुविश्राण्यतत्सर्वंपुनरायान्महीपतिः
१५ कृताह्निकंचराजानंधृतराष्ट्रंमहीपतिं ददर्शासीनमव्यग्रंगांधारीसहितंतदा १६ छ छ छ

२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

मातरंचाविदूरस्थांशिष्यवत्प्रणतांस्थितां कुंतींददर्शधर्मात्माशिष्याचारसमन्वितां १७ सतमभ्यर्च्यराजानंनामसंश्राव्यचात्मनः निर्दि
ष्टेनाभ्यनुज्ञातोबृस्यामुपविवेशह १८ भीमसेनादयश्चैवपांडवाभरतर्षभ अभिवाद्योपसंगृह्यनिषेदुःपार्थिवाज्ञया १९ सतैःपरिवृतोरा
जाशुशुभेऽतीवकौरवः बिभ्रद्ब्राह्मींश्रियंदीप्तांदेवैरिवबृहस्पतिः २० तथातेषूपविष्टेषुसमाजग्मुर्महर्षयः शतयूपप्रभृतयःकुरुक्षेत्रनि
वासिनः २१ व्यासश्चभगवान्विप्रोदेवर्षिगणसेवितः वृतःशिष्यैर्महातेजादर्शयामासपार्थिवं २२ ततःसराजाकौरव्यःकुंतीपुत्र
श्चवीर्यवान भीमसेनादयश्चैवप्रत्युत्थायाभ्यवादयन २३ समागतस्ततोव्यासःशतयूपादिभिर्वृतः धृतराष्ट्रंमहीपालमास्यतामित्यभा
षत २४ वरंतुविष्टरंकौश्यंकृष्णाजिनकुशोत्तरं प्रतिपेदेतदाव्यासस्तदर्थमुपकल्पितं २५ तेचसर्वेद्विजश्रेष्ठाविष्टरेषुसमंततः द्वै-
पायनाभ्यनुज्ञातानिषेदुर्विपुलौजसः २६ इत्याश्रमवासिकेपर्वणिसप्तविंशोऽध्यायः २७ वैशंपायनउवाच ततःसमुपविष्टेषुपांडवेषु
महात्मसु व्यासःसत्यवतीपुत्रइदंवचनमब्रवीत् १ धृतराष्ट्रमहाबाहोकच्चित्तेवर्धतेतपः कच्चिन्मनस्तेप्रीणातिवनवासेनराधिप २
कच्चिद्धृदिनतेशोकोराजन्पुत्रविनाशजः कच्चिज्ज्ञानानिसर्वाणिसुप्रसन्नानितेनघ ३ कच्चिद्बुद्धिंदृढांकृत्वाचरस्यारण्यकंविधिं कच्चि
द्वधूश्चगांधारीनशोकेनाभिभूयते ४ महाप्राज्ञाबुद्धिमतीदेवीधर्मार्थदर्शिनी आगमापायतत्वज्ञाकच्चिदेषानशोचति ५ कच्चित्कुंतीचरा
जंस्त्वांशुश्रूषत्यनहंकृता यापरित्यज्यस्वंपुत्रंगुरुशुश्रूषणेरता ६ कच्चिद्धर्मसुतोराजामहात्मासुमहामना भीमार्जुनयमाश्चैवकच्चि
देतेपिसांत्विताः ७ कच्चिन्नंदसिदृष्ट्वैतान्कच्चित्तेनिर्मलंमनः कच्चिच्छुद्धाभावोऽसिजातज्ञानोनराधिप ८ एतद्धित्रितयंश्रेष्ठंसर्वभू
तेषुभारत निर्वैरतामहाराजसत्यमक्रोधएवच ९ कच्चित्तेनचमोहोस्तिवनवासेनभारत स्ववशेवन्यमन्नंवाउपवासोपिवाभवेत
१० विदितंचापिराजेंद्रविदुरस्यमहात्मनः गमनंविधिनानेनधर्मस्यसुमहात्मनः ११ मांडव्यशापाद्धिसवैधर्मोविदुरतांगतः महाबु
द्धिर्महायोगीमहात्मासुमहामनाः १२ बृहस्पतिर्वादेवेषुशुक्रोवाप्यसुरेषुच नतथाबुद्धिसंपन्नोयथासपुरुषर्षभः १३ तपोबलव्य
यंकृत्वासुचिरात्संभृतंतदा मांडव्येनर्षिणाधर्मोह्यभिभूतःसनातनः १४ नियोगाद्ब्रह्मणःपूर्वंमयास्वेनबलेनच वैचित्रवीर्यकेक्षे
त्रेजातःससुमहामतिः १५ भ्रातातवमहाराजदेवदेवःसनातनः धारणान्मनसाध्यानाद्यंधर्मंकवयोविदुः १६ ७ ७

१७ १८ १९ २० २१ २२ २३ २४ २५ इतिश्रीनेलकंठीये भारतभावदीपे आश्रमवासिके पर्वणि टीकायां अष्टाविंशोऽध्याय २८

सत्येनसंवर्द्धयतियोदमेनशमेनच अहिंसयाचदानेनतप्यमानःसनातनः १७ येनयोगबलाज्जातःकुरुराजोयुधिष्ठिरः धर्मइत्ये
षनृपतेप्राज्ञेनामितबुद्धिना १८ यथावन्हिर्यथावायुर्यथापःपृथिवीयथा यथाकाशंतथाधर्मइहचामुत्रचस्थितः १९ सर्वगश्चैवरा
जेंद्रसर्वंव्याप्यचराचरं दृश्यतेदेवदेवैःससिद्धैर्निर्मुक्तकल्मषैः २० योहिधर्मःसविदुरोविदुरोयःसपांडवः सएषराजन्दृश्यस्तेपांडवः
प्रेष्यवत्स्थितः २१ प्रविष्टःसमहात्मानंभ्रातातेबुद्धिसत्तमः दृष्ट्वामहात्माकौंतेयंमहायोगबलान्वितः २२ त्वांचापिश्रेयसायोक्ष्यन
चिराद्भरतर्षभ संशयच्छेदनार्थायप्राप्तंमांविद्धिपुत्रक २३ नकृतंयैःपुराकैश्चित्कर्मलोकेमहर्षिभिः आश्चर्यभूतंतपसःफलंतद्दर्शया
मिवः २४ किमिच्छसिमहीपालमत्तःप्राप्तुमभीप्सितं द्रष्टुंप्रष्टुमथश्रोतुंतत्कर्त्तास्मितवानघ २५ इत्याश्रमवासिकेपर्वणिअष्टावि
शोऽध्यायः २८ जनमेजयउवाच वनवासंगतेविप्रधृतराष्ट्रेमहीपतौ सभार्येनृपशार्दूलेवध्वाकुंत्यासमन्विते १ विदुरेचापिसं
सिद्धेधर्मराजंव्यपाश्रिते वसत्सुपांडुपुत्रेषुसर्वेष्वाश्रममंडले २ यत्तदाश्चर्यमितिवैकरिष्यामीत्युवाचह व्यासःपरमतेजस्वीमहर्षिस्तद्व
दस्वमे ३ वनवासेचकौरव्यःकियंतंकालमच्युतः युधिष्ठिरोनरपतिर्न्यवसत्सजनस्तदा ४ किमाहाराश्चतेतत्रससैन्यान्यवसन्प्र
भो सांतःपुरामहात्मानइतितद्ब्रूहिमेनघ ५ वैशंपायनउवाच तेनुज्ञातास्तदाराजन्कुरुराजेनपांडवाः विविधान्यन्नपानानि
विश्राम्यानुभवंतिते ६ मासमेकंविजह्रुस्तेससैन्यांतःपुरावने अथतत्रागमत्व्यासोयथोक्तंतेमयानघ ७ तथाचतेषांसर्वेषांकथाभिर्नृपस
न्निधौ व्यासमन्वासतांराजन्नाजग्मुर्मुनयोपरे ८ नारदःपर्वतश्चैवदेवलश्चमहातपाः विश्वावसुस्तुंबरुश्चचित्रसेनश्चभारत ९ तेषाम
पियथान्यायंपूजांचक्रेमहातपाः धृतराष्ट्राभ्यनुज्ञातःकुरुराजोयुधिष्ठिरः १० निषेदुस्तेततःसर्वेपूजांप्राप्ययुधिष्ठिरात् आसनेष्वथपु
ण्येषुबर्हिणेषुवरेषुच ११ तेषुतत्रोपविष्टेषुसतुराजामहामतिः पांडुपुत्रैःपरिवृतोनिषसादकुरूद्वह १२ गांधारीचैवकुंतीचद्रौपदीसात्वती
तथा स्त्रियश्चान्यास्तथान्याभिःसहोपविविशुस्ततः १३ तेषांतत्रकथादिव्याधर्मिष्ठाश्चाभवन्नृप ऋषीणांचपुराणानांदेवासुरविमिश्रिताः
१४ ततःकथांतेव्यासस्तंप्रज्ञाचक्षुषमीश्वरं प्रोवाचवदतांश्रेष्ठःपुनरेवसतद्वचः १५ प्रीयमाणोमहातेजाःसर्वेवेदविदांवरः विदि
तंममराजेंद्रयत्तेहृदिविवक्षितं १६ दह्यमानस्यशोकेनतवपुत्रकृतेनवै गांधार्याश्चैवयद्दुःखंहृदितिष्ठतिनित्यदा १७ ७ ७

१ २ ३ ४ ५ ६ ७ ८ ९ १० बर्हिणेषुपक्षिबर्हमतूलिकामयेषु ११ १२ १३ १४ १५ १६ १७

कुंत्याश्चयन्महाराजद्रौपद्याश्चहृदिस्थितं यच्चधारयतेतीव्रंदुःखंपुत्रविनाशजं १८ सुभद्राकृष्णभगिनीतच्चापिविदितंमम श्रुत्वासमाग
ममिदंसर्वेषांवस्ततोनृप १९ संशयच्छेदनार्थायप्राप्तःकौरवनंदन इमेचदेवगंधर्वाःसर्वेचैवमहर्षयः २० पश्यंतुतपसोवीर्यमद्यमे
चिरसंभृतं तदुच्यतांमहाराजकंकामंप्रददामिते २१ प्रवणोस्मिवरंदातुंपश्यमेतपसःफलं एवमुक्तःसराजेंद्रोव्यासेनामितबुद्धिना
२२ मुहूर्तमिवसंचिंत्यवचनायोपचक्रमे धन्योस्म्यनुगृहीतश्चसफलंजीवितंचमे २३ यन्मेसमागमोद्येहभवद्भिःसहसाधुभिः अ
द्यचाप्यवगच्छामिगतिमिष्टांमहात्मनः २४ ब्रह्मकल्पैर्भवद्भिर्यत्समेतोहंतपोधनाः दर्शनादेवभवतांपूतोहंनात्रसंशयः २५ विद्य
तेनभयंचापिपरलोकान्ममानघाः किंतुतस्यसुदुर्बुद्धेर्मंदस्यापनयैर्भृशं २६ दूयतेममनोनित्यंस्मरतःपुत्रगृद्धिनः अपापाः
पांडवायेननिकृताःपापबुद्धिना २७ घातितापृथिवीयेनसहयाःसनरद्विपा राजानश्चमहात्मानोनानाजनपदेश्वराः २८ आ
गम्यममपुत्रार्थेसर्वेमृत्युवशंगताः एतेपितॄंश्चदारांश्चप्राणांश्चमनसःप्रियान् २९ परित्यज्यगताःशूराःप्रेतराजनिवेशनं कानुतेषां
गतिर्ब्रह्मन्मित्रार्थेयेहतामृधे ३० तथैवपुत्रपौत्राणांममयेनिहतायुधि दूयतेममनोभीक्ष्णंघातयित्वामहाबलं ३१ भीष्मं
शांतनवंवृद्धंद्रोणंचद्विजसत्तमं ममपुत्रेणमूढेनपापेनसुहृद्द्विषा ३२ क्षयंनीतंकुलंदीप्तंपृथिवीराज्यमिच्छता एतत्सर्व
मनुस्मृत्यदह्यमानोदिवानिशं ३३ नशांतिमधिगच्छामिदुःखशोकसमाहतः इतिमेचिंतयानस्यपितःशांतिर्नविद्यते ३४ वै-
शंपायनउवाच तच्छ्रुत्वाविविधंतस्यराजर्षेःपरिदेवितं पुनर्नवीकृतःशोकोगांधार्याजनमेजय ३५ कुंत्याद्रुपदपुत्र्याश्चसुभद्रा
यास्तथैवच तासांचनरनारीणांवधूनांकौरवस्यह ३६ पुत्रशोकसमाविष्टागांधारीत्विदमब्रवीत श्वशुरंबद्धनयनादेवीप्रांजलि
रुत्थिता ३७ षोडशेमानिवर्षाणिगतानिमुनिपुंगव अस्यराज्ञोहतान्पुत्रान्शोचतोनशमोविभो ३८ पुत्रशोकसमाविष्टोनिश्वसन्
ह्येषभूमिपः नशेतेवसतीःसर्वाधृतराष्ट्रोमहामुने ३९ लोकानन्यान्समर्थोसिस्रष्टुंसर्वंतपोबलात किंमुलोकांतरगतान्राज्ञोदर्श
यितुंसुतान् ४० इयंचद्रौपदीकृष्णाहतज्ञातिसुताभृशं शोचत्यतीवसर्वासांस्नुषाणांदयितास्नुषा ४१ तथाकृष्णस्यभगिनीसुभद्राभद्र
भाषिणी सौभद्रवधसंतप्ताभृशंशोचतिभाविनी ४२ इयंचभूरिश्रवसोभार्यापरमसंमता भर्तृव्यसनशोकार्त्ताभृशंशोचतिभाविनी ४३

४४ ४५ ४६ आरंभेणशोकोद्यमेन मामुपास्ते भार्याशतंरोदनंकुर्वन्मामेवपरिवार्यतिष्ठतीत्यर्थः आरंभउद्यमेदर्पेत्वरायांवाक्यक्रेपिचेति आरंभएवात्रग्राह्यः ४७

यस्यास्तुश्वशुरोधीमान्बाल्हीकःसकुरूद्वहः निहतःसोमदत्तश्चपितासहमहारणे ४४ श्रीमतोस्यमहाबुद्धेःसंग्रामेष्वपलायिनः पुत्र
स्यतेपुत्रशतंनिहतंयद्रणाजिरे ४५ तस्यभार्याशतमिदंदुःखशोकसमाहतं पुनःपुनर्वर्धयानंशोकंराज्ञोममैवच ४६ तेनारंभे
णमहतामामुपास्तेमहामुने येचशूरामहात्मानःश्वशुरामेमहारथाः ४७ सोमदत्तप्रभृतयःकानुतेषांगतिःप्रभो तवप्रसादाद्भग
वन्विशोकोयंमहीपतिः ४८ यथास्याद्भविताचाहंकुंतीचेयंवधूस्तव इत्युक्तवत्यांगांधार्यांकुंतीव्रतकृशानना ४९ प्रच्छन्नजातंपु
त्रंतंसस्माराऽदित्यसन्निभं तामृषिर्वरदोव्यासोदूरश्रवणदर्शनः ५० अपश्यद्दुःखितांदेवींमातरंसव्यसाचिनः तामुवाचततोव्यासो
यत्तेकार्यंविवक्षितं ५१ तद्ब्रूहित्वंमहाभागेयत्तेमनसिवर्त्तते श्वशुरायततःकुंतीप्रणम्यशिरसातदा ५२ उवाचवाक्यंसव्रीडाववि
वृण्वानापुरातनं ५३ इत्याश्रमवासिकेपर्वणिऊनत्रिंशोऽध्यायः २९ कुंत्युवाच भगवन्श्वशुरोमेसिदैवतस्यापिदैवतं समेदे
वातिदेवस्त्वंशृणुसत्यांगिरंमम १ तपस्वीकोपनोविप्रोदुर्वासानाममेपितुः भिक्षामुपागतोभोक्तुंतमहंपर्यतोषयं २ शौचेनत्वा
गसस्त्यागैःशुद्धेनमनसातथा कोपस्थानेष्वपिमहत्स्वकुप्यंनकदानच ३ सुप्रीतोवरदोमेभूत्कृतकृत्योमहामुनिः अवश्यंतेगृही
तव्यमितिमांसोब्रवीद्वचः ततःशापभयाद्विप्रमवोचंपुनरेवतं एवमस्त्विति चप्राहपुनरेवसमेद्विजः ५ धर्मस्यजननीभद्रेभवित्री
त्वंशुभानने वशेस्थास्यंतितेदेवायांस्त्वमावाहयिष्यसि ६ इत्युक्त्वांतर्हितोविप्रस्ततोहंविस्मिताभवं नचसर्वास्ववस्थासुस्मृति
र्मेविप्रणश्यति ७ अथहर्म्यतलस्थाहंरविमुद्यंतमीक्षती संस्मृत्यतदृषेर्वाक्यंस्पृहयंतीदिवाकरं ८ स्थिताहंबालभावेनतत्र
दोषमबुध्यती अथदेवःसहस्रांशुर्मत्समीपगतोभवत् ९ द्विधाकृत्वात्मनोदेहंभूमौचगगनेपिच ततापलोकानेकेनद्वितीयेनागमत्स
मां १० समामुवाचवेपंतींवरंमत्तोवृणीष्वह गम्यतामितितंचाहंप्रणम्यशिरसाऽवदं ११ समामुवाचतिग्मांशुर्वृथाह्वानंनमे
क्षमं धक्ष्यामित्वांचविप्रंचयेनदत्तोवरस्तव १२ तमहंरक्षतीविप्रंशापादनपकारिणं पुत्रोमेत्वत्समोदेवभवेदितिततोब्रुवं १३
ततोमांतेजसाविश्यमोहयित्वाचभानुमान् उवाचभवितापुत्रस्तवेत्यभ्यगमद्दिवं १४ ततोहमंतर्भवनेपितुर्वृत्तांतरक्षिणी गू
ढोत्पन्नंसुतंबालंजलेकर्णमवासृजं १५ नूनंतस्यैवदेवस्यप्रसादात्पुनरेवतु कन्याहमभवंविप्रयथाप्राहसमामृषिः १६

४८ ४९ ५० ५१ ५२ ५३ इतिश्रीनैलकंठीयेभा०भा०दी०आ०पर्वणिटी०ऊनत्रिंशोऽध्यायः २९ भगवन्निति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

१७ १८ १९ २० २१ संहर्षेणरता २२ २३ २४ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांत्रिंशोध्यायः
३०

समयामूढयापुत्रोज्ञायमानोप्युपेक्षितः तन्मांदहतिविप्रर्षेयथासुविदितंतव १७ यदिपापमपापंवातदेतद्विवृतंमया तं
द्रष्टुमिच्छामिभगवन्व्यपनेतुंत्वमर्हसि १८ यच्चास्यराज्ञोविदितंहृदिस्थंभवतोनघ तंचायंलभतांकाममद्यैवमुनिसत्तम
१९ इत्युक्तःप्रत्युवाचेदंव्यासोवेदविदांवरः साधुसर्वमिदंभाव्यमेवमेतद्यथात्थमां २० अपराधश्चतेनास्तिकन्याभावंग
ताह्यसि देवाश्चैश्वर्यवंतोवैशरीराण्याविशंतिवै २१ संतिदेवनिकायाश्चसंकल्पाज्जनयंतिये वाचादृष्ट्यातथास्पर्शात्संहर्षेण
तिपंचधा २२ मनुष्यधर्मवर्त्तन्यास्तवमोहोनयुज्यते इतिकुंतिविजानीहिव्येतुतेमानसोज्वरः २३ सर्वंबलवतांपथ्यंसर्वंब
लवतांशुचि सर्वंबलवतांधर्मःसर्वंबलवतांस्वकं २४ इत्याश्रमवासिकेपर्वणित्रिंशोध्यायः ३० व्यासउवाच भद्रेद्रक्ष्य
सिगांधारिपुत्रान्भ्रातॄन्सखींस्तथा वधूश्चपतिभिःसार्धंनिशिसुप्तोत्थितानिव १ कर्णंद्रक्ष्यतिकुंतीचसौभद्रंचापियादवी द्रौ
पदीपंचपुत्रांश्चपितॄन्भ्रातॄंस्तथैवच २ पूर्वमेवैषहृदयेव्यवसायोभवन्मम यदास्मिचोदितोराज्ञाभवत्यापृथयैवच ३ नते
शोच्यामहात्मानःसर्वएवनरर्षभाः क्षत्रधर्मपराःसंतस्तथाहिनिधनंगताः ४ भवितव्यमवश्यंतत्सुरकार्यमनिंदिते अवतेरु
स्ततःसर्वेदेवभागामहीतलं ५ गंधर्वाप्सरसश्चैवपिशाचागुह्यराक्षसाः तथापुण्यजनाश्चैवसिद्धादेवर्षयोपिच ६ देवाश्चदान
वाश्चैवतथादेवर्षयोमलाः तएतेनिधनंप्राप्ताःकुरुक्षेत्ररणाजिरे ७ गंधर्वराजोयोधीमान्धृतराष्ट्रइतिश्रुतः सएवमानुषेलो
केधृतराष्ट्रःपतिस्तव ८ पांडुंमरुद्गणाद्विद्धिविशिष्टतममच्युतं धर्मस्यांशोभवत्क्षत्ताराजाचायंयुधिष्ठिरः ९ कलिंदुर्योधनं
विद्धिशकुनिंद्वापरंतथा दुःशासनादीन्विद्धित्वंराक्षसान्शुभदर्शने १० मरुद्गणाद्भीमसेनंबलवंतमरिंदमं विद्धित्वंतुनरमृ-
षिमिमंपार्थंधनंजयं ११ नारायणंहृषीकेशमश्विनौयमजौतथा द्विधाकृत्वात्मनोदेहमादित्यंतपतांवरं १२ लोकांश्च
तापयानंवैविद्धिकर्णंचशोभने यःसवैराथउद्भूतःसंहर्षजननस्तथा १३ यश्चपांडवदायादोहतःषड्भिर्महारथैः ससो
मइहसौभद्रोयोगादेवाभवद्द्विधा १४ द्रौपद्यासहसंभूतंधृष्टद्युम्नंचपावकात् अग्नेर्भागंशुभंविद्धिराक्षसंतुशिखंडिनं १५
द्रोणंबृहस्पतेर्भागंविद्धिद्रौणिंचरुद्रजं भीष्मंचविद्धिगांगेयंवसुंमानुषतांगतं १६ ७ ७ ७

भद्रेद्रक्ष्यसीतिस्पष्टार्थः. १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

१७ १८ १९ २० २१ २२ २३ २४ २५ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांएक
त्रिंशोऽध्यायः ३१ ततोनिशायामित्यस्मिन्नध्यायद्वयेमृतानांपुनर्दर्शनमुक्तंतेनतेषांसत्वमस्तीतिस्पष्टमुक्तं अतोमृतानांसत्वमस्तिनवेतिसंशयःपरा
स्तः अथभस्मीभूतानांकथंप्रत्यक्षेणदर्शनंस्वप्नवदितिचेत् व्यासस्येंद्रजालिकत्वापत्यासंशयोच्छेदकत्वानुपपत्तिः अथदेवताभावंगतानांतेषांपुन
र्भीष्मादिभावेनयोगबलादभिव्यक्तिर्भवतितर्हिभस्मीभूतस्यदेहस्यपुनरुदयायोगात् तत्सदृशैर्देहांतरैरुपेतानामेवतेषांदर्शनमितिवाच्यं तथापिदेहांतरेम
मायंभर्त्तेतिबुद्धिमतीनांस्त्रीणांभ्रांतिरेवपूर्वदेहनाशस्यदृढतरस्मरणात् अस्मरणेतुपुनः स्वप्नतुल्यतेतितुल्यं अत्रवयंब्रूमः हार्दविद्यायांश्रूयते तइमेसत्याः
कामाअनृतापिधानाइति तथादहराकाशप्रकरणएतत्सत्यंब्रह्मपुरमत्रहिसर्वेकामाःसमाहिताइतितथा योयोह्यस्येतः प्रैतिनतमिहदर्शनायलभतइत्युप-

एवमेतेमहाप्राज्ञेदेवामानुष्यमेत्यहि ततस्तुनर्गतास्स्वर्गंकृतेकर्मणिशोभने १७ यच्चवैहृदिसर्वेषांदुःखमेतच्चिरंस्थितं तदद्यव्यपनेष्यामि
परलोककृतान्भयात् १८ सर्वेभवंतोगच्छंतुनदींभागिरथींप्रति तत्रद्रक्ष्यथतान्सर्वान्येहतास्मिन्रणाजिरे १९ वैशंपायनउवाच इ-
तिव्यासस्यवचनंश्रुत्वासर्वोजनस्तदा महतासिंहनादेनगंगामभिमुखोययौ २० धृतराष्ट्रश्चसामात्यःप्रययौसहपांडवैः सहितोमुनिशार्दूलैर्गं
धर्वैश्चसमागतैः २१ ततोगंगांसमासाद्यक्रमेणसजनार्णवः निवासमकरोत्सर्वोयथाप्रीतियथासुखं २२ राजाचपांडवैःसार्धमिष्टेदेशेस
हानुगः निवासमकरोद्धीमान्सस्त्रीवृद्धपुरःसरः २३ जगामतदहश्चापितेषांवर्षशतंयथा निशांप्रतीक्ष्यमाणानांदिदृक्षूणांमृतान्नृपान् २४
अथपुण्यंगिरिवरमस्तमभ्यगमद्रविः ततःकृताभिषेकास्तेनैशंकर्मसमाचरन् २५ इतिश्रीआश्रमवासिकेपर्वणिएकत्रिंशोऽध्यायः ३१
वैशंपायनउवाच ततोनिशायांप्राप्तायांकृतसायाह्निकक्रियाः व्यासमभ्यगमन्सर्वेयेचतत्रसमागताः १ धृतराष्ट्रस्तुधर्मात्मापांडवैःसहि
तस्तदा शुचिरेकमनाःसार्धमृषिभिस्तैरुपाविशत् २ गांधार्यासहनार्यस्तुसहिताःसमुपाविशन् पौरजानपदश्चापिजनःसर्वोयथावयः
३

क्रम्य यच्चास्येहास्ति यच्चनास्तिसर्वंतदत्रगत्वाविंदतइत्यादि तस्मात् सत्यंब्रह्मपुरंहृदंबरमित्यर्थः संमतस्तदासन्नेवास्त्यतएवतत्रपुरुषः पश्यतीत्यादिकं
मिथ्याब्रह्मपुंशरीरममुनासत्यंपुरंछादितसर्पेण स्रगिवेत्यमुष्यविलयेसत्यंपुरंप्रकाशते तस्मात् विप्रत्युपस्थापितममपार्थिकंजेवंरूपंकर्तृभोक्तृरागद्वेषाद्यनेकान
र्थकलुषितंनहिलयनेनतद्विपरीतमपहतपाप्मत्वादिविशिष्टंपारमेश्वरंरूपंविद्ययाप्रतिपद्यते सर्पादिविलयेनरज्ज्वादिवदितिभाष्याच्च ब्राह्मलौकिकाएवसत्याः
भीष्मादयोऽनृतैर्जन्मादिभिर्भावविकारैराविर्भूयतिरोभूताःसंतोमहर्षिविद्ययाआविर्भूयंस्याभिश्चास्त्वेनगृहितासंतस्ताभिस्सहरेमिरेइतियुक्तमुत्पश्यामः विरोधस्त्वस्म
त्कृतवेदांतकतकेदहराधिकरणेद्रष्टव्यः अपरार्थस्तुस्पष्टएव १ २ ३ १८

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५

ततोव्यासोमहातेजाःपुण्यंभागीरथीजलं अवगाह्याजुहावाथसर्वान्लोकान्महामुनिः ४ पांडवानांचयेयोधाःकौरवाणांचसर्वशः
राजानश्चमहाभागानानादेशनिवासिनः ५ ततःसतुमुलःशब्दोजलांतेजनमेजय प्रादुरासीद्यथापूर्वंकुरुपांडवसेनयोः ६ ततस्ते
पार्थिवाःसर्वेभीष्मद्रोणपुरोगमाः ससैन्याःसलिलात्तस्मात्समुत्तस्थुःसहस्रशः ७ विराटद्रुपदौचैवसहपुत्रौससैनिकौ द्रौपदेयाश्चसौभ
द्रोराक्षसश्चघटोत्कचः ८ कर्णदुर्योधनौचैवशकुनिश्चमहारथः दुःशासनादयश्चैवधार्तराष्ट्रामहाबलाः ९ जरासंधिर्भगदत्तोजलसं
धश्चवीर्यवान् भूरिश्रवाःशलःशल्योवृषसेनश्चसानुजः १० लक्ष्मणोराजपुत्रश्चधृष्टद्युम्नस्यचात्मजः शिखंडिपुत्राःसर्वेचधृष्टकेतुश्चसा
नुजः ११ अचलोवृषकश्चैवराक्षसश्चाप्यलायुधः वाल्हिकःसोमदत्तश्चचेकितानश्चपार्थिवः १२ एतेचान्येचबहवोबहुत्वाद्येनकीर्तिताः
सर्वेभास्करदेहास्तेसमुत्तस्थुर्जलात्ततः १३ यस्यवीरस्ययोवेषोयोध्वजोयच्चवाहनं तेनतेनव्यदृश्यंतसमुपेतानराधिपाः १४ दिव्यां
बरधराःसर्वेसर्वेभ्राजिष्णुकुंडलाः निर्वैरानिरहंकाराविगतक्रोधमत्सराः १५ गंधर्वैरुपगीयंतस्तूयमानाश्चबंदिभिः दिव्यमाल्यां
बरधरावृताश्चाप्सरसांगणैः १६ धृतराष्ट्रस्यचतदादिव्यंचक्षुर्नराधिप मुनिःसत्यवतीपुत्रःप्रीतःप्रादात्तपोबलात १७ दिव्यज्ञानब
लोपेतागांधारीचयशस्विनी ददर्शपुत्रांस्तान्सर्वान्येचान्येपिमृधेहताः १८ तदद्भुतमचिंत्यंचसुमहल्लोमहर्षणं विस्मितःस
जनःसर्वोददर्शानिमिषेक्षणः १९ तदुत्सवमहोदग्रंहृष्टनारीनराकुलं आश्चर्यभूतंददृशेचित्रंपटगतंयथा २० धृ
तराष्ट्रस्तुतान्सर्वान्पश्यन्दिव्येनचक्षुषा मुमुदेभरतश्रेष्ठप्रसादात्तस्यवैमुनेः २१ इत्याश्रमवासिकेपर्वणिद्वात्रिंशोऽध्या
यः ३२ वैशंपायनउवाच ततस्तेपुरुषश्रेष्ठाःसमाजग्मुःपरस्परं विगतक्रोधमात्सर्याःसर्वेविगतकल्मषाः १ विधिं
परममास्थायब्रह्मर्षिविहितंशुभं संहृष्टमनसःसर्वेदेवलोकइवामराः २ पुत्रःपित्राचमात्राचभार्याश्चपतिभिःसह भ्रा
त्राभ्रातासखाचैवसख्याराजन्समागताः ३ पांडवास्तुमहेष्वासंकर्णंसौभद्रमेवच संप्रहृष्टाःसमाजग्मुर्द्रौपदेयां
श्चसर्वशः ४ ततस्तेप्रीयमाणावैकर्णेनसहपांडवाः समेत्यपृथिवीपालसौहृदेचस्थिताभवन् ५ परस्परंसमागम्य
योधास्तेभरतर्षभ मुनेःप्रसादात्तेह्येवंक्षत्रियानष्टमन्यवः ६ ७ ७ ७ ७ ७

१६ १७ १८ १९ २० २१ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांद्वात्रिंशोऽध्यायः ३२ १ २ ३ ४ ५ ६ ७

अस्मोह्रदंपरित्यज्यसोह्येपर्यवस्थिताः एवंसमागताःसर्वेगुरुभिर्बांधवैःसह ७ पुत्रैश्चपुरुषव्याघ्राःकुरवोन्येचपार्थिव तांरा
त्रिमखिलामेवंविहृत्यप्रीतमानसाः ८ मेनिरेपरितोषेणनृपाःस्वर्गसदोयथा नात्रशोकोभयंत्रासोनारतिर्नायशोभवत् ९ परस्परंस
मागम्ययोधानांभरतर्षभ समागतास्ताःपितृभिर्भ्रातृभिःपतिभिःसुतैः १० मुदंपरमिकांप्राप्यनार्योदुःखमथात्यजन् एकांरात्रिंविहृत्ये
वंतेवीरास्ताश्चयोषितः ११ आमंत्र्यान्योन्यमाश्लिष्यततोजग्मुर्यथागतं ततोविसर्जयामासलोकांस्तान्मुनिपुंगवः १२ क्षणेनांतर्हिताश्चैव
प्रेक्षतामेवतेभवन् अवगाह्यमहात्मानःपुण्यांभागीरथींनदीं १३ सरथाःसध्वजाश्चैवस्वानिवेश्मानिभेजिरे देवलोकंययुःकेचित्के
चित्ब्रह्मसदस्तथा १४ केचिच्चवारुणंलोकंकेचित्कौबेरमाप्नुवन् ततोवैवस्वतंलोकंकेचिच्चैवाप्नुवन्नृपाः १५ राक्षसानांपिशा
चानांकेचिच्चाप्युत्तरान्कुरून् विचित्रगतयश्चान्येयानवाप्यामरैस्सह १६ आजग्मुस्तेमहात्मानःसवाहाःसपदानुगाः गते
षुतेषुसर्वेषुसलिलस्थोमहामुनिः १७ धर्मशीलोमहातेजाःकुरूणांहितकृत्तथा ततःप्रोवाचताःसर्वाःक्षत्रियानिहतेश्वराः १८
यायाःपतिकृतांल्लोकानिच्छंतिपरमास्त्रियः ताजान्हवीजलंक्षिप्रमवगाहंत्वतंद्रिताः १९ ततस्तस्यवचःश्रुत्वाश्रद्दधानावरांगनाः
श्वशुरंसमनुज्ञाप्यविविशुर्जान्हवीजलं २० विमुक्तामानुषैर्देहैस्ततस्ताभर्तृभिःसह समाजग्मुस्तदासाध्व्यःसर्वाएवविशांपते
२१ एवंक्रमेणसर्वास्ताःशीलवत्यःपतिव्रताः प्रविश्यक्षत्रियामुक्ताजग्मुर्भर्तृसलोकतां २२ दिव्यरूपसमायुक्तादिव्याभरणभूषि
ताः दिव्यमाल्यांबरधरायथासांपतयस्तथा २३ ताःशीलगुणसंपन्नाविमानस्थागतक्लमाः सर्वाःसर्वगुणोपेताःस्वस्थानंप्रतिपे
दिरे २४ यस्ययस्यतुयःकामस्तस्मिन्कालेबभूवह तंतंविसृष्टवान्व्यासोवरदोधर्मवत्सलः २५ तच्छ्रुत्वानरदेवानांपुनरागमनंनराः
जहृषुर्मुदिताश्चासन्नानादेशगताअपि २६ प्रियैःसमागमंतेषांयःसम्यक्शृणुयान्नरः प्रियाणिलभतेनित्यमिहचप्रेत्यचै
वह २७ इष्टबांधवसंयोगमनायासमनामयं यश्चैतच्छ्रावयेद्विद्वान्विदुषोधर्मवित्तमः २८ सयशःप्राप्नुयाल्लोकेपरत्र
चशुभांगतिं स्वाध्याययुक्तामनुजास्तपोयुक्ताश्चभारत २९ साध्व्याचारादमोपेतादाननिर्धूतकल्मषाः ऋजवःशुचयःशांताहिं
सानृतविवर्जिताः ३१ आस्तिकाःश्रद्दधानाश्चधृतिमंतश्चमानवाः श्रुत्वाश्चर्यमिदंसर्वेह्यवाप्स्यंतिपरांगतिं ३१ इत्याश्रमवा०पं०त्रयस्त्रिंशो
ध्यायः ३३

इममेवार्थंप्रश्नोत्तराभ्यांनिरूपयति एतच्छ्रुत्वेत्यादिना १ कथंनुत्यक्ता अस्मीभूतायेदेहास्तेषांतद्रूपेणैवपूर्वरूपेणैवदर्शनंजातमित्यर्थः २ इतीतिसर्वेषांदेवागममनु
ष्याणांकर्माणिकुर्वतांकर्मणांकर्मनाशोभोगमंतरेणकदापिनास्ति यथास्त्रोमेशरभे. कर्मभिः शरभमशरभंवास्यात्रंदेहंप्राप्य तत्तद्भोगेकर्मफलंसुखदुःखाद्यनुभवति देहस्तुत
दानीमविकृतएवतिष्ठति एवंकर्मजेषुमानुषादिदेहेषुनश्यत्स्वपिब्रह्मलोकाशस्थाःपित्रादिदेहाः अविनश्यएवसंति अतएवतमात्मानं ममपितृन्येतास्यमत्यानूकागान्
भुंजतेकामचारोभवतिसयदिपितृलोककामोभवतिसंकल्पादेवास्यपितरःसमुत्तिष्ठंतितेनस्वपितृलोकेनसंपन्नोमहीयतेइतिश्रुतिःपरत्वात्पित्रादीनामत्रानदर्शयति
३४ तदेतदाह महाभूतानीति महाभूतानांप्राणिनामधिपतेरीश्वरस्यसंश्रयात् महाभूतानि अस्मदादिशरीरापेक्षयाअविनाशित्वादियोगात् महाभूतानिब्रह्मलोकाश

सौतिरुवाच एतच्छ्रुत्वानृपोविद्वान्हृष्टोभूज्जनमेजयः पितामहानांसर्वेषांगमनागमनंतदा १ अब्रवीच्चमुदायुक्तःपुनरागमनंप्रति
कथंनुत्यक्तदेहानांपुनस्तद्रूपदर्शनं २ इत्युक्तःसद्विजश्रेष्ठोव्यासशिष्यःप्रतापवान् प्रोवाचवदतांश्रेष्ठस्तंनृपंजनमेजयं ३ वैशंपा
यनउवाच अविप्रणाशःसर्वेषांकर्मणामितिनिश्चयः कर्मजानिशरीराणितथैवाकृतयोनृप ४ महाभूतानिनित्यानिभूताधिपतिसंश्र
यात् तेषांचानित्यसंवासोनविनाशोवियुज्यतां ५ अनायासकृतंकर्मसत्यःश्रेष्ठःफलागमः आत्माचैभिःसमायुक्तःसुखदुःखमुपा
श्नुते ६ अविनाश्यस्तथायुक्तःक्षेत्रज्ञइतिनिश्चयः भूतानामात्मकोभावोयथासौनवियुज्यते ७ यावन्नक्षीयतेकर्मतावत्त
स्यस्वरूपता क्षीणकर्मानरोलोकेरूपान्यत्वंनियच्छति ८

स्थाः पित्रादयस्तत्संबंधानित्यादिकर्मजानितुभूतानांकर्मक्षयेविनश्यंतइतिभावः तेषांचमहाभूतानां
नित्यानांशरीराणामनित्येशरीरेसहसंवासस्तादात्म्येनावस्थानंसंसारदशायामस्ति वियुज्यतांअनित्यानांनाशेऽपि सहवियुज्यमानानांनाशोयतस्तेन यथेनास्येदन्यत्रैतस्मा
त्स्वंब्रह्मपुरमितिश्रुतेः तस्मात्कर्मजानांनाशेऽप्यकर्मजानांब्रह्मलोकाशस्थानांपित्रादिदेहानामविनाशात्पुनस्तद्रूपेणतेषांदर्शनंयुक्तमेव ५ कथमेतदवगम्यतइत्यतआ
ह अनायासकृतमितिप्रवृत्तिरूपंकर्मआयासकृतंतद्विपरीतंतुनिवृत्तिरूपंकर्मअनायासकृतंतस्मात्सत्यःश्रेष्ठश्चयुक्तोविधफलागमोभवति एभिरायासकृत
कर्मभिः ६ नहिकर्मसंबंधादात्मानश्यतीत्याह यद्यपिदुःखयोगआत्मनोऽस्तितथापिक्षेत्रज्ञआत्मातेदुःखेर्नविनाश्यएवअविकार्यएवअसंगत्वात्तत्रहे
तुमाह भूतानामिति यथासौभूतानामस्मदादिशरीराणांआत्मकःआत्मनप्रकृतिकःदर्पणादौप्रतिबिंबःदर्पणधर्मान्मलिनत्वादीननुकरोत्यपि
तन्नाशान्नश्यतिनवियुज्यतइत्यस्यनवनश्यतीत्यर्थः एवंक्षेत्रक्षेत्रज्ञयोरपिद्रष्टव्यं ७ यावत्कर्मदेहारंभकमस्तितावन्नस्यदेहरूपस्वरूपेणतदात्म
त्वाध्यासइत्यर्थः कर्मक्षयेतुदेहांतरेआत्मनोऽध्यासोभवतीत्याह क्षीणेति ८ ७ ७ ७ ७ ७
श्रीगीतासामचंद्रार्पणमस्तु ७ श्रीरामार्पितशंकराभ्यान्नम. ७ ७ ७ ७ ७

येनानाभावाभूतेंद्रियादयोऽतत्पदार्थाःशरीरंप्राप्यएकत्वंदेहादितादात्म्यंसंहताःसंप्राप्तास्तएवभावाः देहादीनांआत्मनःपृथक्त्वंविजानतांयोगिनांनित्याभवंति अज्ञानिनांयेअनित्याभावास्तएवयोगिनांनित्यात्मरूपा भवंतीत्यर्थः ९ संज्ञपनंमारणंतदाहसूर्यंतेचक्षुःवातंप्राणाइत्यादयोमंत्राः पठ्यंतेऽतोलिंगादव गम्यतेयेतेशरीरिणांप्राणाःइंद्रियाणिनित्यंनिश्चितंनित्यंसर्वदालोकांतरगताइति तेनशर्वशरीरीविभुरेवास्तिनतूपाधिपरिछिन्नत्वाभिमानत्वस्यआविद्य कइतिभावः १० नचतुज्ञानेऽधिकाराभावात्त्वंसोपासनकर्मप्राप्यदेवयानमार्गमाश्रयस्वेत्याह तवयोग्यइतिशेषः ११ यत्रकालेत्वयायज्ञआहृतःकृतःत त्रचदेवास्तवहृताः सस्वायोभवन्तेदेवाः पशूनांजीवानांगमनेतत्तल्लोकप्राप्तौईश्वराःनिग्रहानुग्रहकराः १२ यस्मादेवंतस्मान्नित्याःजीवाःदेवात्इष्ट गतिमंतोभवंतिनान्येअयजमानाः एवंकर्मानुष्ठानंउक्त्वाज्ञाननिष्ठामाहसार्द्धेननित्यइति पांचभौतिकोदेववर्गःसर्वोपिनित्यः पुरुषश्चतद्वत्नित्यःकु॰

नानाभावास्तथैकत्वंशरीरंप्राप्यसंहताः भवंतितेतथानित्याःपृथक्भावंविजानतां ९ अश्वमेधेश्रुतिश्चेयमश्वसंज्ञपनंप्रति
लोकांतरगतानित्यंप्राणानित्यंशरीरिणां १० अहंहितंवदाम्येतत्प्रियंतेत्तवपार्थिव देवयानाहिपंथानःश्रुतास्तेयज्ञसंस्तरे
११ आहृतोयत्रयज्ञस्तेतत्रदेवाहितास्तव यदासमन्वितादेवाःपशूनांगमनेश्वराः १२ गतिमंतश्चतेनेस्वानान्येनित्याभवं
त्युत निन्येस्मिन्यंचकेवर्गेनित्येचात्मनिपूरुषः १३ अस्यनानासमायोगंयःपश्यतिवृथामतिः वियोगेशोचतेत्यर्थंसबाल
इतिमेमतिः १४ वियोगदोषदर्शीयःसंयोगंसविसर्जयेत् असंगेसंगमोनास्तिदुःखंभुविवियोगजं १५ परापरज्ञ
स्त्वपरोनाभिमानादुदीरितः अपरज्ञःपरांबुद्धिंज्ञात्वामोहाद्विमुच्यते १६ अदर्शनादापतितःपुनश्चादर्शनंगतः नाहंतंवे
द्मिनासौमांनचमेस्तिविरागता १७

खयोरपिनित्ययोःसतोः योऽस्यजीवस्यनानायोगंअनेकदेहसंबंधपश्यति सवृथामतिः वियोगेपुत्रादिदेहनाशे-
शोचतिचउक्तरीत्यानदेहोनश्यतिनापिआत्मेतिनिर्निमित्तस्तेषांशोकइतिभावः १३ १४ सयदिस्त्र्यादिनादुखंपश्यतितर्हिस्त्र्यादीनापरिग्रहएवनकर्तव्यः नहिवं
ध्यायाःपुत्रशोकार्त्तिरस्ति वस्तुतस्त्वसंगेआत्मनिवियोगदुःखादिसंगमोवानास्तीत्याह असंगइति १५ परेति अपरस्तुउक्तविधंज्ञाननिष्ठामप्राप्तस्तुपरापरतो-
नित्यविभागमात्रज्ञः अभिमानाद्देहादितादात्म्याद्उपासनाबलेनउदीरितउत्क्षिप्तः अपरज्ञः सगुणब्रह्मवित्भूत्वापश्चात्परांबुद्धिंनिर्विशेषवस्तुज्ञानंप्राप्यमोहात्-
मिथ्याज्ञानाद्विमुच्यते १६ मुक्तस्यलक्षणमाह अदर्शनादिति कर्मकर्तरिभावेघञ्दर्शनेक्रियानास्तितद्दर्शनंप्रत्यक्चैतन्यंतस्मात् आयतातितत्तत्रैवचत्ची
नः अतस्तंअमुकंनवेद्मिअगोचरत्वात् असौचमांनवेत्तिकारणाभावात् तर्हित्वमपितादृशःकुतोनभवसीत्याह नचमेस्तिविरागतेति परंवैराग्यमेवमुख्यंमोक्षसाध
नमित्यर्थः १७ ७ ७ ७ ७ ७ ७ ७

येनेति मनसाकृतंपापंमानसतापेनैवानुभूयते एवंशरीरोपतापेनेति कायवाङ्मनसांचापल्यंत्यक्त्वा वायुनिरोधंकुर्यादितिसार्द्धश्लोकार्थः १८ इतिश्रीनील
कंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांचतुस्त्रिंशोऽध्यायः ३४ ७. अदृष्ट्वेति १ २ मधृतराष्ट्रोराजाविदुरस्त्वसिद्धिंययोरशमिद्ध

येनयेनशरीरेणकरोत्ययमनीश्वरः तेनतेनशरीरेणतदवश्यमुपाश्नुते मानसंमनसाप्नोति शरीरंचशरीरवान् १८ इत्याश्रम-
वासिकेपर्वणिचतुस्त्रिंशोऽध्यायः ३४ वैशंपायनउवाच अदृष्ट्वातुनृपःपुत्रान्दर्शनंप्रतिलब्धवान् ऋषेःप्रसादात्पुत्रा
णांस्वरूपाणांकुरूद्वह १ सराजाराजधर्मांश्चब्रह्मोपनिषदंतथा अवाप्तवान्नरश्रेष्ठोबुद्धिनिश्चयमेवच २ विदुरश्च
महाप्राज्ञोययौसिद्धिंतपोबलात् धृतराष्ट्रःसमासाद्यव्यासंचैवतपस्विनं ३ जनमेजयउवाच ममापिवरदोव्यासोदर्शयेत्पित
रंयदि तद्रूपवेशवयसंश्रद्दध्यांसर्वमेवते ४ प्रियंमेस्यात्कृतार्थश्चस्यामहंकृतनिश्चयः प्रसादादृषिमुख्यस्यममकामःसमृध्य
तां ५ सौतिरुवाच इत्युक्तवचनेतस्मिन्नृपेव्यासःप्रतापवान् प्रसादमकरोद्धीमानानयच्चपरिक्षितं ६ ततस्तद्रूपवयसमा
गतंनृपतिंदिवः श्रीमंतंपितरंराजाददर्शजनमेजयः ७ शमीकंचमहात्मानंपुत्रंतंचास्यशृंगिणं अमात्यायेबभूवुश्चराजंस्तांश्च
ददर्शह ततःसोवभृथेराजामुदितोजनमेजयः ८ पितरंस्नापयामासस्वयंसस्नौचपार्थिवः स्नात्वासनृपतिर्विप्रमास्तीकमिदमब्र
वीत् ९ यायावरकुलोत्पन्नंजरत्कारुसुतंतदा आस्तीकविविधाश्चर्यंयज्ञोऽयमितिमेमतिः १० यदद्यायंपिताप्राप्तोममशोकप्रणाशनः
आस्तीकउवाच ऋषिर्द्वैपायनोयत्रपुराणस्तपसोनिधिः यज्ञेकुरुकुलश्रेष्ठतस्यलोकावुभौजितौ ११ श्रुतंविचित्रमाख्यानंत्वयापांडवनं
दन सर्पाश्चभस्मसान्नीतागतश्चपदवींपितुः १२ कथंचित्तक्षकोमुक्तःसत्यत्वात्तवपार्थिव ऋषयःपूजिताःसर्वेगतिर्दृष्टामहात्मनः
१३ प्राप्तःसुविपुलोधर्मःश्रुत्वापापविनाशनं विमुक्तोहृदयग्रंथिरुदारजनदर्शनात् १४ येचपक्षधरांधर्मेसद्वृत्तरुचयश्चये यान्दृष्ट्वा
हीयतेपापंतेभ्यःकार्यानमस्क्रिया १५ सौतिरुवाच एतच्छ्रुत्वाद्विजश्रेष्ठात्सराजाजनमेजयः पूजयामासतमृषिमनुमान्यपुनः
पुनः १६

पेःसबंध. तत्रापिविदुरस्तपोबलाद्धृतराष्ट्रःव्यासंसमासाद्येतिसंबंधः ३ ४ ५ ६ ७ ८ स्नापयामास आत्मोचितवान्
स्नापयामासेतिपाठःस्पष्टः ९ १० ११ १२ १३ पापविनाशनमितिदासमितिशेषः १४ पक्षधराः पक्षस्यापरा-
१५ १६

दृष्टेति १७ इतिश्रीनीलकंठीये भारतभावदीपे आश्रमवासिकेपर्वणि टीकायां पंचत्रिंशोऽध्यायः ३५ १ २ ३ ४ आश्रमपदं आश्रमप्रांतं ५

प्रच्छतमृषिंचापिवैशंपायनमच्युतं कथावशेषंधर्मज्ञोवनवासस्यसत्तम १७ इत्याश्रमवासिकेपर्वणि पंचत्रिंशोऽध्यायः
३५ जनमेजयउवाच दृष्ट्वापुत्रांस्तथापौत्रान्सानुबंधान्जनाधिपः धृतराष्ट्रःकिमकरोद्राजाचैवयुधिष्ठिरः १ वैशं
पायनउवाच तद्दृष्ट्वामहदाश्चर्यंपुत्राणांदर्शनंनृपः वीतशोकःसराजर्षिःपुनराश्रममागमत् २ इतरस्तुजनःसर्वस्तेचैवपरमर्ष
यः प्रतिजग्मुर्यथाकामंधृतराष्ट्राभ्यनुज्ञया ३ पांडवास्तुमहात्मानोलघुभूयिष्ठसैनिकाः पुनर्जग्मुर्महात्मानंसदारास्तंमहीप
तिं ४ तमाश्रमपदंधीमान्ब्रह्मर्षिर्लोकपूजितः मुनिःसत्यवतीपुत्रोधृतराष्ट्रमभाषत ५ धृतराष्ट्रमहाबाहोशृणुकौरवनंद
न श्रुतंतेज्ञानवृद्धानामृषीणांपुण्यकर्मणां ६ ऋद्धाभिजनवृद्धानांवेदवेदांगवेदिनां धर्मज्ञानांपुराणानांवदतांविविधाः
कथाः ७ मास्मशोकेमनःकार्षीर्दिष्टेनव्यथतेबुधः श्रुतंदेवरहस्यंतेनारदाद्देवदर्शनात् ८ गतास्तेक्षत्रधर्मेणशस्त्रपू
तांगतिंशुभां यथादृष्टास्त्वयापुत्रास्तथाकामविहारिणः ९ युधिष्ठिरस्त्वयंधीमान्भवंतमनुरुध्यते सहितोभ्रातृभिःसर्वैःसदारः
ससुहृज्जनः १० विसर्जयैनंयात्वेषःस्वराज्यमनुशासतां मासःसमधिकस्तेषामतीतोवसतांमुने ११ एतद्धिनित्यंयत्नेन
पदंरक्ष्यंनराधिप बहुप्रत्यर्थिकंह्येतद्राज्यंनामकुरूद्वह १२ इत्युक्तःकौरवोराजाव्यासेनातुलतेजसा युधिष्ठिरमथाहूयवाग्मी
वचनमब्रवीत् १३ अजातशत्रोभद्रंतेशृणुमेभ्रातृभिःसह त्वत्प्रसादान्महीपालशोकोनास्मान्प्रबाधते १४ रमेचाहंत्वयापुत्र
पुरेवगजसाह्वये नाथेनानुगतोविद्वान्प्रियेषुपरिवर्त्तिना १५ प्राप्तंपुत्रफलंत्वत्तःप्रीतिर्मेपरमात्वयि नमेमन्युर्महाबाहोगम्यतां
पुत्रमाचिरं १६ भवंतंचेहसंप्रेक्ष्यतपोमेपरिहीयते तपोयुक्तंशरीरंचत्वांदृष्ट्वाधारितंमनः १७ मातरौतेतथैवेमेशीर्णपर्णकृ
ताशने ममतुल्यव्रतेपुत्रनचिरंवर्त्तयिष्यतः १८ दुर्योधनप्रभृतयोदृष्टालोकांतरंगताः व्यासस्यतपसोवीर्याद्भवतश्चस
मागमात् १९ प्रयोजनंचनिर्वृत्तंजीवितस्यममानघ उग्रंतपःसमास्थास्येत्वमनुज्ञातुमर्हसि २० त्वय्यद्यपिंडःकीर्त्तिश्च
कुलंचेदंप्रतिष्ठितं श्वोवाद्यवामहाबाहोगम्यतांपुत्रमाचिरं २१ राजनीतिःसुबहुशःश्रुतातेभरतर्षभ संदेष्टव्यंनपश्यामिकृतंमेभव
ताप्रभो २२

६ ७ ८ ९ १० ११ बहवःप्रत्यर्थिनःप्रार्थयानाःशत्रवोयत्रतत् १२ १३ १४

नाथेनत्वया १५ १६ १७ १८ १९ २० २१ २२

वैशंपायनउवाच इत्युक्त्वावचनंतंतुनृपोराजानमब्रवीत् नमामर्हसिधर्मज्ञपरित्यक्तुमनागमं २३ काममंगच्छतुमंसर्वेभ्रातरोनुचरास्त
था भवंतमहमन्विष्येमातरंचयतव्रत २४ तमुवाचाथगांधारीमेवंपुत्रशृणुष्वह त्वय्यर्थानकुरुकुन्तिपिंडश्श्वशुरस्वमे २५ गम्य
तांपुत्रपर्याप्तमेतावत्पूजितावयं गजाह्वदमहतत्कार्यंत्वयापुत्रपितुर्वच. २६ वैशंपायनउवाच इत्युक्तःसतुगांधार्याकुंतीमिदमभा
षत स्नेहबाष्पाकुलेनेत्रेप्रमृज्यरुदतीवचः २७ विसर्जयतिमांराजागांधारीचयशस्विनी भवत्यांबद्धचित्तस्तुकथंयास्यामिदुःखितः
२८ नचोत्सहेतपोविघ्नंकर्तुंतेधर्मचारिणि तपसोहिपरंनास्तितपसाविंदतेमहत् २९ ममापिनतथाराज्ञिराज्येबुद्धिर्यथापुरा त
पस्येवानुरक्तंमेमनःसर्वात्मनातथा ३० शून्येयंचमहीकृत्स्नानमेप्रीतिकरीशुभे बांधवानःपरिक्षीणाबलंनोनयथापुरा ३१
पांचालाःसुभृशंक्षीणाःकथामात्रावशेषिताः नतेषांकुलकर्तारंकंचित्पश्याम्यहंशुभे ३२ सर्वेहिभस्मसान्नीतास्तेद्रोणेनरणाजि
रे अवशिष्टाश्चनिहताद्रोणपुत्रेणवैनिशि ३३ चेदयश्चैवमत्स्याश्चदृष्टपूर्वास्तथैवनः केवलंवृष्णिचक्रंचवासुदेवपरिग्रहात् ३४
यद्दृष्ट्वास्थातुमिच्छामिधर्मार्थंनार्थहेतुतः शिवेनपश्यनःसर्वान्दुर्लभंतेवदर्शनं ३५ अविषह्यंचराजाहितीव्रंचारप्स्यतेतप
एतच्छ्रुत्वामहाबाहुःसहदेवोयुधांपतिः ३६ युधिष्ठिरमुवाचेदंबाष्पव्याकुललोचनः नोत्सहेहंपरित्यक्तुंमातरंभरतर्षभ ३७ प्र
तियातुभवान्क्षिप्रंतपस्तप्स्याम्यहंविभो इहैवशोषयिष्यामितपसेदंकलेवरं ३८ पादशुश्रूषणेरक्तोराज्ञोमात्रोस्तथानयोः तमु
वाचततःकुंतीपरिष्वज्यमहाभुजं गम्यतांपुत्रमैवंत्वंवोचःकुरुवचोमम आगमावःशिवाःसंतुस्वस्थाभवतपुत्रकाः ४० उपरोधो
भवेदेवमस्माकंतपसःकृते त्वत्स्नेहपाशबद्धाचहीयेयंतपसःपरात् ४१ तस्मात्पुत्रकगच्छत्वंशिष्टमल्पंचनःप्रभो एवंसं
स्तंभितंवाक्यैःकुंत्याबहुविधैर्मनः ४२ सहदेवस्यराजेंद्रराज्ञश्चैवविशेषतः तेमात्रासमनुज्ञाताराज्ञाचकुरुपुंगवाः ४३
अभिवाद्यकुरुश्रेष्ठमामंत्रयितुमारभन् युधिष्ठिरउवाच राज्यंप्रतिगमिष्यामःशिवेनप्रतिनंदिताः अनुज्ञातास्त्वयाराजन्गमि
ष्यामोविकल्मषाः ४४ एवमुक्तःसराजर्षिर्धर्मराज्ञामहात्मना अनुजज्ञेसकौरव्यमभिनंद्ययुधिष्ठिरं ४५ भीमंचबलिनांश्रेष्ठंसां
त्वयामासपार्थिवः सचास्यसम्यक्मेधावीप्रत्यपद्यतवीर्यवान् ४६ ७ ७ ७ ७

४७ ४८ नृपंप्रदक्षिणंचक्रुर्निवारणेस्तनपानादिशेषः ४९ ५० ५१ ५२ ५३ इतिश्रीनैलकंठीयेभारतभावदीपेआश्रमवासिकेपर्वणिटीकायांषट्त्रिं

अर्जुनंचसमाश्लिष्ययमौचपुरुषर्षभौ अनुजज्ञेसकौरव्यःपरिष्वज्याभिनंद्यच ४७ गांधार्याचाभ्यनुज्ञाताःकृतपादाभिवादनाः जनन्या
समुपाघ्रातापरिमुक्ताश्चतेनृप ४८ चक्रुःप्रदक्षिणंसर्वेवत्साइवनिवारणे पुनःपुनर्निरीक्षंतःप्रचक्रुस्तेप्रदक्षिणं ४९ द्रौपदीप्रमुखा
श्चैवसर्वाःकौरवयोषितः न्यायतःश्वशुरेवृत्तिंप्रयुज्यप्रययुस्ततः ५० श्वश्रूभ्यांसमनुज्ञाताःपरिष्वज्याभिनंदिताः संदिष्टाश्चेतिकर्तव्यं
प्रययुर्भर्तृभिःसह ५१ ततःप्रजज्ञेनिनदःसूतानांयुज्यतामिति उष्ट्राणांक्रोशतांचापिहयानांहेषतामपि ५२ ततोयुधिष्ठिरोराजा
सदारःसहसैनिकः नगरंहास्तिनपुरंपुनरायात्सबांधवः ५३ इत्याश्रमवासिकेपर्वणिषट्त्रिंशोऽध्यायः ३६ वैशंपायनउवाच
द्विवर्षोपनिवृत्तेषुपांडवेषुयदृच्छया देवर्षिर्नारदोराजन्नाजगामयुधिष्ठिरं १ तमभ्यर्च्यमहाबाहुःकुरुराजोयुधिष्ठिरः आसीनंपरि
विश्वस्तंप्रोवाचवदतांवरः २ चिरात्तुनानुपश्यामिभगवंतमुपस्थितं कच्चित्तेकुशलंविप्रशुभंवाप्रत्युपस्थितं ३ केदेशाःपरिदृष्टास्तेकिं
चकार्यंकरोमिते तद्ब्रूहिद्विजमुख्यस्त्वंत्वमस्माकंचपरागतिः ४ नारदउवाच चिरदृष्टोसिमेत्येवमागतोहंतपोवनात् परिदृष्टानि
तीर्थानिगंगाचैवमयानृप ५ युधिष्ठिरउवाच वदंतिपुरुषामेद्यगंगातीरनिवासिनः धृतराष्ट्रंमहात्मानमास्थितंपरमंतपः ६ प
रिदृष्टस्त्वयातत्रकुशलीसकुरूद्वहः गांधारीचपृथाचैवसूतपुत्रश्चसंजयः ७ कथंचवर्ततेचाद्यपितामममपार्थिवः श्रोतुमिच्छामि
भगवन्यदिदृष्टस्त्वयानृपः ८ नारदउवाच स्थिरीभूयमहाराजशृणुवृत्तंयथातथं यथाश्रुतंचदृष्टंचमयातस्मिंस्तपोवने ९ वनवास
निवृत्तेषुभवत्सुकुरुनंदन कुरुक्षेत्रात्पितातुभ्यंगंगाद्वारंययौनृप १० गांधार्यासहितोधीमान्वध्वाकुंत्यासमन्वितः संजयेनच
सूतेनसाग्निहोत्रःसयाजकः ११ आतस्थेसतपस्तीव्रंपितातवतपोधनः वीटामुखंसमादायवायुभक्षोभवन्मुनिः १२ वनेसमुनिभिः
सर्वैःपूज्यमानोमहातपाः त्वगस्थिमात्रशेषःसषण्मासानभवन्नृपः १३ गांधारीतुजलाहाराकुंतीमासोपवासिनी संजयःषष्ठभ
क्तेनवर्तयामासभारत १४ अग्नीस्तुयाजकास्तत्रजुहुवुर्विधिवत्प्रभो दृश्यतोदृश्यतश्चैववनेतस्मिन्नृपस्यवै १५ अनिकेतोथ
राजासबभूववनगोचरः तेचापिसहितेदेव्यौसंजयश्चतमन्वयुः १६ संजयोनृपतेर्नेतासमेषुविषमेषुच गांधार्याश्चपृथाराजन्चक्षु
रासीदनिंदिता १७ ततःकदाचिद्गंगायाःकच्छेसनृपसत्तमः गंगायामाप्लुतोधीमानाश्रमाभिमुखोभवत् १८ ७ ७ ७

शोऽध्यायः ३६ द्विवर्षेति १ २ ३ ४ २

मेमया अतिचिरंदृष्टोसीत्यर्थः ५ ६ ७ ८ ९ १० ११ १२ १३ १४ दृश्यतोऽदृश्यतइति पश्यंतमपश्यंतंचानादृत्येत्यर्थः नियमेनसान्निध्याभावात् १५
१६ १७ १८

अथवायुःसमुद्धूतोदावाग्निरभवन्महान् ददाहतद्वनंसर्वंपरिगृह्यसमंततः १९ दह्यमानेषुमृगयूथेष्वथद्विजिह्वकेषुसमंततः वराहाणांचयूथेषुसं
श्रयत्सुजलाशयान् २० समाविद्धेवनेतस्मिन्प्राप्तेव्यसनउत्तमे निराहारतयाराजामंदप्राणविचेष्टितः २१ असमर्थोपसरणेसुकृ
शौमातरौचते ततःसनृपतिर्दृष्ट्वावन्हिमायांतमंतिकात् २२ इदमाहततःसूतंसंजयंजयतांवरः गच्छसंजययत्राग्निर्नत्वांदहतिकर्हि
चित् २३ वयमत्राग्निनायुक्तागमिष्यामःपरांगतिं तमुवाचकिलोद्विग्नःसंजयोवदतांवरः २४ राजन्मृत्युरनिष्टोयंभवितातेवृथाग्नि
ना नचोपायंप्रपश्यामिमोक्षणेजातवेदसः २५ यदत्रानंतरंकार्यंतद्भवान्वक्तुमर्हसि इत्युक्तःसंजयेनेदंपुनराहसपार्थिवः २६ नै
षमृत्युरनिष्टोनोनिःसृतानांगृहात्स्वयं जलमग्निस्तथावायुरथवापिविकर्षणं २७ तापसानांप्रशस्यंतेगच्छसंजयमाचिरं इत्युक्त्वासंज
यंराजासमाधायमनस्तथा २८ प्राङ्मुखःसहगांधार्याकुंत्याचोपाविशत्तदा संजयस्तंतथादृष्ट्वाप्रदक्षिणमथाकरोत् २९ उवाचचै
नंमेधावीयुंक्ष्वात्मानमितिप्रभो ऋषिपुत्रोमनीषीसराजाचक्रेस्यतद्वचः ३० सन्निरुध्येंद्रियग्राममासीत्काष्ठोपमस्तदा गांधारीचम
हाभागाजननीचपृथातव ३१ दावाग्निनासमायुक्तेसचराजापितातव संजयस्तुमहामात्रस्तस्माद्दावादमुच्यत ३२ गंगाकूलेमया
दृष्टस्तापसैःपरिवारितः सतानामंत्र्यतेजस्वीनिवेद्यैतच्चसर्वशः ३३ प्रययौसंजयोधीमान्हिमवंतंमहीधरं एवंसनिधनंप्राप्तःकुरु
राजोमहामनाः ३४ गांधारीचपृथाचैवजनन्यौतेविशांपते यदृच्छयानुव्रजतामयाराज्ञःकलेवरं ३५ तयोश्चदेव्योरुभयोर्मयादृष्टा
निभारत ततस्तपोवनेतस्मिन्समाजग्मुस्तपोधनाः ३६ श्रुत्वाराज्ञस्तदानिधनंनत्वशोचन्गतास्त्विते तत्राश्रौषमहंसर्वमेतत्पुरुषस
त्तम ३७ यथाचनृपतिर्दग्धोदेव्यौतेचेतिपांडव नशोचितव्यंराजेंद्रस्वतःसपृथिवीपतिः ३८ प्राप्तवानग्निसंयोगंगांधारीजननी
चते वैशंपायनउवाच एतच्छ्रुत्वाचसर्वेषांपांडवानांमहात्मनां निर्याणंधृतराष्ट्रस्यशोकःसमभवन्महान् ३९ अंतःपुराणां
चतदामहानार्तस्वरोभवत् पौराणांचमहाराजश्रुत्वाराज्ञस्तदागतिं ४० अहोधिगितिराजातुविक्रुश्यभृशदुःखितः ऊर्ध्वबाहुःस्मरं
न्मातुःप्ररुरोदयुधिष्ठिरः ४१ भीमसेनपुरोगाश्चभ्रातरःसर्वएवते अंतःपुरेषुचतदासुमहान्रुदितस्वनः ४२ प्रादुरासीन्महाराज
पृथांश्रुत्वातथागतां तंचवृद्धंतथादग्धंहतपुत्रंनराधिपं ४३ ७ ७ ७ ७ ७ ७

४४ ४५ इतिश्रीनैलकंठीये भारतभावदीपे आश्रमवासिके पर्वणि टीकायां सप्तत्रिंशोऽध्यायः ३७ तथामहात्मनइतिसुगमोऽष्टत्रिंशः १ २ ३

अन्वशाचंततेसर्वगांधारींचतपस्विनीं तस्मिन्नुपरतेशब्देमुहूर्त्तादिवभारत ४४ निगृह्यवाष्पंधैर्येण धर्मराजोऽब्रवीदिदं ४५ इत्या
श्रमवासिकेपर्वणिसप्तत्रिंशोऽध्यायः ३७ युधिष्ठिरउवाच तथामहात्मनस्तस्यतपस्युग्रेचवर्त्ततः अनाथस्येवचवनेतिष्ठत्स्वस्मा
कंबंधुषु १ दुर्विज्ञेयागतिर्ब्रह्मन्पुरुषाणांमतिर्मम यत्रवैचित्रवीर्योऽसौदग्धएवंवनाग्निना २ तस्यपुत्रशतंश्रीमदभवद्बाहुशा-
लिनः नागायुतबलोराजासदग्धोहिदवाग्निना ३ यंपुरापर्यवीजंततालवृंतैर्वरस्त्रियः तंगृध्राःपर्यवीजंतदावाग्निपरिकालितं ४
सूतमागधसंघैश्चशयानोयःप्रबोध्यते धरण्यांसनृपःशेतेपापस्यममकर्मभिः ५ नचशोचामिगांधारींहतपुत्रांयशस्विनीं पति
लोकमनुप्राप्तांतथाभर्तृव्रतेस्थितां ६ पृथामेवचशोचामियापुत्रैश्वर्यमृद्धिमत् उत्सृज्यसुमहद्दीप्तंवनवासमरोचयत् ७ धिग्रा-
ज्यमिदमस्माकंधिग्बलंधिक्पराक्रमं क्षत्रधर्मंचधिग्यस्मान्मृताजीवामहेवयं ८ सुसूक्ष्माकिलकालस्यगतिर्द्विजवरोत्तम य-
त्समुत्सृज्यराज्यंसावनवासमरोचयत् ९ युधिष्ठिरस्यजननीभीमस्यविजयस्यच अनाथवत्कथंदग्धाइतिमुह्यामिचिंतयन् १०
वृथासंतर्पितोवह्निःखांडवेसव्यसाचिना उपकारमजानन्सकृतघ्नइतिमेमतिः ११ यत्रादहत्सभगवान्मातरंसव्यसाचिनः कृ
त्वायोब्राह्मणच्छद्मभिक्षार्थीसमुपागतः १२ धिगग्निंधिक्चपार्थस्यविश्रुतांसत्यसंधतां इदंकष्टतरंचान्यद्भगवन्प्रतिभातिमे
१३ वृथाग्निनासमायोगोयदभून्पृथिवीपतेः तथातपस्विनस्तस्यराजर्षेःकौरवस्यह १४ कथमेवंविधोमृत्युःप्रशास्यपृथिवीमिमां तिष्ठत्सुमंत्र
पूतेषुतस्याग्निषुमहावने १५ वृथाग्निनासमायुक्तोनिष्ठांप्राप्तःपितामम मन्येपृथावेपमानाकृशाधमनिसंतता १६ हातातधर्मराजेति
समाक्रंदन्महाभये भीमपर्याप्नुहिभयादितिचैवाभिवाशती १७ समंततःपरिक्षिप्तामाताभून्मेदवाग्निना सहदेवःप्रियस्तस्याःपुत्रेभ्योधि
कएवतु १८ नचैनांमोक्षयामासवीरोमाद्रवतीसुतः तच्छ्रुत्वारुरुदुःसर्वेसमालिंग्यपरस्परं १९ पांडवाःपंचदुःखार्त्ताभूतानीवयुगक्षये तेषां
तुपुरुषेंद्राणांरुदतांरुदितस्वनः २० प्रासादाभोगसंरुद्धोअन्वरौत्सीत्सरोदसी इत्याश्रमवासिकेपर्वणिअष्टत्रिंशोऽध्यायः ३८ नारदउवाच
नासौवृथाग्निनादग्धोयथातत्रश्रुतंमया वैचित्रवीर्योनृपतिस्तत्तेवक्ष्यामिभारत १ वनंप्रविशतानेनवायुभक्षेणधीमता अग्नयःकारयित्वेष्टि
मुत्सृष्टाइतिनःश्रुतं २ याजकास्तुततस्तस्यतानग्नीन्निर्जनेवने समुत्सृज्ययथाकामंजग्मुर्भरतसत्तम ३ २३

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० इतिश्रीनैलकंठीये भारतभावदीपे आश्रमवा
सिकेपर्वणिटीकायां अष्टत्रिंशोऽध्यायः ३८ नासाविति १ २ ३

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ संकल्प्य एकीकृत्य कु

सविस्फुलिंगस्तदावह्निर्वनेतस्मिन्नभूत्किल तेनतद्वनमादीप्तमितितेतापसाब्रुवन् ४ सराजाजान्हवीकच्छे यथातेकथितंमया तेनाग्निनासमा
युक्तःस्तेनैवभरतर्षभ ५ एवमावेदयामासुर्मुनयस्तेममानघ येतेभागीरथीतीरेमयादृष्टायुधिष्ठिर ६ एवंस्वेनाग्निनाराजासमायुक्तो
महीपते प्राप्तःसोपियास्त्वंनृपतिंगतःसपरमांगतिं ७ गुरुशुश्रूषयाचैवजननीतिजनाधिप प्राप्तास्मुमहतीसिद्धिमितिमेनात्रसंशयः ८
कर्त्तुमर्हसिराजेंद्रतेषांत्वमुदकक्रियां भ्रातृभिःसहितःसर्वैरेतदत्रविधीयतां ९ वैशंपायनउवाच ततःसपृथिवीपालःपांडवानांधुरंधरः
निर्ययौसहसोदर्यैःसदारश्चनरर्षभः १० पौरजानपदाश्चैवराजभक्तिपुरस्कृताः गंगांप्रजग्मुरभितोवाससैकेनसंवृताः ११ ततोवगाह्यसलि
लंसर्वेतेनरपुंगवाः युयुत्सुमग्रतःकृत्वाददुस्तोयंमहात्मने १२ गांधार्याश्चपृथायाश्चविधिवन्नामगोत्रतः शौचंनिर्वर्त्तयंतस्तेतत्रोषुर्न
गराद्बहिः १३ प्रेषयामाससनरान्विधिज्ञानाप्तकारिणः गंगाद्वारंनरश्रेष्ठोयत्रदग्धाभवन्नृपः १४ तत्रैवतेषांकृत्यानिगंगाद्वारेन्व
शात्तदा कर्त्तव्यानीतिपुरुषान्दत्तदेयान्महीपतिः १५ द्वादशेहनितेभ्यःसकृतशौचोनराधिप ददौश्राद्धानिविधिवद्दक्षिणावंतिपां
डवः १६ धृतराष्ट्रंसमुद्दिश्यददौसपृथिवीपतिः सुवर्णंरजतंगाश्चशय्याश्चसुमहाधनाः १७ गांधार्याश्चैवतेजस्वीपृथायाश्चपृथक्
पृथक् संकीर्त्यनामनीराजाददौदानमनुत्तमं १८ योयदिच्छतियावच्चतावल्लेभेसतंनरः शयनंभोजनंदानंमणिरत्नमथोधनं १९ यानमा
च्छादनंभोगान्दासीश्चसमलंकृताः ददौराजासमुद्दिश्यतयोर्मात्रोर्महीपतिः २० ततःसपृथिवीपालोदत्वाश्राद्धान्यनेकशः प्रविवेशपुरं
राजानगरंवारणाव्हयं २१ तेचापिराजवचनात्पुरुषायगताभवन् संकल्प्यतेषांकृत्यानिपुनःप्रत्यागमंस्ततः २२ माल्यैर्गंधैश्चविविधै
रर्चयित्वायथाविधि कुल्यानितेषांसंयोज्यतदाचख्युर्महीपतेः २३ समाश्वास्यतुराजानंधर्मात्मानंयुधिष्ठिरं नारदोप्यगमद्राजन्परमर्षि
र्यथेप्सितं २४ एवंवर्षाण्यतीतानिधृतराष्ट्रस्यधीमतः वनवासेतथात्रीणिनगरेदशपंचच २५ हतपुत्रस्यसंग्रामेदानानिददतःसदा
ज्ञातिसंबंधिमात्राणांभ्रातृणांस्वजनस्यच २६ युधिष्ठिरस्तुनृपतिर्नातिप्रीतमनास्तदा धारयामासतंराज्यंनिहतज्ञातिबांधवः २७ तथा
श्रमवासिकेतुपर्वण्यपिसमाहितः गंधमाल्यादियुक्तंचहविष्यंभोजयेद्द्विजान् २८ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यां
आश्रमवासिकेपर्वणिऊनचत्वारिंशोध्यायः ३० अस्यानंतरंमौसलपर्वभविष्यति तस्यायमाद्यःश्लोकः वैशंपायनउवाच षट्त्रिंशेत्वथ
संप्राप्तेवर्षेकौरवनंदनः ददर्शविपरीतानिनिमित्तानियुधिष्ठिरः १ श्रीकृष्णार्पणमस्तु शुभंभवतु ॥

त्यानिअस्थीनि कुल्यंस्यात्कंकर्संगिपंचेतिमेदिनी प्रत्यागमंगगामितिशेष २२ २३ २४ २५ २६ २७ २८ इतिश्रीमन्महा०भारतआ०२।०भा०पर्वणिटी० ऊनचत्वारिंशोध्याय

इतिश्रीमन्महाभारते आश्रमवासिपर्व समाप्तम्



अथश्रीमन्महाभारतेमौसलपर्वप्रारंभः

श्रीगणेशायनमः एवंआदिपर्वणिसूचितानांधर्मार्थकाममोक्षाणांमध्ये सभावनयोर्यज्ञसत्यधृतिगुरुसत्तीर्थसेवनादिनाधर्मः प्रतिपादितः विराटाद्यष्टकेसे-
वानीतिहिंसानृतकुलक्षयादिनार्थः शोकपर्वणिनिरूपितः द्वादशेऽर्थफलभूतः कामः सापवर्गोनिरूपप्लवंचमोक्षपर्वणिनिरूपितं त्रयोदशादित्रयेमोक्षहेतून्दानवि

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १ वैशंपायनउवाच षट्त्रिंशेत्व
थसंप्राप्तेवर्षेकौरवनंदनः ददर्शविपरीतानिनिमित्तानियुधिष्ठिरः १ ववुर्वाताश्चनिर्घातारूक्षाःशर्करवर्षिणः अपसव्यानिशकुनामंड
लानिप्रचक्रिरे २ प्रत्यगूहुर्महानद्योदिशोनीहारसंवृताः उल्काश्चांगारवर्षिण्यः प्रापतन्गगनाद्भुवि ३ आदित्योरजसाराजन्समवच्छन्नमं
डलः विरश्मिरुदयेनित्यंकबंधैःसमदृश्यत ४ परिवेषाश्चदृश्यंतेदारुणाःसूर्यचंद्रयोः त्रिवर्णाःश्यामरूक्षांतास्तथाभस्मारुणप्रभाः
५ एतेचान्येचबहवउत्पाताभयशंसिनः दृश्यंतेबहवोराजन्हृदयोद्वेगकारकाः ६ कस्यचित्त्वथकालस्यकुरुराजोयुधिष्ठिरः शुश्रा
वदृष्णिचक्रस्यमौसलेकदनंकृतं ७ विमुक्तंवासुदेवंचश्रुत्वारामंचपांडवः समानीयाब्रवीद्भ्रातॄन्किंकरिष्यामइत्युत ८ परस्परंसमासा
द्यब्रह्मदंडबलात्कृतान् वृष्णीन्विनष्टांस्तेश्रुत्वाव्यथितापांडवाभवन् ९ निधनंवासुदेवस्यसमुद्रस्येवशोषणं वीरानश्रद्दधुस्तस्यवि
नाशंशार्ङ्गधन्वनः १० मौसलंतेसमाश्रित्यदुःखशोकसमन्विताः विषण्णाहतसंकल्पाःपांडवाःसमुपाविशन् ११ जनमेजयउवाच
कथंविनष्टाभगवन्नंधकावृष्णिभिःसह पश्यतोवासुदेवस्यभोजाश्चैवमहारथाः १२ वैशंपायनउवाच षट्त्रिंशेथततोवर्षेवृ
ष्णीनामनयोमहान् अन्योन्यंमुसलैस्तेतुनिजघ्नुःकालचोदिताः १३ जनमेजयउवाच केनानुशप्तास्तेवीराःक्षयंवृष्ण्यंधकागताः
भोजाश्चद्विजवर्यत्वंविस्तरेणवदस्वमे १४ वैशंपायनउवाच विश्वामित्रंचकण्वंचनारदंचतपोधनं सारणप्रमुखावीराददृशुर्द्वार
कांगतान् १५ तेतान्सांबंपुरस्कृत्यभूषयित्वास्त्रियंयथा अब्रुवन्नुपसंगम्यदैवदंडनिपीडिताः १६ इयंस्त्रीपुत्रकामस्यबभ्रोरमिततेज
सः ऋषयःसाधुजानीतकिमियंजनयिष्यति १७ इत्युक्तास्तेतदाराजन्विप्रलंभप्रधर्षिताः प्रत्यब्रुवंस्तान्मुनयोयत्तच्छृणुनराधिप १८
वृष्ण्यंधकविनाशायमुसलंघोरमायसं वासुदेवस्यदायादःसांबोयंजनयिष्यति १९ येनयूयंसुदुर्वृत्तानृशंसाजातमन्यवः उच्छेत्तारःकु
लंकृत्स्नमृतेरामजनार्दनौ २० समुद्रंयास्यतिश्रीमांस्त्यक्त्वादेहंहलायुधः जराकृष्णंमहात्मानंशयानंभुविभेत्स्यति २१

धावनवासांश्चनिरू
प्यषोडशेधृतराष्ट्रवद्वनमाश्रित्यस्वयंकेवलंअर्थकामसक्तास्तेमदिरादिकलहेनव्यसनेनविनश्यंतीतिप्रतिपाद्यते सप्तदशेनिष्कामधर्मस्यफलंगृहादेस्त्यागोऽष्टा
दशेनतत्पूर्विकास्वर्गप्राप्तिश्चनिरूपयिष्यते तत्रराज्यप्राप्त्यनंतरं षट्त्रिंशत्तमेवर्षेसर्वनाशसूचकानुत्पातानाह वैशंपायनः षट्त्रिंशइति १ २ ३ ४ ५ ६ ७ ८ भवन्अ
भवन् ९ १० मौसलंमुसलकृतंकदनंसमाश्रित्यमनसिधृत्वा ११ १२ मुसले एरकाख्येर्मुसलकणैः १३ १४ १५ १६ १७ १८ १९ २० जरानामाकश्चित्कैवर्तः २१

अभ्यसुर्मनसा अस्याभिदंतः शापस्त्वयाक्षंतव्यइति २२ २३ २४ २५ किंकरोयमदूतस्तत्तुल्यं २६ २७ २८ २९ स्वयंकृत्वास्वयंकर्ता ३० ३१
इतिनैलकंठीयेभारतभावदीपेमौसलपर्वणिप्रथमोध्यायः १ एवंकालः कपोतोलूकादिरूपेण १ यएवंक्कचित्कालादिरूपोदृश्यतेक्कचिन्न आवेक्ष्यप

इत्यब्रुवंस्ततोराजन्प्रलब्धास्तैर्दुरात्मभिः मुनयः क्रोधरक्ताक्षाः समीक्ष्याथपरस्परम् तथोक्त्वामुनयस्तेतुततः केशवमभ्ययुः २२अथा
ब्रवीत्तदावृष्णीञ्श्रुत्वैवमधुसूदनः अंतज्ञोमतिमांस्तस्य भवितव्यंतथेतितान् २३ एवमुक्त्वाहृषीकेशः प्रविवेशपुनर्गृहं कृतांतमन्यथानै
च्छत्कर्तुंसजगतःप्रभुः २४ श्वोभूतेथततःसांबोमुसलंतदसूतवै येनवृष्ण्यंधककुलेपुरुषाभस्मसात्कृताः २५ वृष्ण्यंधकविनाशायकिंक
रप्रतिमंमहत् असूतशापजंघोरंतच्चराज्ञेन्यवेदयन् २६ विषण्णरूपस्तद्राजासूक्ष्मंचूर्णमकारयत् तच्चूर्णंसागरेचापिप्राक्षिपन्पुरुषानृ
प २७ अघोषयंश्चनगरेवचनादाहुकस्यते जनार्दनस्यरामस्यबभ्रोश्चैवमहात्मनः २८ अद्यप्रभृतिसर्वेषुवृष्ण्यंधककुलेष्विह सुरासवोन
कर्तव्यःसर्वैर्नगरवासिभिः २९ यश्चनोविदितंकुर्यात्पेयंकश्चिन्नरःक्वचित् जीवन्सशूलमारोहेत्स्वयंकृत्वासबांधवः ३० ततोराजभयात्सर्वे
नियमंचक्रिरेतदा नराःशासनमाज्ञायरामस्याक्लिष्टकर्मणः ३१ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांमौसलपर्वणिप्रथमोऽध्या
यः १ वैशंपायनउवाच एवंप्रयतमानानांवृष्णीनामंधकैःसह कालोगृहाणिसर्वेषांपरिचक्रामनित्यशः १ करालोविकटोमुंडःपु
रुषःकृष्णपिंगलः गृहाण्यवेक्ष्यवृष्णीनांनादृश्यतक्वचित्क्वचित् २ तमघ्नंतमहेष्वासाःशरैःशतसहस्रशः नचाशक्यतवेद्धुंससर्वभूतात्यय
स्तदा ३ उत्पेदिरेमहावाताद्दारुणाश्चदिनेदिने वृष्ण्यंधकविनाशायबहवोलोमहर्षणाः ४ विवृद्धमूषिकारथ्याविभिन्नमणिकास्तथा केशा
नखाश्चसुप्तानामद्यंतेमूषिकैर्निशि ५ चीचीकूचीतिवाशंतिसारिकावृष्णिवेश्मसु नोपशाम्यतिशब्दश्चसदिवारात्रमेवहि ६ अनुकुर्वन्नुलू
कानांसारसाविरुतंतथा अजाःशिवानांविरुतमन्वकुर्वतभारत ७ पांडुरारक्तपादाश्चविहगाःकालचोदिताः वृष्ण्यंधकानांगेहेषुकपोता
व्यचरंस्तदा ८ व्यजायंतखरागोषुकरभाश्वतरीषुच ९ नापत्रपंतपापानिकुर्वंतोवृष्णयस्तदा प्राद्विषन्ब्राह्मणांश्चापिपितॄन्देवांस्तथैवच १०
गुरूंश्चाप्यवमन्यंतनतुरामजनार्दनौ पत्न्यःपतीन्व्युच्चरंतपत्नीश्चपतयस्तथा ११ विभावसुःप्रज्वलितोवामंविपरिवर्तते नीललोहितमांजिष्ठा
विसृजन्नर्चिषःपृथक् १२ उदयास्तमनेनित्यंपुर्यांतस्यांदिवाकरः व्यदृश्यतासकृत्पुंभिःकबंधैःपरिवारितः १३ महानसेषुसिद्धेषुसंस्कृते
तीवभारत आहार्यमाणेकृमयोव्यदृश्यंतसहस्रशः १४

विद्धुमर्निनिमित्तशोषं सर्वभूतानामत्ययोनाशोयस्मात् ३ ४ मणिकामृत्पात्राणि ५ ६
७ ८ ९ १० उच्चरंतवंचितवत्यः ११ १२ १३ आहार्यमाणेअन्ने १४

१५ परेति स्वनक्षत्रादर्शनमपिस्वमृत्युसूचकमित्यर्थः १६·१७ एवमिति त्रयोदशदिवसाः कृष्णपक्षोऽभूदित्यर्थः १८ एवंसत्यग्रिमपक्षेऽप्यभाव्यं

पुण्याहेवाच्यमानेतुजपत्सुचमहात्मसु अभिधावन्तः श्रूयन्तेनचादृश्यतकश्चन १५ परस्परंचनक्षत्रंहन्यमानंपुनःपुनः ग्रहैरपश्यन्सर्वेते
नात्मनस्तुकथंचन १६ नदन्तंपाञ्चजन्यंचवृष्ण्यन्धकनिवेशने समन्तात्प्रत्यवाश्यन्तरासभादारुणस्वराः १७ एवंपश्यन्हृषीकेशःसंप्रा
प्तंकालपर्ययं त्रयोदश्याममावास्यांतान्दृष्ट्वाप्राब्रवीदिदं १८ चतुर्दशीपञ्चदशीकृतेयंराहुणापुनः प्राप्तेवैभारतेयुद्धेप्राप्ताचाद्यक्षयाय
यनः १९ विमृशन्नेवकालंतंपरिचिन्त्यजनार्दनः मेनेप्राप्तंसषट्त्रिंशंवर्षंवैकेशिसूदनः २० पुत्रशोकाभिसंतप्तागान्धारीहतबान्धवा-
यदनुव्याजहारार्तातदिदंसमुपागमत् २१ इदंचतदनुप्राप्तमब्रवीद्यद्युधिष्ठिरः पुराव्यूढेष्वनीकेषुदृष्ट्वोत्पातान्सुदारुणान् २२ इत्युक्त्वा
वासुदेवस्तुचिकीर्षुःसत्यमेवतत् आज्ञापयामासतदातीर्थयात्रामरिंदमः २३ अघोषयन्तपुरुषास्तत्रकेशवशासनात् तीर्थयात्रास·
मुद्रेवःकार्येतिपुरुषर्षभाः २४ इतिश्रीमहाभारतेमौसलपर्वणिद्वितीयोऽध्यायः २ वैशंपायनउवाच कालीस्त्रीपा·
ण्डुरैर्दन्तैःप्रविश्यहसतीनिशि स्त्रियःस्वप्नेषुमुष्णन्तीद्वारकांपरिधावति १ अग्निहोत्रनिकेतेषुवास्तुमध्येषुवेश्मसु वृष्ण्यन्धकान-
खादन्तस्वप्नेषूल्काभयानकाः ३ अलंकाराश्चछत्रंचध्वजाश्चकवचानिच ह्रियमाणान्यदृश्यन्तरक्षोभिःसुभयानकैः ३ तच्चाग्निद
त्तंकृष्णस्यवज्रनाभमयोमयं दिवमाचक्रमेचक्रंवृष्णीनांपश्यतांतदा ४ युक्तंरथंदिव्यमादित्यवर्णंहयाहरन्पश्यतोदारुकस्य
तेसागरस्योपरिष्टादवर्तन्मनोजवाश्चतुरोवाजिमुख्याः ५ तालःसुपर्णश्चमहाध्वजौतौसुपूजितौरामजनार्दनाभ्यां उच्चैर्जह्रु
रप्सरसोदिवानिशंवाचश्चोचुर्गम्यतांतीर्थयात्रा ६ ततोजिगमिषन्तस्तेवृष्ण्यन्धकमहारथाः सान्तःपुरास्तदातीर्थयात्रामैच्छन्न
रर्षभाः ७ ततोभोज्यंचभक्ष्यंचपेयंचान्धकवृष्णयः बहुनानाविधंचक्रुर्मद्यंमांसमनेकशः ८ ततःसैनिकवर्गाश्चनिर्ययुर्नगरा-
द्बहिः यानैरश्वैर्गजैश्चैवश्रीमन्तस्तिग्मतेजसः ९ ततःप्रभासेन्यवसन्यथोद्देशंयथागृहं प्रभूतभक्ष्यपेयास्तेसदारायादवास्त
दा १० विनष्टांस्तान्निशम्याथसमुद्रान्तेसयोगवित् जगामामन्त्र्यतान्वीरानुद्धवोऽर्थविशारदः ११ तंप्रस्थितंमहात्मानमभिवाद्य
कृताञ्जलिं जानन्विनाशंवृष्णीनांनैच्छद्वारयितुंहरिः १२ ततःकालपरीतास्तेवृष्ण्यन्धकमहारथाः अपश्यन्नुद्धवंयान्तंतेजसा
वृत्यरोदसी १३

तन्नजातं प्रत्युत एकातिथिःक्षीणा तत्रगृहणंचजातमित्याह चतुर्दशीति १९ २० २१ २२ २३ २४ इति
श्रीमहाभारतेमौश० द्वितीयोऽध्यायः २ कालीमुष्णन्ती स्त्रीणांमंगलसूत्रादिकंचोरयन्ती १ २ ३ ४ ५ ६ ७ ८ ९ १० निशम्यदृष्ट्वा अर्थ-
विशारद·मोक्षपंडितः ११ १२ १३

ब्राह्मणार्थेषुयत्सिद्धमन्नंतेषांमहात्मनां तद्वानरेभ्यःप्रददुःसुरागंधसमन्वितं १४ ततस्तूर्यशताकीर्णंनटनर्तकसंकुलं प्रवर्ततमहापा
नंप्रभासेतिग्मतेजसां १५ कृष्णस्यसंनिधौरामःसहितःकृतवर्मणा अपिबद्युयुधानश्चगदोबभ्रुस्तथैवच १६ ततःपरिषदोमध्येयुयु
धानोमदोत्कटः अब्रवीत्कृतवर्माणमवहस्यावमन्यच १७ कःक्षत्रियोहन्यमानःसुप्तान्हन्यान्मृतानिव नतन्मृष्यंतिहार्दिक्ययादवा
यत्त्वयाकृतं १८ इत्युक्तेयुयुधानेनपूजयामासतद्वचः प्रद्युम्नोरथिनांश्रेष्ठोहार्दिक्यमवमन्यच १९ ततःपरमसंक्रुद्धःकृतवर्मातमब्रवी
त् निर्दिशन्निवसावज्ञंतदासव्येनपाणिना २० भूरिश्रवाश्छिन्नबाहुर्युद्धेप्रायगतस्त्वया वधेनसुनृशंसेनकथंवीरेणपातितः २१ इ
तितस्यवचःश्रुत्वाकेशवःपरवीरहा तिर्यक्सरोषयादृष्ट्यावीक्षांचक्रेसमन्युमान् २२ मणिःस्यमंतकश्चैवयःससत्राजितोभवत् तांक
थांस्मारयामाससात्यकिर्मधुसूदनं २३ तच्छ्रुत्वाकेशवस्यांकमगमद्रुदतीतदा सत्यभामाप्रकुपिताकोपयंतीजनार्दनं २४ ततउत्थाय-
सक्रोधःसात्यकिर्वाक्यमब्रवीत् पंचानांद्रौपदेयानांधृष्टद्युम्नशिखंडिनोः २५ एषगच्छामिपदवींसत्येनचतथाशपे सौप्तिकेयेचनिह
ताःसुप्तायेनदुरात्मना २६ द्रोणपुत्रसहायेनपापेनकृतवर्मणा समाप्तमायुरस्याद्ययशश्चैवसुमध्यमे २७ इत्येवमुक्त्वाखड्गेनकेशवस्य
समीपतः अभिद्रुत्यशिरःक्रुद्धश्चिच्छेदकृतवर्मणः २८ तथान्यानपिनिघ्नंतंयुयुधानंसमंततः अभ्यधावद्धृषीकेशोविनिवारयि
षुस्तदा २९ एकीभूतास्ततःसर्वेकालपर्यायचोदिताः भोजांधकामहाराजशैनेयंपर्यवारयन् तान्दृष्ट्वापततस्तूर्णमभिक्रुद्धाञ्जनार्दनः
नचुक्रोधमहातेजाजानन्कालस्यपर्ययं ३१ तेतुपानमदाविष्टाश्चोदिताःकालकर्मणा युयुधानमथाभ्यघ्नन्नुच्छिष्टैर्भाजनैस्तदा ३२ ह
न्यमानेतुशैनेयेक्रुद्धोरुक्मिणिनंदनः तदनंतरमागच्छन्मोक्षयिष्यन्शिनेःसुतं ३३ सभोजैःसहसंयुक्तःसात्यकिश्चांधकैःसह व्यायच्छ
मानौतौवीरौबाहुद्रविणशालिनौ ३४ बहुत्वान्निहतौतत्रउभौकृष्णस्यपश्यतः हतंदृष्ट्वातुशैनेयंपुत्रंचयदुनंदनः ३५ एरकाणांतदामु
ष्टिंकोपाज्जग्राहकेशवः तदभून्मुसलंघोरंवज्रकल्पमयोमयं ३६ जघानकृष्णस्तांस्तेनयेयेप्रमुखेभवन् ततोंधकाश्चभोजाश्चशै
नेयावृष्णयस्तथा ३७ जघ्नुरन्योन्यमाक्रंदेमुसलैःकालचोदिताः यस्तेषामेरकांकश्चिज्जग्राहरुषितोनृप ३८ वज्रभूतेवसाराजन्न
दृश्यततदाविभो तृणंचमुसलीभूतमपितत्रव्यदृश्यत ३९

विधास्ताडनंतदनर्हान अविध्यान् तोदादिकाद्विधेरिषुपथलक्षणःकः ततोर्हार्थेयः विध्यानिध्या ४० ४१ ४२ नत्रेतियन्मुसलमपश्यत् तदेवावष्टभ्यतस्थौ

ब्रह्मदंडकृतंसर्वमितितद्विद्धिपार्थिव अविध्यान्निध्यतेराजन्प्रक्षिपंतिस्मयत्तृणं ४० तद्वज्रभूतंमुसलंव्यदृश्यततदादृढं अवधीत्पितरं
पुत्रः पितापुत्रंचभारत ४१ मत्ताः परिपतंतिस्मयोधयंतः परस्परं पतंगाइवचाग्नौतेनिपेतुःकुकुराधकाः ४२ नासीत्पलायनेबुद्धिर्वध्यमा
नस्यकस्यचित् ४२ तत्रापश्यन्महाबाहुर्जानन्कालस्यपर्ययं मुसलंसमवष्टभ्यतस्थौसमधुसूदनः ४३ सांबंचनिहतंदृष्ट्वाचारुदेष्णंचमा
धवः प्रद्युम्नंचानिरुद्धंचततश्चुक्रोधमाधवः ४४ गदंवीक्ष्यशयानंचभृशंकोपसमन्वितः सनिःशेषंतदाचक्रेशार्ङ्गचक्रगदाधरः ४५
तंनिघ्नंतंमहातेजाबभ्रुःपरपुरंजयः दारुकश्चैवदाशार्हमूचतुर्यन्निबोधतत् ४६ भगवन्निहताःसर्वेत्वयाभूयिष्ठशोनराः रामस्यपदम
न्विछतत्रगच्छामयत्रसः ४७ इतिश्रीमहाभा॰मौसलपर्वणितृतीयोऽध्यायः ३ वैशंपायनउवाच ततोययुर्दारुकःके
शवश्चबभ्रुश्चरामस्यपदंपतंतः अथापश्यन्राममनंतवीर्यंवृक्षेस्थितंचिंतयानंविविक्ते ततःसमासाद्यमहानुभावंकृष्णस्तदादारुकम
न्वशासत् गत्वाकुरून्सर्वमिदंमहांतंपार्थायशंसस्ववधंयदूनां २ ततोर्जुनःक्षिप्रमिहोपयातुश्रुत्वामृतान्यादवान्ब्रह्मशापात् इत्येवमु
क्तःसययौरथेनकुरूंस्तथादारुकोनष्टचेताः ३ ततोगतेदारुकेकेशवोथदृष्ट्वांतिकेबभ्रुमुवाचवाक्यं स्त्रियोभवान्रक्षितुंयातुशीघ्रंने
ताहिंस्युर्दस्यवोवित्तलोभात् ४ सप्रस्थितःकेशवेनानुशिष्टोमदातुरोज्ञातिवधार्दितश्च तंविश्रांतंसन्निधौकेशवस्यदुरंतमेकंसहसैवब
भ्रुं ब्रह्मानुशप्तमवधीन्महद्वैकूटंयुक्तंमुसलंलुब्धकस्य ५ ततोदृष्ट्वानिहतंबभ्रुमाहकृष्णोग्रजंभ्रातरमुग्रतेजाः इहैवत्वंमामतीक्षस्व
रामयावत्स्त्रियोज्ञातिवशाःकरोमि ६ ततःपुरींद्वारवतींप्रविश्यजनार्दनःपितरंप्राहवाक्यं स्त्रियोभवान्रक्षतुनःसमग्राधनंजयस्याग
मनंप्रतीक्षन् ७ रामोवनांतेप्रतिपालयन्मामास्तेद्यहंतेनसमागमिष्ये दृष्टंमयेदंनिधनंयदूनांराज्ञांचपूर्वंकुरुपुंगवानां ८ नाहंविना
यदुभिर्यादवानांपुरीमिमामशकंद्रष्टुमद्य तपश्चरिष्यामिनिबोधतन्मेरामेणसार्धंवनमभ्युपेत्य ९ इतीदमुक्त्वाशिरसाचपादौसंस्पृश्य
कृष्णस्त्वरितोजगाम ततोमहान्निनदःप्रादुरासीत्सस्त्रीकुमारस्यपुरस्यतस्य १० अथाब्रवीत्केशवःसन्निवर्त्यशब्दंश्रुत्वायोषितांक्रो
शतीनां पुरीमिमामेष्यतिसव्यसाचीसवोदुःखान्मोक्षयितानराग्र्यः ११ ततोगत्वाकेशवस्तंददर्शरामंवनेस्थितमेकंविविक्ते अथाप
श्यद्योगयुक्तस्यतस्यनागंमुखान्निश्चरंतंमहांतं १२

४३ ४४ ४५ ४६ ४७ इतिश्रीमहाभारते मौसलप॰ टीकायांतृतीयोऽध्या
यः ३ ततोपनंतः शीघ्रंगच्छंतः १ २ ३ ४ कूटंलोहमुद्गरंयुक्तंबद्धंमुसलंब्राह्मणशापजंमुसलंस्वयमेवनिपत्यावधीत्सार्द्धश्लोकः ५ ६
७ ८ ९ १० ११ १२ छ

श्वेतंययौसततःप्रेक्ष्यमाणोमहार्णवंयेनमहानुभावः सहस्रशीर्षःपर्वताभोगवर्ष्मारक्ताननःस्वांतनुंतांविसृज्य १३ सम्यक्चतंसागरःप्र
त्यगृह्णान्नागादिव्याःसरितश्चैवपुण्याः कर्कोटकोवासुकिस्तक्षकश्चपृथुश्रवावरुणःकुंजरश्च १४ मिश्रीशंखःकुमुदःपुंडरीकस्तथानागोधृ
तराष्ट्रोमहात्मा ह्रादःक्राथःशितिकंठोग्रतेजास्तथानागौचक्रमंदातिषंडौ १५ नागश्रेष्ठोदुर्मुखश्चांबरीषःस्वयंराजावरुणश्चापिराजन्
प्रत्युद्गम्यस्वागतेनाभ्यनंदंस्तेपूजयंश्चार्घ्यपाद्यक्रियाभिः १६ ततोगतेभ्रातरिवासुदेवोजानन्सर्वागतयोदिव्यदृष्टिः वनेशून्येविचरं
श्चिंतयानोभूमौचाथसंविवेशाग्र्यतेजाः १७ सर्वंहितेनप्राक्तदावितथमासीद्गांधार्यायद्वाक्यमुक्तःसपूर्वं दुर्वाससापायसोच्छिष्टलिप्तेयच्चा
प्युक्तंतच्चसस्मारवाक्यं १८ सचिंतयन्नंधकवृष्णिनाशंकुरुक्षयंचैवमहानुभावः मेनेततःसंक्रमणस्यकालंततश्चकारेंद्रियसन्निरोधं
१९ तथाचलोकत्रयपालनार्थमात्रेयवाक्यप्रतिपालनाय देवोपिसंदेहविघातहेतोर्निर्याणमिच्छन्सकलार्थतत्ववित् २० ससन्निरुद्धेंद्रि
यवाङ्मनास्तुशिश्येमहायोगमुपेत्यकृष्णः जराथतंदेशमुपाजगामलुब्धस्तदानींमृगलिप्सुरुग्रः २१ सकेशवंयोगयुक्तंशयानंमृगाशंकीलु
ब्धकःसायकेन जराविध्यत्पादतलेत्वरावांस्तंचाभितस्तज्जिघृक्षुर्जगाम २२ अथापश्यत्पुरुषंयोगयुक्तंपीतांबरंलुब्धकोनेकबाहुं मत्वा
त्मानंत्वपराद्धंसतस्यपादौजराजगृहेशंकितात्मा २३ आश्वासयत्तंमहात्मातदानींगच्छन्नूर्ध्वंरोदसीव्याप्यलक्ष्म्या दिवंप्राप्तंवासवोथाश्वि
नौचरुद्रादित्यावसवश्चाथविश्वे २४ प्रत्युद्ययुर्मुनयश्चापिसिद्धागंधर्वमुख्याश्चसहाप्सरोभिः ततोराजन्भगवानुग्रतेजानारायणःप्रभ
वश्चाव्ययश्च २५ योगाचार्योरोदसीव्याप्यलक्ष्म्यास्थानंप्रापस्वंमहात्माप्रमेयं ततोदेवैरृषिभिश्चापिकृष्णःसमागतश्चारणैश्चैवराजन्
२६ गंधर्वाग्र्यैरप्सरोभिर्वराभिःसिद्धैःसाध्यैश्चानतैःपूज्यमानः तेवैदेवाःप्रत्यनंदंतराजन्मुनिश्रेष्ठावाग्भिरानर्चुरीशं तंगंधर्वाश्चापि
तस्थुःस्तुवंतःप्रीत्याचैनंपुरुहूतोभ्यनंदत् २७ इतिश्रीमहाभारतेमौस० चतुर्थोऽध्यायः ४ वैशंपायनउवाच दारु
कोपिकुरूनागत्यदृष्ट्वापार्थान्महारथान् आचष्टमौसलेवृष्णीनन्योन्येनोपसंहृतान् १ श्रुत्वाविनष्टान्वार्ष्णेयान्सभोजांधककुकुरान् पां
डवाःशोकसंतप्ताविवस्त्रमनसोभवन् २ ततोर्जुनस्तानामंत्र्यकेशवस्यप्रियःसखा प्रययौमातुलंद्रष्टुंनेदमस्तीतिचाब्रवीत् ३ सवृष्णिनि
लयंगत्वादारुकेणसहप्रभो ददर्शद्वारकांवीरोमृतनाथामिवस्त्रियं ४ याःस्मतालोकनाथेननाथवत्यःपुराभवन् तास्त्वनाथास्तदानाथं
पार्थंदृष्ट्वाविचुक्रुशुः ५

६ ७ ८ ९ १० ११ १२ १३ १४ १५ इतिश्रीमहाभा॰मौ॰पंचमोऽध्यायः ५ १ २ ३ ४ ५ शिष्यौप्रद्युम्नसात्यकी ६ ७ ८ ९ १० काशिराजं

षोडशस्त्रीसहस्राणिवासुदेवपरिग्रहः तासामासीन्महानादोदृष्ट्वैवार्जुनमागतं ६ तास्तुदृष्ट्वैवकौरव्योबाष्पेणापिहितेक्षणः हीनाःकृ
ष्णेनपुत्रैश्चनाशकत्सोभिवीक्षितुं ७ सतांवृष्ण्यंधकजलांहयमीनांरथोडुपां वादित्ररथघोषौघांवेश्मतीर्थमहाग्रहां ८ रत्नशैवलसंघातांव
ज्रप्राकारमालिनीं रथ्यास्रोतोजलावर्तांचत्वरस्तिमितह्रदां ९ रामकृष्णमहाग्राहांद्वारकांसरितंतदा कालपाशग्रहांभीमांनदींवैतरणीमि
व १० ददर्शवासविर्धीमान्विहीनांवृष्णिपुंगवैः गतश्रियंनिरानंदांपद्मिनींशिशिरेयथा ११ तांदृष्ट्वाद्वारकांपार्थस्ताश्चकृष्णस्ययोषितः
सस्वनंबाष्पमुत्सृज्यनिपपातमहीतले १२ सात्राजितीततःसत्यारुक्मिणीचविशांपते अभिपत्यप्ररुरुदुःपरिवार्यधनंजयं १३ ततस्तं
कांचनेपीठेसमुत्थाप्योपवेश्यच अब्रुवंत्योमहात्मानंपरिवार्योपतस्थिरे १४ ततःसंस्तूयगोविंदंकथयित्वाचपांडवः आश्वास्यताःस्त्रि
यश्चापिमातुलंद्रष्टुमभ्यगात् १५ इतिश्रीमहाभार॰ पंचमोऽध्यायः ५ वैशंपायनउवाच तंशयानंमहात्मानं
वीरमानकदुंदुभिं पुत्रशोकेनसंतप्तंददर्शकुरुपुंगवः १ तस्याश्रुपरिपूर्णाक्षोव्यूढोरस्कोमहाभुजः आर्तस्यार्ततरःपार्थःपादौजग्राह
भारत २ तस्यमूर्धानमाघ्रातुमियेषानकदुंदुभिः स्वस्रीयस्यमहाबाहुर्नशशाकचशत्रुहन् ३ समालिंग्यार्जुनंवृद्धःसभुजाभ्यांमहाभुजः
रुदन्पुत्रान्स्मरन्सर्वान्विललापसुविह्वलः भ्रातॄन्पुत्रांश्चपौत्रांश्चदौहित्रान्ससखीनपि ४ वसुदेवउवाच यैर्जिताभूमिपालाश्चदैत्या
श्चशतशोऽर्जुन तान्दृष्ट्वानेहपश्यामिजीवाम्यर्जुनदुर्मरः ५ यौतावर्जुनशिष्यौतेप्रियौबहुमतौसदा तयोरपनयात्पार्थवृष्णयोनिधनं
गताः ६ यौतौवृष्णिप्रवीराणांद्वावेवातिरथौमतौ प्रद्युम्नोयुयुधानश्चकथयन्कत्थसेचयौ ७ तौसदाकुरुशार्दूलकृष्णस्यप्रियभाजनौ
तावुभौवृष्णिनाशस्यमुखमास्तांधनंजय ८ नतुगर्हामिशैनेयंहार्दिक्यंचाहमर्जुन अक्रूरंरौक्मिणेयंवैशापोह्येवात्रकारणं ९ केशिनं
यस्तुकंसंचविक्रम्यजगतःप्रभुः विदेहावकरोत्पार्थचैद्यंचबलगर्वितं १० नैषादिमेकलव्यंचचक्रेकालिंगमागधान् गांधारान्काशि
राजंचमरुभूमौचपार्थिवान् ११ प्राच्यांश्चदाक्षिणात्यांश्चपार्वतीयांस्तथानृपान् सोभ्युपेक्षितवानेवमनयान्मधुसूदनः १२ त्वंहितंनारद
श्चैवमुनयश्चसनातनं गोविंदमनघंदेवमभिजानीध्वमच्युतं १३ प्रत्यपश्यच्चसर्वंविभुर्ज्ञातिक्षयमधोक्षजः समुपेक्षितवान्नित्यंस्वयंसमम
पुत्रकः १४ गांधार्यावचनंयत्तदृषीणांचपरंतप तन्नूनमन्यथाकर्तुंनैच्छत्सजगतःप्रभुः १५ प्रत्यक्षंभवतश्चापितवपौत्रःपरंतप अश्वत्था
म्नाहतश्चापिजीवितस्तस्यतेजसा १६

पौंड्रकं ११ एवंवंशक्षयंअनयात्बालानामपराधात्सत्यपिसामर्थ्येनृपेक्षाकरणमनयस्तस्माद्वा १२ सामर्थ्यमेवा
हर्तुमिति १३ १४ १५ १६

१७ १८ १९ २० योहमिति नरनारायणयोर्जीवपरमात्मनोरैक्यंतिद्वारेणभगवतोअभेदउक्तःस्तंज्ञात्वानुवदन्नपिवसुदेवोनशोकंमुंचतीत्याश्चर्यंभगवन्मा-

इमांस्तुनैच्छत्स्वान्ज्ञातीन्रक्षितुंससखातव ततःपुत्रांश्चपौत्रांश्चभ्रातॄनथसखीनपि १७ शयानान्निहतान्दृष्ट्वाततोमामब्रवीदिदं संप्राप्तो
ऽयमस्यांतःकुलस्यभरतर्षभ आगमिष्यतिबीभत्सुरिमांद्वारवतींपुरीं आख्येयंयदिदंवृत्तंवृष्णीनांवैशसंमहत् १९ सतुश्रुत्वामहातेजा
यदूनांनिधनंप्रभो आगंताक्षिप्रमेवेहनमेत्रास्तिविचारणा २० योहंतमर्जुनंविद्धियोर्जुनःसोहमेवतु यद्ब्रूयात्तत्तथाकार्यमितिबु-
ध्यस्वभारत २१ सस्त्रीषुप्राप्तकालासुपांडवोबालकेषुच प्रतिपत्स्यतिबीभत्सुर्भवतश्चौर्ध्वदेहिकं २२ इमांचनगरींसद्यःप्रतियातेध
नंजये प्राकाराट्टालकोपेतांसमुद्रःप्लावयिष्यति २३ अहंदेशेतुकस्मिंश्चित्पुण्येनियममास्थितः कालंकर्तासद्यएवरामेणसहधीमता २४
एवमुक्त्वाहृषीकेशोमामचिंत्यपराक्रमः हित्वामांबालकैःसार्द्धंदिशंकामप्यगात्प्रभुः २५ सोहंतौचमहात्मानौचिंतयन्भ्रातरौतव घोरं
ज्ञातिवधंचैवनभुंजेशोककर्शितः २६ नभोक्ष्येनचजीविष्येदिष्ट्याप्राप्तोसिपांडव यदुक्तंपार्थकृष्णेनतत्सर्वमखिलंकुरु २७ एतत्तेपा
र्थराज्यंचस्त्रियोरत्नानिचैवहि इष्टान्प्राणानहंह्येतांस्त्यक्ष्यामिमधुसूदन २८ इतिश्रीमहाभारतेमौस० षष्ठोऽध्यायः ६ ७
वैशंपायनउवाच एवमुक्तःसबीभत्सुर्मातुलेनपरंतपः दुर्मनादीनमनसंवसुदेवमुवाचह १ नाहंवृष्णिप्रवीरेणमधुभिश्चैवमातुल वि
हीनांपृथिवींद्रष्टुंशक्नोमीहकथंचन २ राजाचभीमसेनश्चसहदेवश्चपांडवः नकुलोयाज्ञसेनीचषडेकमनसोवयं ३ राज्ञःसंक्रमणेचा
पिकालोयंवर्ततेध्रुवं तमिमंविद्धिसंप्राप्तंकालंकालविदांवर ४ सर्वथावृष्णिदारांस्तुबालवृद्धांस्तथैवच नयिष्येपरिगृह्याहमिंद्रप्रस्थम
रिंदम ५ इत्युक्त्वादारुकमिदंवाक्यमाहधनंजयः अमात्यान्वृष्णिवीराणांद्रष्टुमिच्छामिमाचिरं ६ इत्येवमुक्त्वावचनंसुधर्मांयादवींस
भां प्रविवेशार्जुनःशूरःशोचमानोमहारथान् ७ तमासनगतंतत्रसर्वाःप्रकृतयस्तथा ब्राह्मणानैगमास्तत्रपरिवार्योपतस्थिरे ८
तान्दीनमनसःसर्वान्निभृतान्गतचेतसः उवाचेदंवचःकालेपार्थोदीनतरस्तथा ९ शक्रप्रस्थमहंनेष्येवृष्ण्यंधकजनंस्वयं इदंतुन
गरंसर्वंसमुद्रःप्लावयिष्यति १० सज्जीकुरुतयानानिरत्नानिविविधानिच वज्रोयंभवतांराजाशक्रप्रस्थेभविष्यति ११ सप्तमेदिव
सेचैवरवौविमलउद्गते बहिर्वत्स्यामहेसर्वेसज्जीभवतमाचिरं १२ इत्युक्तास्तेनतेपौराःपार्थेनाक्लिष्टकर्मणा सज्जमाशुततश्चक्रुःस्व
सिद्ध्यर्थंसमुत्सुकाः १३

योहमितिसाव २१ २२ २३ अहमितिकालमृत्युं आत्मन कर्ताकारिष्यामि गतइत्यनेननगरद्वारस्थंसगणंनतंव्यक्तम्
इतिश्रीमहाभारतेमौसलपर्वणिटीकायांषष्ठोऽध्यायः ६ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११
फ० २४ २५ २६ २७ २८ १२ १३

१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१

तांराश्रिमवसत्पार्थः केशवस्यनिवेशनं महताशोकमोहेनसहसाभिपरिप्लुतः १४ श्वोभूतेथततः शौरिर्वसुदेवः प्रतापवान् युक्त्वात्मानं-
महातेजा जगामगतिमुत्तमां १५ ततः शब्दोमहानासीद्वसुदेवनिवेशने दारुणः क्रोशतीनांचरुदतीनांचयोषितां १६ प्रकीर्णमूर्धजाः
सर्वाविमुक्ताभरणस्रजः उरांसिपाणिभिर्घ्नंत्योव्यलपन्करुणंस्त्रियः १७ तंदेवकीचभद्राचरोहिणीमदिरातथा अन्वारोहंतचत-
दाभर्तारंयोषितांवराः १८ ततः शौरिंनृयुक्तेनबहुमौल्येनभारत यानेनमहतापार्थोबहिर्निष्क्रामयत्तदा १९ तमन्वयुस्तत्रतत्र दुः
खशोकसमाहताः द्वारकावासिनः सर्वेपौरजानपदाहिताः २० तस्याश्वमेधिकंच्छत्रंदीप्यमानाश्चपावकाः पुरस्तात्तस्ययानस्य
याजकाश्चततोययुः २१ अनुजग्मुश्चतंवीरंदेव्यस्तावस्वलंकृताः स्त्रीसहस्रैः परिवृतावधूभिश्चसहस्रशः २२ यस्तुदेशः प्रिय-
स्तस्यजीवतोभून्महात्मनः यत्रैनमुपसंकल्प्यपितृमेधंप्रचक्रिरे २३ तंचिताग्निगतंवीरंशूरपुत्रंवरांगनाः ततोन्वारुरुहुः पत्न्यश्चतस्रः
पतिलोकगाः २४ तंचैवतसृभिस्त्रीभिरन्वितंपांडुनंदनः अदाहयच्चंदनैश्चगंधैरुच्चावचैरपि २५ ततः प्रादुरभूच्छब्दः समिद्धस्यवि
भावसोः सामगानांचनिर्घोषोनराणांरुदतामपि २६ ततोवज्रप्रधानास्तेवृष्ण्यंधककुमारकाः सर्वेचैवोदकंचक्रुः स्त्रियश्चैवमहा
त्मनः २७ अलुप्तधर्मस्तंधर्मंकारयित्वासफाल्गुनः जगामवृष्णयोयत्रविनष्टाभरतर्षभ २८ सतान्दृष्ट्वानिपतितान्कदनेभृश
दुःखितः बभूवातीवकौरव्यः प्राप्तकालंचकारह २९ यथाप्रधानतश्चैवचक्रेसर्वास्तथाक्रियाः तेहताब्रह्मशापेनमुशलैरेरकोद्
भैः ३० ततः शरीरेरामस्यवासुदेवस्यचोभयोः अन्विष्यदाहयामासपुरुषैराप्तकारिभिः ३१ सतेषांविधिवत्कृत्वाप्रेतकार्याणिपा
डवः सप्तमेदिवसेप्रायाद्रथमारुह्यसत्वरः ३२ अश्वयुक्तैरथैश्चापिगोखरोष्ट्रयुतैरपि स्त्रियस्तावृष्णिवीराणांरुदत्यः शोककर्षि-
ताः ३३ अनुजग्मुर्महात्मानंपांडुपुत्रंधनंजयं भृत्यास्त्वंधकवृष्णीनांसादिनोरथिनश्चयं ३४ वीरहीनंवृद्धबालंपौरजानपदास्तथा
ययुस्तेपरिवार्याथकलत्रंपार्थशासनात् ३५ कुंजरैश्चगजारोहाययुः शैलनिभैस्तथा सपादरक्षैः संयुक्ताः सांतराश्वधिकाययुः
३६ पुत्राश्चांधकवृष्णीनांसर्वेपार्थमनुव्रताः ब्राह्मणाः क्षत्रियावैश्याः शूद्राश्चैवमहाधनाः ३७ दशषट्चसहस्राणिवासुदेवा
वरोधनं पुरस्कृत्यययुर्वज्रंपौत्रंकृष्णस्यधीमतः ३८ बहूनिचसहस्राणिप्रयुतान्यर्बुदानिचभोजवृष्ण्यंधकस्त्रीणांहतनाथा
विनिर्ययुः ३९

३२ ३३ ३४ ३५ ३६ ३७ ३८ [illegible] [illegible] [illegible]

४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

तत्सागरसमप्रख्यंवृष्णिचक्रंमहर्धिमत् उवाहरथिनांश्रेष्ठःपार्थःपरपुरंजयः ४० निर्यातेतुजनेतस्मिन्सागरोमकरालयः द्वारकां
रत्नसंपूर्णांजलेनाप्लावयत्तदा ४१ यद्यद्धिपुरुषव्याघ्रोभूमेस्तस्याव्यमुचत तत्तत्संप्लावयामाससलिलेनससागरः ४२ तद-
द्भुतमभिप्रेक्ष्यद्वारकावासिनोजनाः तूर्णात्तूर्णतरंजग्मुरहोदैवमितिब्रुवन् ४३ काननेषुचरम्येषुपर्वतेषुनदीषुच निवसन्ना
नयामासवृष्णिदारान्धनंजयः ४४ सपंचनदमासाद्यधीमानतिसमृद्धिमत् देशंगोपशुधान्याढ्यंनिवासमकरोत्प्रभुः ४५ ततो
लोभःसमभवद्दस्यूनांनिहतेश्वराः दृष्ट्वास्त्रियोनीयमानाःपार्थेनैकेनभारत ४६ ततस्तेपापकर्माणोलोभोपहतचेतसः आ
भीरामंत्रयामासुःसमेत्याशुभदर्शनाः ४७ अयमेकोर्जुनोधन्वीवृद्धबालंहतेश्वरं नयत्यस्मानतिक्रम्ययोधाश्चेमेहतौ
जसः ४८ ततोयष्टिप्रहरणादस्यवस्तेसहस्रशः अभ्यधावंतवृष्णीनांतंजनंलोप्त्रहारिणः ४९ महतासिंहनादेनत्रास
यंतःपृथक्जनं अभिपेतुर्वधार्थंतेकालपर्यायचोदिताः ५० ततोनिवृत्तःकौंतेयःसहसासपदानुगः उवाचतान्महाबाहु
रर्जुनःप्रहसन्निव ५० निवर्तध्वमधर्मज्ञायदिजीवितुमिच्छथ इदानींशरनिर्भिन्नाःशोचध्वंनिहतामया ५१ तथोक्ता
स्तेनवीरेणकदर्थीकृत्यतद्वचः अभिपेतुर्जनंमूढावार्यमाणाःपुनःपुनः ५३ ततोर्जुनोधनुर्दिव्यंगांडीवमजरंमहत् आ
रोपयितुमारेभेयत्नादिवकथंचन ५४ चकारसज्यंकृच्छ्रेणसंभ्रमेतुमुलेसति चिंतयामासचास्त्राणिनचसस्मारतान्य
पि ५५ वैकल्यंतन्महद्दृष्ट्वाभुजवीर्येतथायुधि दिव्यानांमहदस्त्राणांविनाशाद्व्रीडितोभवत् ५६ वृष्णियोधाश्चते
सर्वेगजाश्वरथयोधिनः नशेकुरावर्तयितुंह्रियमाणंचतंजनं ५७ कलत्रस्यबहुत्वाद्धिसंपतत्सुततस्ततः प्रयत्न
मकरोत्पार्थोजनस्यपरिरक्षणे ५८ मिषतांसर्वयोधानांततस्ताःप्रमदोत्तमाः समंततोवकृष्यंतकामाच्चान्याःप्र-
वव्रजुः ५० ततोगांडीवनिर्मुक्तैःशरैःपार्थोधनंजयः जघानदस्यून्सोद्वेगोवृष्णिभृत्यैःसहप्रभुः ६० क्षणेनतस्य
तेराजन्क्षयंजग्मुरजिह्मगाः अक्षयाहिपुराभूत्वाक्षीणाःक्षतजभोजनाः ६१ सशरक्षयमासाद्यदुःखशोक
समाहतः धनुष्कोट्यातदादस्यूनवधीत्पाकशासनिः ६२ प्रेक्षतस्त्वेवपार्थस्यवृष्ण्यंधकवरस्त्रियः जग्मुरादाय
तेम्लेच्छाःसमंताज्जनमेजय ६३

५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४

धनंजयस्तुदेवंतन्मनसाचिंतयत्प्रभुः दुःखशोकसमाविष्टोनिःश्वासपरमोभवत् ६४ अस्त्राणांचप्रणाशेनबाहुवी-
र्यस्यसंक्षयात् धनुषश्चाविधेयत्वाच्छराणांसंक्षयेणच ६५ बभूवविमनाःपार्थोदैवमित्यनुचिंतयन् न्यवर्ततततो
राजन्नेदमस्तीतिचाब्रवीत् ६६ ततःसशेषमादायकलत्रस्यमहामतिः हतभूयिष्ठरत्नस्यकुरुक्षेत्रमवातरत् ६७
एवंकलत्रमानीयवृष्णीनांहतशेषितं न्यवेशयतकौरव्यस्तत्रतत्रधनंजयः ६८ हार्दिक्यतनयंपार्थोनगरंमार्तिका
वतं भोजराजकलत्रंचहतशेषंनरोत्तमः ६९ ततोबालांश्चवृद्धांश्चस्त्रियश्चादायपांडवः वीरैर्विहीनान्सर्वांस्तान्
शक्रप्रस्थेन्यवेशयत् ७० यौयुधानिंसरस्वत्यांपुत्रंसात्यकिनःप्रियं न्यवेशयतधर्मात्मावृद्धबालपुरस्कृतं ७१ इंद्र-
प्रस्थेददौराज्यंवज्रायपरवीरहा वज्रेणाक्रूरदारास्तुवार्यमाणाःप्रवव्रजुः ७२ रुक्मिणीत्वथगांधारीशैब्याहैम-
वतीत्यपि देवीजांबवतीचैवविविशुर्जातवेदसं ७३ सत्यभामातथैवान्यादेव्यःकृष्णस्यसंमताः वनंप्रविविशू
राजंस्तापस्येधृतनिश्चयाः ७४ फलमूलादिभोजिन्योहरिध्यानैकतत्पराः हिमवंतमभिक्रम्यकलापग्राममाविशन्
७५ द्वारकावासिनोयेतुपुरुषाःपार्थमभ्ययुः यथार्हंसंविभज्यैनान्वज्रेपर्यददज्जयः ७६ सतत्कृत्वाप्राप्तकालंबा
ष्पेणापिहितोर्जुनः कृष्णद्वैपायनंव्यासंददर्शासीनमाश्रमे ७७ इतिश्रीमहाभारतेशतसाहस्र्यांसंहिता
यांवैयासिक्यांमौसलपर्वणिसप्तमोऽध्यायः ७ वैशंपायनउवाच प्रविशन्नर्जुनोराजन्नाश्र
मंसत्यवादिनः ददर्शासीनमेकांतेमुनिंसत्यवतीसुतं १ सतमासाद्यधर्मज्ञमुपतस्थेमहाव्रतं अर्जुनोस्मीति
नामास्मैनिवेद्याभ्यवदत्ततः २ स्वागतंतेस्त्वितिप्राहमुनिःसत्यवतीसुतः आस्यतामितिचोवाचप्रसन्नात्माम
हामुनिः ३ तमप्रतीतमनसंनिःश्वसंतंपुनःपुनः निर्विण्णमनसंदृष्ट्वापार्थंव्यासोब्रवीदिदं ४

नखोदकं केशोदकं वस्त्रप्रांतोदकं दशा तासां उदकं कुंभमुखोदकं च अवीरजा नारी रजस्वला तस्यां रजःप्रस्रवकाले दिनत्रयादर्वाक् अनुगमनं तस्यां मैथुनं ब्राह्मणस्य वधः युद्धे पराजयश्चेति सप्तभिर्निमित्तैः पुरुषः अप्रश्रीर्भवति ५ प्रभिन्नं पराजितं त्वां कदाचिदपि न जानामि ६ ७ ८ हतं मृ

नखकेशदशाकुंभवारिणा किं समुक्षितः अवीरजानुगमनं ब्राह्मणो वा हतस्त्वया ५ युद्धे पराजितो वासि गतश्रीरिव लक्ष्यसे न त्वां प्रभिन्नं जानामि किमिदं भरतर्षभ श्रोतव्यं चेन्मया पार्थ क्षिप्रमाख्यातुमर्हसि ६ अर्जुन उवाच यः स मेघवपुः श्रीमान्बृहत्पंकजलोचनः स कृष्णः सह रामेण त्यक्त्वा देहं दिवंगतः ७ मौसले वृष्णिवीराणां विनाशो ब्रह्मशापजः बभूव वीरांतकरः प्रभासे लोमहर्षणः ८ ये ते शूरा महात्मानः सिंहदर्पा महाबलाः भोजवृष्ण्यंधका ब्रह्मन्नन्योन्यैस्तैर्हतं युधि ९ गदापरिघशक्तीनां सहाः परिघबाहवः त एरकाभिर्निहताः पश्य कालस्य पर्ययं १० हतं पंचशतं तेषां सहस्रं बाहुशालिनां निधनं समनुप्राप्तं समासाद्येतरेतरं ११ पुनः पुनर्न मृष्यामि विनाशममितौजसां चिंतयानो यदूनां च कृष्णस्य च यशस्विनः १२ शोषणं सागरस्येव पर्वतस्येव चालनं नभसः पतनं चैव शैत्यमग्नेस्तथैव च १३ अश्रद्धेयमहं मन्ये विनाशं शार्ङ्गधन्वनः न चेह स्थातुमिच्छामि लोके कृष्णविनाकृतः १४ इतः कष्टतरं चान्यच्छृणु तद्वै तपोधन मनो मे दीर्यते येन चिंतयानस्य वै मुहुः १५ पश्यतो वृष्णिदाराश्च मम ब्रह्मन्सहस्रशः आभीरैरनुसृत्याजौ हृताः पंचनदालयैः १६ धनुरादाय तत्राहं नाशकं तस्य पूरणे यथा पुरा च मे वीर्यं भुजयोर्न तथाभवत् १७ अस्त्राणि मे प्रनष्टानि विविधानि महामुने शराश्च क्षयमापन्नाः क्षणेनैव समंततः १८ पुरुषश्चाप्रमेयात्मा शंखचक्रगदाधरः चतुर्भुजः पीतवासाः श्यामः पद्मदलेक्षणः १९ यश्च याति पुरस्तान्मे रथस्य सुमहाद्युतिः प्रदहन्रिपुसैन्यानि न पश्याम्यहमच्युतं २० येन पूर्वं प्रदग्धानि शत्रुसैन्यानि तेजसा शरैर्गांडीवनिर्मुक्तैरहं पश्चाद्व्यनाशयं २१

तं भागिनवं तइत्यर्थः ९ १० पंचशतं सहस्रगुणितं सहस्रपंचलक्षाणीत्यर्थः न केवलं हतं ताडितं अपितु निधनं प्राप्तं ११ १२ १३ १४ १५ पश्यतः अनादरे षष्ठी पश्यतो मम अनादृत्येत्यर्थः १६ १७ १८ पुरुषश्चेति इदमेव रूपं चतुर्भुजं नित्यमर्जुनदृग्गोचरोऽस्ति अतएव विश्वरूपदर्शनानंतरमुक्तं तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते अन्यथा द्विभुजेनेत्यवक्ष्यत् चतुर्भुजेति नावक्ष्यच्च १९ २० २१ ७ ७

२२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ बुद्धिः उपस्थितकार्यावधारणं तेजः प्रागल्भ्यं प्र
तिपत्तिः अनागतावेक्षणं भवंतिउत्पद्यंते भवकालेषु ऐश्वर्यवत्समयेषु विपर्ययेविनाशकाले विपद्यंतेविनश्यंति ३२ कालईश्वरः जगद्वीजंविय

नमपश्यन्विषीदामिघूर्णामीवचसत्तम परिनिर्विण्णचेताश्चशांतिंनोपलभेपिच २२ विनाजनार्दनंवीरंनाहंजीवितुमुत्सहे
श्रुत्वैवहिगतंविष्णुंममापिमुमुहुर्दिशः २३ मनष्टज्ञातिवीर्यस्यशून्यस्यपरिधावतः उपदेष्टुममश्रेयोभवानर्हतिसत्तम
२४ व्यासउवाच ब्रह्मशापविनिर्दग्धावृष्ण्यंधकमहारथाः विनष्टाःकुरुशार्दूलनतान्शोचितुमर्हसि २५ भवित
व्यंतथातच्चदिष्टमेतन्महात्मना उपेक्षितंचकृष्णेनशक्तेनापिव्यपोहितुं २६ त्रैलोक्यमपिगोविंदः कृत्स्नंस्थावरजंगमं
प्रसहेदन्यथाकर्तुंकुतः शापंमहात्मनः २७ रथस्यपुरतोयातियःसचक्रगदाधरः तवस्नेहात्पुराणर्षिर्वासुदेवश्चतुर्भुजः
२८ कृत्वाभारावतरणंपृथिव्याः पृथुलोचनः मोक्षयित्वातनुंप्राप्तः कृष्णःस्वस्थानमुत्तमं त्वयापीह महत्कर्मदेवा
नांपुरुषर्षभ कृतंभीमसहायेनयमाभ्यांचमहाभुज ३० कृतकृत्यांश्चवोमन्येसंसिद्धान्कुरुपुंगव गमनंप्राप्तकालं
चइदंश्रेयस्करंविभो ३१ एवंबुद्धिश्चतेजश्चप्रतिपत्तिश्चभारत भवंतिभवकालेषुविपद्यंतेविपर्यये ३२ कालमू
लमिदंसर्वंजगद्बीजंधनंजय कालएवसमादत्तेपुनरेवयदृच्छया ३३ सएवबलवान्भूत्वापुनर्भवतिदुर्बलः सएवे
शश्चभूत्वेहपरैराज्ञाप्यतेपुनः ३४ कृतकृत्यानिचास्त्राणिगतान्यद्ययथागतं पुनरेष्यंतितेहस्तंयदाकालोभविष्यति
३५ कालोगंतुंगतिंमुख्यांभवतामपिभारत एतच्छ्रेयोहिवोमन्येपरमंभरतर्षभ ३६ वैशंपायनउवाच
एतद्वचनमाज्ञायव्यासस्यामिततेजसः अनुज्ञातोययौपार्थोनगरंनागसाह्वयं ३७

दादिपंचकं समादत्तेसंहरति यदाभूता
नामपिसंहारोभवतिकियान् तत्रभौतिकानांनाशइतिनदर्थेशोकोनुचितइतिभावः ३३ सएवबलवान्सएवदुर्बलोभवत्येवंविजयापिकालमू
लोज्ञेयः ३४ कृतेतिभवंतोपिअस्त्रवत्कृतकृत्याइतिभावः पुनर्युगांतरे ३५ मुख्यांगतिंस्वर्गंगंतुं एततप्रस्थानं ३६
३९ श्रीनृपंचास्यायनमः ७ ७ ७ ७

३८ इतिश्रीमत्सदवाक्यप्रमाण मर्यादाधुरंधर चतुर्धर वंशावतंस श्रीगोविंदसूरिसूनोर्नीलकंठस्य कृतौ भारत भावदीपे मौसलपर्वणि अष्टमो-

प्रविश्य च पुरीं वीरः समासाद्य युधिष्ठिरं आचष्ट तद्यथावृत्तं वृष्ण्यंधककुलं प्रति ३८ इ
तिश्रीमहाभारते शतसाहस्र्यां संहितायां वैय्यासिक्यां मौसलपर्वणि अष्टमोऽध्यायः समाप्तः
इदं पर्व समाप्तिमगमत् १६ श्रीलक्ष्मीनारायणार्पणमस्तु शुभं भवतु श्रीकृष्णा

ध्यायः ८ श्रीकृष्णार्पणमस्तु शके १७८४ दुंदुभिनामसंवत्सरे ज्येष्ठ शुक्ल पंचम्यां इदं द्वासर्गं समाप्तिमगमत श्रीसीतारामचंद्राभ्यां नमः

इतिश्रीमन्महाभारतेमौसलपर्वसमाप्तम्

अथश्रीमन्महाभारते महाप्रास्थानिकपर्वप्रारंभः
द्रौपदी
विमान
श्वान
जनमेजय
नारद
राजेपांडव
भेटीसआले
पांडव
भीम
नकुळ
सहदेव

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीवेदव्यासायनमः कृतकृत्यानांदुःसहदुःखग्रस्तानांमहाप्रस्थानादिनाउपायेनदेहत्यागोयुक्त इतिपांडवाचा रेणप्रदर्शयन्महाप्रास्थानिकंपर्वारभते प्रसंगाच्च स्वर्गतिहेतून्गुणान् स्वर्गतिप्रतिबंधकान् दोषांश्च दर्शयति संक्षेपेण एवंवृष्ण्यंधककुले इत्यादिना १ प्रस्थाने स्वर्गंतुंगृहान्निःसरणे २ पाशान्कृतमाकर्षमरणमितियावत् नदहंमन्ये अंगीकरोमिं त्वमप्येनत् द्रष्टुं आलोचितुं ३ कालःकाल इ- तिनित्यार्थेद्विरुक्तिः अपरिहार्यःकालोमृत्युःसोदैवास्तुकिंचिरेणेत्याशयः ४ ५ धर्मकाम्ययाप्रव्रजनंततउद्वेगेन परिददौतदधीनंकृतवान् तस्या

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः श्रीवेदव्यासायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततो जयमुदीरयेत् १ जनमेजयउवाच एवंवृष्ण्यंधककुलेश्रुत्वामौसलमाहवम् पांडवाःकिमकुर्वंततथाकृष्णेदिवंगते १ वैशंपायन उवाच श्रुत्वैवंकौरवोराजावृष्णीनांकदनंमहत् प्रस्थानेमतिमाधायवाक्यमर्जुनमब्रवीत् २ कालःपचतिभूतानिसर्वाण्येवमहा मते कालपाशमहंमन्येत्वमपिद्रष्टुमर्हसि ३ इत्युक्तःसतुकौंतेयःकालःकालइतिब्रुवन् अन्वपद्यततद्वाक्यंभ्रातुर्ज्येष्ठस्यधीमतः ४ अर्जुनस्यमतंज्ञात्वाभीमसेनोयमौतथा अन्वपद्यंततद्वाक्यंयदुक्तंसव्यसाचिना ५ ततोयुयुत्सुमानाय्यप्रव्रजन्धर्मकाम्यया रा- ज्यंपरिददौसर्वंवैश्यापुत्रेयुधिष्ठिरः ६ अभिषिच्यस्वराज्येचराजानंचपरीक्षितम् दुःखार्तश्चाब्रवीद्राजासुभद्रांपांडवाग्रजः ७ एषपुत्रस्यतेपुत्रःकुरुराजोभविष्यति यदूनांपरिशेषश्चवज्रोराजाकृतश्चह ८ परिक्षिद्धास्तिनपुरेशक्रप्रस्थेचयादवः वज्रोराजा त्वयारक्ष्योमाचाधर्मेमनःकृथाः ९ इत्युक्त्वाधर्मराजस्सवासुदेवस्यधीमतः मातुलस्यचवृद्धस्यरामादीनांतथैवच १० भ्रातृभिः सहधर्मात्माकृत्वोदकमतंद्रितः श्राद्धान्युद्दिश्यसर्वेषांचकारविधिवत्तदा ११ द्वैपायनंनारदंचमार्कंडेयंतपोधनम् भारद्वाजंयाज्ञव ल्क्यंहरिमुद्दिश्ययत्नवान् १२ अभोजयत्स्वादुभोज्यंकीर्तयित्वाचशार्ङ्गिणम् ददौरत्नानिवासांसिग्रामानश्वान्रथांस्तथा १३ स्त्रियश्चद्विजमुख्येभ्यस्तदाशतसहस्रशः कृपमभ्यर्च्यचगुरुमथपौरपुरस्कृतम् १४ शिष्यंपरिक्षितंतस्मैददौभरतसत्तम ततस्तुप्र कृतीःसर्वाःसमानाय्ययुधिष्ठिरः १५ सर्वमाचष्टराजर्षिश्चिकीर्षितमथात्मनः तेश्रुत्वैववचस्तस्यपौरजानपदाजनाः १६ भृशमुद्विग्न मनसोनाभ्यनंदंततद्वचः नैवंकर्तव्यमितितेतदोचुस्तंनराधिपम् १७

भिषेकेऽनधिकारात स्वराज्येहास्तिनपुरे ७ ८ अ- धर्मेपरिक्षिद्वज्रयोर्बाल्ययोररक्षणजे महाप्रस्थानमियंमाकुर्यादितिभावः ९ १० ११ १२ १३ स्त्रियःदासीः १४ १५ १६ १७ ६७

अनुमान्य अनुमतिं प्रदं कृत्वा १८ १९ २० नैष्ठिकीं पर्यंतिकीं उत्सर्गेष्टिमित्यर्थः २१ आत्मनि अग्नीन्समारोप्याग्नीनुत्सृज्येतिज्ञेयं
२२ २३ २४ २५ २६ २७ अन्याः युधिष्ठिरादीनां भार्याः श्रुतसोमादीनां मातरः २८ २९ ३० ३१ ३२ लौहित्यं

नचराजातथाकार्षीत्कालपर्यायधर्मवित् ततोनुमान्यधर्मात्मापौरजानपदंजनम् १८ गमनायमतिंचक्रेभ्रातरश्चास्यतेतदा ततःस
राजाकौरव्योधर्मपुत्रोयुधिष्ठिरः १९ उत्सृज्याभरणान्यंगाज्जगृहेवल्कलान्युत भीमार्जुनयमाश्चैवद्रौपदीचयशस्विनी २० तथै
वजगृहुःसर्वेवल्कलानिनराधिप विधिवत्कारयित्वेष्टिंनैष्ठिकींभरतर्षभ २१ समुत्सृज्याप्सुसर्वेग्नीन्प्रतस्थुर्नरपुंगवाः ततःप्ररु
रुदुःसर्वाःस्त्रियोदृष्ट्वानरोत्तमान् २२ प्रस्थितान्द्रौपदीषष्ठान्पुराद्यूतजितान्यथा हर्षोभवच्चसर्वेषांभ्रातॄणांगमनंप्रति २३ युधि
ष्ठिरमतंज्ञात्वावृष्णिक्षयमवेक्ष्यच भ्रातरःपंचकृष्णाचषष्ठीश्वाचैवसप्तमः २४ आत्मनासप्तमोराजानिर्ययौगजसाह्वयात् पौरै-
रनुगतोदूरंसर्वैरंतःपुरैस्तथा २५ नचैनमशकत्कश्चिन्निवर्तस्वेतिभाषितुम् न्यवर्ततततःसर्वेनरानगरवासिनः २६ कृपप्रभृतयश्चैव
युयुत्सुंपर्यवारयन् विवेशगंगांकौरव्यउलूपीभुजगात्मजा २७ चित्रांगदाययौचापिमणिपूरपुरंप्रति शिष्टाःपरिक्षितंत्वन्यामात
रःपर्यवारयन् २८ पांडवाश्चमहात्मानोद्रौपदीचयशस्विनी कृतोपवासाःकौरव्यप्रययुःप्राङ्मुखास्ततः २९ योगयुक्तामहात्मानस्त्या
गधर्ममुपेयुषः अभिजग्मुर्बहून्देशान्सरितःसागरांस्तथा ३० युधिष्ठिरोययावग्रेभीमस्तुतदनंतरम् अर्जुनस्तस्यचान्वेवयमौचापियथा
थाक्रमम् ३१ पृष्ठतस्तुवरारोहाश्यामापद्मदलेक्षणा द्रौपदीयोषितांश्रेष्ठाययौभरतसत्तम ३२ श्वाचैवानुययावेकःप्रस्थितान्पांड
वान्वनम् क्रमेणतेययुर्वीरालौहित्यंसलिलार्णवम् ३३ गांडीवंतुधनुर्दिव्यंनमुमोचधनंजयः रत्नलोभान्महाराजतेचाक्षय्येमहेषु-
धी ३४ अग्निंतेददृशुस्तत्रस्थितंशैलमिवाग्रतः मार्गमावृत्यतिष्ठंतंसाक्षात्पुरुषविग्रहम् ३५ ततोदेवःससप्तार्चिःपांडवानिदमब्र
वीत् भोभोःपांडुसुतावीरापावकंमांनिबोधत ३६ युधिष्ठिरमहाबाहोभीमसेनपरंतप अर्जुनाश्विसुतौवीरौनिबोधतवचोमम ३७
अहमग्निःकुरुश्रेष्ठामयादग्धंचखांडवम् अर्जुनस्यप्रभावेनतथानारायणस्यच ३८ अयंवःफाल्गुनोभ्रातागांडीवंपरमायुधम्
परित्यज्यवनंयातुनानेनार्थोस्तिकश्चन ३९ चक्ररत्नंतुयत्कृष्णेस्थितमासीन्महात्मनि गतंतच्चपुनर्हस्तेकालेनैष्यतितस्यह ४० वरु-
णादाहृतंपूर्वंमयैतत्पार्थकारणात् गांडीवंधनुषांश्रेष्ठंवरुणायैवदीयताम् ४१ ततस्तेभ्रातरःसर्वेधनंजयमचोदयन् सजलेप्राक्षि
पदेतत्तथाक्षय्येमहेषुधी ४२
उदयाचलप्रांतस्थंसमुद्रम् ३३ ३४ ३५ ३६ ३७ ३८ अनेनगांडीवेन अर्थः प्रयोजनं ३९ कालेन अवतारांतरे ४० ४१ ४२ ७

४३ ४४ ४५ ४६ इतिश्रीमहाभारतेमहाप्रास्थानिकेपर्वणिटीकायांप्रथमोऽध्यायः १ ततःदिक्क्रयप्रदक्षिणीकरणानंतरं योगयुक्ताःसमाहित
मनसः १ २ भ्रष्टयोगाद्ध्यानात्स्खलितमानसा ३ ४ ५ पक्षेतितुल्येष्वपिवैषम्येणपूजानकार्येतिभावः ६ अनवेक्ष्यस्वर्गेतरायरूपःस्नेहोमाभूदिति

ततोग्निर्भरतश्रेष्ठतत्रैवांतरधीयत ययुश्चपांडवावीरास्ततस्तेदक्षिणामुखाः ४३ ततस्तेतूत्तरेणैवतीरेणलवणांभसः जग्मुर्भरत
शार्दूलदिशंदक्षिणपश्चिमाम् ४४ ततःपुनःसमावृत्ताःपश्चिमांदिशमेवते ददृशुर्द्वारकांचापिसागरेणपरिप्लुताम् ४५ उदीचींपु
नरावृत्त्ययपुर्भरतसत्तमाः प्रादक्षिण्यंचिकीर्षंतःपृथिव्यायोगधर्मिणः ४६ इतिश्रीमहाभारतेमहाप्रास्थानिकेपर्वणिप्रथमोऽध्या
यः १ वैशंपायनउवाच ततस्तेनियतात्मानउदीचींदिशमास्थिताः ददृशुर्योगयुक्ताश्चहिमवंतंमहागिरिम् १ तंचाप्यतिक्र
मंतस्तेददृशुर्वालुकार्णवम् अवैक्षंतमहाशैलंमेरुंशिखरिणांवरम् २ तेषांतुगच्छतांशीघ्रंसर्वेषांयोगधर्मिणाम् याज्ञसेनीभ्रष्ट
योगानिपपातमहीतले ३ तांतुप्रपतितांदृष्ट्वाभीमसेनोमहाबलः उवाचधर्मराजानंयाज्ञसेनीमवेक्ष्यह ४ नाधर्मश्चरितःक
श्चिद्राजपुत्र्यापरंतप कारणंकिंनुतद्ब्रूहियत्कृष्णापतिताभुवि ५ युधिष्ठिरउवाच पक्षपातोमहानस्याविशेषेणधनंजये त
स्यैतत्फलमद्यैषाभुंक्तेपुरुषसत्तम ६ वैशंपायनउवाच एवमुक्त्वानवेक्ष्यैनांययौभरतसत्तमः समाधायमनोधीमान्धर्मा
त्मापुरुषर्षभः ७ सहदेवस्ततोविद्वान्निपपातमहीतले तंचापिपतितंदृष्ट्वाभीमोराजानमब्रवीत् ८ योयमस्मासुसर्वेषुशुश्रू
षुरनहंकृतः सोयंमाद्रवतीपुत्रःकस्मान्निपतितोभुवि ९ युधिष्ठिरउवाच आत्मनःसदृशंप्राज्ञंनैषोमन्यतकंचन तेनदोषेण
पतितस्तस्मादेषनृपात्मजः १० वैशंपायनउवाच इत्युक्त्वातंसमुत्सृज्यसहदेवंययौतदा भ्रातृभिःसहकौंतेयःशुनाचैवयुधि
ष्ठिरः ११ कृष्णांनिपतितांदृष्ट्वासहदेवंचपांडवम् आर्तोबंधुप्रियःशूरोनकुलोनिपपातह १२ तस्मिन्निपतितेवीरेनकुलेचारुद
र्शने पुनरेवतदाभीमोराजानमिदमब्रवीत् १३ योयमक्षतधर्मात्माभ्रातावचनकारकः रूपेणाप्रतिमोलोकेनकुलःपतितोभुवि १४
इत्युक्तोभीमसेनेनप्रत्युवाचयुधिष्ठिरः नकुलंप्रतिधर्मात्मासर्वबुद्धिमतांवरः १५ रूपेणमत्समोनास्तिकश्चिदित्यस्यदर्शनम् अ
धिकश्चाहमेवैकइत्यस्यमनसिस्थितम् १६ नकुलःपतितस्तस्मादागच्छत्वंवृकोदर यस्ययद्विहितंवीरसोवश्यंतदुपाश्नुते १७
तांस्तुप्रपतितान्दृष्ट्वापांडवःश्वेतवाहनः पपातशोकसंतप्तस्ततोनुपरवीरहा १८

भावः ७ ८ ९ आत्मनइति प्राज्ञ २
त्वाभिमानोपिपतनहेतुरितिभावः १० ११ १२ १३ १४ १५ रूपेणेतिरूपगर्वान्नकुलःपपातेत्यर्थः १६ १७ १८ ९

१९ २० एकान्हेति शौर्यगर्वादर्जुनोपिमिथ्याप्रतिज्ञत्वात्पपात २१ २२ २३ २४ अत्याशनाद्बलगर्वाच्चभीमसेनःपपातेत्याहातिभुक्त-
मिति २५ २६ इतिश्रीमहाभारतेमहाप्रस्थानपर्वणिटीकायांद्वितीयोऽध्यायः २ ततःसन्नादयन्नित्यस्यबांधवभोज्येवलक्ष्मीश्रेयसीनत्त्व

तस्मिंस्तुपुरुषव्याघ्रेपतितेशक्रतेजसि म्रियमाणेदुराधर्षेभीमोराजानमब्रवीत् १९ अनृतंनस्मराम्यस्यस्वैरेष्वपिमहात्मनः अथकस्य
विकारोयंयेनायंपतितोभुवि २० युधिष्ठिरउवाच एकान्हानिर्दहेयंवैशत्रूनित्यर्जुनोब्रवीत् नचतत्कृतवानेषशूरमानीततोपतत् २१
अवमेनेधनुर्ग्राहानेषसर्वांश्चफाल्गुनः तथाचैतन्नतुतथाकर्त्तव्यंभूतिमिच्छता २२ वैशंपायनउवाच इत्युक्त्वाप्रस्थितोराजाभी
मोथनिपपातह पतितश्चाब्रवीद्भीमोधर्मराजंयुधिष्ठिरम् २३ भोभोराजन्नवेक्षस्वपतितोहंप्रियस्तव किंनिमित्तंचपतनंब्रूहिमे-
यदिवेत्थह २४ युधिष्ठिरउवाच अतिभुक्तंचभवताप्राणेनचविकत्थसे अनवेक्ष्यपरंपार्थतेनासिपतितःक्षितौ २५ इत्यु
क्त्वातंमहाबाहुर्जगामानवलोकयन् श्वाप्येकोनुययौयस्तेबहुशःकीर्त्तितोमया २६ इतिश्रीमहाभारतेमहाप्रस्थानिकेपर्वणिद्विती
योऽध्यायः २ वैशंपायनउवाच ततःसन्नादयन्शक्रोदिवंभूमिंचसर्वशः रथेनोपययौपार्थमारोहेत्यब्रवीच्चतम् १ सभ्रातॄन्पति
तान्दृष्ट्वाधर्मराजोयुधिष्ठिरः अब्रवीच्छोकसंतप्तःसहस्राक्षमिदंवचः २ भ्रातरःपतितामेत्रगच्छेयुस्तेमयासह नविनाभ्रातृभिः
स्वर्गमिच्छेगंतुंसुरेश्वर ३ सुकुमारीसुखार्हाचराजपुत्रीपुरंदर सास्माभिःसहगच्छेततद्भवाननुमन्यताम् ४ शक्रउवाच
भ्रातॄन्द्रक्ष्यसिस्वर्गेत्वमग्रतस्त्रिदिवंगतान् कृष्णयासहितान्सर्वान्माशुचोभरतर्षभ ५ निक्षिप्यमानुषंदेहंगतास्तेभरतर्षभ अ
नेनत्वंशरीरेणस्वर्गंगंतानसंशयः ६ युधिष्ठिरउवाच अयंश्वाभूतभव्येशभक्तोमांनित्यमेवह सगच्छेतुमयासार्धमानृशं-
स्याहिमेमतिः ७ शक्रउवाच अमर्त्यत्वंमत्समत्वंचराजन्श्रियंचकृत्स्नांमहतींचैवसिद्धिम् संप्राप्तोद्यस्वर्गसुखानिचत्वंत्यज
श्वानंनात्रनृशंसमस्ति ८ युधिष्ठिरउवाच अनार्यमार्येणसहस्रनेत्रशक्यंकर्त्तुंदुष्करमेतदार्य मामेश्रियासंगमनंतयास्तुयस्याः
कृतेभक्तजनंत्यजेयम् ९ इंद्रउवाच स्वर्गेलोकेश्ववतांनास्तिधिष्ण्यमिष्टापूर्त्तंक्रोधवशाहरंति ततोविचार्यक्रियतांधर्मराजत्यज
श्वानंनात्रनृशंसमस्ति १० युधिष्ठिरउवाच भक्तत्यागंप्राहुरत्यंतपापंतुल्यंलोकेब्रह्मवध्याकृतेन तस्मान्नाहंजातुकथंचनाद्यत्यक्ष्या
म्येनंस्वसुखार्थीमहेंद्र ११

मात्रभोज्येतितात्पर्यं १ २ ३ ४ ५ ६ अयंश्वेत्यादेर्नीचतरमपिसंनिहितंप्रथमंस्वसुखविभागेनसंभावयेत्पश्चा
त्स्वयंतद्भोक्तव्यमितितात्पर्यं ७ नात्रेतिअस्पृश्यसंगत्यागेनृशंसंनिर्दयत्वंनास्ति ८ ९ श्ववतांमशकचित्वानधिष्ण्यंस्थानंस्वर्गेनास्ति क्रोधवशानामदेवगणाः
अशुचेरिष्टापूर्त्तफलंघ्नंति १० ११ ६७

१२ १३ १४ १५ १६ १७ अभिजातोसिकुलीनोसिपितुःपांडोः १८ १९ २० २१ २२ २३ २४ २५ निकायस्थोनिवासस्थः २६

भीतंभक्तंनान्यदस्तीतिचार्तंप्राप्तंक्षीणंरक्षणेप्राणलिप्सुम् प्राणत्यागादप्यहंनैवमोक्तुंयतेयंवैनित्यमेतद्व्रतंमे १२ इंद्रउवाच शु
नांदृष्टंक्रोधवशाहरंतियद्दत्तमिष्टंविवृतमथोहुतंच तस्माच्छुनस्त्यागमिमंकुरुष्वशुनस्त्यागात्प्राप्स्यसेदेवलोकम् १३ त्यक्त्वाभ्रा-
तॄन्दयितांचापिकृष्णांप्राप्तोलोकःकर्मणास्वेनवीर श्वानंचैनंनत्यजसेकथंनुत्यागंकृत्स्नंचास्थितोमुह्यसेद्य १४ युधिष्ठिरउवाच
नविद्यतेसंधिरथापिविग्रहोमृतैर्मर्त्यैरितिलोकेषुनिष्ठा नतेमयाजीवयितुंहिशक्यास्तस्मात्त्यागस्तेषुकृतोनजीवताम् १५ भीतिप्र
दानंशरणागतस्यस्त्रियावधोब्राह्मणस्वापहारः मित्रद्रोहस्तानिचत्वारिशक्रभक्तत्यागश्चैवसमोमतोमे १६ वैशंपायनउवाच
तद्धर्मराजस्यवचोनिशम्यधर्मस्वरूपीभगवानुवाच युधिष्ठिरंप्रीतियुक्तोनरेंद्रंश्लक्ष्णैर्वाक्यैःसंस्तवसंप्रयुक्तैः १७ धर्मराजउवा
च अभिजातोसिराजेंद्रपितुर्वृत्तेनमेधया अनुक्रोशेनचानेनसर्वभूतेषुभारत १८ पुराद्वैतवनेचासिमयापुत्रपरीक्षितः पा
नीयार्थेपराक्रांतायत्रतेभ्रातरोहताः १९ भीमार्जुनौपरित्यज्ययत्रत्वंभ्रातरावुभौ मात्रोःसाम्यमभीप्सन्वैनकुलंजीवमिच्छसि
२० अयंश्वाभक्तइत्येवंत्यक्तोदेवरथस्त्वया तस्मात्स्वर्गेनतेतुल्यःकश्चिदस्तिनराधिप २१ अतस्त्वयाक्षयालोकाःस्वशरीरेणभार
त प्राप्तोसिभरतश्रेष्ठदिव्यांगतिमनुत्तमाम् २२ वैशंपायनउवाच ततोधर्मश्चशक्रश्चमरुतश्चाश्विनावपि देवादेवर्षयश्चैवर
थमारोप्यपांडवम् २३ प्रययुःस्वैर्विमानैस्तेसिद्धाःकामविहारिणः सर्वेविरजसःपुण्याःपुण्यवाग्बुद्धिकर्मिणः २४ सतंरथंसमा
स्थायराजाकुरुकुलोद्वहः ऊर्ध्वमाचक्रमेशीघ्रंतेजसावृत्यरोदसी २५ ततोदेवनिकायस्थोनारदःसर्वलोकवित् उवाचोच्चैस्तदावा-
क्यंबृहद्वादीबृहत्तपाः २६ येपिराजर्षयःसर्वेतेचापिसमुपस्थिताः कीर्तिंप्रच्छाद्यतेषांवैकुरुराजोधितिष्ठति २७ लोकानावृत्यय
शसातेजसावृत्तसंपदा स्वशरीरेणसंप्राप्तंनान्यंशुश्रुमपांडवात् २८ नारदस्यवचःश्रुत्वाराजावचनमब्रवीत् देवानामंत्र्यधर्मा
त्मास्वपक्षांश्चैवपार्थिवान् २९ शुभंवायदिवापापंभ्रातॄणांस्थानमद्यमे तदेवप्राप्तुमिच्छामिलोकानन्यान्नकामये ३० राज्ञ
स्तुवचनंश्रुत्वादेवराजःपुरंदरः आनृशंस्यसमायुक्तंप्रत्युवाचयुधिष्ठिरम् ३१

वाक्यमेवादर्यंपीति समुपस्थिताःस्मृतिविषयाःसंति २७ २८ २९ यदेवभ्रातॄणांस्थानंतदेवप्राप्तुमिच्छामि ३० ३१ छ छ छ

३२ ३३ ३४ ३५ ३६ बृहतीश्यामा बृहतीपुष्पवत्श्यामा श्यामारुणवर्णेत्यर्थः सायत्रगमिष्यतितत्रैवाहंगमिष्यामीत्यर्थः ३७

स्थानेस्मिन्वसराजेंद्रकर्मभिर्निर्जितैःशुभैः किंत्वंमानुष्यकंलोकंमद्यापिपरिकर्षसि ३२ सिद्धिंप्राप्तोसिपरमांयथानान्यःपुमान्क्वचित नैवतेंभ्रातरःस्थानंसंप्राप्ताःकुरुनंदन ३३ अद्यापिमानुषोभावःस्पृशतेत्वांनराधिप स्वर्गोयंपश्य
देवर्षीन्सिद्धांश्चत्रिदिवालयान् ३४ युधिष्ठिरस्तुदेवेंद्रमेवंवादिनमीश्वरम पुनरेवाब्रवीद्धीमानिदंवचनमर्थवत् ३५
तैर्विनानोत्सहेवस्तुमिहदैत्यनिबर्हण गंतुमिच्छामितत्राहंयत्रमेभ्रातरोगताः ३६ यत्रसाबृहतीश्यामाबुद्धिसत्वगुणा
न्विता द्रौपदीयोषितांश्रेष्ठायत्रचैवगतामम ३७ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांमहाप्रस्था
निकेपर्वणितृतीयोऽध्यायःसमाप्तः ३ ७ ७ ७ श्रीकृष्णार्पणमस्तु शुभमस्तु ७ ७
अस्यानंतरंस्वर्गारोहणपर्वभविष्यति तस्यायमाद्यःश्लोकः जनमेजयउवाच स्वर्गंत्रिविष्टपंप्राप्यममपूर्वपि
तामहाः पांडवाधार्तराष्ट्राश्चकानिस्थानानिभेजिरे १ ७ ७ ७ ७ ७ ७

इतिनैलकंठीयेभारतभावदीपेमहाप्रस्थानिकपर्वप्रकाशेतृतीयोऽध्यायः ३ श्रीकृष्णार्पणमस्तु शुभमस्तु ७ ७ ७ ७

इतिश्रीमन्महाभारतेमहाप्रास्थानिकंपर्वसमाप्तम्


दुर्योधन
वैकुंठ
भगवान
धर्म
भीम
अर्जुन
नकुल
सहदेव
अथश्रीमन्महाभारतेस्वर्गारोहणपर्वप्रारंभः
नारद
यमधर्म
धर्म
भीम
अर्जुन
द्रौपदी

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः पूर्वस्मिन्पर्वणिधर्मस्यफलभूतास्त्यागनृशंस्यादयोयुधिष्ठिरदृष्टांतेनदर्शिताः इदानींतस्यमुख्यंफलंदर्शयितुंस्वर्गारोहणपर्वआरभ्यते स्वर्गंत्रिविष्टपमिति यथाभूयस्यांसंख्यायामल्पसंख्यांतर्भवति एवंत्रीणिविष्टपानिभुवनानिफलोत्कर्षवशान्यत्रांतर्भवंति तादृशमपिस्वर्गंप्राप्य विष्टपंभुवनंजगदित्यमरः १ २ ३ ४ ५ ततइति स्वर्गेप्यमर्षोदुस्त्यजइतिसंस्काराणांप्राबल्यमुक्तम् ६ ७ हताः अस्माभिःसंधिरार्षः ८ ९ १० विरुद्धंवैरादिकंनश्यति अंतर्धीयते ११ १२ १३ १४ अभीतइतिच्छेदः १५ १६ १७ १८ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १ जनमेजयउवाच स्वर्गंत्रि
विष्टपंप्राप्यममपूर्वपितामहाः पांडवाधार्त्तराष्ट्राश्चकानिस्थानानिभेजिरे १ एतदिच्छाम्यहंश्रोतुंसर्वविद्वासिमेमतः महर्षिणाभ्य
नुज्ञातोव्यासेनाद्भुतकर्मणा २ वैशंपायनउवाच स्वर्गंत्रिविष्टपंप्राप्यतवपूर्वपितामहाः युधिष्ठिरप्रभृतयोयदकुर्वंततच्छृणु
३ स्वर्गंत्रिविष्टपंप्राप्यधर्मराजोयुधिष्ठिरः दुर्योधनंश्रियाजुष्टंददर्शासीनमासने ४ भ्राजमानमिवादित्यंवीरलक्ष्म्याभिसंवृतम् दे
वैर्भ्राजिष्णुभिःसाध्यैःसहितंपुण्यकर्मभिः ५ ततोयुधिष्ठिरोदृष्ट्वादुर्योधनममर्षितः सहसासन्निवृत्तोभूच्छ्रियंदृष्ट्वासुयोधने ६ ब्रुव
न्नुच्चैर्वचस्तान्वैनाहंदुर्योधनेनवै सहितःकामयेलोकान्लुब्धेनादीर्घदर्शिना ७ यत्कृतेपृथिवीसर्वासुहृदोबांधवास्तथा हतास्मा
भिःप्रसह्याजौक्लिष्टैःपूर्वंमहावने ८ द्रौपदीचसभामध्येपांचालीधर्मचारिणी पर्यकृष्यतानवद्यांगीपत्नीनोगुरुसन्निधौ ९ अस्ति
देवानसेकामःसुयोधनमुदीक्षितुम् तत्राहंगंतुमिच्छामियत्रतेभ्रातरोमम १० नैवमित्यब्रवीत्तंतुनारदःप्रहसन्निव स्वर्गेनिवासे
राजेंद्रविरुद्धंचापिनश्यति ११ युधिष्ठिरमहाबाहोमैवंवोचःकथंचन दुर्योधनंप्रतिनृपंशृणुचेदंवचोमम १२ एषदुर्योधनोराजापूज्य
तेत्रिदशैःसह सद्भिश्चराजप्रवरैर्यइमेस्वर्गवासिनः १३ वीरलोकगतिंप्राप्तायुद्धेहुत्वात्मनस्तनुम् यूयंसर्वेसुरसमाःसदेवानेनहिंसिताः
१४ सएषःक्षत्रधर्मेणस्थानमेतदवाप्तवान् भयेमहतियोभीतोबभूवपृथिवीपतिः १५ नतन्मनसिकर्तव्यंपुत्रयद्द्यूतकारितम् द्रौ
पद्याश्चपरिक्लेशंनचिंतयितुमर्हसि १६ येचान्येपिपरिक्लेशायुष्माकंज्ञातिकारिताः संग्रामेष्वथवान्यत्रनतान्संस्मर्तुमर्हसि १७ समा
गच्छयथान्यायंराजादुर्योधनेनवै स्वर्गोयंनेहवैराणिभवंतिमनुजाधिप १८

नारदेनैवमुक्तस्तुकुरुराजोयुधिष्ठिरः भ्रातॄन्पप्रच्छमेधावीवाक्यमेतदुवाचह १९ यदिदुर्योधनस्यैतेवीरलोकाःसनातनाः अध
र्मज्ञस्यपापस्यपृथिवीसुहृदद्रुहः २० यत्कृतेपृथिवीनष्टासहयासनरद्विपा वयंचमन्युनादग्धावैरंप्रतिचिकीर्षवः २१ येतेवीरामहा
त्मानोभ्रातरोमेमहाव्रताः सत्यप्रतिज्ञालोकस्यशूरावैसत्यवादिनः २२ तेषामिदानींकेलोकाद्रष्टुमिच्छामितानहम् कर्णंचैवमहात्मा
नंकौंतेयंसत्यसंगरम् २३ धृष्टद्युम्नंसात्यकिंचधृष्टद्युम्नस्यचात्मजान् येचशस्त्रैर्वधंप्राप्ताःक्षत्रधर्मेणपार्थिवाः २४ क्वनुतेपार्थिवाब्र
ह्मन्नैतान्पश्यामिनारद विराटद्रुपदौचैवधृष्टकेतुमुखांश्चतान् २५ शिखंडिनंतुपांचाल्यंद्रौपदेयांश्चसर्वशः अभिमन्युंचदुर्धर्षंद्रष्टुमि
च्छामिनारद २६ इतिश्रीमहाभारतेस्वर्गारोहणपर्वणिप्रथमोऽध्यायः १ युधिष्ठिरउवाच नेहपश्यामिविबुधाराधेयममितौ
जसम् भ्रातरौचमहात्मानौयुधामन्यूत्तमौजसौ १ जुहुवुर्येशरीराणिरणवन्हौमहारथाः राजानोराजपुत्राश्चयेमदर्थेहतारणे २ क्वतेम
हारथाःसर्वेशार्दूलसमविक्रमाः तैरप्ययंजितोलोकःकच्चित्पुरुषसत्तमैः ३ यदिलोकानिमान्प्राप्तास्तेचसर्वेमहारथाः स्थितंवित्तहिमादे
वाःसहितंतैर्महात्मभिः ४ कच्चिन्नतैरवाप्तोयंनृपैर्लोकोक्षयःप्रभुः नतैरहंविनारंस्येभ्रातृभिर्ज्ञातिभिस्तथा ५ मातुर्हिवचनंश्रुत्वात
दासलिलकर्मणि कर्णस्यक्रियतांतोयमितितप्यामितेनवै ६ इदंचपरितप्यामिपुनःपुनरहंसुराः यन्मातुःसदृशौपादौतस्याहममितात्म
नः ७ दृष्ट्वैवतौनानुगतःकर्णंपरबलार्दनम् नह्यस्मान्कर्णसहितान्जयेच्छक्रोपिसंयुगे ८ तमहंयत्रतत्रस्थंद्रष्टुमिच्छामिसूर्यज
म् अविज्ञातोमयायोसौघातितःसव्यसाचिना ९ भीमंचभीमविक्रांतंप्राणेभ्योपिप्रियंमम अर्जुनंचेंद्रसंकाशंयमौचैवयमोपमौ १०
द्रष्टुमिच्छामितांचाहंपांचालींधर्मचारिणीम् नचेहस्थातुमिच्छामिसत्यमेतद्ब्रवीमिवः ११ किंमेभ्रातृविहीनस्यस्वर्गेणसुरसत्तमाः य
त्रतेममसस्वर्गोनायंस्वर्गोमतोमम १२ देवाऊचुः यदिवैतत्रतेश्रद्धागम्यतांपुत्रमाचिरम् प्रियेहितववर्त्तामोदेवराजस्यशासना
त् १३ वैशंपायनउवाच इत्युक्तातंततोदेवादेवदूतमुपादिशन् युधिष्ठिरस्यसुहृदोदर्शयेतिपरंतप १४ ततःकुंतीसुतोराजादेव
दूतश्चजग्मतुः सहितौराजशार्दूलयत्रतेपुरुषर्षभाः १५ अग्रतोदेवदूतस्तुययौराजाचपृष्ठतः पंथानमशुभंदुर्गंसेवितंपापकर्मभिः १६

१७ १८ १९ २० प्रवेरितैः इतस्ततः पातितैः २१ २२ २३ करंभवालुकां श्वेतसूक्ष्मवालुकां भ्राष्ट्रवालुकामित्यर्थः २४ २५ २६ २७ २८

तमसासंवृतंघोरंकेशशैवलशाड्वलम् युक्तंपापकृतांगंधैर्मांसशोणितकर्दमम् १७ दंशोत्पातकभल्लूकमक्षिकामशकावृतम् इ-
तश्चेतश्चकुणपैःसमंतात्परिवारितम् १८ अस्थिकेशसमाकीर्णंकृमिकीटसमाकुलम् ज्वलनेनप्रदीप्तेनसमंतात्परिवेष्टितम् १९ अ
योमुखैश्चकाकाद्यैर्गृध्रैश्चसमभिद्रुतम् सूचीमुखैस्तथाप्रेतैर्विंध्यशैलोपमैर्वृतम् २० मेदोरुधिरयुक्तैश्चछिन्नबाहूरुपाणिभिः नि
कृत्तोदरपादैश्चतत्रतत्रप्रवेरितैः २१ सतत्कुणपदुर्गंधमशिवंलोमहर्षणम् जगामराजाधर्मात्मामध्येबहुविचिंतयन् २२ ददर्शोष्णोद
कैःकीर्णांनदींचापिसुदुर्गमाम् असिपत्रवनंचैवनिशितक्षुरसंवृतम् २३ करंभवालुकास्तप्ताआयसीश्चशिलाःपृथक् लोहकुंभी
श्चतैलस्यक्वथ्यमानाःसमंततः २४ कूटशाल्मलिकंचापिदुःस्पर्शंतीक्ष्णकंटकम् ददर्शचापिकौंतेयोयातनाःपापकर्मिणाम् २५ स
तंदुर्गंधमालक्ष्यदेवदूतमुवाचह कियदध्वानमस्माभिर्गंतव्यमिममीदृशम् २६ क्वचतेभ्रातरोमह्यंतन्ममाख्यातुमर्हसि देशोयंक
श्चदेवानामेतदिच्छामिवेदितुम् २७ ससन्निववृतेश्रुत्वाधर्मराजस्यभाषितम् देवदूतोब्रवीच्चैनमेतावद्गमनंतव २८ निवर्तितव्यो
हिमयातथास्म्युक्तोदिवौकसैः यदिश्रांतोसिराजेंद्रत्वमथागंतुमर्हसि २९ युधिष्ठिरस्तुनिर्विण्णस्तेनगंधेनमूर्छितः निवर्तनेधृत
मनाःपर्यवर्ततभारत ३० ससन्निवृत्तोधर्मात्मादुःखशोकसमाहतः शुश्रावतत्रवदतांदीनावाचःसमंततः ३१ भोभोधर्मजराज
र्षेपुण्याभिजनपांडव अनुग्रहार्थमस्माकंतिष्ठतावन्मुहूर्तकम् ३२ आयातित्वयिदुर्धर्षेवातिपुण्यःसमीरणः तवगंधानुगस्तात
येनास्मान्सुखमागमत् ३३ तवेयंपार्थदीर्घस्यकालस्यपुरुषर्षभ सुखमासादयिष्यामस्त्वांदृष्ट्वाराजसत्तम ३४ संतिष्ठस्वमहाबा
होमुहूर्तमपिभारत त्वयितिष्ठतिकौरव्ययातनास्मान्नबाधते ३५ एवंबहुविधावाचःकृपणावेदनावताम् तस्मिन्देशेसशुश्राव-
समंताद्वदतांनृप ३६ तेषांतुवचनंश्रुत्वादयावान्दीनभाषिणाम् अहोकृच्छ्रमितिप्राहतस्थौसचयुधिष्ठिरः ३७ सतागिरःपुर-
स्ताद्वैश्रुतपूर्वाःपुनःपुनः ग्लानानांदुःखितानांचनाभ्यजानतपांडवः ३८ अबुध्यमानस्तावाचोधर्मपुत्रोयुधिष्ठिरः उवाचकेभवंतोवै
किमर्थंचेहतिष्ठत ३९ इत्युक्तास्तेततःसर्वेसमंतादवभाषिरे कर्णोहंभीमसेनोहमर्जुनोहमितिप्रभो ४० नकुलःसहदेवोहंधृष्टद्युम्नोह
मित्यत द्रौपदीद्रौपदेयाश्चइत्येवंतेविचुक्रुशुः ४१

२९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ छ. छ. छ.

४२ ४३ ४४ ४५ ४६ ४७ ४८ विममर्शविचारंकृतवान् ४९ ५० ५१ ५२ ५३ ५४ इतिस्वर्गारोहणप

तावाचःसतदाश्रुत्वातद्देशसंदर्शान्नृप ततोविममृषेराजाकिंन्विदंदैवकारितम् ४२ किंतुतत्कलुषंकर्मकृतमेभिर्महात्मभिः क
र्णेनद्रौपदेयैर्वापांचाल्यावासुमध्यया ४३ यइमेपापगंधेस्मिन्देशेसंतिसुदारुणे नाहंजानामिसर्वेषांदुष्कृतंपुण्यकर्मणाम् ४४
किंकृत्वाधृतराष्ट्रस्यपुत्रोराजासुयोधनः तथाश्रियायुतःपापैःसहसर्वैःपदानुगैः ४५ महेंद्रइवलक्ष्मीवानास्तेपरमपूजितः कस्येदा
नींविकारोयंयइमेनरकंगताः ४६ सर्वधर्मविदःशूराःसत्यागमपरायणाः क्षत्रधर्मपराःसंतोयज्वानोभूरिदक्षिणाः ४७ किन्नुसुप्तो
स्मिजागर्मिचेतयामिनचेतये अहोचित्तविकारोयंस्याद्वामेचित्तविभ्रमः ४८ एवंबहुविधंराजाविममर्शयुधिष्ठिरः दुःखशोकसमाविष्ट-
श्चिंताव्याकुलितेंद्रियः ४९ क्रोधमाहारयच्चैवतीव्रंधर्मसुतोनृपः देवांश्चगर्हयामासधर्मंचैवयुधिष्ठिरः ५० सतीव्रगंधसंतप्तोदेवदूतमु
वाचह गम्यतांतत्रयेषांत्वंदूतस्तेषामुपांतिकम् ५१ नह्यहंतत्रयास्यामिस्थितोस्मीतिनिवेद्यताम् मत्संश्रयादिमेदूतसुखिनोभ्रातरोहि
मे ५२ इत्युक्तःसतदादूतःपांडुपुत्रेणधीमता जगामतत्रयत्रास्तेदेवराजःशतक्रतुः ५३ निवेदयामासचतद्धर्मराजचिकीर्षितम् यथोक्तं
धर्मपुत्रेणसर्वमेवजनाधिप ५४ इतिश्रीमहाभारतेस्वर्गारोहणपर्वणिद्वितीयोऽध्यायः २ वैशंपायनउवाच स्थितेमुहूर्तंपा
र्थेतुधर्मराजेयुधिष्ठिरे आजग्मुस्तत्रकौरव्यदेवाःशक्रपुरोगमाः १ सचविग्रहवान्धर्मोराजानंप्रसमीक्षितुम् तत्राजगामयत्रासौकुरुरा
जोयुधिष्ठिरः २ तेषुभासुरदेहेषुपुण्याभिजनकर्मसु समागतेषुदेवेषुव्यगमत्तत्तमोनृप ३ नादृश्यंतचतास्तत्रयातनाःपापकर्मिणां
नदीवैतरणीचैवकूटशाल्मलिनासह ४ लोहकुंभ्यःशिलाश्चैवनादृश्यंतभयानकाः विकृतानिशरीराणियानितत्रसमंततः ५ ददर्श
राजाकौरव्यस्तान्यदृश्यानिचाभवन् ततोवायुःसुखस्पर्शःपुण्यगंधवहःशुचिः ६ ववौदेवसमीपस्थःशीतलोतीवभारत मरुतःसह
शक्रेणवसवश्चाश्विनौसह ७ साध्यारुद्रास्तथादित्यायेचान्येपिदिवौकसः सर्वेतत्रसमाजग्मुःसिद्धाश्चपरमर्षयः ८ यत्रराजामहा
ताधर्मसुतःस्थितोऽभवत् ततःशक्रःसुरपतिःश्रियापरमयायुतः ९ युधिष्ठिरमुवाचेदंसांत्वपूर्वमिदंवचः युधिष्ठिरमहाबाहो
श्चाप्यक्षयास्तव १० एह्येहिपुरुषव्याघ्रकृतमेतावताविभो सिद्धिःप्राप्तामहाबाहोलोकाश्चाप्यक्षयास्तव ११

र्वणिटीकायांद्वितीयोऽध्यायः २ ७ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ ७

१२ शत्रूणांस्वर्गः भ्रातॄणांनरकइति युधिष्ठिरस्यईर्ष्याविषादावपनयतिपइति १३ १४ हतःकुंजरइति अश्वत्थामवधेद्रोणमुपाचीर्णः वंचितः गजवा-

नचमन्युस्त्वयाकार्यःशृणुचेदंवचोमम अवश्यंनरकस्तातद्रष्टव्यःसर्वराजभिः १२ शुभानामशुभानांचद्वौराशीपुरुषर्षभ यः
पूर्वंसुकृतंभुंक्तेपश्चान्निरयमेवसः १३ पूर्वंनरकभागयस्तुपश्चात्स्वर्गमुपैतिसः भूयिष्ठंपापकर्मायःसपूर्वंस्वर्गमश्नुते १४ तेनत्वमेवं
गमितोमयाश्रेयोर्थिनानृप व्याजेनहित्वयाद्रोणउपचीर्णःसुतंप्रति १५ व्याजेनैवततोराजन्दर्शितोनरकस्तव यथैवत्वंतथाभीमस्त
थापार्थोयमौतथा १६ द्रौपदीचतथाकृष्णाव्याजेननरकंगताः आगच्छनरशार्दूलमुक्तास्तेचैवकल्मषात् १७ स्वपक्षाश्चैवयेतुभ्यंपा
र्थिवानिहतारणे सर्वेस्वर्गमनुप्राप्तास्तान्पश्यभरतर्षभ १८ कर्णश्चैवमहेष्वासःसर्वशस्त्रभृतांवरः सगतःपरमांसिद्धिंयदर्थंपरितप्य
से १९ तंपश्यपुरुषव्याघ्रमादित्यतनयंविभो स्वस्थानस्थंमहाबाहोजहिशोकंनरर्षभ २० भ्रातॄंश्चान्यांस्तथापश्यस्वपक्षांश्चैवपार्थि
वान् स्वंस्वंस्थानमनुप्राप्तान्व्येतुतेमानसोज्वरः २१ कृच्छ्रंपूर्वंचानुभूयइतःप्रभृतिकौरव विहरस्वमयासार्धंगतशोकोनिरामयः २२
कर्मणांतातपुण्यानांजितानांतपसास्वयम् दानानांचमहाबाहोफलंप्राप्नुहिपार्थिव २३ अद्यत्वांदेवगंधर्वादिव्याश्चाप्सरसोदिवि उप
सेवंतुकल्याणविरजोंबरभूषणाः २४ राजसूयजितांल्लोकानश्वमेधाभिवर्धितान् प्राप्नुहित्वंमहाबाहोतपसश्चमहाफलम् २५ उ
पर्युपरिराज्ञांहितवलोकायुधिष्ठिर हरिश्चंद्रसमाःपार्थयेषुत्वंविहरिष्यसि २६ मांधातायत्रराजर्षिर्यत्रराजाभगीरथः दौष्यंतिर्यत्रभ
रतस्तत्रत्वंविहरिष्यसि २७ एषादेवनदीपुण्यापार्थत्रैलोक्यपावनी आकाशगंगाराजेंद्रतत्राप्लुत्यगमिष्यसि २८ अत्रस्नातस्यभा
वस्तेमानुषोविगमिष्यति गतशोकोनिरायासोमुक्तवैरोभविष्यसि २९ एवंब्रुवतिदेवेंद्रेकौरवेंद्रंयुधिष्ठिरम् धर्मोविग्रहवान्साक्षा-
दुवाचसुतमात्मनः ३० भोभोराजन्महाप्राज्ञप्रीतोस्मितवपुत्रक मद्भक्त्यासत्यवाक्येनक्षमयाचदमेनच ३१ एषातृतीयाजिज्ञासा
तवराजन्कृतामया नशक्यसेचालयितुंस्वभावात्पार्थहेतुतः ३२ पूर्वंपरीक्षितोहित्वंप्रश्नाद्द्वैतवनेमया अरणीसहितस्यार्थेतच्चनि
स्तीर्णवानसि ३३ सोदर्येषुविनष्टेषुद्रौपद्यांतत्रभारत श्वरूपधारिणापुत्रपुनस्त्वंमेपरीक्षितः ३४ इदंतृतीयंभ्रातॄणामर्थेयत्स्था
तुमिच्छसि विशुद्धोसिमहाभागसुखीविगतकल्मषः ३५

चीशब्दोमनुष्यपरत्वेनज्ञापितइत्युपचारच्छलेनेत्यर्थः १५ १६ १७ १८ १९ २० २१ २२ २३ २४ असिक्रम्द्धितान्
खड्गबलेनवृद्धिंप्रापितान् २५ २६ २७ २८ २९ ३० ३१ जिज्ञासापरीक्षा ३२ ३३ स्वर्गाधिरोहणेद्रौपद्यासहसोदर्येषुविनष्टेषुसत्सु श्वरूपधारिणाशुनकरूपिणा
द्रौपद्याइतिपंचमीपाठेतामारभ्येत्यर्थः ३४ ३५

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ यत्रतेकुरवः तत्रदेवैःसह यथाश्रितिद्वयोःसंबंधः ४४ इतिस्वर्गा॰पर्वणिटी॰तृतीयोऽध्यायः३१ ब्राह्मेणब्रह्मणआराध्येन२

नचतेभ्रातरःपार्थनरकार्हाविशांपते मायैषादेवराजेनमहेंद्रेणप्रयोजिता ३६ अवश्यंनरकास्तातद्रष्टव्याःसर्वराजभिः ततस्त्व-
याप्राप्तमिदंमुहूर्तंदुःखमुत्तमम् ३७ नसव्यसाचीभीमोवायमौवापुरुषर्षभौ कर्णोवासत्यवाक्शूरोनरकार्हाश्चिरंनृप ३८ न
कृष्णागतपुत्राचनरकार्हायुधिष्ठिर एह्येहिभरतश्रेष्ठपश्यगंगांत्रिलोकगाम् ३९ एवमुक्तःसराजर्षिस्तवपूर्वपितामहः जगामस
हधर्मेणसर्वैश्चत्रिदिवालयैः ४० गंगांदेवनदींपुण्यांपावनीमृषिसंस्तुताम् अवगाह्यततोराजातनुंतत्याजमानुषीम् ४१ ततोदिव्य
वपुर्भूत्वाधर्मराजोयुधिष्ठिरः निर्वैरोगतसंतापोजलेतस्मिन्समाप्लुतः ४२ ततोययौवृतोदेवैःकुरुराजोयुधिष्ठिरः धर्मेणसहितोधी
मान्स्तूयमानोमहर्षिभिः ४३ यत्रतेपुरुषव्याघ्राःशूराविगतमन्यवः पांडवाधार्त्तराष्ट्राश्चस्वानिस्थानानिभेजिरे ४४ इतिश्रीमहा
भारतेस्वर्गारोहणपर्वणियुधिष्ठिरतनुत्यागेतृतीयोऽध्यायः ३ वैशंपायनउवाच ततोयुधिष्ठिरोराजादेवैःसर्षिमरुद्गणैः स्तू
यमानोययौतत्रयत्रतेकुरुपुंगवाः १ ददर्शतत्रगोविंदंब्राह्मेणवपुषान्वितम् तेनैवदृष्टपूर्वेणसादृश्येनैवसूचितम् २ दीप्यमानंस्व
वपुषादिव्यैरस्त्रैरुपस्थितम् चक्रप्रभृतिभिर्घोरैर्दिव्यैःपुरुषविग्रहैः ३ उपास्यमानंवीरेणफाल्गुनेनसुवर्चसा तथास्वरूपंकौंते
योददर्शमधुसूदनम् ४ तावुभौपुरुषव्याघ्रौसमुद्वीक्ष्ययुधिष्ठिरम् यथावत्प्रतिपेदातेपूजयादेवपूजितौ ५ अपरस्मिन्नथोद्देशेक
र्णंशस्त्रभृतांवरम् द्वादशादित्यसहितंददर्शकुरुनंदनः ६ अथापरस्मिन्नुद्देशेमरुद्गणवृतंविभुम् भीमसेनमथापश्यत्तेनवपुषा-
न्वितम् ७ वायोर्मूर्तिमतःपार्श्वेदिव्यमूर्तिसमन्वितम् श्रियापरमयायुक्तंसिद्धिंपरमिकांगतम् ८ अश्विनोस्तुतथास्थानेदीप्यमा
नौस्वतेजसा नकुलंसहदेवंचददर्शकुरुनंदनः ९ तथाददर्शपांचालींकमलोत्पलमालिनीम् वपुषास्वर्गमाक्रम्यतिष्ठंतीमर्कवर्चस
म् १० अथैनांसहसाराजाप्रष्टुमैच्छद्युधिष्ठिरः ततोस्यभगवानिंद्रःकथयामासदेवराट् ११ श्रीरेषाद्रौपदीरूपात्वदर्थेमानुषंगता
अयोनिजालोककांतापुण्यगंधायुधिष्ठिर १२ रत्यर्थंभवतांह्येषानिर्मिताशूलपाणिना द्रुपदस्यकुलेजाताभवद्भिश्चोपजीविता
१३ एतेपंचमहाभागागंधर्वाःपावकप्रभाः द्रौपद्यास्तनयाराजन्युष्माकममितौजसः १४

उपस्थितंसेवितंअस्त्रैः ३ ४ ५ ६ ७ ८ ९ १० ११ मानुषंमानुषभावम् १२ १३ १४

१५ १६ १७ १८ १९ २० २१ २२ २३ इतिस्वर्गारोहणपर्वणिटीकायांचतुर्थोऽध्यायः ४ ७. पूर्वस्मिन्नध्यायेयोयोयोंऽशोयस्यदेवस्यांशः सस्वर्गंगत्वास्वस्यस्वस्य अंशिनःसान्निध्यंप्रापेत्युक्तम् तत्रसंशयः किमेतेअंशाः कांडरूपाणांवृक्षाणामंशाइवपृथक्संसारित्वंप्राप्ताः उततेष्वेवांशिषुलीयंते आद्येकर्मजदेहपरंपरायास्तत्त्वज्ञानमंतरेणोच्छेदायोगात् तेषांनित्यसंसारित्वमस्मदादिवत्स्यात् द्वितीयेमानुष्यभावेतैः कृतानांकर्मणांनाशप्राप्ति

पश्यगंधर्वराजानंधृतराष्ट्रंमनीषिणम् एनंचत्वंविजानीहिभ्रातरंपूर्वजंपितुः १५ अयंतेपूर्वजोभ्राताकौंतेयःपावकद्युतिः सूर्यपुत्रोऽग्रजःश्रेष्ठोराधेयइतिविश्रुतः १६ आदित्यसहशोयातिपश्यैनंपुरुषर्षभम् साध्यानामथदेवानांविश्वेषांमरुतामपि १७ गणेषुपश्यराजेंद्रवृष्ण्यंधकमहारथान् सात्यकिप्रमुखान्वीरान्भोजांश्चैवमहाबलान् १८ सोमेनसहितंपश्यसौभद्रमपराजितम् अभिमन्युंमहेष्वासंनिशाकरसमद्युतिम् १९ एषपांडुर्महेष्वासःकुंत्यामाद्र्याचसंगतः विमानेनसदाभ्येतिपितातवममांतिकम् २० वसुभिःसहितंपश्यभीष्मंशांतनवंनृपम् द्रोणंबृहस्पतेःपार्श्वेगुरुमेनंनिशामय २१ एतेचान्येमहीपालायोधास्तवचपांडव गंधर्वसहितायांतियक्षपुण्यजनैस्तथा २२ गुह्यकानांगतिंचापिकेचित्प्राप्तानराधिपाः त्यक्त्वादेहंजितःस्वर्गःपुण्यवाग्बुद्धिकर्मभिः २३ इतिश्रीमहाभारतेस्वर्गारोहणपर्वणिचतुर्थोऽध्यायः ४ जनमेजयउवाच भीष्मद्रोणौमहात्मानौधृतराष्ट्रश्चपार्थिवः विराटद्रुपदौचोभौशंखश्चैवोत्तरस्तथा १ धृष्टकेतुर्जयत्सेनोराजाचैवससत्यजित् दुर्योधनसुताश्चैववशकुनिश्चैवसौबलः २ कर्णपुत्राश्चविक्रांताराजाचैवजयद्रथः घटोत्कचादयश्चैवयेचान्येनानुकीर्तिताः ३ येचान्येकीर्तितावीराराजानोदीप्तमूर्तयः स्वर्गेकालंकियंतंतेतस्थुस्तदपिशंसमे ४ आहोस्विच्छाश्वतंस्थानंतेषांतत्रद्विजोत्तम अंतेवाकर्मणांकांतेगतिंप्राप्तानरर्षभाः ५ एतदिच्छाम्यहंश्रोतुंप्रोच्यमानंद्विजोत्तम तपसाहिप्रदीप्तेनसर्वंत्वमनुपश्यसि ६ सौतिरुवाच इत्युक्तःसतुविप्रर्षिरनुज्ञातोमहात्मना व्यासेनतस्यनृपतेराख्यातुमुपचक्रमे ७ वैशंपायनउवाच नशक्यंकर्मणामंतेसर्वेणमनुजाधिप प्रकृतिंकिंनुसम्यक्तेपृच्छैषासंप्रयोजिता ८

प्तिरितिसंदिहानोजनमेजयः पृच्छति भीष्मद्रोणाविति १ २ ३ ४ तेअंतेकांगतिंपुण्यभोगांतेअंशिनासहऐक्यंवासालोक्यंवाशाश्वतंप्राप्नुवंति उतभूमावेवावतरंतीतिप्रश्नः ५ ६ ७ अत्रोत्तरमाहनशक्यमिति कर्मणामंतेसर्वेणप्रकृतिंप्रतिगंतुंनशक्यमित्यध्याहृत्ययोज्यं यदिसर्वोपिजंतुःप्रारब्धेकर्मांतेस्वांप्रकृतिंगच्छेत्तर्हिसर्वेपिमुक्ताःस्युःसंसारश्चादिमान्भवेत ततश्चकृतहानाकृताभ्यागमप्रसंगोविधिप्रतिषेधशास्त्रानर्थक्यंचस्यात्केचिदेवकर्मणामंतेस्वांप्रकृतिंभुंजते ४
नसर्वेइति किंतर्हियेप्रकृतिंनप्राप्तास्तानुद्दिश्यतेत्वयैषापृच्छासम्यक्प्रयोजिता ८

तत्र कांश्चित्स्वर्गप्रापककर्मणामंते स्वैः स्वैः शरीरैस्तादात्म्यं प्रापुः येऽन्ये योगजदृष्ट्या पश्यन् परिगणयति शृण्वित्यादिना इतरे स्वर्गगता अपि पुनश्च्यवंते एतेतूत्तरोत्तरां भूमिं ऊर्ध्वक्रमेण गतिं प्राप्य अंते ब्रह्मणा सह मुच्यंते तेन देवत्वप्राप्तये कर्माणि यज्ञदानतप आदीनि कर्तव्यान्येव न चोक्तदोष इति सर्वमनवद्यं ९ १० ११

शृणु गुह्यमिदं राजन्देवानां भरतर्षभ यदुवाच महातेजा दिव्यचक्षुः प्रतापवान् ९ मुनिः पुराणः कौरव्य पाराशर्यो महाव्रतः अगाधबु-
द्धिः सर्वज्ञो गतिज्ञः सर्वकर्मणाम् १० वसूनेव महातेजा भीष्मः प्राप महाद्युतिः अष्टावेव हि दृश्यंते वसवो भरतर्षभ ११ बृहस्पतिं विवेशा-
थ द्रोणो ह्यंगिरसां वरम् कृतवर्मा तु हार्दिक्यः प्रविवेश मरुद्गणान् १२ सनत्कुमारं प्रद्युम्नः प्रविवेश यथागतम् धृतराष्ट्रो धनेशस्य लो-
कान्प्राप दुरासदान् १३ धृतराष्ट्रेण सहिता गांधारी च यशस्विनी पत्नीभ्यां सहितः पांडुर्महेंद्रसदनं ययौ १४ विराटद्रुपदौ चोभौ धृष्टके-
तुश्च पार्थिवः निशठाक्रूरसांबाश्च भानुः कंपो विदूरथः १५ भूरिश्रवाः शलश्चैव भूरिश्च पृथिवीपतिः कंसश्चैवोग्रसेनश्च वसुदेवस्तथैव
च १६ उत्तरश्च सह भ्रात्रा शंखेन नरपुंगवः विश्वेषां देवतानां ते विविशुर्नरसत्तमाः १७ वर्चा नाम महातेजाः सोमपुत्रः प्रतापवान् सो-
ऽभिमन्युर्नृसिंहस्य फाल्गुनस्य सुतोऽभवत् १८ स युद्ध्वा क्षत्रधर्मेण यथा नान्यः पुमान्क्वचित् विवेश सोमं धर्मात्मा कर्मणोंते महारथः १९
आविवेश रविं कर्णो निहतः पुरुषर्षभ द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकम् २० धृतराष्ट्रात्मजाः सर्वे यातुधाना बलोत्कटाः ऋद्धि-
मंतो महात्मानः शस्त्रपूता दिवं गताः २१ धर्ममेवाविशत्क्षत्ता राजा चैव युधिष्ठिरः अनंतो भगवान्देवः प्रविवेश रसातलम् २२ पिता-
महनियोगाद्धि यो योगाद्गामधारयत् यः स नारायणो नाम देवदेवः सनातनः २३ तस्यांशो वासुदेवस्तु कर्मणोंते विवेश ह षोडश स्त्रीस-
हस्राणि वासुदेवपरिग्रहः २४ अमज्जंस्ताः सरस्वत्यां कालेन जनमेजय तत्र त्यक्त्वा शरीराणि दिवमारुरुहुः पुनः २५ ताश्चैवाप्सरसो
भूत्वा वासुदेवमुपागमन् हतास्तस्मिन्महायुद्धे ये वीरास्तु महारथाः २६ घटोत्कचादयः सर्वे देवान्यक्षांश्च भेजिरे दुर्योधनसहायाश्च
राक्षसाः परिकीर्तिताः २७ प्राप्तास्ते क्रमशो राजन्सर्वलोकाननुत्तमान् भवनं च महेंद्रस्य कुबेरस्य च धीमतः २८ वरुणस्य तथा लोका-
न्विविशुः पुरुषर्षभाः एतत्ते सर्वमाख्यातं विस्तरेण महाद्युते २९ कुरूणां चरितं कृत्स्नं पांडवानां च भारत सौतिरुवाच एतच्छ्रु-
त्वा द्विजश्रेष्ठाः स राजा जनमेजयः विस्मितोऽभवदत्यर्थं यज्ञकर्मांतरेष्वथ ३०

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ एवं पांड-
वानां कथां समाप्य जनमेजयस्य यज्ञे वैशंपायनस्तत्कथामुक्तवानिति प्रकृतमनुसंदधानः सौतिरुवाच एतच्छ्रुत्वेत्यादि ३० ३१ ३२ ३३ ३४

३१ ३२ ३३ समाज्ञातंमयासूतेन व्यासाज्ञयावैशंपायनेनकीर्त्तितंच ३४ ३५ विधिज्ञेनदेवज्ञेन अतींद्रियेणइंद्रियाण्यतिक्रांतेन योगबलादेवसर्व दर्शनसिद्धेरित्याह तपसेतिभाविनात्मनाशोधितचित्तेन ३६ ३७ सर्वेषांतृतीयांतानांनिर्मितमित्यनेनान्वयः अन्येषामपिकीर्त्तिंप्रथयतेतिसंबंधः ३८ ब्रह्मभूया यमोक्षायकल्पते प्रोक्तसाधनानुष्ठानुक्रमेण ३९ ४० अंततः निकटं ४१ अन्हेतिमहाभारतस्यअल्पमपिपश्चिमायांसंध्यायांपठ्यतेचेद्दिनकृतंपापंनश्यति

ततः समापयामासुः कर्मतत्तस्ययाजकाः आस्तीकश्चाभवत्प्रीतः परिमोक्ष्यभुजंगमान् ३१ ततोद्विजातीन्सर्वांस्तान्दक्षिणाभिरतोषयत्
पूजिताश्चापितेराज्ञाततोजग्मुर्यथागतम् ३२ विसर्जयित्वाविप्रांस्तान्राजापिजनमेजयः ततस्तक्षशिलायाःसपुनरायाद्गजाह्वयम्
३३ एतत्तेसर्वमाख्यातंवैशंपायनकीर्त्तितम् व्यासाज्ञयासमाज्ञातंसर्पसत्रेनृपस्यहि ३४ पुण्योयमितिहासाख्यःपवित्रंचेदमुत्तमम् कृ-
ष्णेनमुनिनाविप्रनिर्मितंसत्यवादिना ३५ सर्वज्ञेनविधिज्ञेनधर्मज्ञानवतासता अतींद्रियेणशुचिनातपसाभावितात्मना ३६ ऐश्वर्येवर्त्त
ताचैवसांख्ययोगवतातथा नैकतंत्रविबुद्धेनदृष्ट्वादिव्येनचक्षुषा ३७ कीर्त्तिंप्रथयतालोकेपांडवानांमहात्मनाम् अन्येषांक्षत्रिया-
णांचभूरिद्रविणतेजसाम् ३८ यइदंश्रावयेद्विद्वान्सदापर्वणिपर्वणि धूतपाप्माजितस्वर्गोब्रह्मभूयायकल्पते ३९ कार्त्स्न्यवेदमिमंस
र्वंशृणुयाद्यःसमाहितः ब्रह्महत्यादिपापानांकोटिस्तस्यविनश्यति ४० यश्चेदंश्रावयेच्छ्राद्धेब्राह्मणान्पादमंततः अक्षय्यमन्नपानंवै-
पितॄंस्तस्योपतिष्ठते ४१ अन्हायदेनःकुरुतेइंद्रियैर्मनसापिवा महाभारतमाख्यायपश्चात्संध्यांप्रमुच्यते ४२ यद्रात्रौकुरुतेपापंब्राह्मण
स्त्रीगणैर्वृतः महाभारतमाख्यायपूर्वांसंध्यांप्रमुच्यते ४३ महत्त्वाद्भारतत्वाच्चमहाभारतमुच्यते निरुक्तमस्ययोवेदसर्वपापैःप्रमुच्यते
४४ धर्मेचार्थेचकामेचमोक्षेचभरतर्षभ यदिहास्तितदन्यत्रयन्नेहास्तिनकुत्रचित् ४५ जयोनामेतिहासोयंश्रोतव्योमोक्षमिच्छता
ब्राह्मणेनचराज्ञाचगर्भिण्याचैवयोषिता ४६ स्वर्गकामोलभेत्स्वर्गंजयकामोलभेज्जयम् गर्भिणीलभतेपुत्रंकन्यांवाबहुभागिनीम्
४७ अनागतश्चमोक्षश्चकृष्णद्वैपायनःप्रभुः संदर्भंभारतस्यास्यकृतवान्धर्मकाम्यया ४८ षष्टिंशतसहस्राणिचकारान्यांससंहि-
ताम् त्रिंशच्छतसहस्राणिदेवलोकेप्रतिष्ठितम् ४९

एवंप्रातःसंध्यायांरात्रिकृतमित्यर्थः ४२ ४३ निरुक्तंनामनिर्वचनं ४४ धर्मेचेतिचकारचतुष्ट्यादधर्मादि
चतुष्टयमप्यत्रोक्तंहानार्थमितिबोध्यं ४५ ४६ ४७ अनागतोनागंतुकोनित्यसिद्धइतियावत् एवंविधोयोमोक्षःकैवल्यंतदेवस्वरूपंयस्यसमोक्षःयद्वामोक्तुमिच्छन्
मुचोकर्मकस्यगुणोवेतिसनिर्गुणोअभ्यासलोपश्चमुमुक्षुरित्यर्थः लोकहितइतिभावः ४८ अन्यांवेदचतुष्टयसंहिताभ्यःपृथग्भूतांतदर्थवतीम् ४९ ७ ७

५० ५१ श्रूयतेयेनयः शृणोतीत्यर्थः उभयत्रविभक्तिव्यत्ययश्चार्षः ५२ ५३ भारताध्ययनादितिसार्धश्लोकः यः व्यासः इमांसंहितांशुकंपुत्रं अध्यापयत्तस्य अधीयतोभारताख्यमितिहासंस्मरतः स्मृत्वाचग्रंथरूपेणप्रणयतः भक्त्या परयाश्रद्धयाव्यासएवपूज्यस्तस्यवाक्यंप्रमाणमेवेत्यास्तिक्यबुद्ध्यायेन पुंसाइदंश्रा-

पित्र्येपंचदशज्ञेयंयक्षलोकेचतुर्दश एकंशतसहस्रंतुमानुषेषुप्रभाषितम् ५० नारदोश्रावयद्देवानसितोदेवलःपितॄन् रक्षोयक्षां
च्छुकोमर्त्यान्वैशंपायनएवतु ५१ इतिहासमिमंपुण्यंमहार्थंवेदसंमितम् व्यासोक्तंश्रूयतेयेनकृत्वाब्राह्मणमग्रतः ५२ सनरःसर्व-
कामांश्चकीर्तिंप्राप्येहशौनक गच्छेत्परमिकांसिद्धिमत्रमेनास्तिसंशयः ५३ भारताध्ययनात्पुण्यादपिपादमधीयतः श्रद्धयापरयाभ-
क्त्याश्राव्यतेचापियेनतु यइमांसंहितांपुण्यांपुत्रमध्यापयच्छुकम् ५४ मातापितृसहस्राणिपुत्रदारशतानिच संसारेष्वनुभूतानियांति
यास्यंतिचापरे ५५ हर्षस्थानसहस्राणिभयस्थानशतानिच दिवसेदिवसेमूढमाविशंतिनपंडितम् ५६ ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृ-
णोतिमे धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते ५७ नजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोः नित्योधर्मःसुखदुःखेत्व
नित्येजीवोनित्योहेतुरस्यत्वनित्यः ५८ इमांभारतसावित्रींप्रातरुत्थाययःपठेत् सभारतफलंप्राप्यपरंब्रह्माधिगच्छति ५९ यथासमु
द्रोभगवान्यथाचहिमवान्गिरिः ख्यातावुभौरत्ननिधीतथाभारतमुच्यते ६० इदंभारतमाख्यानंयःपठेत्सुसमाहितः सगच्छेत्परम
सिद्धिमितिमेनास्तिसंशयः ६१ द्वैपायनोष्ठपुटनिःसृतमप्रमेयंपुण्यंपवित्रमथपापहरंशिवंच योभारतंसमधिगच्छतिवाच्यमानंकिंतस्य
पुष्करजलैरभिषेचनेन ६२ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांस्वर्गारोहणपर्वणिपंचमोऽध्यायः ५
जनमेजयउवाच भगवन्केनविधिनाश्रोतव्यंभारतंबुधैः फलंकिंकेचदेवाश्चपूज्यावैपारणेष्विह १ देयंसमाप्तेभगवन्किंचपर्वणि
पर्वणि वाचकःकीदृशश्चात्रमेष्टव्यस्तद्ब्रवीहिमे २ वैशंपायनउवाच शृणुराजन्विधिमिमंफलंयच्चापिभारत श्रुताद्भवतिराजेंद्र
यत्त्वंमामनुपृच्छसि ३ दिविदेवामहीपालक्रीडार्थमवनिंगताः कृत्वाकार्यमिदंचैवततश्चदिवमागताः ४

व्यतेसपुण्यवान् पुण्यकृतात् अपिपादं
श्लोकपादंग्रंथं पादंवाभारतस्याध्ययनात्परमिकांसिद्धिंगच्छेदितिपूर्वेणान्वयः व्यासेभ्यश्चांशवश्चाभारतंपठनीयमित्यर्थः ५४ संध्यायांभारतंपठनीय
मित्यक्रमं तत्रपठनयोग्यंभारतसारसंग्रहंचतुःश्लोकीरूपमाह मातेति ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ इतिस्वर्गारोहणपर्वणिटीकायां
पंचमोऽध्यायः ५ ६ ६ १ २ ३ ४ ६ ६ ६ ६ ६ ६ ६

आदित्यावश्विनौ देवौ लोकपाला महर्षयः गुह्यकाश्च सगंधर्वा नागा विद्याधरास्तथा ५ सिद्धा धर्मः स्वयंभूश्च मुनिः कात्यायनो वरः गिर-
यः सागरा नद्यस्तथैवाप्सरसां गणाः ६ ग्रहाः संवत्सराश्चैव अयनान्यृतवस्तथा स्थावरं जंगमं चैव जगत्सर्वं सुरासुरम् ७ भारते भरतश्रेष्ठ
एकस्थमिह दृश्यते तेषां श्रुत्वा प्रतिष्ठानं नामकर्मानुकीर्त्तनात् ८ कृत्वापि पातकं घोरं सद्यो मुच्येत मानवः इतिहासमिमं श्रुत्वा यथावदनुपूर्व-
शः ९ संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारते तेषां श्राद्धानि देयानि श्रुत्वा भारत भारतम् १० ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ महादा-
नानि देयानि रत्नानि विविधानि च ११ गावः कांस्योपदोहाश्च कन्याश्चैव स्वलंकृताः सर्वकामगुणोपेता यानानि विविधानि च १२ भवनानि वि-
चित्राणि भूमिर्वासांसि कांचनम् वाहनानि च देयानि हया मत्ताश्च वारणाः १३ शयनं शिबिकाश्चैव स्यंदनाश्च स्वलंकृताः यद्यद्गृहे वरं किंचि-
द्यदस्ति महि महत्सु १४ तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च सूनवः श्रद्धया परया दत्तं क्रमशस्तस्य पारगः १५ शक्तितः सुमना हृष्टः शुश्रूषुर-
विकल्पकः सत्यार्जवरतो दांतः शुचिः शौचसमन्वितः १६ श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृणु शुचिः शीलान्विताचारः शुक्लवा-
सा जितेंद्रियः १७ संस्कृतः सर्वशास्त्रज्ञः श्रद्दधानोऽनसूयकः रूपवान्सुभगो दांतः सत्यवादी जितेंद्रियः १८ दानमानगृहीतश्च का-
र्यो भवति वाचकः अविलंबमनायस्तमद्रुतं धीरमूर्जितम् १९ असंसक्ताक्षरपदं स्वरभावसमन्वितम् त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमी-
रितम् वाचयेद्वाचकः स्वस्थः स्वासीनः सुसमाहितः २० नारायणं नमस्कृत्य नरं चैव नरोत्तमम् देवीं सरस्वतीं चैव ततो जयमुदीरयेत्
२१ ईदृशाद्वाचकाद्राजन्श्रुत्वा भारत भारतम् नियमस्थः शुचिः श्रोता शृण्वन्स फलमश्नुते २२ पारणं प्रथमं प्राप्य द्विजान्कामैश्च त-
र्पयेत् अग्निष्टोमस्य यज्ञस्य फलं वै लभते नरः २३ अप्सरोगणसंकीर्णं विमानं लभते महत् प्रहृष्टः स तु देवैश्च दिव्यं याति समाहि-
तः २४ द्वितीयं पारणं प्राप्य सोऽतिरात्रफलं लभेत् सर्वरत्नमयं दिव्यं विमानमधिरोहति २५ दिव्यमाल्यांबरधरो दिव्यगंधविभूषितः
दिव्यांगदधरो नित्यं देवलोके महीयते २६ तृतीयं पारणं प्राप्य द्वादशाहफलं लभेत् वसत्यमरसंकाशो वर्षाण्ययुतशो दिवि २७ चतु-
र्थे वाजपेयस्य पंचमे द्विगुणं फलम् उदितादित्यसंकाशं ज्वलंतमनलोपमम् २८ विमानं विबुधैः सार्धमारुह्य दिवि गच्छति वर्षायुतानि
भवने शक्रस्य दिवि मोदते २९ षष्ठे द्विगुणमस्तीति सप्तमे त्रिगुणं फलम् कैलासशिखराकारं वैडूर्यमणिवेदिकम् ३०

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३

परिक्षिप्तंच बहुधा मणिविद्रुमभूषितम् विमानंसमधिष्ठायकामगंसाप्सरोगणम् ३१ सर्वाल्लोंकाननुविचरतेद्वितीयइवभास्करः अष्टमेरा
जसूयस्यपारणेलभतेफलम् ३२ चंद्रोदयनिभंरम्यंविमानमभिरोहति चंद्ररश्मिप्रतीकाशैर्हयैर्युक्तंमनोजवैः ३३ सेव्यमानोवरस्त्रीणा
चंद्रकांतंतरैर्मुखैः मेखलानांनिनादेननूपुराणांचनिःस्वनैः ३४ अंकेपरमनारीणांसुखसुप्तोविबुध्यते नवमेक्रतुराजस्यवाजिमेधस्यभा
रत ३५ कांचनस्तंभनिर्व्यूहवैडूर्यकृतवेदिकम् जांबूनदमयैर्दिव्यैर्गवाक्षैःसर्वतोवृतम् ३६ सेवितंचाप्सरःसंघैर्गंधर्वैर्दिविचारिभिः विमा
नंसमधिष्ठायश्रियापरमयाज्वलन् ३७ दिव्यमाल्यांबरधरोदिव्यचंदनभूषितः मोदतेदैवतैःसार्द्धंदिविदेवइवापरः ३८ दशमंपारणंप्राप्य
द्विजातीनभिवंद्यच किंकिणीजालनिर्घोषपताकाध्वजशोभितम् ३९ रत्नवेदिकसंबाधंवैडूर्यमणितोरणम् हेमजालपरिक्षिप्तंप्रवालवल
भीमुखम् ४० गंधर्वैर्गीतकुशलैरप्सरोभिश्चशोभितम् विमानंसुकृतावासंसुखेनैवोपपद्यते ४१ मुकुटेनाग्निवर्णेनजांबूनदविभूषिणा
दिव्यचंदनदिग्धांगोदिव्यमाल्यविभूषितः ४२ दिव्यांल्लोकान्विचरतिदिव्यैर्भोगैःसमन्वितः विबुधानांप्रसादेनश्रियापरमयायुतः ४३
अथवर्षगणानेवंस्वर्गलोकेमहीयते अप्सरोगंधर्वसहितःसहस्राण्येकविंशतिम् ४४ पुरंदरपुरेरम्येशक्रेणसहमोदते दिव्ययानैर्विमानेषु
लोकेषुविविधेषुच ४५ दिव्यनारीगणाकीर्णोनिवसत्यमरोयथा ततःसूर्यस्यभवनेचंद्रस्यभवनेतथा ४६ शिवस्यभवनेराजन्विष्णोर्या
तिसलोकताम् एवमेतन्महाराजनात्रकार्याविचारणा ४७ श्रद्धानेनवैभाव्यमेवमाहगुरुर्मम वाचकस्यतुदातव्यंमनसायद्यदिच्छति ४८
हस्त्यश्वरथयानानिवाहनानिविशेषतः कटकंकुंडलेचैवब्रह्मसूत्रंतथापरम् ४९ वस्त्रंचैवविचित्रंचगंधंचैवविशेषतः देववत्पूजयेत्त
तुविष्णुलोकमवाप्नुयात् ५० अतःपरंप्रवक्ष्यामियानिदेयानिभारत वाच्यमानेतुविप्रेभ्योराजन्पर्वणिपर्वणि ५१ जातिंदेशंचसत्यं
चमाहात्म्यंभरतर्षभ धर्मवृत्तिंचविज्ञायक्षत्रियाणांनराधिप ५२ स्वस्तिवाच्यद्विजानादौततःकार्यंप्रवर्तितं समाप्तेपर्वणिततःस्वश
क्त्यापूजयेद्द्विजान् ५३ आदौतुवाचकंचैववस्त्रगंधसमन्वितम् विधिवद्भोजयेद्राजन्मधुपायसमुत्तमम् ५४

४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ [illegible] [illegible] [illegible] [illegible]

५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९

ततोमूलफलप्रायंपायसंमधुसर्पिषा आस्तिकेभोजयेद्राजन्दद्याच्चैवगुडोदनम् ५५ अपूपैश्चैवपूपैश्चमोदकैश्चसमन्वितम्
सभापर्वणिराजेंद्रहविष्यंभोजयेद्द्विजान् ५६ आरण्यकेमूलमूलैस्तर्पयेत्तुद्विजोत्तमान् अरणीपर्वआसाद्यजलकुंभान्प्रदापयेत्
५७ तर्पणानिचमुख्यानिवन्यमूलफलानिच सर्वकामगुणोपेतंविप्रेभ्योन्नंप्रदापयेत् ५८ विराटपर्वणितथावासांसिविविधानिच
उद्योगेभरतश्रेष्ठसर्वकामगुणान्वितम् ५९ भोजनंभोजयेद्विप्रान्गंधमाल्यैरलंकृतान् भीष्मपर्वणिराजेंद्रदत्वायानमनुत्तमम्
६० ततःसर्वगुणोपेतमन्नंदद्यात्सुसंस्कृतम् द्रोणपर्वणिविप्रेभ्योभोजनंपरमार्चितम् ६१ शय्याश्चदेयाराजेंद्रचापान्यसिवरास्तथा
कर्णपर्वण्यपितथाभोजनंसार्वकामिकम् ६२ विप्रेभ्यःसंस्कृतंसम्यक्दद्यात्संयतमानसः शल्यपर्वणिराजेंद्रमोदकैःसगुडोदनैः ६३ अ
पूपैस्तर्पणैश्चैवसर्वमन्नंप्रदापयेत् गदापर्वण्यपितथामुद्गमिश्रंप्रदापयेत् ६४ स्त्रीपर्वणितथारत्नैस्तर्पयेत्तुद्विजोत्तमान् घृतोदनंपु
रस्ताच्चऐषीकेदापयेत्पुनः ६५ ततःसर्वगुणोपेतमन्नंदद्यात्सुसंस्कृतम् शांतिपर्वण्यपितथाहविष्यंभोजयेद्द्विजान् ६६ आश्वमेधि-
कमासाद्यभोजनंसार्वकामिकम् तथाश्रमनिवासेतुहविष्यंभोजयेद्द्विजान् ६७ मौसलेसार्वगुणिकंगंधमाल्यानुलेपनम् महाप्र
स्थानिकेतद्वत्सर्वकामगुणान्वितम् ६८ स्वर्गपर्वण्यपितथाहविष्यंभोजयेद्द्विजान् हरिवंशसमाप्तौतुसहस्रंभोजयेद्द्विजान् ६९ गा
मेकांनिष्कसंयुक्तांब्राह्मणायनिवेदयेत् तदर्धेनापिदातव्यादरिद्रेणापिपार्थिव ७० प्रतिपर्वसमाप्तौतुपुस्तकंवैविचक्षणः सुवर्णेन
चसंयुक्तंवाचकायनिवेदयेत् ७१ हरिवंशेपर्वणिचपायसंतत्रभोजयेत् पारणेपारणेराजन्यथावद्भरतर्षभ समाप्यसर्वाःप्रयतःसं
हिताःशास्त्रकोविदः शुभेदेशेनिवेश्याथक्षौमवस्त्राभिसंवृतः शुक्लांबरधरःस्रग्वीशुचिर्भूत्वास्वलंकृतः अर्चयेत्तयथान्यायंगंधमाल्यैः
पृथक्पृथक् संहितापुस्तकान्राजन्प्रयतःसुसमाहितः ७२ भक्ष्यैर्मांसैश्चपेयैश्चकामैश्चविविधैःशुभैः हिरण्यंचसुवर्णंचदक्षिणामथदा
पयेत् ७३ देवताःकीर्त्तयेत्सर्वानरनारायणौतथा ततोगंधैश्चमाल्यैश्चस्वलंकृत्यद्विजोत्तमान् ७४ तर्पयेद्विविधैःकामैर्दानैश्चोच्चावचैस्त
था अतिरात्रस्ययज्ञस्यफलंप्राप्नोतिमानवः ७५

७० ७१ ७२ ७३ ७४ ७५ ७. ७. ७. ७. ७. ७. ७.

७६ ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५ ९६ ९७ ९८

प्राप्नुयाच्चक्रतुफलंतथापर्वणिपर्वणि वाचकोभरतश्रेष्ठव्यक्ताक्षरपदस्वरः ७६ भविष्यंश्रावयेद्विद्वान्भारतंभरतर्षभ भुक्तवत्सुद्वि
जेंद्रेषुयथावत्संप्रदापयेत् ७७ वाचकंभरतश्रेष्ठभोजयित्वास्वलंकृतम् वाचकेपरितुष्टेतुशुभाप्रीतिरनुत्तमा ब्राह्मणेषुतुतुष्टेषुप्रसन्नाः
सर्वदेवताः ७८ ततोहिवरणंकार्यंद्विजानांभरतर्षभ सर्वकामैर्यथान्यायंसाधुभिश्चपृथक्विधैः ७९ इत्येषविधिरुद्दिष्टोमयातेद्विपदा-
वर श्रद्दधानेनवैभाव्यंयन्मांत्वंपरिपृच्छसि ८० भारतश्रवणेराजन्पारणेचनृपोत्तम सदायत्नवताभाव्यंश्रेयस्तुपरमिच्छता ८१ भा
रतंशृणुयान्नित्यंभारतंपरिकीर्तयेत् भारतंभवनेयस्यतस्यहस्तगतोजयः ८२ भारतंपरमंपुण्यंभारतेविविधाःकथाः भारतंसेव्यतेदे
वैर्भारतंपरमंपदम् ८३ भारतंसर्वशास्त्राणामुत्तमंभरतर्षभ भारतात्प्राप्यतेमोक्षस्तत्वमेतद्ब्रवीमिते ८४ महाभारतमाख्यानंक्षि
तिंगांचसरस्वतीम् ब्राह्मणान्केशवंचैवकीर्तयन्नावसीदति ८५ वेदेरामायणेपुण्येभारतेभरतर्षभ आदौचान्तेचमध्येचहरिःसर्वत्र
गीयते ८६ यत्रविष्णुकथादिव्याःश्रुतयश्चसनातनाः तच्छ्रोतव्यंमनुष्येणपरंपदमिहेच्छता ८७ एतत्पवित्रंपरममेतद्धर्मनिदर्शनम् ए
तत्सर्वगुणोपेतंश्रोतव्यंभूतिमिच्छता ८८ कायिकंवाचिकंचैवमनसासमुपार्जितम् तत्सर्वंनाशमायातितमःसूर्योदयेयथा ८९ अष्टाद
शपुराणानांश्रवणाद्यत्फलंभवेत् तत्फलंसमवाप्नोतिवैष्णवोनात्रसंशयः ९० स्त्रियश्चपुरुषाश्चैववैष्णवंपदमाप्नुयुः स्त्रीभिश्चपुत्रका
माभिःश्रोतव्यंवैष्णवंयशः ९१ दक्षिणाचात्रदेयावैनिष्कपंचसुवर्णकम् वाचकाययथाशक्त्यायथोक्तफलमिच्छता ९२ स्वर्णशृंगींचकपि
लांसवत्सांवस्त्रसंस्कृताम् वाचकायचदद्याद्धिआत्मनःश्रेयमिच्छता ९३ अलंकारंप्रदद्याच्चपाण्योर्वैभरतर्षभ कर्णस्याभरणंदद्याद्ध
नंचैवविशेषतः ९४ भूमिदानंसमादद्याद्वाचकायनराधिप भूमिदानसमंदानंनभूतंनभविष्यति ९५ शृणोतिश्रावयेद्वापिसततंचैवयो
नरः सर्वपापविनिर्मुक्तोवैष्णवंपदमाप्नुयात् ९६ पितॄनुद्धरतेसर्वानेकादशसमुद्भवान् आत्मानंससुतंचैवस्त्रियंचभरतर्षभ ९७ दशां
शश्चैवहोमोपिकर्तव्योत्रनराधिप इदंमयातवाग्रेचप्रोक्तंसर्वंनरर्षभ ९८ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यां
स्वर्गारोहणपर्वणिसर्वपर्वानुकीर्तननामषष्ठोऽध्यायः ६ श्रीकृष्णार्पणमस्तु शुभंभवतु ७ ७

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवं
शावतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेस्वर्गारोहणपर्वार्थप्रकाशेसमाप्तइतिषष्ठोऽध्यायः ६ ७ ७ श्रीकृष्णार्पणमस्तु ७ ७

श्रीवर्द्धनेनिवसतादधताद्युपाह्वांहेगिष्टइत्यनितरांस्वशिलास्फयंत्रे बापूसदाशिवइतिप्रथितेननाम्नाश्रीमन्महाभारतमंकितंकिल १ अधुनामुंबा
पुर्यांप्रथितंतस्येदमत्रयंत्रवरम् एतस्मात्खलुजनितंविद्वन्मोदार्यमस्फशिवदंतत् २ एतद्विशोधनपटुःप्रथमःस्फशीलःकर्वेल्कुरोपाभिधबालकृष्णः
राजापुराख्येनगरेनिवासीह्यासीत्सदायंशिवभक्तितत्परः ३ तदन्वितःकृष्णशर्मासप्तर्षिनगरस्थितः गुर्जरोपाभिधस्यास्तितेनापीदंविशोधितं ४ बा
पूनाम्नाचविदुषाशास्त्रिणारामशर्मणा गुर्जरोपाभिधानेनविद्वज्जनसुशालिना ५ घंटोपाव्हाभिधानेनगोपालेनापिमार्जितम् गोविंदशर्मणातद्व
त्कुंतापुरनिवासिना ६ एतैरपीदंकतिचिद्भागशःशोधितंखिदम् यथामतिविवेकेनरसज्ञानांमुदेस्तुतत् ७ सर्वैर्विशोधितेचापियत्किंचिदवशिष्यते
श्रीमद्भिःसूरिभिस्तत्रक्षंतव्यंसाधुशीलिभिः ८ वेदाष्टसप्तेंदुमितेशाकेमुंबाख्यपत्तने शच्चौशुक्लद्वितीयायांरवौपुष्येसमापितम् ९

शके १७८४ दुंदुभिनामसंवत्सरे· आषाढेमासेशक्लपक्षेद्वितीयायांतिथौरविवासरेपुष्यनक्षत्रेतद्दिनेयंग्रंथःसमाप्तः


पांडव
कौरव

इति श्रीमन्महाभारतं नीलकंठकृतटीकासहितं समाप्तिमगमत्